सस्वाहाकारप्रयोगनिर्णया समंत्रकोशाच

॥ ऋक्संहिताप्रारभ्यते ॥

लोकनाथ आचार्य श्रीपशुपतिदेवपत्तन काठ

ऋक्संहितास्थपरिशिष्टविषयानुक्रमणिका ।

वेदप्रास्ताविकम्	१
संहिताहोमे प्रमाणम्	३
ऋषिदैवतच्छंदऊहविचारः	५
रोदःशब्दविचारः	७
संहितास्थगायत्र्यादिच्छंदइयत्ता	७
स्वाहावत्यृचः	८
स्वाहावन्मंत्रविचारः	९
पारायणहोमाद्यारंभकालः	१०
वेदपारायणप्रयोगः	१०
संहितास्वाहाकारविधिः	१२
स्वाहाकारप्रयोगः	१४
संहिताहोमांगमृषितर्पणम्	२३
संहिताहोमांगं देवतर्पणम्	२५
शाकलसंहिताऋग्घोमान्वाधानम्	२६
अनुवाकाद्यृग्देवतान्वाधानम्	३५
अनुवाकाद्यृचामृष्यादयः	३५
वासिष्ठविषयेविशेषः	३६
ऋग्विधानम्	३७—५६
ऋक्संहितासंपूर्णा	
सहितास्थमंत्राणांवर्णक्रमकोशः	

॥ विद्वदभ्यर्थनम् ॥

ऋग्वेदकल्पद्रुमशौनकादिप्राच्यद्रुपुष्पाणिधियाविविच्य ।
ऋक्संहिताढ्यांपरिकल्प्यमालांसमर्पयेवैदिककंठदेशे ॥ १ ॥

वेदप्रास्ताविकम् ।

श्रीः ॥ प्रणम्यवेदपुरुषंवेदज्ञानपारिकांक्षिणः ॥ ऋक्संहितायाहोमादेःकुर्वेप्रास्ताविकंक्वचित् ॥

ननु कोऽयंवेदोनाम । कथंवातस्यापौरुषेयत्वेनप्रामाण्यं । केवातस्यविषयप्रयोजनसंबंधाधिकारिणः । नखल्वेतस्मिन्सर्वस्मिन्नसति वेदेप्रवृत्तिः । अत्रोच्यते । इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायंयोग्रंथोवेदयति स वेदः । अलौकिकपदेनप्रत्यक्षानुमानेव्यावर्त्येते । अनुभूयमानस्यस्रक्चंदनवनितादेरिष्टप्राप्तिहेतुत्वमौषधादेरनिष्टपरिहारहेतुत्वंच प्रत्यक्षतःसिद्धं । स्वेनानुभविष्यमाणस्य पुरुषांतरगतस्यच

तथात्वमनुमानगम्यम् । एवंतर्हि भाविजन्मगतमप्यनुमानगम्यमितिचेन्न । तद्विशेषस्यानवगमात् । नखलु ज्योतिष्टोमादिरिष्टप्राप्तिहेतुः कलंजभक्षणवर्जनादिरनिष्टपरिहारहेतुरित्यमुमर्थं वेदव्यतिरेकेणानुमानसहस्रेणापि तार्किकशिरोमणिरप्यवगंतुंशक्नोति । तस्मादलौकिकोपायबोधको वेद इति लक्षणस्य नातिव्याप्तिः । अतएवोक्तं—'प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते । एनं वदंति वेदेन तस्माद्वेदस्य वेदता ॥' इति । सएवोपायो वेदस्यविषयः तद्बोधएव प्रयोजनं तद्बोधार्थी चाधिकारी तेनसहोपकार्योपकारकभावः संबंधः ।

अथवेदानामपौरुषेयत्वेनस्वतःप्रामाण्यमनूद्यते—वेदांश्चैकेसंनिकर्षंपुरुषाख्याः । नन्वस्तुपदानांपदपदार्थसंबंधस्यचनित्यत्वं, वाक्यार्थप्रमितेश्चवाक्यजन्यतयाविधीनांप्रामाण्यं, तथाप्यानुपूर्वीरूपवेदानांनित्यत्वासंभवात्काठकादिसमाख्ययातत्कर्तृकत्वनिश्चयाच्च पौरुषेयत्वंसंभवति । पुरुषेचदोषसंबंधसंभावनयानप्रामाण्यंसंभवति । तथाहि । वेदःप्रागभावप्रतियोगितावच्छेदकधर्मवान् वाक्यत्वात् भारतवदित्यनुमानेनपौरुषेयत्वम् । नचसामान्यधर्मस्यप्रागभावप्रतियोगितानवच्छेदकत्वेनवेदत्वस्यातथात्वादसिद्धिरितिवाच्यम् । वेदत्वस्याताद्दशत्वेपिइदानींतनवेदत्वादीनांतदवच्छेदकतयानासिद्धिः । अन्यथाघटादीनामपौरुषेयत्वप्रसंगः । वस्तुतोवेदत्वंप्रागभावप्रतियोगितावच्छेदकं कार्यधर्मवृत्तित्वात् तद्धटत्ववदित्यनुमानेनवेदत्वस्यापितथात्वात् । अतोवेदानांपौरुषेयत्वम् । एवंचकाठककालापकादिसमाख्या बबरःप्रावाहणिरकामयतेत्याद्यनित्यसंयोगोप्युपपद्यते । तदुक्तं संनिकृष्टकालावेदाइदानींतनाइति । तत्रचास्मदादीनांकर्तृत्वासंभवाद्व्यासादिवदीश्वरएवकर्ता । एवंच 'त्रयोवेदाअजायंतेत्यग्नेर्ऋग्वेदोवायोर्यजुर्वेदः' इत्यादिदर्शनमुपपद्यते । अतोनस्वतःप्रामाण्यमितिचेत् । न । उक्तानुमानस्य वेदत्वंनप्रागभावप्रतियोगितावच्छेदकं सामान्यधर्मत्वादित्यनुमानेनसत्प्रतिपक्षितत्वात् । प्रतियोगिताव-

च्छेदकभेदाभावेन सकलघटप्रागभावैक्येप्रतियोग्युत्पत्तिनाश्यत्वासंभवेनचनित्यत्वापत्तेः । इष्टापत्तौतूत्पन्नस्यपुनरुत्पत्तिप्रसंगः, प्रागभावनाशस्वीकारेघटानुत्पत्तिप्रसंगः। अवयवशस्तन्नाशस्वीकारोनिरवयवत्वादेवायुक्तः । प्रतियोगिभेदेनाभावनानात्वकल्पनेसंसर्गाभावान्योन्याभावयोरैक्यप्रसंगः । अतोनसामान्यधर्मस्यप्रागभावप्रतियोगितावच्छेदकत्वम् । प्रथमानुमानमपि वेदाःप्रागभावप्रतियोगितावच्छेदकधर्माभाववंतोऽस्मर्यमाणकर्तृकत्वादात्मवदित्यन्वयिना, अस्मर्यमाणकर्तृकवाक्यत्वादितिव्यतिरेकिणाचसत्प्रतिपक्षितम् । वेदशून्यकालाभावेनवेदप्रागभावासिद्धेश्च । तथाहि। पूर्वकालोनवेदशून्यःकालत्वाद्वर्तमानकालवत्। पूर्वकालीनंवेदाध्ययनंगुर्वध्ययनपूर्वकं वेदाध्ययनत्वादिदानींतनवेदाध्ययनवत्। वेदानपौरुषेयाःअस्मर्यमाणकर्तृकत्वादित्यनुमानेनापौरुषेयत्वसिद्धेश्च । एवं 'वाचाविरूपनित्यया' इति श्रुतिः। 'स्वयंभूरेषभगवान्वेदोगीतस्त्वयापुरा । शिवाद्याऋषिपर्यंताःस्मर्तारोऽस्यनकारकाः ॥' इतिस्मृतिश्चोपपद्यते । काठकादिसमाख्यातु श्रुतिस्मृतिविरोधात्प्रवचननिमित्तत्वेनोपपादनीया । 'अग्नेर्ऋग्वेदः' इत्यादिश्रुतिरप्यग्निनाज्ञापितइतिव्याख्येया । अनित्यसंयोगोऽपि प्रवाहनित्यतामादायोपपादनीयः । प्रवाहनित्यत्वंचसजातीयप्रागभावसमव्याप्तसजातीयध्वंसकत्वरूपम् । यद्वाबहुक्षीरादिवाक्यवदसत्यकथादिनाविधेयस्तुतिपरत्वेनोपपादनीया । अतोऽपौरुषेयावेदाइतिसिद्धंवेदानांस्वतःप्रामाण्यम् । गागाभट्टः ।

स्वाध्यायविषयेकिंचित्प्रस्तूयते—स्वाध्यायोऽध्येतव्यः । अत्रस्वाध्यायत्वं स्वशाखात्वम् । तत्र स्वत्वंचपरंपरयाध्ययनविषयत्वमनुष्ठानविषयत्वंच । तेन वेदत्रयांतर्गतैकैकशाखापरः स्वाध्यायशब्दः । तेनाध्ययनानुष्ठानयोः स्वपरंपरापरिगृहीताध्ययनानुष्ठानविषयत्वोपपत्तिः । अधीतवेदस्यप्रयोजनवत्त्वंचेत्थमवसेयम् । **विधीनां** प्रवृत्तिजनकप्रवर्तनाज्ञानम्, **अर्थवादानां** प्राशस्त्यज्ञानं, **मंत्राणां**

Digitization by eGangotri. Funding MoE-Delhi

विशिष्टार्थस्मरणं, **नाम्नां** कर्मभेदो गुणफलोपायः, **संकल्पनानां**, **साम्नामक्षराभिव्यक्तिः**, **स्तोभानां** सामकालपूर्तिः, **उपनिषदां** पारलौकिकफलककर्मप्रवृत्तिजनकशरीरव्यतिरिक्तजीवात्मज्ञानं, क्रमज्ञानादिच यथेष्टमूहनीयम् । एवमंगानामपिवेदोपकारकत्वं । तच्च **शिक्षायाः** स्वरादिनिश्चयद्वारा, **कल्पस्य** शाखांतरसंदिग्धविध्युपसंहारद्वारा न्यायलब्धार्थतात्पर्यनिर्णयद्वाराच, **व्याकरणस्य** वैदिकोहविज्ञानद्वारा, **निरुक्तनिघण्ट्वो**र्वैदिकशब्दज्ञानद्वारा, **छंदसां** वैदिकवाक्यपरिमाणद्वारा, **ज्यौतिषस्य** वैदिककर्मप्रयोगोपयोगितिथ्यर्क्षादिज्ञानद्वाराअधीतवेदजन्यार्थज्ञानोपयोगित्वात्सिद्धं सांगोवेदोऽध्येयोनुष्ठेयानितदुदितानिकर्माणीति। तथाच ऋग्वेदस्यैवाखिलवेदाद्यत्वेनाभ्यर्हितत्वात्तदंतर्गतशाकलसंहितामधिकृत्याध्ययनाध्यापनस्वाहाकाराद्युपकर्त्रीयंभूयादितिनैकशोविद्वत्साहाय्येनप्रयतितंमयाअस्याःशोधनादिसंस्करणाय । योजितानिचर्षिदैवतछंदांसिआमूलांततत्तत्सूक्तपत्राधःप्रदेशेषु(   )धनुश्चिह्नांतर्गतततत्तच्छास्त्रार्थविलासभांजि । प्रत्यध्यायमंतेतत्तदंतर्गतदेवतात्यागाःसूक्तभेदपक्षेणदर्शिताः । तथाऋग्वेदकल्पद्रुमादिग्रंथेभ्योविद्वद्भ्यश्च यथावगतंस्वाहाकारनिर्णयप्रयोगाद्यपि प्रस्तावनाव्यवहितत्वेनग्रथितमत्र । अंतेशाकलसंहितावर्तिनामृचामकारादिवर्णक्रमकोशोऽप्यनल्पपरिश्रमेणप्रणीयसमयोजीतिपुस्तकंयावच्छेमुषिपरिष्कृत्य संशोधितंमया । स्वाहाशब्दयोगेऋगंतस्वरस्योदात्तानुदात्तस्वरितत्वप्रतिपत्तिसौकर्यार्थमृगंते+ एतादृगुदात्तचिह्नं* एतादृशं चस्वरितचिह्नं कल्पितंतत्रतत्र। तेनैतादृशचिह्नद्वयहीनाःकेवल ॥ रेखाद्वययुजःशेषाऋचोऽनुदात्तान्ताभवन्तिः । अर्धर्चादावेकैवरेखेतिकल्पितास्त्यत्रपरिपाटी। एवं विहितेपि श्रमपुरःसरंशोधने शरीरिमात्रसाधारणभ्रान्त्यादिसमुत्थंदोषं सौजन्यधुरीणैः सारस्पृहयालुभिः

परिशीलितमरालचातुरीकैर्विपश्चिद्भैरुपेक्ष्यमाणं कृतशोधनंचाशासानः सकलाध्येत्रध्यापकप्रयोजकादिसौकर्यमेतद्ग्रंथात्संभावयन्गुणिजनचक्षुर्घटापथगामितयैवसार्थकतांमन्यमानोगुणिजनपरितोषमेवैतद्व्यापारात्प्रीयमाणोऽखिलजगन्नायकोविदधात्वित्याशास्ते—

प्रमाणसिद्धांतविरुद्धमत्रयत्किंचनाभून्मतिमांद्यदोषात् । मात्सर्यमुत्सार्यतदार्यचित्ताःप्रसादमाधायविशोधयंतु ॥

वा. ल. पणशीकरः ।

अत्रपुस्तकदातृनिर्देशः ।

१ वे ॥ शा ॥ सं ॥ गणेशभट्टआठल्ये आलीबागइत्येतैर्दत्तंमहतापरिश्रमेणतैरेवनिर्मितंस्वाहाकारपुस्तकमेकं ।

२ वे ॥ शा ॥ सं ॥ आत्मारामभटजी अळवणी सांवंतवाडीइत्येतैर्दत्तंस्वीयसंग्रहस्थंकाशीस्थजड्येप्रणीतं ।

३ वे ॥ शा ॥ सं ॥ रामचंद्र(बाबा)पाध्ये गुर्जरभालावलीइत्येतः महामहोपाध्यायगोपालोपाध्यायप्रणीतंसंपाद्यदत्तं ।

४ वे ॥ शा ॥ सं ॥ बाबुरामचंद्रदीक्षितजडेबनारसइत्येतैः ऋग्वेदकल्पद्रुमाख्यमेकमस्मन्निकटेप्रहितंएतान्कोशान्शौनकीयांश्चालोच्यैतदंतर्वर्तिमंत्रभागं वे ॥ रा ॥ कृष्णंभटजीगोरेइत्येतैःसंशोधय्यस्वयंचसंशोध्यप्रकाशितोऽयंग्रंथइतिशम् ।

संहिताहोमप्रमाणं ।

नमःश्रीवेदपुरुषाय ॥ तत्रादौसंहिताहोमेप्रमाणंफलंचप्रायश्चित्तप्रकरणे**बृहदाश्वलायनस्मृतौ**–श्रौताग्निरपिस्मार्ताग्नौप्रायश्चित्ताहुतीर्हुनेत् । संहितागणकूष्मांडपावमान्यादिभिर्द्विजः ॥ स्मार्ताभावेतुकृत्वाग्निंकुर्यादुत्तपनीयकमिति ॥ श्रौताग्निरपीत्यपिनास्मार्ताग्निमानपिस्मार्ताग्नौकुर्यादितिप्रतीयते। प्रायश्चित्ताहुतीरित्यनेनपापनिवृत्तिफलकत्वंबोध्यते। उत्तपनीयकंनाम**आधानसुबोधिन्यां**—दर्भेष्वग्निंसमारोप्यपुनर्दर्भेषुसंयुतं । पुनस्तद्वत्तृतीयोग्निःसएवोत्तपनीयकः ॥ इति । लौकिकमग्निंसंस्कारविशिष्टंकृत्वाकुर्याद्धोममितिशेषः । **श्रुतावपि**—य:स॒मि॒धा॒यआहु॑तीयोवेदे॑नद॒दाश॒मर्तो॑ऽअ॒ग्नये॑ । योनम॑सास्वध्व॒रः ॥ इतिमंत्रेस्वातंत्र्येणसंहिताहोमःप्रतीयते । **तथाचमंत्रार्थः**—अग्नये अग्न्यर्थं । यः मर्तः मनुष्यः । समिधा पालाश्यादिसमिदाधानेन । आहुती आहुत्या आज्यादिसाध्यया। यो वेदेन संहितया तदंतर्गतसर्वमंत्रकरणकहोमेनच । ददाश परिचरतीति ॥ यद्यपीयंश्रुतिर्वेदेनेत्यस्यब्रह्मयज्ञाध्ययनेनेत्यर्थकरणेनपाकयज्ञप्रशंसाकरणपरतयायोजिता तथापिउक्तार्थपरतयापियोजयितुंशक्यते बाधकाभावात् । वेदेनअग्नयेददाशेतिसमभिव्याहृतपदस्वारस्याच्चश्रुतीनांविश्वतोमुखत्वात् । उक्तार्थतात्पर्यनिर्णायिकापूर्वोदाहृता**श्वलायनस्मृति**रप्यनुगृहीताभवति । एतच्छ्रुतिविहितसमिदाधानाद्युक्तकर्मफलं तस्येदर्वंतइत्यग्रिमश्रुतौस्फुटं । **तथाहि**—तस्येदर्वं॑तोरंहयंतऽआ॒शव॒स्तस्य॑द्युम्नित॑म॒ंयशः॑ । नतमंहो॑दे॒वकृ॑तं॒कुत॑श्च॒ननमर्त्य॑कृतंनशत् ॥ इति । **मंत्रार्थः**—तस्यैव आशवः शीघ्रगंतारः । अर्वंतःअश्वाः । रंहयंते वेगंकुर्वंति । शत्रून्प्रसहंतइत्यर्थः । तस्यैव द्युम्नितमं यशः दीप्ततमाकीर्तिश्चभवति । अपिच । तंदेवकृतं देवेषुविहिताकरणेनयत्कृतं । अंहः पापं । कुतश्चन कस्मादपिहेतोः । ननशत् नव्याप्नोति । अशत् नशत्

इतितन्नाम । नचमर्त्यंकृतंमनुष्येषुहिंसादितन्न । इत्येवंपापक्षयकामेनाग्निशुश्रूषाकार्येत्युक्तंभवति । अतःपापक्षयकामेनापिसंहिताहोमोविधेयइतियावत् । किंचउपाकर्मांगत्वेनापि**सांख्यायनसूत्रे**प्रत्यृचंवेदेनजुहुयादित्यादिनाअनेकेहोमविधयोभिहिताः । **तथाचसूत्रं**—अक्षतसक्तूनांधानानांदधिघृतमिश्राणांप्रत्यृचंवेदेनजुहुयादितिहैकआहुःसूक्तानुवाकाद्याभिरितिवाध्यायार्षेयाद्यादिभिरितिमांडूकेयोऽथहस्माहकौषीतकिरग्निमीळेपुरोहितमित्येकाकुषुंभकस्तदब्रवीदावदंस्त्वंशकुनेगृणानाजमदग्निनाधामंतेविश्वंगंतानोयज्ञंयज्ञियायोनःस्वोअरणःप्रतिचक्ष्वविचक्ष्वाग्नेयाहिमरुत्सखायत्तेराजन्छृतंहविरितिद्व्यृचास्तच्छंयोरावृणीमहइत्येकाहुतशेषाद्धविःप्राश्नंतीति ॥

एवं**पराशरस्मृतौ**प्रायश्चित्तप्रकरणेद्वितीयाध्यायेपारायणांगत्वेनदशांशहोमोभिहितः । **तथाहि**—ब्रह्महानरकस्यांतेपांडुकुष्ठीप्रजायते । प्रायश्चित्तंप्रकुर्वीतसयत्पातकशांतये ॥ चत्वारःकलशाःकार्याःपंचरत्नसमन्विताः । पंचपल्लवसंयुक्ताःसितवस्त्रेणवेष्टिताः ॥ कषायपंचकोपेतानानाविधफलान्विताः । सर्वौषधिसमायुक्ताःस्थाप्याःप्रतिदिशंदिशं ॥ रूप्यमष्टदलंपद्मंमध्यकुंभोपरिन्यसेत् । तस्योपरिन्यसेद्देवंब्रह्माणंचचतुर्मुखं ॥ पलार्धार्धप्रमाणेनसुवर्णेनविनिर्मितं । अर्चयेत्पुरुषसूक्तेनत्रिकालंप्रतिवासरं ॥ यजमानःशुभैर्गंधैःपुष्पैर्धूपैर्यथाविधि । पूर्वादिकुंभेषुततोब्राह्मणाब्रह्मचारिणः ॥ पाठयेयुःस्वकान्वेदानृग्वेदप्रभृतीन्शनैः । दशांशेनततोहोमोग्रहशांतिपुरःसरः ॥ मध्येकुंडेविधातव्योघृताक्तैस्तिलव्रीहिभिः । द्वादशाहमिदंकर्मसमाप्यद्विजपुंगवः ॥ भद्रेपीठेयजमानमभिषिंचेद्यथाविधि । ततोदद्याद्यथाशक्तिगोभूहेमतिलादिकं ॥ ब्राह्मणेभ्यस्ततोदेयमाचार्याययथाविधि । आदित्यावसवोरुद्राविश्वेदेवामरुद्गणाः ॥ प्रीताःसर्वेव्यपोहंतुममपापंसुदारुणं । इत्युदीर्यमुहुर्भक्त्यातमाचार्यंक्षमापयेत् ॥ एवंविधानेविहितेश्वेतकुष्ठंविनश्यति ॥ इति ॥ यद्यपि**रुद्रकल्पद्रुमे**लिखित**कालिकापुराणे**—

Digitization by eGangotri. Funding MHRD-Delhi

जपाद्दशांशतोहोमस्तथाहोमात्तुतर्पणं । तर्पणस्यदशांशेनमार्जनंकथितंकिल ॥ मार्जनस्यदशांशेनब्राह्मणानपिभोजयेत् । जपोर्चापूर्वकोहोमस्तर्पणंचाभिषेचनं ॥ भूदेवपूजनंपंचप्रकारोक्तापुरस्क्रियेति ॥ होमाशक्तौजपंकुर्याद्धोमसंख्याचतुर्गुणं । एवंकृतेतुमंत्रस्यजायतेसिद्धिरुत्तमा ॥ इतिवचनैःपुरश्चरणांगजपसामान्यदशांशहोमःकर्तव्यइतिप्रतीयते **तथापि**––पाठयेयुःस्वकान्वेदानृग्वेदप्रभृतीन्शनैः । दशांशेन ततोहोमोग्रहशांतिपुरःसरः ॥ इतिप्रकृतप्रायश्चित्तप्रकरणस्थस्मृतिवचनेनविशिष्यदशांशहोमस्यविहितत्वाद्दशांशहोमोविधेयः । तत्संभवश्चदशावृत्तिपारायणेष्वेवैकावृत्तिरूपदशांशेनेतिफलितं ॥ **केचित्तुमहार्णवादिग्रंथेषु**रूपरुद्रजपांशेषोडशधामंत्रविभागपक्षेषुआद्यमंत्रैराद्यंतमंत्रैर्वादशांशसंख्यापूरणवत्एकसंख्याकादिपारायणपक्षेपिआद्यादिमंत्रैस्तद्दशांशसंख्यापूरणीया । एवंकल्पनायांतत्रयन्मूलंतदेवात्रान्वेषणीयमितिवदंति । **महार्णवेतु** चतुर्षुब्राह्मणेषुऋग्वेदप्रभृतिमंत्रब्राह्मणात्मकवेदचतुष्टयपारायणंकुर्वत्सुप्रतिदिनंपठितवेदभागदशांशसंख्ययाव्याहृतिभिर्होमःकार्यइत्युक्तं । **कैश्चित्तु** संहिताहोमांशेसाधकतयोपन्यस्तानि**ऋग्विधानस्थानि**—एषाहिसंहितावेदैःसर्वब्रह्ममयी निचृत् । उग्रेणतपसादृष्टाविश्वामित्रेणधीमता ॥ होमांश्चजपयज्ञांश्चनित्यंकुर्वीतवैतया ॥ इत्यादीनिवचनानितान्युपक्रमोपसंहाराभ्यांगायत्रीमंत्रहोमपराण्येवनतुसंहिताहोमपराणि । कृत्स्नसंहितायाःविश्वामित्रदृष्टत्वेनक्वाप्यनुपलंभात्गायत्र्यास्तद्दृष्टत्वाच्च निचृदितिविशेषणस्यसकलसंहितायामसंभवात् न्यूनाक्षरत्वेनगायत्र्यंशएवतत्संभवाच्च वेदैश्चतुर्भिर्वेदैःसंहितासम्यग्धृतेतिस्मृत्यक्षरार्थः । एवंचसंहितेतिपदश्रवणमात्रेणकृत्स्नसंहिताहोमपरतयापूर्वोक्तवचनानियोजयतांप्रमादएवेतिसुधियोविभावयंतु ॥ इतिऋग्वेदकल्पद्रुमः ॥ ॥

ऋषिदैवतछंदऊहविचारः ।

तत्रजपहोमादौप्रयुज्यमानेषुसूक्तर्क्षुपूर्वंदेवतोहःकार्यउतछंदऊहइतिविमर्शे**सर्वानुक्रमपरिभाषारंभ**एव– 'ऋषिदैवतच्छंदांस्यनुक्रमिष्यामः' इत्यनुक्रमपरिग्रहाद्, **बह्वृचगृह्यपरिशिष्टेपि**—'अथास्यमंत्राणामृषिदैवतच्छंदांसि' इतितथैवांगीकारात्, तथा**सांख्यायनसूत्रे**– 'ऋषेर्यस्ययोयोमंत्रोयद्दैवत्योयच्छंदस्तथातथातंतंमंत्रमनुब्रूयात्' इतिक्रमनिर्देशात्, एवमाधुनिकयाज्ञिकाचाराच्च 'यद्यपिस्यात्स्वयंब्रह्मात्रैलोक्याकर्षणक्षमः । तथापिलौकिकाचारंमनसापिनलंघयेत् ॥' इतिवचनाद्याज्ञिकाचारानुगृहीतदेवताप्राथम्यबोधकवचनानांकर्मकांडविषयेप्राबल्याद्देवतायाःफलदातृत्वेनाभ्यर्हितत्वात्तत्प्राथम्यंयुक्तंमत्वा। तथाश्रौतस्मार्तकर्मकांडोदधिपारदृश्वभिर्भट्टनारायणकौस्तुभकारशांतिरत्नहेमाद्रिपूर्तकमलाकरादिमहानिबंधकारधुरीणैर्लोकोद्दिधीर्षयानैकशःप्रणीतप्रयोगग्रंथेष्वासेतुहिमालयंप्रथितेषु सूक्तमंत्रादिप्रयोगावसरेऋषिदैवतछंदःक्रमेणैवसूक्तादीनांविनियोगादत्रसंहितायामस्माभिरपिसएवक्रमआदृतः ॥ **परंत्विमंपक्षंप्राचीनानसहंते**—तेषांमतेछंदःप्राथम्यमेवन्याय्यं । तथाच**ऋग्वेदकल्पद्रुमे**—छंदःप्राथम्ये 'आर्षेयछंदोदैवतवित्' इति**सर्वानुक्रम**उदाहृतएव । अन्यान्युदाहरिष्यंते । तथाहि**निरुक्तभाष्योदाहृतसामवेदब्राह्मणे**— 'योहवाअविदितार्षेयछंदोदैवतब्राह्मणेनमंत्रेणयाजयतिवाध्यापयतिवास्थाणुंवर्च्छतिगर्तेवापात्यतेप्रमीयतेवापापीयान्भवति' इति । **अथर्ववेदे**—'गणकऋषिः निचृद्गायत्रीछंदः गणपतिर्देवता' इत्यादि । **पारिजाते**–'आर्षंछंदोदैवतंचविनियोगस्तथैवच। वेदितव्यंप्रयत्नेनब्राह्मणेनविपश्चिता' इति । **गोभिलो**प्येवमाह–'आयात्वित्यनुवाकस्यवामदेवऋषिःस्मृतः। आनुष्टुभंभवेच्छंदोवाग्देवीदेवतास्मृता' इति । **मदनरत्नेकात्यायनः**—'आर्षंछंदश्चदैवत्यंविनियोगस्तथैवच । वेदितव्यंप्रयत्नेनब्राह्मणेनवि

Digitization by eGangotri Funding MoE-Delhi

शेषतः’ इति । **सांख्यायनसूत्रे**—‘ऋषीञ्छंदांसिदेवताःश्रद्धामेधेचतर्पयत्वेति’ सर्वत्रछंदएवपूर्वमभिहितमितिछंदःप्राथम्यमेव न्याय्यं । उदाहृतश्रुतिस्मृतिप्रामाण्यात्, तत्रश्रुतक्रमपरित्यागेबीजाभावात्तासांक्रमबोधनएवतात्पर्याच्च । तथा**बृहद्देवतायां**—‘नियमोयंजपेहोमेऋषिश्छंदोथदैवतं । अन्यथाचेत्प्रयुंजानस्तत्फलंचात्रहीयते ॥ अर्थेप्सवःखल्वृषयश्छंदोभिर्देवताःपुरा । अभ्यधावन्नितिछंदोमध्येत्वाहुर्मनीषिणः ॥ ऋषिंतुप्रथमंब्रूयाच्छंदस्तुतदनंतरं । देवतामथमंत्राणांकर्मस्वेवमितिश्रुतिः’ इति ॥ **आचार्यखंडेगृह्याधानप्रस्तावे**–‘ऋषिंछंदोदैवतंचविनियोगमनुक्रमात् । अस्मृत्वार्षादिकंविप्रोजुहुयाद्वाजपेदपि ॥ यजेद्वाध्यापयेद्वापिनलभेत्कर्मणांफलम्’ इति । तथा**रामवाजपेय्यांगृह्यकारोपि**–‘ऋषिमादौप्रयुंजीतछंदोमध्येनियोजयेत् । देवतामवसानेचमंत्रज्ञोमंत्रसिद्धय’इति। तथाश्रीवत्सगोत्रभास्कर**कृतमहारुद्रपद्धत्यांछंदोभाषायां**–‘वक्तव्यंछंदआदौतुततश्चर्षिःप्रकीर्तितः । देवताविनियोगश्चतैत्तिरीयकपाठकैः ॥ आश्वलायनानांतुऋषिच्छंदोदैवतपूर्वकोविनियोगः । तथाच**परिभाषायां**–‘आर्षेयच्छंदोदैवतविद्याजनाध्यापनाभ्यांश्रेयोधिगच्छती’ति ॥ तथावेदभाष्यकारै**र्माधवाचार्यै**रपिऋग्भ्याष्योपोद्धातांतेऋषिच्छंदोदेवताविचारःकृतः सुरूपकृत्नुमितिसूक्तेतेएवऋषिच्छंदसी इंद्रंपृच्छेतिचतुर्थ्यामृचिलिंगदर्शनादिंद्रोदेवतेतिछंदएवपूर्वमुदाहृतं । आत्वेतिसूक्तेऋषिच्छंदोदेवताविनियोगाःपूर्ववत् । इत्यादिषुबहुषुस्थलेषुछंदएवपूर्वंधृतं । निरुक्तभाष्यकारोप्येवमेव ॥

अत्रेदंविचार्यते । किंश्रुतिस्मृत्यादीनांद्वैविध्यदर्शनाद्विकल्पः । सोपिशाखाभेदेनकांडभेदेनवाव्यवस्थितःउतसर्वत्र। **नतावदाद्यः** । शाखांतरेतैत्तिरीयशाखायां**नारायणोपनिषत्सु**–‘गायत्र्यागायत्रीछंदोविश्वामित्रऋषिःसवितादेवता’इति । **छंदोभाषायां**—‘वक्तव्यंछंद

आदौतुततश्चर्षिःप्रकीर्तितः । देवताविनियोगश्चतैत्तिरीयकपाठकैः ॥’ इतिविशिष्यक्रमबोधकश्रुतिस्मृत्यादिप्रमाणदर्शनेनसंदेहस्यैवाभावात् । **नद्वितीयः**।योहवाअविदितार्षेयच्छंदोदैवतब्राह्मणेनमंत्रेणयाजयतिवाध्यापयतिवेत्यादिनाकर्मकांडएवर्ष्यादिज्ञानेफलस्यतदज्ञानेप्रत्यवायस्यचाभिधानात्कांडांतरस्यानुपस्थितेः । **नतृतीयः** । विरुद्धार्थकानांनिरवकाशानांप्रमाणानांषोडशिग्रहणाग्रहणवद्वैकल्पिकत्वस्यवक्तुंशक्यत्वेपिविरुद्धार्थकपदरहितानांप्रकृतेतथावक्तुमशक्यत्वात् । अतःछंदःप्राथम्यबोधकश्रुत्यादिनाप्रमाणांतराणामपिसंग्राहकत्वपरतया एकवाक्यत्वलाभाच्छंदःप्राथम्यमेवोचितं । सर्वानुक्रमस्थंअनुक्रमिष्यामइत्यंतं सूक्तप्रतीकादीनिप्रदर्शयिष्यामइतिव्याख्येयं । अतएव **सर्वानुक्रमभाष्यकारे**णापि एताननुक्रमिष्यामोव्याख्यास्यामइतिव्याख्यायअनेकार्थत्वाद्धातूनामित्युक्तं । देवतास्मरणमंतेवाकुर्यादितिबह्वृचगृह्यपरिशिष्टवाक्यस्यकेषुचित्पुस्तकेष्वदर्शनात् । केषुचित्तुदेवतास्मरणमेववाकुर्यादितिपाठदर्शनेनतस्यापिदेवताप्राथम्येअसाधकत्वात् । नचैवंविनिगमनाविरहः देवताप्राथम्यावगत्यविशेषेपिछंदोविषयेहेतुनिर्देशपूर्वकप्रथमादिपदघटितस्मृत्यवधृततात्पर्यकक्रमबोधकोक्तश्रुतेरेव विनिगमकत्वात् । ‘श्रुतिस्मृतिविरोधेतुस्मृतेस्त्यागोविधीयते । तथैवलौकिकंवाक्यंस्मृतिबाधेपरित्यजेत्’ इतिस्मृत्यपेक्षयाश्रुतेर्बलवत्त्वात् देवताप्राथम्यबोधकश्रुत्यनुपलब्धेश्च । देवताप्राथम्याभासकप्रमाणानांसंग्रहपरतयोन्नीतत्वात् । द्विविधाचारदर्शनेपिश्रुत्यविरुद्धाचारस्यप्रामाणिकत्वेनअंधस्येवांधलग्नस्येतिन्यायेनपरंपरागताचारांतरस्याश्रद्धेयत्वात् । सर्वानुक्रमण्यांदेवताप्राथम्यव्यवहारदर्शनेपि ‘तुहिहवैतच्छब्दविशिष्टान्यृषिदैवतच्छंदांसिद्वित्रिचतुःपंचषट्सूक्तभांजियथासंख्यम्’ इतिपरिभाषानुसारेणक्वचित्पूर्वसूक्तसाहचर्यात्प्रथमंदेवताउत्तरत्रऋषिः । क्वचित्पूर्वत्रछंदःउत्तरत्रदेवताइतिच । **तदुदाहरणानितु**–‘प्राग्नयेपंचाग्नेयोवत्सआग्नेयंतुप्रनूनंतृचमाग्नेयःश्येनः’ ‘अग्निर्होतागायत्रं

त्विंद्राग्नीऐंद्राग्नं' इत्यादीनि ॥ तुह्यादिशब्दाभावेपियथा—'परंगायत्रंप्रागवत्सप्रेर्ऋषिश्चानुक्तगोत्रःप्राङ्मत्स्यात्काण्वोऽष्टमंमंडलंमाचिच्चतुस्त्रिंशन्मेधातिथिमेध्यातिथी' । 'जागतमूर्ध्वंप्रागुशनसःप्रदेवंदशवत्सप्रिर्भालंदनः' । 'नवमंमंडलंपावमानंसौम्यंस्वादिष्ठयादशमधुच्छंदाः' इत्यादिबहुषुस्थलेषुव्युत्क्रमदर्शनात्। साहचर्योक्तेरबाधकत्वांगीकारेपि—'अस्यमेष्टौजागतंत्र्यनुष्टुबंतंद्यावापृथिव्येकाद्वेऐंद्र्यौत्वाष्ट्र्यौवाद्वेद्वेराकासिनीवाल्योरंत्यालिंगोक्तदेवता' । 'ऋतमेकादशंजगत्यंतंषष्ठ्यैंद्रासोमीसरस्वतित्वमितिसारस्वतोर्धर्चोयोनोबार्हस्पत्येतंवोमारुती' । 'वायोसैकागायत्रमुक्तादेवताःप्रउगेणाद्येतुतृचेंत्यैंद्रवायवीद्यावापृथिव्योंत्यस्तृचोहाविर्धानोवातृतीयःपादोवाग्नेयोंबितमेनुष्टुभौबृहतीच' । 'कनिक्रदत्तृचंप्रदक्षिणिज्जागतंमध्येतिशकुर्यष्टिर्वैताभ्यामृषिरध्वनिवाश्यमानंशकुंतंतुष्टाव' इति । 'अयंसउपांत्यानुष्टुप्पुरीष्येभ्योग्निभ्यः' इति । 'तिस्रःषट्पार्जन्यंतुपर्जन्यायतृचंगायत्रमेतेकुमारआग्नेयोऽपश्यत्' इत्यादिबहुस्थलेषुतंत्रैवव्यभिचारदर्शनात् ऋषिदैवतच्छंदांसीत्यस्यसंग्राहकत्वमेवन्याय्यं । **यत्तु** आश्वलायनानांदेवताप्राथम्याभासकाथर्**वणसर्वानुक्रमण्यां** 'आश्वलायनानुक्रमानुसारेणानुक्रमिष्यामः खिलान्वर्जयित्वे' तिप्रतिज्ञाय 'इंद्रत्वातृचंविश्वामित्रगोतमविरूपाःप्रत्यृचामिंद्रमरुदग्नयोपिगायत्रमि' त्यादीनांएकादशपटलेविंशतितमकांडस्याव्यभिचारेणर्षिदैवतछंदांसिप्रदर्शितानीतितद्बह्वृचानांश्रौतस्मार्तसूत्रकृदाश्वलायनभिन्नाश्वलायनपरंनतुबह्वृचश्रौतस्मार्तसूत्रकृद्बह्वृचाश्वलायनपरं ॥ तथाच**बृहदाश्वलायनस्मृतौ**—'तपसाविदितंविप्रामयातावत्क्षणादिव । श्रौतस्यकर्मणःसिद्ध्यैश्रौतसूत्रंमयाकृतं ॥ तएतंमृदुगंभीरेगंभीरार्थशिवप्रदे । सुदुर्ज्ञेयेषुविदुषांमनसाप्रीतिवर्धने ॥ श्रौतस्येवचयद्भाष्यंमयैवचकृतंद्विजाः । गृह्यभाष्यंकरिष्यंतिद्विजाइतिनमेकृतं ॥' उपनयनप्रकरणेयज्ञोपवीतविधिप्रकरणेच । 'प्रत्यक्षरऋषिंछंदोदैवांगान्यक्षराणिच । भूतेतत्वात्मवर्णांश्चस्थानंज्ञात्वाजपेत्सदा' ॥ तथा ।

'ऋष्यादिसर्वंविज्ञायतंत्रविन्मंत्रसूक्तयोः । यज्ञोपवीतमंत्रेणकुर्याद्यज्ञोपवीतनं ॥ ब्रह्मास्याद्यज्ञसूत्रस्यमुनिर्गायत्रमीरितं । छंदःप्रजापतिर्देवमोंकारमथवात्रिवृत्' इति । एतेनसर्वानुक्रमण्यांभूयसाव्यपदेशेनअव्यभिचारेणचदेवताप्राथम्योक्त्याछंदोपेक्षयादेवतायाःप्राथम्यमितिवदंतोनिरस्ताः । सत्येकस्मिन्बाधकेसाधकसहस्रस्याप्यकिंचित्करत्वमितिन्यायेनभूयसाव्यपदेशस्यासाधकत्वात् । श्रुतिरूपसाधकस्यप्रमाणांतरानपेक्षस्यप्रागेवाभिहितत्वादित्यलंविस्तरेण ॥ श्रुतिस्मृतिप्रमाणानामेकवाक्यत्वकल्पनात् । सर्वेषांचाविरोधेनछंदःप्राथम्यमीरितं ॥ १ ॥

इति ऋ. क. छंदोदेवतोहक्रमनिर्णयः ॥

रोदःशब्दविचारः ।

अथरोदःशब्दरोदसीशब्दयोर्नपुंसकस्त्रीलिंगयोर्विचारःक्रियते ॥ रुद्धातुप्रकृतिकअसुन्प्रत्ययांतःसांतोनपुंसकएकः । तत्प्रकृतिकगौरादिङीषंतस्त्वपरःस्त्रीलिंगः । वेदेकोशेचोभयोरपितथादर्शनात् । तथाहि । नहित्वारोदसीउभे । वित्तंमेअस्यरोदसी । नरोदसीअपनुदंतघोराः । इत्यादिमंत्रेषुद्यावापृथिवीवाचकःसांतोनपुंसकः । अतएवपदकालेद्विवचनांतत्वेनप्रगृह्यत्वादितिशब्दप्रयोगःसंगच्छते । तस्यचद्यावापृथिवीदेवतावाचकस्यदेवतोच्चारणकालेप्रथमांतस्यरोदसीइतिस्वरूपं । अन्वाधानकालेद्वितीयांतस्यरोदसीइति । हौम्यादिद्रव्यत्यागकालेचतुर्थ्यंतस्यरोदोभ्यामिति । अतएवचएतेपृष्ठानीतिमंत्रेरोदसोरितिसप्तमीद्विवचनांतमुपपद्यते । ङीषंतेतत्रतत्रांतोदात्तस्वरव्यत्ययकल्पनाछांदसत्वेनपूर्वसवर्णादिकंरोदसोरित्यत्रईकारलोपकल्पनंचस्यादितिमहदेवगौरवं । सांताश्रयणेतुनकिंचित्कल्पनीयमितिमहदेवलाघवम् । अमरकोशेपितृतीयकांडेनानार्थवर्गेएकोनत्रिंशदधिकद्विशतश्लोके प्रसुरश्चापिभूद्यावौरौदस्यौरोदसीचतेइति । रामाश्रमकृततट्टीकायामपि ।

द्यावापृथिव्यौरोदस्यौद्यावाभूमीचरोदसी । रोदश्चरोदसीचापिदिविभूमौपृथक्पृथक् । सहप्रयोगेप्युभयोरोदःस्यादपिरोदसीतिविश्वः । इति दर्शनाच्चसांतएवग्राह्यः । यस्तु । जोषद्यदीमसुर्यासचध्यैविषितस्तुकारोदसी । सचामरुत्सुरादसी । मिम्यक्षयेषुरोदसी । अधस्मैषुरोदसी। इतिचतुर्षूदाहरणेषुईकारांतएकवचनांतः । सतुमरुत्स्त्रीवाचकःरुद्रस्त्रीवाचकःविद्युद्वाचकश्चेतिनकाप्यनुपपत्तिः । स्पष्टंचेदंवेदभाष्ये । पराशुभ्राअयासः । जोषद्यदीमसुर्यासचध्यैइतिमंत्रव्याख्यावसरेपराशुभ्राअयासइतिमंत्रेरोदसीइत्यत्रद्यावापृथिवीवाचकत्वेङीषंतस्यांतोदात्तस्यवाछंदसीत्यनेनपूर्वसवर्णदीर्घेद्विवचनांतत्वेनप्रकृतिभावः । मरुत्स्त्रियादिवाचकत्वेतुलुप्तसप्तम्यंतंईदूतौचसप्तम्यर्थइतिप्रगृह्यंद्रष्टव्यमितिसुधीभिर्विभावनीयं । इतिऋग्वेदकल्पद्रुमेरोदःशब्दनिर्णयः ॥

संहितास्थगायत्र्यादिच्छंदांसि ।

श्रीः ॥ अथास्यांशाकलसंहितायांगायत्र्यादिच्छंदसामृगियत्ताबुभुत्सूनांप्रीत्यैतत्तत्संख्यानियमंदर्शयिष्ये । तत्रतावत् २४५१ गायत्र्य[1]एक

---

[1] गायत्र्यादिछंदोभेदपरिगणनं **गायत्री** ८ पदपंक्तिः–उष्णिग्गर्भा–पादनिचृत्–अतिनिचृत्–यवमध्या–वर्धमाना–प्रतिष्ठा–ह्रसीयसी । **उष्णिक्** ७ पुरउष्णिक्–ककुप्–ककुन्न्यंकुशिरा–तनुशिरा–पिपीलिकमध्या–अनुष्टुब्गर्भा–उष्णिक् । **अनुष्टुप्** ६ महापदपंक्तिः–कृतिः–पिपीलिकमध्या–काविराजः–नष्टरूपी–विराजः । **बृहती** १० पुरस्ताद्बृहती–न्यंकुसारिणी–उरोबृहती–स्कंधोग्रीवी–उपरिष्टाद्बृहती–विष्टारबृहती–ऊर्ध्वबृहती–पिपीलिकमध्या–विषमपदा–बृहती । **पंक्तिः** ७ विराट्–सतोबृहती–विपरीता–प्रस्तारपंक्तिः–आस्तारपंक्तिः–संस्तारपंक्तिः–विष्टारपंक्तिः । **त्रिष्टुप्** १२ जगती–अभिसारिणी–विराट्स्थाना–विराट्रूपा–ज्योतिष्मती–पुरस्ताज्ज्योतिः–मध्येज्योतिः–उपरिष्टाज्ज्योतिः–महाबृहती–यवमध्या–पंक्त्युत्तरा–विराट्पूर्वा । **जगती** ३ त्रिष्टुप्–महासतोबृहती– महापंक्तिः । **प्रगाथाः** ६ बार्हतः–काकुभः–महाबार्हतः–विपरीतोत्तरः–आनुष्टुभः–आनुष्टुम्मुखास्तृचाः इति ।

पंचाशदधिकचतुर्विंशतिशतानि । ३४१ उष्णिहएकचत्वारिंशदधिकशतत्रयं । ८५५ अनुष्टुभःपंचपंचाशदधिकान्यष्टौशतानि । १८१ बृहत्यएकाशीत्यधिकंशतं । ३१२ पंक्तयोद्वादशाधिकंशतत्रयं । ४२५३ त्रिष्टुभस्त्रिपंचाशदधिकद्विचत्वारिंशच्छतानि । १३४८ जगत्योऽष्टाचत्वारिंशदुत्तरत्रिशताधिकंसहस्रं । १७ अतिजगत्यःसप्तदश । १९ शक्वर्यएकोनविंशतिः । ९ अतिशक्वर्योनव । ६ अष्टयःषट् । ८४ अत्यष्टयश्चतुरशीतिः । २ धृतीद्वे । १ एकाऽतिधृतिः । ६ एकपदाःषट् । ८७ द्विपदाःसप्ताशीतिः । ‘१०० बार्हताःप्रगाथाःशतं । ९४ विपरीतोत्तराश्चतुरधिकानवतिः । ५५ ककुभाःपंचपंचाशत् । १ महाबार्हतएकः’ । एवंसर्वेमिलित्वा २५० सार्धशतद्वयं । एतेद्वृचाद्वृचाइतिकृत्वातएवद्विगुणाऋचः ५०० पंचशतानि ॥ एवंसकलाःशाकलसंहितायांखिलरहितायामृचो १०४७२ द्व्युत्तरसप्तत्यधिकचतुःशताधिकदशसहस्राणि संख्येति ॥ यत्तु ‘ऋचांदशसहस्राणिऋचांपंचशतानिच ॥ ऋचामशीतिःपादश्चैतत्पारायणमुच्यते ॥’ इतिकस्यचिद्वचनं तद्वालखिल्याध्यायादिखिलसहितशाकलसंहिताविषयमितिध्येयं ॥ खिलरहितायास्तुपूर्वोक्तायाएवसंख्यायाःप्रतीतेः ॥ एवमत्रप्रथमाष्टकेऋचः १३७० द्वितीये ११५७ तृतीये १२०९ चतुर्थे १२६९ पंचमे १२६३ षष्ठे १६५० सप्तमे १२६३ अष्टमे१२९३। एतत्संकलनंपूर्वोक्तमेव । सूक्तसंख्यात्वनुक्रमण्यामेव ‘तदेतत्सूक्तसहस्रं’ इत्यादिनापठिता सापिवालखिल्याध्यायान्विताया एवघटते । अन्यथातुषडधिकंसहस्रं । तदित्थं । प्रथमाष्टके सूक्तानि १२१ द्वितीये ११९ तृतीये १२२ चतुर्थे १३० पंचमे १२९ षष्ठे १२४ सप्तमे ११६ अष्टमे १४५ एतत्संकलनंप्रागुक्तमेव ।

स्वाहावत्यृचः ।

मंत्रप्रतीकं.	अष्टकाध्यायवर्गाः			मंत्रप्रतीकं.	अष्टकाध्यायवर्गाः			मंत्रप्रतीकं.	अष्टकाध्यायवर्गाः		
स्वाहायज्ञंकृणोतन	१	१	२५	आपूर्णोऽअस्यकलशः*	३	२	११	आयाह्यर्यऽआप*रि०	६	३	१२
ततंमेअपस्तदुतायते	१	७	३०	तिष्ठाहरीरथआ	३	२	१७	स्वाहाकृतस्यतृंपतं०	६	३	१७
पूषण्वते*मरुत्वते०	२	२	११	इंद्रःस्वाहापिबतु*०	३	३	१४	आदूनुतेऽअनु०	६	४	४२
स्वाहाकृतान्याग०	२	२	११	स्वाहाग्नयेवरुणा*०	३	८	२१	विश्वेदेवाःस्वाहाकृ०	६	७	२५
पुरोगाऽअग्निर्दे०	२	५	९	आयाह्यग्नेस०	५	२	२	वेषिहोत्रमुत*पोत्रं०	७	५	३०
घृतंमिमिक्षेघृतमस्य	२	५	२३	यथावःस्वाहा*०	५	२	४	मातलीकव्यैर्यमो०	७	६	१४
तुभ्यंहिन्वानोव०	२	७	२५	आचनोबर्हिः०	५	४	२९	आग्नेवहवरुण०	८	२	२२
आयाह्यग्नेसमि०	२	८	२३	आनोयातमुप०	५	८	२५	सद्योजातोव्यमिमीत०	८	६	९

निर्दिष्टेषुस्वाहावन्मंत्रेष्वपिप्रदानाप्रदानार्थकस्वाहाकारभेदेनद्वैविध्यंपरिकल्प्य प्रदानार्थकस्वाहाकारवत्स्वेवांतेपुनःस्वाहाकारोमास्त्वन्यत्रापेक्षितएवेतिनिर्णीयजुह्वतिकेचनशिष्टास्तन्मतेनप्रदानार्थकस्वाहाकारघटितमंत्रप्रतीकमूर्ध्नि * ईदृक्पुष्पविन्यासःकृतः । कैश्चित्तुस्वाहाग्नयेवरुणाय ३।८।२१ आयाह्यर्यआपरि ६।३।१२ वेषिहोत्रमुतपोत्रं ७।५।३० इतिमंत्रत्रयमेवप्रदानार्थकंनिर्णीतंतत्राप्याद्योवैकल्पिकइति । तत्र सदसत्सद्भिरूहनीयम् ।

स्वाहाकारवन्मंत्रविचारः ।

श्रीवेदपुरुषायनमः ॥ अथऋगाम्नायेकतिपयेमंत्राःस्वाहाकारवंतआम्नातास्तत्रसंशयः—किमेतेषांहोमेविनियोगःप्रदानार्थकस्वाहाकारांतरयुतानामुतकेवलानामिति । किंतावत्प्राप्तं । नकेवलानांहोमेविनियोगःसंभवति । होमस्यत्यागात्मकतया मंत्रमध्यपठितस्यचस्वाहाकारस्य मंत्रावयवतया प्रदानार्थत्वाभावादंतेपुनःप्रदानार्थकस्वाहाकारःप्रयोक्तव्यइति । अतएवभगवान्**जैमिनिःसंकर्षकांडे** 'स्वाहाकृत्य' (अ. १४ पा. ४ सू. १८) 'वषट्' (१४।४।१९) इतिसूत्राभ्यांक्रमेण 'स्वाहाकृत्यब्रह्मणातेजुहोमि' 'स्वाहाकृतमिंद्रायतेजुहोमि' इत्यादावुपसर्जनत्वेनान्वितानांस्वाहाकाराणांमुख्यविशेष्यत्वाभावात् द्रव्यस्तुतिद्वारैववाक्यार्थसमन्वयादप्रदानार्थत्वं । 'वषट्तेविष्णवासआकृणोमी' त्यत्रवषट्पदस्य स्वाहाकृतशब्दवत्समासाभावेनस्वतंत्रतयाप्रदानार्थत्वेप्राप्ते ' आकृणोमि ' इत्यत्रतदन्वयेनास्वातंत्र्याविशेषादप्रदानार्थत्वंनिर्णीय तत्रतत्र प्रदानार्थकस्वाहाकारांतरप्रयोगंब्रूते । इतिप्राप्तेब्रूमः—नऋगाम्नायपठितेषुस्वाहाकारवत्सुमंत्रेषुहोमकालेपुनरन्यःस्वाहाकारःप्रयोक्तव्यइति । कुतः । पठतिहि**भगवानाश्वलायनः**श्रौतसूत्रप्रथमाध्यायस्यैकादश्यांकंडिकायां—'स्वाहाकारांतैर्मंत्रैर्नचेन्मंत्रेपठितः' इति । व्याचख्यौ चैत**द्वृत्तिकृन्नारायणः**—' यत्रकापिस्वाहाकारोनपठितस्तदांतेस्वाहाकारःकर्तव्यः । यत्रकापिपठितश्चेत्सएवप्रदानार्थकोभवति' इति । **कारिकाकार–मंचनाचार्य**प्रभृतिप्राचीनप्रयोगकाराश्चैवमेवप्रतिपादयंति । **शौनकोपि**—'यस्मिन्मंत्रेनपठितःस्वाहाकारोभवेद्यदि । स्वाहांतश्चप्रयोक्तव्योहोमेषुप्रणवादिना' इति । अत्रवचनद्वयेपियद्यपूर्वविधिरंगीक्रियते तदापर्युदासन्यायेनस्वाहाकारघटितान्यहोमसाधनीभूतमंत्रत्वावच्छेदेनअंतेस्वाहाकारविधिरितिवक्तव्यम् । अथहोमसाधनीभूतमंत्रेषुअंतेस्वाहाकारोवचनांतरेणप्राप्तइत्युच्यतेतदानेनवचनेन

स्वाहाकारवत्सुमंत्रेषुसप्रतिषिध्यतइत्यापतति । अन्यथावचनवैयर्थ्यापत्तिर्दुर्वारा । नन्वेवं 'स्वाहाकृत्य' 'वषट्' इतिसंकर्षकांडस्थाधिकरणद्वयविरोधः । तत्रहीतरविशेषणतयान्वितार्थकस्वाहापदस्यप्रदानार्थत्वंनिरस्यांतेपुनःस्वाहापदप्रयोगव्यवस्थापनात् । न । तस्याश्वलायनोक्तकर्मातिरिक्तकर्मविषयत्वात् । आश्वलायनप्रोक्तकर्मसूक्तसूत्रेणतद्बाधात् । अतएव अग्निष्टोमस्थसौत्येहनिहौत्रकांडपठितप्रवृताहुतिहोमे 'स्वाहावाचे' इत्येकोमंत्रः । 'स्वाहावाचस्पतये' इतिद्वितीयः । एवमन्येपिबहवोमंत्राःसंति तत्रापिमंत्रपठितस्वाहाकारएवप्रदानार्थइति मंत्रांतेप्रदानार्थकान्यस्वाहाकारंनप्रयुंजंति । एवमयाश्चेतिमंत्रेपि । अध्वर्युकांडपठितप्रवृताहुतिहोमेतु 'जुष्टोवाचोभूयासं' इतिमंत्रे स्वाहाकारसत्वेपि तस्मिन्माधाःस्वाहासरस्वत्याइतिमंत्रांतेपुनः स्वाहाकारयोजनादरीदृश्यतेकेशवादिप्राचीनप्रयोगेषु । एवंबगलामुख्यादितांत्रिकमंत्रेष्वपि । मंत्रमध्येस्वाहाकारसत्वेपिमंत्रांतेपुनःस्वाहाकारःप्रयोज्यइतितंत्रविद्भिरुक्तत्वात् । नचानंत्यस्वाहाकारस्यस्वस्थानच्युतनखकुंडलादीनांकंडूयनालंकरणादिकार्याक्षमत्वमिवनप्रदानार्थत्वम् । अतएवयज्ञायज्ञीयेसामनि इरापदस्यगिरापदस्थानएवनिवेशआवृत्तिश्चकल्प्यतइतिशंक्यम् । यत्रक्कापिस्थितस्यदीपस्येवपदस्याप्यर्थप्रकाशकत्वानपायात् । देहिब्राह्मणायब्राह्मणायदेहीत्यादिवाक्याभ्यामविशेषेणबोधानुभवाच्च । अतएव ' पुरस्तात्स्वाहाकारावाअन्येदेवाउपरिष्टात्स्वाहाकारावाअन्ये ' इतिश्रुत्याउभयोरपिप्रदानार्थत्वमनूद्यते । एतेनमंत्रघटकादिमध्यपठितस्वाहाकारांतेहुत्वाशेषमंत्रोनिगदेनोच्चारणीयइतिकेषांचित्प्रलापोनिरस्तः । नचसकृच्छ्रुतस्येतरविशेषणतयोपस्थितार्थकस्यस्वाहाशब्दस्यकथंप्रधानतयाप्रदानार्थावबोधकत्वमितिवाच्यम् । नचेन्मन्त्रेपठितइतिसूत्रबलादेवतादृशस्वाहाकारघटितमन्त्रेषुस्वाहापदस्यावृत्त्याप्रदानार्थावबोधःकल्पनीयइतिदिक् ॥

पारायणहोमाद्यारंभकालः ।

श्रीः ॥ जपाद्यारंभकालस्तुपरशुरामेणोक्तः ॥ वैशाखेश्रावणेमासेचाश्विनेमार्गशीर्षके । माघफाल्गुनयोर्वापिसितेपक्षेशुभेदिने ॥ वेदारंभः प्रकर्तव्यःपुत्रपौत्रादिवृद्धये ॥ इति । कार्तिकेस्वर्णलाभःस्यादितिकेचित् । **वर्ज्याणितुसंग्रहे**अनध्यायतिथीन्सर्वान्रिक्ताष्टम्यौविहायच । इतरासुचकर्तव्योवेदारंभःशुभप्रदः ॥ अनध्यायेचसंध्यायामपराह्णेकथंचन । स्त्रियांरजस्वलायांतुवेदारंभोनसिद्धिदः ॥ इति ॥ **रत्नमालायां**—सोमसौम्यगुरुशुक्रवासरासर्वकर्मसुभवंतिसिद्धिदाइति ॥ निष्कामतयावेदाद्यनुष्ठानेतुयदाश्रद्धोत्पद्यतेतदैवारंभःकार्यः । नश्वःश्वमुपासीतकोहिमनुष्यस्यश्वोवेदेतिश्रुतिः । श्वःकरवाणीत्येवमुपासनाकालांतरप्रतीक्षानकार्या । हियस्मान्मनुष्यस्यश्वःकालसंबंधिजीवनंकोवेदकोजानीयात् आयुषोऽस्थिरत्वादितिश्रुत्यर्थः । **परशुरामोपि**—यदैवजायतेवित्तंचित्तंश्रद्धासमन्वितं । तदैवपुण्यकालोयंयतोऽनित्यंहिजीवितं ॥ अतःसर्वेषुकालेषुजपस्यारंभणंशुभंइति ॥ **दीपिकायामपि**—ईश्वराराधनार्थंवाअथवापापनुत्तये । यदिरुद्राद्यनुष्ठानंनमुहूर्तादिचिंतयेदिति ॥ काम्येतुदिनंसंशोध्यमेव ॥ एवमारंभोत्तरंमध्येनध्यायपातेतुजपहोमाभिषेकादिकर्तव्यमेव । ततोवेदादिमारभ्यसंततमधीयीतनास्यांतरानध्यायोनास्यांतराजननमरणमशुचि (अशौचंनेत्यर्थः) नांतराव्याहरेन्नांतराविरमेत्त्रिःप्राणानायम्याचम्यप्रणवंवाप्रविधाययावत्कालमधीयीतततःसर्वंनिशांनिशांतरंसलिलंलोप्यपरिदध्यात् । निशांतरंसंध्यांनिशादीन्लोप्यविहायसमापयेदित्यर्थः । इत्यादिविशेषोज्ञेयः ॥

वेदपारायणप्रयोगः।

पूर्वोक्तशुभेकालेपारायणदिनंनिश्चित्यतत्प्राग्दिनेकृतनित्यक्रियः शुक्लवासाः सपत्नीकोयजमानः पूजितेष्टदेवतोगोमयलिप्तेशुचौदेशेप्राङ्मुखउपविश्याचम्यप्राणानायम्यदेशकालौसंकीर्त्यअमुकगोत्रस्यामुकशर्मणोममकायिकादिसमस्तदोषनिबर्हणद्वाराऋग्वेदांतर्गतसब्राह्मणशाकलसंहितापारायणाधिकारार्थंषडब्दचतुरब्दद्व्यब्दाब्दान्यतमंपूर्वोत्तरांगसहितंसर्वप्रायश्चित्तंप्रतिकृच्छ्रंगोमूल्यरजतनिष्कपादप्रत्याम्नायेनकार्षापणैकगोमूल्यप्रत्याम्नायेनवाहमाचरिष्यामि इतिसंकल्प्योक्तप्रकारेणसर्वप्रायश्चित्तमाचरेत् ॥ पुनर्देशकालावुत्कीर्त्यममसमस्तपापक्षयद्वाराऋग्वेदांतर्गतसब्राह्मणशाकलसंहितापारायणाधिकारार्थमृग्विधानोक्तक्रमेणप्रणवादिजपमहंकरिष्ये इतिसंकल्प्य ॥ प्रणवस्यपरब्रह्मपरमात्मागायत्रीव्याहृतीनांपरमेष्ठीप्रजापतिः प्रजापतिर्बृहतीगायत्र्या० ॥ आपोहिष्ठेतिनवर्चस्यांबरीषः सिंधुद्वीपआपोगायत्रीपंचमीवर्धमानासप्तमीप्रतिष्ठाअंत्येद्वेअनुष्टुभौ ॥ एतोन्विंद्रमितितिसृणामांगिरसस्तिरश्चीइंद्रोऽनुष्टुप् ॥ ऋतंचेतितृचस्यमाधुच्छंदसोघमर्षणोभाववृत्तिरनुष्टुप्॥ शंनइंद्राग्नीतिपंचदशर्चस्यसूक्तस्यमैत्रावरुणिर्वसिष्ठोविश्वेदेवास्त्रिष्टुप् ॥ स्वस्तिनोमिमीतेतिपंचानामात्रेयः स्वस्त्यात्रेयोविश्वेदेवास्त्रिष्टुबंत्येद्वेअनुष्टुभौ । पावमानीनांछंदऋष्यादिनवमेमंडलेआलोचनीयं ॥ शंवत्यादीनांपाठः कापिंजलाधिकरणन्यायेनतिसृणांतिसृणामेवेतिकेचित् ॥ **ऋग्विधाने**— तर्पयित्वाद्भिराचार्यानृषींश्छंदांसिदेवताइत्यनेनाचार्यादीनांतर्पणमभिहितं । तत्राचार्यादीनांविशेषरूपेणानुपादानात्सामान्यरूपेणेतिगम्यते तद्यथा । आचार्यास्तृप्यंतु । ऋषयस्तृप्यंतु। छंदांसितृप्यंतु। देवतास्तृप्यंत्विति । ततो रौद्रमंत्राञ्जपेत् । कद्रुद्रायेतिनवर्चस्यघौरः कण्वोरुद्रोगायत्र्यंत्यानुष्टुप् । इमारुद्रायतवसइत्येकादशर्चस्यसूक्तस्यांगिरसोरुद्रोजगत्यंत्येद्वेत्रिष्टुभौ । आतेपितरितिपंचदशर्चस्यसूक्तस्यगृत्समदोरुद्र-

स्त्रिष्टुप् । इमारुद्रायस्थिरधन्वनइतिचतुर्ऋचस्यमैत्रावरुणिर्वसिष्ठोरुद्रोजगत्यंत्यात्रिष्टुप् । ततोयुतसहस्रशतदशान्यतमयासंख्ययागायत्रींजपेत् ॥ पुनर्देशकालौसंकीर्त्यऋग्वेदांतर्गतसब्राह्मणशाकलसंहितापारायणांगत्वेनगणपतिपूजनंस्वस्तिवाचनंमातृकापूजनंनांदीश्राद्धंग्रहयज्ञंचकरिष्य इतिसंकल्प्योक्तप्रकारेणकुर्यात् । एवंपूतोधिकारीभवति ॥ ततःपारायणदिनेकर्ताकृतनित्यक्रियोदर्भासनेप्राङ्मुखउपविश्यपवित्रपाणिः प्राणानायम्यदेशकालौनिर्दिश्य अमुकगोत्रस्यशर्मणोममकायिकादिसमस्तदुरितक्षयपूर्वकंश्रीवेदपुरुषप्रीतिद्वाराअमृतत्वप्राप्त्यर्थंआदौप्रणवसमस्तव्याहृतिसहितायाःअंतेमहानाम्न्युपनिषत्सहितायाऋग्वेदांतर्गतशाकलसंहितायाःपारायणमहंकरिष्ये । ऋत्विग्द्वाराकरणेतुऋत्विजंवृत्वातंमधुपर्केणार्हयेत् । ततःपारायणकर्तादेवालयेस्वगृहेवागोमयोपलिप्तभूमौहस्तायामविस्तारोच्चांवेदिंकृत्वातदुपरियवसंमिश्रांमृत्तिकांसंस्थाप्यतत्रमहीद्यौरित्यादिविधिनासुदृढंकलशंसुप्रक्षालितंपुष्पपल्लवमालाचंदनकुंकुमादिभूषितंप्रतिष्ठाप्यतत्त्वायामीतितत्रवरुणमावाह्यसंपूज्य ॥ तत उत्तराग्रकुशकृतंवत्सजान्वाकृतिंवेदंब्रह्मणःशिरउपधानत्वेनकलशोपरिनिधायस्वस्त्ययनंपठेत् । स्वस्त्ययनंतार्क्ष्यमितिद्वयोरात्रेयःस्वस्त्यात्रेयोविश्वेदेवास्त्रिष्टुप्इतिऋग्द्वयंपठेत् ॥ ततऊर्ध्वाग्रपंचाशत्कुशनिर्मितंकूर्चंप्रत्यगग्रंवेदोपरिप्रतिष्ठाप्यप्राणप्रतिष्ठापूर्वकंब्रह्मजज्ञानमितिमंत्रेणावाहनाद्युपचारैःपूजयेत् । ब्रह्मदक्षिणभागेद्वितीयकलशोपरिप्रतिमायांसावित्रीपूजनमुक्तंकैश्चित्तन्मूलाभावादुपेक्ष्यं । ततोगुरुंब्राह्मणांश्चसंपूज्य विष्णुंस्मरेत् ॥ ततोदेवतासंनिधौदर्भासनेदर्भपाणिःप्राङ्मुखउपविश्याचम्य । प्रणवस्यपरब्रह्मपरमात्मागायत्रीव्याहृतीनांपरमेष्ठीप्रजापतिः प्रजापतिर्बृहतीजपेवि० । ॐ भूर्भुवःस्वःइतिजपित्वाऋषिछंदआद्युच्चारणपूर्वकंअग्निमीळइत्यादिपारायणमारभेत । पूर्वोक्तविरामस्थलेविरमेत् । प्रत्यहंप्रहरद्वयपर्यंतंपठेत् । त्वरयासमापनेच्छायांसार्धप्रहरद्वयपर्यंतंपठेत् । कर्मसमाप्त्यंतंब्रह्मचर्यमधःशयनंस्वल्पंहविष्याशनंचकार्यं ।

Digitization by eGangotri Funding IKS-MoE-Delhi

शक्तौसत्यामुपोषणंब्रह्मपूजनंचप्रत्यहंसमाप्त्यंतंकार्यं । पतितरजस्वलादिसंभा[illegible]ध्ययनंचनकुर्यात् । आसमाप्तेर्नाश्नीयाद्यथाशक्तिवापःफलान्योदनंहविष्यमात्रमल्पंभुंजीतनोपरिशयीतनमैथुनंचरेत्पतिताद्यैर्नसंभाषेतनैतत्समीपेधीयीतेतिबौधायनोक्तेः । ऋत्विक्कर्तृकपारायणेपारायणकारयित्राप्येतेनियमाःकार्याः । संहितांसमाप्यमहानाम्नीःपठित्वाब्राह्मणंपठेत् । केवलसंहितापारायणेमहानाम्नीरेवपठेत् । आरण्यपंचकमध्येप्रथमारण्यकत्रयस्यब्राह्मणांतर्गतत्वाद्ब्राह्मणसमाप्त्यनंतरंपाठः । महानाम्नीसंज्ञकंचतुर्थारण्यकंपूर्वोक्तऋग्विधानवचनादेवसंहितासमाप्त्यनंतरमेवपठेत् । पंचमारण्यकस्यमहाव्रतयज्ञसूत्ररूपत्वादारण्यकत्रयानंतरंपाठः ॥ इति ।

* * *

संहितास्वाहाकारविधिः ।

श्रीवेदपुरुषायनमः ॥ श्रौतस्मार्तेषुकर्मस्वखिलविगुणतानाशनेनेष्टसिद्ध्यैरुद्रेंद्रब्रह्मवंद्यंसकलविधिविदःकर्मिणोयंस्मरंति ॥ प्रज्ञानानंददेहःसकलमुनिजनध्येयरूपःपरेशोविष्णुस्त्रैमात्रवाच्योनिखिलजनहितःसर्वगःसर्वतोऽव्यात् ॥ १ ॥ ऋग्वेदेयाशाकलाख्यास्तिशाखातस्याःकुर्वेगुर्जरोपाह्वयोहम् ॥ गोपालाख्यःपद्धतिंशोनकीयान्ग्रंथान्दृष्ट्वाहोमजांशालिनींच ॥२॥ तत्रतावद्वेदपारायणफलमाह**शौनकः**—पारायणाभ्यांद्वाभ्यांवाऽनश्नन्यःसततंपठेत् ॥ अनृतेभ्यःपातकेभ्योमुच्यतेनात्रसंशयः ॥ त्रिभिःपारायणैःशूद्रीगमनात्पातकान्नरः ॥ गंगाप्सुमज्जनाच्चैवमुच्यतेनात्रसंशयः ॥ चतुर्भिःशूद्रीगमनात्तदन्नाशनपातकात् ॥ पंचभिश्चायाज्ययाजैरग्राह्यग्रहणात्तथा ॥ षड्भिःपारायणैःस्वर्णस्तेयस्त्रीपशुघातनात् ॥ सप्तभिःप्राजापत्यस्यहीनाचाराच्चबंधनात् ॥ अष्टभिश्चांद्रायणाच्चगुरुतल्पगमात्तथा ॥ रजस्वलासंगमाच्चमुच्यतेपातकान्नरः ॥ नवभिस्तुसुरापानात्पातकान्मुच्यतेतथा ॥ असोमपानाद्दशभिरेकादशभिर्ब्रह्महा ॥ द्वादशभिःपूर्वजन्मकृतादिहापिजन्मनि ॥ पातकान्मुच्यतेस्वर्गलोकंगच्छतिशाश्वतं ॥ अग्निष्टोमादिक्रतुभिरिष्टंभवतितेनवै ॥ वेदाध्यायीसदैवस्यादपाप्मासत्यवाक्शुचिः ॥ यंयंकामयतेकामंतंतंवेदेनसाधयेत् ॥ असाध्यंनास्तियत्किंचिद्ब्रह्मणोहिफलंमहत् ॥ इतिवेदपारायणमहिमानंप्रदर्श्येदानींस्वाध्यायाभ्यासलक्षणानिवदन्तदंतरंगभूतं**होमविधिमाह**—तत्रादौशरीरशुद्ध्यादिकमाह ॥ सिद्धमंत्रविधानेनजपैर्होमैर्द्विजोत्तमः ॥ तपसास्वर्गमाप्नोतितपसाविंदतेमहत् ॥१॥ तपोयुक्तस्यसिद्ध्यंतिकर्माणिनियतात्मनः ॥ विद्वेषणंसंवननंविषघ्नंरोगनाशनं ॥२॥

(विद्वेषणंइमांखनामीत्याद्यं इंद्रोतिभिरित्यादिसूक्तखंडंच । संवननंसंसमिदित्यादि । विषघ्नंकंकतोनकंकतइत्यादि । रोगनाशनंअक्षीभ्यांतइत्यादि । उपलक्षणत्वादन्यान्यप्यलक्ष्मीनाशनादीन्यूह्यानि) ॥ येनयेनार्थमृषिणायदर्थंदेवताःस्तुताः ॥ ससकामःसमृद्धश्चतेषांतेषांयथातथा ॥ ३ ॥ तानिकर्माणिवक्ष्यामिविविधानिचकर्मणां ॥ पुरश्चरणमादौतुकर्मणांसिद्धिकारणं ॥ ४ ॥ स्वाध्यायाभ्यासनस्यादौप्राजापत्यंचरेद्विजः ॥ केशश्मश्रुलोमनखान्वापयित्वाप्लुतःशुचिः ॥ ५ ॥ तिष्ठेदहनिरात्रौतुशुचिरासीतवाग्यतः ॥ सत्यवादीपवित्राणिजपेद्व्याहृतयस्तथा ॥ ६ ॥ ॐकाराद्यास्तुताजप्त्वासावित्रींचतदित्यृचं ॥ आपोहिष्ठेतिसूक्तंतुशुद्धवत्योघमर्षणं ॥ ७ ॥ शंवत्यःस्वस्तिमत्यश्चपावमान्यस्तथैवच ॥ सर्वत्रैतत्प्रयोक्तव्यमादावंतेचकर्मणां ॥ ८ ॥ शुद्धवत्यःशुचीवोहव्येत्यादयः । अघमर्षणमृतंचेतिसूक्तं । शंवत्यःशंनइंद्राग्नीत्यादयः । स्वस्तिमत्यःस्वस्तिनोमिमीतामित्यादयः ॥ पावमान्यःस्वादिष्ठयेत्यादयः ॥ आसहस्रादाशताद्वादशांतमथवाजपेत् ॥ ॐकारव्याहृतीस्तिस्रःसावित्रीमथवाऽयुतं ॥ ९ ॥ आपोहिष्ठेत्यादिजप्यमंत्राणांशक्त्यपेक्षयासहस्रशतदशेत्यावृत्तिसंख्यावेदितव्याः । यद्वोंकारव्याहृतिपूर्विकांसावित्रीमयुतसंख्ययाजप्त्वानंतरंकिंकर्तव्यंतदाह ॥ तर्पयित्वाद्भिराचार्यानृषीन्छंदांसिदेवताः ॥ प्रपद्येतविरूपाक्षंरौद्रमंत्रगणंजपेत् ॥ १० ॥ अनार्यैर्नाभिभाषेतनशूद्रैर्नापिगर्हितैः ॥ नरजस्वलयानार्यापतितैर्नांत्यजैर्नृभिः ॥ ११ ॥ नदेवब्राह्मणद्वेष्ट्रानाचार्यगुरुनिंदकैः ॥ नमातापितृविद्विष्टैर्नावमन्येतकंचन ॥ १२ ॥ त्रिरात्रमेवोपवसेदादितःसर्वकर्मणां ॥ त्रीणिनक्तानिवाकुर्यात्ततःकर्मसमारभेत् ॥ १३ ॥ नित्यंप्रयोगिणांचैवप्रयोगादौव्रतंत्र्यहं ॥ उपरिष्टादुपवसेत्कृत्वासांतप-

नादिकं ॥ १४ ॥ आयुष्याण्येवकर्माणिमंत्रयुक्तःसमारभेत् ॥ सवासाःसशिरस्कोप्सुस्नात्वाभ्युक्ष्यजपेद्द्विजः ॥१५॥ शुद्ध-
वत्यस्तथांब्वत्यःपावमान्योघमर्षणं॥ एवंत्रिराप्लुत्यशुचिःप्राणायामान्समाचरेत् ॥ १६ ॥ 'अंब्वत्यआपोहिष्ठेत्यादयः'। त्रीन्ष-
डष्टौद्वादशवाषोडशाष्टादशापिवा ॥ आशताद्वायमेत्प्राणान्जपन्ब्रह्माघमर्षणं ॥१७॥ प्राणायामैर्दग्धदोषःशुक्लांबरधरःशुचिः ॥
यथाविध्यपआचम्यारोहेद्वैदर्भप्रस्तरं ॥ १८ ॥ पवित्रपाणिःकृत्वातुउपस्थंदक्षिणोत्तरं ॥ दिशोरेवांतरंप्रेक्ष्यानिमिषंछाद्यचक्षुषी
॥ १९ ॥ ॐकारव्याहृतीस्तिस्रःसावित्रींचतदित्यृचं ॥ मनसैताअनुद्धृत्यवेदादिंसमुपक्रमेत् ॥ २० ॥ मंद्रमेवपठेत्प्रातरु-
च्चैर्मध्यंदिनेपठेत् ॥ सोच्चैरेवापराह्णेतुसंध्याकालउपारमेत् ॥२१॥ ब्राह्मेमुहूर्तेचोत्थायत्रिराप्लुत्यपठेद्द्विजः ॥ मध्यमांवृत्तिमा-
स्थायनद्रुतांनविलंबितां ॥ २२ ॥ पूर्वांसंध्यांजपंस्तिष्ठेदुपासीतचपश्चिमां ॥ नचांतराव्याहरेतविरमेद्वाकथंचन ॥ २३ ॥
विरमेद्ब्राह्मणेप्राप्तेकामंतेनतुसंवदेत् ॥ शूद्रंदृष्ट्वैवसंप्राप्तंनाधीयीतकदाचन ॥ २४ ॥ ऋष्यादिसर्वंविज्ञायपठेत्सुनियतः
शुचिः ॥ सर्वान्कामानवाप्नोतिपापैश्चपरिमुच्यते ॥ २५ ॥ अनश्नन्संहितामेतांप्रातःप्रातर्दिनेदिने ॥ आयुर्विद्यांधनंपुत्रा-
न्गृहांश्चाप्नोत्यनुत्तमान् ॥२६॥ एतद्ब्रह्मजपन्छूद्रान्नेक्षेतान्यांश्चतद्विधान् ॥ प्रेक्ष्याचम्योदकंपूतःपश्येद्वामग्निभास्करौ ॥२७॥
इत्थंसाधारण्येनस्वाध्यायधर्मानभिधायसंप्रतिहोमधर्मान्वक्तुमुपक्रमते ॥ आदावेवतुसावित्र्याकर्मकुर्वीतशांतये ॥ पुष्टयेधन-
लाभायपशुलाभायभूतये ॥ २८ ॥ एषाहिसंहितादेवैःसर्वब्रह्ममयीनिचृत् ॥ उग्रेणतपसादृष्टाविश्वामित्रेणधीमता ॥ २९ ॥
होमांश्चजपयज्ञांश्चनित्यंकुर्वीतवैतया ॥ आज्यंद्रव्यमनादेशेजुहोतिषुविधीयते ॥ ३० ॥ सर्वपापहरोहोमःप्रत्यृचंचतिलैः

स्मृतः ॥ गृह्योक्तविधिनासर्वंकर्मकुर्वीततत्वविद् ॥ ३१ ॥ शक्त्यातुविप्राःसंभोज्याऋक्सूक्तसमसंख्यया ॥ वर्गाध्यायप्रसंख्यावामंडलावधिवापुनः ॥ ३२ ॥ अथैतस्यविवरणमित्थं—अनादेशेआज्यद्रव्यमित्यनेनास्मिन्संहिताहोमेआज्यंहौम्यद्रव्यंप्रकृतमितिसिद्धं ॥ सर्वपापहरोहोमस्तिलैःस्मृतइतितिलहोमस्यसर्वपापहर्तृत्ववर्णनात्तिलद्रव्यंकाम्यमित्यपिसिद्धं स्यात् तथापिपापनाशनस्यसर्वस्याप्यपेक्षितत्वात्तिलाअपिनित्यप्रायाएव ॥ तिलैराज्येनचहोतव्यमित्यर्थः ॥ प्रत्यृचमितिवदतामंत्रविभागोज्ञापितएव॥ ऋक्शब्दश्चात्रछंदोवाची॥ तेनयस्यछंदसोयानिर्दिष्टाक्षरसंख्यासायस्मिन्नवसानेपूर्यतेतावत्यृक् यथाग्निमीळइतिगायत्रीऋक् ॥ गायत्रीछंदसस्तुचतुर्विंशत्यक्षराणि तान्यग्निमीळइत्यारभ्यरत्नधातममित्यवसानेपूर्यंते तस्माज्जातात्रैकऋक् ॥ एवमुष्णिगादिष्वपिद्रष्टव्यं ॥ ऋचोपिकचिदेकावसानाभवंतिकचिद्व्यवसानाःक्वचित्र्यवसानाअपि ॥ तत्रैकपदाद्विपदाश्चैकावसानाः गायत्र्यादिशक्वर्यंताःसर्वाद्व्यवसानाःअतिशक्वर्याद्याःप्रायः सर्वास्त्र्यवसानाइति सर्वत्रऋगंतेस्वाहाकारंपठित्वाहोतव्यं नचेन्मंत्रेपठितइत्याद्याश्वलायनेनोक्तत्वात् ॥ यस्मिन्मंत्रेनपठितःस्वाहाकारोभवेद्यदि ॥ स्वाहांतःसप्रयोक्तव्योहोमेषुप्रणवादिनाइतिकारिकोक्तेश्च प्रतिमंत्रमादौप्रणवःपठ्यएव ॥ होमविधेरुपसाधनीभूतंकुंडकरणादिप्राचीनंतंत्रंस्विष्टकृदादिप्रतीचीनंचगृह्योक्तविधिनैवकुर्यात् ॥ तत्वविदित्यनेनास्यहोमस्याधिकारिणंदर्शयति योवेदस्यलक्षणतोर्थतश्चतत्वंजानातिसएवात्राधिकारीनान्यइति ॥ ततःकर्मविरामेविप्राभोज्याः ॥ तेचशक्त्यपेक्षयाऋक्सूक्तवर्गाध्यायमंडलसमसंख्याः॥ ऋगादीनांसंख्यात्वन्यत्रज्ञेयेति॥ ॥ अथहोमकर्तुःफलंनिरूपयन्नभिचारणेविधिविशेषमाह—

सर्वकामसमृद्ध्यर्थंपरंब्रह्मेदमुच्यते ।। एषैवप्रतिलोमोक्तापच्छःशत्रुविनाशिनी ।। अक्षरप्रतिलोमेयमभिचारेषुशस्यते ।। अक्षरप्रतिलोमेयंयस्मिन्युज्येतकर्मणि ।। तदमोघंविजानीयादेतद्ब्रह्मणोबलं ।। व्याघातकेध्मासमिधोप्यक्षरप्रतिलोमया ।। जुहुयात्सार्षपंतैलंबिभीतककृतस्रुवः ।। यइच्छेत्पीडनंशत्रोरपिवोच्चाटनंपुनः ।। पच्छःसंपीडयेच्छत्रून्वर्णशश्चप्रमापयेदिति ।। ॐकारपूर्वाव्याहृतयोमधुच्छंदसआदितः ।। सूक्तान्यंतेमहानाम्न्यःसंहितासाऽमृतास्मृता ।। अमृतत्वंययुर्देवाःपूर्वंसंहितयानया ।। जपेदेनंशुचिर्नित्यममृतत्वंचगच्छति ।। अत्रैवतुजपेन्मध्येपितृसूक्तान्यनेकशः ।। पित्र्यांतांसंहितांविद्यात्पितॄन्प्रीणातिचैतया ।। एवमेवसमाहृत्यवायवीसंहिताभवेत् ।। रौद्र्यादित्यावैश्वदेवीयद्दैवत्यांचकामयेत् ।। कुर्वीतवास्तुशमनंमध्येगोष्ठस्यधर्मवित् ।। पुष्पैर्गंधैश्चमाल्यैश्चवानस्पत्यैस्तथौषधैः ।। वास्तुसर्वंप्रतिकिरेत्सप्तधान्यैस्तथैवच ।। वास्तोष्पतिंयजेच्चात्रपायसेनबृहस्पतिं ।। औदुंबरपलाशैश्चबलिंप्रतिदिशंहरेत् ।। सूर्योवायुर्यमःपितरोनिर्ऋतिर्वरुणस्तथा ।। सोमोमहेंद्रइत्येतादिक्षुदिग्देवताःस्मृताः ।। दद्याद्दानंब्राह्मणेभ्यःशिवंभवतुवास्त्विति ।। (भवतिवास्तुनिपाठः)।। ३४ ।। ऋषीणांमंत्रदृष्टेनप्रत्यक्षात्सिद्धिरिष्यते ।। सर्वत्रदक्षिणांदद्याद्धनंवाकर्मसिद्धये ।। ३५ ।। नत्वेवादक्षिणंकर्मकिंचिदस्तीतिशौनकः ।। भक्त्याहिपूर्णपात्रेणसंमिताप्यंततोभवेत् ।। ३६ ।। तस्मात्स्वल्पापिदातव्यादक्षिणाकर्मसिद्धये ।। ऋषभैकादशादद्याद्येनवातुष्यतेगुरुः ।। ३७ ।। धर्मज्ञेसत्यवादिनि ब्रह्मदानंचदीयते ।। तदिदंपरमंब्रह्मगुह्यंपावनमद्भुतं ।। ३८ ।। नाप्रशांतायदातव्यंनापुत्रायातपस्विने ।। नासंवत्सरोषितायनाशिष्यायाहितायच ।।३९।। यएतेनैवविधिनावेदमभ्यस्यतेद्विजः ।। सनरःसर्वदापूतोमनःशुद्धिश्चजायते ।। ४० ।। इति ।।

॥ अथैतत्प्राचीनप्रयोगान्साधारणींपरिभाषांचानुसृत्यप्रयोगोलिख्यते ॥ तत्रवेदतत्त्ववित्तपोनिष्ठःसंहिताहोमचिकीर्षुर्ब्राह्मणोहोमदिनात्पूर्वंचतुर्थेदिनेनित्यकर्माणिनिर्वर्त्याचम्यप्राणानायम्यदेशकालौसंकीर्त्यकरिष्यमाणऋग्वेदांतर्गतशाकलसंहिताहोमेशरीरशुद्धिद्वाराधिकारसिद्ध्यर्थेप्राजापत्यकृच्छ्रंतत्प्रत्याम्नायगोनिष्क्रयीभूतामुकपरिमाणद्रव्यदानेनाहमाचरिष्येइति संकल्पयेत् ॥ प्राजापत्यस्यगोभिन्नप्रत्याम्नायचिकीर्षायांतंवाऊहयेत् ॥ ततोयानिकानीतिमंत्रेणकेशश्मश्रुलोमनखानिवापयित्वाविधिनास्नायात् ॥ ततोब्रह्मकूर्चविधिनापंचगव्यंपिबेदितिकेचिदाहुः ॥ ततस्तद्दिनंवाग्यतःशुचिस्तिष्ठन्नीत्वातथाविधआसीनोरात्रिंनयेत् ॥ ततःश्वोभूतेस्नानादिकृतनित्यक्रियःप्रणवव्याहृतिपूर्विकांसावित्रींजप्त्वावक्ष्यमाणान्मंत्रान्जपेत् ॥ तेच आपोहिष्ठेतिसूक्तं शुचीवोहव्या अग्निःशुचिव्रततमः उदग्नेशुचय इत्येवंतिस्रःएतोन्विंद्रमितितिस्रश्च ऋतंचेतिसूक्तं शंनइंद्राग्नीतिसूक्तं स्वस्तिनोमिमीतेतिसूक्तशेषं स्वादिष्ठयेत्यारभ्य क्षीरंसर्पिर्मधूदकमित्यंताःपावमान्योदशोत्तरषट्शतान्यृचइति एते मंत्राः शक्तेनसहस्रावृत्त्याजप्याः तावदशक्तेनतुशतावृत्त्या तत्राप्यशक्तेनपुनर्दशावृत्त्येति ॥ एवमशक्तौप्रणवव्याहृतिपूर्विकां गायत्रीमयुतसंख्ययाजपेत् ॥ केचिन्मंत्रजपगायत्रीजपयोःसमुच्चयमाहुः ॥ तन्न ॥ वाक्यमूलेऽथवेतिपदेनगायत्रीजपस्यपाक्षिकत्वद्योतनात् ॥ ततः[1]आचार्यांस्तर्पयामि ऋषींस्तर्पयामि देवतास्तर्पयामि छंदांसितर्पयामीतिजलेनतर्पयित्वा रुद्रंशरणा-

---

[1] देवताछंदःशब्दयोःप्रथमाविभक्तिस्वीकारेतृप्यंत्वितिक्रियाविज्ञेया ।

Digitization by eGangotri Funding MUDF Delhi

गतोस्मीतिभावयन्रुद्रदैवत्यमंत्रगणंजपेत् ॥ तच्चमंत्राःकद्रुद्रायेतिनवर्चंसूक्तं इमारुद्रायेत्येकादशर्चंसूक्तं आतेपितररितिपंचदशर्चंसूक्तं इमारुद्रायस्थिरधन्वनइतिचतुष्कंसूक्तं आवोराजानं तमुष्टुहिभुवनस्यपितरंत्र्यंबकमित्येताश्चतस्रऋचइत्येतान्मंत्रान्जपित्वाऽनार्यशूद्रगर्हितरजस्वलास्त्रीपतितांत्यजदेवब्राह्मणद्वेष्टृगुर्वाचार्यनिंदकमातापितृद्वेष्टृभिःसहसंभाषणादिवर्जयेत्नचकमप्यवमन्येत ॥ अत्रत्रिरात्रंशक्तस्योपवासाःअशक्तस्यनक्तानि ॥ एतावान्विधिर्वेदपारायणहोमयोःसमानःइतऊर्ध्वंपारायणविधौविशेषोविधिर्मूलतएवबोध्यः होमविधानस्यैवात्रप्रतिज्ञातत्वात्तंनलिखितवंतोवयं ॥ ॥ एवंत्रिरात्राचीर्णव्रतश्चंद्रतारानुकूल्यादिनिर्णीतेपुण्येदिनेसंभृतसंभारःकर्तास्वासनेशुचौदेशेचोपविश्याचमनप्राणायामान्कृत्वादेशकालौसंकीर्त्याऽमुकगोत्रस्यामुकशर्मणोममपूर्वजन्मेहजन्मसंचितसकलपापनिबर्हणद्वाराभीष्टकामसिद्ध्यर्थं श्रीवेदपुरुषांतर्गतसावित्रीप्रजापतिप्रीत्यर्थंचऋग्वेदांतर्गतशाकलसंहितायाःप्रत्यृचंतिलाज्यद्रव्यहोमंकरिष्यइतिसंकल्प्य तदंगताविहितंनिर्विघ्नतासिद्ध्यर्थंमहागणपतिपूजनपूर्वकंस्वस्तिपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धमाचार्यादिवरणंचकरिष्यइतिसंकल्पयेत् ॥ स्वयंहोमचिकीर्षायांब्रह्मादीनेववृणुयात् नत्वाचार्यं ॥ किंच ॥ श्रीकामःशांतिकामोवाग्रहयज्ञंसमाचरेत् ॥ तथा नैतदृतेविसिध्यंतिकर्माणिनिखिलान्यपीतिवचनाद्ग्रहयज्ञसमुच्चयेच्छायांप्रजापतिप्रीत्यर्थमित्यंतेग्रहयज्ञपुरःसरमितिसंकल्पवाक्येऊहयेत्। ततोगणेशपूजनादिनांदीश्राद्धांतंकृत्वाआचार्यादीन्वृत्वास्वयंहोमपक्षेब्रह्मादीनेववावृत्वामधुपर्कादिनापूजयेत् ॥ ततआचार्यःपवनपावनभूशुद्ध्यादिविधिनात्मानंपावयित्वामंगलतूर्यादिघोषेणहोममंडपंप्रविश्यसर्षपविकिरणपंचगव्यप्रोक्षणादिदेवयजनंरक्षस्वेत्यंतेहेमा-

द्याद्युक्तरीत्यामंडपपूजांकुर्यात् ॥ यथोक्तमंडपाभावपक्षेमंडपपूजापिनविधेया ॥ ततोद्विहस्तपरिमितनिर्मितकुंडात्स्थंडिलाद्वाप्राच्यांनिर्मितचतुरस्रवेद्यांसर्वतोभद्रमंडलंविरच्यतस्मिन्ब्रह्मादिमंडलदेवताआवाह्यतदुपरिमहीद्यौरित्यादिविधिनाकलशौ संस्थाप्यप्रथमकलशोपर्यापलान्माषावधिहेमनिर्मितायांसावित्रीप्रतिमायामग्न्युत्तारणविधिसंस्कृतायांसावित्रीमावाहयेदेवं ॥ तत्सवितुर्विश्वामित्रःसवितागायत्रीसावित्र्यावाहनेविनियोगः ॐतत्सवितु०प्रचोदयात् भूर्भुवःस्वःसावित्रींसांगांसपरिवारां सायुधांसशक्तिकामस्यांसुवर्णप्रतिमायामावाहयामीत्यावाह्य तदस्त्वित्यादिनाप्रतिष्ठापयेत् ॥ ततोद्वितीयकलशेपंचाशद्भिःकुशैर्वत्सजानुसदृशंवेदंकृत्वातंनिधायतदुपरिप्रागुक्तपरिमाणांसौवर्णींब्रह्मप्रतिमामवस्थाप्यतत्रब्रह्माणमावाहयेदनेनमंत्रेण ॥ ब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टुप् ब्रह्मावाहनेविनियोगः ॐब्रह्मजज्ञानंप्रथमं०विवः भूर्भुवःस्वःब्रह्माणंसांगंसपरिवारमित्याद्यावाह्यध्यायेत् ॥ यथा ॥ एह्येहिसर्वाधिपतेसुरेंद्रलोकेनसार्धंपितृदेवताभिः ॥ सर्वस्यधातास्यमितप्रभावोविशाध्वरंनःसततं हिताय॥ १ ॥ हंसारूढंचतुर्वक्रंश्मश्रुलंरक्तवर्णकं ॥ लंबोदरंचजटिलंचतुर्बाहुंप्रजापतिं ॥ २ ॥ अक्षमालांदर्भमुष्टिमूर्ध्वाधोदक्षिणे करे ॥ स्रुवंकमंडलुंवामकरेसावित्रिसंयुतं ॥ ३ ॥ पद्मयोनिंचतुर्मूर्तिंवेदावासंपितामहं ॥ यज्ञाध्यक्षंचतुर्वक्रंतस्मैतुभ्यंनमोनमः ॥ ४ ॥ इत्थंध्यात्वासावित्रींब्रह्माणंचकांडानुसमयेनपदार्थानुसमयेनवाषोडशोपचारैःपूजयेत् ॥ एतावत्कर्माचार्यसद्भावेपि यजमानएवकुर्यादितिकेषांचिदाशयः ॥ अथाचार्यःकुंडेस्थंडिलेवातत्तदुक्तसंस्कारकरणपूर्वकमग्निस्थापनाग्निसंस्काराग्निध्यानान्युक्तमार्गेणकृत्वाग्रहयज्ञपक्षेकुंडादीशान्यामुक्तलक्षणायांग्रहवेद्यांसूर्यादिग्रहान्तदधिदेवतास्तत्प्रत्यधिदेवताःक्रतुसाद्गुण्य-

देवताःक्रतुसंरक्षकदेवताश्चावाह्यसंपूज्य तदीशान्यांकलशेवरुणंस्थापनपूर्वकंसंपूज्याग्नेरंतिकमागत्यान्वादध्यात् ॥ तद्यथा ॥ समिद्द्वयंत्रयंवादायदेशकालौस्मृत्वासनवग्रहमखऋग्वेदांतर्गतशाकलसंहिताहोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये ॥ ग्रहयज्ञाकरणपक्षेसनवग्रहमखइतिनोच्चारयेत् किंतुऋग्वेदांतर्गतेत्यादिकरिष्यइत्यंतमेवोच्चारयेत् ॥ ततोस्मिन्नन्वाहितेग्नावित्यादिचक्षुषीआज्येनेत्यंतमुक्त्वा ग्रहयज्ञपक्षेसूर्यादिग्रहान्अष्टोत्तरशताष्टाविंशत्यष्टान्यतमसंख्याभिःअर्कादिजातीयसमिच्चर्वाज्याहुतिभिःतदधिदेवतास्तत्प्रत्यधिदेवताश्चतैरेवद्रव्यैःतन्न्यूनसंख्याहुतिभिःगणपत्यादिक्रतुसाद्गुण्यदेवताःइंद्रादिक्रतुसंरक्षकदेवताश्चतैरेवद्रव्यैःततोपिन्यूनसंख्याहुतिभिरिति ॥ ग्रहयज्ञाकरणपक्षेत्वेतदनिर्दिश्यैवात्रप्रधानं—अग्निं १ सोमं २ विश्वान्देवान् ३ ब्रह्माणं ४ ऋषीन् ५ ऋग्वेदं ६ यजुर्वेदं ७ सामवेदं ८ सावित्रीं ९ ब्रह्माणं १० श्रद्धां ११ मेधां १२ प्रज्ञां १३ धारणां १४ सदसस्पतिं १५ अनुमतिं १६ छंदांस्यृषीन् १७ श्रियं १८ ह्रियं १९ सवितारं २० शतर्चिनः २१ माध्यमान् २२ गृत्समदं २३ विश्वामित्रं २४ वामदेवं २५ अत्रिं २६ भरद्वाजं २७ जामदग्न्यं २८ गौतमं २९ वसिष्ठं ३० प्रगाथान् ३१ पावमानीः ३२ क्षुद्रसूक्तान् ३३ महासूक्तान् ३४ महानाम्नीं ३५ उपनिषदं ३६ हव्यवाहं ३७ एतादेवतास्तिलाज्याभ्यामेकैकयाहुत्यायक्ष्ये ॥ पुनरत्रप्रधानं—अग्निंनववारं ९ वायुं ३ इंद्रवायू ३ मित्रावरुणौ ३ अश्वि-

---

[१] अत्रान्वाधाने ऐभिरग्नइत्यादिवैश्वदेवसूक्तेषु ‘ वैश्वदेवत्वंसूक्तभेदप्रयोगेइतिसर्वानुक्रममवष्टभ्य देवताविभागंकेचिदिच्छंतितत्स्यपाक्षिकत्वाद्बहुविस्तृतिशंकयाचनमध्येसमावेशःकृतः । अथचेद्भेदप्रयोगएवसौरस्यंमन्यमानास्तदाटिप्पनेनिवेशितादेवताआलोच्यतत्रतत्रान्वाधेयाः ।

नौ ३ इंद्रं ३ विश्वान्देवान् ३ सरस्वतीं ३ इंद्रं २३ मरुतः १ इंद्रमरुतः १ मरुतः १ इंद्रमरुतः १ मरुतः २ इंद्रं ५१
अग्निं ५ निर्मंथ्याहवनीयावग्नी १ अग्निं ६ इध्मं[1] १ तनूनपातं १ नराशंसं १ इळं १ बर्हिषं १ देवीर्द्वारः १ उषासानक्ते १
दैव्यौहोतारौप्रचेतसौ १ सरस्वतीळाभारतीः १ त्वष्टारं १ वनस्पतिं १ स्वाहाकृतीः १ विश्वान्देवान्[2] १२ इंद्रमृतुं १ मरुतऋतून् १ त्वष्टारमृतुं १ अग्निमृतुं १ इंद्रमृतुं १ मित्रावरुणावृतू १ द्रविणोदसमग्निमृतुं १ अश्विनावृतू १ अग्निमृतुं १
इंद्रं ९ इंद्रावरुणौ ९ ब्रह्मणस्पतिं ३ इंद्रसोमब्रह्मणस्पतीन् १ दक्षिणेंद्रब्रह्मणस्पतीन् १ सदसस्पतिं[3] ३ नराशंसं १ अग्नामरुतः ९ [१] ऋभून् ८ इंद्राग्नी ६ अश्विनौ ४ सवितारं ४ अग्निं २ देवीः १ इंद्राणीवरुणान्यग्नायीः १ द्यावापृथिव्यौ १ पृथिवीं १ विष्णुं ६ वायुं १ इंद्रवायू २ मित्रावरुणौ ३ मरुतः[4] ३ विश्वान्देवान् ३ पूषणं ३ अपः ७ अग्न्यपः १
अग्निं १ कम् १ अग्निं १ सवितारं[5] ३ वरुणं ३१ अग्निं २२ देवान् १ इंद्रं ४ उलूखलं २ उलूखलमुसले २ प्रजापतिंहरिश्चंद्रं[6] १ इंद्रं २३ अश्विनौ ३ उषसं ३ अग्निं १८ इंद्रं ३० [$\substack{१५\\१५}$।२] अश्विनौ १२ अग्निमित्रवरुणरात्रिसवितॄन् १ सवितारं १ अग्निं १२ यूपं २ अग्निं ६ मरुतः ४० ब्रह्मणस्पतिं ८ वरुणमित्रार्यम्णः ३ आदित्यान् ३ वरुणमित्रार्यम्णः ३
पूषणं १० रुद्रं २ रुद्रमित्रवरुणान् १ रुद्रं ३ सोमं ३ अग्न्यक्ष्युषसः २ अग्निं २१ अग्निदेवान् १ अश्विनौ २५ [$\substack{१५\\१०}$।३]

---

[1] समिद्धमग्निंवा । [2] भेदपक्षे अग्निं २ विश्वान् देवान् १ अग्निं ९ (एवं १२) [3] अत्रचतुर्णामपिवासदसस्पतिः । [4] मरुत्वानिंद्रइतिकेचित् । [5] भगभक्तस्येत्यस्याभगोवा । [6] अधिषवणचर्मदेवतावा ।

उषसं २० सूर्यं १३ इंद्रं ७२ अग्निं ९ वैश्वानरमग्निं ७ अग्निं ९ इंद्रं २८ [$\frac{१६}{२२}$|४] मरुतः १५ अग्निं १३२ इंद्रं ५७ [$\frac{१६}{४१}$|५] मरुतः ३४ विश्वान्देवान्[1] १९ सोमं २३ उषसं १५ अश्विनौ ३ अग्नीषोमौ १२ अग्निं ७ देवाग्नीन् १ अग्निं ७ अग्निमित्रवरुणादितिसिंधुपृथिवीद्याः[2] १ [६] उषसमग्निं[3] ११ द्रविणोदसमग्निं ९ शुचिमग्निं ८ वैश्वानरमग्निं ३ जातवेदसमग्निं १ इंद्रं ५८ विश्वान्देवान्[4] २९ इंद्राग्नी २१ ऋभून् १४ द्यावापृथिव्यग्न्याश्विनः १ [७] अश्विनौ २४ उषोरात्री १ उषसं १९ रुद्रं ११ सूर्यं ६ अश्विनौ ८३ इंद्रं १५ [८] विश्वान्देवान्[5] १५ उषसं २६ स्वनयं ७ भावयव्यं ५ रोमशां १ भावयव्यं १ अग्निं १९ इंद्रं ५ इंदुं १ इंद्रं २७ इंद्रापर्वतेंद्रान् १ इंद्रं ७ वायुं ९ इंद्रवायू ५ वायुं १ मित्रावरुणौ ५ रोदसीमित्रवरुणेंद्राग्न्यर्यमभगसोमान् १ देवमरुदग्निमित्रवरुणमघवतः १ [९] मित्रावरुणौ ३ पूषणं ४ विश्वान्देवान् १ मित्रावरुणौ १ अश्विनौ ३ इंद्रं १ अग्निं १ मरुतः १ इंद्राग्नी १ बृहस्पतिं १ विश्वान्देवान् १ अग्निं २६ इध्मं १ तनूनपातं १ नराशंसं १ इळं १ बर्हिषं १ देवीर्द्वारः १ उषासानक्ते १ दैव्यौहोतारौप्रचेतसौ १ सर-

---

१–भे. प. विश्वान्देवान् ४ इंद्रापूषणौ १ विश्वान्देवान् ४ अदितिं १ विश्वान्देवान् ९ (एवं १९)। २–यद्दैवत्यंवासूक्तमितिपक्षेग्निरेवदेवता। ३–द्वेविरूपइत्यारभ्यजातवेदसइत्यंतंशुद्धोग्निर्विकल्पेन। ४–भे. प. विश्वान्देवान् १ रोदसी १ विश्वान्देवान् १ अग्निरोदसीः १ विश्वान्देवान् ३ इंद्ररोदसीः १ सूर्यरश्मिरोदसीः १ विश्वान्देवान् १ सूर्यरश्मिरोदसीः १ विश्वान्देवान् १ रौदस्यौ २ वरुणरोदसीः १ विश्वान्देवान् २ रोदसी १ विश्वान्देवान् ११ (एवं २९)। ५–भे.प. रुद्रमरुतः १ उषासानक्ते १ विश्वान्देवान् १ अश्विनौ १ विश्वान्देवान् १ मित्रावरुणसिंधून् १ विश्वान्देवान् २ मित्रावरुणौ २ विश्वान्देवान् ५ (एवं १५)।

Digitization by eGangotri. Funding MoE-Delhi

१ अक्षनिंदां १ अक्षान् २ कितवनिंदां २ अक्षान् १ कृषिं १ अक्षनिंदां १ अग्निद्युपृथिवीदेवावनानि १ द्युपृथिवीसंधुपर्वतसूर्ययोषःसोमान् १ द्युपृथिव्युषोग्नीन् १ उषासाग्नी १ उषासाग्नीन् १ उषोग्न्यश्विनः १ सवितृधिषणाग्नीन् १ देवस्तोत्रसूर्याग्नीन् १ आदित्याग्नीन् १ इंद्रमित्रवरुणभगाग्निदेवान् १ आदित्यबृहस्पतिपूषाश्विभगाग्नीन् १ आदित्याग्नीन् १ मरुद्रुद्राग्निदेवान् १ देवान् १ उषोनक्ताद्युपृथिवीवरुणमित्रार्यमेंद्रमरुत्पर्वताबादित्यांतरिक्षस्वर्गान् १ द्युपृथिवीनिर्ऋतीः १ अदितिदेवावनानि १ ग्रावदेवावनानि १ इंद्रेळाबृहस्पती १ अश्विनौ १ मरुद्गणं १ सोमं १ देवान् ३ अग्निमित्रवरुणसवितॄन् १ देवान् १ सवितारं १ सूर्यं १२ इंद्रं ५ अश्विनौ ३१ इंद्रं ३३ अग्निं २२ ॥५६॥ इंद्रंवैकुंठं ३७ अग्निंसौचीकं १ देवान् १ अग्निंसौचीकं १ देवान् १ अग्निंसौचीकं १ देवान् १ अग्निंसौचीकं १ देवान् १ अग्निंसौचीकं १ देवान् ६ अग्निंसौचीकं ३ देवान् २ अग्निंसौचीकं ६ इंद्रं १४ अग्निवायुसूर्यान् १ पृथिवीदेवसूर्यान् १ स्तोमाभिमानिदेवद्युधर्मदेवादित्यान् १ अंगिरसः ३ बृहदुक्थं १ इंद्रं १ तंतुमग्न्याख्यं १ मनआवर्तनं ३ सोमं १ मनआवर्तनं १२ निर्ऋतिं ३ निर्ऋतिसोमौ १ देवीमसुनीतिं २ पृथिवीद्द्वंतरिक्षसोमपूषस्वस्तीः १ द्यावापृथिव्यौ २ इंद्रद्यावापृथिवीः १ असमातिं ४ इंद्रं १ असमातिं १ अर्थंसुबंधोर्जीविताह्वानरूपं ५ सुबंधोःस्पर्शनहेतुभूतांदेवतां १ रुद्रं २ अश्विनौ २ वास्तोष्पतिरुद्रस्राष्टिं ३ रुद्रंवास्तोष्पतिं १ वास्तोष्पत्यग्नी १ अंगिरसः १ इंद्रं ३ अग्निं १ नासत्येंद्रान् १ सोमं १ अग्निं १ आदित्यद्याः १ नाभानेदिष्ठधेनू १ अग्निं १ इंद्राग्नी १ इंद्रं १ मित्रवरुणनाभानेदिष्ठान् १ वरुणं १ मित्रावरुणौ १ वरुणं १ देवान् १ ॥ ५७ ॥ अंगिरसः ६ विश्वान्देवान् १ दानंसावर्णीयं ४ देवान् ८ इंद्राग्निमित्रवरुणभगद्युपृथिवीमरुतः १ द्यां १ देवान् ४ पथ्यास्वस्तिं २ विश्वदेवादितीः १ देवान् २

Digitization by eGangotri. Funding by MoE-Delhi

नराशंसपूषाग्निसूर्यचंद्रमोयमेंद्रवायूषोरात्र्यश्विनः १ अग्निबृहस्पत्यजैकपादहिर्बुध्न्यान् १ पृथिव्यर्यमणौ १ अश्वान् १ वार्य्विद्रपूष्णः १ एकविंशतिनद्यृभुवनस्पतिपर्वताग्निकृशानूवस्त्रतिष्यरुद्रान् १ नदीसरस्वतीसरयुसिंध्वाद्याः १ देवमातृदेवपत्नीत्वष्ट्रिंद्रवाजभगमरुतः १ मरुतः १ मरुदिंद्रादिदेववरुणमित्रान् १ मरुददितीः १ द्यावापृथिव्यौ १ होत्रायज्ञौ १ गयं १ विश्वदेवादितीः १ अग्नींद्रवरुणमित्रार्यमवायुपूषसरस्वत्यादित्यविष्णुमरुद्द्युसोमरुद्रादितिब्रह्मणस्पतीन् १ इंद्राग्नीषोमान् १ देवान् २ मित्रावरुणौ १ गां १ देवान् १ द्यावापृथिव्यौ १ पर्जन्येंद्रवायुवरुणमित्रार्यमादितिपार्थिवदिव्यांतरिक्षदेवान् १ ऋभुसोमान् १ देवान् १ अश्विनौ १ माध्यमिकवागजैकपात्सिंध्वद्विश्वदेवसरस्वतीः १ देवान् १ देवानिंद्रज्येष्ठान् १ मरुतः १ इंद्रवस्वादित्यादितिरुद्रमरुत्त्वष्टृदेवपत्नीः १ अदितिद्युपृथिव्यग्नींद्रविष्णुमरुदादित्यवसुरुद्रसवितॄन् १ सरस्वद्वरुणपूषविष्णुवाय्वश्विनः १ यज्ञदेवर्त्विगध्वर्य्वादिद्युपृथिवींद्रान् १ अग्नीषोमौ १ देवान् २ देववातपर्जन्यावोषध्यर्यमाग्निवायुसूर्यान् १ सिंध्वंतरिक्षाजैकपान्मेधाहिर्बुध्न्यदेवान् १ देवान् १ अग्न्यादित्यक्षेत्रपतीन् १ देवान् २ बृहस्पतिं २४ अग्निं १२ अग्निंसमिद्धं १ अग्निंनराशंसं १ अग्निमिळं १ अग्निंबर्हिषं १ अग्निमूर्तीर्देवीर्द्वारः १ अग्निमूर्ती उषासानक्ते १ अग्नीदैव्यौहोतारौप्रचेतसौ १ अग्निमूर्तीःसरस्वतीळाभारतीः १ अग्निंत्वष्टारं १ अग्निंवनस्पतिं १ स्वाहाकृतीः १ ज्ञानं ११ ॥ ५८ ॥ देवान् ९ इंद्रं १७ नदीः ९ ग्राव्णः ८ मरुतः १६ अग्निं १४ विश्वकर्माणं १४ मन्युं १४ सोमं ५ सूर्याविवाहं ११ देवान् १ सोमार्कौ १ चंद्रमसं १ विवाहमंत्राशिषः ९ वधूवासःसंस्पर्शनिंदां २ दंपतियक्ष्मनाशं १ सूर्यासावित्रीं १६ ॥ ५९ ॥ इंद्रं २३ अग्निंरक्षोहणं २५ सूर्यमग्निंवैश्वानरंच १९ इंद्रं ४ सोमेंद्रौ १ इंद्रं १३ पुरुषं १६ अग्निं १५ देवान् १ अग्निं ३

अम्मरुदिंद्रान् १ मरुद्वरुणमित्रार्यमेंद्रान् १ इंद्रासूर्यौ १ इंद्रं १ रुद्रं १ बृहस्पतिसोमजाम्यथर्वदेवभृगून् १ द्युपृथिवीनराशंसयमादितित्वष्टृद्रविणोदऋभुरोदसीमरुद्विष्णून् १ अहिर्बुध्न्यसूर्यचंद्रमोद्युपृथिवीः १ पूषापांनपाद्वाय्वश्विनः १ अग्निदेवपत्न्यदितिचंद्रसूर्येंद्रान् १ अंगिरोग्रावेंद्रवस्वदितीः १ द्यावापृथिव्यौ १ देवान् २ अर्यममित्रवरुणदेवजनरुद्रमरुद्गणान् १ सूर्यचंद्रमोहिर्बुध्न्याश्विनः १ मित्रवरुणाश्विनः १ अश्विपूषभगर्भ्वादिब्रह्मादीन् १ इंद्रं १ सवित्रिंद्रमरुतः १ द्यावापृथिव्यौ १ इंद्रं १ देवस्तोत्रं १ गोयाच्ञां १ ग्राव्णः १४ ॥६०॥ उर्वशीं १ पुरूरवसं १ उर्वशीं १ पुरूरवसं २ उर्वशीं १ पुरूरवसं १ उर्वश्याद्यप्सरसः १ उर्वशीं १ पुरूरवसं १ उर्वशीं १ पुरूरवसं १ उर्वशीं १ पुरूरवसं २ उर्वशीं १ पुरूरवसं १ इंद्राश्वौ १३ ओषधीः २३ बृहस्पतिमित्रवरुणपूषादित्यवस्विंद्रान् १ बृहस्पतिं ३ देवान् २ बृहस्पतिं १ अग्निं ५ इंद्रं १२ इंद्रदेवसवित्रदितीः १ गवादितीः १ इंद्रादिती २ ऋत्विजः १२ द्रुघणं १२ इंद्रं ३ बृहस्पतिं १ इंद्रं ७ देवीमप्वां १ मरुतः १ इंद्रं २२ ॥ ६१ ॥ अश्विनौ ११ दक्षिणां ११ सरमां १ पणीनसुरान् १ सरमां १ पणीनसुरान् १ सरमां १ पणीनसुरान् १ सरमां १ पणीनसुरान् १ सरमां १ पणीनसुरान् १ आदित्यवरुणवाय्वग्निसोमापाः १ सोमवरुणमित्राग्निबृहस्पतिब्रह्मजायादानानि १ देवबृहस्पतिब्रह्मजायाः १ देवसप्तर्षिबृहस्पतिब्रह्मजायाः १ देवजुहूबृहस्पतीन् १ देवमनुष्यराजबृहस्पतिब्रह्मजायादानानि १ देवबृहस्पतिब्रह्मजायाबार्हस्पत्ययज्ञान् १ अग्निंसमिद्धं १ अग्निंतनूनपातं १ अग्निमिळं १ अग्निंबर्हिषं १ अग्निमूर्तीर्देवीर्द्वारः १ अग्निमूर्तीउषासानक्ते १ अग्नीदैव्यौहोतारौप्रचेतसौ १ अग्निमूर्तीःसरस्वतीळाभारतीः १ अग्निंत्वष्टारं १ अग्निंवनस्पतिं १ स्वाहाकृतीः १ इंद्रं ३० अग्न्यादित्यवायुसूर्यरश्मीन् १ अग्निवायुसूर्यान् १ वेदिजायापतिदेवान् १ देवं-

मध्यमस्थानं १ वाचंमाध्यमिकांचपरमात्मछंदःसोमग्रहान् १ यज्ञं २ ब्रह्मसर्वरूपवाचं १ छंदोयोगधिष्ण्यवागृत्विगिंद्राश्वान् १ सप्ताश्वसूर्यान् १ अग्निं ९ इंद्रं ९ धनान्नदानं ९ अग्निंरक्षोहणं ९ इंद्रं २२ ॥ ६२ ॥ प्रजापतिं १० आग्निं ८ वेनं ८ अग्निं ४ वरुणं १ सोमं १ वरुणापाः २ इंद्रं १ वाचमांभृणीं ८ देवार्यममित्रवरुणान् १ वरुणमित्रार्यम्णः ३ वरुणमित्रार्यममरुद्रुद्रेंद्रान् १ वरुणमित्रार्यम्णः १ वरुणमित्रार्यमादित्यान् १ वसुमित्रवरुणार्यमाग्नीन् १ रात्रिं ८ अग्निं १ इंद्रमरुद्विष्णवग्न्यंतरिक्षवायून् १ देवान् २ द्युपृथिव्यहोरात्र्यबोषधिदेवसोमान् १ अग्निं १ इंद्राश्विबृहस्पतिदेवान् १ इंद्रं १ इंद्राग्निवसुरुद्रादित्यान् १ भाववृत्तिं १४ इंद्रं ३ अश्विनौ २ इंद्रं २ द्युभूम्यश्विनः १ मित्रावरुणौ ६ इंद्रं १४ यमं ७ अग्निसूर्यवायून् ७ देवान् १ वातौ १ वातं २ देवमरुद्भूतानि २ अपः १ जिह्वां १ इंद्रं ६ सवितारं ३ विश्वावसुं ३ अग्निं ७ अर्यमभगबृहस्पतिदेववाग्देवीः १ सोमाग्न्यादित्यविष्णुसूर्यब्रह्मबृहस्पतीन् १ इंद्रवायुबृहस्पतीन् १ अर्यमबृहस्पतींद्रवायुविष्णुसरस्वतीसवितॄन् १ अग्निं ९ ॥ ६३ ॥ अश्विनौ ६ इंद्रं ६ सपत्नीबाधनं ६ अरण्यानीं ६ इंद्रं १० सवितारं ५ अग्निं ५ श्रद्धां ५ इंद्रं १० भाववृत्तं ५ अलक्ष्मीनाशनं १ ब्रह्मणस्पतिं २ अलक्ष्मीनाशनं १ विश्वान्देवान् १ अग्निं ५ इंद्रदेवान् २ इंद्रमरुद्देवान् १ देवान् २ सूर्यं ५ शचीं ६ इंद्रं १० गर्भसमाधानं ६ यक्ष्मनाशनं ६ दुःस्वप्ननाशनं ५ देवान् ३ यमं १ देवान् १ सपत्ननाशनं ५ इंद्रं २ सोमवरुणबृहस्पत्यनुमतींद्रधातृविधातॄन् १ इंद्रं १ वायुं ४ गाः ४ सूर्यं ४ इंद्रं ४ उषसं ४ अभिषिक्तराजस्तुतिं ११ ग्राव्णः ४ ऋभून् १ अग्निं ३ मायाभेदं ३ तार्क्ष्यं ३ इंद्रं ६ धातृसवितृविष्णून् १ धातृसवितृविष्णवग्नीन् १ धातृसवितृविष्णुसूर्यान् १ बृहस्पतिं ३ पुत्रकामयजमानाशिषः १ पुत्रकामपत्न्याशिषः १ होत्राशिषः १

विष्णुत्वष्टृप्रजापतिधातॄन् १ सिनीवालीसरस्वत्यश्विनः १ अश्विनौ १ अदितिं ३ वायुं ३ अग्निं ३ अग्निंजातवेदसं ३ सूर्यं ३ भाववृत्तिं ३ अग्निं १ संज्ञानं ३ ॥ ६४ ॥ इतिशाकलसंहितामंत्रदेवतान्वाधानं ॥

अनुवाकाद्यृग्देवतान्वाधानं ।

श्रीः ॥ अग्निं १ इंद्रंद्विः ३ अग्निं ४ ब्रह्मणस्पतिं ५ कं ६ अग्निंद्विः ८ अग्न्यश्व्युषसः ९ इंद्रं १० अग्निंत्रिः १३ मरुतः १४ अग्निं १५ इंद्रं १६ अश्विनौ १७ इंद्रं १८ अग्निं १९ वायुं २० अग्निं २१ अश्विनौ २२ इंद्रंमरुत्वंतं २३ अश्विनौ २४ अग्निं २५ इंद्रं २६ ब्रह्मणस्पतिं २७ रुद्रं २८ अग्निंद्विः ३० इंद्रंद्विः ३२ अग्निंत्रिः ३५ इंद्रं ३६ ऋभून् ३७ वायुं ३८ अग्निंद्विः ४० इंद्रं ४१ इंद्रसूर्यौ ४२ मरुतः ४३ अश्विनौ ४४ अग्निंद्विः ४६ इंद्रंद्विः ४८ विश्वान्देवान् ४९ अश्विनौ ५० अग्निं ५१ इंद्रं ५२ देवान् ५३ मरुतः ५४ अश्विनौ ५५ इंद्रवायू ५६ इंद्रंचतुः ६० यज्ञयजमानौ ६१ अग्निंद्विः ६३ इंद्रंद्विः ६५ मरुतः ६६ सोमंपवमानंसप्त ७३ अग्निं ७४ सरण्यूः ७५ अपोपोनपातंवा ७६ इंद्रं ७७ रुद्रं ७८ अग्निं ७९ सोमं ८० अग्निं ८१ विश्वान्देवान् ८२ इंद्रं ८३ भाववृत्तिं ८४ इंद्रं ८५ ॥ इत्यनुवाकदेवताःपंचाशीतिः ॥

अनुवाकाद्यृचामृष्यादयः ।

श्रीः ॥ अग्निमीळइत्यस्यवैश्वामित्रोमधुच्छंदाअग्निर्गायत्री १ सुरूपकृत्नुमित्यस्यवैश्वामित्रोमधुच्छंदाइंद्रोगायत्री २ एंद्रसानसिमित्यस्य वैश्वामित्रोमधुच्छंदाइंद्रोगायत्री ३ अग्निंदूतमित्यस्यकाण्वोमेधातिथिरग्निर्गायत्री ४ सोमानमित्यस्यकाण्वोमेधातिथिर्ब्रह्मणस्पतिर्गायत्री ५

कस्यनूनमित्यस्याजीगर्तिःशुनःशेपःसकृत्रिमोवैश्वामित्रोदेवरातःकस्त्रिष्टुप् ६ त्वमग्नेप्रथमइत्यस्यांगिरसोहिरण्यस्तूपोग्निर्जगती ७ प्रवोयह्व-
मित्यस्यघौरःकण्वोग्निर्बृहती ८ अग्नेविवस्वदित्यस्यकाण्वःप्रस्कण्वोग्न्यश्व्युषसोबृहती ९ अभित्यंमेषमित्यस्यांगिरसःसव्यइंद्रोजगती १०
नूचित्सहोजाइत्यस्यगौतमोनोधाअग्निर्जगती ११ पश्वानतायुमित्यस्यशात्त्यःपराशरोग्निर्द्विपदाविराट् १२ उपप्रयंतइत्यस्यराहूगणोगोतमो-
ग्निर्गायत्री १३ प्रयेशुंभंतइत्यस्यराहूगणोगोतमोमरुतोजगती १४ इमंस्तोममित्यस्यांगिरसःकुत्सोग्निर्जगती १५ इंद्रंमित्रंवरुणमग्निमूतय-
इत्यस्यांगिरसःकुत्सइंद्रोजगती १६ नासत्याभ्यामित्यस्यदैर्घतमसःकक्षीवानश्विनौत्रिष्टुप् १७ कदित्थानॄनित्यस्यदैर्घतमसःकक्षीवानिंद्रस्त्रि-
ष्टुप् १८ अग्निंहोतारमित्यस्यदैवोदासिःपरुच्छेपोग्निरत्यष्टिः १९ आत्वाजुवइत्यस्यदैवोदासिःपरुच्छेपोवायुरत्यष्टिः २० वेदिषदइत्यस्यौ-
चथ्योदीर्घतमाअग्निर्जगती २१ अबोध्यग्निर्ज्मइत्यस्यौचथ्योदीर्घतमाअश्विनौजगती २२ कयाशुभेत्यस्यैंद्रइंद्रोमरुत्वांस्त्रिष्टुप् २३ युवोर-
जांसीत्यस्यमैत्रावरुणिरगस्त्योश्विनौत्रिष्टुप् २४ त्वमग्नेद्युभिरित्यस्यशौनकोगृत्समदोग्निर्जगती २५ योजातएवेत्यस्यशौनकोगृत्समदइंद्रस्त्रि-
ष्टुप् २६ गणानांत्वेत्यस्यशौनकोगृत्समदोब्रह्मणस्पतिर्जगती २७ आतेपितरित्यस्यशौनकोगृत्समदोरुद्रोनिचृत्त्रिष्टुप् २८ सोमस्यमेत्यस्य
गाथिनोविश्वामित्रोग्निस्त्रिष्टुप् २९ प्रवोदेवायेत्यस्यवैश्वामित्रऋषभोग्निरनुष्टुप् ३० इच्छंतित्वेत्यस्यगाथिनोविश्वामित्रइंद्रस्त्रिष्टुप् ३१ इंद्रं-
मतिरित्यस्यगाथिनोविश्वामित्रइंद्रस्त्रिष्टुप् ३२ इमंमहइत्यस्यवैश्वामित्रोवाच्योवाप्रजापतिरग्निस्त्रिष्टुप् ३३ त्वांह्यग्नइत्यस्यगौतमोवामदेवोग्नि-
रष्टिः ३४ भद्रंतेअग्नइत्यस्यगौतमोवामदेवोग्निस्त्रिष्टुप् ३५ यन्नइंद्रइत्यस्यगौतमोवामदेवइंद्रस्त्रिष्टुप् ३६ प्रऋभुभ्यइत्यस्यगौतमोवामदेव-
ऋभवस्त्रिष्टुप् ३७ अग्रंपिबेत्यस्यगौतमोवामदेवोवायुर्गायत्री ३८ अबोध्यग्निरित्यस्यात्रेयौबुधगविष्ठिरावग्निस्त्रिष्टुप् ३९ प्रवेधसइत्यस्यांगि-

Digitization by eGangotri. Funding MDF-Delhi

रसोधरुणोग्निस्त्रिष्टुप् ४० महिमहइत्यस्यप्राजापत्यःसंवरणइंद्रस्त्रिष्टुप् ४१ विदादिवइत्यस्यात्रेयःसदापृणइंद्रसूर्यौत्रिष्टुप् ४२ आरुद्रासइत्यस्यात्रेयःश्यावाश्वोमरुतोजगती ४३ यद्द्यस्थइत्यस्यात्रेयःपौरोश्विनावनुष्टुप् ४४ त्वंह्यग्नइत्यस्यबार्हस्पत्योभरद्वाजोग्निस्त्रिष्टुप् ४५ त्वमग्नेयज्ञानामित्यस्यबार्हस्पत्योभरद्वाजोग्निर्गायत्री ४६ वृषामहइत्यस्यबार्हस्पत्योभरद्वाजइंद्रस्त्रिष्टुप् ४७ योरयिवइत्यस्यबार्हस्पत्यःशंयुरिंद्रोनुष्टुप् ४८ हुवेवोदेवीमित्यस्यभारद्वाजऋजिश्वाविश्वेदेवास्त्रिष्टुप् ४९ स्तुषेनरेत्यस्यबार्हस्पत्योभरद्वाजोश्विनौत्रिष्टुप् ५० अग्निंनरइत्यस्यमैत्रावरुणिर्वसिष्ठोग्निर्विराळनुष्टुप् ५१ त्वेहयदित्यस्यमैत्रावरुणिर्वसिष्ठइंद्रस्त्रिष्टुप् ५२ प्रशुक्रैत्वित्यस्यमैत्रावरुणिर्वसिष्ठोदेवाविराड्द्विपदा ५३ कईंव्यक्ताइत्यस्यमैत्रावरुणिर्वसिष्ठोमरुतोविराड्द्विपदा ५४ अपस्वसुरित्यस्यमैत्रावरुणिर्वसिष्ठोश्विनौत्रिष्टुप् ५५ प्रवीरयेत्यस्यमैत्रावरुणिर्वसिष्ठइंद्रवायूत्रिष्टुप् ५६ माचिदन्यदित्यस्यकाण्वःप्रगाथइंद्रोबृहती ५७ महाँइंद्रोयइत्यस्यकाण्वोवत्सइंद्रोगायत्री ५८ इंद्रःसुतेष्वित्यस्य काण्वोनारदइंद्रउष्णिक् ५९ वयमुत्वामपूर्व्येत्यस्यकाण्वःसोभरिरिंद्रःककुबुष्णिक् ६० योयजातीत्यस्यवैवस्वतोमनुर्यज्ञयजमानौगायत्री ६१ इमेविप्रस्येत्यस्यांगिरसोविरूपोग्निर्गायत्री ६२ अग्नआयाहीत्यस्यप्रागाथोभर्गोग्निर्बृहती ६३ योराजेत्यस्यांगिरसःपुरुहन्मेंद्रोबृहती ६४ आनूनइंद्रेत्यस्यकाण्वःकुसीदींद्रोगायत्री ६५ गौर्धयतीत्यस्यांगिरसोबिंदुर्मरुतोगायत्री ६६ स्वादिष्ठयेत्यस्यवैश्वामित्रोमधुच्छंदाःपवमानः सोमोगायत्री ६७ पवस्वदक्षसाधनइत्यस्यागस्त्योदृह्ळच्युतःपवमानःसोमोगायत्री ६८ अयावीतीत्यस्यांगिरसोमहीयुःपवमानःसोमोगायत्री ६९ प्रदेवमच्छेत्यस्यभालंदनोवत्सप्रिःपवमानःसोमोजगती ७० प्रतआशवइत्यस्याकृष्टामाषाःपवमानःसोमोजगती ७१ अस्यप्रेषेत्यस्यमैत्रावरुणिर्वसिष्ठःपवमानःसोमस्त्रिष्टुप् ७२ सखायआनीत्यस्यकाण्वौपर्वतनारदौद्वेशिखंडिन्यावप्सरसौवऋषिकेपवमानःसोमउष्णिक् ७३

अग्नेबृहन्नित्यस्यास्यस्त्रितोग्निस्त्रिष्टुप् ७४ त्वष्टादुहित्रइत्यस्ययामायनोदेवश्रवासरण्यूत्रिष्टुप् ७५ प्रदेवत्रेत्यस्यैलूषःकवषआपोपोनपात्रिष्टुप् ७६ अच्छामइंद्रमित्यस्यांगिरसःकृष्णइंद्रोजगती ७७ इदमित्थेत्यस्यमानवोनाभानेदिष्ठोरुद्रस्त्रिष्टुप् ७८ भद्राअग्नेरित्यस्यवाध्र्यश्वःसुमित्रोग्निर्जगती ७९ सत्येनोत्तभितेत्यस्यसूर्यासावित्रीसोमोनुष्टुप् ८० संजागृवद्भिरित्यस्यवैतहव्योरुणोग्निर्जगती ८१ इंद्रदृह्येत्यस्यवांदनोदुवस्युर्विश्वेदेवाजगती ८२ तमस्यद्यावापृथिवीइत्यस्यवैरूपःशतप्रभेदनइंद्रोजगती ८३ नासदासीदित्यस्यप्रजापतिःपरमेष्ठीभाववृत्तिस्त्रिष्टुप् ८४ शासइत्थेत्यस्यभारद्वाजःशासइंद्रोनुष्टुप् ८५ ॥ इत्यनुवाकाद्यृचामृष्यादयः ॥

वासिष्ठविषयेविशेषः ।

इंद्रोतिभिरितीमंवर्गंवासिष्ठानाधीयीरन्सर्वानुक्रमेवासिष्ठान्प्रतितच्छ्रवणनिषेधमुखेनोपेयभूततदध्ययनप्रतिषेधात् । तथाहि—'अंत्याअभिशापार्थास्तावसिष्ठद्वेषिण्योनवसिष्ठाःशृण्वंति' इति । अत्रभाष्यम्—इंद्रापर्वतेतिसूक्तस्य अंत्याइंद्रोतिभिरित्याद्याश्चतस्रऋचः अभिशापार्थाः । अभिशापोनामाप्रियशंसनरूपोऽर्थः प्रयोजनं यासां । ताश्च वसिष्ठद्वेषकर्त्र्यः । अतो वसिष्ठगोत्रोत्पन्ना न शृण्वंति । लिङर्थेलोटोरूपं । यदिशृणुयुस्तदातेषांशिरःशतधाभिद्येत । तदुक्तंबृहद्देवतायां—'शतधाभिद्यतेमूर्धाकीर्तितेनश्रुतेनवा । तेषांबालाःप्रमीयंते' इतीति । सकलसंहिताध्ययनादिकर्मफलसिद्धिस्त्वेषामेतद्वर्गविकलसंहिताध्ययनादिनैवभवति । अतएवचरणव्यूहे—एकंशतसहस्रंवाद्विपंचाशत्सहस्राधंमेतानिचतुर्दशपदानिवासिष्ठानांतद्व्यतिरिक्तानांतुएकंशतेत्यादिचतुर्दशांतानिपदानिगृहीत्वाइंद्रोतिभिरित्याद्येकसप्ततिपदानिमिलित्वेतरेषांपंचाशीतिरितिपदसंख्याविभागःसंगच्छतइतिदिक् ॥

॥ अथऋग्विधानं ॥

श्रीवेदपुरुषायनमः ॥ ॐ स्वयंभुवेब्रह्मणेविश्वगोप्त्रेनमस्कृत्वामंत्रदृग्भ्यस्तथैव ॥ विवक्षुरस्म्यृग्विधानंपुराणंपुरादृष्टमृषिभिर्मंत्रदृग्भिः ॥ १ ॥
मंत्रेभ्योमंत्रदृग्भ्यश्चसमाम्नायानुपूर्वशः ॥ कर्मणामृषिदृष्टानांविधिंप्रोवाचशौनकः ॥ २ ॥ ऋषिभिर्विविधामंत्रादृष्टादृष्टप्रयोजनाः ॥ प्रयोजनाय
चोद्दिष्टास्तस्मिंस्तस्मिन्प्रदर्शिताः ॥ ३ ॥ नानार्थानिचकर्माणिशांतिपुष्ट्याश्रयाणिच ॥ सिद्धयश्चतपोमूलाःश्रद्दधानस्यकुर्वतः ॥ ४ ॥
स्तुत्यादयोयेविकाराःप्रदिष्टास्तथार्थवादाऋक्षुसूक्तेषुचैव ॥ यैर्यैःकामैर्ऋषिभिर्देवताश्चतुष्टूयंतेतान्छृणुष्वोच्यमानान् ॥ ५ ॥ आयुःस्वर्गो
द्रविणंसूनवश्चचतुर्विधंप्रोक्तमाशास्यमग्रे ॥ अन्येकामाःशतशःसंप्रदिष्टाःसंस्तुवद्भिर्ऋषिभिर्देवताश्च ॥ ६ ॥ सिद्धामंत्राविविधाब्राह्मणस्य
फलंयच्छंतिविधिवत्प्रयुक्ताः ॥ सत्यंतेषांसाधनंसंयमश्चशमस्तितिक्षानसूयादमश्च ॥ ७ ॥ तस्माद्द्विजःप्रशांतात्माजपहोमपरायणः ॥
तपस्यध्ययनेयुक्तोभवेद्भूतानुकंपकः ॥ ८ ॥ क्षत्रियोबाहुवीर्येणतरेदापदमात्मनः ॥ धनेनवैश्यःशूद्रस्तुजपहोमैर्द्विजोत्तमः ॥ ९ ॥ तपसा
स्वर्गमाप्नोतितपसाविंदतेमहत् ॥ तपोयुक्तस्यसिध्यंतिकर्माणिनियतात्मनः ॥ १० ॥ विद्वेषणंसंवननंविषघ्नंरोगनाशनं ॥ येनयेनार्थमृषिणा
यदर्थंदेवताःस्तुताः ॥ ११ ॥ ससकामःसमृद्धश्चतेषांतेषांतथातथा ॥ तानिकर्माणिवक्ष्यामिविविधानिचकर्मणां ॥ १२ ॥ पुरश्चरण
मादौतुकर्मणांसिद्धिकारकं ॥ स्वाध्यायाभ्यसनस्यादौप्राजापत्यंचरेद्द्विजः ॥ १३ ॥ केशश्मश्रुलोमनखान्वापयित्वाप्लुतःशुचिः ॥ तिष्ठेदहनि
रात्रौतुशुचिरासीतवाग्यतः ॥ १४ ॥ सत्यवादीपवित्राणिजपेद्व्याहृतयस्तथा ॥ ॐकाराद्यास्तुताजस्वासावित्रींचतदित्यृचं ॥ १५ ॥
आपोहिष्ठेतिसूक्तंतुशुद्धवत्योऽघमर्षणं ॥ शंवत्यःस्वस्तिमत्यश्चपावमान्यस्तथैवच ॥ १६ ॥ सर्वत्रैतत्प्रयोक्तव्यमादावंतेचकर्मणां ॥

आसहस्रादाशताद्वादशांतमथवाजपेत् ॥ १७ ॥ ॐकारंव्याहृतीस्तिस्रःसावित्रीमथवायुतं ॥ तर्पयित्वाद्भिराचार्यान्नृषींश्छंदांसिदेवताः
॥ १८ ॥ प्रपद्येतविरूपाक्षंरौद्रमंत्रगणंजपन् ॥ अनार्यैर्नचभाषेतनशूद्रैर्नापिगर्हितैः ॥ १९ ॥ नरजस्वलयानार्यापतितैर्नांत्यजैर्नृभिः ॥
नदेवब्राह्मणंद्विष्टैर्नाचार्यगुरुनिंदकैः ॥ २० ॥ नमातृपितृविद्विष्टैर्नावमन्येतकंचन ॥ मंगलाचारयुक्तःस्यात्रिरह्नोभ्युदयादपः (?) ॥ २१ ॥
अंतेद्वादशरात्रस्यस्थालीपाकंप्रकल्पयेत् ॥ अग्नयेचाथसोमायतृतीयाचतयोःसह ॥ २२ ॥ वैश्वदेवीचरौद्रीचजुहुयादुत्तरेततः ॥ अवसानस्यपतयेतथानुमतयेपिच ॥ २३ ॥ धन्वंतरयइत्यन्यांगंधर्वाप्सरसामपि ॥ दशमीब्राह्मणस्पत्यापरातुब्रह्मणेस्मृता ॥ २४ ॥ सरस्वत्यैतथाविष्णोरंत्यासौविष्टकृत्यपि ॥ आज्याहुतयएवादौस्थालीपाकेहुतेपुनः ॥ २५ ॥ हुत्वाग्निंतर्पयेद्विद्वान्पितृभ्यश्चप्रकल्पयेत् ॥ ततःशेषं
विधानेनशुचिर्भुंजीतवाग्यतः ॥ २६ ॥ कृच्छ्राणामेषसर्वेषांविधिरुक्तोऽनुपूर्वशः ॥ प्राजापत्यातिकृच्छ्रस्यतथासांतपनस्यच ॥ २७ ॥
पराकस्यचकृच्छ्रस्यविधिंचांद्रायणस्यच ॥ एकेनशुद्धिमाप्नोतिद्वाभ्यांपापैःप्रमुच्यते ॥ २८ ॥ त्रिभिःसिध्यंतिमंत्राश्चमुच्यतेचोपपातकैः ॥
चतुर्भिर्भ्रूणहत्यायास्तथैवायाज्ययाजनात् ॥ २९ ॥ पंचभिःपातकैःसर्वैर्दुष्कृतैश्चप्रमुच्यते ॥ तप्तकृच्छ्रेणसर्वाणिपापानिप्रतिबाधते ॥३०॥
चांद्रायणंसहाद्यंतमेभिःकृच्छ्रैःसमंस्मृतं ॥ त्रिभिश्चांद्रायणैःपूतोब्रह्मलोकंसमश्नुते ॥ ३१ ॥ अष्टाभिर्देवताःसाक्षात्पश्येतवरदास्तथा ॥
छंदांसिदशभिर्ज्ञात्वासर्वान्कामान्समश्नुते ॥ ३२ ॥ त्र्यहंप्रातस्त्र्यहंसायंत्र्यहमद्यादयाचितं ॥ त्र्यहंपरंचनाश्नीयात्प्राजापत्यंचरन्द्विजः
॥ ३३ ॥ एकैकंग्रासमश्नीयात्त्र्यहानित्रीणिपूर्ववत् ॥ त्र्यहंचोपवसेदंत्यमतिकृच्छ्रंचरन्द्विजः ॥ ३४ ॥ अमावास्यांनभुंजीतह्येषचांद्रायणोविधिः ॥ कुक्कुटांडप्रमाणंतुग्रासंकुर्यादतंद्रितः ॥ ३५ ॥ गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकं ॥ एकरात्रोपवासश्चकृच्छ्रःसांतपनःस्मृ-

तः ॥ ३६ ॥ एवमेतत्र्यहैर्युक्तंमहासांतपनंविदुः ॥ उपवासस्तुसप्ताहंशिशुसांतपनंस्मृतं ॥ ३७ ॥ तप्तकृच्छ्रंचरन्विप्रोजलक्षीरघृतानिलान् ॥
प्रतित्र्यहंपिबेदुष्णान्सकृत्स्नायीसमाहितः ॥ ३८ ॥ नियतस्तुपिबेदापःप्राजापत्यविधिःस्मृतः ॥ यतिकृच्छ्रंवदंत्येतद्रहसामपनोदनं
॥ ३९ ॥ यतात्मनोऽप्रमत्तस्यद्वादशाहमभोजनं ॥ पराकोनामकृच्छ्रोयंसर्वपापप्रणोदनः ॥ ४० ॥ एकैकंह्रासयेत्पिंडंकृष्णेशुक्लेच
वर्धयेत् ॥ उपस्पृशंस्त्रिषवणमेतच्चांद्रायणंस्मृतं ॥ ४१ ॥ एतमेवविधिंकृत्स्नमाचरेद्यवमध्यमे ॥ शुक्लपक्षादिनियतश्चरंश्चांद्रायणव्रतं
॥ ४२ ॥ चतुरःप्रातरश्नीयाद्विप्रःपिंडान्कृताह्निकः ॥ चतुरोऽस्तमितेसूर्येशिशुचांद्रायणंस्मृतं ॥ ४३ ॥ अष्टावष्टौसमश्नीयात्पिंडान्मध्यंदिनेस्थिते
॥ नियतात्माहविष्यस्ययतिचांद्रायणव्रतं ॥ ४४ ॥ यथाकथंचित्पिंडानांतिस्रोऽशीतीःसमाहितः ॥ मासेनाश्नन्हविष्यस्यचंद्रस्यैतिसलोकतां
॥ ४५ ॥ एतद्रुद्रास्तथादित्यावसवश्चाचरन्व्रतं ॥ सर्वकुशलमोक्षायमरुतश्चतुर्भिःसह ॥ ४६ ॥ यावकःसप्तरात्रेणपातव्योनियतात्मना
॥ स्थानासनत्रिषवणैर्जपतापावमान्यृचः ॥४७॥ एकैकंसप्तरात्रेणपुनातिविधिवत्कृतः ॥ त्वगसृक्पिशितास्थीनिमेदोमज्जानमेवच
॥ ४८ ॥ एकैकंसप्तरात्रंतुत्वगादीनांविशोधनं ॥ एभिर्व्रतैर्विपूतात्माकुर्यात्कर्माण्यतंद्रितः ॥ ४९ ॥ इष्यन्कामांस्ततःसर्वानवाप्नोतिनसंशयः
॥ कणपिण्याकतक्राणामेकैकंशोधनंभवेत् ॥ ५० ॥ शुद्धात्माकर्मकुर्वीतसत्यवादीजितेंद्रियः ॥ एवंशुद्धस्यकर्माणिमंत्रैर्वक्ष्यामितद्यथा
॥ ५१ ॥ त्रिरात्रमेवोपवसेदादितःसर्वकर्मणां ॥ त्रीणिनक्तानिवाकुर्यात्ततःकर्मसमारभेत् ॥ ५२ ॥ नित्यप्रयोगिणांचैवप्रयोगादौव्रतंत्र्यहं
॥ उपरिष्टादुपवसेत्कृत्वावासांनिपातिकं ॥ ५३ ॥ आयुष्याण्येवकर्माणिमंत्रयुक्तःसमारभेत् ॥ शंवत्यःस्वस्तिमत्यश्चजपेत
त्रिवृताऋचः ॥ ५४ ॥ अरण्येवोदितेसूर्येदिशंसम्प्राप्यापराजितां ॥ प्राचीमथोत्तरांवापिशुचौदेशेसमाहितः ॥ ५५ ॥ सवासाःसशिरस्को-

प्सुस्नात्वाभ्युक्ष्यजपेद्द्विजः ॥ शुद्धवत्यस्तथाब्लिंग्यःपावमान्योऽघमर्षणं ॥ ५६ ॥ एवंत्रिराप्लुत्यशुचिःप्राणायामान्समाचरेत् ॥ त्रीन्षडष्टौ
द्वादशवाषोडशाष्टादशापिवा ॥ ५७ ॥ आशताद्वायमेत्प्राणान्जपन्ब्रह्माघमर्षणं ॥ यावद्वामनसस्तुष्टिस्तावत्प्राणान्समायमेत् ॥ ५८ ॥
यथायथामनस्तस्यदुष्कृतंकर्मगर्हति ॥ तथातथाशरीरंतत्तेनाधर्मेणमुच्यते ॥ ५९ ॥ प्राणायामैर्दग्धदोषःशुक्लांबरधरःशुचिः ॥ यथाविध्यप
आचम्यआरोहेद्दर्भप्रस्तरं ॥ ६० ॥ पवित्रपाणिःकृत्वातूपस्थंवैदक्षिणोत्तरं ॥ दिशोरेवांतरंप्रेक्ष्यानिमिषंछाद्यचक्षुषी ॥ ६१ ॥ ॐकारं
व्याहृतीस्तिस्रःसावित्रींचतदित्यृचं ॥ मनसैताअनुद्रुत्यवेदादिंसमुपक्रमेत् ॥ ६२ ॥ मंद्रमेवपठेत्प्रातरुच्चैर्मध्यंदिनेपठेत् ॥ सोच्चैरेवापराह्णे
तुसंध्याकालउपारमेत् ॥ ६३ ॥ ब्राह्मेमुहूर्तेचोत्थायत्रिराप्लुत्यपठेद्द्विजः ॥ मध्यमांवृत्तिमास्थायनद्रुतांनविलंबितां ॥ ६४ ॥ पूर्वांसंध्यां
जपंस्तिष्ठेदुपासीतचपश्चिमां ॥ नचांतराव्याहरेतविरमेद्वाकथंचन ॥ ६५ ॥ विरमेद्ब्राह्मणेप्राप्तेकामंतेनतुसंवदेत् ॥ शूद्रंदृष्ट्वैवसंप्राप्तंनाधीयीत
कथंचन ॥ ६६ ॥ आग्नेयंसूक्तमाद्यंतुमुख्यंब्रह्मर्षिसंमतं ॥ रायस्पोषंधुरंधन्यंजपन्विप्रोऽर्थमाप्नुयात् ॥ ६७ ॥ ऋषिंसर्वमिदंजस्त्वा
सपुत्रंनियतःशुचिः ॥ संहिताफलमाप्नोतिऋग्वेदस्यनसंशयः ॥ ६८ ॥ एकादशगुणंह्येतज्जपन्ब्रह्मसनातनं ॥ सर्वान्कामानवाप्नोतिपापैश्च
परिमुच्यते ॥ ६९ ॥ अनश्नन्संहितामेतांप्रातःप्रातर्दिनेदिने ॥ आयुर्विद्यांधनंपुत्रान्गृहांश्चाप्नोत्यनामयान् ॥ ७० ॥ एतद्ब्रह्मजपन्शूद्रान्नेक्षे
तान्यांश्चतद्विधान् ॥ प्रेक्ष्याचम्योदकंपूतःपश्येद्वामग्निभास्करौ ॥ ७१ ॥ मंद्रंजपोदशगुणउपांशुस्याच्छतान्वितः ॥ सहस्रंमानसंविद्यादेष
जप्यविधिःस्मृतः ॥ ७२ ॥ आदावेवतुसावित्र्याकर्मकुर्वीतशांतये ॥ पुष्ट्येधनलाभायपशुकामायभूतये ॥ ७३ ॥ एषाहिसंहिता
देवैःसर्वब्रह्ममयीनिचृत् ॥ उग्रेणतपसादृष्टाविश्वामित्रेणधीमता ॥ ७४ ॥ होमांश्चजपयज्ञांश्चनित्यंकुवर्तिचैतया ॥ सर्वकामसमृध्द्यर्थंपरब्र-

ह्येदमुच्यते ॥ ७५ ॥ एषैवप्रतिलोमोक्तापच्छःशत्रुविनाशिनी ॥ अक्षरप्रतिलोमेयमाभिचारेषुशस्यते ॥ ७६ ॥ अक्षरप्रतिलोमेयंयस्मिन्युज्येतकर्मणि
॥ तदमोघंविजानीयादेतद्वैब्रह्मणोबलं ॥ ७७ ॥ व्याघातकेध्मसमिधोह्यक्षरप्रतिलोमया ॥ जुहुयात्सार्षपंतैलंबैभीतककृतस्रुचः
॥ ७८ ॥ यइच्छेत्पीडनंशत्रोरपिवोच्चाटनंपुनः ॥ पच्छःसंपीडयेच्छत्रून्वर्णशश्चप्रमापयेत् ॥ ७९ ॥ इतिपरिभाषा ॥ ॥
ऋग्वेदाद्यस्यसूक्तस्यविधिंवक्ष्याम्यतःपरं ॥ यथाऋषिर्मधुच्छंदाःकर्मैतेनाकरोत्पुरा ॥ ८० ॥ शिरसाधारयेदग्निंनियतःपरिवत्सरं ॥ चतुर्थप्राणकालीयोहुतशिष्टमदन्हविः
॥ ८१ ॥ जुहूंत्रिरुपतिष्ठंश्चसत्यवादीदिनेदिने ॥ व्रतकालेतुसंप्राप्तआग्नेयंनिर्वपेच्चरुं ॥ ८२ ॥ अनग्नोध्यानमात्रोऽग्निर्व्रतांतेऽस्योपतिष्ठति
॥ दहेयमितियंचेच्छेत्तंदहत्येवपावकः ॥ ८३ ॥ अप्स्वप्यग्निर्ज्वलत्येवतद्व्रतस्यमहात्मनः ॥ समर्धयतितंचेष्टैःकामैर्वह्निःप्रयत्नतः
॥ ८४ ॥ अतःपरंतृचाःसप्तवाय्वाद्यायेप्रकीर्तिताः ॥ तान्जपन्प्रयतोनित्यमिष्टान्कामान्समश्नुते ॥ ८५ ॥
मेधातिथावृषौपुनःसदसस्पतिमित्यृचं ॥ मेधाकामोजपेन्नित्यंजुहुयाच्चाज्यमेतया ॥ ८६ ॥ स्योनेतिपृथिवींनित्यंस्नात्वाविप्रःशुचिर्जपेत् ॥
विंदतेमहतींभूमिमसपत्नामकंटकां ॥ ८७ ॥ इदंविष्णुरितीमाभिःपंचभिःश्राद्धकर्मणि ॥ अंगुष्ठमन्नेऽवगाह्येत्तेनरक्षांसिबाधते ॥ ८८ ॥
अंगुष्ठमात्रोभगवान्विष्णुःपर्यटतेमहीं ॥ राक्षसानांवधार्थायतच्छ्राद्धेप्रहरिष्यति ॥ ८९ ॥ अक्षय्यंचभवेदन्नंश्रद्धाभक्तिसमन्वितं ॥ तस्माच्छ्राद्धेषुसर्वेष्वप्यंगुष्ठग्रहणंस्मृतं
॥ ९० ॥ सप्तजन्मकृतंपापंकृत्वाचाभक्ष्यभक्षणं ॥ तद्विष्णोरित्यपांमध्येसकृज्जप्त्वाविशुध्यति ॥ ९१ ॥
अंबयोयंतियाःप्रोक्तानवर्चस्त्वाभिषेचनीः ॥ आयुष्यस्ताःपरिप्रोक्ताभैषज्यःपापमोचनीः ॥ ९२ ॥ शुनःशेपमृषिंबद्धःसंनिरुद्धोथवाजपेत् ॥
मुच्यतेसर्वपापेभ्योगदीचाप्यगदोभवेत् ॥ ९३ ॥ यइच्छेच्छाश्वतान्कामानिंद्रात्प्राप्स्येपुरंदरात् ॥ सषोडशभिरेवर्ग्भिरिंद्रंस्तूयाद्दिनेदिने

॥ ९४ ॥ हैरण्यस्तूपइंद्रस्यसूक्तंकर्माभिसंस्तवं ॥ तज्जपन्प्रयतःशत्रून्यत्नात्प्रतिबाध्यते ॥९५॥ आकृष्णेनेत्यृचात्वेवयोनित्यंसूर्यमर्चति ॥
प्रातर्मध्येऽस्तगंवापिसजीवेदगदःसुखी ॥ ९६ ॥ आकृष्णेनेत्यृचंत्वेतांध्यायन्निशिदिवौकसः ॥ अग्नौहुत्वैतयाचाज्यंदीर्घमायुरवाप्नुयात्
॥ ९७ ॥ येतेपंथाइतीमांतुसावित्रीमध्वगोऽभ्यसेत् ॥ स्वस्तिमान्व्रजतेऽध्वानंगृहांश्चाप्नोत्यनामयान् ॥ ९८ ॥ संपूषन्नितियत्सूक्तंघौरःकण्वोजगावृषिः
॥ अध्वन्यमेतद्विज्ञेयंपरिपंथ्यपसेधनं ॥ ९९ ॥ रौद्रीभिःषड्भिरीशानंतुष्टूयाद्योदिनेदिने ॥ सनारीसहितःशांतिंशंकरात्प्राप्नुयात्सदा
॥ १०० ॥ एतेनैवषळर्चेनजुहुयादाज्यमन्वहं ॥ चरुंचकल्पयेद्रौद्रंभूतिकामोऽथपर्वसु ॥ १ ॥ उदित्युद्यंतमादित्यमुपतिष्ठेद्दिनेदिने
॥ हृद्रोगनाशनंह्येतत्परमारोग्यवर्धनं ॥ २ ॥ द्विषंतमित्यथार्धर्चेयंद्विष्यात्तंजपन्स्मरेत् ॥ आगस्कृत्सप्तरात्रेणविद्वेषमधिगच्छति
॥ ३ ॥ रोगैर्गृहीतोरोगीचप्रस्कण्वस्योत्तमंतृचं ॥ आरोग्यमेतत्प्रयतोजपेन्नित्यमनेकशः ॥ ४ ॥ उत्तमस्तस्यचार्धर्चोद्विषद्वेषइतिस्मृतः ॥
यंद्विष्यात्तमभिध्यायेद्दृष्ट्वाचैनंजपेदिदं ॥ ५ ॥ आगस्कृच्चेत्त्रिरात्रेणविद्वेषंसंनियच्छति ॥ उदयत्यायुरक्षय्यंतेजोमध्यंदिनेजपन् ॥ ६ ॥
अस्तंव्रजतिसूर्येतुद्विषंतंप्रतिबाध्यते ॥ ओजस्तेजस्तथारोग्यंद्विषद्वेषंप्रकीर्तितं ॥ ७ ॥ नवपश्चेतिसूक्तानियानिगर्भेपराशरः ॥ अरातीनां
हरेत्प्राणान्छत्रूंश्चैवनियच्छति ॥ ८ ॥ सौपर्णानिपवित्राणिसूक्तान्येकादशाभ्यसेत् ॥ वांछन्पुत्रान्पशून्वित्तंस्वर्गमायुरनंधतां ॥ ९ ॥
आध्यात्मिकीःकइत्येताजपंस्तुसुसमाहितः ॥ प्राप्नुयात्सपरंधामविश्वंज्योतिःसनातनं ॥ ११० ॥ आनोभद्रीयमायुष्यंवैश्वदेवंजपन्मुनिः ॥
मुमूर्षुरपिजप्त्वैतद्दीर्घमायुरवाप्नुयात् ॥ ११ ॥ पितृणांश्राद्धकालेतुमध्विवत्येतत्तृचंपठेत् ॥ अघोराःपितरस्तस्यविशंतिज्योतिरुत्तमं ॥ १२ ॥
त्वंसोमेतिचसूक्तेनपश्येच्चंद्रमुपोदितं ॥ उपतिष्ठेत्समित्पाणिर्मासिमासिनवंनवं ॥१३॥ तन्मासंतस्यदुःखंहिनजातुत्रिविधंभवेत् ॥ गौतमेन

पुराद्दष्टंमृत्योर्नाशनमात्मनः ॥ १४ ॥ उद्यंतमुपतिष्ठेतपूर्णेचैतत्समाहितः ॥ वासांस्यपिसविंदेतचंद्रस्यैतिसलोकतां ॥ १५ ॥ धनकामो जपेन्नित्यमेताइतितुनित्यशः ॥ स्नात्वाशुचिस्तुनियतइष्टंधनमवाप्नुयात् ॥ १६ ॥ आयुरीप्सन्निसमितिकौत्संसूक्तंसदाभ्यसेत् ॥ आज्याहुतीश्चजुहुयात्प्रत्यृचंवाग्यतःशुचिः ॥ १७ ॥ जपेदाप्लुत्यनियतःससाक्षादापदंतरेत् ॥ अपनःशोशुचदितिस्नात्वामध्यंदिनेरवौ ॥ १८॥ शुचिकामोजिताहारःप्रत्यृचंजुहुयाद्धृतं ॥ समिधोऽन्वहमिष्टौवासूक्तमेतदघापहं ॥ १९ ॥ यथामुंजादिवेषीकांतथापापात्प्रमुच्यते ॥ जातवेदसइत्यादिसदास्वस्त्ययनेजपेत् ॥ १२० ॥ दुर्गेपथिप्रयातस्यनास्यारिभ्योभयंभवेत् ॥ राजकार्येश्वयूथेवाअभिशस्तोऽप्यनेकधा ॥ २१ ॥ अशक्तोऽप्रतिभाकार्येभयेप्राणांतिकेथवा ॥ जातवेदसइत्येतांजपंस्तेभ्यःप्रमुच्यते ॥ २२ ॥ सिषाधयिषुरर्थंतुप्रस्थितोमनसाजपेत् ॥ सिद्धार्थःस्वस्तिमानेतिप्रमीयेतनचाध्वनि ॥ २३ ॥ कृतार्थःस्वगृहान्गच्छन्नेतामेवसदाभ्यसेत् ॥ उदितेसवितर्येतांजपेदस्तंगतेतथा ॥ २४ ॥ अहःस्वस्त्ययनंप्रातारात्रिस्वस्त्ययनंनिशि ॥ व्युष्टायांचजपेन्नित्यमेतांदुःस्वप्ननाशिनीं ॥ २५ ॥ प्रमंदिनेप्रसूयंत्यांजपेद्गर्भप्रमोचनीं ॥ इंद्रंचमनसाध्यायेन्नारीगर्भंप्रमुंचति ॥ २६ ॥ आपत्सुसर्वकामोवात्रितंनित्यंजपेदृषिं ॥ जपन्निंद्रमितिस्नातोवैश्वदेवंतुसप्तकं ॥ २७ ॥ मुच्यतेजुहुयादाज्यंविश्वस्मादेवसोंऽहसः ॥ शंतातीयंपरंसूक्तंपंचविंशकमुत्तमं ॥ २८ ॥ नासत्यौतुनमस्कृत्यपरामृद्धिमवाप्नुयात् ॥ घर्मसंस्तवनंसूक्तंसर्वपापैःप्रमुच्यते ॥ २९ ॥ इमाइतिजपेच्छश्वद्रौद्रसूक्तंद्विजःशुचिः ॥ आयुर्विद्यांधनंपुत्रान्गृहांश्चाप्नोत्यनामयान् ॥ १३० ॥ वीतेष्वपत्यगोष्ठेषुदुःस्वप्नेतिव्र(?)मात्मनः ॥ मानोमहांतमित्याभ्यांत्रिरात्रोपोषितःशुचिः ॥ ३१ ॥ औदुंबरीश्चजुहुयादृधिमध्वाज्यसंस्कृताः ॥ सूक्तेनजुहुयादाज्यम[illegible]तेनकर्मणां ॥ ३२ ॥ ऊर्ध्वबाहुस्तुसूक्तेनतुष्टावशतशोभवं ॥ छित्त्वासर्वान्मृ

त्युपाशान्जीवेद्रोगैर्विवर्जितः ॥ ३२ ॥ तिष्ठन्नुद्यंतमादित्यंसमित्पाणिःशुचिःसदा ॥ चित्रमित्युपतिष्ठेतसूक्तेनानेनभास्करं ॥ ३४ ॥
अतिस्तवेनचैतेननित्यंमध्यंदिनेरविं ॥ गृणानोपोहतेरिप्रंप्राप्नोतिचधनायुषी ॥ ३५ ॥ अधःस्वप्नस्येतिजपेत्प्रातःप्रातर्दिनेदिने ॥ दुःस्वप्नं
नुदतेक्षिप्रंनचास्याभोजनाद्भयं ॥ ३६ ॥ उभेपुनामीतिपरारिपुभ्यस्तुप्रकीर्तिताः ॥ ताजपन्हंतिरक्षांसिसपत्नांश्चनियच्छति ॥ ३७ ॥
निवर्त्यपंचयज्ञांश्चहुत्वाचाग्निंकृताह्निकः ॥ येदेवासोदिव्यनयाजपन्कामानवाप्नुयात् ॥ ३८ ॥ इंद्राविष्णूनमस्कृत्यविष्णोर्नुकमितित्रिभिः ॥
समित्पाणिःशुचिर्भूत्वोपतिष्ठेत्तुदिनेदिने ॥ ३९ ॥ धर्मंबुद्धिंधनंपुत्रानारोग्यंधर्मवर्धनं ॥ प्राप्नोतिचपरंस्थानंज्योतीरूपंसनातनं ॥ १४० ॥
आततायिनमायांतंदृष्ट्वाव्याघ्रमथोवृकं ॥ नमागरन्नितिजपंस्तेभ्यएवप्रमुच्यते ॥ ४१ ॥ त्रिरात्रोपोषितोरात्रौजपेदासूर्यदर्शनात् ॥ आप्लुत्यप्रयतः
सौरीरुपतिष्ठेद्दिवाकरं ॥ ४२ ॥ पश्यंतितस्करानैनंनचान्येपापवृत्तयः ॥ एकशतानित्रायेततस्करेभ्यश्चरन्पथि ॥ ४३ ॥ स्तेयं
कृत्वाद्विजोमोहात्त्रिरात्रोपोषितःशुचिः ॥ सूक्तंजप्त्वास्यवामीयंक्षिप्रंमुच्येतकिल्बिषात् ॥ ४४ ॥ ज्ञातिपुत्रसुहृन्मित्रैर्यश्चराज्यंचिकीर्षति ॥
नित्यंसनियतोभूत्वासूक्तंतुमनसाजपेत् ॥ ४५ ॥ कयाशुभेतिपैशुन्यंकृत्वाचार्यनृपद्विजैः ॥ श्रुत्वापरंरहस्यंतुगुरोरप्याहशौनकः ॥ ४६ ॥
इमंनुसोममित्येतेद्वेऋचौप्रयतोजपेत् ॥ सर्वान्कामानवाप्नोतिनकिंचित्पातकंभवेत् ॥ ४७ ॥ पितुंन्वित्युपतिष्ठेतनित्यमन्नमुपस्थितं ॥ पूजयेदशनं
नित्यंभुंजीयादविकुत्सितं ॥ ४८ ॥ नास्यस्यादन्नजोव्याधिर्विषमप्यन्नतामियात् ॥ विषंचपीत्वैतत्सूक्तंजपेतविषनाशनं ॥ ४९ ॥
नावाग्यतस्तुभुंजीतनाशुचिर्नजुगुप्सितं ॥ दद्याच्चपूजयेच्चैवजुहुयाच्चशुचिःसदा ॥ १५० ॥ क्षुद्भयंनास्यकिंचित्स्यान्नान्नजंव्याधिमाप्नुयात् ॥
उत्पथप्रतिपन्नोयोभ्रष्टोवाविपथःक्वचित् ॥ ५१ ॥ पंथानंप्रतिपद्येतकृत्वावाकर्मगर्हितं ॥ अग्नेनयेतिसूक्तेनप्रत्यृचंजुहुयाद्घृतं ॥ ५२ ॥

जपंश्चप्रयतोनित्यमुपतिष्ठेतचानलं ॥ स्नात्वाजपेदनर्वाणंनमस्कृत्यबृहस्पतिं ॥ ५३ ॥ वीरान्धनंचप्राप्नोतिसुश्लोक्यांकीर्तिमृच्छति ॥
कंकतोनेतियत्सूक्तंविषार्तःप्रयतोजपेत् ॥ ५४ ॥ विषंनक्रमतेचास्यसर्पाद्दृष्टिविषादपि ॥ यत्कीटलूतासुविषंदंष्ट्रिवृश्चिकजंचयत् ॥ ५५ ॥
मौलंचकृत्रिमंचैवजपन्सर्वंव्यपोहति ॥ धर्मबुद्धिंधनंपुत्रान्सौभाग्यंधनवर्धनं ॥ ५६ ॥ आरोग्यंपुष्टिमायुष्यंपशून्विद्यांमहद्यशः ॥ त्रिरात्रोपोषितःस्नातःप्रयतश्चरितव्रतः ॥ ५७ ॥ प्राणायामशतंकृत्वोपतिष्ठेतशतक्रतुं ॥ एकाहंकरसंयुक्तःपादौसंधायवाग्यतः ॥ ५८ ॥ योजातइतिसूक्तेनऋषिंगृत्समदंस्मरन् ॥ शतकृत्वोजपेदिंद्रमिंद्रश्रेष्ठानिचांततः ॥ ५९ ॥ एकाहाल्लभतेवित्तंद्व्यहात्सिद्धिमनुत्तमां ॥ अहोभिस्त्रिभिरारोग्यंचतुर्भिरशनंबहु ॥ १६० ॥ पंचभिर्ब्रह्मवर्चस्यंषड्भिरायुःसुखावहं ॥ सप्तभिस्तनयान्पुष्टिमष्टभिःप्राप्नुयात्सदा ॥ ६१ ॥
प्रियोभवतिचेंद्रस्यप्रियंधामसगच्छति ॥ रिपुघ्नंदस्युशमनंरायस्पोषकरंपरं ॥ ६२ ॥ गणानामितियत्सूक्तंतज्जपेत्सुखवर्धनं ॥ संध्ययोः
प्रयतस्त्वेतज्जपेन्नित्यंबृहस्पतिं ॥ ६३ ॥ उपतिष्ठेतसूक्तेनसर्वकामसमृद्धये ॥ योमेराजन्नितीमांतुदुःस्वप्नशमनीमृचं ॥ ६४ ॥ जप्त्वानाशयतिक्षिप्रंदुःस्वप्नंब्राह्मणःशुचिः ॥ अहोरात्रमुपोष्यैकंनियतोब्रह्मवित्तमः ॥ ६५ ॥ प्रजार्थंजुहुयादाज्यंचरुंवापयसिश्रृतं ॥ राकामहमितीमाभिःषष्ठ्याशुक्लस्यपंचभिः ॥ ६६ ॥ हविःशेषंस्वयंप्राश्यविंदतेमहतींप्रजां ॥ व्याधिनायोऽभिभूतःस्याद्घोरेणप्राणहारिणा ॥ ६७ ॥
चतुर्दशीमुपोष्यैकांकृष्णस्यजुहुयाच्चरुं ॥ आतेसूक्तेनरौद्रेणप्रत्यृचंवाग्यतःशुचिः ॥ ६८ ॥ पूर्वमाज्याहुतीर्हुत्वाअथोपस्थायशंकरं ॥
हविःशेषेणवर्तेतएकांतरमतंद्रितः ॥ ६९ ॥ पूर्वेमासिजयेन्मृत्युंरोगेभ्यश्चप्रमुच्यते ॥ अभिशस्येतयोमोहात्कुर्याद्वाकर्मगर्हितं ॥ १७० ॥
स्नात्वाभुंजन्जपेदप्सुअंबीत्यृचमतंद्रितः ॥ अध्वनिप्रस्थितोयस्तुपश्येच्छकुनिमुद्दिथतं ॥ ७१ ॥ अप्रशस्तंप्रशस्तंवास्थित्वैक्ष्यप्रयतोजपेत् ॥

कनिकदद्विसूक्ताभ्यामुपतिष्ठेत्कृतस्वरं ॥ ७२ ॥ शकुनिर्वायसश्वापिमृगदंष्ट्रिणमेववा ॥ अथदृष्ट्वैवजप्तव्यमेतत्तस्करमोहनं ॥ १७३ ॥
इत्यृग्विधानेप्रथमोऽध्यायः ॥ १ ॥ ॥ कल्याणवादीवान्योवानवारौतिनदृश्यते ॥ जपेदेवनमस्कृत्यसिद्धार्थःसंनिवर्तते ॥ ७४ ॥
नतस्यास्तिभयंकिंचिद्दस्युभ्योऽध्वनिनक्वचित् ॥ तरत्यपिचदुर्गाणिस्वस्तिमांश्चसुखीभवेत् ॥ ७५ ॥ यस्यभुक्तंनजीर्येतनतिष्ठेद्वाकथंचन ॥
ध्यात्वासोंऽतरमन्नस्याग्निरसीत्यृचंजपेत् ॥ ७६ ॥ विश्वामित्रस्यसंवादंनद्यतिक्रमणेजपेत् ॥ आप्लुत्याचम्यविधिवदुदकस्यांजलिंक्षिपेत्
॥ ७७ ॥ नमःस्रवद्भ्यइत्येतद्योनित्यंहिसमाचरेत् ॥ तंनद्यःस्रोतसःपांतिस्वंपुत्रमिवमातरः ॥ ७८ ॥ भयंचास्यनविद्येतनदीतीरेवनेष्वपि ॥
जलचरेभ्योभूतेभ्यःशीतोष्णैर्नचबाध्यते ॥ ७९ ॥ पूर्णांतितीर्षुःसरितंरमध्वमितिसंस्मरेत् ॥ ओष्वित्यृचमपांमध्येजपेद्योवैनदींतरन्
॥ १८० ॥ सशीघ्रंतीरमाप्नोतिगाधंवाविंदतेद्विजः ॥ युक्तैनैवरथेनाशुयोपांपारंतितीर्षति ॥ ८१ ॥ उद्वऊर्मिरितीमांतुजपेतनियतःस्वयं ॥
अध्वानंप्रस्थितश्चैवमामंद्रैरितिसंस्मरेत् ॥ ८२ ॥ कार्याण्यशेषतःकृत्वापुनरायातिवैगृहं ॥ अदातारंसुपुष्टार्थंसर्वदाविष्टचेतनं ॥ ८३ ॥
हत्वातद्धनमन्विच्छन्किंतेकृण्वंत्यृचंजपेत् ॥ इंद्रापर्वतेतिसूक्तमायुष्यंद्राविणंस्मृतं ॥ ८४ ॥ वागिंद्रियप्रमूढोयोनविद्यांप्रतिपद्यते ॥ इंद्रियार्थान्यथार्थान्वायोनवेत्तिकथंचन ॥ ८५ ॥ विद्यावाधिगतायस्यप्रणश्येतपुनःपुनः ॥ ससर्परीर्ऋचौजप्त्वाद्वौमासौप्रतिपद्यते ॥ ८६ ॥
अनसासंप्रयातस्तुस्थिरौगावावितिस्मरेत् ॥ चतस्रःकुशलेनैतिसिद्धार्थःस्थिरयानगः ॥ ८७ ॥ यानाक्षमपभग्नंतंदृष्ट्वादुर्गपथिद्विजः ॥
अभिव्ययस्वेतिजपेदृचमक्षबलंदधत् ॥ ८८ ॥ कृष्णपक्षेचतुर्दश्यांत्रिरात्रोपोषितःशुचिः ॥ दक्षिणप्रवणेदेशेश्मशानस्थःसमाहितः ॥८९॥
रक्तोष्णीष्यसिपाणिश्चबैल्वकेध्मोऽनिलाशनः ॥ सप्ताहंजुहुयात्तैलंसार्षपंलवणान्वितं ॥ १९० ॥ समिधोराजवृक्षस्यवसिष्ठद्वेषिणीःपठन् ॥

यंद्विष्यात्तस्यकृत्वातुशम्याकेनाकृतिंनिशि ॥९१ ॥ अधिष्ठायचतांकुर्याद्दग्भिश्चतसृभिर्द्विजः ॥ उद्दिश्यनामहोमोयंसप्तरात्रंनजीवति ॥९२॥
वसिष्ठानांततोहंतिब्रह्मतत्कुशिकोदितं ॥ नास्यकश्चिदवध्योऽस्तिजपतोजुह्वतोपिवा ॥ ९३ ॥ द्वाविंशकंजपेत्सूक्तमाध्यात्मिकमनुत्तमं ॥
पर्वसुप्रयतोनित्यमिष्टान्कामान्समश्नुते ॥ ९४ ॥ बृहस्पतिमजाश्वंसवितारंबभ्रुमेवच ॥ ऋतावृतौदिनेदिनेत्यृचैःपंचभिरन्वहं ॥ ९५ ॥
बृहस्पतइतिपंचाहंप्रत्यृचंजुहुयाद्धृतं ॥ हुत्वाग्निमर्चयित्वातुगंधमाल्यैःसुधूपकैः ॥ ९६ ॥ एतावद्देवताःपंचकामैरर्चतिपंचभिः ॥ रत्नैरपत्यैः
पशुभिर्मखैर्दीर्घेणचायुषा ॥ ९७ ॥ अथवेदादिगीतायाःप्रसारजननंविधिं ॥ गायत्र्याःसंप्रवक्ष्यामिधर्मकामार्थमोक्षदं ॥ ९८ ॥ नित्येनैमित्तिके
काम्येत्रितयेतुपरायणं ॥ गायत्र्याश्चपरंनास्तिइहलोकेपरत्रच ॥ ९९ ॥ मेध्यान्नमितभुङ्मौनीत्रिःस्नानार्चनतत्परः ॥ जपेल्लक्षत्रयंधीमाननन्यमानसक्रियः ॥ २०० ॥ कर्मभिर्योजयेत्पश्चात्क्रमशःस्वेच्छयापिवा ॥ यावत्कार्यंनकुर्वीतनलोपेत्तावत्तद्व्रतं ॥ १ ॥ आदित्यस्योदयेस्नात्वासहस्रंप्रत्यहंजपेत् ॥ आयुरारोग्यमैश्वर्यंधनंचलभतेध्रुवं ॥ २ ॥ त्रिरात्रोपोषितःसम्यग्घृतंहुत्वासहस्रशः ॥ सहस्रंलाभमाप्नोतिराहुसूर्यसमागमे ॥ ३ ॥ पालाशसमिधांचैवघृताक्तानांहुताशने ॥ सहस्रंलाभमाप्नोतिराहुसूर्यसमागमे ॥ ४ ॥ हुत्वातुखादिरंवह्नौसघृतंरक्तचंदनं ॥ सहस्रंहेमचाप्नोतिराहुचंद्रसमागमे ॥ ५ ॥ रक्तचंदनमिश्रंतुसघृतंहव्यवाहने ॥ हुत्वागोमयमाप्नोतिसहस्रंगोधनंद्विजः
॥ ६ ॥ यस्यास्तुगोर्गोमयेनगुटिकानांसहस्रशः ॥ हुत्वातांगामवाप्नोतिघृताक्तानांहुताशने ॥ ७ ॥ यवैरश्वांस्तिलैर्गजान्महिषीर्यावकैस्तथा ॥ शालितंडुलहोमेनकन्यालाभमवाप्नुयात् ॥ ८ ॥ जातीचंपकरक्तार्ककुसुमानांसहस्रशः ॥ हुत्वावस्त्राण्यवाप्नोतिघृताक्तानांहुताशने
॥ ९ ॥ सूर्यबिंबेजलमध्येतोयंहुत्वासहस्रशः ॥ सहस्रंप्राप्नुयाद्धैमंरौप्यमिंदमयेहुते ॥ २१० ॥ अलक्ष्मीपापसंयुक्तोमलव्याधिविनाशकैः ॥

मुच्येत्सहस्रजप्तेनस्नायाद्यस्तुजलेनवै ॥ ११ ॥ यांदिशंसप्तजप्तेनलोष्ठेनसंप्रचारयेत् ॥ चौराग्निमारुतोत्थानिभयानिनभवंतिवै ॥ १२ ॥ क्षीराहारोजपेल्लक्षमपमृत्युंव्यपोहति ॥ घृताशीप्राप्नुयान्मेधांबहुविज्ञानसंचयं ॥ १३ ॥ हुत्वावेतसपत्राणिघृताक्तानिहुताशने ॥ लक्षाद्वर्षापयद्देवंसार्वभौमंनसंशयः ॥ १४ ॥ लक्षेणभस्महोमस्यकृत्याह्युत्तिष्ठतेजलात् ॥ आदित्याभिमुखःस्थित्वानाभिमात्रेजलेशुचिः ॥ १५ ॥ तिलानांलक्षहोमेनघृताक्तानांहुताशने ॥ सर्वकामसमृद्धात्मापरंस्थानमवाप्नुयात् ॥ १६ ॥ यवानांलक्षहोमेनघृताक्तानांहुताशने ॥ सर्वकामसमृद्धात्मापरंस्थानमवाप्नुयात् ॥ १७ ॥ घृतस्याहुतिलक्षेणसर्वान्कामानवाप्नुयात् ॥ पंचगव्याशनोलक्षंजपन्जातिस्मरोभवेत् ॥ १८ ॥ तदेवह्यनलेहुत्वाप्राप्नोतिबहुशोधनं ॥ अन्नाद्यहवनान्नित्यमन्नाद्यंचभवेत्सदा ॥ १९ ॥ जुहुयात्सर्वसाध्यानामाहुत्ययुतसंख्यया ॥ रक्तसिद्धार्थकान्हुत्वासर्वान्साधयतेरिपून् ॥ २२० ॥ लवणंमधुसंयुक्तंहुत्वासर्ववशीभवेत् ॥ हुत्वातुकरवीराणिरक्तानिजनयेज्ज्वरं ॥ २१ ॥ हुत्वाबैभीतकंतैलंदेशादेवप्रचारयेत् ॥ हुत्वातुनिंबपत्राणिविद्वेषंजनयेन्नृणां ॥ २२ ॥ रक्तानांतंडुलानांतुघृताक्तानांहुताशने ॥ हुत्वाबलमवाप्नोतिशत्रुभिर्नसजीयते ॥ २३ ॥ प्रत्यानयनसिध्यर्थंमधुसर्पिःसमन्वितं ॥ गव्यंक्षीरंप्रदीप्तेग्नौजुहुतस्तत्प्रशाम्यति ॥ २४ ॥ ब्रह्मचारीमिताहारोयःसहस्रत्रयंजपेत् ॥ संवत्सरेणलभतेधनैश्वर्यंनसंशयः ॥ २५ ॥ शमीबिल्वपलाशानामर्कस्यतुविशेषतः ॥ पुष्पाणांसमिधांचैवहुत्वाहेममवाप्नुयात् ॥ २६ ॥ अब्रह्मत्र्यंबकादीनांयस्यायतनमाश्रितः ॥ जपेल्लक्षंनिराहारःसतस्यवरदोभवेत् ॥ २७ ॥ बिल्वानांलक्षहोमेनघृताक्तानांहुताशने ॥ परांश्रियमवाप्नोतियदिनभ्रूणहाभवेत् ॥ २८ ॥ पद्मानांलक्षहोमेनघृताक्तानांहुताशने ॥ प्राप्नोतिराज्यमखिलमसपत्नमकंटकं ॥ २९ ॥ पंचविंशतिलक्षेणदधिक्षीरघृताशनः ॥ स्वदेहेसिध्यतेजंतुःकौशिकस्यमतंयथा ॥ २३० ॥ एकाहंपंच-

गव्याशीह्येकाहंमारुताशनः ॥ एकाहंब्राह्मणान्नाशीगायत्रीजपउच्यते ॥ ३१ ॥ शतेनगायत्र्यास्नात्वाशतमंतर्जलेजपेत् ॥ शतेनापस्ततः
पीत्वासर्वपापैःप्रमुच्यते ॥ ३२ ॥ गोघ्नःपितृघ्नोमातृघ्नोब्रह्महागुरुतल्पगः ॥ सुवर्णरत्नहारीचयश्चविप्रःसुरांपिबेत् ॥ ३३ ॥ अयाज्ययाजनं
कृत्वाकृत्वावाकर्मगर्हितं ॥ नसीदेत्प्रतिगृह्णानोमहीमपिससागरां ॥ ३४ ॥ येचास्यदुःस्थितालोकेग्रहाःसूर्यादयोभुवि ॥ तेयांतिसौम्यतां
सर्वेशिवाइतिनसंशयः ॥ ३५ ॥ कृणुष्वेतिजपन्सूक्तंरक्षोघ्नंदस्युभिर्वृतः ॥ अरातीनांहरेत्प्राणान्रक्षांस्यपिचनाशयेत् ॥ ३६ ॥ उपतिष्ठेत
योवह्निंपरीत्यृचादिनेदिने ॥ तंरक्षतिस्वयंवह्निर्विश्वतोविश्वतोमुखः॥३७॥ कोअद्येतितुसूक्तेनयोनित्यंशक्तिमर्चति ॥ जपेद्वाथनमस्कारैःशक्तितो
लभतेवरान् ॥ ३८ ॥ कयेतिवामदेव्येनकुर्यात्स्वस्त्ययनंनिशि ॥ जपेद्वासंधिवेलासुब्रह्मैतत्कुशिकोदितं ॥ ३९ ॥ हंसःशुचिषदित्यृचा
शुचिरीक्षेद्दिवाकरं ॥ अंतकालेजपन्नेतिब्रह्मणःसद्मशाश्वतं ॥ २४० ॥ कृषिंप्रपद्यमानस्तुस्थालीपाकंयथाविधि ॥ जुहुयात्क्षेत्रमध्येतुशुनं
वाहास्तुपंचभिः ॥ ४१ ॥ यथालिंगंतुविहरेल्लांगलंचकृषीवलः ॥ इंद्रायचमरुद्भ्यश्चपर्जन्यायभगायच ॥ ४२ ॥ पूष्णेधान्यायसीतायै
शुनासीरमथोत्तरं ॥ हुत्वातुपृथगेतानियजेदेताश्चदेवताः ॥ ४३ ॥ गंधमाल्योपहारैश्चफललाजासुरासवैः ॥ प्रलापनेप्रणयनेखलसीतोपहारयोः
॥ ४४ ॥ एताएवजपेन्नित्यंदेवताविधिनाशुचिः ॥ अमोघंकर्मभवतिकृषिर्वर्धतिसर्वदा ॥ ४५ ॥ क्षेत्रस्यपतिनेत्येतत्क्षेत्रपत्यंतृचं
जपेत् ॥ ईक्षेत्सूर्यंद्विजोनित्यंविंदतेक्षेत्रमुत्तमं ॥ ४६ ॥ आखूत्करेषुचरुणायजेदेतानमूषकान् ॥ चित्रइद्राजेत्यनयास्तुत्वाचाखुपतिंसदा
॥ ४७ ॥ ब्राह्मणान्भोजयेदत्रकीनाशांश्चैवभोजयेत् ॥ अप्रमत्तःशांतिपरःस्वयमेवकृषिंव्रजेत् ॥ ४८ ॥ भूमिभंगेगवांहिंसातृणकीटादिनाशनं
॥ एतेषुयत्कृतंपापंखलदानेनशुध्यति ॥ ४९ ॥ धान्यानांविंशकंभागंश्रोत्रियेभ्योनिवेदयेत् ॥ विंशकस्यहिदानेनकृषिदोषात्प्रमु-

च्यते ॥ २५० ॥ समुद्राद्धितिसूक्तेनयःसदाजुहुयाद्घृतं ॥ पूर्वोक्तेनैवकल्पेनसंयतात्माजितेंद्रियः ॥ ५१ ॥ विज्योतिषेतिज्वलयेद्यत्रेच्छेज्
ज्जातवेदसि ॥ तमग्निःसर्वतःपातिभद्रेणद्रविणेनच ॥ ५२ ॥ विश्वानिनइतिद्वाभ्यामृग्भ्यांयोवह्निमर्चति ॥ सतरत्यापदःसर्वायशः
प्राप्नोतिचाक्षयं ॥ ५३ ॥ हुत्वावह्निमुपस्थायप्राणार्थंहव्यवाहनं ॥ अग्नेत्वमितिसूक्तेनधनमायुश्चवांछता ॥ ५४ ॥ यइच्छेद्विविधंवित्तंसत्वंचानुपमंमहत् ॥ उरोष्टइतिसूक्तेनह्युपतिष्ठेच्छतक्रतुं ॥ ५५ ॥ प्रजाकामोयजेन्नित्यंचरुणादेवपत्नयः ॥ उपहृत्योपहारंचशेषंभुंजीतवाग्यतः ॥ ५६ ॥ उच्छिष्टंचप्रदातव्यंभार्यायैपुत्रमिच्छता ॥ धेन्वाःसरूपवत्सायाःपयसासाधयेच्चरुं ॥ ५७ ॥ अनुरूपांप्रजामस्यांलभतेनात्रसंशयः ॥ स्वस्त्यात्रेयंजपेन्नित्यंप्रातःप्रातःशुचिर्द्विजः ॥ ५८ ॥ एतत्स्वस्त्ययनंपुण्यंसर्वकल्मषनाशनं ॥ सुहृदंज्ञातिजंचैवगच्छंतमनुमंत्रयेत् ॥५९॥ स्वस्तिपंथामितिप्रोच्यस्वस्तिमान्व्रजतेऽध्वनि॥ विजिहीष्ववनस्पतेतदिदंच्यावनंस्मृतं ॥२६०॥ यच्च्यावयितुकामःस्याच्च्यावयेत्तदिदंजपन् ॥ द्विषंतंवापदाक्रम्यभूमौपांसुमयींकृतिं ॥६१॥ निष्पिषन्निवसंग्रामाच्च्यवतेनात्रसंशयः ॥ स्त्रियंगर्भप्रमूढांवापाययेदनुमंत्रितं
॥६२॥ उदकंच्यावयेन्नैवगर्भोऽधश्च्यवतेसुखं ॥ अच्छावदेतिसूक्तंतुवृष्टिकामःप्रयोजयेत् ॥६३॥ निराहारःक्लिन्नवासाह्यचिरेणप्रवर्षति ॥
हुत्वायुतंवैतसीनांक्षीराक्तानांहुताशने ॥ ६४ ॥ महद्वर्षमवाप्नोतिसूक्तेनाच्छावदेनहि ॥ यइच्छेद्वरदांदेवींश्रियंनित्यंकुलेस्थितां ॥ ६५ ॥
सशुचिःप्रयतोभूत्वाजुहुयादाज्यमन्वहं ॥ श्रियःपंचदशर्चंचश्रीकामःसततंजपेत् ॥३६॥ आवाहयेच्छ्रियंपद्मेपंचभिःक(न)न्यकेपिवा (?) ॥
उपहारानुपहरेच्छुक्लान्भक्ष्यान्पयोदधि ॥ ६७ ॥ स्थालीवाचशालीनांपयसासंप्रकल्पयेत् ॥ चांद्रायणकृतात्मातुप्रपद्येत्प्रयतःश्रियं ॥६८॥
सर्वौषधीभिःफांटाभिःस्नात्वाद्भिःपावनैरपि ॥ उपैतुमांदेवसखइतिराज्ञोऽभिषेचनी ॥६९॥ मनसःकाममित्येषापशुकामाभिषेचनी ॥ कर्दमेने-

तियःस्नायात्प्रजाकामःशुचिव्रतः ॥२७०॥ अश्वपूर्वामितिस्नायाद्राज्यकामःशुचिव्रतः ॥ लोहितेचर्मणिस्नायाद्ब्राह्मणस्तुयथाविधि ॥ ७१ ॥
राजकर्मणिवैयाघ्रेक्षत्रियस्त्वथरौरवे ॥ बस्तचर्मणिवैश्यस्तुहोमःकार्यस्त्वनंतरं ॥ ७२ ॥ चंद्रामितितुपद्मानिजुहुयात्सर्पिषाद्विजः ॥ आदित्यवर्णइत्यनयाबिल्वहोमंविधीयते
॥ ७३ ॥ बिल्वेध्मएववाग्निःस्यात्स्थालीश्चजुहुयाद्विजः ॥ दशसाहस्त्रिकोहोमःश्रीकामःप्रथमोविधिः
॥ ७४ ॥ हुत्वातुप्रयुतंसम्यगनंतांविंदतेश्रियं ॥ अयुतंशतकृत्वस्तुहुत्वाशुक्लानिसर्पिषा ॥ ७५ ॥ अनंतामव्यवच्छिन्नांशाश्वतींविंदते
श्रियं ॥ अशक्तौजपएवोक्तोदशसाहस्त्रिकावरः ॥ ७६ ॥ जप्त्वातुप्रयुतंसम्यगनंतांविंदतेश्रियं ॥ अयुतंशतकृत्वस्तुजप्त्वाश्रियमुपाश्नुते
॥७७॥अप्स्वेवजुहुयान्नित्यंपद्मान्ययुतशोनिशि ॥ दृष्ट्वाश्रियंतूपरमेत्किलासत्वाद्बिभेतवै ॥ ७८ ॥ बिल्वाशीबिल्वनिलयोजुह्वन्बिल्वानिसर्पिषा
॥ एकविंशतिरात्रेणपरांसिद्धिंनियच्छति ॥ ७९ ॥ येनयेनचकामेनजुहोतिप्रयतःश्रियै ॥ पद्मान्यथापिबिल्वानिससकामःसमृध्यति
॥ २८० ॥ नजातुकृपणोऽर्थायश्रियमावाहयेत्क्वचित् ॥ नयत्किंचनकामेनहोमःकार्यःकथंचन ॥ ८१ ॥ महद्वाप्रार्थ्यमानेनराज्यकामेनवा
पुनः ॥ वाचःपरंप्रार्थयितायत्नाद्युक्तःश्रियंयजेत् ॥ ८२ ॥ अग्नेत्वष्टर्चसूक्तेनजुहुयादाज्यमन्वहं ॥ ओजस्विनीमवाप्नोतिप्रजांधर्मवतींशुभां
॥८३॥ अच्छानइत्यृचादीप्तमुपतिष्ठेद्विभावसुं ॥ प्रजांप्राप्यजयेच्छत्रूंस्तरतेदुरितानिच ॥ ८४ ॥ आगावइतिसूक्तेनगोत्रगालोकमातरः ॥
उपतिष्ठेद्व्रजंतीश्चयइच्छेत्ताःसदाक्षयाः ॥८५॥ त्वामिद्धीतिप्रगाथेनह्युपतिष्ठेच्छतक्रतुं ॥ मध्याह्नेसंध्ययोश्चैवजपन्धनमवाप्नुयात् ॥ ८६ ॥
उपेतितिसृभीराज्ञोदुंदुभीन्संस्पृशेद्रणे ॥ ओजोबलमवाप्नोतिशत्रूंश्चैवनियच्छति ॥ ८७ ॥ पाणिनातृणमादाययज्ञायज्ञेतियोऽभ्यसेत् ॥
सोऽधीतस्यास्यसूक्तस्यफलंप्राप्नोतिनातृणः ॥ ८८ ॥ सूक्तांतेचतृणंत्वग्नाविरिणेचोदकेपिवा ॥ निक्षिपेत्तत्प्रयत्नेनत्यक्तेऽन्यत्रभयावहं ॥८९॥

तृणपाणिंजपन्सूक्तंरक्षोघ्नंदस्युभिर्वृतः ॥ नभयंविंदतेकिंचिद्रक्षोभ्योऽरिभ्यापवन्न ॥२९०॥ गृहात्प्रपद्यमानस्तुपंथानंधनकाम्यया ॥ जपे-
त्सोध्वनियत्नेननापिपंथामितिव्रजन् ॥ ९१ ॥ येकेचज्मेत्यृचंत्वेतांध्यायन्निशिदिवौकसः ॥ अग्नौहुत्वातयाचाज्यंदीर्घमायुरवाप्नुयात् ॥९२॥
वयमुत्वेतिसूक्तंतुपौष्णंद्रविणवर्धनं ॥ नित्यंजपेच्छुचिर्भूत्वाधनंविंदत्यभीप्सितं ॥९३॥ यस्यनष्टंभवेत्किंचिद्द्रव्यंगोद्विपदंधनं ॥ नश्येद्वाध्व-
नियोमोहात्संपूषन्सजपेन्निशि ॥९४॥ इयमित्येतदाद्यंतंसूक्तंसारस्वतंद्विजः ॥ नित्यंजपेच्छुचिर्भूत्वावाग्मीभवतिबुद्धिमान् ॥९५॥ संवामिति
तुयत्सूक्तमष्टर्चंत्रैष्टुभंमतं ॥ तज्जपन्प्रयतोनित्यमिष्टान्कामान्समश्नुते ॥९६॥ योअद्रिभित्तुयत्सूक्तंतत्सपत्ननिवर्हणं ॥ बृहस्पतिंनमस्कृत्वास-
पत्नांस्तृणुतेबहून् ॥९७॥ एनस्वीवाभिशस्तोवाकृत्वाकर्मविगर्हितं ॥ सोमारौद्रंजपेत्सूक्तंकृत्स्नमेनोव्यपोहति ॥ ९८ ॥ जीमूतसूक्तस्यविधिंयथा-
लिंगमवेक्ष्यवै ॥ ऋग्भिःकर्माणिकुर्वीतस्वस्यांगानांयथाविधि ॥९९॥ संग्रामंतुप्रयातस्यराज्ञश्चैतत्प्रयोजयेत् ॥ सर्वाण्यंगानिरथ्याश्वसदश्वांश्चा
नुमंत्रयेत् ॥३००॥ यमेवदेशंगच्छेतशत्रून्वाप्यनुमंत्रितः ॥ नाजित्वाविनिवर्तेतपरंहिब्रह्मणोबलं ॥१॥ पुत्रानायुरथारोग्यंयइच्छेदव्ययंसुखं ॥
सोग्निंनरइतिसूक्तेनजुहुयादाज्यमन्वहं ॥२॥ प्राश्नयेथत्रिभिःसूक्तैःसंध्ययोर्जपमारभेत् ॥ नरक्षोभ्योभयंवैतिधनंप्राप्नोतिचाक्षयं ॥३॥ अभि-
त्वायःप्रगाथेननित्यमर्चतिवज्रिणं ॥ सश्रियंविपुलांभुंक्तेप्राप्नोतिचधनायुषी ॥४॥ शंवतीशंनइंद्राग्नीइत्येतेसततंजपेत् ॥ नरक्षोभ्योनभूतेभ्यो
व्याधिभ्योनभयंभवेत् ॥५॥ निर्वेष्टुकामोरोगार्तोभगसूक्तंसदाभ्यसेत् ॥ निवेशंविंदतेक्षिप्रंरोगेभ्यश्चप्रमुच्यते ॥ ६ ॥ इमाइतिजपेन्नित्यंरौद्रं
सूक्तंद्विजःशुचिः ॥ तज्जपन्प्रजयावित्तैःस्वयंचैवतरिष्यति ॥ ७ ॥ उत्तितीर्षुरथोयस्तुशंकेत्स्रोत्याःसमागमे ॥ समुद्रज्येष्ठाइत्येतज्जपेत्सूक्तं
भयापहं ॥ ८ ॥ आदित्यदैवतेसूक्तेरिपुघ्नेरोगनाशने ॥ पठेत्प्रातःशुचिर्भूत्वारिपुरोगैःप्रमुच्यते ॥ ९ ॥ वास्तोष्पतेप्रतीत्येतत्सूक्तंवास्तो-

ष्पतिंजपन् ॥ स्नातःकृत्वावैश्वदेवंपरंब्रह्मेदमुच्यते ॥ ३१० ॥ अमीवहेतिसूक्तेनभूतानिंस्वापयेन्निशि ॥ नहिप्रस्वापनंकिंचिदीदृशंविद्यते
क्वचित् ॥ ११ ॥ संबाधेविषमेदुर्गेबद्धोवानिर्गतःक्वचित् ॥ पलायन्वागृहीतोवातस्करैःसंजपेदिदं ॥ १२ ॥ अमीवहाविश्ववतीमुद्धृत्यान्याः
प्रयोजयेत् ॥ सूक्तमेतज्जपेत्सर्वमितिमन्वेतिशौनकः ॥ १३ ॥ त्रिरात्रंनियतोऽनश्नन्छ्रपयेत्पायसंचरुं ॥ तेनाहुतिशतंपूर्णंजुहुयात्सर्पिषा
द्विजः ॥ १४ ॥ समुद्दिश्यमहादेवंत्र्यंबकंत्र्यंबकेत्यृचा ॥ एतत्पर्वशतंकृत्वाजीवेदब्दशतंसुखी ॥ १५ ॥ तच्चक्षुरित्यृचास्नातउपतिष्ठेद्
दिवाकरं ॥ उद्यंतंमध्यगंचैवदीर्घमायुर्जिजीविषुः ॥ १६ ॥ रात्र्याअपरकालेयउत्थायप्रयतःशुचिः ॥ व्युषाइत्युपतिष्ठेतषड्भिःसूक्तैःकृतांजलिः
॥ १७ ॥ प्राप्नुयात्सहिरण्यादिनानारूपंधनंबहु ॥ अश्वांश्चपुरुषान्धान्यंस्त्रियोवासांस्यजाविकान् ॥ १८ ॥ ध्रुवासुत्वासुक्षितिषुजपन्
बद्धःप्रमुच्यते ॥ तिष्ठन्रात्रौजपेदेनांविपाशःसन्प्रमुच्यते ॥ १९ ॥ अहोरात्रंस्थितश्चैवमनश्नन्स्याद्विचेष्टितः ॥ अयःपाशाःस्फुटंत्यस्यदा-रुपाशास्तथैवच
॥ ३२० ॥ स्योनेतिपृथिवींदेवींप्रपद्येन्नियतःसदा ॥ जपेदेनांचतत्रापिभूमिपाशात्प्रमुच्यते ॥ २१ ॥ अगम्यागमनेचैतत्प्रायश्चित्तंविधीयते
॥ अन्यत्रगुरुतल्पाच्चतस्मात्पापात्प्रमुच्यते ॥ २२ ॥ द्वादशाहमभुंजानःस्वगोत्रागमनेजपेत् ॥ अर्धमासमभुंजानःसखिदारेषुसंविशन्
॥ २३ ॥ इदमापःप्रवहतयत्किंचेदमृचंपुनः ॥ इतिचैताजपेदापःप्रविश्यैतेषुकर्मसु ॥ २४ ॥ इंद्राविष्णूनमस्कृत्यजुहुयादाज्यमन्वहं
॥ सूक्ताभ्यांपरएताभ्यांयइच्छेद्भूमिमात्मनः ॥ २५ ॥ आस्यदघ्नंविगाह्यांभःप्राङ्मुखःप्रयतःशुचिः ॥ सूक्ताभ्यांतिस्रएताभ्यामुपतिष्ठेद्दिवाकरं
॥ ३६ ॥ अनश्नतातुजप्तव्यंवृष्टिकामेनयत्नतः ॥ पंचरात्रेव्यतीतेतुमहद्वर्षमवाप्नुयात् ॥ २७ ॥ योऽरिभिःसंप्रपद्येत
अभिशस्येतवामृषा ॥ उपोष्यैकंत्रिरात्रंसजुहुयादाज्यमन्वहं ॥ २८ ॥ इंद्रासोमेतिसूक्तंतुजपेच्चैतच्छतावरं ॥ किंचिद्दद्याद्द्विजेभ्योंतेस्तृणु-

तेसर्वशात्रवान् ॥ २९ ॥ यस्यलुप्येद्व्रतंमोहाद्व्रात्यैर्वासंस्पृशेद्द्विजः ॥ उपोष्याज्यंचजुहुयात्त्वमग्नेव्रतपाइति ॥ ३३० ॥(प्रसम्राजमितित्वेतज्जपन्नीक्षेद्दिवाकरं ॥
उद्यंतमुपतिष्ठेतस्नात्वास्नात्वादिनेदिने ॥ ३१ ॥ अभियुक्तोभवेद्यस्तुविवदेद्वापिकेनचित् ॥ निर्जित्यसगणान्शत्रून्
क्षिप्रंवादंपराजयेत् ॥)३२ ॥ शमग्निरग्निभिश्चेतिप्रपद्येद्वायुभास्करौ ॥ अग्निंप्रथमतःस्तुत्वामहाकृच्छ्रात्प्रमुच्यते ॥ ३३ ॥ नहीतियश्चतुष्केण
स्नात्वावैप्रातरुत्थितः ॥ द्वौभूमावुपतिष्ठेतसत्रायतिभयात्स्वयं ॥ ३४॥ तृचंजस्वायदित्येतत्स्नात्वाभ्यर्च्यपुरंदरं॥ प्राप्नुयान्मानसान्कामान्
संपूज्यवसुरोचिषः ॥ ३५ ॥ आद्यानित्रीणिसूक्तानिपंचचाग्रेबृहन्निति ॥ षट्तथान्यानिसूक्तानिअग्निंनरइतीतिच ॥ ३६ ॥ प्रकृतानीति
चाध्यायंभोजनात्प्राक्पठेदिदं ॥ सर्वान्कामानवाप्नोतिमुच्यतेसर्वकिल्बिषैः ॥ ३७ ॥ प्राग्भोजनमिदंब्रह्मन्मानवात्तुमहर्षिणां ॥ पूर्वाह्णे
जपतोनित्यमर्थसिद्धिःसदाभवेत् ॥ ३८ ॥ अग्निनेत्याश्विनंसूक्तंचतुर्विंशकमुत्तमं ॥ जपेत्प्रातःशुचिर्भूत्वानासत्यावर्च्यसुव्रतः ॥३९॥
सप्राप्नुयात्परामृद्धिंद्रविणंचोर्जमेवच ॥ समिधेतिजुहोत्यग्नौसूक्तेनप्रत्यृचंघृतं ॥ १४० ॥ समृद्धिमतुलांप्राप्यसमानांजीवतेशतं ॥ द्विचत्वारिंशकेनेदं
शुक्रेनाद्येतिवज्रिणं ॥ ४१ ॥ सख्यंलब्ध्वामहेंद्रेणसपत्नांस्तृणुतेबहून् ॥ प्राश्नीयाज्जपतोत्रास्तिप्रश्नंकृत्वाविधानतः ॥ ४२ ॥
तस्मात्पूर्वाह्णिकोध्यायःस्मृतोयंरिप्रनाशनः ॥ वाशंमहीतिजस्वाचप्राप्नोत्यारोग्यमेवच ॥ ४३ ॥ दुःस्वप्नघ्नीःपराजस्वाप्रातःपापैःप्रमुच्यते ॥
शंनोभवेतिद्वाभ्यांतुभुक्त्वान्नंप्रयतःशुचिः ॥ ४४ ॥ हृदयेपाणिनास्पृष्ट्वाज्योग्जीवेदगदःसुखी ॥ यतोभयंविजानीयात्तस्यांदिशियतव्रतः
॥ ४५ ॥ शुचौदेशेग्निमाधायजुहुयादिंद्रमर्च्यच ॥ यतइत्याज्यमुत्पूतंषड्भिर्गंधान्निवेद्यच ॥ ४६ ॥ पायसंदधिमंथंवायूषान्वाभ्युपहारयेत्
॥ अहोरात्रमुपोष्यैकंतिलान्वाघृतमेववा ॥ ४७ ॥ उत्वामंदंत्विवितिस्नातोहुत्वाशत्रून्प्रमापयेत् ॥ बद्धोवाप्यवरुद्धोवावाग्यतःप्रयतोजपेत्

॥ ४८ ॥ त्यान्न्वित्यादित्यदैवत्यंसद्योमुच्येतबंधनात् ॥ यद्द्यावस्तुजपेन्नित्यंप्रगाथंनियतःशुचिः ॥ ४९ ॥ सकीर्तिमतुलांप्राप्यसर्वान्कामान्समश्नुते ॥ त्वंनोअग्नइतिसूक्तेनहुत्वार्च्याग्निंघृतेनतु ॥ ३५० ॥ पालितोविश्वतोदीप्तात्प्राप्नुयाद्बह्वितोरयिं ॥ आतुसूक्तेनसततंधनंयाचेत्पुरंदरं ॥ ५१ ॥ प्रसमित्पाणयेतस्मैधनंयच्छतिवृत्रहा ॥ कन्यावारितिसूक्तंतुसततंनियतोजपेत् ॥ ५२ ॥ त्वग्दोषिणींतथालोम्नींक्षिप्रंतस्मात्प्रमोचयेत् ॥ यदद्यकच्चेत्युदितेरवौस्तुत्वापुरंदरं ॥ ५३ ॥ गृणन्नपोहतेरिप्रंवश्यंवाकुरुतेजगत् ॥ यद्वागितिद्वृचेनैत्यगौरींयोऽर्चतिसुत्रतः ॥ ५४ ॥ तस्यनासंस्कृतावाणीमुखादुच्चार्यतेक्वचित् ॥ बण्महानितिदृष्ट्वार्कमुपतिष्ठेद्दृचंपठन् ॥ ५५ ॥ ब्रुवन्नप्यनृतांवाणींनलिंपेदनृतेनसः ॥ पूर्णेचंद्रमसिज्योत्स्नामियंयेत्यनुसेवयेत् ॥ ५६ ॥ चंद्रदृष्टिस्त्वनिमिषोवर्चस्वीदृष्टिमान्भवेत् ॥ प्रजाहेतिजपन्स्नात्वानयोनिंप्रतिजायते ॥ ५७ ॥ मातेतिगामुपस्पृश्यजपन्गास्तुसमश्नुते ॥ वचोविदमितित्वेतांजपन्वाचंसमश्नुते ॥ ५८ ॥ पावमानंपरंह्येतन्नवमंमंडलंपठेत् ॥ स्नात्वाशुचिःशुचौदेशेसपवित्रःसकांचनः ॥ ५९ ॥ इत्यृग्विधानेद्वितीयोऽध्यायः ॥ २ ॥ ॥ स्वादिष्ठयेतिगायत्रीःपावमानीर्जपेद्द्विजः ॥ पवित्राणांपवित्रंतुपावमानीर्ऋचोजपेत् ॥ ३६० ॥ प्रयतोऽप्सुनिमज्ज्याशुसर्वपापैःप्रमुच्यते ॥ एतासांकीर्तनंपुण्यंस्मरणंधारणंतथा ॥ ६१ ॥ याथातथ्येनचज्ञात्वाब्रह्मलोकंसमश्नुते ॥ एतेषांतुयथोक्तानांगुणवद्यद्यदुत्तरं ॥ ६२ ॥ कीर्तनात्तुभवेत्पूतःस्मरणात्स्मरतेपरं ॥ धारणाद्ब्रह्माणमेतिपूतात्माविजितेंद्रियः ॥ ६३ ॥ याथातथ्येनचज्ञात्वाब्रह्मणोविंदतेपदं ॥ श्रावयेद्देवताकृत्येब्राह्मणान्भुंजतोऽग्रतः ॥ ६४ ॥ प्रीणातिदेवतांशश्वत्समर्धयतिकर्मवा ॥ पित्र्येपितॄन्प्रीणयंतिश्राविताःप्रयतात्मना ॥ ६५ ॥ कृत्वादोषान्सुमहतोप्यपेयादीन्प्रपीयच ॥ जस्वातरत्समंदीयंप्रविश्यापरुयहाच्छुचिः ॥ ६६ ॥ अक्षय्यंचभवेदन्नंपितृभ्यःपरमंमधु ॥ यःपावमानीरध्येतिपूतात्माविजितेंद्रियः

॥ ६७ ॥ तस्यकामदुघाभूत्वोपतिष्ठंतिचधेनवः ॥ आयुर्बलंयशोवित्तप्रजाकीर्तिमनामयं ॥६८॥ स्वाध्यायंपुण्यमतुलंपूतःप्राप्नोतिचाक्षयं ॥
अशक्तस्तुजपेद्युक्तस्त्रिंशद्वैखानसीर्ऋचः ॥ ६९ ॥ सप्तर्षिभिश्चयाःप्रोक्ताःपवित्रस्यचयाःपराः ॥ ऋचांद्विषष्टिःप्रोक्तेयंपवस्वेत्यृषिसत्तमैः
॥ ३७० ॥ सर्वकल्मषनाशायपावनायशिवायच ॥ स्वादिष्ठयेतिसूक्तानांसप्तषष्टिरिहोदिताः ॥ ७१ ॥ दशोत्तराण्यृचांश्चैवपावमानीःशतानिषट्
॥ एतज्जुह्वन्जपेन्मंत्रंघोरंमृत्युभयंहरेत् ॥ ७२ ॥ व्याधिभ्यःपरिमोक्षंचलभतेनात्रसंशयः ॥ प्रतिगृह्याप्रतिग्राह्यंभुक्त्वाचान्नंविगर्हितं
॥ ७३ ॥ जपंस्तरत्समंदीयंप्रविश्यापरुयहाच्छुचिः ॥ पावमानंपरंह्येतद्वहसामपनोदनं ॥ ७४ ॥ प्राणानायम्यचध्यायेदंतेदेवान्पितृनृषीन्
॥ उपोष्याज्यंचजुहुयादग्निंसोमंचपूजयेत् ॥ ७५ ॥ सरस्वतींचार्चयेतपयोंबुमधुसर्पिषा ॥ अध्यात्मकंपवित्रंतेसूक्तंजस्वापुनःशुचिः
॥ ७६ ॥ गतिमिष्टामवाप्नोतिविंदतेचेहसिद्धयः ॥ नानानमितिसूक्तान्यत्तत्कालेचजपेत्सकृत् ॥ ७७ ॥ जस्वाचैवपरंस्थानममृतत्वंचगच्छति
॥ आपोहिष्ठेतिनियतःप्रयुंजीतसदाद्विजः ॥ ७८ ॥ स्नानार्थंशुद्धिकामस्तुजपेतत्रिःसमाहितः ॥ अप्सुचैवनिमज्जित्वात्रिःपठेत्तुसमाहितः
॥ ७९ ॥ ब्रह्महातुकपालेनखट्वांगीचीरसंवृतः ॥ चरेद्द्वादशवर्षाणिस्वकर्मपरिकीर्तयन् ॥ ३८० ॥ अजपन्मनसैवैतदापोहिष्ठेति
संस्मरेत् ॥ ऊर्ध्वंतुपंचमाद्वर्षाज्जपेदेवसहस्रशः ॥ ८१ ॥ अपरस्तुत्रिसाहस्रोजपःस्यात्प्रत्यहंसदा ॥ पूर्णेतुद्वादशेवर्षेब्राह्मणोविप्रमुच्यते
॥ ८२ ॥ समेत्यब्राह्मणाब्रूयुरथतंचरितव्रतं ॥ आचरितंभवेत्किंचिन्मिथ्यावादीपतेत्पुनः ॥ ८३ ॥ दशावरान्दशपरान्हन्यात्स्वमनृतंवदन् ॥
ॐभोइतिवदेद्विप्रैरनुज्ञातःशुचिर्जपेत् ॥ ८४ ॥ स्थालीपाकंचकुर्वीतसोग्नयेव्रतचारिणे ॥ एवंसमुच्यतेपापात्सावित्रींप्रतिपद्यच ॥ ८५ ॥
ब्रह्महातुपुराशक्रस्त्वाष्ट्रंहत्वात्वृषिंप्रभुं ॥ सिंधुद्वीपस्तमेताभिरभिषिच्यव्यमोचयत् ॥ ८६ ॥ ब्रह्मस्वंचगुरुद्रव्यंस्तेयंकृत्वाजपन्निमाः ॥

अनेनैवविधानेनषड्भिर्वर्षैःप्रमुच्यते ॥ ८७ ॥ ब्रह्महाचसुरापश्चनियमेनजपन्निमाः ॥ अनेनैवोपचारेणब्रह्मघ्नइवमुच्यते ॥ ८८ ॥
ब्राह्मणस्यरुषोद्यम्यजयेदेतान्निपात्यच ॥ त्र्यहंनिपात्योपवसेदेकाहमवगूर्यच ॥ ८९ ॥ शोणितंतुप्रहारेणोत्पाद्यसकथंचन ॥ त्रिरात्रमेवोपवसेज्
जपेतापिप्रसाद्यतं ॥ ३९० ॥ प्रातरुत्थायसततंकुर्यान्मार्जनमात्मनः ॥ रात्रौकृतस्यपापस्याविज्ञातस्यापिनिष्कृतिः ॥ ९१ ॥ सायं-
चनित्यमेताभिःकुर्यान्मार्जनमात्मनः ॥ दिवाकृतस्यपापस्याविज्ञातस्यापिनिष्कृतिः ॥ ९२ ॥ उपतिष्ठतराजानंयमसूक्तेनवैद्विजः ॥ स्थालीपाकं
तुकुर्वीतपक्षयोर्यमदैवतं ॥ ९३ ॥ अष्टम्यांचचतुर्दश्यांयजेतहविषायमं ॥ परेयिवांसमित्येतत्सूक्तमत्रप्रयोजयेत् ॥ ९४ ॥ पुरायुषःप्रमीयेत
नजातुसकथंचन ॥ प्रीयेत्तस्ययमोराजामृतिंचांतेप्रयच्छति ॥ ९५ ॥ धर्मराजायस्वाहेतिमंत्रांतेजुहुयाद्धविः ॥ वैशाखपौर्णमास्यांतु
कर्मनित्यंप्रयोजयेत् ॥ ९६ ॥ अयनेपर्वसुस्नात्वायःप्रदद्यात्तिलोदकं ॥ यमायसगणायैवतद्ध्र्यंनसाविंदति ॥ ९७ ॥ नित्यमेवप्रपद्येतपरंमृत्योर्
जपन्द्विजः ॥ नक्तभोजीमिताहारःपरिसंवत्सरंसदा ॥ ९८ ॥ नैनंपुरायुषान्मृत्युर्नयतेससुतप्रजं ॥ फलाहारोजपन्मृत्युंत्रिभिर्वरमिताशनः
॥ ९९ ॥ षष्ठेकालेतुभुंजीतफलमूलमथापिवा ॥ स्थानासनाभ्यांविहरेदुदकेशिशिरेवसन् ॥ ४०० ॥ ग्रीष्मेपंचतपास्तुस्याद्वर्षास्वभ्रावकाशकः
॥ एवंयुक्तोजयेन्मृत्युंरोगेभ्यश्चप्रमुच्यते ॥ १ ॥ भ्रातुर्भार्यामपुत्रस्यसंतानार्थंमृतेपतौ ॥ देवरोन्वारुरुक्षंतीमुदीर्ष्वेतिनिवर्तयेत्
॥ २ ॥ ऋतुकालेतुसंप्राप्तेघृताभ्यक्तोऽथवाग्यतः ॥ एकमुत्पादयेत्पुत्रंनद्वितीयंकथंचन ॥३॥ दशारक्षंतुशांत्यर्थंभद्रंनइतिसंस्मरेत् ॥
नित्यंजपेच्छुचिर्भूत्वामानसंविंदतेसुखं ॥ ४ ॥ फलाहारोभवेन्मासंमासंचापःपिबेत्ततः ॥ वायुभक्षोभवेन्मासंजपन्नेतत्सहस्रशः ॥ ५ ॥
मनसैवास्यसिध्यंतिसर्वेकामाःसमीहिताः ॥ दिव्यान्पश्यतिगंधर्वान्सिद्धान्पश्यतिचारणान् ॥ ६ ॥ अंतर्धानंव्रजत्यस्माल्लोकादाकाशगोभवे-

त् ॥ दूरात्पश्यतिदूराच्चश्रृणोतिपरमेष्ठिवत् ॥ ७ ॥ प्रदेवत्रेतिनियतोजपेतमरुधन्वसु ॥ प्राणांतिकेभयेप्राप्तेक्षिप्रमंभःसविंदति ॥ ८ ॥ बैभीतकांस्तुत्रीनक्षान्गंधैःसमभिवासयेत् ॥ पुष्पैरवकिरेच्चैवंस्थापयित्वाविहायसि ॥ ९ ॥ संहत्यपादौतांरात्रिंतिष्ठन्नक्षस्तुतिंजपेत् ॥ प्रावेपामेत्यृचंत्वेतांमनसैवजपेन्निशि ॥ ४१० ॥ व्युषायामुदितेसूर्येजपन्नादेवनंव्रजेत् ॥ एतामेवजपेन्नित्यंजयत्यन्नैर्नजीर्यते ॥ ११ ॥ यमेवजेतुमिच्छेतस्पृष्ट्वामूर्धनितंजपेत् ॥ सूक्तशेषंजयत्यन्यान्जीयतेनसकेनचित् ॥ १२ ॥ अबुध्नमुषासानक्तेत्येतेस्वस्त्ययनेजपेत् ॥ नमोमित्रस्यवरुणस्यचक्षसइतिनित्यशः ॥ १३ ॥ अस्यैवचोत्तमर्गेकाययैनोभ्यःप्रमुच्यते ॥ तयाज्यंजुहुयान्नित्यमेनोभ्योविप्रमुच्यते ॥ १४ ॥ दिवस्परीतिसूक्तंतुजपेच्छ्रद्धासमन्वितः ॥ सर्वत्रलभतेश्रद्धांश्रद्धाकामःसमाहितः ॥ १५ ॥ माप्रगामेतिचजपेत्समूढोगहनेपथि ॥ स्वस्तिमान्व्रजतेऽध्वानंविंदतेचपरंसुखं ॥ १६ ॥(क्षीणायुरितिमन्येतयंकंचित्सुहृदंप्रियं ॥ यत्तेयममितिस्नातस्तस्यमूर्धानमालभेत् ॥ १७ ॥ सहस्रकृत्वःपंचाहंजपेदायुर्लभेतसः ॥) घृतेनसिंधुद्वीपस्यसूक्तेनैनंचलेपयेत् ॥ १८ ॥ संविशन्शयनेनित्यमेतन्मंत्रंजपेतवै ॥ पुत्रान्भार्यांप्रियं चान्यमात्मानंचसमालभेत् ॥ १९ ॥ जीवावृत्तिंप्रयुंजीतनित्यमेतांघृतेनतु ॥ स्रोतांस्यभज्यसर्वाणिसुखीभवतिविज्वरः ॥ ४२० ॥ इदमित्थेतिमंत्रोयंसहस्रसनिरुच्यते ॥ अर्धमासंहविष्यान्नमर्धमासंपयःपिबेत् ॥ २१ ॥ उपोष्यचापरंपक्षमरण्येस्थंडिलेशुचौ ॥ औदुंबरेध्मं प्रज्वाल्यजुहुयात्पावकेघृतं ॥ २२ ॥ स्रुक्स्रुचौचमसाश्चैवसर्वमौदुंबरंभवेत् ॥ हुत्वाहुतिसहस्रंतुतेनकामेनयुज्यते ॥ २३ ॥ अमोघमेव कर्मैतज्जानीयात्सिद्धिमेवतु ॥ व्यर्थमव्यर्थमेवैतत्फलंचास्यप्रयच्छति ॥ २४ ॥ चतुष्पथेचान्नकामआदित्याभिमुखोघृतं ॥ जुहुयाद्धनकामस्तुसहस्रंभोजयेद्द्विजान् ॥ २५ ॥ पशुकामोजपेद्गोष्ठेजुहुयाद्वाप्युपोषितः ॥ विधिनानेननियतःसहस्रंविंदतेपशून् ॥ २६ ॥ लोहलोहित-

हेमानांकारयेत्रिवृतंमणिं ॥ सहस्रसमिधांचैवसंपाताभिहुतोभवेत् ॥ २७ ॥ हुत्वासहस्रसंपातंशिरसाधारयेततं ॥ पाणिनावाशुचिर्नित्यंसहस्रानुचरोभवेत् ॥ २८ ॥ परावतःस्वस्त्ययनंस्नातकस्यविधीयते ॥ स्वर्गकामश्चतंनित्यंजपेतनियतव्रतः ॥ २९ ॥ बृहस्पतेप्रथममितिनि-
त्यंज्ञानस्तुतिंजपेत् ॥ ज्ञानवान्भवतिश्रीमाननंतांविंदतेश्रियं ॥ ४३० ॥ अलक्ष्मीनाशनार्थंतुपयोभक्षोभवेन्नरः ॥ वयःसुपर्णाइत्येतांजप-
न्वैविंदतेश्रियं ॥ ३१ ॥ तमसाप्रावृतोयस्तुमन्येतात्मानमात्मनि ॥ अश्रियावापिसंयुक्तोजपन्नेतांप्रमुच्यते ॥ ३२ ॥ अक्षिणीप्रातरुत्थाय-
विमृजीतैतयासदा ॥ चक्षुष्मान्भवतिश्रीमाँल्लक्ष्मीश्चापिप्रवर्धते ॥ ३३ ॥ नतंविदाथेत्येतांचजपन्विप्रःसमाहितः ॥ विहायकल्मषंसर्वंब्रह्मा-
भ्येतिसनातनं ॥ ३४ ॥ अनयापर्वसुस्नात्वायःप्रदद्यात्तिलोदकं ॥ यमायसगणायैवतद्धयंसनाविंदति ॥ ३५ ॥ यस्तेमन्योइतिसदासपत्न-
घ्नेत्विमेजपेत् ॥ घृतेनाभिहुतंद्वाभ्यांधारयेदायसंमणिं ॥ ३६ ॥ जुहुयादायसंशंकुमाभ्यामेवचतुर्दशीं ॥ खादिरेध्मसमिद्धेग्नौसपत्नान्प्रति-
बाधते ॥ ३७ ॥ यथाहिपरमंब्रह्मगुह्यंपावनमद्भुतं ॥ तथासंवननंह्यंनह्यस्माद्विद्यतेपरं ॥ ३८ ॥ उपोष्यद्वादशाहानिजपन्नेतमृषिंमुनिः ॥
तन्मनाप्रयतःसस्यात्रिरह्नोभ्युदयादपः ॥ ३९ ॥ अंतेतुद्वादशाहस्यशुचौदेशेसमाहितः ॥ पुंसःप्रतिकृतिंकुर्याद्भूमौपांसुमयींकृती ॥४४०॥
तस्याहृदयदेशंतुसमाक्रम्यजपेदृषिं ॥ अमोघंकर्मजानीयादहोरात्रेगतेसति ॥ ४१ ॥ त्र्याहेणधनिनंवैश्यंचतूरात्रेणक्षत्रियं ॥ राजानंपंचरा-
त्रेणषड्रात्रेणद्विजोत्तमं ॥ ४२ ॥ तपस्विनःसप्तरात्राज्जपेद्भुंजीतचैवतं ॥ अपिवोषितःसुस्नातोजपेदेतत्सदास्थितः ॥ ४३ ॥ यइच्छेद्वशमा-
नेतुंहीनंतुपरिवर्जयेत् ॥ सहस्रसंपातहुतंबिल्वानांचूर्णमावपेत् ॥ ४४ ॥ उदपानेवशंनेतुंतंजनंक्षिप्रमानयेत् ॥ मातर्यात्मनिपुत्रेषुपितृभ्रा-
तृषुहृत्सुच ॥ ४५ ॥ हृद्यमेतत्प्रयुंजीतशिरसाधारयेततं ॥ सुमित्रंतुपरि[illegible]नात्मजं ॥ ४६ ॥ हृद्यमेतत्प्रयुंजीतशांत्यर्थाय

सुखायच ॥ असंसिद्धेसंवननेपांसुप्रतिकृतिंपथि ॥ ४४७ ॥ [illegible]जुहुयादग्निंघृतेनब्राह्मणोयदि ॥ क्षत्रियस्त्वथतैलेनसार्षपेणविशोपिच
॥ ४८ ॥ आयसींवाप्रतिकृतिमग्निमध्येनिवापयेत् ॥ तांचप्रज्वलितांमत्वाजुहुयात्तन्मनाःशुचिः ॥ ४९ ॥ उग्रेणमहसाहन्यात्क्रुद्धश्चजुहुयाद्घृतं
॥ यथायथाप्रज्वलितेहूयतेजातवेदसि ॥ ४५० ॥ दीप्तांप्रतिकृतिंविप्रस्तथासवशमेष्यति ॥ श्मशानदग्धपांसूनांकुर्याद्वेदिंविलक्षणां
॥ ५१ ॥ वैभीतकेध्मज्वलितेलोहप्रतिकृतिंन्यसेत् ॥ अर्धरात्रेस्थितेतैलंसार्षपंलवणान्वितं ॥ ५२ ॥ तत्रशरमयंकुर्यात्प्रस्तरंप्रतिलोमतः
॥ त्रिषुशंकुषुचासीनोजुहुयादुग्रदर्शनः ॥ ५३ ॥ मुक्तकेशोवधंप्रेप्सुरचिरेणप्रसाधयेत् ॥ अथवाभिचरेदेनंजुहुयादात्मशोणितं
॥ ५४ ॥ वशंनयतिराजानंक्षिप्रंजनपदंपुरं ॥ पुष्टिकर्मापिकर्तव्यंहृद्येनैवयतात्मना ॥ ५५ ॥ अनागसिनकुर्वीतब्राह्मणोवधसंयुतं ॥ सरूपवत्सायागोश्चपयसासाधयेच्चरुं
॥ ५६ ॥ सहस्रसंपातहुतंपायसेवत्समग्रजं ॥ सहस्रानुचरोवत्सःस्याद्रोगैर्विवर्जितः ॥ ५७ ॥ गाश्चैव
पाययेत्ताश्चभवंतिव्याधिवर्जिताः ॥ पुत्रांश्चप्रार्थयेन्नित्यंप्रियानन्यांश्चसज्जनान् ॥ ५८ ॥ निरामयाश्चस्निग्धाश्चभवंतिविगतज्वराः ॥ स्त्रियंचेदभिमन्येततस्याःसंवननंमहत्
॥ ५९ ॥ व्रीहीणांनखभिन्नानांतंडुलान्सूक्ष्मचूर्णितान् ॥ सहस्रसंपातहुतान्स्वेदयेत्कुशलोग्निना ॥४६०॥
तेनप्रतिकृतिंकुर्यात्तांध्यात्वामनसास्त्रियं ॥ अक्तांसर्षपतैलेनजुहुयादंगशश्चतां ॥ ६१ ॥ पादौप्रथमतश्छिंद्यात्फडित्यग्नौनिधापयेत् ॥ अथजंघेजानुजीचऊरूबाहूततःशिरः
॥ ६२ ॥ छित्त्वाहृदयदेशंतुहृदयेस्वेनिवेशयेत् ॥ जपन्नेतमृषिंविप्रस्त्रीवशंसाधिगच्छति ॥ ६३ ॥
नैतत्परगृहीतासुनसाध्वीषुकथंचन ॥ नधर्मव्रतशीलासुकुर्वीतद्विजसत्तमः ॥ ६४ ॥ कामंपरिगृहीतासुहीनवर्णासुयश्चरेत् ॥ पतिमस्यागुणीकुर्वन्पूर्वंपश्चात्तुतांस्त्रियं
॥ ६५ ॥ भुक्तांवापायसंसद्यश्छर्दयित्वानिधापयेत् ॥ तच्चूर्णंकृत्यजायायैदेयंसंवननंस्मृतं ॥ ६६ ॥ महावृक्ष-

फलान्येवमयुग्मान्यभिमंत्रयेत् ॥ तेषांयुग्मानिभंजीतस्वयमधानिशेषयेत् ॥ ६७ ॥ तानिदद्याद्यमिच्छेत्तुवशीकर्तुंजपन्नृषिं ॥ सुहृद्भूत्वासुहृद्यस्यदेयंसंवननंस्मृतं ॥ ६८ ॥ एकैकमभिरूपंतुहृद्यसूक्ताद्यतःपुनः ॥ कर्माणित्वभिरूपाणिकुर्याद्यस्तुयथेच्छति ॥ ६९ ॥ पराकदासस्यविधिंहृद्येनोक्तंविदुर्बुधाः ॥ स्त्रीणांसंवननंचैतत्पुंसामपिविधीयते ॥ ४७० ॥ द्वेष्येतुज्ञातिनामेवजपेच्चैवसदायुधि ॥ खादिरंकारयेच्छंकुंहृदितंसंनिवेशयेत् ॥ ७१ ॥ कृत्वाप्रतिकृतिंपूर्वंपांसुभिर्वाथवातुषैः ॥ इषुमप्यनुमंत्र्यैवसंग्रामंसंप्रकल्पयेत् ॥ ७२ ॥ रिपुघ्नमेतज्जानीयात्प्रयुक्तमपराजितं ॥ पराकदासप्रेष्यार्थंहृद्यंसंवननंस्मृतं ॥ ७३ ॥ चिंतयन्मनसैवैतत्सूक्तंसिद्धिंनियच्छति ॥ सूर्यायैभाववृत्तंतुश्रावयेत्कन्यकापिता ॥ ७४ ॥ अनुरूपंसुसदृशंभर्तारंतेनविंदति ॥ इमामितिजपेत्कन्यानाभिमालभ्यनित्यशः ॥ ७५ ॥ एवमेवजपेद्भर्तादीर्घायुःसभवेत्ततः ॥ स्नापयेदभिरूपैश्चभ्राताकन्यापितापिवा ॥ ७६ ॥ शतंपुत्रवतीयावन्नचभर्त्रावियुज्यते ॥ सम्राज्ञीतिजपेन्मूर्ध्निकन्यामालभ्य नित्यशः ॥७७॥ श्वश्रूश्वशुरदेवरैर्ननांद्राचापिपूज्यते ॥ इंद्राण्याकृतसंवादंस्नानेसूक्तंप्रयोजयेत् ॥७८॥ नववर्गोत्तमयुतंपतिसौभाग्यपुत्रदं ॥ जलपुष्पोत्करयुतेचित्रकुंभसमावृते ॥ ७९ ॥ कर्तव्योऽत्रतथायोगःसोमगंधर्ववह्निनां ॥ भगायाप्सरसांचैवयक्षाधिपतयेपिच ॥ ४८० ॥ इंद्राण्यैदेवपत्नीनांरतिप्रद्युम्नयोस्तथा ॥ नदीसलिलसंपूर्णेपंचगव्यसमायुते ॥ ८१ ॥ हुत्वाग्निंस्नापयेत्कन्यांस्थितांदेशेतुदक्षिणे ॥ प्रियंगुवटनागानांकषायोद्धृष्टकेरसं ॥८२॥ संपाताभिहुतंकृत्वासर्वौषधिसमन्वितं ॥ अभिमंत्र्यचसूक्तांतेनवभिश्चस्तुवीतवै ॥ ८३ ॥ एताभिरद्भिःपूर्णेनअभिषिंचेदुपोषितां ॥ याःपतिघ्न्यःस्त्रियस्तन्व्यःशाम्यंतेनास्थितेनवै ? ॥८४॥ स्नापयेदाहनस्याद्भिर्विद्यायांविप्रवादिनीं ॥ सूक्तादुपोद्धरेदेनंनसेशइतितुद्वृचं ॥८५॥ उपदिष्टेयमेकेषांपुंसःकर्मणिपौरुषे ॥ रक्षोहणंवाजिनमित्येतद्रक्षोहणंजपेत् ॥८६॥ अग्निंप्रज्वाल्यचैतेनउपतिष्ठेतनि

Digitization by eGangotri. Funding by MIDF-Delhi

त्यशः ॥ आज्याहुतीश्चजुहुयात्तेनरक्षांसिबाधते ॥८७॥ एतद्रक्षोहणंशांतिःपरंचैवाग्रकीर्तिता ॥ हविष्पांतीयमेतत्तुसूक्तमत्रप्रयोजयेत् ॥८८॥
गर्हितान्नात्तृयोगेचहविष्पांतीयमभ्यसेत् ॥ पवित्रंपरमंह्येतद्ध्यातव्यंचाप्यभीक्ष्णशः ॥ ८९ ॥ आदित्येदृष्टिमास्थायषण्मासान्नियतोभवेत् ॥
देवयानंसपंथानंपश्यत्यादित्यमंडले ॥ ४९० ॥ विद्यावैश्वानरीचास्यस्वकायस्थाप्रकाशते ॥ हविष्पांतीयमभ्यस्यसर्वपापैःप्रमुच्यते ॥९१॥
इंद्रंस्तवेतिसूक्तंतुजपेच्छत्रुनिबर्हणं ॥ पवित्राणांपवित्रंचगुह्यंपावनमद्भुतं ॥ ९२ ॥ शुक्लपक्षेशुभेवारेसुनक्षत्रेसुगोचरे ॥ द्वादश्यांपुत्रका-
मायचरुंकुर्वीतवैष्णवं ॥९३॥ दंपत्योरुपवासःस्यादेकादश्यांसुरालये ॥ ऋग्भिःषोडशभिःसम्यगर्चयित्वाजनार्दनं ॥२४॥ चरुंपुरुषसूक्तेन
श्रपयेत्पुत्रकाम्यया ॥ प्राप्नुयाद्वैष्णवंपुत्रमचिरात्संततिक्षमं ॥९५॥ द्वादशद्वादशीःसम्यक्पयसानिर्वपेच्चरुं ॥ यःकरोतिहयस्थस्यायातिविष्णोः
परंपदं ॥ ९६ ॥ हुत्वाग्निंविधिवत्सम्यगृग्भिःषोडशभिर्बुधः ॥ कृतांजलिपुटोभूत्वास्तवंताभिःप्रयोजयेत् ॥ ९७ ॥ केशवंमार्गशीर्षेतुपौ-
षेनारायणंतथा ॥ माधवंमाघमासेतुगोविंदंफाल्गुनेपुनः ॥ ९८ ॥ चैत्रेचैवतथाविष्णुंवैशाखेमधुसूदनं ॥ ज्येष्ठेत्रिविक्रमंविद्यादाषाढेवाम-
नंविदुः ॥ ९९ ॥ श्रावणेश्रीधरंविद्याद्धृषीकेशंततःपरे ॥ आश्विनेपद्मनाभंतुदामोदरंचकार्तिके ॥ ५०० ॥ द्वादशैतानिनामानिऋष्यशृं-
गोऽब्रवीन्मुनिः ॥ पूजयेन्मासनामभिःसर्वान्कामान्समश्नुते ॥ १ ॥ आयुष्मंतंसुतंसूतेपरामेधासमन्वितं ॥ धनवंतंप्रजावंतंधार्मिकंसात्विकं
तथा ॥ २ ॥ समिधोश्वत्थवृक्षस्यहुत्वाग्निंजुहुयात्पुनः ॥ उपस्थानंहुताशस्यध्यात्वार्च्यमधुसूदनं ॥ ३ ॥ हविर्होमंततःकुर्यात्प्रत्यृचंवाग्य-
तःशुचिः ॥ सूक्तेनजुहुयादाज्यमादावंतेचपूर्ववत् ॥ ४ ॥ हविःशेषंनमस्कृत्वानारीनारायणंपतिं ॥ भक्षयित्वाहविःशेषंलब्धाशीःसंवि-
शेत्क्षणं ॥ ५ ॥ ततस्तुकृत्वेदंकर्मकर्तव्यंद्विजतर्पणं ॥ द्वितीयंस्त्रीनिवर्तेतयावद्गर्भंचविंदति ॥ ६ ॥ अपुत्रामृतपुत्रावायाचकन्याःप्रसूयते ॥

क्षिप्रंसाजनयेत्पुत्रमृष्यशृंगोयथाब्रवीत् ॥ ७ ॥ अर्चनंसंप्रवक्ष्यामिविष्णोरमिततेजसः ॥ यत्कृत्वामुनयःसर्वेब्रह्मनिर्वाणमाप्नुयुः ॥ ८ ॥
अप्स्वग्नौहृदयेसूर्येस्थंडिलेप्रतिमासुच ॥ षट्स्वेतेषुहरेःसम्यगर्चनंमुनिभिःस्मृतं ॥ ९ ॥ अग्नौक्रियावतांदेवोदिविदेवोमनीषिणां ॥
प्रतिमास्वल्पबुद्धीनांयोगिनांहृदयेहरिः ॥५१०॥ आपोह्यायतनंतस्यतस्मात्तासुसदाहरिः ॥ तस्यसर्वगतत्वाच्चस्थंडिलेभावितात्मनां ॥ ११ ॥
दद्यात्पुरुषसूक्तेनयःपुष्पाण्यपएववा ॥ अर्चितंस्याज्जगदिदंतेनसर्वंचराचरं ॥ १२ ॥ आनुष्टुभस्यसूक्तस्यत्रिष्टुबंतस्यदेवता ॥ पुरुषोऽथजग-
द्बीजमृषिर्नारायणःस्मृतः ॥ १३ ॥ नारायणमहाबाहोश्शृणुष्वैकंमहाप्रभो ॥ वक्ष्येपुरुषसूक्तस्यविधानंत्वर्चनंप्रति ॥ १४ ॥ अग्निकार्यंज-
पविधिंस्तोत्रंचैवतदात्मकं ॥ स्नात्वायथोक्तविधिनाप्राङ्मुखःशुद्धमानसः ॥ १५ ॥ प्रथमांविन्यसेद्वामेद्वितीयांदक्षिणेकरे ॥ तृतीयांवाम-
पादेतुचतुर्थींदक्षिणेन्यसेत् ॥ १६ ॥ पंचमींवामजानुनिषष्ठींवैदक्षिणेन्यसेत् ॥ सप्तमींवामकुक्षौतुअष्टमींदक्षिणेन्यसेत् ॥ १७ ॥ नवमीं-
नाभिदेशेतुदशमींहृदयेन्यसेत् ॥ एकादशींकंठदेशेद्वादशींवामबाहुके ॥ १८ ॥ त्रयोदशींदक्षिणेचआस्येचैवचतुर्दशीं ॥ अक्ष्णोःपंचदशीं
चैवषोडशींमूर्ध्निविन्यसेत् ॥ १९ ॥ एवंन्यासविधिंकृत्वापश्चात्पूजांसमारभेत् ॥ यथादेहेतथादेवेन्यासंकृत्वाविधानतः ॥ ५२० ॥ आ-
द्ययावाहयेद्देवमृचातुपुरुषोत्तमं ॥ द्वितीययासनंदद्यात्पाद्यंचैवतृतीयया ॥ २१ ॥ अर्घ्यंचतुर्थ्यादातव्यंपंचम्याचमनीयकं ॥ षष्ठचास्नानं
प्रकुर्वीतसप्तम्यावस्त्रमेवतु ॥ २२ ॥ यज्ञोपवीतमष्टम्यानवम्याचानुलेपनं ॥ पुष्पंदशम्यादातव्यमेकादश्यातुधूपकं ॥ २३ ॥ द्वादश्या
दीपकंदद्यात्त्रयोदश्यानिवेदनं ॥ चतुर्दश्यानमस्कारंपंचदश्याप्रदक्षिणां ॥ २४ ॥ दक्षिणातुयथाशक्तिषोडश्याचप्रदापयेत् ॥ स्नानेवस्त्रेच-
नैवेद्येदद्यादाचमनीयकं ॥ २५ ॥ ततःप्रदक्षिणांकृत्वाजपंकुर्यात्समाहितः ॥ यथाशक्तिजपित्वातुसूक्तंतस्मैनिवेदयेत् ॥ २६ ॥ देवस्यद-

क्षिणेपार्श्वेकुंडंस्थंडिलमेववा ॥ कारयेत्प्रथमेनैवद्वितीयेनतुप्रोक्षणं ॥ २७ ॥ तृतीयस्याग्निमादध्याच्चतुर्थ्याचसमिंधनं ॥ पंचम्याज्यस्यश्रपणंचरोश्चश्रपणंतथा ॥ २८ ॥ षष्ठेनैवाग्निमध्येतुकल्पयेत्पद्ममासनं ॥ चिंतयेद्देवदेवेशंकालानलसमप्रभं ॥ २९ ॥ ततोगंधंचपुष्पंचधूपदीपनिवेदनं ॥ अनुज्ञाप्यततःकुर्यात्सप्तम्यादियथाक्रमं ॥ ५३० ॥ समिधस्तावतीःपूर्वंजुहुयादभिघारिताः ॥ ततोघृतेनजुहुयाच्चरुणाच ततःपुनः ॥३१॥ एवंहुत्वाततश्चैवमनुज्ञाप्ययथाक्रमं ॥ अग्नेर्भगवतस्तस्यसमीपेस्तोत्रमुच्चरेत् ॥३२॥ जितंतेपुंडरीकाक्षनमस्तेविश्वभावन ॥ सुब्रह्मण्यनमस्तेस्तुमहापुरुषपूर्वज ॥ ३३ ॥ नमोहिरण्यगर्भायप्रधानाव्यक्तरूपिणे ॥ ॐनमोवासुदेवायशुद्धज्ञानस्वरूपिणे ॥ ३४ ॥ देवानांदानवानांचसामान्यमसिदैवतं ॥ सर्वदाचरणद्वंद्वंव्रजामिशरणंतव ॥ ३५ ॥ एकस्त्वमसिलोकस्यस्रष्टासंहारकस्तथा ॥ अव्यक्तश्चानुमंताचगुणमायासमावृतः ॥ ३६ ॥ संसारसागरंघोरमनंतंक्लेशभाजनं ॥ त्वामेवशरणंप्राप्यनिस्तरंतिमनीषिणः ॥ ३७ ॥ नतेरूपंनचाकारोनायुधानिनचास्पदं ॥ तथापिपुरुषाकारोभक्तानांत्वंप्रकाशसे ॥ ३८ ॥ नैवकिंचित्परोक्षंतेनप्रत्यक्षोसिकस्यचित् ॥ नैवकिंचिदसाध्यंतेनचसाध्योसिकस्यचित् ॥ ३९ ॥ कार्याणांकारणंपूर्वंवचसांवाच्यमुत्तमं ॥ योगिनांपरमांसिद्धिंविदंतिपरमंविदः ॥ ५४० ॥ अहंभीतोस्मिदेवेशसंसारेस्मिन्महाभये ॥ त्राहिमांपुंडरीकाक्षनजानेशरणंपरं ॥ ४१ ॥ कालेष्वपिचसर्वेषुदिक्षुसर्वासुचाच्युत ॥ शरीरेविगतेवापिवर्ततेमेमहद्भयं ॥ ४२ ॥ त्वत्पादकमलादन्यन्नमेजन्मांतरेष्वपि ॥ निमित्तंकुशलस्यास्तियेनगच्छामिसद्गतिं ॥ ४३ ॥ विज्ञानंयदिदंप्राप्तंयदिदंज्ञानमर्जितं ॥ जन्मांतरेपिमेदेवमाभूदस्यपरिक्षयः ॥ ४४ ॥ दुर्गतावपिजातस्यत्वद्गतोमेमनोरथः ॥ यदिनाथंचविंदेयतावतास्मिकृतीसदा ॥ ४५ ॥ अकामकलुषंचित्तंममतेपादयोःस्थितं ॥ कामयेविष्णुपादौतुसर्वजन्मसुकेवलं ॥ ४६ ॥ पुरुषस्यहरेःसूक्तंस्वर्ग्यंध-

न्यंयशस्करं ॥ आत्मज्ञानमिदंपुण्यंयोगज्ञानमिदंपरं ॥ ४७ ॥ इत्येवमनयास्तुत्यास्तुत्वादेवंदिनेदिने ॥ किंकरोसीतिचात्मनंदेवायै
वनिवेदयेत् ॥ ४८ ॥ फलाहारोभवेन्मासंपश्यत्यात्मानमात्मनि ॥ ४९ ॥ फलानिभुक्त्वोपवसेन्मासमद्भिश्चवर्तयेत् ॥ अरण्ये
निवसेन्नित्यंजपन्नेतमृषिंसदा ॥ ५५० ॥ त्रिस्त्रिषवणकालेषुस्नायादप्सुसमाहितः ॥ आदित्यमुपतिष्ठेतसूक्तेनानेननित्यशः ॥ ५१ ॥
आज्याहुतीरनेनैवहुत्वैतंचिंतयेदृषिं ॥ ऊर्ध्वंमासात्फलाहारस्त्रिभिर्वर्षैर्जयेद्दिवं ॥ ९२ ॥ तद्भक्तस्तन्मनायुक्तोदशवर्षाण्यनन्यभाक् ॥
साक्षात्पश्यतितंदेवंनारायणमनामयं ॥ ५३ ॥ ग्राह्यमत्यंतयत्नेनत्वष्टारंजगतोऽव्ययं ॥ गृहस्थधर्मैवर्तेतन्यायवृत्तःसमाहितः ॥ ५४ ॥
एतदेवंचिंतयेतनारायणमनामयं ॥ अर्धरात्रेत्यक्तनिद्रउत्थायशुचिवाग्यतः ॥ ५५ ॥ संप्रसुप्तेषुभूतेषुयोगंयुंजीतयोगवित् ॥ ऋज्वासीनः
समेदेशेनिर्वातेशब्दवर्जिते ॥ ५६ ॥ सव्यंपादंदक्षिणस्यांजानुनिश्लेषयेत्ततः ॥ संहृत्यदक्षिणंपादंसव्येजानुनियच्छति ॥ ५७ ॥ ब्रह्मांजलिकृतः
स्वस्थोयोगसंमीलितेक्षणः ॥ ॐमित्युक्त्वास्वहृदयंचिंतयेदविकुत्सितः ॥ ५८ ॥ तत्रात्मानंसमादध्यादिंद्रियाणिमनस्तथा ॥ नचबुध्येत
किंचान्यन्नपश्येच्छृणुयान्नच ॥ ५९ ॥ ननमस्येत्सदायोगंतदाप्राप्तःसउच्यते ॥ हृद्येतमृषिमभ्यस्येत्पश्यन्नेवयथाश्रुतिः ॥ ५६० ॥
प्राणानायम्यचासीनोयावच्चित्तंतदर्पितं ॥ उच्छ्वसिष्यत्यधोनाभिगमयित्वामनस्तथा ॥ ६१ ॥ उच्छ्वसेदेवमसकृत्तन्मनायोगमुन्नयेत् ॥
एवंहियुंज्यात्सामान्यंनपश्येच्छृणुयान्नच ॥ ६२ ॥ तदाशनैर्नियच्छेतहृदयादूर्ध्वमेवतु ॥ समौतुजानूचास्यंचनासिकानयनेभ्रुवौ ॥ ६३ ॥
भ्रुवोर्मध्येपरंस्थानंतत्रैतद्धारयेत्स्थिरं ॥ ललाटदेशेधार्याथमूर्धानंगमयेत्ततः ॥ ६४ ॥ उच्छ्वसंश्चयथाकालंनाभितत्वोच्छ्वसेत्पुनः ? ॥ एतत्परं
स्थानमुक्तंब्रह्मणःपरमात्मनः ॥ ६९ ॥ एवंयुक्तोमहात्मासन्महात्मानंप्रपद्यते ॥ यदिस्यात्सुकृतीशुद्धोयदिवापापकृत्तमः ॥ ६६ ॥ उप-

लभ्यपरंब्रह्मगतिंज्ञात्वाभवेच्छुचिः ॥ सर्वपापावबद्धश्चेद्बुद्ध्वैतत्प्रयतोजपेत् ॥ ६७ ॥ अपिजिज्ञासनोदवगच्छेतपरमांगतिं ॥ धारणात्तुपृथक्कुर्याद्धर्मेणानेननित्यशः ॥ ६८ ॥ आदित्येग्नौचंद्रमसिवृक्षाग्रेषुचधारयेत् ॥ पर्वताग्रेसमुद्रेवायत्रवापिमनोरमेत् ॥ ६९ ॥ नत्वेवविषयान्प्राप्यधारयीतकथंचन ॥ बह्वत्रदुःखंजानीयात्प्रध्वसेन्मरणेसति ॥ ५७० ॥ धार्मिकाणांकुलेशुद्धेयोगभ्रष्टोभिजायते ॥ मूर्ध्निब्रह्मसविंदेतसएवऋषिसत्तमः ॥ ७१ ॥ तदामूर्ध्नःपरंज्योतिर्नक्षत्रपथमुन्नयेत् ॥ योगीयोगेश्वरंप्राप्यनिर्द्वंद्वःपरमात्मवित् ॥ ७२ ॥ सर्वत्रैवात्मनात्मानंपश्येदृषिपरायणः ॥ जपेच्चैवसदास्नातःपवित्रमिदमुत्तमं ॥ ७३ ॥ अपिपातकसंयुक्तःकालेनसुकृतीभवेत् ॥ येनयेनचकामेनजपेदिममृषिंसदा ॥ ७४ ॥ ससकामःसमृद्धःस्याच्छ्रद्दधानस्यकुर्वतः ॥ होमंवाप्यथवाजाप्यमुपहारमथोचरुं ॥ ७५ ॥ कुर्वीतयेनकामेनतत्सिद्धिमवधारयेत् ॥ ज्ञातिश्रैष्ठ्यंमहद्वित्तंयशोलोकेपरांगतिं ॥ ७६ ॥ पापेनविप्रमोक्षस्तुतत्सिद्धिमवधारयेत् ॥ ज्ञानगम्यंपरंसूक्ष्मंव्याप्यसर्वंव्यवस्थितं ॥ ७७ ॥ ग्राह्यमत्यंतयत्नेनब्रह्माभ्येतिसनातनं ॥ सहस्रशीर्षेतिसूक्तंसर्वकामफलप्रदं ॥ ७८ ॥ वेदगर्भशरीरेणसवैनारायणःस्मृतः ॥ ब्रह्मेंद्ररुद्रपर्जन्याअत्रसूक्तेव्यवस्थिताः ॥ ७९ ॥ अत्रस्थमेतद्द्रष्टव्यंजगत्स्थावरजंगमं ॥ अतःसंपठमानोपिभक्तिंनपरिहारयेत् ॥ ५८० ॥ भक्तानुकंपीभगवान्श्रूयतेपुरुषोत्तमः ॥ पूजार्थंतस्यदेवस्यवनात्स्वयमुपाहृतात् ॥ ८१ ॥ आरण्यकविधानेननिर्वपेत्प्रत्यहंचरुं ॥ नारायणायस्वाहेतिमंत्रांतेजुहुयाद्धविः ॥ ८२ ॥ आसहस्रात्ततश्चक्षुर्दिव्यंहोतुर्ददातिसः ॥ अपिवाचरुसाहस्रंतंत्रेणैकेननिर्वपेत् ॥ ८३ ॥ यावंतोवापिशक्यंतेअह्नासर्वान्समापयेत् ॥ सहस्रस्येप्सितानांचकामानांलभतेफलं ॥८४॥ पुरुषायुःसमायुक्तःसिद्धोवापिचरेन्महीं ॥ ध्येयः-सदासवितृमंडलमध्यवर्तीनारायणःसरसिजासनसंनिविष्टः ॥ केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रः ॥ ८५ ॥

एतत्तुयःपठतिकेवलमेवसूक्तंनारायणस्यचरणावभिवंद्यवंद्यौ ॥ पाठेनतेनपरमेणसनातनस्यस्थानंजरामरणवर्जितमेतिविष्णोः ॥ ८६ ॥
हविषाग्नौजलेपुष्पैर्ध्यानेनहृदयेहरिं ॥ यजंतिसूरयोनित्यंजपेतरविमंडले ॥ ८७ ॥ बिल्वपत्रंशमीपत्रंपत्रंभृंगारकस्यच ॥ मालतीकुशपद्मं
चसद्यस्तुष्टिकरंहरेः ॥ ८८ ॥ यत्रैतत्पठ्यतेकिंचित्तद्ध्यायेन्मनसैवतु ॥ संपाद्यतत्प्रसादाच्चदेवदेवस्यचक्रिणः ॥८९॥ पत्रैश्चपुष्पैश्चफलैश्च
तोयैरक्रीतलब्धैश्चसदैवसत्सु ॥ भक्त्यैकलभ्येपुरुषेपुराणेमुक्त्यैकिमर्थंक्रियतेतुयत्नः ॥ ५९० ॥ इत्येवमुक्तःपुरुषस्यविष्णोरर्चाविधिर्विष्णुकुमारनाम्ना
॥ मुक्त्येकमार्गप्रतिबोधनायदृष्ट्वाविधानंत्विहनारदोक्तं ॥ ९१ ॥ याओषधीःस्वस्त्ययनंजपेतनियतव्रतः ॥ ओषधीश्चयजेन्नित्यं
षण्मासानेवनित्यशः ॥ ९२ ॥ इत्यृग्विधानेतृतीयोध्यायः ॥ ३ ॥ ॥ इष्ट्वाशरदिवैरुद्रमोषधीश्चयजेत्तथा ॥ तस्यामयानभवंतितथा
जीर्णादिकानिच ॥ ९३ ॥ क्रियांतुसप्तरात्रेणसप्तकृत्वःसमाहितः ॥ प्रपद्येतौषधीर्विप्रःसूक्तमेतज्जपन्सदा ॥ ९४ ॥ द्विषत्क्षेत्रादिहालब्ध
मितिविज्ञापयेतच ॥ स्वक्षेत्रेचरुणैवेष्ट्वाविंदतेद्विषदोषधीः ॥ ९५ ॥ वृष्टिकामोजिताहारःप्रपद्येतबृहस्पतिं ॥ पायसेनोपहारेणहोमेनच
समन्वितः ॥ ९६ ॥ बृहस्पतेप्रतीत्येतद्वृष्टिकामःप्रयोजयेत् ॥ पर्जन्यंचनमस्कृत्वावृष्टिंविंदतिशोभनां ॥ ९७ ॥ सर्वत्रतुपराशांतिर्ज्ञेयोप्रतिरथस्त्वृषिः
॥ यमेवदेशंगच्छेतशत्रुंवाप्यनुमंत्रितः ॥ ९८ ॥ नाजित्वाविनिवर्तेतपरंहिब्रह्मणोबलं ॥ सर्वकामैर्जपेदतत्सर्वकामसमृद्धये
॥ ९९ ॥ संग्राममभ्युद्यातोवाराजाचैतत्प्रयोजयेत् ॥ सर्वान्विजयतेशत्रून्नपराजीयतेपरैः ॥ ६०० ॥ पथिस्वस्त्ययनंचैतत्तस्करेभ्यश्चरन्पथि
॥ भूतोरगपिशाचेभ्यःसर्वेभ्यःपरिरक्षति ॥ १ ॥ भूतांशस्यऋषेःसूक्तंप्रजाकामःशुचिर्जपन् ॥ अनुरूपांप्रजामाशुलभतेनात्रसंशयः
॥ २ ॥ स्थालीपाकेननासत्यावश्विनौतुयजेद्द्विजः ॥ अनेनैवतुसूक्तेनहुत्वा[illegible]मनुमंत्रयेत् ॥ ३ ॥ पायसंकृसरंमांसमोदनंदधिसक्तुकान् ॥

कुल्माषांश्चकरंभांश्चफलानिविविधानिच ॥ ४ ॥ चित्रमाल्यशुभान्गाधानन्नपानानियानिच ॥ भक्ष्यंभोज्यंचपेयंचसमाहृत्योदितेरवौ ॥
भूतांशमभ्यसेत्तावद्यावदस्तमितोरविः ॥ ५ ॥ अर्धरात्रेव्यतिक्रांतेततोऽश्विभ्यांनिवेदयेत् ॥ दीर्घायुषंसुरूपंचलभेत्पुत्रंसुवर्चसं ॥ ६ ॥
रूपवांश्चभवेन्नित्यंभूतांशंयोऽभ्यसेत्सदा ॥ सार्वकामिकमप्येनमृषिंविद्याद्विचक्षणः ॥ ७ ॥ नवाउदेवाइत्येतज्जपेतनियतव्रतः ॥ अन्नंविंदति
सर्वत्रयत्रयत्रोपतिष्ठति ॥ ८ ॥ पाप्मोपहतमात्मानंयोमन्येतविचक्षणः ॥ सजपेन्नियतोभूत्वालघुमन्येतपाप्मना ॥ ९ ॥ वाचंप्रपद्येद्वा
क्कामोहुनेदाशुजपन्निमाः ॥ अहंरुद्रेभिरित्येतद्वाग्मीभवतिपूजितः ॥ ६१० ॥ नतमित्यष्टकंसूक्तंवैश्वदेवंजपन्मुनिः ॥ कृत्स्नंतुकल्मषं
हत्वाविश्वैर्देवैःसहासते ॥ ११ ॥ रात्रींप्रपद्येन्मनसाशुचिःपर्णव्रतोनिशि ॥ यःकामयेतनपुनर्जायेयमितियोनिषु ॥ १२ ॥ सहस्रकृत्वोमनसा
जपेद्रात्रीतिरात्रिषु ॥ स्थालीपाकेनरात्रिंचयजेताहरहर्निशि ॥ तन्मनानिशिचासीनस्तिष्ठेदहनिधार्मिकः ॥ १३ ॥ ऊर्ध्वंसंवत्सराच्चैव
चरुंपयसिसंस्कृतं ॥ सहस्रकृत्वस्त्वेतेनदिवाहोमोविधीयते ॥ १४ ॥ जुहुयान्निशिपूर्वस्मिन्भागेरात्रौसमाहितः ॥ दिवाचाविश्पतिं(?)कार्यं
छायायामंशुतेजसा ॥ १५ ॥ प्रतिप्रयतआत्मवान्सूक्तंतुमनसाजपेत् ॥ संवत्सरेतृतीयेतुसर्पिषासाधयेच्चरुं ॥ १६ ॥ अथास्यवरदादेवी
रात्रिर्भवतिशर्वरी ॥ विज्ञापयीततांदेवींवरदांस्वयमागतां ॥१७॥ संवत्सरेऋतौमासिदिवसेस्मिन्क्षणेपिवा ॥ प्रयाणकालोभवितातववत्सेति
वत्सला ॥ १८ ॥ रात्रिसूक्तंजपन्नेवतंकालंप्रतिपद्यते ॥ नयोनिंपुनरायातिसर्वपापैःप्रमुच्यते ॥ १९ ॥ ममाग्नेवर्चइत्येतत्सर्वकामैर्जपेद्द्विजः
॥ जुह्वन्नाज्यमनेनैवसर्वान्कामानवाप्नुयात् ॥ ६२० ॥ यांकल्पयंतीतिसदाजपेतनियतव्रतः ॥ नैनंकृत्यानिर्हिंसंतिक्रुद्धाभिचरितानि
च ॥ २१ ॥ यमांगिरसकल्पैस्तुतद्विदोभिचरेतसः ॥ प्रत्यंगिरसकल्पेनसर्वांस्तान्प्रतिबाधते ॥ २२ ॥ प्रत्यंगिरसविद्वांस्तुनरिष्येतकदा-

चन ॥ नैनंकृत्यानिहिंसंतिज्ञाताज्ञातानिवाक्कचित् ॥ २३ ॥ अजानताजानतावाक्रुद्धेनाधर्षितेनवा ॥ आक्रुष्टंवादुरुक्तंवानैनोविंदतितद्विदं ॥ २४ ॥ एवमेवजपेन्नित्यमृषिंस्वस्त्ययनायवै ॥ सर्वप्रायश्चित्तमेतदभाषतऋषिःस्वयं ॥ २५ ॥ स्वावराणांनिवेशेषुनगराणांतथैवच ॥ ग्रामाणांचगृहाणांचजपेततमृषिंसदा ॥ २६ ॥ जातरूपमयंविद्वान्कारयेत्त्रिवृतंमणिं ॥ सहस्रसंपातहुतमृषिणातेनतंततः ॥ २७ ॥ प्रतिमुच्येतशिरसिग्रीवायामथवोरसि ॥ नैनंकृत्यानिहिंसंतिज्ञाताज्ञातानियानिच ॥ २८ ॥ अनेनैवतुसूक्तेनराज्ञांतुसमलोहितं ॥ कारयेत मणिंविद्वांस्तावदेवानुमंत्रणं ॥ २९ ॥ संग्रामेषुध्वजाग्राणिवादित्राण्यनुमंत्रयेत् ॥ आसनानिचशय्याश्चयानानिविविधानिच ॥ ६३० ॥ तस्याभिचरतेसाक्षादंगिरर्षिरपिस्वयं ॥ प्रत्यंगिरसकल्पेनसर्वंतत्प्रतिबाधते ॥ ३१ ॥ अमानुषीरभिचरेत्कृत्याःसूक्तंजपन्निदं ॥ मुच्यतेसर्वतोनिष्ठात्किंपुनर्मानुषाद्भयं ॥ ३२ ॥ तपस्वीनियतोदांतःप्रयोक्ताचेद्भवेदृषिः ॥ सर्वंतरतिशांतात्मातपोहिसुमहद्बलं ॥ ३३ ॥ आयुष्यमायुर्वर्चस्यंसूक्तंदाक्षायणंमहत् ॥ अलंकारंहिरण्यंवाप्राप्यदाक्षायणंजपेत् ॥ प्राप्तांसःश्रियमादत्तेबहुचान्नंसमश्नुते ॥ ३४ ॥ नासदासीदितिजपेज्जुहुयाद्योगतत्परः ॥ प्रजापतेस्तुसायुज्यंद्वादशाब्दैःसमश्नुते ॥ ३५ ॥ उतदेवाइतिजपेदामयावीयतव्रतः ॥ घृतकुंभंनिधायाथजुहुयाज्जातवेदसि ॥ ३६ ॥ कुंभसंपातमन्यस्मिन्कांस्यपात्रेनिधापयेत् ॥ योऽन्नार्थ्यलंनचान्नंस्यात्सइदंसंप्रकाशयेत् ॥ ३७ ॥ तेनाज्येनांगमभ्यज्यशनकैरन्नभाग्भवेत् ॥ रोगार्तस्याप्यनेनैवगात्रमंक्त्वाजपेदिदं ॥ अजीर्णान्नोत्थंजयीतसुखीभवतिविज्वरः ॥ ३८ ॥ अग्नेअच्छावदेत्येतद्धनकामःप्रयोजयेत् ॥ नियतःसर्पिषाहुत्वाजपेदयुतशःपुनः ॥ ३९ ॥ खादिराणांहिसमिधांजुहुयाद्दशतीर्दश ॥ दशकृत्वःसदारेण रायस्पोयेणपुष्यति ॥ ६४० ॥ बिल्वोदुंबरपालाशैस्तथारौहितकैश्चयः ॥ जुहुयाद्धनकामस्तुरायस्पोषेणपुष्यति ॥ ४१ ॥ बैभीतकेध्मै-

बैल्वैश्चजुहुयादर्धमासकं ॥ द्विषद्वेषणंतस्यांतेसूक्तमेतत्प्रयोजयेत् ॥ ४२ ॥ द्विषंतमेनमिहत्याद्विषतोविंदतेधनं ॥ अथवाजप्यमेवस्याद्रायस्पोषधनार्थिना
॥ ४३ ॥ अयमग्नेजरितेतिजपेदग्निभयेसति ॥ विधिनातर्षयित्वाग्निंपयोदधिघृतादिभिः ॥ ४४ ॥ स्वयंपातुंयावदिच्छेत्ताबद्धुत्वाचतुर्दिशं
॥ अपामिदंपरिणयेत्संततोदकधारया ॥४५॥ उतहृदइवभूत्वाप्यग्नेर्भेषजमंतिकात् ॥ अरण्यमेत्यपाठांतुक्रीणीयाद्यवमुष्टिना
॥ ४६ ॥ यदिसौम्यसिसोमायत्वांपरिक्रीणाम्योषधिं ॥ यदिवारुण्यसिवरुणायत्वांपरिक्रीणाम्यहंततः ॥ ४७ ॥ वसुभ्यश्चाथरुद्रेभ्य
आदित्येभ्योथवापुनः ॥ वैश्वदेव्यसिविश्वेभ्यःपरिक्रीणाम्यहंततः ॥ ४८ ॥ क्षिस्वासुमनसःपूर्वमोषध्यासहवीरुधैः ॥ तस्यावीर्यसमादत्ते
कर्मयत्रकरिष्यति ॥ ४९ ॥ तांतुमध्येसंदधीतौषधीनांचविहायसि ॥ ग्रहणेत्वौषधीनांचसर्वत्रैषविधिर्भवेत् ॥ ६५० ॥ उत्खापयीताथपाठांत्विमामितिजपन्निह
॥ प्रातश्चपेषयेदेनांसंसदिब्रह्मचारिणां ॥ ५१ ॥ तदलाभेव्रतवताकन्ययाब्राह्मणेनवा ॥ प्रातःशुचिस्तांघृतेनत्रिःपिबेदनुमंत्रितां
॥ ५२ ॥ इमामितितुसूक्तेनशतकृत्वोदशावरं ॥ सपत्नींबाधतेतेनपतिश्चातीवमन्यते ॥ ५३ ॥ पतिस्तुपरिजप्यैनांपाठामेतेनवैपिबेत्
॥ पयसासप्तरात्रेणसपत्नान्प्रतिबाधते ॥ ५४ ॥ मूलमंत्रजपैरन्यैर्यापतिंजेतुमिच्छति ॥ अलोकायमलोकस्थामज्जतेनरकेहिसा
॥ ५५ ॥ अन्यथाचोपनीतानिचूर्णमूलौषधान्यपि ॥ विनाशयेयुःपुरुषंतस्मान्नान्यत्समाचरेत् ॥ ५६ ॥ प्रियंवदाभर्तरियाभर्तायस्याःपरायणं
॥ वाक्चैवमधुरायस्याःपत्युःसंवननंमहत् ॥ प्रियंभर्तारमासाद्यपिबेदेवौषधीमिमां ॥ ५७ ॥ प्रियंवदांसुशीलांचधर्मपत्नीमनिंदितां ॥
अवमन्येतयोमोहात्तमाहुःपुरुषाधमं ॥ ५८ ॥ अरण्यानीत्यरण्येषुजपेत्सूक्तमनेकशः ॥ आरण्यानींनमस्कृत्वाआरण्यान्प्रतिबाधते ॥ ५९ ॥
श्रद्धासूक्तंजपेन्नित्यंश्रद्धाकामःसमाहितः ॥ सर्वत्रलभतेश्रद्धांमेधासूक्तंतथैवच ॥ ६६० ॥ ब्राह्मीमासाद्यसूक्तेद्वेजपेतनियतव्रतः ॥ तांपि-

बेतयथाशक्त्यात्र्यहात्सिद्धिंनियच्छति ॥ ६१ ॥ शंखपुष्पींतुपयसाब्राह्मीपुष्पाणिसर्पिषा ॥ शतावरींचपयसावचामद्भिर्घृतेनवा ॥ ६२ ॥
सूक्ताभ्यामनुमंत्राभ्यामेकैकांतुत्र्यहंपिबेत् ॥ श्रद्धांमेधांस्मृतिंपुष्टिंबलंलक्ष्मींचविंदति ॥ ६३ ॥ सिद्धिंप्राप्नोतिपरमांदीर्घमायुःसमश्नुते ॥
अथवामनसाध्यायेत्सूक्तंसिद्धिंनियच्छति ॥ ६४ ॥ शासइत्थासपत्नघ्नंसंग्रामेविजिगीषतः ॥ प्रयोक्तव्यंतुशुचिनाजुहुयात्तत्रसिद्धयः ॥६५॥
अथवाजप्यमेवस्यात्संग्राममभिगच्छतः ॥ शासइत्थेतियोहंतुंशत्रूंस्तांस्तुविबाधते ॥ ६६ ॥ अलक्ष्मीनाशनार्थंतुजपेन्नित्यंशिरिंबिठं ॥
अपामार्गमयींशाखांसदर्भांसहवीरुधैः ॥६७॥ गृहीत्वात्मानंपावयेदधश्चोर्ध्वंचनित्यशः ॥ आज्यंवानेनजुहुयात्सहस्रंदशतीर्दश ॥ त्र्यहेणनुदते
देहादलक्ष्मींशतवार्षिकीं ॥ ६८ ॥ चांद्रायणंचरन्नेतत्सूक्तंसिद्धिकरंजपेत् ॥ अलक्ष्मीर्नुदतेदेहादपिवर्षसहस्रिकी ॥ ६९ ॥ गृहीतंयक्ष्मणाद्
र्भान्गृहीत्वासंस्पृशन्जपेत् ॥ मुंचामित्वाहविषेतियक्ष्माणमपकर्षति ॥ ६७० ॥ समिद्धमग्निंजुहुयादाज्येनैवयथाविधि ॥ संपातमाज्येन
निनयेत्संपातैश्चपयःपिबेत् ॥ ७१ ॥ संपातभाजनेसर्पिश्चूर्णंतत्रनिधापयेत् ॥ तत्रास्यभोजनीयंस्यात्पानीयंचानुमंत्रितं ॥ ७२ ॥
खादिराणिचकाष्ठानिचूर्णंकृत्वासहांबुभिः ॥ साधयीतरसंचैषांमध्वाज्याभ्यांपिबेत्सह ॥ ७३ ॥ मुंचामित्वाहविषेतितत्रतत्रप्रयोजयेत् ॥
यक्ष्माणमपकर्षतिशरीरारोग्यकर्मणा ॥ ७४ ॥ यस्यागर्भःप्रमीयेततत्राग्नौजुहुयाद्धविः ॥ ब्रह्मणाग्निःसंविदानइत्याज्येनयथाविधि ॥७५॥
आज्यशेषेणचाभ्यज्यगर्भिणीप्रसवेत्ततः ॥ पिबेदेवाज्यशेषंतुजीवन्तस्याःप्रजायते ॥ ७६ ॥ जातानिचेत्प्रमीयेरन्नाज्यंकृत्वानुमंत्रितं ॥
जुहुयाद्ब्रह्माग्निरितिसंपातान्निनयेन्मणौ ॥ ७७ ॥ मणिंतुत्रिवृतेसूत्रेवासयेद्वासससासह ॥ न्यग्रोधशुंगयातत्रशुक्ललोहितवेष्टितं ॥ ७८ ॥
तंसावित्र्ययुतेनैवानुमंत्र्याथयथाविधि ॥ संपातैरयुतेनैवब्रह्मणेतिचसंस्तुतं ॥ ७९ ॥ उपरिष्टाच्चसावित्र्यातावदेवानुमंत्रणं ॥ सर्वैःस्वस्त्ययनै-

Digitization by eGangotri Funding MHRD Delhi

श्चैवजपेदभिहुतंमणिं ॥ ६८० ॥ शिरसाधारयेन्नारीयावत्सागर्भिणीसती ॥ तृतीयेगर्भमासेतुमणिमेतंसमासजेत् ॥ पुष्पवतीपरंनारीगौः
सवत्साचरेद्यथा ॥ ८१ ॥ बहुपानीययवसान्वत्सेनपिबतासह ॥ जातस्यतुकुमारस्यकंठेतंमणिमासजेत् ॥ ८२ ॥ आज्यशेषंपुरस्कृत्यतमभ्यज्यकुमारकं
॥ हुत्वास्वस्त्ययनैरेवस्त्रीपुमांसंप्रसूयते ॥ ८३ ॥ ऊर्ध्वंवर्षात्स्वस्त्ययनंपुनरेवविधीयते ॥ पुनःस्तनप्रदानार्थंश्रद्धासूक्तेन
पाययेत् ॥ ८४ ॥ मेधासूक्तेनचैवैतत्पिष्टंव्रीहिमयंकृतं ॥ मधुमिश्रंजातरूपंमेधावीतेनजायते ॥ ८५ ॥ शतंवर्षाणिजीवेतम्रियतेनपुरायुषः
॥ स्मृतमेवचतस्यस्यात्षण्मासाच्चततःपरं ॥ ८६ ॥ आज्यंसंस्कृत्यजुहुयादक्षीभ्यांतइतिद्विजः ॥ पाणिनातुघृताक्तेनमूर्धानंसंस्पृशेततः
॥ ८७ ॥ कर्णौनेत्रेचचुबुकंनासिकांचैवसंस्पृशेत् ॥ एवमेवजपेन्नित्यंयक्ष्मणोविप्रमुच्यते ॥ ८८ ॥ पूर्वोक्तेनैवकल्पेनयक्ष्मनाशनमाचरेत्
॥ होमैश्चैवजपैश्चैवयक्ष्मनाशनमाचरेत् ॥ ८९ ॥ अपेहीतिजपेत्सूक्तंशुचिर्दुःस्वप्ननाशनं ॥ देवाःकपोतइतितुकपोतस्यप्रवेशने
॥ ६९० ॥ सूक्तेनजुहुयादाज्यंयमदूतंहतंविदुः ॥ सपत्नघ्नंप्रयुंजीतऋषभंजपहोमयोः ॥ ९१ ॥ येनेदमितिवैनित्यंजपेतनियतव्रतः ॥
समाधिमनसस्तेनविंदतेनैवमुह्यति ॥ ९२ ॥ मयोभूर्वातइतितुगवांस्वस्त्ययनंजपेत् ॥ यवानांतुघृताक्तानांकारीषेग्नौसमाहितः ॥ ९३ ॥
जुहुयाद्गोष्ठमध्येतुदधिमध्वाज्यसंस्कृतान् ॥ राजानमभिषिच्येतपुष्येणश्रवणेनवा ॥ ९४ ॥ पौष्णसावित्रसौम्याश्विरोहिण्यामुत्तरासुच ॥
हुत्वाग्निंराजालिंगाभिःसावित्र्याप्रयतःशुचिः ॥ ९५ ॥ महाव्याहृतिभिश्चैवसंपाताभिहुतोभवेत् ॥ सर्वौषधिरसैःश्लक्ष्णैर्नदीनांसलिलेनच
॥ ९६ ॥ व्याघ्रचर्मण्यथासीनमासंद्यामभिषिच्यच ॥ तिष्ठन्प्रत्यङ्मुखोब्रूयाज्जयत्वंपृथिवीमिमां ॥ ९७ ॥ धर्मस्तेनिखिलोराजन्वर्धतांपालयप्रजाः
॥ वर्धत्वंचश्रियैपुष्ट्यैजयायाभ्युदयायच ॥ ९८ ॥ राजानःसंतुतेगोत्रेततोऽप्रतिरथंजपेत् ॥ वैयाघ्रंतुभवेच्चर्मसमिदौदुंबरीभवेत्

॥ ९९ ॥ त्रिरेनमभिषिच्यैवंदुंदुभीनभिमंत्रयेत् ॥ प्राच्यांत्वादिशिवसवोह्यभिषिंचंतुतेजसे ॥ ७०० ॥ दक्षिणस्यांत्वादिशिरुद्राअभिषिंचंतुवृद्धये ॥ प्रतीच्यांत्वादिश्यादित्याअभिषिंचंतुपुष्टये ॥ १ ॥ विश्वेदेवाउदीच्यांत्वाअभिषिंचंतुश्रेयसे ॥ अभिषिच्यचराजानमाशीर्भिरभिनंद्यच ॥ २ ॥ आत्वाहार्षमंतरेधीत्यथैनमभिमंत्रयेत् ॥ पतंगमितिवैनित्यंजपेदज्ञानभेदनं ॥ ३ ॥ मायाभेदनमेतद्धिसर्वामायाःप्रबाधते ॥ शांबरीमिंद्रजालांवामायामेतेनवारयेत् ॥ ४ ॥ अदृष्टानांचसत्वानांमायामेतेनबाधते ॥ त्यमूष्वितिस्वस्त्ययनंजपेतनियतव्रतः ॥ ५ ॥ पुष्पंदृष्ट्वातुयागर्भेनगृह्णीयाद्वयोन्विता ॥ विष्णुर्योनिंनेजमेषयोनिंस्पृष्ट्वाततोजपेत् ॥ ६ ॥ महित्रीणामवोस्त्वितिपथिस्वस्त्ययनेजपेत् ॥ प्राग्नयेथद्विषद्वेष्यंजपेद्विष्यस्यनिष्कृतिं ॥ ७ ॥ आयंगौःसार्पराज्ञीतुसर्पानेतेनबाधते ॥ पवित्राणांपवित्रंतुजपेदेवाघमर्षणं ॥ ८ ॥ आपःप्रविश्ययश्चैतत्त्रिःपठेतसमाहितः ॥ अथाश्वमेधावभृथस्तादृशंमनुरब्रवीत् ॥ ९ ॥ अशुच्येवनिमज्जित्वात्रिःपठेदघमर्षणं ॥ अथाश्वमेधावभृथाएवंतदृषिरब्रवीत् ॥ ७१० ॥ यथाश्वमेधःक्रतुराट्सर्वपापप्रणोदनः ॥ तथाघमर्षणंसूक्तंसर्वपापप्रणोदनं ॥ ११ ॥ सेनादारणमेतत्स्यान्नैर्हस्त्यमितिशौनकः ॥ मनसाध्येयमेतत्तुमन्यतेशौनकस्त्वृषिः ॥ १२ ॥ संसमिद्युवसेवृषन्सौभ्रातृकरणंमहत् ॥ ज्ञातिभेदेप्रयुंजीतनभिद्यंतेकदाचन ॥ १३ ॥ कृतेभेदेतुसंज्ञानमेतत्संधिकरंजपेत् ॥ नतत्रभेदोभूयःस्याद्यत्रैतत्सततंजपेत् ॥ १४ ॥ तच्छंयोरावृणीमहइतिस्वस्त्ययनंजपेत् ॥ महानाम्न्यःपरंब्रह्मशुक्रंज्योतिःसनातनं ॥ १५ ॥ सपत्नघ्न्यश्चपुण्याश्चपावमान्यःपराःस्मृताः ॥ वृष्टिकामोजपेच्चैताआपोहैताः(?)सनातनाः ॥ १६ ॥ ॐकारपूर्वाव्याहृतयोमधुच्छंदसआदितः ॥ सूक्तान्यंतेमहानाम्न्यःसंहितासाऽमृतास्मृता ॥ १७ ॥ अमृतत्वंययवेदाःपूर्वंसंहितयानया ॥ जपेदेनांशुचिर्नित्यममृतत्वंसगच्छति ॥ १८ ॥

अत्रैवतुजपेन्मध्येपितृसूक्तान्यनेकशः ॥ पित्र्यांतांसंहितांविद्यात्पितॄन्प्रीणातिचैतया ॥ १९ ॥ एवमेवसमाहृत्यवाससीसंहिताभवेत् ॥ रौद्र्यादित्यावैश्वदेवीयद्दैवत्यांचकामयेत् ॥ ७२० ॥ कुर्वीतवास्तुशमनंमध्येगोष्ठस्यधर्मवित् ॥ पुष्पैर्गंधैश्चमाल्यैश्चवानस्पत्यैस्तथौषधैः ॥ २१ ॥ वास्तुसर्वंप्रविकिरेत्सप्तधान्यैस्तथैवच ॥ वास्तोष्पतिंयजेच्चात्रपायसेनबृहस्पतिं ॥ २२ ॥ औदुंबरपलाशैश्चबलिंप्रतिदिशंहरेत् ॥ सूर्योवायुर्यमःपितरोवरुणोनिर्ऋतिस्तथा ॥ २३ ॥ सोमोभहेंद्रइत्येतादिक्षुदिग्देवताःस्मृताः ॥ दद्याद्दानंब्राह्मणेभ्यःशिवंभवतुवास्त्विति ॥ २४ ॥ प्रतिसंवत्सरंकार्यंगृहेवैगृहमेधिना ॥ यद्येवंसविधंनान्यदनुक्तमपिकिंचन ॥ २५ ॥ अग्निमिंद्रमथोवायुंसूर्यमन्याश्चदेवताः ॥ आराधयिषुर्योयोयामभिधत्तेतथात्रतां ॥ २६ ॥ अभिरूपेणसूक्तेनयथादिष्टंप्रयोजनं ॥ ऋषीणांमंत्रदृष्टेनप्रत्यक्षात्सिद्धिरिष्यते ॥ २७ ॥ सर्वत्रदक्षिणांदद्याद्धनंवाकर्मसिद्धये ॥ नत्वेवादक्षिणंकर्मकिंचिदस्तीतिशौनकः ॥ २८ ॥ शक्त्याहिपूर्णपात्रेणसंमिताप्यंततोभवेत् ॥ तस्मात्स्वल्पापिदातव्यादक्षिणाकर्मसिद्धये ॥ २९ ॥ ऋषभैकादशादद्याद्येनवातुष्यतेगुरुः ॥ धर्मज्ञेसत्यवादिनिब्रह्मदानंप्रदीयते ॥७३०॥ तदिदंपरमंब्रह्मगुह्यंपावनमद्भुतं ॥ नाप्रशांतायदातव्यंनापुत्रायातपस्विने ॥ नासंवत्सरोषितायनाशिष्यायाहितायच ॥ ३१ ॥ इत्यृग्विधानेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ नराणांभाग्यहीनानामृग्विधानमजानतां ॥ ऋग्वेदःकल्पवृक्षोयंफलंनैवप्रयच्छति ॥ ३२ ॥ रत्नगर्भइवावासऋग्वेदःप्रतिभातिमे ॥ ऋग्विधानप्रदीपेनविनानैवप्रकाशते ॥ ३३ ॥ रत्नाकरइवोदारऋग्वेदोत्यंतदुस्तरः ॥ ऋग्विधानंमहापूतं विनानैवफलप्रदं ॥ ३४ ॥ निधानंसर्वरत्नानामृग्वेदोब्रह्ममंदिरं ॥ ऋग्विधानविधानेनध्रुवमेतदवाप्यते ॥ ३५ ॥ ऋग्वेदःपठितोप्येषनृणांभवतिनिष्फलः ॥ ऋग्विधानंविनातस्मादध्येयंतत्प्रयत्नतः ॥ ३६ ॥ सूक्ततत्वार्थकथनमृग्विधानमवैतियः ॥ ऋग्वेदोजायतेतस्यप्रसा-

दोत्फुल्लमानसः ॥ ३७ ॥ आयुष्यंसंपदोमूलंसद्यःकल्मषनाशनं ॥ ऋग्विधानाभ्यनुष्ठानंशुभकीर्तिकरंपरं ॥ ३८ ॥ ऋग्विधानेनसंयुक्तमृग्वेदंवेत्तियोद्विजः ॥ धर्मार्थकाममोक्षाणामाश्रयःसभवेद्ध्रुवं ॥ ३९ ॥ वेदेषुप्रथमोवेदआयुर्वेदनिधिःप्रभुः ॥ ऋग्विधानसदाभ्यासादतीवपरितुष्यति ॥ ७४० ॥ शत्रुनाशमनस्तुष्टिसुहृज्जनसमागमान् ॥ ऋग्वेदःकुरुतेनित्यमृग्विधानेनतोषितः ॥ ४१ ॥ ऋग्वेदंवेत्तियःसांगमृग्विधानरतःसदा ॥ मनोरथादप्यधिकंभवेत्तस्यसमीहितं ॥ ४२ ॥ कुलेजन्मनिशीलेवाप्रज्ञायामुद्यमेपिवा ॥ ऋग्विधानपरिज्ञानाद्दुर्शंतिचरितार्थतां ॥ ४३ ॥ तुष्यंतिदेवताःसर्वाःसंपद्यंतेविभूतयः ॥ दुराधयःप्रणश्यंतिनित्यमृग्विधिपाठिनां ॥ ७४४ ॥ नमःशौनकायनमःशौनकाय ॥ इत्यृग्विधानफलश्रुतिः ॥ ॥ ऋग्विधानंसमाप्तं ॥

ऋग्विधानंसमाप्तं ॥

॥ अथप्रथमाष्टकप्रारंभः ॥

॥ अथसर्वानुक्रमपरिभाषा ॥

श्रीगणेशायनमः ॥ श्रीवेदपुरुषायनमः ॥ अथऋग्वेदाम्नायेशाकलकेंसूक्तप्रतीकऋक्संख्यांऋषिदैवतच्छंदांस्यनुक्रमिष्यामौयथोपदेशंनह्येतज्ज्ञानमृतेंश्रौतस्मार्तकर्मप्रसिद्धिर्मंत्राणांब्राह्मणार्षेयंच्छंदोदैवतविद्यांजनाध्यापनाभ्यांश्रेयोधिगच्छंत्येताभ्यामेवानेवंविदौयातयामानिछंदांसिभवंतिं स्थाणुंवर्च्छतिगर्तेंवापात्यतेप्रमीयतेवां पापीयान्भवतीतिविज्ञायते ॥ १ ॥ अथऋषयःशतर्चिंनआद्येमंडलेंत्येक्षुद्रसूक्तामहासूक्तामध्यमेषुमाध्यमाःक्वचित्कथंचिदविशेषितंब्रह्मऋषिमस्त्रियमनुक्तगोत्रंमांगिरसंविद्याद्यस्यवाक्यंसऋषिर्यातेनोच्यतेसादेवतायदक्षरपरिमाणंतच्छंदोऽर्थेप्सवऋषयोदेवताश्छंदोभिरभ्यधावन्तिस्रएवदेवताःक्षित्यंतरिक्षद्युस्थाना अग्निर्वायुःसूर्यइत्येवंव्याहृतयःप्रोक्ताव्यस्ताःसमस्तानांप्रजापतिं (रार्षंतुप्रजापति) रोंकारःसर्वदैवत्यःपारमेष्ठ्योवाब्राह्मोदैवआध्यात्मिकस्तत्तत्स्थानाअन्यास्तद्विभूतयःकर्मपृथक्त्वाद्धिपृथगभिधानस्तुतयोभवंत्येकैववामहानात्मादेवतांससूर्यइत्याचक्षते सहिसर्वभूतात्मातदुक्तमृषिणासूर्यआत्माजगतस्तस्थुषश्चेतितद्विभूतयोऽन्यादेवतास्तदप्येतदृचोक्तमिंद्रंमित्रंवरुणमग्निमाहुरित्यथाभिधानंत्वनुक्रमिष्यामः प्रायेणैंद्रेमरुतौराज्ञांचदानस्तुतयः ॥ २ ॥ अथच्छंदांसिगायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुप्जगत्यतिजगतीशक्वर्यतिशक्वर्यष्ट्यत्यष्टीधृत्यतिधृतयश्चतुर्विंशत्यक्षरादीनिचतुरुत्तराण्यूनाधिकेनैकेननिचृद्भुरिजौद्वाभ्यांविराट्स्वराजौपादपू

रणार्थंतु॑क्षैप्रसंयोगैकाक्षरीभावान्व्यूहे॑दाद्यंतुसप्तवर्गे पादविशेषात्संज्ञाविशेषास्ताननुक्रामंतएवोदाहरिष्यामो॑विराड्रूपाविराट्स्थानाश्च॑वहूनाअपित्रिष्टुभएवेत्युद्देश॑स्तत्रदशैकादशद्वादशाक्षराणा॑ वैराजत्रैष्टुभजागताइतिसंज्ञा॑अनादेशेष्टाक्षराःपादा॑श्चतुष्पदाश्चर्चः ॥ ३ ॥ प्रथमंछंदस्त्रिपदागायत्रींपंचकाश्चत्वार॑ःषट्कश्चैकश्चतुर्थ॑श्चतुष्कोवापदपंक्ति॑ःषट्सप्तैकादशाउष्णिग्गर्भा॑स्त्रयःसप्तकाःपादनिचृ॑न्मध्यमःषट्कश्चेदतिनिचृ॑द्दशकश्चेद्यवमध्या॑ यस्यास्तुषट्कसप्तकाष्टकाःसावर्धमाना॑विपरीताप्रतिष्ठा॑द्वौषट्कौसप्तकश्चह्रसीयसी ॥ ४ ॥ द्वितीयमुष्णिक्त्रिपदां॑त्यौद्वादशकआद्यश्चेत्॑पुरउष्णिङ्मध्यमश्चेत्॑ककुप्त्रैष्टुभजागतचतुष्का॑ःककुब्न्यंकुशिरैकादशिनौ॑ःपरःषट्कस्तनुशिरा॑ मध्येचेत्पिपीलिकमध्या॑आद्यःपंचकस्त्रयोष्टकाअनुष्टुव्गर्भा॑चतुःसप्तकोष्णिगेव ॥ ५ ॥ तृतीयमनुष्टुप्पंचपंचका॑ःषट्कश्चैकोमहापदपंक्ति॑र्जागता॑वष्टकश्चकृति॑र्मध्येचेदष्टकःपिपीलिकमध्या॑नवकयोर्मध्येजागत॑ः काविराण्नववैराज॑त्रयोदशैर्नष्टरूपा॑दशकास्त्रयोविराळेकादशकावा ॥६॥ चतुर्थंबृहतींतृतीयोद्वादशकआद्यश्चेत्पुरस्ताद्बृहतीं॑द्वितीयश्चेन्न्यंकुसारिण्युरोबृहतीवा॑स्कंधोग्रीवीवांत्यश्चेदुपरिष्टा॑द्बृहत्यष्टिनोर्मध्येंदशकौविष्टारबृहतीं॑त्रिजागतोर्ध्वबृहतींत्रयोदशिनोर्मध्येष्टकःपिपीलिकमध्या॑नवकाश्चेकादश्यष्टिनोविषमपदा॑चतुर्नवकाबृहत्येव ॥७॥ पंचमंपंक्तिःपंचपदार्थचतुष्पदा॑विराड्दशकैरयुजौजागतौसतोबृहतीयुजौचेद्विपरीता॑द्यौचेत्प्रस्तारपंक्ति॑रंत्यौचेदास्तारपंक्ति॑राद्यांत्यौचेत्संस्तारपंक्ति॑र्मध्यमौचेद्विष्टारपंक्तिः ॥ ८ ॥ षष्ठंत्रिष्टुप्त्रैष्टु

भपदांद्वौतुजागतौयस्याःसाजागतैंजगतींत्रिष्टुभंत्रिष्टुब्वैराजौजागतौचांभिसारिणीनवकौंवैराजस्त्रैष्टुभश्चंद्वौवावैराजौ
नवकस्त्रैष्टुभश्चंविराट्स्थानैकादशिनस्त्रयोष्टकश्चंविराड्रूपाद्वादशिनंस्त्रयोष्टकश्चज्योतिष्मतींयतोष्टकस्ततोज्योतिंश्चत्वा
रोष्टकाजागतश्चमहाबृहतींमध्येचेद्यवमध्यांद्यौदशकावष्टकास्त्रयंःपंक्त्युत्तराविराट्पूर्वांवा ॥९॥ सप्तमंजगतींजागतप
दाष्टिनस्त्रयंःस्वौचद्वौमहासतोबृहंत्यष्टकौसप्तकःषट्कौदशकोनवकश्चंषळष्टकावामहापंक्तिः ॥ १० ॥ अथप्रगाथाबृह
तींसतोबृहत्यौबार्हतंःककुप्चेत्पूर्वांकाकुभौंमहाबृहतीमहासतोबृहत्यौंमहाबार्हतोबृहतीविपरीतेंविपरीतोत्तरोनुष्टुब्ंगा
यत्र्यौचानुष्टुभोंऽनुष्टुम्मुखास्तृचाइत्युक्तेः ॥ ११ ॥ सूक्तसंख्यानुवर्ततंआन्यस्याःसूक्तसंख्यायांऋषिश्चान्यस्मादृषेरवा
विशिष्टंस्तुहिहवैतच्छब्दविशिष्टांन्यृषिदैवतच्छंदांसिंद्वित्रिचतुःपंचषट्सूक्तभांजिं यथासंख्यमनिरुक्तासंख्याविंशतिं
रनादेशेत्विंद्रोदेवतांत्रिष्टुप्छंदःप्रगाथाबार्हताविंशिकांद्विपदाविराजस्तदर्धमेकपदांद्विर्द्विपदास्त्वृचःसमामनंत्ययुक्ष्वं
त्याद्विपदैवंमंडलादिष्वाग्नेयमैंद्रांत्रिष्टुवंतस्यसूक्तस्यंशिष्टाजगत्यआदौगायत्रंप्राग्घिरण्यस्तूपात् ॥ १२ ॥ (गोधाघो
षाविश्ववारापालोपनिषन्निषत् । ब्रह्मजायाजुहूर्नामागस्त्यस्यस्वसादितिः ॥ इंद्राणीचेंद्रमाताचसरमारोमशोर्वशी ।
लोपामुद्राचनद्यश्चयमीनारीचशश्वती ॥ श्रीर्लाक्षासार्पराज्ञीवाक्श्रद्धामेधाचदक्षिणा । रात्रीसूर्याचसावित्रीब्रह्मवादि
न्यईरिताः ॥१३॥ पादाअतिजगत्यांतुत्रयोद्वादशकाःपरौ । अष्टकौशक्वरीपादाःसप्तैवाष्टाक्षराःस्मृताः ॥ अतिशाक्वर

पादौद्वावादितःषोळशाक्षरौ। जागतश्चाष्टकश्चाष्टिपादाःषोळशकास्त्रयः ॥ अष्टकौचात्यष्टिपादौजागतौचाष्टकास्त्रयः। जागतश्चाष्टकश्चाथधृतिपादौतुजागतौ ॥ पादास्त्रयोष्टकाश्चाथषोळशाक्षरएवच । अष्टकश्चाथातिधृतौद्वौपादौजागतौततः ॥ त्रयोष्टकाजागतश्चतथाष्टाक्षरकावपि। परःसप्तकपादास्तुप्रसंगात्स्वयमीरिताः) ॥१४॥ इतिपरिभाषा ॥

अग्निंनवमधुच्छंदावैश्वामित्रोवायोवायव्यैंद्रवायवंमैत्रावरुणास्तृचाअश्विनाद्वादशाश्विनैंद्रवैश्वदेवसारस्वतास्तृचाःसप्तैताःप्रउगदेवताःसुरूपकृत्नुंदशैंद्रंमातुयुंजंत्यादहेत्येताःषण्मारुत्योवीळुचिदिंद्रेणेत्यैंद्र्यौचैंद्रमिदेंद्रसानसिमिंद्रेहिगायंतिद्वादशानुष्टुभंत्विंद्रमष्टौजेतामाधुच्छंदसोग्निंद्वादशमेधातिथिःकाण्वआग्नेयमग्निनेतिपादोव्यग्निदैवतोनिर्मथ्याहवनीयाभ्यांसुसमिद्धइतीध्मःसमिद्धोवाग्निस्तनूनपान्नराशंसइळोबर्हिर्देवीर्द्वारउषासानक्तादैव्यौहोतारौप्रचेतसौतिस्रोदेव्यःसरस्वतीळाभारत्यस्त्वष्टावनस्पतिःस्वाहाकृतयइतिप्रत्यृचंदेवताएतदाप्रीसूक्तमेतेनान्यान्युक्तदेवतान्येकादशकानित्वंनाराशंसान्याप्रशब्दोक्तानित्वंतनूनपांत्यैभिर्वैश्वदेवमिंद्रसोममृतव्यंतत्रैंद्रीमारुतीत्वाष्ट्र्याग्नेय्यैंद्रीमैत्रावरुणीचतस्रोद्रविणोदसआश्विन्याग्नेयृतुदेवताःसर्वत्रात्वानवैंद्रावरुणयोरैंद्रावरुणंयुवाकुपादनिचृतौ(इंद्रोह्रसीयसीवा)सोमानमितिपंचब्राह्मणस्पत्यांश्चतुर्थ्यामिंद्रश्चसोमश्चपंचम्यांदक्षिणाचान्याःसादसस्पत्यानाराशंसीवांत्याप्रतित्यमाग्निमारुतं ॥ १ ॥ ॥ ॥

॥ श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ श्रीवेदपुरुषायनमः ॥

हरिःओ३म् । (मं. १ अ. १ सू. १) अ॒ग्निमी॑ळेपु॒रोहि॑तंय॒ज्ञस्य॑दे॒वमृ॒त्विजं॑ । होता॑रंरत्न॒धात॑मं ॥ अ॒ग्निःपूर्वे॑भि॒र्ऋषि॑भि॒रीड्यो॒नूत॑नैरु॒त । सदे॒वाँऽएहव॑क्षति ॥ अ॒ग्निना॑र॒यिम॑श्नव॒त्पोष॑मे॒वदि॒वेदि॑वे । य॒शसं॑वी॒रव॑त्तमं ॥ अग्ने॒यंय॒ज्ञम॑ध्व॒रंवि॒श्वतः॑परि॒भूरसि॑ । सइद्दे॒वेषु॑गच्छति ॥ अ॒ग्निर्होता॑क॒विक्र॑तुःस॒त्यश्चि॒त्रश्र॑वस्तमः । दे॒वोदे॒वेभि॒राग॑मत् ॥ १ ॥ यद॒ंगदा॒शुषे॒त्वमग्ने॑भ॒द्रंक॑रि॒ष्यसि॑ । तवेत्तत्स॒त्यमं॑गिरः ॥ उप॑त्वाग्नेदि॒वेदि॑वे॒दोषा॑वस्तर्धि॒याव॒यं । नमो॒भरं॑त॒ऽएम॑सि ॥ राजं॑तमध्व॒राणां॑गो॒पामृ॒तस्य॒दीदि॑विं । वर्ध॑मानं॒स्वेदमे॑ ॥ सनः॑पि॒तेव॑सू॒नवेऽग्ने॑सूपाय॒नोभ॑व । सच॑स्वानः॒स्व॒स्तये॑ ॥२॥ (१।१।२) वाय॒वाया॑हिदर्शते॒मेसोमा॒ऽअरं॑कृताः । तेषां॑पाहिश्रु॒धीहवं॑ ॥ वाय॑उ॒क्थेभि॑र्जरंते॒त्वामच्छा॑जरि॒तारः॑ । सु॒तसो॑माऽअह॒र्विदः॑ ॥ वायो॒तव॑प्रपृंच॒तीधेना॑जिगातिदा॒शुषे॑ । उ॒रू॒चीसोम॑पीतये ॥ इंद्र॑वायूइ॒मेसु॒ताऽउप॒प्रयो॑भि॒राग॑तं । इंद॑वोवामु॒शंति॒हि+ ॥ वाय॒विंद्र॑श्चचेतथःसु॒तानां॑वाजिनीवसू । तावाया॑त॒मुप॑द्र॒वत्+ ॥ ३ ॥ वाय॒विंद्र॑श्चसु॒न्वतऽआया॑त॒मुप॑निष्कृ॒तं । म॒क्ष्वी१॒त्थाधि॒यान॑रा ॥ मि॒त्रंहु॑वेपू॒तद॑क्षं॒वरु॑णंचरि॒शाद॑सं । धियं॑घृ॒ताचीं॒साधं॑ता ॥ ऋ॒तेन॑मित्रावरुणावृ

(१।१।१) अग्निमीळइतिनवर्चस्यसूक्तस्यवैश्वामित्रोमधुच्छंदाअग्निर्गायत्री । (१।१।२) वायवायाहीतिनवर्चस्यसूक्तस्यमधुच्छंदाः आद्यतृचस्यवायुःद्वितीयतृचस्यैंद्रवायूतृतीयतृचस्यमित्रावरुणौगायत्री ।

तावृधावृतस्पृशा । क्रतुंबृहंतमाशाथे ॥ कवीनोमित्रावरुणातुविजाताऽउरुक्षया । दक्षंदधातेऽअपसं ॥ ४ ॥ (१।१।३) अश्विनायज्वरीरिषोद्रवत्पाणीशुभस्पती । पुरुभुजाचनस्यतं ॥ अश्विनापुरुदंससानराशवीरयाधिया । धिष्ण्यावनतंगिरः ॥ दस्रायुवाकवःसुतानासत्यावृक्तवर्हिषः । आयातंरुद्रवर्तनी ॥ इंद्रायाहिचित्रभानोसुताऽइमेत्वायवः । अण्वीभिस्तनापूतासः ॥ इंद्रायाहिधियेषितोविप्रजूतःसुतावतः । उपब्रह्माणिवाघतः ॥ इंद्रायाहितूतुजानऽउपब्रह्माणिहरिवः । सुतेदधिष्वनश्चनः ॥ ५ ॥ ओमासश्चर्षणीधृतोविश्वेदेवासऽआगत । दाश्वांसोदाशुषःसुतं+ ॥ विश्वेदेवासोऽअप्तुरःसुतमागंततूर्णयः । उस्राऽइवस्वसराणि ॥ विश्वेदेवासोऽअस्रिधऽएहिमायासोऽअद्रुहः । मेधंजुषंतवह्नयः । पावकानःसरस्वतीवाजेभिर्वाजिनीवती । यज्ञंवष्टुधियावसुः ॥ चोदयित्रीसूनृतानांचेतंतीसुमतीनां । यज्ञंदधेसरस्वती ॥ महोऽअर्णःसरस्वतीप्रचेतयतिकेतुना । धियोविश्वाविराजति ॥६॥(१।२।१) सुरूपकृत्नुमूतयेसुदुघामिवगोदुहे । जुहूमसिद्यविद्यवि ॥ उपनःसवनागहिसोमस्यसोमपाःपिब । गोदाऽइद्रेवतोमदः ॥ अथातेऽअंतमानांविद्यामसुमतीनां । मानोऽअतिख्यऽआगहि ॥ परेहिविग्रमस्तृतमिंद्रंपृच्छाविपश्चितं । यस्तेसखिभ्यऽआवरं ॥ उतब्रु

(१।१।३) अश्विनायज्वरीरितिद्वादशर्चस्यसूक्तस्यवैश्वामित्रोमधुच्छंदाःआद्यतृचस्याश्विनौद्वितीयतृचस्येंद्रःतृतीयतृचस्यविश्वेदेवाः चतुर्थतृचस्यसरस्वतीगायत्री । (१।२।१) सुरूपकृत्नुमितिदशर्चस्यसूक्तस्यवैश्वामित्रोमधुच्छंदाइंद्रोगायत्री ।

वंतुनोनिदोनिरन्यतंश्चिदारत । दधानाइंद्रइहुवः ॥ ७ ॥ उतनंःसुभगाँऽअरिवोंचेयुंर्दस्मकृष्टयः । स्यामेदिंद्रंस्यश
मैंणि ॥ एमाशुमाशवेंभरयज्ञश्रियंनृमादनं । पतयन्मंदयत्संखं ॥ अस्यपीत्वाशंतक्रतोघनोवृत्राणांमभवः । प्रावो
वाजेंषुवाजिनं ॥ तंत्वावाजेंषुवाजिनंवाजयांमःशतक्रतो । धनानामिंद्रसातयें ॥ योरायो३वनिंर्महान्त्सुंपारःसुंन्वतः
सखां । तस्माऽइंद्रांयगायत ॥८॥(१।२।२) आत्वेतानिषींदतेंद्रंमभिप्रगांयत । सखांयःस्तोमंवाहसः ॥ पुरूतमंपुरूणामी
शांनंवार्यींणां । इंद्रंसोमेसचांसुते+ ॥ सघांनोयोगऽआभुंवत्सरायेसपुरंध्यां । गमद्वाजेंभिरासनंः ॥ यस्यंसंस्थेनवृण्वतेह
रींसमत्सुशत्रंवः । तस्माऽइंद्रांयगायत ॥ सुतपाव्नेंसुताऽइमेशुचंयोयंतिवीतयें । सोमांसोदध्यांशिरः ॥ ९ ॥ त्वंसु
तस्यंपीतयेंसद्योवृद्धोऽअंजायथाः । इंद्रज्यैष्ठ्यांयसुक्रतो ॥ आत्वांविशंत्वाशवःसोमांसऽइंद्रगिर्वणः । शंतेंसंतुप्रचैत
से ॥ त्वांस्तोमांऽअवीवृधन्त्वामुक्थाशंतक्रतो । त्वांवंर्धंतुनोगिरः ॥ अक्षितोतिःसनेदिमंवाजमिंद्रःसहस्रिणं । यस्मि
न्विश्वांनिपौंस्यां ॥ मानोमर्तांऽअभिद्रुंहन्तनूनांमिंद्रगिर्वणः । ईशांनोयवयावधं+ ॥ १० ॥(१।२।३) युंजंतिंब्रध्नमंरुषं
चरंतंपरिंतस्थुषंः । रोचंतेरोचनादिवि+ ॥ युंजंत्यंस्यकाम्याहरीविपंक्षसारथें । शोणांधृष्णूनृवाहंसा ॥ केतुंकृण्वन्नंके

(१।२।२) आत्वेतेतिदशर्चस्यसूक्तस्यमधुच्छंदाइंद्रोगायत्री । (१।२।३) युंजंतीतिदशर्चस्यसूक्तस्यमधुच्छंदाःआद्यानांतिसृणामिं
न्द्रःततःषण्णांमरुतःवीलुचिदिंद्रेणेतिद्वयोरिंद्रश्चदशम्याइंद्रोगायत्री ।

तवेपेशोमर्याऽअपेशसे । समुषद्भिरजायथाः ॥ आदहस्वधामनुपुनर्गर्भत्वमेरिरे । दधानानामयज्ञियं ॥ वीळुचिदा
रुजत्नुभिर्गुहाचिदिंद्रवह्निभिः । अविंदऽउस्रियाऽअनु ॥ ११ ॥ देवयंतोयथामतिमच्छाविदद्वसुंगिरः । महामनू
षतश्रुतं+ ॥ इंद्रेणसंहिदृक्षसेसंजग्मानोऽअबिभ्युषा । मंदूसमानवर्चसा ॥ अनवद्यैरभिद्युभिर्मखःसहस्वदर्चति । ग
णैरिंद्रस्यकाम्यैः ॥ अतःपरिज्मन्नागहिदिवोवारोचनादधि । समस्मिन्नृंजतेगिरः ॥ इतोवासातिमीमहेदिवोवापा
र्थिवादधि । इंद्रंमहोवारजसः ॥ १२ ॥ (१।२।४) इंद्रमिद्गाथिनोबृहदिंद्रमर्केभिरर्किणः । इंद्रंवाणीरनूषत ॥ इंद्रऽइद्ध
र्योःसचासंमिश्लऽआवचोयुजा । इंद्रोवज्रीहिरण्ययः ॥ इंद्रोदीर्घायचक्षसऽआसूर्यंरोहयद्दिवि । विगोभिरद्रिमैरय
त् ॥ इंद्रवाजेषुनोवसहस्रप्रधनेषुच । उग्रऽउग्राभिरूतिभिः ॥ इंद्रंवयंमहाधनऽइंद्रमर्भेहवामहे । युजंवृत्रेषुवज्रिणं
॥ १३ ॥ सनोवृषन्नमुंचरुंसत्रादावन्नपावृधि । अस्मभ्यमप्रतिष्कुतः ॥ तुंजेतुंजेयऽउत्तरेस्तोमाऽइंद्रस्यवज्रिणः । न
विंधेऽअस्यसुष्टुतिं+ ॥ वृषायूथेववंसगःकृष्टीरियर्त्योजसा । ईशानोऽअप्रतिष्कुतः ॥ यऽएकश्चर्षणीनांवसूनामिरज्य
ति । इंद्रःपंचक्षितीनां+ ॥ इंद्रंवोविश्वतस्परिहवामहेजनेभ्यः । अस्माकमस्तुकेवलः ॥ १४ ॥ (१।३।१) एंद्रसानसिं ॥५॥
रयिंसजित्वानंसदासहं । वर्षिष्ठमूतयेभर ॥ नियेनमुष्टिहत्ययानिवृत्रारुणधामहै । त्वोतासोन्यर्वता ॥ इंद्रत्वोतास

(१।२।४) इंद्रमिदितिदशर्चस्यसूक्तस्यमधुच्छंदाइंद्रोगायत्री । (१।३।१) एंद्रेतिदशर्चस्यसूक्तस्यमधुच्छंदाइंद्रोगायत्री ।

ऽआवयंवज्रंघनाददीमहि । जयेमसंयुधिस्पृधः ॥ वयंशूरेभिरस्तृभिरिंद्रत्वयायुजावयं । सासह्यामपृतन्यतः+ ॥ महाँऽइंद्रःपरश्चनुमहित्वमस्तुवज्रिणे । द्यौर्नप्रथिनाशवः ॥ १५ ॥ समोहेवायऽआशंतनरःस्तोकस्यसनितौ । विप्रासोवाधियायवः ॥ यःकुक्षिःसोमपातमःसमुद्रऽइवपिन्वते । उर्वीरापोनकाकुदः ॥ एवाह्यस्यसूनृताविरप्शीगोमतीमही । पक्वाशाखानदाशुषे ॥ एवाहितेविभूतयऽऊतयऽइंद्रमावते । सद्यश्चित्संतिदाशुषे ॥ एवाह्यस्यकाम्यास्तोमऽउक्थंचशंस्या । इंद्रायसोमपीतये ॥ १६ ॥ (१।३।२) इंद्रेहिमत्स्यंधसोविश्वेभिःसोमपर्वभिः । महाँऽअभिष्टिरोजसा ॥ एमेनंसृजतासुतेमंदिमिंद्रायमंदिने । चक्रिंविश्वानिचक्रये ॥ मत्स्वासुशिप्रमंदिभिःस्तोमेभिर्विश्वचर्षणे । सचैषुसवनेष्वा+ ॥ असृग्रमिंद्रतेगिरःप्रतित्वामुदहासत । अजोषावृषभंपतिं ॥ संचोदयचित्रमर्वाग्राधऽइंद्रवरेण्यं । असदित्तेविभुप्रभु+ ॥ १७ ॥ अस्मान्त्सुतत्रचोदयेंद्ररायेरभस्वतः । तुविद्युम्नयशस्वतः ॥ संगोमदिंद्रवाजवदस्मेपृथुश्रवोबृहत् । विश्वायुर्धेह्यक्षितं ॥ अस्मेधेहिश्रवोबृहद्द्युम्नंसहस्रसातमं । इंद्रतारथिनीरिषः ॥ वसोरिंद्रंवसुपतिंगीर्भिर्गृणंतऋग्मियँ । होमगंतारमूतये ॥ सुतेसुतेन्योकसेबृहद्बृहतऽएदरिः । इंद्रायशूषमर्चति ॥ १८ ॥ (१।३।३) गायँतित्वाऽगायत्रिणोर्चंत्यर्कमर्किणः । ब्रह्माणस्त्वाशतक्रतऽउद्वंशमिवयेमिरे ॥ यत्सानोःसानुमारुहद्भूर्यस्पष्टकर्त्वं । तदिंद्रो

(१।३।२) इंद्रेहीतिदशर्चस्यसूक्तस्यमधुच्छंदाइंद्रोगायत्री । (१।३।३) गायंतीतिद्वादशर्चस्यसूक्तस्यमधुच्छंदाइंद्रोऽनुष्टुप् ।

ऽअर्थं॑चेततियू॒थेनं॑वृ॒ष्णिरें॑जति ॥ युक्ष्वाहिं॑के॒शिना॒हरी॒वृष॑णाकक्ष्य॒प्रा । अथा॑नऽइंद्रसोमपागि॒रामुपं॑श्रुतिं॑चर ॥ एहि॒
स्तोमाँ॑ऽअ॒भिस्व॑रा॒भिगृं॑णी॒ह्यारुं॑व । ब्रह्मं॑चनोवसो॒सचें॑द्रंय॒ज्ञंचं॑वर्धय ॥ उ॒क्थमिंद्रा॑य॒शंस्यं॒वर्धं॑नंपुरुनि॒ष्षिधें॑ । श॒क्रोय॑
था॑सुतेषुं॑णोरा॒रणं॑त्स॒ख्येषुं॑च ॥ तमित्सं॑खि॒त्वईं॑महे॒तंरा॒येतंसु॒वीर्यें॑ । सश॒क्रऽउ॒तनंः॑शक॒दिंद्रो॒वसु॒दयं॑मानः ॥ १९ ॥
सुवि॒वृतं॑सुनि॒रज॒मिंद्र॒त्वादा॑त॒मिद्यशंः॑ । गवा॒मप॑व्र॒जंवृं॑धिकृणु॒ष्वराधों॑ऽअद्रिवः ॥ न॒हित्वा॒रोदं॑सीऽउ॒भेऽऋं॑घा॒यमा॑ण॒
मिन्वं॑तः । जेष॒ःस्व॑र्वतीर॒पःसंगाऽअ॒स्मभ्यं॑धूनुहि ॥ आश्रुं॑त्कर्णश्रुधीहव॒ंनूचिं॑द्दधिष्वमे॒गिरंः॑ । इंद्र॒स्तोमं॑मि॒मंमम॑कृ॒
ष्वायुजश्चि॒दंत॑रं ॥ वि॒द्माहित्वा॒वृषं॑तमं॒वाजें॑षुहव॒नश्रुतं॑ । वृषं॑तमस्यहूमह॒ऊतिं॑सहस्र॒सातं॑मां ॥ आतूनं॑ऽइंद्रकौशिकमं॑
दसा॒नःसुतंपिं॑ब । नव्य॒मायुःप्रसू॑तिरकृ॒धीसं॑हस्र॒सामृषिं॑ ॥ परिं॑त्वागिर्वणो॒गिरं॑इ॒माभं॑वंतुवि॒श्वतः॑ । वृद्धायु॒मनु॒वृद्धं॑
यो॒जुष्टां॑भवंतु॒जुष्टं॑यः ॥ २० ॥ (१।३।४) इंद्रं॒विश्वां॑ऽअवीवृधन्त्समु॒द्रव्यं॑चस॒ंगिरंः॑ । र॒थीतं॑मंर॒थीनां॒वाजा॑नां॒सत्प॑तिं॒प
तिं॑ ॥ स॒ख्येतं॑ऽइंद्रवा॒जिनो॒माभें॑मशवसस्पते । त्वाम॒भिप्रणों॑नुमो॒जेता॑र॒मप॑राजितं ॥ पूर्वीरिंद्रं॑स्यरा॒तयो॒नविदं॑स्यंत्यू
तयः॑ । यदी॒वाजं॑स्य॒गोमं॑तःस्तो॒तृभ्यो॒मंहं॑तेम॒घं+ ॥ पु॒रांभि॒दुर्युवा॑क॒विरमि॑तौजाऽअजायत । इंद्रो॒विश्वं॑स्य॒कर्मं॑णोध॒र्ता ॥ ६ ॥
व॒ज्रीपुं॑रुष्टुतः+ ॥ त्वंव॒लस्य॒गोम॒तोपा॑वरद्रिवो॒बिलं॑ । त्वांदे॒वाऽअबिं॑भ्युषस्तु॒ज्यमा॑नासऽआविषुः ॥ तवा॒हंशूर॒राति

(१।३।४) इंद्रंविश्वाइत्यष्टर्चस्यसूक्तस्यजेतामाधुच्छंदसइंद्रोनुष्टुप् ।

भिःप्रत्यायंसिंधुमावदन् । उपातिष्ठंतगिर्वणोविदुष्टेतस्यकारवः ॥ मायाभिरिंद्रमायिनंत्वंशुष्णमवातिरः । विदुष्टेतस्यमेधिरास्तेषांश्रवांस्युत्तिर ॥ इंद्रमीशानमोजसाभिस्तोमाऽअनूषत । सहस्रंयस्यरातयऽउतवासंतिभूयसीः ॥ २१ ॥ (१।४।१) अग्निंदूतंवृणीमहेहोतारंविश्ववेदसं । अस्ययज्ञस्यसुक्रतुं ॥ अग्निमग्निंहवीमभिःसदाहवंतविश्पतिम् । हव्यवाहंपुरुप्रियं+ ॥ अग्नेदेवाँऽइहावहजज्ञानोवृक्तबर्हिषे । असिहोतानऽईड्यः ॥ ताँऽउशतोविबोधययदग्नेयासिदूत्यं । देवैरासत्सिबर्हिषि ॥ घृताहवनदीदिवःप्रतिष्मरिषतोदह । अग्नेत्वंरक्षस्विनः ॥ अग्निनाग्निःसमिध्यतेकविर्गृहपतिर्युवा । हव्यवाड्जुह्वास्यः ॥ २२॥ कविमग्निमुपस्तुहिसत्यधर्माणमध्वरे । देवममीवचातनं ॥ यस्त्वामग्नेहविष्पतिर्दूतंदेवसपर्यति । तस्यस्मप्राविताभव ॥ योऽअग्निंदेववीतयेहविष्माँऽआविवासति । तस्मैपावकमृळय ॥ सनः पावकदीदिवोग्नेदेवाँऽइहावह । उपयज्ञंहविश्चनः ॥ सनःस्तवानऽआभरगायत्रेणनवीयसा । रयिंवीरवतीमिषं ॥ अग्ने शुक्रेणशोचिषाविश्वाभिर्देवहूतिभिः । इमंस्तोमंजुषस्वनः ॥ २३ ॥ (१।४।२) सुसमिद्धोनआवहदेवाँऽअग्नेहविष्मं

(१।४।१) अग्निंदूतमितिद्वादशर्चस्यसूक्तस्यकाण्वोमेधातिथिरग्निर्गायत्रीअग्निनाग्निरित्यस्यानिर्मथ्याहवनीयावग्नीदेवते । (१।४।२) सुसमिद्धइतिद्वादशर्चस्यसूक्तस्यमेधातिथिःप्रथमायाइध्मः (समिद्धोग्निर्वा) द्वितीयायास्तनूनपात्तृतीयायानराशंसःचतुर्थ्याइळःपंचम्याबर्हिः षष्ठ्यादेव्योद्वारःसप्तम्याउषासानक्ताअष्टम्यादैव्यौहोतारौ (प्रचेतसावितिसायणः)नवम्याःसरस्वतीळाभारत्यःदशम्यास्त्वष्टाएकादश्यावनस्प

ते । होतःपावकयक्षिच ॥ मधुमंतंतनूनपाद्यज्ञंदेवेषुनःकवे । अद्याकृणुहिवीतये ॥ नराशंसमिहप्रियमस्मिन्यज्ञऽउपह्वये । मधुजिह्वंहविष्कृतं ॥ अग्नेसुखतमेरथेदेवाँऽईळितऽआवह । असिहोतामनुर्हितः ॥ स्तृणीतबर्हिरानुषग्घृतपृष्ठंमनीषिणः । यत्रामृतस्यचक्षणं ॥ विश्रयंतामृतावृधोद्वारोदेवीरसश्चतः । अद्यानूनंचयष्टवे ॥ २४ ॥ नक्तोषासासुपेशसास्मिन्यज्ञऽउपह्वये । इदंनोबर्हिरासदे ॥ तासुजिह्वाऽउपह्वयेहोतारादैव्याकवी । यज्ञंनोयक्षतामिमम्+ ॥ इळासरस्वतीमहीतिस्रोदेवीर्मयोभुवः । बर्हिःसीदंत्वस्रिधः ॥ इहत्वष्टारमग्रियंविश्वरूपमुपह्वये । अस्माकमस्तुकेवलः ॥ अवसृजावनस्पतेदेवदेवेभ्योहविः । प्रदातुरस्तुचेतनं ॥ स्वाहायज्ञंकृणोतनेंद्राययज्वनोगृहे । तत्रदेवाँऽउपह्वये ॥ २५ ॥ (१।४।३) ऐभिरग्नेदुवोगिरोविश्वेभिःसोमपीतये । देवेभिर्याहियक्षिंच ॥ आत्वाकण्वाऽअहूषतगृणंतिविप्रतेधियः । देवेभिरग्नऽआगहि ॥ इंद्रवायूबृहस्पतिंमित्राग्निंपूषणंभगं । आदित्यान्मारुतंगणं+ ॥ प्रवोभ्रियंतऽइंदवोमत्सरामादयिष्णवः । द्रप्सामध्वश्चमूषदः ॥ ईळतेत्वामवस्यवःकण्वासोवृक्तबर्हिषः । हविष्मंतोऽअरंकृतः ॥ घृतपृष्ठामनोयुजोयेत्वावहंतिवह्नयः । आदेवान्त्सोमपीतये ॥ २६॥ तान्यजत्राँऽऋतावृधोग्नेपत्नीवतस्कृधि । मध्वः ॥ ७ ॥

तिःद्वादश्याःस्वाहाकृतयोदेवताःगायत्रीछंदः (एतदाप्रीसूक्तं) । (१।४।३) ऐभिरग्नइतिद्वादशर्चस्यसूक्तस्यमेधातिथिर्विश्वेदेवागायत्री । (वैश्वदेवत्वंसूक्तभेदप्रयोगे । यल्लिंगंसादेवतेतिपक्षेआद्ययोर्द्वयोरग्निःतृतीयायाविश्वेदेवाःततोनवानामग्निःएवंद्वादशर्चे) ।

सुजिह्वपायय ॥ येयजंत्रायऽईड्यास्तेतेपिबंतुजिह्वया । मधोरग्नेवषट्कृति ॥ आकींसूर्यस्यरोचनाद्विश्वान्देवाँऽउषर्बुधः ।
विप्रोहोतेहवक्षति ॥ विश्वेभिःसोम्यंमध्वग्नऽइंद्रेणवायुना । पिबामित्रस्यधामभिः ॥ त्वंहोतामनुर्हितोग्नेयज्ञेषुसी
दसि । सेमंनोऽअध्वरंयज ॥ युक्ष्वाह्यरुषीरथेहरितोदेवरोहितः । ताभिर्देवाँऽइहावह ॥ २७ ॥ (१।४।४) इंद्रसो
मंपिबऽऋतुनात्वाविशंत्विंदवः । मत्सरासस्तदोकसः ॥ मरुतःपिबतऽऋतुनापोत्राद्यज्ञंपुनीतन । यूयंहिष्ठासुदानवः ॥
अभियज्ञंगृणीहिनोग्नावोनेष्टःपिबऽऋतुना । त्वंहिरत्नधाऽअसि ॥ अग्नेदेवाँऽइहावहसादयायोनिषुत्रिषु । परिभूषपि
बऽऋतुना ॥ ब्राह्मणादिंद्रराधसःपिबासोममृतूँरनु । तवेद्धिसख्यमस्तृतं ॥ युवंदक्षंधृतव्रतमित्रावरुणदूळभं ।
ऋतुनायज्ञमाशाथे ॥ २८ ॥ द्रविणोदाद्रविणसोग्रावहस्तासोऽअध्वरे । यज्ञेषुदेवमीळते ॥ द्रविणोदाददातुनोवसू
नियानिशृण्विरे । देवेषुतावनामहे ॥ द्रविणोदाःपिंपीषतिजुहोतप्रचतिष्ठत । नेष्ट्रादृतुभिरिष्यत ॥ यत्त्वातुरीयमृतु
भिर्द्रविणोदोयजामहे । अधस्मानोददिर्भव ॥ अश्विनापिबतंमधुदीद्यग्नीशुचिव्रता । ऋतुनायज्ञवाहसा ॥ गार्हपत्ये
नसंत्यऽऋतुनायज्ञनीरसि । देवान्देवयतेयज ॥ २९ ॥ (१।४।५) आत्वावहंतुहरयोवृषणंसोमपीतये । इंद्रत्वासूर

(१।४।४) इंद्रसोममितिद्वादशर्चस्यसूक्तस्यमेधातिथिःआद्यानांषण्णांइंद्रोमरुतस्त्वष्टाग्निरिंद्रोमित्रावरुणौततश्चतसृणांद्रविणोदाअग्निः एकादश्याअश्विनौद्वादश्याअग्निर्गायत्री । (ऋतुदेवताएताः) । (१।४।५) आत्वावहंत्वितिनवर्चस्यसूक्तस्यमेधातिथिरिंद्रोगायत्री ।

चक्षसः ॥ इमाधानाघृतस्नुवोहरीऽइहोपवक्षतः । इंद्रसुखतमेरथे ॥ इंद्रप्रातर्हवामहऽइंद्रंप्रयत्यध्वरे । इंद्रंसोमस्य
पीतये ॥ उपनःसुतमागहिहरिभिरिंद्रकेशिभिः । सुतेहित्वाहवामहे ॥ सेमंनःस्तोममागह्युपेदंसवनंसुतं । गौरोनतृषितः
पिब ॥ ३० ॥ इमेसोमासऽइंदवःसुतासोअधिबर्हिषि । ताँऽइंद्रसहसेपिब ॥ अयंतेस्तोमोऽअग्रियोहृदिस्पृगस्तुशंतमः ।
अथासोमंसुतंपिब ॥ विश्वमित्सवनंसुतमिंद्रोमदायगच्छति । वृत्रहासोमपीतये ॥ सेमंनःकाममापृणगोभिरश्वैःशतक्र
तो । स्तवामत्वास्वाध्यः* ॥ ३१ ॥ (१।४।६) इंद्रावरुणयोरहंसम्राजोरवऽआवृणे । तानोमृळातऽईदृशे ॥ गंतारा
हिस्थोवसेहवंविप्रस्यमावतः । धर्तारांचर्षणीनां+ ॥ अनुकामंतर्पयेथामिंद्रावरुणरायऽआ । तावांनेदिष्ठमीमहे ॥ यु
वाकुहिशचीनांयुवाकुसुमतीनां । भूयामवाजदाव्नां ॥ इंद्रःसहस्रदाव्नांवरुणःशंस्यानां । क्रतुर्भवत्युक्थ्यः* ॥ ३२ ॥
तयोरिदवसावयंसनेमनिचधीमहि । स्यादुतप्ररेचनं ॥ इंद्रावरुणवामहंहुवेचित्रायराधसे । अस्मान्त्सुजिग्युषस्कृतं ॥
इंद्रावरुणनूनुवांसिषासंतीषुधीष्वा । अस्मभ्यंशर्मयच्छतं ॥ प्रवामश्नोतुसुष्टुतिरिंद्रावरुणयांहुवे । यामृधाथेसधस्तु
तिं ॥ ३३ ॥ (१।५।१) सोमानंस्वरणंकृणुहिब्रह्मणस्पते । कक्षीवंतंयऽऔशिजः+ ॥ योरेवान्योऽअमीवहावसुवि

(१।४।६) इंद्रावरुणयोरितिनवर्चस्यसूक्तस्यमेधातिथिरिंद्रावरुणौगायत्री । युवाकुहिद्वृचौपादनिचृतौ (इंद्रःसहस्रेतिह्रसीयसी वा)। (१।५।१) सोमानमितिनवर्चस्यसूक्तस्यमेधातिथिःआद्यानांतिसृणांब्रह्मणस्पतिःचतुर्थ्याइंद्रसोमब्रह्मणस्पतयःपंचम्याइंद्रसोमब्रह्मण

त्पुंष्टिवर्धनः । सनंःसिषक्तुयस्तुरः+ ॥ मानःशंसोऽअररुषोधूर्तिःप्रणङ्मर्त्यस्य । रक्षांणोब्रह्मणस्पते ॥ सघांवीरोनरिंष्यतियमिंद्रोब्रह्मंणस्पतिंः । सोमोंहिनोतिमर्त्यं ॥ त्वंतंब्रंह्मणस्पतेसोमऽइंद्रंश्चमर्त्यं । दक्षिंणापात्वंहंसः ॥ ३४ ॥ सदंसस्पतिमद्भुतंप्रियमिंद्रंस्यकाम्यं । सनिंमेधामंयासिषं ॥ यस्मांदृतेनसिध्यंतियज्ञोविंपश्चितंश्चन । सधीनांयोगंमिन्वति ॥ आदृध्नोतिहविष्कृतिंप्रांचंकृणोत्यध्वरं । होत्रांदेवेषुंगच्छति ॥ नराशंसंसुधृष्टमंमपंश्यंसप्रथंस्तमं । दिवोनसद्मंमखसं ॥ ३५ ॥ (१।५।२) प्रतित्यंचारुंमध्वरंगोंपीथायप्रहूंयसे । मरुद्भिंरग्नऽआगंहि ॥ नहिदेवोनमर्त्योंमहस्तवक्रतुंपरः । मरुद्भिं० ॥ येमहोरजंसोविदुर्विश्वेंदेवासोंऽअद्रुहंः । मरुद्भिं० ॥ यऽउग्राऽअर्कमांनृचुरनांधृष्टासऽओजंसा । मरुद्भिं०॥ येशुभ्राघोरवंर्पसःसुक्षत्रासोंरिशादंसः । मरुद्भिं० ॥ ३६ ॥ येनाकस्याधिंरोचनेदिविदेवासऽआसंते । मरुद्भिं० ॥ यऽईंखयंतिपर्वतान्तिरःसंमुद्रमंर्णवं । मरुद्भिं० ॥ आयेतन्वंतिंरश्मिभिंस्तिरःसंमुद्रमोजंसा । मरुद्भिं० ॥ अभित्वांपूर्वपीतयेसृजामिंसोम्यंमधुं । मरुद्भिं० ॥ ३७ ॥ ॥ इतिप्रथमाष्टकेप्रथमोऽध्यायः ॥ १ ॥

स्पतयोदक्षिणाचततश्चतसृणांसदस्पतिः (अंत्यायानराशंसोवा) गायत्री । (१।५।२) प्रतित्यमितिनवर्चस्यसूक्तस्यमेधातिथिरग्नामरुतोगायत्री । इतिप्रथमोऽध्यायः ।

॥ अथप्रत्यध्यायगतदेवतत्यागसंग्रहः ॥

प्रथमाष्टके सूक्तसंख्या १२१ ऋचः १३७०

प्रथमाध्याये वर्गाः २७ सूक्तानि १९ ऋचः १९४ ॥ अथत्यागः ॥ अग्नयइदंनमम ९ वायवइदं० ३ इंद्रवायुभ्यामिदं० ३ मित्रावरुणाभ्यामिदं० ३ अश्विभ्यामिदं० ३ इंद्रायेदं० ३ विश्वेभ्योदेवेभ्यइदं० ३ सरस्वत्याइदं० ३ इंद्रायेदं० २३ मरुद्भ्यइदं० इंद्रमरुद्भ्यइदं० मरुद्भ्यइदं० इंद्रमरुद्भ्यइदं० मरुद्भ्यइदं २ इंद्रायेदं० ५१ अग्नयइदं० ५ निर्मथ्याहवनीयाभ्यामग्निभ्यामिदं० अग्नयइदं० ६ इध्माय(समिद्धायवा)ग्नयइदं० तनूनपातइदं० नराशंसायेदं० इळायेदं० बर्हिषइदं० देवीभ्योद्वार्भ्यइदं० उषासानक्ताभ्यामिदं० दैवीभ्यां होतृभ्यांप्रचेतोभ्यामिदं० सरस्वतीळाभारतीभ्यइदं० त्वष्ट्रइदं० वनस्पतयइदं० स्वाहाकृतिभ्यइदं० विश्वेभ्योदेवेभ्यःइदं० १२ (अग्नयइदं० २ विश्वेभ्योदेवभ्यइदं० अग्नयइदं० ९) इंद्रायेदं० मरुद्भ्यइदं० त्वष्ट्रइदं० अग्नयइदं० इंद्रायेदं० मित्रावरुणाभ्यामिदं० द्रविणोदसेग्नयइदं० ४ अश्विभ्यामिदं० अग्नयइदं० इंद्रायेदं० ९ इंद्रावरुणाभ्यामिदं० ९ ब्रह्मणस्पतयइदं० ३ इंद्रसोमब्रह्मणस्पतिभ्यइदं० दक्षिणेंद्रसोमब्रह्मणस्पतिभ्यइदं० सदसस्पतयइदं० ३ सदसस्पतयेनराशंसायवेदं० अग्नामरुद्भ्यइदं० ९ ॥ इतिप्रथमोऽध्यायः ॥ १ ॥

॥ ९ ॥

अयमष्टावार्भवंमिहषळैंद्राग्नंप्रातर्युजासैका॑चतस्रआ॑श्विन्यस्तथासावित्र्यंआग्नेय्यौद्वेदेवीनां॑मेकैकैंद्राणीवरुणान्यग्नायीनां॑द्यावापृथिव्येपार्थिवीषड्वैष्णव्योऽतोदेवादैवीवां॑तीव्राश्चतुर्विंशतिर्वायव्यैकैंद्रवायव्यौमैत्रावरुणमरुत्वतीयवैश्वदेवपौष्णास्तृचा॑ःशिष्टाआप्योंत्याध्यर्धाग्नेय्यप्स्वंतःपुरउष्णिक्परानुष्टुप्तिस्रश्चांत्याएकविंशीप्रतिष्ठा कस्यपंचोनाजीगर्तिः॑शुनःशेपःसकृत्रिमोवैश्वामित्रोदेवरातोवारुणंतुत्रैष्टुभं॑मादौका॑य्याग्नेय्यौसावित्रस्तृचोगायत्रोस्यांत्याभागीवा॑यच्चित्सैकावसिष्वदशाग्नेयंत्वं॑श्वंसप्तोनागायत्रंत्यादैवीत्रिष्टु॑ब्व्यत्रग्रावानवषळनुष्टुबादिंयच्चिद्यौलूखल्यौपरेमौसल्यौचं॑प्रजापतेर्हरिश्चंद्रस्यांत्याचर्मप्रशंसावा॑यच्चित्सप्तपांक्तमावोद्व्यधिका॑स्माकंपादनिचृच्छश्वत्रिष्टुप्परौतृचावाश्विनौषस्यौत्वमग्नेद्व्यूना॑हिरण्यस्तूपआग्नेयंत्रिष्टु॑बंत्याष्टमीषोळश्यौचैंद्रस्यपंचोना ॥२॥

हरिः ॐ ॥ (१।५।३) अ॒यंदे॒वाय॒जन्म॑ने॒स्तोमो॒विप्रे॑भिरा॒सया । अका॑रिरत्न॒धात॑मः ॥ यइंद्रा॑यवचो॒युजा॑तत॒क्षुर्मन॑सा॒हरी॑ । शमी॑भिर्य॒ज्ञमा॑शत ॥ तक्ष॒न्नास॑त्याभ्यां॒परि॑ज्मानंसु॒खंरथं॑ । तक्ष॑न्धे॒नुंस॑ब॒र्दुघा॑म् ॥ युवा॑नापि॒तरा॒पुनः॑स॒त्यमं॑त्राऽऋजू॒यवः॑ । ऋ॒भवो॑वि॒ष्ट्य॑क्रत ॥ सं॑वो॒मदा॑सोऽअग्म॒तेंद्रे॑णच॒मरुत्वं॑ता । आ॒दि॒त्येभि॑श्च॒राज॑भिः ॥ १ ॥ उ॒तत्यंच॑म॒संनवं॒त्वष्टु॑र्दे॒वस्य॒निष्कृ॑तं । अक॑र्तच॒तुर॒ःपुनः॑ ॥ तेनो॒रत्ना॑निधत्तन॒त्रिरासा॑प्तानिसुन्व॒ते । एक॑मेकंसुश॒स्तिभिः॑ ॥ अधा॑रयंत॒वह्न

(१।५।३) अयंदेवायेत्यष्टर्चस्यसूक्तस्यमेधातिथिर्ऋभवोगायत्री ।

योभं॑जंतसुकृ॒त्यया॑ । भा॒गंदे॒वेषु॑य॒ज्ञिय॑म् ॥ २ ॥ (१।५।४) इ॒हेंद्रा॒ग्नी॑ऽउप॑ह्वये॒तयो॒रित्स्तोम॑मुश्मसि । तासोमं॑सोम॒
पातं॑मा ॥ ताय॒ज्ञेषु॒प्रशं॑सतेंद्रा॒ग्नीशुं॑भतानरः । तागा॑य॒त्रेषु॑गायत ॥ तामि॒त्रस्य॒प्रशं॑स्तयऽइंद्रा॒ग्नीताहं॑वामहे । सो॒म॒पा
सोमं॑पीतये ॥ उ॒ग्रासं॑ता॑हवामह॒ऽउपे॒दंसव॑नंसु॒तम् । इ॒द्रा॒ग्नीऽएहग॑च्छतां ॥ ताम॒हांता॒सद॒स्पती॒ऽइंद्रां॑ग्नी॒रक्षं॑उब्जतं ।
अप्रं॑जाःसंत्व॒त्रिणं॑ः ॥ तेनं॑स॒त्येनं॑जागृ॒तमधिं॑प्रचे॒तुनें॑प॒दे । इंद्रां॑ग्नी॒शर्मं॑यच्छतम् ॥ ३ ॥ (१।५।५) प्रा॒त॒र्युजा॒विबों॑धया॒
श्विना॒वेहग॑च्छताम् । अ॒स्यसोमं॑स्यपी॒तयें॑ ॥ यासु॒रथा॑र॒थीतं॑मो॒भादे॒वादिं॑वि॒स्पृशा॑ । अ॒श्विना॒ताहं॑वामहे ॥ यावां॒क
शा॒मधुं॑म॒त्यश्विं॑नासू॒नृतां॑वती । तयां॑य॒ज्ञंमिं॑मिक्षतम् ॥ न॒हिवा॒मस्ति॑दूर॒केयत्रा॒रथे॑न॒गच्छं॑थः । अश्विं॑नासो॒मिनों॑गृ॒
हम्$^{+}$ ॥ हिरं॑ण्यपाणिमूतयें॑सवि॒तार॒मुपं॑ह्वये । सचेत्तां॑दे॒वतां॑प॒दं$^{+}$ ॥ ४ ॥ अ॒पांनपां॑त॒मवं॑सेसवि॒तार॒मुपं॑स्तुहि । तस्यं॑व्र॒
तान्युं॑श्मसि ॥ वि॒भ॒क्तारं॑हवामहे॒वसो॑श्चि॒त्रस्य॒राधं॑सः । स॒वि॒तारं॑नृ॒चक्षं॑सम् ॥ सखा॑य॒ऽआनिषीं॑दतसवि॒तास्तो॑म्यो॒नु
नः॑ । दाता॒राधां॑सिशुं॑भति ॥ अग्ने॒पत्नीं॑रि॒हावं॑हदे॒वानां॑मुश॒तीरुपं॑ । त्वष्टां॑र॒सोमं॑पीतये ॥ आग्ना॒ऽअं॑ग्नऽइ॒हाव॑से॒होत्रां॑

(१।५।४) इहेंद्राग्नीइतिषळर्चस्यसूक्तस्यमेधातिथिरिंद्राग्नीगायत्री । (१।५।५) प्रातर्युजेत्येकविंशत्यृचस्यसूक्तस्यमेधातिथिःआद्यानां चतसृणामश्विनौततश्चतसृणांसवितातत्तोद्वयोरग्निःततएकस्यादेव्यःततएकस्याइंद्राणीवरुणान्यग्नाय्यःततोद्वयोर्द्यावापृथिव्यौततएकस्याः पृथिवीततःषण्णांविष्णुः (अतोदेवाइत्यस्यादेवावा) गायत्री ।

यविष्ठभारतीम् । वरूत्रींधिषणांवह ॥ ५ ॥ अभिनोदेवीरवसामहःशर्मणानृपत्नीः । अच्छिन्नपत्राःसचंतां ॥ इहेंद्राणीमुपह्वयेवरुणानींस्वस्तयें । अग्नायींसोमपीतये ॥ महीद्यौःपृथिवीचनऽइमंयज्ञंमिमिक्षतां । पिपृतांनोभरीमभिः ॥ तयोरिद्घृतवत्पयोविप्रारिहंतिधीतिभिः । गंधर्वस्यध्रुवेपदे+ ॥ स्योनापृथिविभवानृक्षरानिवेशनी । यच्छानः शर्मसप्रथः ॥ ६ ॥ अतोदेवाऽअवंतुनोयतोविष्णुर्विचक्रमे । पृथिव्याःसप्तधामभिः ॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूह्ळमस्यपांसुरे+ ॥ त्रीणिपदाविचक्रमेविष्णुर्गोपाऽअदाभ्यः । अतोधर्माणिधारयन् ॥ विष्णोःकर्माणिपश्यतयतोव्रतानिपस्पशे । इंद्रस्ययुज्यःसखा ॥ तद्विष्णोःपरमंपदंसदापश्यंतिसूरयः । दिवीवचक्षुराततम् ॥ तद्विप्रासोविपन्यवोजागृवांसःसमिंधते । विष्णोर्यत्परमंपदं+ ॥ ७ ॥ (१।५।६) तीव्राःसोमासऽआगह्याशीर्वंतःसुताऽइमे । वायोतान्प्रस्थितान्पिब ॥ उभादेवादिविस्पृशेंद्रवायूहवामहे । अस्यसोमस्यपीतयें ॥ इंद्रवायूमनोजुवाविप्राहवंतऽऊ

(१।५।६) तीव्राःसोमासइतिचतुर्विंशत्यृचस्यसूक्तस्यमेधातिथिःआद्यायावायुःततोद्वयोरिंद्रवायूततस्तिसृणांमित्रावरुणौततस्तिसृणांमरुतः (मरुत्वानिंद्रइतिकेचित्) ततस्तिसृणांविश्वेदेवाःततस्तिसृणांपूषाततःसप्तानामापःततएकस्याअग्न्यापःततएकस्याअग्निःअप्स्वंतरिति पुरउष्णिक्अप्सुमइत्यनुष्टुप्इदमापइत्याद्यास्तिस्रोनुष्टुभःआपःपृणीतेतिप्रतिष्ठाशेषागायत्र्यः ॥ (अग्न्यापइत्यत्राप्शब्दस्यपूर्वनिपातेप्राप्तेद्वंद्वेघिइतिसूत्रादग्निशब्दस्यपूर्वनिपातःकृतः)।

ऋक्सं. तये । सहस्राक्षाधियस्पती ॥ मित्रंवयंहवामहेवरुणंसोमपीतये । जज्ञानापूतदक्षसा ॥ ऋतेनयावृतावृधावृतस्यज्यो मंडलं १
अ.१अ.२ तिषस्पती । तामित्रावरुणाहुवे ॥ ८ ॥ वरुणःप्राविताभुवन्मित्रोविश्वाभिरूतिभिः । करतांनःसुराधसः ॥ मरुत्वं अनु.५
॥११॥ तंहवामहऽइंद्रमासोमपीतये । सजूर्गणेनतृंपतु ॥ इंद्रज्येष्ठामरुद्गणादेवासःपूषरातयः । विश्वेममश्रुताहवम् ॥ हत
वृत्रंसुदानवऽइंद्रेणसहसायुजा । मानोदुःशंसऽईशत ॥ विश्वान्देवान्हवामहेमरुतःसोमपीतये । उग्राहिपृश्निमातरः
॥ ९ ॥ जयंतामिवतन्यतुर्मरुतामेतिधृष्णुया । यच्छुभंयाथनानरः ॥ हस्काराद्विद्युतस्पर्यतोजाताऽअवंतुनः ।
मरुतोमृळयंतुनः ॥ आपूषंचित्रबर्हिषमाघृणेधरुणंदिवः । आजानष्टंयथापशुम्+ ॥ पूषाराजानमाघृणिरपगूळ्हंगुहाहि
तं । अविंदच्चित्रबर्हिषम् ॥ उतोसमह्यमिंदुभिःषड्युक्ताँऽअनुसेषिधत् । गोभिर्यवंनचर्कृषत् ॥ १० ॥ अंबयोयंत्य
ध्वभिर्जामयोऽअध्वरीयतां । पृंचतीर्मधुनापयः ॥ अमूर्याऽउपसूर्येयाभिर्वासूर्यःसह । तानोहिन्वंत्वध्वरम्+ ॥
अपोदेवीरुपह्वयेयत्रगावःपिबंतिनः । सिंधुभ्यःकर्त्वंहविः+ ॥ अप्स्वं१तरमृतमप्सुभेषजमपामुतप्रशस्तये । देवाभ
वतवाजिनः ॥ अप्सुमेसोमोऽअब्रवीदंतर्विश्वानिभेषजा । अग्निंचविश्वशंभुवमापश्चविश्वभेषजीः ॥ ११ ॥ आपः ॥११॥
पृणीतभेषजंवरूथंतन्वे३मम । ज्योक्चसूर्यंदृशे+ ॥ इदमापःप्रवहतयत्किंचदुरितंमयि । यद्वाहमभिदुद्रोहयद्वा
शेपऽउतानृतम् ॥ आपोऽअद्यान्वचारिषंरसेनसमगस्महि । पयस्वानग्नऽआगहितंमासंसृजवर्चसा ॥ संमाग्ने

वर्च॑सासृ॒ज॒संप्र॒जया॒समायु॑षा । वि॒द्युर्मे॑ऽअस्यदे॒वाऽइंद्रो॑विद्यात्स॒हऽऋषि॑भिः ॥ १२ ॥ (१।६।१) कस्य॑नू॒नं
क॑त॒मस्या॒मृता॑ना॒ंमना॑महे॒चारु॑दे॒वस्य॒नाम॑ । कोनो॑म॒ह्याऽअदि॑तये॒पुन॑र्दात्पि॒तरं॑चदृ॒शेयं॑मा॒तरं॑च ॥ अ॒ग्नेर्व॒यंप्र॑थ॒मस्या॒
मृता॑ना॒ंमना॑महे॒चारु॑दे॒वस्य॒नाम॑ । सनो॑म॒ह्याऽअदि॑तये॒पुन॑र्दात्पि॒तरं॑चदृ॒शेयं॑मा॒तरं॑च ॥ अ॒भित्वा॑देवसवित॒रीशा॑ना॒ंवा
र्या॑णां । सदा॑वन्भा॒गमी॑महे ॥ यश्चि॒द्धित॑इ॒त्थाभगः॑शशमा॒नःपु॒रानि॒दः । अ॒द्वे॒षोहस्त॑योर्द॒धे+ ॥ भग॑भक्तस्यतेव॒यमु
द॑शेम॒तवाव॑सा । मू॒र्धानं॑रा॒यऽआ॒रभे॑ ॥ १३ ॥ न॒हिते॑क्ष॒त्रंनसहो॒नम॒न्युंवय॑श्च॒नामीप॒तयं॑तऽआ॒पुः । नेमाऽआपो॑
ऽअनिमि॒षंचरं॑ती॒र्नयेवात॑स्यप्रमि॒नंत्यभ्वं॑ ॥ अ॒बु॒ध्नेराजा॒वरु॑णो॒वन॑स्यो॒र्ध्वंस्तूपं॑ददते॒पूतद॑क्षः । नी॒चीनाः॑स्थुरु॒परि॑बु॒ध्नऽ
ए॑षाम॒स्मेऽअ॒ंतर्निहि॑ताःके॒तव॑ःस्युः ॥ उ॒रुंहिराजा॒वरु॑णश्च॒कार॒सूर्या॑य॒पंथा॒मन्वे॑त॒वाऽउ॑ । अ॒पदे॒पादा॒प्रति॑धातवेकरु॒ताप॑
व॒क्ताहृ॑दया॒विध॑श्चित् ॥ श॒तंते॑राजन्भि॒षजः॑स॒हस्र॑मु॒र्वीग॑भी॒रासु॑म॒तिष्टे॑ऽअस्तु । बाध॑स्वदू॒रेनिर्ऋ॑तिंपरा॒चैःकृ॒तंचि॒देनः॑
प्रमु॑मुग्ध्य॒स्मत् ॥ अ॒मीयऽऋक्षा॒निहि॑तासऽउ॒च्चानक्तं॒ददृ॑श्रे॒कुह॑चि॒द्दिवे॑युः । अद॑ब्धानि॒वरु॑णस्यव्र॒तानि॑वि॒चाक॑शच्चं॒द्र
मा॒नक्त॑मेति ॥ १४ ॥ तत्त्वा॑यामि॒ब्रह्म॑णा॒वंद॑मान॒स्तदाशा॑स्ते॒यज॑मानोह॒विर्भिः॑ । अहे॑ळमानोवरुणे॒हबो॒ध्युरु॑शंस॒मान॒

(१।६।१) कस्यनूनमितिपंचदशर्चस्यसूक्तस्यआजीगर्तिःशुनःशेपःसकृत्रिमोवैश्वामित्रोदेवरातः आद्यायाःकःद्वितीयायाअग्निस्ततस्तिसृणांसविता (भगभक्तस्येत्यस्याभगोवा) नहितेक्षत्रमित्याद्यानांवरुणस्त्रिष्टुप् अभित्वेत्यादितिस्रोगायत्र्यः ।

ऽआयुःप्रमोषीः ॥ तदिन्नक्तंतद्दिवामह्यमाहुस्तदयंकेतोहृदऽआविचष्टे । शुनःशेपोयमह्वद्गृभीतःसोऽअस्मान्राजावरु
णोमुमोक्तु ॥ शुनःशेपोह्यह्वद्गृभीतस्त्रिष्वादित्यंद्रुपदेषुबद्धः । अवैनंराजावरुणःससृज्याद्विद्वाँऽअदब्धोविमुमोक्तुपा
शान् ॥ अवतेहेळोवरुणनमोभिरवयज्ञेभिरीमहेहविर्भिः । क्षयन्नस्मभ्यमसुरप्रचेताराजन्नेनांसिशिश्रथःकृतानि ॥ उदु
त्तमंवरुणपाशमस्मदवाधमंविमध्यमंश्रथाय । अथावयमादित्यव्रतेतवानागसोऽअदितयेस्याम ॥१५॥ (१।६।२) यच्चि
द्धितेविशोयथाप्रदेववरुणव्रतं । मिनीमसिद्यविद्यवि ॥ मानोवधायहत्नवेजिहीळानस्यरीरधः । माहृणानस्यमन्यवे ॥
विमृळीकायतेमनोरथीरश्वंनसंदितं । गीर्भिर्वरुणसीमहि ॥ पराहिमेविमन्यवःपतंतिवस्यऽइष्टये । वयोनवसतीरुप ॥
कदाक्षत्रश्रियंनरमावरुणंकरामहे । मृळीकायोरुचक्षसं ॥ १६ ॥ तदित्समानमाशातेवेनंतानप्रयुच्छतः । धृतव्रताय
दाशुषे ॥ वेदायोवीनांपदमंतरिक्षेणपततां । वेदनावःसमुद्रियः ॥ वेदमासोधृतव्रतोद्वादशप्रजावतः । वेदायऽउप
जायते ॥ वेदवातस्यवर्तनिमुरोर्ऋष्वस्यबृहतः । वेदायेऽअध्यासते ॥ निषसादधृतव्रतोवरुणःपस्त्या३स्वा । साम्रा
ज्यायसुक्रतुः ॥ १७ ॥ अतोविश्वान्यद्भुताचिकित्वाँऽअभिपश्यति । कृतानियाचकर्त्वा ॥ सनोविश्वाहासुक्रतुरा
दित्यःसुपथाकरत् । प्रणऽआयूँषितारिषत् ॥ बिभ्रद्द्रापिंहिरण्ययंवरुणोवस्तनिर्णिजं । परिस्पशोनिषेदिरे ॥ नयं

(१।६।२) यच्चिद्धितइत्येकविंशत्यृचस्यसूक्तस्यशुनःशेपोवरुणोगायत्री ।

दिप्संतिदिप्सवोनद्रुह्वाणोजनानां । नदेवमभिमातयः ॥ उतयोमानुषेष्वायशश्चक्रेऽअसाम्या । अस्माकमुदरेष्वा
॥ १८ ॥ परामेयंतिधीतयोगावोनगव्यूतीरनु । इच्छंतीरुरुचक्षसं ॥ संनुवोचावहैपुनर्यतोमेमध्वाभृतं । होतेवक्षद
सेप्रियं+ ॥ दर्शंनुविश्वदर्शतंदर्शंरथमधिक्षमि । एताजुंषतमेगिरः ॥ इमंमेवरुणश्रुधीहवमद्याचमृळय । त्वामवस्युरा
चके ॥ त्वंविश्वस्यमेधिरदिवश्चग्मश्चराजसि । सयामनिप्रतिश्रुधि ॥ उदुत्तमंमुमुग्धिनोविपाशंमध्यमंचृत । अवाध
मानिजीवसे ॥ १९ ॥ (१।६।३) वसिष्वाहिमियेध्यवस्त्राण्यूर्जापते । सेमंनोऽअध्वरंयज ॥ निनोहोतावरेण्यःसदाय
विष्ठमन्मभिः । अग्नेदिवित्मतावचः ॥ आहिष्मासूनवेपितापिर्यजत्यापये । सखासख्येवरेण्यः ॥ आनोबर्हीरिशाद
सोवरुणोमित्रोऽअर्यमा । सीदंतुमनुषोयथा ॥ पूर्व्यहोतरस्यनोमंदस्वसख्यस्यच । इमाऽउषुश्रुधीगिरः ॥ २० ॥ य
च्चिद्धिशश्वतातनादेवंदेवंयजामहे । त्वेऽइद्धूयतेहविः ॥ प्रियोनोऽअस्तुविश्पतिर्होतामंद्रोवरेण्यः । प्रियाःस्वग्नयोव
यं+ ॥ स्वग्नयोहिवार्यंदेवासोदधिरेचनः । स्वग्नयोमनामहे ॥ अथानऽउभयेषाममृतमर्त्यानां । मिथःसंतुप्रशस्तयः ॥
विश्वेभिरग्नेऽअग्निभिरिमंयज्ञमिदंवचः । चनोधाःसहसोयहो ॥ २१ ॥ (१।६।४) अश्वंनत्वावारवंतंवंदध्याऽअग्निंनमो

(१।६।३) वसिष्वेतिदशर्चस्यसूक्तस्यशुनःशेपोग्निर्गायत्री । (१।६।४) अश्वंनत्वेतित्रयोदशर्चस्यसूक्तस्यशुनःशेपोऽग्निर्गायत्री । नमोम हद्भ्यइत्यस्यादेवास्त्रिष्टुप् ।

भिः । सम्राजंतमध्वराणां ॥ सघानःसूनुःशवसापृथुप्रगामासुशेवः । मीढ्वाँऽअस्माकंबभूयात् ॥ सनोदूराच्चासाच्चनि मर्त्यादघायोः । पाहिसदमिद्विश्वायुः ॥ इममूषुत्वमस्माकंसनिंगायत्रंनव्यांसं । अग्नेदेवेषुप्रवोचः ॥ आनोभजपर मेष्वावाजेषुमध्यमेषु । शिक्षावस्वोऽअंतमस्य ॥ २२ ॥ विभक्तासिचित्रभानोसिंधोरूर्माऽउपाकऽआ । सद्योदाशुषे क्षरसि ॥ यमग्नेपृत्सुमर्त्यमवावाजेषुयंजुनाः । संयताशश्वतीरिषः ॥ नकिरस्यसहंत्यपर्येताकयस्यचित् । वाजोऽअ स्तिश्रवाय्यः ॥ सवाजंविश्वचर्षणिरर्वद्भिरस्तुतरुता । विप्रेभिरस्तुसनिता ॥ जरावोधतद्विविड्ढिविशेविशेयज्ञियाय । स्तोमंरुद्रायदृशीकं ॥ २३ ॥ सनोमहाँऽअनिमानोधूमकेतुःपुरुश्चंद्रः । धियेवाजायहिन्वतु ॥ सरेवाँऽइवविश्पतिर्दै व्यःकेतुःशृणोतुनः । उक्थैरग्निर्बृहद्भानुः ॥ नमोमहद्भ्योनमोऽअर्भकेभ्योनमोयुवभ्योनमऽआशिनेभ्यः । यजामदे वान्यदिशक्नवाममाज्यायसःशंसमावृक्षिदेवाः ॥ २४ ॥ (१।६।५) यत्रग्रावापृथुबुध्नऽऊर्ध्वोभवतिसोतवे । उलूखलसु तानामवेद्विंद्रजल्गुलः ॥ यत्रद्वाविवजघनाधिषवण्याकृता । उलूखल० ॥ यत्रनार्यपच्यवमुपच्यवंचशिक्षते । उलूखं ल० ॥ यत्रमंथांविबध्नतेरश्मीन्यमितवाऽइव । उलूखल० ॥ यच्चिद्धित्वंगृहेगृहऽउलूखलकयुज्यसे । इहद्युमत्तमं

(१।६।५) यत्रग्रावेतिनवर्चस्यसूक्तस्यआद्यानांचतसृणामिंद्रःततोद्वयोरुलूखलंततोद्वयोरुलूखलमुसलेअंत्यायाःप्रजापतिर्हरिश्चंद्रः (अधिषवणचर्मदेवतावा) आद्याःषळनुष्टुभःअंत्यास्तिस्रोगायत्र्यः ।

वद॒जय॑तामिवदुंदु॒भिः+ ॥ २५ ॥ उ॒तस्म॑तेवनस्पते॒वातो॒विवा॒त्यग्र॒मित् । अथो॒ऽइंद्रा॑य॒पात॑वेसु॒नुसोम॑मुलूखल ॥ आ॒य॒जीवा॑ज॒सात॑मा॒ताह्यु१॒च्चावि॑जर्भृ॒तः । हरी॑ऽइ॒वांधां॑सि॒बप्स॑ता ॥ तानौ॑ऽअ॒द्यव॑नस्पतीऽऋ॒ष्वावृ॒ष्वेभिः॑सो॒तृभिः॑ । इंद्रा॑य॒मधु॑मत्सुतम् ॥ उच्छि॒ष्टंच॒म्वो॑र्भर॒सोमं॑प॒वित्र॒ऽआसृ॑ज । निधे॑हि॒गोरधि॑त्व॒चि+ ॥ २६ ॥ (१।६।६) यच्चि॒द्धिस॑त्यसोमपाऽअनाश॒स्ताऽइ॑व॒स्मसि॑ । आतू॒न॑ऽइंद्रशंसय॒गोष्वश्वे॑षुशु॒भ्रिषु॑स॒हस्रे॑षुतुवीमघ ॥ शिप्रि॑न्वाजानांपते॒शची॑व॒स्तव॑दं॒सना॑ । आतू॒न॑० ॥ निष्वा॑पयामिथू॒दृशा॑स॒स्तामबु॑ध्यमाने । आतू॒न॑० ॥ स॒संतु॒त्याऽअरा॑तयो॒बोध॑ंतुशूररा॒तयः॑ । आतू॒न॑० ॥ समि॑ंद्रगर्द॒भंमृ॑णनु॒वंतं॑पा॒पया॑मु॒या । आतू॒न॑० ॥ पता॑तिकुंडृ॒णाच्या॑दू॒रंवातो॒वना॒दधि॑ । आतू॒न॑० ॥ सर्वं॑परिक्रो॒शंज॑हिजं॒भया॑कृकदा॒श्वं॑ । आतू॒न॑० ॥ २७ ॥ (१।६।७) आव॒ऽइंद्रं॒क्रिविं॑यथावा॒जयं॑तःश॒तक्र॑तुं । मंहि॑ष्ठंसिंच॒ऽइंदु॑भिः ॥ श॒तंवा॒यःशुची॑नांस॒हस्रं॑वा॒सम॑शिरां । एदु॑नि॒म्नंनरी॑यते ॥ संयन्मदा॑यशु॒ष्मिण॑ऽए॒नाह्य॑स्यो॒दरे॑ । स॒मु॒द्रोनव्यचो॑द॒धे ॥ अ॒यमु॑ते॒सम॑तसिक॒पोत॑ऽइवगर्भ॒धिं । वच॒स्तच्चि॑न्नऽओहसे ॥ स्तो॒त्रंरा॑धानांपते॒गिर्वा॑होवीर॒यस्य॑ते । विभू॑तिरस्तुसू॒नृता॑ ॥ २८ ॥ ऊ॒र्ध्वस्ति॑ष्ठानऽऊ॒तये॒स्मि

(१।६।६) यच्चिद्धिसत्येतिसप्तर्चस्यसूक्तस्यशुनःशेपइंद्रःपंक्तिः । (१।६।७) आवइंद्रमितिद्वाविंशत्यृचस्यसूक्तस्यशुनःशेपइंद्रःसप्तदश्यादितिसृणामश्विनौततस्तिसृणामुषागायत्रीअस्[illegible]ष्टुप्।

Digitization by eGangotri. Funding MHRD-Delhi

न्वाजैंशतक्रतो । समन्येषुंब्रवावहै ॥ योगेंयोगेतवस्तंरंवाजेंवाजेहवामहे । सखायऽइंद्रमूतयें ॥ आघांगमद्यदिश्रवं
त्सहस्त्रिणींभिरूतिभिः । वाजेंभिरुपंनोहवं ॥ अनुंप्रत्नस्यौकंसोहुवेतुंविप्रतिंनरं । यंतेपूर्वंपिताहुवे+ ॥ तंत्वांवयंविश्व
वाराशांस्महेपुरुहूत । सखेंवसोजरितृभ्यंः ॥ २९ ॥ अस्माकंशिप्रिणींनांसोमंपाःसोमपान्नां । सखेंवज्रिन्त्सखींना
॥१४॥ म् ॥ तथातदंस्तुसोमपाःसखेंवज्रिन्तथांकृणु । यथांतऽउश्मसीष्टयें ॥ रेवतींर्नःसधमादऽइंद्रेंसंतुतुविवांजाः । क्षुमं
तोयाभिर्मदेम ॥ आघत्वावान्त्मनाप्तःस्तोतृभ्योंधृष्णवियानः । ऋणोरक्षंनचक्र्योंः* ॥ आयद्दुवंःशतक्रतवाकामंजरि
तृणां । ऋणोरक्षंनशचींभिः ॥ ३० ॥ शश्वदिंद्रःपोप्रुंथद्भिर्जिगायनानंदद्भिःशाश्वंसद्भिर्धनांनि । सनोंहिरण्यरथंदं
सनांवान्त्सनंःसनितासनयेसनोंदात् ॥ आश्विंनावश्वांवत्येषायांतंशवींरया । गोमंदस्राहिरंण्यवत् ॥ समानयोंज
नोहिवांरथोंदस्रावमंर्त्यः । समुद्रेऽअंश्विनेयंते ॥ न्यं१घ्न्यस्यंमूर्धनिंचक्रंरथस्ययेमथुः । परिद्यामन्यदींयते ॥ कस्तंऽ
उषःकधप्रियेभुजेमर्तोंऽअमर्त्यें । कंनंक्षसेविभावरि ॥ वयंहितेऽअमंन्मह्यान्तादापंराकात् । अश्वेनचिंत्रेऽअरुषि ॥
त्वंत्येभिरागंहिवाजेंभिर्दुहितर्दिवः । अस्मेरयिंनिधांरय ॥ ३१ ॥ (१।७।१) त्वमंग्नेप्रथमोऽअंगिंराऽऋषिर्देवोदे
वानांमभवःशिवःसखां । तवंव्रतेकवयोंविद्मनापसोजांयंतमरुतोभ्राजंदृष्टयः ॥ त्वमंग्नेप्रथमोऽअंगिंरस्तमःकविर्देवा ॥१४॥

(१।७।१) त्वमग्नइत्यष्टादशर्चस्यसूक्तस्यआंगिरसोहिरण्यस्तूपोग्निर्जगतीअष्टमीषोळश्यंत्यास्त्रिष्टुभः ।

नांपरिभूषसिव्रतं । विभुर्विश्वस्मैभुवनायमेधिरोद्विमाताशयुःकतिधाचिदायवे ॥ त्वमग्नेप्रथमोमातरिश्वनऽआविर्भ
वसुक्रतूयाविवस्वते । अरेजेतांरोदसीहोतृवूर्येसघ्नोर्भारमयजोमहोवसो ॥ त्वमग्नेमनवेद्यामवाशयःपुरूरवसेसुकृतेसु
कृत्तरः । श्वात्रेणयत्पित्रोर्मुच्यसेपर्यात्वापूर्वमनयन्नापरंपुनः ॥ त्वमग्नेवृषभःपुष्टिवर्धनऽउद्यतस्रुचेभवसिश्रवाय्यः ।
यऽआहुतिंपरिवेदावषट्कृतिमेकायुरग्रेविशऽआविवाससि ॥ ३२ ॥ त्वमग्नेवृजिनवर्तनिंनरंसक्मन्पिपर्षिविदथेवि
चर्षणे । यःशूरसातापरितक्म्येधनेदभ्रेभिश्चित्समृताहंसिभूयसः ॥ त्वंतमग्नेऽअमृतत्वउत्तमेमर्तंदधासिश्रवसेदिवे
दिवे । यस्तातृषाणऽउभयायजन्मनेमयःकृणोषिप्रयऽआचसूरये ॥ त्वंनोऽअग्नेसनयेधनानांयशसंकारुंकृणुहिस्तवा
नः । ऋध्यामकर्मापसानवेनदेवैर्द्यावापृथिवीप्रावतंनः ॥ त्वंनोऽअग्नेपित्रोरुपस्थऽआदेवोदेवेष्वनवद्यजागृविः । तनू
कृद्बोधिप्रमतिश्चकारवेत्वंकल्याणवसुविश्वमोपिषे ॥ त्वमग्नेप्रमतिस्त्वंपितासिनस्त्वंवयस्कृत्तवजामयोवयं । संत्वारा
यःशतिनःसंसहस्रिणःसुवीरंयंतिव्रतपामदाभ्य ॥ ३३ ॥ त्वामग्नेप्रथममायुमायवेदेवाऽअकृण्वन्नहुषस्यविश्पतिम् ।
इळामकृण्वन्मनुषस्यशासनींपितुर्यत्पुत्रोममकस्यजायते ॥ त्वंनोऽअग्नेतवदेवपायुभिर्मघोनोरक्षतन्वश्चवंद्य । त्राता
तोकस्यतनयेगवामस्यनिमेषंरक्षमाणस्तवव्रते+ ॥ त्वमग्नेयज्यवेपायुरंतरोनिषंगायचतुरक्षऽइध्यसे । योरातहव्योवृ
कायधायसेकीरेश्चिन्मंत्रंमनसावनोषितं+ ॥ त्वमग्नऽउरुशंसायवाघतेस्पार्हंयद्रेक्णःपरमंवनोषितत् । आध्रस्यचित्प्र

मतिरुच्यसेपिताप्रपाकंशास्सिप्रदिशोविदुष्टरः ॥ त्वमग्नेप्रयतदक्षिणंनरंवर्मेवस्यूतंपरिपासिविश्वतः । स्वादुक्षद्मायो
वसतौस्योनकृज्जीवयाजंयजतेसोपमादिवः+ ॥ ३४ ॥ इमामग्नेशरणिमीमृषोनऽइममध्वानंयमगामदूरात् । आपिः
पिताप्रमतिःसोम्यानांभृमिरस्यृषिकृन्मर्त्यानां ॥ मनुष्वदग्नेऽअंगिरस्वदंगिरोययातिवत्सदनेपूर्ववच्छुचे । अच्छया
ह्यावहादैव्यंजनमासादयबर्हिषियक्षिचप्रियं+ ॥ एतेनाग्नेब्रह्मणावावृधस्वशक्तीवायत्तेचकृमाविदावा । उतप्रणेष्यभि
वस्योऽअस्मान्त्संनःसृजसुमत्यावाजवत्या ॥ ३५ ॥ (१।७।२) इंद्रस्यनुवीर्याणिप्रवोचंयानिचकारप्रथमानिवज्री ।
अहन्नहिमन्वपस्ततर्दप्रवक्षणाअभिनत्पर्वतानां ॥ अहन्नहिंपर्वतेशिश्रियाणंत्वष्टास्मैवज्रंस्वर्यंततक्ष । वाश्राऽइवधेनवः
स्यंदमानाऽअंजःसमुद्रमवजग्मुरापः ॥ वृषायमाणोवृणीतसोमंत्रिकद्रुकेष्वपिवत्सुतस्य ॥ आसायकंमघवादत्तवज्रम
हन्नेनंप्रथमजामहीनां ॥ यदिंद्राहन्प्रथमजामहीनामान्मायिनाममिनाःप्रोतमायाः । आत्सूर्यंजनयन्द्यामुषासंतादी
त्नाशत्रुंनकिलाविवित्से ॥ अहन्वृत्रंवृत्रतरंव्यंसमिंद्रोवज्रेणमहतावधेन । स्कंधांसीवकुलिशेनाविवृक्णाहिःशयतऽउ
पपृक्पृथिव्याः+ ॥ ३६ ॥ अयोद्धेवदुर्मदऽआहिजुह्वेमहावीरंतुविबाधमृजीषं । नातारीदस्यसमृतिंवधानांसंरुजानाः
पिपिषऽइंद्रशत्रुः ॥ अपादहस्तोऽअपृतन्यदिंद्रमास्यवज्रमधिसानौजघान । वृष्णोवध्रिःप्रतिमानंबुभूषन्पुरुत्रावृत्रोऽअ ॥१५॥

(१।७।२।) इंद्रस्यन्विंतिपंचदशर्चस्यसूक्तस्यहिरण्यस्तूपइंद्रस्त्रिष्टुप् ।

शयद्व्यस्तः ॥ नदंनभिन्नममुयाशयानंमनोरुहाणाऽअतियन्त्यापः । याश्चिद्वृत्रोमहिनापर्यतिष्ठत्तासामहिःपत्सुतःशीर्बभूव ॥ नीचावयाऽअभवद्वृत्रपुत्रेंद्रोऽअस्याऽअववधर्जभार । उत्तरासूरधरःपुत्रऽआसीद्दानुःशयेसहवत्सानधेनुः+ ॥ अतिष्ठंतीनामनिवेशनानांकाष्ठानांमध्येनिहितंशरीरं । वृत्रस्यनिण्यंविचरंत्यापोदीर्घंतमऽआशयदिंद्रशत्रुः ॥ ३७ ॥ दासपत्नीरहिगोपाऽअतिष्ठन्निरुद्धाऽआपःपणिनेवगावः । अपांबिलमपिहितंयदासीद्वृत्रंजघन्वाँऽअपतद्ववार ॥ अश्व्योवारोऽअभवस्तदिंद्रसृकेयत्त्वाप्रत्यहंदेवऽएकः । अजयोगाऽअजयःशूरसोममवासृजःसर्तवेसप्तसिंधून् ॥ नास्मैविद्युंनतन्यतुःसिषेधनयांमिहमकिरद्ध्रादुनिंच । इंद्रश्चयद्युयुधातेऽअहिश्चोतापरीभ्योमघवाविजिग्ये ॥ अहेर्यातारंकमपश्यऽइंद्रहृदियत्तेजघ्नुषोभीरगच्छत् । नवचयंनवतिंचस्रवंतीःश्येनोनभीतोऽअतरोरजाँसि ॥ इंद्रोयातोवसितस्यराजाशमस्यचशृंगिणोवज्रबाहुः । सेदुराजाक्षयतिचर्षणीनामरांननेमिःपरिताबभूव ॥ ३८ ॥ इतिप्रथमाष्टकेद्वितीयोऽध्यायः ॥ २ ॥ ॥ ॥ ॥ ॥ ॥

द्वितीयाध्याये वर्गाः ३८ सूक्तानि १३ ऋचः १८९ ॥ त्यागः ॥ ऋभुभ्यइदं. ८ इंद्राग्निभ्यामिदं. ६ अश्विभ्यामिदं. ४ सवित्रइदं. ४ अग्नयइदं. २ देवीभ्यइदं. इंद्राणीवरुणान्यग्नायीभ्यइदं. द्यावापृथिवीभ्यामिदं. २ पृथिव्याइदं. विष्णवइदं. (प्रथमायादेवेभ्योवा) ६ वायवइदं. इंद्रवायुभ्यामिदं. २ मित्रावरुणाभ्यामिदं. ३ मरुद्भ्यः (मरुत्वतइंद्रायवा) इदं. ३ विश्वेभ्योदेवेभ्यइदं. ३

पूष्णइदं. ३ अग्न्यइदं. ७ अग्न्यग्न्यइदं. अग्नइदं. कायेदं. अग्नयइदं. सावित्रइदं. २ (अंत्यायाभगायवा) वरुणायेदं. ३१ अग्नयइदं. २२ देवेभ्यइदं. इंद्रायेदं. ४ उलूखलायेदं. २ उलूखलमुसलाभ्यामिदं. २ प्रजापतयेहरिश्चंद्राय (अधिषवणचर्मणे) वेदं. इंद्रायेदं. २३ अश्विभ्यामिदं. ३ उषसइदं. ३ अग्नयइदं. १८ इंद्रायेदं १५ ॥ इतिद्वितीयोऽध्यायः ॥

एतत्रिश्चिद्द्वादशाश्विनंनवम्यंत्येत्रिष्टुभौह्वयाम्येकादशसावित्रंनवमीजगत्याद्याचसालिंगोक्तदैवतपादाप्रवोविंशतिःकण्वोघौरआग्नेयंप्रागाथमूर्ध्वऊषुयौप्यौक्रीळंपंचोनामारुतंहिगायत्रंतुकद्धप्रयद्दशप्रागाथंतूत्तिष्ठाष्टौब्राह्मणस्पत्यंयंरक्षंतिनववरुणमित्रार्यम्णांमध्येतृचआदित्येभ्योगायत्रंहिंसंपूषंदशपौष्णंकद्रुद्रायनवरौद्रंतृतीयामैत्रावरुणीचांत्यस्तृचःसौम्योंत्यानुष्टुबग्नेषळूनाप्रस्कण्वःकाण्वआग्नेयंतुप्रागाथमाद्योद्बृचोश्च्युषसांचत्वमग्नेदशानुष्टुभमर्धचौत्योदैवंएषोपंचोनाश्विनंतुगायत्रं ॥ ३ ॥

हरिःओ३म् ॥ (१।७।३) एतायामोपगव्यंतऽइंद्रमस्माकंसुप्रमतिंवावृधाति । अनामृणःकुविदादस्यरायोगवांकेतंपरमावर्जतेनः ॥ उपेदहंधननदामप्रतीतंजुष्टांनश्येनोवसतिंपतामि । इंद्रंनमस्यन्नुपमेभिरर्कैर्यःस्तोतृभ्योहव्योऽअस्तियामन् ॥ निसर्वसेनऽइषुधींऽरसक्तसमर्योगाऽअंजतियस्यवाष्टि । चोष्कूयमाणइंद्रभूरिवामंमापणिर्भूरस्मदधिप्रवृद्ध ॥ ॥१६॥

(१।७।३) एतायामेतिपंचदशर्चस्यसूक्तस्यहिरण्यस्तूपइंद्रस्त्रिष्टुप् ।

वधीर्हिंदस्युंधनिनंघनेनँऽएकश्चरन्नुपशाकेभिरिंद्र । धनोरधिविषुणक्तेव्यायन्नयज्वानःसनकाःप्रेतिमीयुः ॥ परांचिच्छीर्षाववृजुस्तइंद्रायज्वानोयज्वभिःस्पर्धमानाः । प्रयद्दिवोहरिवःस्थातरुग्रनिरव्रताँऽअधमोरोदस्योः ॥ १ ॥ अयुयुत्सन्ननवद्यस्यसेनामयातयंतक्षितयोनवग्वाः । वृषायुधोनवध्रयोनिरष्टाःप्रवद्भिरिंद्राच्चितयंतआयन् ॥ त्वमेतान्रुदतोजक्षतश्चायोधयोरजसऽइंद्रपारे । अवादहोदिवऽआदस्युमुच्चाप्रसुन्वतःस्तुवतःशंसमावः ॥ चक्राणासःपरीणहंपृथिव्याहिरण्येनमणिनाशुंभमानाः । नहिन्वानासस्तितिरुस्तऽइंद्रंपरिस्पशोऽअदधात्सूर्येण ॥ परियदिंद्ररोदसीऽउभेऽअबुभोजीर्महिनाविश्वतःसीम् । अमन्यमानाँऽअभिमन्यमानैर्निर्ब्रह्मभिरधमोदस्युमिंद्र ॥ नयेदिवःपृथिव्याऽअंतमापुर्नमायाभिर्धनदांपर्यभूवन् । युजंवज्रंवृषभश्चक्रऽइंद्रोनिर्ज्योतिषातमसोगाऽअदुक्षत् ॥ २ ॥ अनुस्वधामक्षरन्नापोऽअस्यावर्धतमध्यऽआनाव्यानां । सध्रीचीनेनमनसातमिंद्रऽओजिष्ठेनहन्मनाहन्नभिद्यून्+ ॥ न्याविध्यदिलीबिशस्यदृळ्हाविशृंगिणमभिनच्छुष्णमिंद्रः । यावत्तरोमघवन्यावदोजोवज्रेणशत्रुमवधीःपृतन्युं+ ॥ अभिसिध्मोअजिगादस्यशत्रून्वितिग्मेनवृषभेणापुरोभेत् । संवज्रेणासृजद्वृत्रमिंद्रःप्रस्वांमतिमतिरच्छाशदानः ॥ आवःकुत्समिंद्रयस्मिंचाकन्प्रावोयुध्यंतंवृषभंदशद्युं । शफच्युतोरेणुर्नक्षतद्यामुच्छ्वैत्रेयोनृषाह्यायतस्थौ ॥ आवःशमंवृषभंतुग्र्यासुक्षेत्रजेषेमघव

न्छ्वित्र्यंगां ॥ ज्योक्किदत्रंतस्थिवांसोऽअक्रञ्छत्रूयतामधरावेदनाकः ॥ ३ ॥ (१।७।४) त्रिश्चिन्नोअद्याभवतंनवेदसावि
भुर्वांयामउतरातिरश्विना । युवोर्हियंत्रंहिम्येववाससोभ्यायंसेन्याभवतंमनीषिभिः ॥ त्रयःपवयोमधुवाहनेरथेसोम
स्यवेनामनुविश्वइद्विदुः । त्रयःस्कंभासःस्कभितासऽआरभेत्रिर्नक्तंयाथस्त्रिर्वश्विनादिवा ॥ समानेऽअहंत्रिरवद्यगो
हनात्रिरद्ययज्ञंमधुनामिमिक्षतं । त्रिर्वाजवतीरिषोऽअश्विनायुवंदोषाऽअस्मभ्यमुषसश्चपिन्वतं ॥ त्रिर्वर्तियातंत्रिरनु
व्रतेजनेत्रिःसुप्राव्येत्रेधेवशिक्षतं । त्रिर्नांद्यंवहतमश्विनायुवंत्रिःपृक्षोऽअस्मेऽअक्षरेवपिन्वतं ॥ त्रिर्नोरयिंवहतमश्वि
नायुवंत्रिर्देवतातात्रिरुतावतंधियः । त्रिःसौभगत्वंत्रिरुतश्रवांसिनस्त्रिष्ठंवांसूरेदुहितारुहद्रथं ॥ त्रिर्नोऽअश्वि
नादिव्यानिभेषजात्रिःपार्थिवानित्रिरुदत्तमद्भ्यः । ओमानंशंयोर्ममकायसूनवेत्रिधातुशर्मवहतंशुभस्पती ॥ ४ ॥ त्रि
र्नोऽअश्विनायजतादिवेदिवेपरित्रिधातुपृथिवीमशायतं । तिस्रोनासत्यारथ्यापरावतऽआत्मेववातःस्वसराणिगच्छ
तं ॥ त्रिरश्विनासिंधुभिःसप्तमातृभिस्त्रयऽआहावास्त्रेधाहविष्कृतं । तिस्रःपृथिवीरुपरिप्रवादिवोनाकंरक्षेथेद्युभिर
क्तुभिर्हितं+ ॥ क्व१त्रीचक्रात्रिवृतोरथस्यक्व१त्रयोवंधुरोयेसनीळाः । कदायोगोवाजिनोरासभस्ययेनयज्ञंनासत्योपया
थः+ ॥ आनासत्यागच्छतंहूयतेहविर्मध्वःपिबतंमधुपेभिरासभिः । युवोर्हिपूर्वंसवितोषसोरथमृतायचित्रंघृतवंतमि

(१।७।४) त्रिश्चिदितिद्वादशर्चस्यसूक्तस्यहिरण्यस्तूपोश्विनौजगतीनवम्यंत्येत्रिष्टुभौ ।

ष्य॑ति ॥ आना॑सत्यात्रि॒भिरे॑काद॒शैरि॒हदे॒वेभि॑र्यातंमधु॒पेय॑मश्विना । प्रायु॒स्तारि॑ष्टं॒नीरपां॑सिमृक्षतं॒सेध॑तं॒द्वेषो॒भव॑तंसचा॒भुवा॑ ॥ आनो॑ऽअश्विनात्रि॒वृता॒रथे॑ना॒र्वाँचं॑र॒यिंव॑हतंसु॒वीरं॑ । शृ॒ण्वंता॑वा॒मव॑सेजोहवीमिवृ॒धेचं॑नोभवतं॒वाज॑सातौ ॥५॥ (१।७५) ह्वया॑म्य॒ग्निंप्र॑थ॒मंस्व॒स्तये॒ह्वया॑मिमि॒त्रावरु॑णावि॒हाव॑से । ह्वया॑मि॒रात्रीं॒जग॑तोनि॒वेश॑नीं॒ह्वया॑मिदे॒वंस॑वि॒ता॑रमू॒तये॑ ॥ आकृ॒ष्णेन॒रज॑सा॒वर्त॑मानोनिवे॒शय॑न्न॒मृतं॒मर्त्यं॑च । हि॒र॒ण्यये॑नसवि॒तारथे॒नादे॒वोया॑ति॒भुव॑नानि॒पश्य॑न् ॥ याति॑दे॒वःप्र॒वता॒यात्यु॒द्वता॒याति॑शु॒भ्राभ्यां॑यज॒तोहरि॑भ्यां । आदे॒वोया॑तिसवि॒ताप॑रा॒वतोप॒विश्वा॑दुरि॒ताबाध॑मानः ॥ अ॒भीवृ॑तं॒कृश॑नैर्वि॒श्वरू॑पं॒हिर॑ण्यशम्यंयज॒तोबृ॒हंतं॑ । आस्था॒द्रथं॑सवि॒ताचि॒त्रभा॑नुःकृ॒ष्णारजां॑सि॒तवि॑षीं॒दधा॑नः ॥ विजना॑न्छ्या॒वाःशि॑ति॒पादो॑ऽअख्य॒न्रथं॒हिर॑ण्यप्रउगं॒वहं॑तः । शश्व॒द्विशः॑सवि॒तुर्दैव्य॑स्यो॒पस्थे॒विश्वा॒भुव॑नानितस्थुः ॥ ति॒स्रोद्याव॑ःसवि॒तुर्द्वाऽउ॒पस्थाँ॒ऽएका॑य॒मस्य॒भुव॑नेविरा॒षाट् । आ॒णिंनरथ्य॑म॒मृताधि॑तस्थुरि॒हब्र॑वीतु॒यऽउ॒तच्चिके॑तत् ॥ ६ ॥ विसु॑प॒र्णोऽअं॒तरि॑क्षाण्यख्यद्गभी॒रवे॑पा॒ऽअसु॑रःसुनी॒थः । क्वे॒३॒॑दानीं॒सूर्यः॒कश्चि॑केतकत॒मांद्यांर॒श्मिर॒स्यात॑तान ॥ अ॒ष्टौव्य॑ख्यत्क॒कुभः॑पृथि॒व्यास्त्रीधन्व॒योज॑नास॒प्तसिंधू॑न् । हि॒र॒ण्या॒क्षःस॑वि॒तादे॒वऽआगा॒द्दध॒द्रत्ना॑दा॒शुषे॒वार्या॑णि ॥

(१।७५) ह्वयामीत्येकादशर्चस्यसूक्तस्यहिरण्यस्तूपःसवितात्रिष्टुप् । आद्यायाश्चतुर्षुपादेषुक्रमेणाग्निमित्रावरुणरात्रिसवितारोदेवताः आद्यानवम्यौजगत्यौ ।

Digitization by eGangotri. Funding MoE-IKS Delhi

हिर॑ण्यपाणिःसवि॒ताविच॑र्षणिरु॒भेद्यावा॑पृथि॒वीऽअं॒तरी॑यते । अपामी॑वां॒बाध॑ते॒वेति॒सूर्य॑म॒भिकृ॒ष्णेन॒रज॑सा॒द्यामृ॑णोति ॥
हिर॑ण्यहस्तो॒असु॑रःसुनी॒थःसु॑मृळी॒कःस्ववा॑यात्व॒र्वाङ् । अ॒प॒सेध॑न्र॒क्षसो॑यातुधा॒नानस्था॑द्दे॒वःप्र॑तिदो॒षंगृ॑णा॒नः+ ॥ येते॒पं
थाः॑सवितःपू॒र्व्यासो॑रे॒णव॒ःसुकृ॑ताऽअं॒तरि॑क्षे ॥ तेभि॑र्नोऽअ॒द्यप॒थिभिः॑सु॒गेभी॑रक्षा॑चनो॒ऽआधि॑चब्रूहिदेव ॥७॥ (१।८।१)
प्रवो॑य॒ह्वंपु॑रू॒णांवि॒शांदे॑वय॒तीनां॑ । अ॒ग्निंसू॒क्तेभि॒र्वचो॑भिरीमहे॒यंसी॒मिद॒न्यई॑ळते ॥ जना॑सोऽअ॒ग्निंद॑धिरेसहो॒वृधं॑ह॒विष्मं॑
तोविधेमते । सत्वंनो॑ऽअ॒द्यसु॒मना॑ऽइ॒हावि॒ताभ॒वावाजे॑षुसंत्य ॥ प्रत्वा॑दू॒तंवृ॑णीमहे॒होता॑रंवि॒श्ववे॑दसं । म॒हस्ते॑स॒तोवि
चरं॑त्य॒र्चयो॑दि॒विस्पृशं॑तिभा॒नवः॑ ॥ दे॒वास॑स्त्वा॒वरु॑णोमि॒त्रोऽअ॑र्य॒मासंदू॒तंप्र॒त्नमिं॑धते । विश्वं॒सोऽअ॑ग्नेजयति॒त्वया॒धनं॒य
स्ते॑द॒दाश॒मर्त्यः॑ ॥ मं॒द्रोहोता॑गृ॒हप॑ति॒रग्ने॑दू॒तोवि॒शाम॑सि । त्वेविश्वा॒संग॑तानिव्र॒ताध्रु॒वायानि॑दे॒वाऽअकृ॑ण्वत ॥ ८ ॥ त्वे
ऽइद॑ग्नेसु॒भगे॑यवि॒ष्ठ्यवि॒श्वमाहू॑यतेह॒विः । सत्वंनो॑ऽअ॒द्यसु॒मना॑ऽउ॒ताप॒रंय॑क्षिदे॒वान्त्सु॒वीर्या॑ ॥ तंघे॑मि॒त्थान॑म॒स्विन॒ऽउप॑
स्व॒राज॑मासते । होत्रा॑भिर॒ग्निंमनु॑षः॒समिं॑धतेतिति॒र्वांसो॒ऽअति॒स्रिधः॑ ॥ घ्नंतो॑वृ॒त्रमं॑तर॒न्रोद॑सीऽअ॒पऽउ॒रुक्षया॑यचक्रिरे ।
भुव॒त्कण्वे॒वृषा॑द्यु॒म्न्याहु॑तः॒क्रंद॒दश्वो॒गवि॑ष्टिषु ॥ संसी॑दस्वम॒हाँअ॑सि॒शोच॑स्वदेव॒वीत॑मः ॥ विधू॒मम॑ग्नेअरु॒षंमि॑येध्यसृ॒
जप्र॑शस्तदर्श॒तं+ ॥ यंत्वा॑दे॒वासो॒मन॑वेद॒धुरि॒हयजि॑ष्ठंहव्यवाहन । यंकण्वो॒मेध्या॑तिथि॒र्धन॒स्पृतं॒यंवृषा॒यमु॑पस्तु॒तः+ ॥९॥

(१।८।१) प्रवोयह्वमितिविंशत्यृचस्यसूक्तस्यघौरःकण्वोग्निःऊर्ध्वऊषुणइतिद्वयोर्यूपःप्रगाथा (अयुजोबृहत्यःयुजःसतोबृहत्यइत्यर्थः) ॥

यमग्निंमेध्यातिथिःकण्वईधऽऋतादधि ॥ तस्यप्रेषोदीदियुस्तमिमाऽऋचस्तमग्निंवर्धयामसि ॥ रायस्पूर्धिस्वधावोस्तिहितेग्नेदेवेष्वाप्यं ॥ त्वंवाजस्यश्रुत्यस्यराजसिसनोमृळमहाँअसि ॥ ऊर्ध्वऽऊषुणऽऊतयेतिष्ठादेवोनसविता । ऊर्ध्वोवाजस्यसनितायदंजिभिर्वाघद्भिर्विह्वयामहे ॥ ऊर्ध्वोनःपाह्यंहसोनिकेतुनाविश्वंसमत्रिणंदह । कृधीनऽऊर्ध्वाचरथायजीवसेविदादेवेषुनोदुवः ॥ पाहिनोऽअग्नेरक्षसःपाहिधूर्तेरराव्णः । पाहिरीषतऽउतवाजिघांसतोबृहद्भानोयविष्ठ्य ॥ १० ॥ घनेवविष्वग्विजह्यराव्णस्तपुर्जंभयोऽअस्मध्रुक् । योमर्त्यःशिशीतेऽअत्यक्तुभिर्मानःसरिपुरीशत ॥ अग्निर्वव्नेसुवीर्यमग्निःकण्वायसौभगं । अग्निःप्रावन्मित्रोतमेध्यातिथिमग्निःसाताऽउपस्तुतं+ ॥ अग्निनातुर्वशंयदुंपरावतऽउग्रादेवंहवामहे ॥ अग्निर्नयन्नववास्त्वंबृहद्रथंतुर्वीतिंदस्यवेसहः ॥ नित्वामग्नेमनुर्दधेज्योतिर्जनायशश्वते ॥ दीदेथकण्वऽऋतजातऽउक्षितोयन्नमस्यंतिकृष्टयः ॥ त्वेषासोऽअग्नेरमवंतोऽअर्चयोभीमासोनप्रतीतये ॥ रक्षस्विनःसदमिद्यातुमावतोविश्वंसमत्रिणंदह ॥ ११ ॥ (१।८।२) क्रीळंवःशर्धोमारुतमनर्वाणंरथेशुभं । कण्वाऽअभिप्रगायत ॥ येपृषतीभिर्ऋष्टिभिःसाकंवाशीभिरंजिभिः । अजायंतस्वभानवः ॥ इहेवशृण्वऽएषांकशाहस्तेषुयद्वदान् । नियामंचित्रमृंजते ॥ प्रवःशर्धायघृष्वयेत्वेषद्युम्नायशुष्मिणे । देवत्तंब्रह्मगायत ॥ प्रशंसागोष्वघ्न्यंक्रीळंयच्छर्धोमारुतं ।

(१।८।२) क्रीळंवइतिपंचदशर्चस्यसूक्तस्यकण्वोमरुतोगायत्री ।

जंभेरसंस्यवावृधे ॥ १२ ॥ कोवोवर्षिष्ठऽआनरोदिवश्चग्मश्चधूतयः । यत्सीमंतंनधूनुथ+ ॥ निवोयामायमानुषोदध्रऽउ
ग्रायमन्यवे । जिहीतपर्वतोगिरिः+ ॥ येषामज्मेषुपृथिवीजुजुर्वाँऽइवविश्पतिः ॥ भियायामेषुरेजते । स्थिरंहिजानमेषां
वयोमातुर्निरेतवे । यत्सीमनुद्विताशवः ॥ उदुत्येसूनवोगिरःकाष्ठाऽअज्मेष्वत्नत । वाश्राऽअभिज्ञुयातवे ॥१३॥ त्यं
॥१९॥ चिद्धादीर्घंपृथुंमिहोनपातममृध्रं । प्रच्यावयंतियामभिः ॥ मरुतोयद्धवोबलंजनाँऽअचुच्यवीतन । गिरीँऽरचुच्यवीत
न ॥ यद्धयांतिमरुतःसंहब्रुवतेध्वन्ना ॥ शृणोतिकश्चिदेषां ॥ प्रयातशीभमाशुभिःसंतिकण्वेषुवोदुवः ॥ तत्रोषुमादया
ध्वै ॥ अस्तिहिष्मामदायवःस्मसिष्मावयमेषां । विश्वंचिदायुर्जीवसे ॥ १४ ॥ (१।८।३) कद्धनूनंकधप्रियःपितापुत्रं
नहस्तयोः । दधिध्वेवृक्तबर्हिषः ॥ क्वनूनंकद्वोऽअर्थंगंतादिवोनपृथिव्याः । क्ववोगावोनरण्यंति ॥ क्ववःसुम्नानव्यांसि
मरुतःक्वसुविता । क्वो३विश्वानिसौभगा ॥ यद्यूयंपृश्निमातरोमर्तासःस्यातन । स्तोतावोऽअमृतःस्यात् ॥ मावोमृगोन
यवसेजरिताभूदजोष्यः । पथायमस्यगादुप ॥ १५ ॥ मोषुणःपरापरानिर्ऋतिर्दुर्हणावधीत् । पदीष्टतृष्णयासह+ ॥
सत्यंत्वेषाऽअमवंतोधन्वंचिदारुद्रियासः । मिहंकृण्वंत्यवातां+ ॥ वाश्रेवविद्युन्मिमातिवत्संनमातासिषक्ति । यदेषां
वृष्टिरसर्जि ॥ दिवाचित्तमःकृण्वंतिपर्जन्येनोदवाहेन । यत्पृथिवींव्युंदंति ॥ अधस्वनान्मरुतांविश्वमासद्मपार्थिवं । ॥१९॥

(१।८।३) कद्धनूनमितिपंचदशर्चस्यसूक्तस्यकण्वोमरुतोगायत्री ।

अरेजंतप्रमानुषाः ॥ १६ ॥ मरुतोवीळुपाणिभिश्चित्रारोधस्वतीरनु । यातेमखिद्रयामभिः ॥ स्थिरावःसंतुनेमयोर
थाऽअश्वासऽएषां । सुसंस्कृताऽअभीशवः ॥ अच्छावदातनागिराजरायैब्रह्मणस्पतिं । अग्निंमित्रंनदर्शतं+ ॥ मिमी
हिश्लोकमास्येपर्जन्यइवततनः । गायंगायत्रमुक्थ्यं* ॥ वंदस्वमारुतंगणंत्वेषंपनस्युमर्किणं । अस्मेवृद्धाऽअसन्निह+ ॥
॥ १७ ॥ (१।८।४) प्रयदित्थापरावतःशोचिर्नमानमस्यथ । कस्यक्रत्वामरुतःकस्यवर्पसाकंयाथकंहधूतयः ॥
स्थिरावःसंत्वायुधापराणुदेवीळूऽउतप्रतिष्कभे । युष्माकमस्तुतविषीपनीयसीमामर्त्यस्यमायिनः ॥ पराहयत्स्थिरंह
थनरोवर्तयथागुरु । वियाथनवनिनःपृथिव्याव्याशाःपर्वतानां ॥ नहिवःशत्रुर्विविदेऽअधिद्यविनभूम्यांरिशादसः ।
युष्माकमस्तुतविषीतनायुजारुद्रासोनूचिदाधृषे ॥ प्रवेपयंतिपर्वतान्विविंचंतिवनस्पतीन् । प्रोऽआरतमरुतोदुर्मदा
ऽइवदेवासःसर्वयाविशा+ ॥ १८ ॥ उपोरथेषुपृषंतीरयुग्ध्वंप्रष्टिर्वहतिरोहितः । आवोयामायपृथिवीचिदश्रोदबीभयं
तमानुषाः ॥ आवोमक्षूतनायकंरुद्राऽअवोवृणीमहे । गंतानूनंनोवसायथापुरेत्थाकण्वायबिभ्युषे ॥ युष्मेषितोमरु
तोमर्त्येषितऽआयोनोअभ्वऽईषते । वितंयुयोतशवसाव्योजसावियुष्माकाभिरूतिभिः ॥ असामिहिप्रयज्यवःकण्वंद
दप्रचेतसः । असामिभिर्मरुतआनऽऊतिभिर्गंतावृष्टिंनविद्युतः ॥ असाम्योजोबिभृथासुदानवोसामिधूतयःशवः ।

(१।८।४) प्रयदित्थेतिदशर्चस्यसूक्तस्यकण्वोमरुतोबार्हतप्रगाथाः (अयुजोबृहत्यःयुजःसतोबृहत्यः) ।

ऋषिद्विषेमरुतःपरिमन्यवऽइषुंनसृजतद्विषं ॥ १९ ॥ (१।८।५) उत्तिष्ठब्रह्मणस्पतेदेवयंतस्त्वेमहे । उपप्रयंतुमरु
तःसुदानवऽइंद्रप्राशूर्भवासचा ॥ त्वामिद्धिसहसस्पुत्रमर्त्यउपब्रूतेधनेहिते । सुवीर्यंमरुतऽआस्वश्व्यंदधीतयोवऽआ
चके+ ॥ प्रैतुब्रह्मणस्पतिःप्रदेव्येतुसूनृता । अच्छावीरंनर्यंपंक्तिराधसंदेवायज्ञंनयंतुनः ॥ योवाघतेददातिसूनरंवसुस
धत्तेअक्षितिश्रवः । तस्माऽइळांसुवीरामायजामहेसुप्रतूर्तिमनेहसं ॥ प्रनूनंब्रह्मणस्पतिर्मंत्रंवदत्युक्थ्यं । यस्मिन्निंद्रो
वरुणोमित्रोऽअर्यमादेवाऽओकांसिचक्रिरे+ ॥ २० ॥ तमिद्वोचेमाविदथेषुशंभुवंमंत्रंदेवाऽअनेहसं । इमांचवाचंप्र
तिहर्यथानरोविश्वेद्वामावोऽअश्नवत् ॥ कोदेवयंतमश्नवज्जनंकोवृक्तबर्हिषं । प्रप्रदाश्वान्पस्त्याभिरस्थितांतर्वावत्क्षयंद
धे ॥ उपक्षत्रंपृंचीतहंतिराजभिर्भयेचित्सुक्षितिंदधे । नास्यवर्तानतरुतामहाधनेनार्भेऽअस्तिवज्रिणः ॥ २१ ॥
(१।८।६) यंरक्षंतिप्रचेतसोवरुणोमित्रोऽअर्यमा । नूचित्सदभ्यतेजनः ॥ यंबाहुतेवपिप्रतिपांतिमर्त्यंरिषः । अरिष्टः
सर्वऽएधते ॥ विदुर्गाविद्विषःपुरोघ्नंतिराजानऽएषां । नयंतिदुरितातिरः+ ॥ सुगःपंथाऽअनृक्षरआदित्यासऋतंयते ।
नात्रावखादोऽअस्तिवः ॥ यंयज्ञंनयथानरऽआदित्याऽऋजुनापथा । प्रवःसधीतयेनशत् ॥ २२ ॥ सरत्नंमर्त्योवसु

(१।८।५) उत्तिष्ठेत्यष्टर्चस्यसूक्तस्यकण्वोब्रह्मणस्पतिःअयुजोबृहत्यःयुजःसतोबृहत्यः ।(१।८।६) यंरक्षन्तीतिनवर्चस्यसूक्तस्यघौरःकण्वःआद्यानांतिसृणामंत्यानांतिसृणांचवरुणमित्रार्यमणस्तृतीयादितिसृणामादित्यागायत्री ।

विश्वं॑तो॒कमु॒तत्मना॑ ॥ अच्छा॑गच्छ॒त्यस्तृ॑तः ॥ क॒थारा॑धामसखाय॒ःस्तोमं॑मि॒त्रस्या॑र्य॒म्णः । महि॒प्सरो॒वरु॑णस्य ॥ मावो॒
घ्नंतं॒माशपं॑तं॒प्रति॑वोचेदेव॒यंतं॑ । सु॒म्नैरिद्व॒ऽआवि॑वासे ॥ च॒तुर॑श्चि॒द्दद॑मानाद्बि॒भीयादानिधा॑तोः । नदु॑रु॒क्तायस्पृहये
त् ॥ २३ ॥ (१।८।७) संपू॑ष॒न्नध्व॑नस्तिर॒व्यंहो॑विमुचोनपात् । सक्ष्वा॑देव॒प्रण॑स्पु॒रः+ ॥ योनः॑पूषन्न॒घोवृको॑दु॒ःशेव॑
आ॒दिदे॑शति । अप॑स्म॒तंप॒थोज॑हि ॥ अप॒त्यंप॑रिपं॒थिनं॑मुषी॒वाणं॑हुर॒श्चितं॑ । दू॒रमधि॑स्रु॒तेर॑ज ॥ त्वंतस्य॑द्वया॒विनो॒घशं॑स
स्य॒कस्य॑चित् । प॒दाभिति॑ष्ठ॒तपु॑षिं ॥ आतत्ते॑दस्रमंतु॒मःपूषं॒नवो॑वृणीमहे । येन॑पि॒तॄनचो॑दयः ॥ २४ ॥ अधा॑नोविश्व
सौभग॒हि॒र॑ण्यवाशीमत्तम । धना॑निसु॒षणा॑कृधि ॥ अति॑नःस॒श्चतो॑नयसु॒गानः॑सु॒पथा॑कृणु । पूष॑न्नि॒हक्रतुं॑विदः ॥ अ॒
भिसू॒यव॑संनय॒नन॑वज्वा॒रोऽअध्व॑ने । पूष॑न्नि॒हक्रतुं॑० ॥ श॒ग्धिपू॒र्धिप्रयं॑सिचशिशी॒हिप्रास्यु॒दरं॑ । पूष॑न्नि॒हक्रतुं॑० ॥
नपू॒षणं॑मेथामसिसू॒क्तैर॒भिगृं॑णीमसि । वसू॑निद॒स्ममी॑महे ॥ २५ ॥ (१।८।८) कद्रु॒द्राय॒प्रचे॑तसेमी॒ह्लुष्टं॑माय॒तव्यं॑से ।
वो॒चेम॒शंतं॑मंहृ॒दे+ ॥ यथा॑नो॒ऽअदि॑ति॒ःकर॒त्पश्वे॒नृभ्यो॒यथा॒गवे॑ । यथा॑तो॒काय॑रु॒द्रियं॑ ॥ यथा॑नोमि॒त्रोवरु॑णो॒यथा॑रु॒द्र
श्चिके॑तति । यथा॒विश्वे॑स॒जोष॑सः ॥ गा॒थप॑तिंमे॒धप॑तिंरु॒द्रंजला॑षभेषजं । तच्छं॒योःसु॒म्नमी॑महे ॥ यःशु॒क्रऽइ॑व॒सूर्यो॒हि

(१।८।७) संपूषन्नितिदशर्चस्यसूक्तस्यकण्वःपूषागायत्री । (१।८।८) कद्रुद्रायेतिनवर्चस्यसूक्तस्यकण्वोरुद्रस्तृतीयायामित्रावरुणौच सप्तम्यादितृचस्यसोमोगायत्र्यन्त्यानुष्टुप् ।

रण्यमिवरोचते । श्रेष्ठोदेवानांवसुः ॥ २६ ॥ शंनःकरत्यर्वतेसुगंमेषायमेष्ये । नृभ्योनारिभ्योगवे ॥ अस्मेसोमश्रियमधिनिधेहिशतस्यनृणां । महिश्रवस्तुविनृम्णं+ ॥ मानःसोमपरिबाधोमारातयोजुहुरंत । आनऽइंदोवाजेभज ॥ यास्तेप्रजाऽअमृतस्यपरस्मिन्धामन्नृतस्य । मूर्धानाभासोमवेनऽआभूषंतीःसोमवेदः ॥ २७ ॥ (१।९।१) अग्नेविवस्वदुषसश्चित्रंराधोऽअमर्त्य । आदाशुषेजातवेदोवहात्वमद्यादेवाँऽउषर्बुधः ॥ जुष्टोहिदूतोऽअसिहव्यवाहनोग्नेरथीरध्वराणां । सजूरश्विभ्यामुषसासुवीर्यमस्मेधेहिश्रवोबृहत्+ ॥ अद्यादूतंवृणीमहेवसुमग्निंपुरुप्रियं । धूमकेतुंभाऽऋजीकंव्युष्टिषुयज्ञानामध्वरश्रियं ॥ श्रेष्ठंयविष्ठमतिथिंस्वाहुतंजुष्टंजनायदाशुषे । देवाँअच्छायातवेजातवेदसमग्निमीळेव्युष्टिषु ॥ स्तविष्यामित्वामहंविश्वस्यामृतभोजन । अग्नेत्रातारममृतंमियेध्ययजिष्ठंहव्यवाहन ॥ २८ ॥ सुशंसोबोधिगृणतेयविष्ठ्यमधुजिह्वःस्वाहुतः । प्रस्कण्वस्यप्रतिरन्नायुर्जीवसेनमस्यादैव्यंजनं ॥ होतारंविश्ववेदसंसंहित्वाविशऽइंधते । सऽआवहपुरुहूतप्रचेतसोग्नेदेवाँऽइहद्रवत्+ ॥ सवितारमुषसमश्विनाभगमग्निंव्युष्टिषुक्षपः । कण्वासस्त्वासुतसोमासऽइंधतेहव्यवाहंस्वध्वर ॥ पतिर्ह्यध्वराणामग्नेदूतोविशामसि । उषर्बुधऽआवहसोमपीतयेदेवाँऽअद्यस्वर्दृशः ॥ अग्नेपूर्वाअनूषसोविभावसोदीदेथविश्वदर्शतः । असिग्रामेष्ववितापुरोहितोसियज्ञेषुमानुषः ॥ २९ ॥ नित्वायज्ञस्य

(१।९।१) अग्नेविवस्वदितिचतुर्दशर्चस्यसूक्तस्यकाण्वःप्रस्कण्वोऽग्निः [illegible] अयुजोबृहत्यःयुजःसतोबृहत्यः ।

साधं॑न॒मग्ने॒होता॑रमृ॒त्विजं॑ । म॒नु॒ष्वद्दे॑वधीमहि॒प्रचे॑तसंजी॒रंदू॒तमम॑र्त्यं ॥ यद्दे॒वानां॑मित्रमहःपु॒रोहि॒तों॑तरो॒यासिं॑दू॒त्यं॑ । सिंधों॑रिव॒प्रस्वं॑नितासऽऊ॒र्म॑यो॒ग्नेभ्राजं॑तेऽअ॒र्च॑यः ॥ श्रु॒धिश्रुं॑त्कर्ण॒वह्निं॑भिर्दे॒वैरं॑ग्नेस॒यावं॑भिः । आसीं॑दंतुब॒र्हिषिं॑मि॒त्रोऽअ॑र्य॒माप्रा॑त॒र्या॑वां॑णोऽअध्व॒रं+ ॥ शृ॒ण्वं॑तु॒स्तोमं॑म॒रुतं॑ःसु॒दानं॑वोग्निजि॒ह्वाऽऋं॑ता॒वृधः॑ । पिबं॑तु॒सोमं॒वरुं॑णोधृ॒तव्रं॑तो॒श्विभ्यां॑मुषसां॑स॒जूः+ ॥ ३० ॥ (१।९।२) त्वमं॑ग्ने॒वसूँ॑ऽरि॒हरु॒द्राँ॑ऽआं॑दि॒त्याँऽउ॒त । यजां॑स्वध्व॒रंजन॒मनुं॑जातंघृ॒तप्रुषं॑ ॥ श्रु॒ष्टी॒वा॑नो॒हिदा॒शुषें॑दे॒वाऽअं॑ग्ने॒विचें॑तसः । तान्रों॑हिदश्वगि॒र्व॑ण॒स्त्रयं॑स्त्रिं॑शत॒मावं॑ह ॥ प्रि॒य॒मे॒ध॒वदं॑त्रि॒वज्जा॑तवें॑दोविरू॒प॒वत् । अं॒गि॒र॒स्वन्मं॑हिव्रत॒प्रस्कं॑ण्वस्यश्रु॒धी॒हवं॑ ॥ महिं॑केरवऽऊ॒तयें॑प्रि॒यमें॑धाऽअहूषत । राजं॑तमध्व॒राणां॑म॒ग्निंशु॒क्रेणं॑शो॒चिषां॑ ॥ घृ॒तां॑हवनसं॑त्ये॒माऽउ॒षुश्रुं॑धी॒गिरं॑ः । या॒भिःकण्वं॑स्यसू॒नवो॒हवं॒तेवं॑सेत्वा ॥ ३१ ॥ त्वांचिं॑त्रश्रवस्तम॒हवं॑तेवि॒क्षुजं॒तवः॑ । शो॒चिष्कें॑शंपुरुप्रि॒याग्नें॑ह॒व्याय॒वोह्ळं॑वे ॥ नित्वा॒होतां॑रमृ॒त्विजं॑दधि॒रेवं॑सु॒वित्त॑मं । श्रुत्क॑र्णंस॒प्रथं॑स्तमं॒विप्रां॑ऽअग्ने॒दिविं॑ष्टिषु ॥ आत्वा॒विप्रां॑ऽअचुच्यवुःसु॒तसों॑माऽअ॒भिप्रयं॑ः । बृ॒हद्भाबिभ्रं॑तोह॒विर॑ग्ने॒मर्तां॑यदा॒शुषें॑ ॥ प्रा॒त॒र्यां॑व्णःसहस्कृतसो॒मपे॑यां॑यसंत्य । इ॒हाद्यदैव्यं॑जनं॑ब॒र्हिरासां॑दयावसो ॥ अ॒र्वां॑चं॒दैव्यं॒जन॒मग्ने॒यक्ष्व॒सहूं॑तिभिः । अ॒यंसोमं॑ःसुदान

(१।९।२) त्वमग्नेवसूनितिदशर्चस्यसूक्तस्यप्र[illegible]नुष्टुप् ।

CC-0. Rishi Acharya Kathmandu Collection

वस्तंपाततिरोऽअह्न्यम् ॥ ३२ ॥ (१।९।३) एषोऽउषाअपूर्व्याव्युच्छतिप्रियादिवः । स्तुषेवामश्विनाबृहत्+ ॥ यादस्रासिंधुमातरामनोतरारयीणां । धियादेवावसुविदा ॥ वच्यंतेवांककुहासोजूर्णायामधिविष्टपि । यद्वांरथोविभिष्पतात् ॥ हविषाजारोऽअपांपिपर्तिपपुरिर्नरा । पिताकुटस्यचर्षणिः+ ॥ आदारोवांमतीनांनासत्यामतवचसा । पातंसोमस्यधृष्णुया+ ॥ ३३ ॥ यानःपीपरदश्विनाज्योतिष्मतीतमस्तिरः । तामस्मेरासाथामिषं ॥ आनोनावामतीनांयातंपारायगंतवे । युंजाथामश्विनारथं ॥ अरित्रंवांदिवस्पृथुतीर्थेसिंधूनांरथः । धियायुयुज्रऽइंदवः ॥ दिवस्कण्वासऽइंदवोवसुसिंधूनांपदे । स्वंवव्रिंकुहधित्सथः ॥ अभूदुभाऽउऽअंशवेहिरण्यंप्रतिसूर्यः । व्यख्यज्जिह्वयासितः ॥ ३४ ॥ अभूदुपारमेतवेपंथाऽऋतस्यसाधुया । अदर्शिविस्रुतिर्दिवः+ ॥ तत्तदिदश्विनोरवोजरिताप्रतिभूषति । मदेसोमस्यपिप्रतोः ॥ वावसानाविवस्वतिसोमस्यपीत्यागिरा । मनुष्वच्छंभूऽआगतं ॥ युवोरुषाऽअनुश्रियंपरिज्मनोरुपाचरत् । ऋतावनथोऽअक्तुभिः ॥ उभापिबतमश्विनोभानःशर्मयच्छतं । अविद्रियाभिरूतिभिः ॥ ३५ ॥ इतिप्रथमाष्टकेतृतीयोऽध्यायः ॥ ३ ॥ ॥ ॥ ॥ ॥ ॥

(१।९।३) एषोउषाइतिपंचदशर्चस्यसूक्तस्यप्रस्कण्वोश्विनौगायत्री ।

तृतीयाध्याये वर्गाः ३५ सूक्तानि १४ ऋचः १७३ ॥ त्यागः ॥ इंद्रायेदं. १५ अश्विभ्यामिदं. १२ अग्निमित्रावरुणरात्रिसवितृभ्यइदं. सवित्रइदं. १० अग्नयइदं. १२ यूपायेदं. २ अग्नयइदं. ६ मरुद्भ्यइदं. ४० ब्रह्मणस्पतयइदं. ८ वरुणमित्रार्यमभ्यइदं. ३ आदित्येभ्यइदं. ३ वरुणमित्रार्यमभ्यइदं. ३ पूष्णइदं. १० रुद्रायेदं. २ मित्रावरुणरुद्रेभ्यइदं. रुद्रायेदं. ३ सोमायेदं. ३ अग्न्यश्व्युषोभ्यइदं. २ अग्नयइदं. २१ अग्निदेवेभ्यइदं. अश्विभ्यामिदं. १५॥ इतिप्रथमेतृतीयोऽध्यायः ॥

अयंदशप्रागाथंतुसहषोळशोषस्यंतूंषश्चतुष्कमानुष्टुभंतूंदुत्यंसप्तोनासौर्यंनवाद्यागायत्र्योंत्यस्तृचोरोगघ्नंउपनिषदंत्योर्धर्चोंद्विषघ्नोंऽभित्यंपंचोनासव्योद्वित्रिष्टुबंतंमंगिराइंद्रतुल्यंपुत्रमिच्छंन्नभ्यध्यायत्सव्यइतींद्रएवास्यपुत्रोजायतत्यंसुत्रयोदश्यंत्येत्रिष्टुभौन्यूष्वेकादशांत्येत्रिष्टुभौमानोंत्यात्रिष्टुंप्षष्ठ्यष्टमीनवमीचंदिवश्चिदष्टौजागतंह्येषप्रषट्कंप्रमंहिष्ठायनूचिन्नवनोधागौतमंआग्नेयंहिचतुस्त्रिष्टुबंतंवयाइत्सप्तवैश्वानरीयंवह्निंपंचास्माइदुषोळश ॥४॥

हरिः ॐ३म् ॥ (१।९।४) अयंवांमधु॑मत्तमःसुतःसोम॑ऽऋतावृधा । तम॑श्विनापिबतंतिरोऽअ॑ह्न्यंधत्तंरत्ना॑निदाशुषे॑ ॥ त्रिवं॑धुरेण॑त्रिवृता॑सुपेश॑सारथे॑नाया॑तमश्विना । कण्वा॑सोवांब्रह्म॑कृण्वंत्यध्वरेतेषां॑सुशृ॑णुतंहवं॑ ॥ अश्वि॑नामधुमत्तमंपातंसोम॑मृतावृधा । अथाद्यद॑स्रावसुबिभ्र॑तारथे॑दाश्वांस॑मुप॑गच्छतं ॥ त्रिषधस्थेबर्हि॑षि॑विश्ववेदसामध्वा॑यज्ञं

(१।९।४) अयंवामितिदशर्चस्यसूक्तस्यप्रस्कण्वोश्विनौअयुजोबृहत्योयुजःसतोबृहत्यः ।

मि॑मिक्षतं । कण्वा॑सोवांसु॒तसो॑मा॒ऽअ॒भिद्य॑वोयु॒वांह॑वंते॒ऽअश्विना ॥ याभि॒ःकण्व॑म॒भिष्टि॑भि॒ःप्राव॑तंयु॒वम॑श्विना । ता
भि॒ःष्व॑१॒स्माँऽअ॑वतंशुभस्पती॒पा॑तंसोम॑मृतावृधा ॥ १ ॥ सु॒दासे॑दस्रा॒वसु॒बिभ्र॑ता॒रथे॒पृक्षो॑वहतमश्विना । र॒यिंस॑मु॒द्रादु॒
तवा॑दि॒वस्पर्य॒स्मेध॑त्तंपुरु॒स्पृहं॑ ॥ यन्ना॑सत्यापरा॒वति॒यद्वा॒स्थोअधि॑तु॒र्वशे॑ । अतो॒रथे॑नसु॒वृता॑न॒ऽआग॑तंसा॒कंसूर्य॑स्यर॒श्मि
भिः ॥ अ॒र्वांचा॑वा॒ंसप्त॑योध्वर॒श्रियो॒वहं॑तु॒सव॒नेदुप॑ । इषं॑पृं॒चंता॑सु॒कृते॑सु॒दान॑व॒ऽआब॒र्हिःसी॑दतंनरा ॥ तेन॑नास॒त्यागतं॒
रथे॑न॒सूर्य॑त्वचा । येन॒शश्व॑दू॒हथु॑र्दा॒शुषे॒वसु॒मध्वः॒सोम॑स्यपी॒तये॑ ॥ उ॒क्थेभि॑र॒र्वाग॑वसेपुरू॒वसू॑ऽअ॒र्कैश्च॒निह्व॑यामहे । शश्व॒
त्कण्वा॑ना॒ंसद॑सिप्रि॒येहि॒कंसोमं॑प॒पथु॑रश्विना ॥ २ ॥ (१।९।५) स॒हवा॒मेन॑नऽउषो॒व्यु॑च्छादुहितर्दिवः । स॒हद्यु॒म्नेन॑बृ
ह॒ताविं॑भावरिरा॒यादे॑विदा॒स्व॑ती ॥ अश्वा॑वती॒र्गोम॑तीर्विश्वसु॒विदो॒भूरि॑च्यवंत॒वस्त॑वे । उदी॑रय॒प्रति॑मासू॒नृता॑ऽउष॒श्चोद॒
राधो॑म॒घोनां॑ ॥ उ॒वासो॒षाऽउ॒च्छाच्च॒नुदे॒वीजी॒रारथा॑नां । येऽअ॑स्याऽआ॒चर॑णेषुदध्रि॒रेस॑मु॒द्रेनश्र॑व॒स्यवः॑ ॥ उषो॒येते॒प्र
यामे॑षुयुं॒जते॒मनो॑दा॒नाय॑सू॒रयः॑ । अत्राह॒तत्कण्व॑ऽएषां॒कण्व॑तमो॒नाम॑गृणातिनृ॒णां⁺ ॥ आघा॒योषे॑वसू॒नर्यु॒षाया॑तिप्रभुं॒
जती । ज॒रयं॑ती॒वृज॑नंप॒द्वदी॑यत॒ऽउत्पा॑तयतिप॒क्षिणः॑ ॥ ३ ॥ वियासृ॒जति॒सम॑नं॒व्य॑१॒र्थिनः॑प॒दंनवे॒त्योद॑ती । वयो॒न
किष्टे॑पप्ति॒वांस॑ऽआसते॒व्यु॑ष्टौवाजिनीवति ॥ ए॒षायु॑क्तपरा॒वतः॒सूर्य॑स्यो॒दय॑ना॒दधि॑ । श॒तंरथे॑भिःसु॒भगो॒षाऽइ॒यंविया॑

(१।९।५) सहवामेनेतिषोळशर्चस्यसूक्तस्यप्रस्कण्वउषाःअयुजोबृहत्योयुजःसतोबृहत्यः ।

त्य॒भिमानु॑षान् ॥ विश्व॑मस्यानानाम॒चक्ष॑से॒जग॒ज्ज्योति॑ष्कृणोतिसू॒नरी॑ । अप॒द्वेषो॑म॒घोनी॑दुहि॒तादि॒वऽउ॒षाऽउ॑च्छ॒दप॒स्रिधः॑ ॥ उष॒ऽआभा॑हिभा॒नुना॑च॒न्द्रेण॑दुहितर्दि॑वः । आ॒वह॑न्ती॒भूर्य॒स्मभ्य॒ंसौभ॑गंव्यु॒च्छन्ती॒दिवि॑ष्टिषु ॥ विश्व॑स्य॒हिप्राण॑नं॒जीव॑नं॒त्वेवियदु॒च्छसि॑सूनरि । सानो॒रथे॑नबृह॒ताविभा॑वरिश्रु॒धिचि॑त्रामघे॒हव॑म् ॥ ४ ॥ उषो॒वाज॒ंहिव॑स्व॒यश्चि॒त्रोमानु॑षे॒जने॑ । तेना॑वहसु॒कृतो॑ऽअध्व॒राँऽउप॒येत्वा॑गृ॒णन्ति॒वह्न॑यः ॥ विश्वा॑न्दे॒वाँऽआव॑ह॒सोम॑पीतये॒ऽन्तरि॑क्षादुष॒स्त्वं । सास्मासु॑धा॒गोम॒दश्वा॑वदु॒क्थ्य॑१॒मुषो॒वाज॑ंसु॒वीर्य॑म् ॥ यस्या॒रुश॑न्तोऽअ॒र्चय॒ःप्रति॑भ॒द्राऽअदृ॑क्षत । सानो॑र॒यिंवि॒श्ववा॑रंसु॒पेश॑समु॒षाद॑दातु॒सुग्म्य॑म् ॥ येचि॒द्धित्वामृष॑य॒ःपूर्व॑ऽऊ॒तये॑जुहू॒रेव॑सेमहि । सान॒ःस्तोमाँ॑ऽअ॒भिगृ॑णीहि॒राध॒सोष॑ःशु॒क्रेण॑शो॒चिषा॑ ॥ उषो॒यद॒द्यभा॒नुना॒विद्वारा॑वृ॒णवो॑दि॒वः । प्रनो॑यच्छतादवृ॒कंपृ॑थुच्छ॒र्दिःप्रदे॑वि॒गोम॑ती॒रिष॑ः ॥ संनो॑रा॒याबृ॑ह॒तावि॒श्वपे॑शसामिमि॒क्ष्वासमिळा॑भि॒रा । संद्यु॒म्नेन॑विश्व॒तुरो॑षोमहि॒संवाजै॑र्वाजिनीवति ॥ ५ ॥ (१।९।६) उषो॑भ॒द्रेभि॒राग॑हिदि॒वश्चि॑द्रोच॒नादधि॑ । वह॑न्त्वरु॒णप्स॑व॒ऽउप॑त्वासो॒मिनो॑गृ॒हं+ ॥ सु॒पेश॑संसु॒खंरथ॒ंयम॒ध्यस्था॑ऽउष॒स्त्वं । तेना॑सु॒श्रव॑सं॒जन॒ंप्रावा॒द्यदु॑हितर्दिवः ॥ वय॑श्चि॒त्तेपत॒त्रिणो॑द्वि॒पच्चतु॑ष्पदर्जुनि । उष॒ःप्रार॑न्नृ॒तूँरनु॑दि॒वोऽअन्ते॑भ्य॒स्परि॑ ॥ व्यु॒च्छन्ती॒हिर॒श्मि

(१।९।६) उषोभद्रेभिरितिचतुर्ऋचस्यसूक्तस्यप्रस्कण्वउषाअनुष्टुप् ।

ऋक्सं. भिर्विश्वमाभासिरोचनं । तांत्वामुषर्वसूयवोगीर्भिःकण्वाऽअहूषत ॥ ६ ॥ (१।९।७) उदुत्यंजातवेदसंदेवंवहंतिके मंडलं १
अ.१अ.४ तवः । दृशेविश्वायसूर्यम् ॥ अपत्येतायवोयथानक्षत्रायंत्यक्तुभिः । सूरायविश्वचक्षसे ॥ अदृश्रमस्यकेतवोविरश्मयो अनु. १०
॥२४॥ जनाँऽअनु । भ्राजंतोऽअग्नयोयथा ॥ तरणिर्विश्वदर्शतोज्योतिष्कृदसिसूर्य । विश्वमाभासिरोचनं⁺ ॥ प्रत्यङ्देवा
नांविशःप्रत्यङ्ङुदेषिमानुषान् । प्रत्यङ्विश्वंस्वर्दृशे⁺ ॥ ७ ॥ येनापावकचक्षसाभुरण्यंतंजनाँऽअनु । त्वंवरुणपश्यसि ॥
विद्यामेषिरजस्पृथ्वहामिमानोऽअक्तुभिः । पश्यंजन्मानिसूर्य ॥ सप्तत्वाहरितोरथेवहंतिदेवसूर्य । शोचिष्केशंविचक्ष
ण ॥ अयुक्तसप्तशुंध्युवःसूरोरथस्यनप्त्यः । ताभिर्यातिस्वयुक्तिभिः ॥ उद्वयंतमसस्परिज्योतिष्पश्यंतऽउत्तरं । देवं
देवत्रासूर्यमगन्मज्योतिरुत्तमं⁺ ॥ उद्यन्नद्यमित्रमहऽआरोहन्नुत्तरांदिवं । हृद्रोगंममसूर्यहरिमाणंचनाशय ॥ शुकेषु
मेहरिमाणंरोपणाकासुदध्मसि । अथोहारिद्रवेषुमेहरिमाणंनिदध्मसि ॥ उदगादयमादित्योविश्वेनसहसासह । द्वि
षंतंमह्यंरंधयन्मोऽअहंद्विषतेरधं ॥ ८ ॥ (१।१०।१) अभित्यंमेषंपुरुहूतमृग्मियमिंद्रंगीर्भिर्मदतावस्वोऽअर्णवं ।
यस्यद्यावोनविचरंतिमानुषाभुजेमंहिष्ठमभिविप्रमर्चत ॥ अभीमवन्वन्त्स्वभिष्टिमूतयोंतरिक्षप्रांतविषीभिरावृतं । इंद्रं ॥२४॥

(१।९।७) उदुत्यमितित्रयोदशर्चस्यसूक्तस्यप्रस्कण्वःसूर्योगायत्रीअंत्याश्चतस्रोनुष्टुभः (अंत्यस्तृचोरोगघ्नउपनिषदंत्योर्धर्चोद्विषघ्नइतिगुणः) ।
(१।१०।१) अभित्यमितिपंचदशर्चस्यसूक्तस्यआंगिरसःसव्यइंद्रोजगतीअंत्येद्वेत्रिष्टुभौ ।

दक्षांसऽऋभवोमदच्युतंशतक्रतुंजवनीसूनृतारुहत् ॥ त्वंगोत्रमंगिरोभ्योवृणोरपोतात्रयेशतदुरेषुगातुवित् । ससेनंचि
द्विमदायावहोवस्वाजावाद्रिंवावसानस्यंनर्तयन् ॥ त्वमपामपिधानावृणोरपाधारयःपर्वतेदानुमद्वसु । वृत्रंयदिंद्रशव
सावधीरहिमादित्सूर्यंदिव्यारोहयोदृशे+ ॥ त्वंमायाभिरपमायिनोधमःस्वधाभिर्येऽअधिशुप्तावजुह्वत । त्वंपिप्रोर्नृम
णःप्रारुजःपुरःप्रऽऋजिश्वानंदस्युहत्येष्वाविथ ॥ ९ ॥ त्वंकुत्संशुष्णहत्येष्वाविथारंधयोतिथिग्वायशंबरम् । महांतंचि
दर्बुदंनिक्रमीःपदासनादेवदस्युहत्यायजज्ञिषे ॥ त्वेविश्वातविषीसध्र्यग्घितातवराधःसोमपीथायहर्षते । तववज्रश्चि
कितेबाह्वोर्हितोवृश्चाशत्रोरवविश्वानिवृष्ण्या ॥ विजानीह्यार्यान्येचदस्यवोबर्हिष्मतेरंधयाशासदव्रतान् । शाकीभव
यजमानस्यचोदिताविश्वेत्तातेसधमादेषुचाकन ॥ अनुव्रतायरंधयन्नपव्रतानाभूभिरिंद्रःश्नथयन्ननाभुवः ॥ वृद्धस्य
चिद्वर्धतोद्यामिनक्षतःस्तवानोवम्रोविजघानसंदिहः ॥ तक्षद्यत्तऽउशनासहसासहोविरोदसीमज्मनाबाधतेशवः ।
आत्वावातस्यनृमणोमनोयुजऽआपूर्यमाणमवहन्नभिश्रवः ॥ १० ॥ मंदिष्टयदुशनेकाव्येसचाँऽइंद्रोवंकूवंकुतराधिति
ष्ठति । उग्रोययिंनिरपःस्रोतसासृजद्विशुष्णस्यदृंहिताऽऐरयत्पुरः ॥ आस्मारथंवृषपाणेषुतिष्ठसिशार्यातस्यप्रभृतायेषु
मंदसे । इंद्रयथासुतसोमेषुचाकनोनर्वाणंश्लोकमारोहसेदिवि+ ॥ अददाऽअर्भांमहतेवचस्यवेकक्षीवतेवृचयामिंद्रसु
न्वते । मेनाभवोवृषणश्वस्यसुक्रतोविश्वेत्तातेसवनेषुप्रवाच्या ॥ इंद्रोऽअश्रायिसुध्योनिरेकेपज्रेषुस्तोमोदुर्योनयूपः ।

अश्वयुर्गव्यूरथयुर्वसूयुरिंद्रऽइद्रायःक्षयतिप्रयंता+ ॥ इदंनमोवृषभायस्वराजेसत्यशुष्मायतवसेवाचि । अस्मिन्निंद्रवृजनेसर्ववीराःस्मत्सूरिभिस्तवशर्मन्त्स्याम ॥ ११ ॥ (१।१०।२) त्वंसुमेषंमहयास्वर्विदंशतंयस्यसुभ्वःसाकमीरते । अत्यंनवाजंहवनस्यदंरथमेंद्रंववृत्यामवसेसुवृक्तिभिः ॥ सपर्वतोनधरुणेष्वच्युतःसहस्रमूतिस्तविषीषुवावृधे । इंद्रोयद्वृत्रमवधीन्नदीवृतमुब्जंनर्णांसिजर्हृषाणोऽअंधसा ॥ सहिद्वरोद्वरिषुवव्रऽऊधनिचंद्रबुध्नोमदवृद्धोमनीषिभिः । इंद्रंतमह्वेस्वपस्ययाधियामंहिष्ठरातिंसहिपप्रिरंधसः ॥ आयंपृणंतिदिविसद्मबर्हिषःसमुद्रंनसुभ्वः१स्वाऽअभिष्टयः । तंवृत्रहत्येऽअनुतस्थुरूतयःशुष्माइंद्रमवाताऽअह्रुतप्सवः ॥ अभिस्ववृष्टिंमदेअस्ययुध्यतोरघ्वीरिवप्रवणेसस्रुरूतयः । इंद्रोयद्वज्रीधृषमाणोऽअंधसाभिनद्वलस्यपरिधीँऽरिवत्रितः+ ॥ १२ ॥ परींघृणाचरतितित्विषेशवोपोवृत्वीरजसोबुध्नमाशयत् । वृत्रस्ययत्प्रवणेदुर्गृभिश्वनोनिजघंथहन्वोरिंद्रतन्यतुं+ ॥ ह्रदंनहित्वान्यृषंत्यूर्मयोब्रह्माणींद्रतवयानिवर्धना । त्वष्टाचित्तेयुज्यंवावृधेशवस्ततक्षवज्रमभिभूत्योजसं ॥ जघन्वाँऽउहरिभिःसंभृतक्रतविंद्रवृत्रंमनुषेगातुयन्नपः । अयच्छथाबाह्वोर्वज्रमायसमधारयोदिव्यासूर्यंदृशे+ ॥ बृहत्स्वश्चंद्रममवद्यदुक्थ्य१मकृण्वतभियसारोहणंदिवः । यन्मानुषप्रधनाऽइंद्रमूतयःस्वर्नृषाचोमरुतोमदन्ननु ॥ द्यौश्चिदस्यामवाँऽअहेःस्वनादयोयवीद्भियसावज्रऽइंद्रते । वृत्रस्ययद्ब

(१।१०।२) त्वंसुमेषमितिपंचदशर्चस्यसूक्तस्यसव्यइंद्रोजगत्यंत्येद्वेत्रिष्टुभौ ।

द्बधानस्यरोदसीमदेसुतस्यशवसाभिनच्छिरः ॥ १२ ॥ यदिन्न्विंद्रपृथिवीदशभुजिरहानिविश्वाततनंतकृष्टयः । अत्राहतेमघवन्विश्रुतंसहोद्यामनुशवसाबर्हणाभुवत् ॥ त्वमस्यपारेरजसोव्योमनःस्वभूत्योजाऽअवसेधृषन्मनः । चकृषेभूमिंप्रतिमानमोजसोपःस्वःपरिभूरेष्यादिवं ॥ त्वंभुवःप्रतिमानंपृथिव्याऽऋष्ववीरस्यबृहतःपतिर्भूः । विश्वमाप्राऽअंतरिक्षंमहित्वासत्यमद्धानकिरन्यस्त्वावान् ॥ नयस्यद्यावापृथिवीऽअनुव्यचोनसिंधवोरजसोऽअंतमानशुः । नोतस्ववृष्टिंमदेअस्ययुध्यतऽएकोऽअन्यच्चकृषेविश्वमानुषक्+ ॥ आर्चन्नत्रमरुतःसस्मिन्नाजौविश्वेदेवासोऽअमदन्ननुत्वा । वृत्रस्ययद्भृष्टिमतावधेननित्वमिंद्रप्रत्यानंजघंथ ॥ १४ ॥ (१।१०।३) न्यूषुवाचंप्रमहेभरामहेगिरऽइंद्रायसदनेविवस्वतः । नूचिद्धिरत्नंससतामिवाविदन्नदुष्टुतिर्द्रविणोदेषुशस्यते ॥ दुरोऽअश्वस्यदुरऽइंद्रगोरसिदुरोयवस्यवसुनऽइनस्पतिः । शिक्षानरःप्रदिवोऽअकामकर्शनःसखासखिभ्यस्तमिदंगृणीमसि ॥ शचीवऽइंद्रपुरुकृद्द्युमत्तमतवेदिदमभितश्चेकितेवसु । अतःसंगृभ्याभिभूतऽआभरमात्वायतोजरितुःकाममूनयीः ॥ एभिर्द्युभिःसुमनाएभिरिंदुभिर्निरुंधानोऽअमतिंगोभिरश्विना । इंद्रेणदस्युंदरयंतऽइंदुभिर्युतद्वेषसःसमिषारभेमहि ॥ समिंद्ररायासमिषारभेमहिसंवाजेभिःपुरुश्चंद्रैरभिद्युभिः । संदेव्याप्रमत्यावीरशुष्मयागोऽअग्रयाश्वावत्यारभेमहि ॥ १५ ॥ तेत्वामदाऽअमदन्तानिवृ

(१।१०।३) न्यूषुवाचमित्येकादशर्चस्यसूक्तस्यसव्यइंद्रोजगतीअंत्येद्वेत्रिष्टुभौ ।

CC-0. Rani Acharya Kathmandu Collection

षण्यातेसोमासोवृत्रहत्येषुसत्पते । यत्कारवेदशवृत्राण्यप्रतिबर्हिष्मतेनिसहस्राणिवर्हयः ॥ युधायुधमुपघेदेषिधृष्णुया
पुरापुरंसमिदंहंस्योजसा । नम्यायदिंद्रसख्यापरावतिंनिबर्हयोनमुचिंनाममायिनं ॥ त्वंकरंजमुतपर्णयंवधीस्तेजिष्ठया
तिथिग्वस्यवर्तनी । त्वंशतावंगृदस्याभिनत्पुरोनानुदःपरिषूताऽऋजिश्वना ॥ त्वमेतान्जनराज्ञोद्विर्दशाबंधुनासुश्रवं
सोपजग्मुषः । षष्टिंसहस्रानवतिंनवश्रुतोनिचक्रेणरथ्यादुष्पदावृणक् ॥ त्वमाविथसुश्रवसंतवोतिभिस्तवत्रामभिरिंद्र
तूर्वयाणं । त्वमस्मैकुत्समतिथिग्वमायुंमहेराज्ञेयूनेऽअरंधनायः ॥ यऽउदृचींद्रदेवगोपाःसखायस्तेशिवतमाऽअसा
म । त्वांस्तोषामत्वयासुवीराद्राघीयऽआयुःप्रतरंदधानाः ॥ १६ ॥ (१।१०।४) मानोऽअस्मिन्मघवन्पृत्स्वंहसिन
हितेऽअंतःशवसःपरीणशे । अक्रंदयोनद्यो३रोरुवद्वनाकथानक्षोणीर्भियसासमारत ॥ अर्चाशक्रायशाकिनेशचीवते
शृण्वंतमिंद्रंमहयन्नभिष्टुहि । योधृष्णुनाशवसारोदसीऽउभेवृषावृषत्वावृषभोन्यृंजते ॥ अर्चादिवेबृहतेशूष्यं१वचःस्वक्ष
त्रंयस्यधृषतोधृषन्मनः । बृहच्छ्रवाऽअसुरोबर्हणाकृतःपुरोहरिभ्यांवृषभोरथोहिषः+ ॥ त्वंदिवोबृहतःसानुकोपयोवत्मना
धृषताशंबरंभिनत् । यन्मायिनोव्रंदिनोमंदिनाधृषच्छितांगभस्तिमशनिंपृतन्यसि ॥ नियद्वृणक्षिश्वसनस्यमूर्धनिशुष्ण
स्यचिद्व्रंदिनोरोरुवद्वना । प्राचीनेनमनसाबर्हणावतायदद्याचित्कृणवःकस्त्वापरि ॥ १७ ॥ त्वमाविथनर्यंतुर्व

(१।१०।४) मानोअस्मिन्नित्येकादशर्चस्यसूक्तस्यसव्यइंद्रोजगती [illegible] नवम्येकादश्यास्त्रिष्टुभः ।

शंयदुंत्वंतुर्वीतिंवय्यंशतक्रतो । त्वंरथमेतशंकृत्व्येधनेत्वंपुरोनवतिंदंभयोनव ॥ सघाराजासत्पतिःशूशुवज्जनोरातह
व्यःप्रतियःशासमिन्वति । उक्थावायोऽअभिगृणातिराधसादानुरस्माऽउपरापिन्वतेदिवः+ ॥ असमंक्षत्रमसमामनी
षाप्रसोमपाऽअपसासंतुनेमे । येतऽइंद्रददुषोवर्धयंतिमहिक्षत्रंस्थविरंवृष्ण्यंच ॥ तुभ्येदेतेबहुलाऽअद्रिदुग्धाश्चमूषद
श्चमसाऽइंद्रपानाः । व्यश्नुहितर्पयाकाममेषामथामनोवसुदेयायकृष्व ॥ अपामतिष्ठद्धरुणह्वरंतमोंतर्वृत्रस्यजठरेषुप
र्वतः । अभीमिंद्रोनद्योवव्रिणाहिताविश्वाऽअनुष्ठाःप्रवणेषुजिघ्नते ॥ सशेवृधमधिधाद्युम्नमस्मेमहिक्षत्रंजनाषाळिंद्रत
व्यं ॥ रक्षाचनोमघोनःपाहिसूरीन्रायेचनःस्वपत्याऽइषेधाः ॥ १८ ॥ (१।१०।५) दिवश्चिदस्यवरिमाविपप्रथऽइंद्रं
नमह्नापृथिवीचनप्रति । भीमस्तुविष्मान्चर्षणिभ्यऽआतपःशिशीतेवज्रंतेजसेनवंसगः ॥ सोऽअर्णवोननद्यःसमुद्रियः
प्रतिगृभ्णातिविश्रितावरीमभिः । इंद्रःसोमस्यपीतयेवृषायतेसनात्सयुध्मऽओजसापनस्यते ॥ त्वंतमिंद्रपर्वतंनभोज
सेमहोनृम्णस्यधर्मणामिरज्यसि । प्रवीर्येणदेवतातिचेकितेविश्वस्माऽउग्रःकर्मणेपुरोहितः ॥ सऽइद्वनेनमस्युभिर्वच
स्यतेचारुजनेषुप्रब्रुवाणऽइंद्रियं । वृषाछंदुर्भवतिहर्यतोवृषाक्षेमेणधेनाँमघवायदिन्वति ॥ सऽइन्महानिसमिथानिम
ज्मनाकृणोतियुध्मऽओजसाजनेभ्यः । अधाचनश्रद्दधतित्विषीमतऽइंद्रायवज्रंनिघनिघ्नतेवधं+ ॥ १९ ॥ सहिश्रव

(१।१०।५) दिवश्चिदित्यष्टर्चस्यसूक्तस्यसव्यइंद्रोजगती ।

स्युःसदनानिकृत्रिमाक्ष्मयावृधानऽओजसाविनाशयन् । ज्योतींषिकृण्वन्नवृकाणियज्यवेवसुक्रतुःसर्तवाऽअपःसृजत् ॥
दानायमनःसोमपावन्नस्तुतेवाचाहरीवंदनश्रुदाकृधि । यमिंष्ठासःसारथयोयऽइंद्रतेनत्वाकेताऽआदभ्नुवंतिभूर्णयः ॥
अप्रक्षितंवसुबिभर्षिहस्तयोरषाळ्हंसहस्तन्विश्रुतोदधे । आवृतासोवतासोनकर्तृभिस्तनूषुतेक्रतवऽइंद्रभूरयः ॥ २० ॥
(१।१०।६) एषप्रपूर्वीरवतस्यचम्रिषोत्योनयोषामुदयंस्तभुर्वणिः । दक्षंमहेपाययतेहिरण्ययंरथमावृत्याहरियोगमृ
भ्वसं ॥ तंगूर्तयोनेमन्निषःपरीणसःसमुद्रंनसंचरणेसनिष्यवः । पतिंदक्षस्यविदथस्यनूसहोगिरिंनवेनाऽअधिरोहतेजसा ॥ सतुर्वणिर्महाँऽअरेणुपौंस्येगिरेर्भृष्टिर्नभ्राजतेतुजाशवः । येनशुष्णंमायिनमायसोमदेदुध्रऽआभूषुरामयन्निदामनि ॥ देवीयदितविषीत्वावृधोतयऽइंद्रंसिषक्त्युषसंनसूर्यः । योधृष्णुनाशवसाबाधतेतमऽइयर्तिरेणुंवृहदर्हरिष्वणिः ॥
वियत्तिरोधरुणमच्युतंरजोतिष्ठिपोदिवऽआतासुबर्हणा । स्वर्मीळ्हेयन्मदऽइंद्रहर्ष्याहन्वृत्रंनिरपामौब्जोऽअर्णवं+ ॥
त्वंदिवोधरुणंधिषऽओजसापृथिव्याऽइंद्रसदनेषुमाहिनः । त्वंसुतस्यमदेऽअरिणाऽअपोविवृत्रस्यसमयापाष्यारुजः
॥ २१ ॥ (१।१०।७) प्रमंहिष्ठायबृहतेबृहद्रयेसत्यशुष्मायतवसेमतिंभरे । अपामिवप्रवणेयस्यदुर्धरंराधोविश्वायु
शवसेऽअपावृतं ॥ अधतेविश्वमनुहासदिष्टयऽआपोनिम्नेवसवनाहविष्मतः । यत्पर्वतेनसमशीतहर्यतऽइंद्रस्यवज्रः

(१।१०।६) एषप्रपूर्वीरितिषळर्चस्यसूक्तस्यसव्यइंद्रोजगती । (१।१०।७) प्रमंहिष्ठायेतिषळर्चस्यसूक्तस्यसव्यइंद्रोजगती ।

श्नथिताहिरण्ययः ॥ अस्मैभीमायनमसासमध्वरऽउषोनशुभ्रऽआभरापनीयसे । यस्यधामश्रवसेनामेंद्रियंज्योतिर
कारिहरितोनायसे ॥ इमेतऽइंद्रतेवयंपुरुष्टुतयेत्वारभ्यचरामसिप्रभूवसो । नहित्वदन्योगिर्वणोगिरःसघत्क्षोणीरिव
प्रतिनोहर्यतद्वचः ॥ भूरितऽइंद्रवीर्यं१तवस्मस्यस्यस्तोतुर्मघवन्काममापृण । अनुतेद्यौर्बृहतीवीर्यंममऽइयंचतेपृथिवी
नेमऽओजसे ॥ त्वंतमिंद्रपर्वतंमहामुरुंवज्रेणवज्रिन्पर्वशश्चकर्तिथ । अवासृजोनिवृताःसर्तवाऽअपःसत्राविश्वंदधिषे
केवलंसहः ॥ २२ ॥ (इतिप्रथमेमण्डलेदशमोनुवाकः) ॥ (१।११।१) नूचित्सहोजाऽअमृतोनितुंदतेहोतायद्दूतोऽअ
भवद्विवस्वतः । विसाधिष्ठेभिःपथिभीरजोममऽआदेवताताहविषाविवासति ॥ आस्वमद्मयुवमानोऽअजरस्तृष्व
विष्यन्नतसेषुतिष्ठति । अत्योनपृष्ठंप्रुषितस्यरोचतेदिवोनसानुस्तनयन्नचिक्रदत् ॥ क्राणारुद्रेभिर्वसुभिःपुरोहितोहोता
निषत्तोरयिषाळमर्त्यः । रथोनविक्ष्वृंजसानऽआयुषुव्यानुषग्वार्यादेवऽऋण्वति ॥ विवातजूतोऽअतसेषुतिष्ठतेवृथाजु
हूभिःसृण्यातुविष्वणिः । तृषुयदग्नेवनिनोवृषायसेकृष्णंतऽएमरुशदूर्मेऽअजर ॥ तपुर्जंभोवनआवातचोदितोयूथेन
साह्वाँऽअववातिवंसगः । अभिव्रजंनक्षितंपाजसारजःस्थातुश्चरथंभयतेपतत्रिणः ॥ २३ ॥ दधुष्ट्वाभृगवोमानुषेष्वार
यिंनचारुंसुहवंजनेभ्यः । होतारमग्नेऽअतिथिंवरेण्यंमित्रंनशेवंदिव्यायजन्मने ॥ होतारंसप्तजुह्वो३यजिष्ठंयंवाघतोवृ

(१।११।१) नूचिदितिनवर्चस्यसूक्तस्यगौतमोनोधाअग्निर्जगतीअत्याश्चतस्रस्त्रिष्टुभः ।

णतेऽअध्वरेषु । अग्निंविश्वेषामरतिंवसूनांसपर्यामिप्रयसायामिरत्नं ॥ आच्छिद्रासूनोसहसोनोऽअद्यस्तोतृभ्योमित्रमहः
शर्मयच्छ । अग्नेगृणंतमंहसऽउरुष्योर्जोनपात्पूर्भिरायसीभिः ॥ भवावरूथंगृणतेविभावोभवामघवन्मघवद्भ्यःशर्म । उरु
ष्याग्नेऽअंहसोगृणंतंप्रातर्मक्षूधियावसुर्जगम्यात् ॥ २४ ॥ (१।१।१।२) वयाऽइदग्नेऽअग्नयस्तेऽअन्येत्वेविश्वेऽअमृता
मादयंते । वैश्वानरनाभिरसिक्षितीनांस्थूणेवजनाँऽउपमिद्ययंथ ॥ मूर्धादिवोनाभिरग्निःपृथिव्याऽअथाभवदरतीरोद
स्योः । तंत्वादेवासोजनयंतदेवंवैश्वानरज्योतिरिदार्याय ॥ आसूर्येनरश्मयोध्रुवासोवैश्वानरेदधिरेग्नावसूनि । यापर्व
तेष्वोषधीष्वप्सुयामानुषेष्वसितस्यराजा ॥ बृहतीऽइवसूनवेरोदसीगिरोहोतामनुष्यो३नदक्षः । स्वर्वतेसत्यशुष्मायपू
र्वीर्वैश्वानरायनृतमाययह्वीः+ ॥ दिवश्चित्तेबृहतोजातवेदोवैश्वानरप्ररिरिचेमहित्वं । राजाकृष्टीनामसिमानुषीणांयु
धादेवेभ्योवरिवश्चकर्थ ॥ प्रनूमहित्वंवृषभस्यवोचंयंपूरवोवृत्रहणंसचंते । वैश्वानरोदस्युमग्निर्जघन्वाँऽअधूनोत्का
ष्ठाऽअवशंबरंभेत् ॥ वैश्वानरोमहिम्नाविश्वकृष्टिर्भरद्वाजेषुयजतोविभावा । शातवनेयेशतिनीभिरग्निःपुरुणीथेजरते
सूनृतावान् ॥ २५ ॥ (१।१।१।३) वह्निंयशसंविदथस्यकेतुंसुप्राव्यंदूतंसद्योऽअर्थं । द्विजन्मानंरयिमिवप्रशस्तंरा
तिंभरद्भृगवेमातरिश्वा ॥ अस्यशासुरुभयासःसचंतेहविष्मंतऽउशिजोयेचमर्ताः । दिवश्चित्पूर्वोन्यसादिहोतापृच्छ्यो

(१।१।१।२) वयाइदितिसप्तर्चस्यसूक्तस्यनोधावैश्वानरोग्निस्त्रिष्टुप् । (१।१।१।३) वह्निंयशसमितिपंचर्चस्यसूक्तस्यनोधाअग्निस्त्रिष्टुप् ।

विश्पतिर्विक्षुवेधाः+ ॥ तंनव्यसीहृदऽआजायमानमस्मत्सुकीर्तिर्मधुजिह्वमश्याः । यमृत्विजोवृजनेमानुषासःप्रयस्वं
तऽआयवोजीजनंत ॥ उशिक्पावकोवसुर्मानुषेषुवरेण्योहोताधायिविक्षु । दमूनागृहपतिर्दमऽआँऽअग्निर्भुवद्रयिपती
रयीणां+ ॥ तंत्वावयंपतिमग्नेरयीणांप्रशंसामोमतिभिर्गोतमासः । आशुंनवाजंभरंमर्जयंतःप्रातर्मक्षूधियावसुर्जग
म्यात् ॥ २६ ॥ (१।१।१४) अस्माऽइदुप्रतवसेतुरायप्रयोनहर्मिस्तोमंमाहिनाय । ऋचीषमायाध्रिगवऽओहमिंद्रायब्र
ह्माणिरातततमा ॥ अस्माऽइदुप्रयऽइवप्रयँसिभराम्यांगूषंबाधेसुवृक्ति । इंद्रायहृदामनसामनीषाप्रत्नायपत्येधियोमर्जयं
त ॥ अस्माऽइदुत्यमुपमंस्वर्षांभराम्यांगूषमास्येन । मंहिष्ठमच्छोक्तिभिर्मतीनांसुवृक्तिभिःसूरिंवावृधध्यै ॥ अस्माऽइदु
स्तोमंसंहिनोमिरथंनतष्टेवतत्सिनाय । गिरश्चगिर्वाहसेसुवृक्तींद्रायविश्वमिन्वंमेधिराय ॥ अस्माऽइदुसप्तिमिवश्रवस्येंद्रा
यार्कंजुह्वा३समंजे । वीरंदानौकसंवंदध्यैपुरांगूर्तश्रवसंदर्माणं ॥ २७ ॥ अस्माऽइदुत्वष्टातक्षद्वज्रंस्वपस्तमंस्वर्यँ१रणा
य । वृत्रस्यचिद्विदद्येनमर्मतुजन्नीशानस्तुजताकियेधाः+ ॥ अस्येदुमातुःसवनेषुसद्योमहःपितुंपपिवाञ्चार्वन्ना । मुषा
यद्विष्णुःपचतंसहीयान्विध्यद्वराहंतिरोऽअद्रिमस्ता ॥ अस्माऽइदुग्नाश्चिद्देवपत्नीरिंद्रायार्कमहिहत्यऽऊवुः । परिद्या
वापृथिवीजभ्रउर्वीनास्यतेमहिमानंपरिष्टः ॥ अस्येदेवप्ररिरिचेमहित्वंदिवस्पृथिव्याःपर्यंतरिक्षात् । स्वराळिंद्रोदमऽ

(१।१।१४) अस्माइद्वितिषोळशर्चस्यसूक्तस्यनोधाइंद्रस्त्रिष्टुप ।

ऋक्सं.
अ.१अ.५
॥२९॥

आविश्वगूर्तःस्वरिरमंत्रोववक्षेरणाय ॥ अस्येदेवशवसाशुषंतंविवृश्चद्वज्रेणवृत्रमिंद्रः । गानव्राणाऽअवनीरमुंचदभिश्रवोदावनेसचेताः ॥ २८ ॥ अस्येदुत्वेषसारंतसिंधवःपरियद्वज्रेणसीमयच्छत् । ईशानकृद्दाशुषेदशस्यन्तुर्वीतयेगाधंतुर्वणिःकः ॥ अस्माऽइदुप्रभरातूतुजानोवृत्रायवज्रमीशानःकियेधाः । गोर्नपर्वविरदातिरश्चेष्यन्नर्णांस्यपांचरध्यै ॥ अस्येदुप्रब्रूहिपूर्व्याणितुरस्यकर्माणिनव्यऽउक्थैः । युधेयदिष्णानऽआयुधान्यृघायमाणोनिरिणातिशत्रून् ॥ अस्येदुभियागिरयश्चदृह्लाद्यावाचभूमाजनुषस्तुजेते । उपोवेनस्यजोगुवानऽओणिंसद्योभुवद्वीर्यायनोधाः ॥ अस्माऽइदुत्यदनुदाय्येषामेकोनद्वन्नेभूरेरीशानः । प्रैतंशंसूर्येपस्पृधानंसौवश्व्येसुष्विमावदिंद्रः ॥ एवातेहारियोजनासुवृक्तींद्रब्रह्माणिगोतमासोऽअक्रन् । ऐषुविश्वपेशसंधियंधाःप्रातर्मक्षूधियावसुर्जगम्यात् ॥२९॥ इतिप्रथमाष्टकेचतुर्थोऽध्यायः ॥४॥

चतुर्थाध्यायेवर्गाः २९ सूक्तानि १५ ऋचः १५२ ॥ त्यागः ॥ अश्विभ्यामिदं. १० उषसइदं. २० सूर्यायेदं. १२ इंद्रायेदं. ७२ अग्नयइदं. ९ अग्नयेवैश्वानरायेदं. ७ अग्नयइदं. ५ इंद्रायेदं. १६ ॥ इतिप्रथमेचतुर्थः ॥

प्रसक्षोनात्वंनववृष्णेपञ्चोनामारुतंत्रिष्टुबंतंपरमाग्नेयमैंद्रात्पश्चादशपराशरःशाक्त्योद्वैपदंतंद्रयिर्वनेषुश्रीणन्छुक्रोवनेमैकादशोपंप्रदशनिकाव्यारयिर्नोपप्रयंतोनवगोतमोराहूगणोगायत्रंतुजुषस्वपंचकातेकथाभित्वागायत्रंतुहिरण्यकेशोद्वादशाद्यौतृचौत्रैष्टुभौष्णिहौपूर्वोऽग्नयेवामध्यमायैरथवाषोळशैंद्र्यंकाहियामित्यस्यांनिपातिनोंदध्यज्ञनुरथर्वाचेति ५

मंडलं १
अनु. ११
॥२९॥

हरिः ओ३म् ॥ (१।११।५) प्रम॑न्महेशवसा॒नाय॑शू॒षमां॑गू॒षंगिर्व॑णसेऽअंगिर॒स्वत् । सु॒वृ॒क्तिभि॑ःस्तु॒व॒तऽऋ॑ग्मि॒याया॒र्चा॑म॒र्कंनरे॒विश्रु॑ताय ॥ प्रवो॑म॒हेम॒हि॒नमो॑भरध्वमां॑गू॒ष्यं॑शवसा॒नाय॒साम॑ । येना॑न॒ःपूर्वे॑पि॒तर॑ःपद॒ज्ञाऽअर्चं॑तो॒ऽअंगि॑रसो॒गाऽअविं॑दन् ॥ इंद्र॒स्यांगि॑रसांचे॒ष्टौवि॒दत्स॒रमा॒तनं॑यायधा॒सिं । बृह॒स्पति॑र्भि॒नदद्रिं॑वि॒दद्गाःसमु॒स्रिया॑भिर्वा॑वशंत॒नर॑ः ॥ ससु॒ष्टुभा॒सस्तु॒भास॒प्तविप्रै॑ःस्व॒रेणाद्रिं॑स्व॒र्यो॒॑३॒नव॑ग्वैः । स॒र॒ण्युभि॑ःफलि॒गमिं॑द्रशक्रव॒लंरवे॑णदरयो॒दश॑ग्वैः ॥ गृ॒णा॒नोऽअंगि॑रोभिर्दस्म॒विव॑रु॒षसा॒सूर्ये॑ण॒गोभि॒रंध॑ः । विभूम्या॑ऽअप्रथयऽइंद्र॒सानु॑दि॒वोरज॒ऽउप॑रमस्तभायः ॥ १ ॥ तदु॒प्रय॑क्षतममस्य॒कर्म॑द॒स्मस्य॒चारु॑तममस्ति॒दंस॑ः । उ॒प॒ह्व॒रेयदुप॑रा॒ऽअपि॑न्व॒न्मध्व॑र्णसोन॒द्य१॒॑श्चत॑स्रः ॥ द्वि॒ताविव॑व्रेस॒नजा॒सनी॑ळेऽअ॒यास्य॒स्तव॑मानेभि॒रर्कैः॑ । भगो॒नमेने॑पर॒मेव्यो॑म॒न्नधा॑रय॒द्रोद॑सीसु॒दंसा॑ः ॥ स॒नाद्दिवं॒परि॒भूमा॒विरू॑पेपुन॒र्भुवा॑युव॒तीस्वेभि॒रेवैः॑ । कृ॒ष्णेभि॑र॒क्तोषारुश॑द्भि॒र्वपु॑र्भि॒राच॑रतो॒ऽअ॒न्यान्या॑ ॥ सने॑मिस॒ख्यंस्व॑प॒स्यमा॑नःसू॒नुर्दा॑धार॒शव॑सासु॒दंसा॑ः । आ॒मासु॑चिद्दधिषेप॒क्वम॒ंतःपय॑ःकृ॒ष्णासु॒रुश॒द्रोहि॑णीषु ॥ स॒नात्सनी॑ळाऽअ॒वनी॑रवा॒ताव्र॒तार॑क्षंतेऽअ॒मृता॒ःसहो॑भिः । पु॒रु॒स॒ह॒स्राजन॑यो॒नपत्नी॑र्दुव॒स्यंति॒स्वसा॑रो॒ऽअह्र॑याणं ॥ २ ॥ स॒ना॒यु॒वोनम॑सा॒नव्यो॑ऽअ॒र्कैर्व॑सू॒यवो॑म॒तयो॑दस्मदद्रुः । पति॒ंनपत्नी॑रुश॒तीरु॒शंत॑स्पृ॒शंति॑त्वाशवसावन्मनी॒षाः+ ॥ स॒नादे॒वतव॒रायो॒गभ॑स्तौ॒नक्षी॑यंते॒नोप॑दस्यंतिदस्म ।

(१।११।५) प्रमन्महइतित्रयोदशर्चस्यसूक्तस्यनोधाइंद्रस्त्रिष्टुप् ।

द्युमाँऽअसिक्रतुमाँऽइंद्रधीरःशिक्षाशचीवस्तवनःशचीभिः ॥ सनायतेगोतमऽइंद्रनव्यमतक्षद्ब्रह्महरियोजनाय । सुनीथायनःशवसानन्नोधाःप्रातर्मक्षूधियावसुर्जगम्यात् ॥ ३ ॥ (१।११।६) त्वंमहाँऽइंद्रयोहशुष्मैर्द्यावाजज्ञानःपृथिवीऽअमेधाः । यद्धतेविश्वागिरयश्चिदभ्वाभियादृह्ळासःकिरणानैजन् ॥ आयद्धरीऽइंद्रविव्रतावेरातेवज्रंजरिताबाह्वोर्धात् । येनाविहर्यतक्रतोऽअमित्रान्पुरऽइष्णासिपुरुहूतपूर्वीः+ ॥ त्वंसत्यऽइंद्रधृष्णुरेतान्त्वमृभुक्षानर्यस्त्वंषाट् । त्वंशुष्णंवृजनेपृक्षऽआणौयूनेकुत्सायद्युमतेसचाहन् ॥ त्वंहत्यदिंद्रचोदीःसखावृत्रंयद्वज्रिन्वृषकर्मन्नुभ्नाः । यद्धशूरवृषमणःपराचैर्विदस्यूँर्योनावकृतोवृथाषाट्+ ॥ त्वंहत्यदिंद्रारिषण्यन्दृह्ळस्यचिन्मर्तानामजुष्टौ । व्य१स्मदाकाष्ठाऽअर्वतेवर्घनेववज्रिञ्छ्नथिह्यमित्रान् ॥ ४ ॥ त्वांहत्यदिंद्रार्णसातौस्वर्मीह्ळेनरऽआजाहवंते ॥ तवस्वधावऽइयमासमर्यऽऊतिर्वाजेष्वतसाय्याभूत् ॥ त्वंहत्यदिंद्रसप्तयुध्यन्पुरोवज्रिन्पुरुकुत्सायदर्दः । बर्हिर्नयत्सुदासेवृथावर्गंहोराजन्वरिवःपूरवेकः ॥ त्वंत्यान्नऽइंद्रदेवचित्रामिषमापोनपीपयःपरिज्मन् । ययाशूरप्रत्यस्मभ्यंयंसित्मनमूर्जंनविश्वधक्षरध्यै ॥ अकारितऽइंद्रगोतमेभिर्ब्रह्माण्योक्तानमसाहरिभ्यां । सुपेशसंवाजमाभरानःप्रातर्मक्षूधियावसुर्जगम्यात् ॥ ५ ॥ (१।११।७) वृष्णेशर्धायसुमखायवेधसेनोधःसुवृक्तिंप्रभरामरुद्भ्यः । अपोनधीरोमनसासुहस्त्योगिरःसमंजेविदथे

(१।११।६) त्वंमहानितिनवर्चस्यसूक्तस्यनोधाइंद्रस्त्रिष्टुप् । (१।११।७) वृष्णेशर्धायेतिपंचदशर्चस्यसूक्तस्यनोधामरुतोजगतीअंत्यात्रिष्टुप् ।

ष्वाभुवः ॥ तेजज्ञिरेदिवऽऋष्वासऽउक्षणोरुद्रस्यमर्याऽअसुराऽअरेपसः । पावकासःशुचयःसूर्याऽइवसत्वानोनद्रप्सिनोघोरवर्पसः ॥ युवानोरुद्राऽअजराऽअभोग्घनोववक्षुरध्रिगावःपर्वताऽइव । दृळ्हाचिद्विश्वाभुवनानिपार्थिवाप्रच्यावयंतिदिव्यानिमज्मना ॥ चित्रैरंजिभिर्वपुषेव्यंजतेवक्षःसुरुक्माँऽअधियेतिरेशुभे । अंसेष्वेषांनिमिमृक्षुऽऋष्टयःसाकंजज्ञिरेस्वधयादिवोनरः ॥ ईशानकृतोधुनयोरिशादसोवातान्विद्युतस्तविषीभिरक्रत । दुहंत्यूधर्दिव्यानिधूतयोभूमिंपिन्वंतिपयसापरिज्रयः ॥ ६ ॥ पिन्वंत्यपोमरुतःसुदानवःपयोघृतवद्विदथेष्वाभुवः । अत्यंनमिहेविनयंतिवाजिनमुत्संदुहंतिस्तनयंतमक्षितं ॥ महिषासोमायिनश्चित्रभानवोगिरयोनस्वतवसोरघुष्यदः । मृगाऽइवहस्तिनःखादथावनायदारुणीषुतविषीरयुग्ध्वं ॥ सिंहाऽइवनानदतिप्रचेतसःपिशाऽइवसुपिशोविश्ववेदसः । क्षपोजिन्वंतःपृषतीभिऽऋष्टिभिःसमित्सबाधःशवसाहिमन्यवः ॥ रोदसीआवदतागणश्रियोनृषाचःशूराःशवसाहिमन्यवः । आवंधुरेष्वमतिर्नदर्शताविद्युन्नतस्थौमरुतोरथेषुवः ॥ विश्ववेदसोरयिभिःसमोकसःसंमिश्लासस्तविषीभिर्विरप्शिनः । अस्तारऽइषुंदधिरेगभस्त्योरनंतशुष्मावृषखादयोनरः ॥ ७ ॥ हिरण्ययेभिःपविभिःपयोवृधऽउज्जिघ्नंतऽआपथ्यो३नपर्वतान् । मखाऽअयासःस्वसृतोध्रुवच्युतोदुध्रकृतोमरुतोभ्राजदृष्टयः ॥ घृषुंपावकंवनिनंविचर्षणिंरुद्रस्यसूनुंहवसागृणीमसि । रजस्तुरंतवसंमारुतंगणमृजीषिणंवृषणंसश्चतश्रिये ॥ प्रनूसमर्तःशवसाजनाँऽअतितस्थौवऽऊतीमरुतो

यमावंत । अर्वद्भिर्वाजंभरतेधनानृभिरापृच्छ्यंक्रतुमाक्षेतिपुष्यति॥ चर्कृत्यंमरुतःपृत्सुदुष्टरंद्युमंतंशुष्मंमघवत्सुधत्तन ।
धनस्पृतमुक्थ्यंविश्वचर्षणिंतोकंपुष्येमतनयंशतंहिमाः॥ नूष्ठिरंमरुतोवीरवंतमृतीषाहंरयिमस्मासुधत्त । सहस्रिणंशति
नंशूशुवांसंप्रातर्मक्षूधियावसुर्जगम्यात् ॥८॥ (११२।१) पश्वानतायुंगुहाचतंतंनमोयुजानंनमोवहंतं॥ सजोषाधीराः
पदैरनुग्मन्नुपत्वासीदन्विश्वेयजत्राः॥ ऋतस्यदेवाऽअनुव्रतागुर्भुवत्परिष्टिर्द्यौर्नभूम ॥ वर्धंतीमापःपन्वासुशिश्विमृतस्य
योनागर्भेसुजातं ॥ पुष्टिर्नरण्वाक्षितिर्नपृथ्वीगिरिर्नभुज्मक्षोदोनशंभु ॥ अत्योनाज्मन्त्सर्गंप्रतक्तःसिंधुर्नक्षोदःकऽ
ईंवराते ॥ जामिःसिंधूनांभ्रातेवस्वस्रामिभ्यान्नराजावनान्यत्ति ॥ यद्वातजूतोवनाव्यस्थादग्निर्हदातिरोमापृथिव्याः॥
श्वसित्यप्सुहंसोनसीदन्क्रत्वाचेतिष्ठोविशामुषर्भुत् ॥ सोमोनवेधाऽऋतप्रजातःपशुर्नशिश्वाविभुर्दूरेभाः ॥ ९ ॥
(११२।२) रयिर्नचित्रासूरोनसंदृगायुर्नप्राणोनित्योनसूनुः ॥ तक्वानभूर्णिर्वनासिषक्तिपयोनधेनुःशुचिर्विभावा ॥
दाधारक्षेममोकोनरण्वोयवोनपक्वोजेताजनानां ॥ ऋषिर्नस्तुभ्वाविक्षुप्रशस्तोवाजीनप्रीतोवयोदधाति ॥ दुरोकंशोचिः
क्रतुर्ननित्योजायेवयोनावरंविश्वस्मै ॥ चित्रोयदभ्राट्छ्वेतोनविक्षुरथोनरुक्मीत्वेषःसमत्सु ॥ सेनैवसृष्टामंदधात्यस्तुर्न
दिद्युत्त्वेषप्रतीका ॥ यमोहजातोयमोजनित्वंजारःकनीनांपतिर्जनीनां ॥ तंवश्चराथावयंवसत्यास्तंनगावोनक्षंतऽइद्धं ॥

(११२।१) पश्वानेतिदशर्चस्यसूक्तस्यशाक्त्यःपराशरोग्निर्द्विपदाविराट्। (११२।२) रयिर्नेतिदशर्चस्यसूक्तस्यपराशरोग्निर्द्विपदाविराट् ।

सिंधुर्नक्षोदःप्रनीचीरैनोन्नवंतगावःस्व१र्दृशीके ॥ १० ॥ (१।१२।३) वनेषुजायुर्मर्तेषुमित्रोवृणीतेश्रुष्टिंराजेवाजुर्यं ॥ क्षेमोनसाधुःक्रतुर्नभद्रोभुवत्स्वाधीर्होताहव्यवाट् ॥ हस्तेदधानोनृम्णाविश्वान्यमेदेवान्धाद्गुहानिषीदन् ॥ विदंतीमत्रनरोधियंधाहृदायत्तष्टान्मंत्राँऽअशंसन् ॥ अजोनक्षांदाधारपृथिवींतस्तंभद्यांमंत्रेभिःसत्यैः ॥ प्रियापदानिपश्वोनिपाहिविश्वायुरग्नेगुहागुहंगाः ॥ यऽईंचिकेतगुहाभवंतमायःससादधारामृतस्य ॥ वियेचृतंत्यृतासपंतऽआदिद्वसूनिप्रववाचास्मै ॥ वियोवीरुत्सुरोधन्महित्वोतप्रजाऽउतप्रसूष्वंतः+ ॥ चित्तिरपांदमेविश्वायुःसद्मेवधीराःसंमायचक्रुः ॥ ११ ॥ (१।१२।४) श्रीणन्नुपस्थाद्दिवंभुरण्युःस्थातुश्चरथमक्तून्व्यूर्णोत् ॥ परियदेषामेकोविश्वेषांभुवद्देवोदेवानांमहित्वा+ ॥ आदित्तेविश्वेक्रतुंजुषंतशुष्काद्यद्देवजीवोजनिष्ठाः ॥ भजंतविश्वेदेवत्वंनामऽऋतंसपंतोऽअमृतमेवैः ॥ ऋतस्यप्रेषाऽऋतस्यधीतिर्विश्वायुर्विश्वेऽअपांसिचक्रुः ॥ यस्तुभ्यंदाशाद्योवातेशिक्षात्तस्मैचिकित्वान्रयिंदयस्व ॥ होतानिषत्तोमनोरपत्येसचिन्न्वासांपतीरयीणां+ ॥ इच्छंतरेतोमिथस्तनूषुसंजानतस्वैर्दक्षैरमूराः ॥ पितुर्नपुत्राःक्रतुंजुषंतश्रोषन्येऽअस्यशासंतुरासः ॥ विरायऽऔर्णोद्दुरःपुरुक्षुःपिपेशनाकंस्तृभिर्दमूनाः ॥ १२ ॥ (१।१२।५) शुक्रःशुशु

(१।१२।३) वनेष्वितिदशर्चस्यसूक्तस्यपराशरोग्निर्द्विपदाविराट् । (१।१२।४) श्रीणन्नितिदशर्चस्यसूक्तस्यपराशरोग्निर्द्विपदाविराट् । (१।१२।५) शुक्रइतिदशर्चस्यसूक्तस्यपराशरोग्निर्द्विपदाविराट् ।

Digitization by eGangotri Funding MHRD-Delhi

क्वाँ॑ऽउ॒षोन॒जा॒रःप॒प्रास॑मी॒चीदि॒वोनज्योति॑ः ॥ परि॒प्रजा॑तः॒क्रत्वा॑बभूथ॒भुवो॑दे॒वानां॑पि॒तापु॒त्रःसन्+ ॥ वे॒धाऽअदृ॑प्तोऽ
अ॒ग्निर्वि॑जा॒नन्नूध॒र्नगोना॒ंस्वाद्मा॑पि॒तूनां+ ॥ जने॒नशेव॑ऽआ॒हूर्य॒ःसन्मध्ये॒निष॑त्तोर॒ण्वोदु॑रो॒णे+ ॥ पु॒त्रोनजा॒तोर॒ण्वोदु॑रो॒
णेवा॒जीनप्री॒तोविशो॒वि॑तारीत् ॥ वि॒शोयदह्वे॒नृभि॒ःसनी॑ळाऽअ॒ग्निर्दे॑व॒त्वाविश्वा॑न्यश्याः ॥ नकि॑ष्टऽए॒ताव्र॒तामि॑नंति॒नृ
भ्यो॒यदे॒भ्यःश्रु॒ष्टिंच॒कर्थ॑ ॥ तच्चु॒तेदंसो॒यदह॑न्त्सम॒नैर्नृभि॒र्यद्यु॒क्तोवि॒वेरपां॑सि ॥ उ॒षोनजा॒रोवि॒भावो॒स्रःसंज्ञा॑तरूप॒श्चिके॑
तदस्मै ॥ त्मना॒वह॑न्तो॒दुरो॒व्यृ॑ण्व॒न्नवं॑त॒विश्वे॒स्व॑१॒र्दृशी॑के ॥ १३ ॥ (१।१२।६) व॒नेम॑पू॒र्वीर॒र्यो॑म॑नी॒षाऽअ॒ग्निःसु॒शो
को॒विश्वा॑न्यश्याः ॥ आदैव्या॑निव्र॒ताचि॑कि॒त्वानामानु॑षस्य॒जन॑स्य॒जन्म॑ ॥ गर्भो॒योऽअ॒पांगर्भो॒वना॑ना॒ंगर्भ॑श्च॒स्था॒तांगर्भ॑
श्च॒रथां॑ ॥ अद्रौ॑चिदस्माऽअं॒तर्दु॑रो॒णेवि॒शांनविश्वो॑ऽअ॒मृत॑ःस्वा॒धीः+ ॥ सहिक्ष॒पावाँ॑ऽअ॒ग्नीर॑यी॒णांदा॒शद्यो॑ऽअ॑स्मा॒ऽअ
रं॑सू॒क्तैः+ ॥ ए॒ताचि॑कित्वो॒भूमा॒निपा॑हिदे॒वाना॒ंजन्म॒मर्तां॑श्चवि॒द्वान्+ ॥ वर्धा॒न्यंपू॒र्वीःक्षपो॒विरू॑पाःस्था॒तुश्च॒रथ॑मृ॒तप्र
वी॑तं ॥ अरा॑धिहो॒तास्व॑१॒र्निष॑त्तःकृ॒ण्वन्विश्वा॒न्यपां॑सिस॒त्या+ ॥ गोषु॒प्रश॑स्तिं॒वने॑षुधिषे॒भरं॑त॒विश्वे॑व॒लिंस्व॑र्णः ॥ वि॒त्वा
नरः॑पुरु॒त्रास॑पर्यन्पि॒तुर्नजिव्रे॒र्विवेदो॑भरंत ॥ सा॒धुर्नगृ॒ध्नुरस्ते॑वशू॒रोयाते॑वभी॒मस्त्वे॒षःस॒मत्सु॑ ॥ १४ ॥ (१।१२।७)
उप॒प्रजि॑न्वन्नु॒शतीरु॒शंतं॒पति॒ंननित्यं॒जन॑य॒ःसनी॑ळाः । स्वसा॑र॒ःश्यावी॒मरु॑षीमजुष्रन्चि॒त्रमु॒च्छंती॑मु॒षसं॒नगावः॑ ॥ वी॒ळुचि॑ ॥३२॥

(१।१२।६) वनेमेत्येकादशर्चस्यसूक्तस्यपराशरोग्निर्द्विपदाविराट्। (१।१२।७) उपप्रजिन्वन्नितिदशर्चस्यसूक्तस्यपराशरोग्निस्त्रिष्टुप्।

दृह्ळापितरौनऽउक्थैरद्रिंरुजन्नंगिरसोरवेण । चक्रुर्दिवोबृहतोगातुमस्मेऽअहःस्वर्विविदुःकेतुमुस्राः+ ॥ दधन्नृतंधन
यन्नस्यधीतिमादिदर्योदिधिष्वो३विभृत्राः । अतृष्यंतीरपसोयंत्यच्छादेवान्जन्मप्रयंसावर्धयंतीः ॥ मथीद्यदींविभृतो
मातरिश्वागृहेगृहेश्येतोजेन्योभूत् । आदींराज्ञेनसहीयसेसचासन्नादूत्यं१भृगवाणोविवाय ॥ महेयत्पित्रऽईंरसंदिवे
करवत्सरत्पृशन्यश्चिकित्वान् । सृजदस्ताधृषतादिद्युमस्मैस्वायांदेवोदुहितरित्विषिंधात् ॥ १५ ॥ स्वऽआयस्तुभ्यंद
मऽआविभातिनमोवादाशादुशतोऽअनुद्यून् । वर्धोऽअग्नेवयोऽअस्यद्विबर्हायासद्रायासरथंयंजुनासि ॥ अग्निंविश्वा
ऽअभिपृक्षःसचंतेसमुद्रंनस्रवतःसप्तयह्वीः । नजामिभिर्विचिकितेवयोनोविदादेवेषुप्रमतिंचिकित्वान्+ ॥ आयदिषे
नृपतिंतेजऽआनट्छुचिरेतोनिषिक्तंद्यौरभीके । अग्निःशर्धमनवद्यंयुवानंस्वाध्यंजनयत्सूदयच्च ॥ मनोनयोध्वनःसद्य
ऽएत्येकःसत्रासूरोवस्वऽईशे । राजानामित्रावरुणासुपाणीगोषुप्रियममृतंरक्षमाणा ॥ मानोऽअग्नेसख्यापित्र्याणिप्र
मर्षिष्ठाऽअभिविदुष्कविःसन् । नभोनरूपंजरिमामिनातिपुरातस्याऽअभिशस्तेरधीहि ॥ १६ ॥ (१ । १२ । ८)
निकाव्यावेधसःशश्वतस्कर्हस्तेदधानोनर्यापुरूणि । अग्निर्भुवद्रयिपतीरयीणांसत्राचक्राणोऽअमृतानिविश्वा ॥ अस्मे
वत्संपरिषंतंनविंदन्निच्छंतोविश्वेऽअमृताऽअमूराः । श्रमयुवःपदव्योधियंधास्तस्थुःपदेपरमेचार्वग्नेः+ ॥ तिस्रोयदग्ने

(१।१२।८) निकाव्येतिदशर्चस्यसूक्तस्यपराशरोऽग्निस्त्रिष्टुप् ।

Digitization by eGangotri. Funding MDTF Delhi

॥३३॥

शरदस्त्वामिच्छुचिंघृतेनशुचयःसपर्यान् । नामानिचिद्दधिरेयज्ञियान्यसूदयंततन्व१ःसुजाताः ॥ आरोदसीबृहती
वेविदानाःप्ररुद्रियाजभ्रिरेयज्ञियासः । विदन्मर्तोनेमधिताचिकित्वानग्निंपदेपरमेतस्थिवांसं ॥ संजानानाऽउपसीद
न्नभिज्ञुपत्नीवंतोनमस्यंनमस्यन् । रिरिक्वांसस्तन्वःकृण्वतस्वाःसखासख्युर्निमिषिरक्षमाणाः ॥ १७ ॥ त्रिःसप्तयद्गु
ह्यानित्वेऽइत्पदाविदन्निहितायज्ञियासः । तेभीरक्षंतेऽअमृतंसजोषाःपशून्चस्थातॄन्चरथंचपाहि ॥ विद्वाँऽअग्नेवयुना
निक्षितीनांव्यानुषक्छुरुधोजीवसेधाः । अंतर्विद्वाँऽअध्वनोदेवयानानतंद्रोदूतोऽअभवोहविर्वाट्+ ॥ स्वाध्योदिवऽ
आसप्तयह्वीरायोदुरोव्यृतज्ञाऽअजानन् । विदद्गव्यंसरमादृढमूर्वंयेनानुकंमानुषीभोजतेविट्+ ॥ आयेविश्वास्वपत्या
नितस्थुःकृण्वानासोऽअमृतत्वायगातुं । मह्नामहद्भिःपृथिवीवितस्थेमातापुत्रैरदितिर्धायसेवेः+ ॥ अधिश्रियंनिदधु
श्चारुमस्मिन्दिवोयदक्षीऽअमृताऽअकृण्वन् । अधक्षरंतिसिंधवोनसृष्टाःप्रनीचीरग्नेऽअरुषीरजानन् ॥ १८ ॥
(१।१२।९) रयिर्नयःपितृवित्तोवयोधाःसुप्रणीतिश्चिकितुषोनशासुः । स्योनशीरतिथिर्नप्रीणानोहोतेववसद्मविधतो
वितारीत् ॥ देवोनयःसवितासत्यमन्माक्रत्वानिपातिवृजनानिविश्वा । पुरुप्रशस्तोऽअमतिर्नसत्यऽआत्मेवशेवोदिधि
षाय्योभूत् ॥ देवोनयःपृथिवींविश्वधायाऽउपक्षेतिहितमित्रोनराजा । पुरःसदःशर्मसदोनवीराऽअनवद्यापतिजुष्टेव ॥३३॥

(१।१२।९) रयिर्नेतिदशर्चस्यसूक्तस्यपराशरोग्निस्त्रिष्टुप् ।

नारीं॑ ॥ तंत्वा॒नरो॒दम॒आनित्यं॑मि॒द्धमग्ने॒सचं॑तक्षि॒तिषुं॑ध्रु॒वासुं॑ । अधि॑द्यु॒म्नंनिद॑धु॒र्भूर्यं॑स्मि॒न्भवा॑वि॒श्वायुं॑र्ध॒रुणो॑र॒यीणां+ ॥
विपृक्षो॑ऽअग्ने॒मघवा॑नोऽअश्यु॒र्विसू॒रयो॒दद॑तो॒विश्व॒मायुः॑ । स॒नेम॒वाजं॑समि॒थेष्व॒र्यो॑भा॒गंदे॒वेषु॒श्रवं॑से॒दधा॑नाः ॥ १९ ॥ ऋ॒
तस्य॒हि॒धे॒नवो॑वावशा॒नाःस्मदू॑ध्नीः॒पीपयं॑त॒द्युभ॑क्ताः । प॒रा॒वतः॑सुम॒तिंभिक्ष॑माणा॒विसिं॑धवः॒समया॑सस्रु॒रद्रिं॑ ॥ त्वेऽअ॑ग्ने
सुम॒तिंभिक्ष॑माणादि॒विश्रवो॑दधिरेय॒ज्ञियासः॑ । नक्ता॑चच॒क्रुरु॒षसा॒विरू॑पेकृ॒ष्णंच॒वर्ण॑मरु॒णंच॒संधुः॑ ॥ यान्रा॒येमर्ता॒न्त्सु
षूंदो॑ऽअग्ने॒तेस्याम॑म॒घवा॑नोव॒यंच॑ । छा॒येव॒विश्वं॒भुव॑नंसिसक्ष्यापप्रि॒वान्रोद॑सीऽअं॒तरि॑क्षं ॥ अर्व॑द्भिरग्ने॒ऽअर्व॑तो॒नृभि॒र्नॄ
न्वी॒रैर्वी॒रान्व॑नुयामा॒त्वोताः॑ । ई॒शा॒नासः॑पितृवि॒त्तस्य॑रा॒योविसू॑रयः॒शतहि॑मानोऽअश्युः ॥ ए॒तातेऽअग्नऽउ॒चथा॑निवे
धो॒जुष्टा॑निसंतु॒मन॑सेहृ॒देच॑ । श॒केम॑रा॒यःसु॒धुरो॒यमं॒तेधि॒श्रवो॑दे॒वभ॑क्तं॒दधा॑नाः ॥ २० ॥ (१।१३।१) उ॒प॒प्र॒यंतो॑ऽअध्व॒रं
मंत्रं॑वोचेमा॒ग्नये॑ । आ॒रेऽअ॒स्मेच॑शृण्व॒ते+ ॥ यःस्नीहि॑तीषुपू॒र्व्यःसं॑जग्मा॒नासु॑कृ॒ष्टिषु॑ । अर॑क्षद्दा॒शुषे॒गयं॑ ॥ उ॒तब्रु॑वंतुज॒
तव॒ऽउद॒ग्निर्वृ॒त्र॒हाज॑नि । ध॒नं॒ज॒योरणे॑रणे ॥ यस्य॑दू॒तोऽअसि॒क्षये॒वेषि॑ह॒व्यानि॒वी॒तये॑ । द॒स्मत्कृ॒णोष्य॑ध्व॒रम्+ ॥ तमि
त्सु॑ह॒व्यमं॑गिरःसुदे॒वंस॑हसोयहो । जना॑ऽआहुःसुब॒र्हिषं॑ ॥ २१ ॥ आच॒वहा॑सि॒ताँऽइ॒हदे॒वाँऽउप॒प्रश॑स्तये । ह॒व्यासु॑श्च
द्र॒वीतये॑ ॥ नयो॑रु॒पब्दि॑रश्व्यः॑शृ॒ण्वेरथ॑स्य॒कच्च॒न । यद॑ग्ने॒यासि॑दू॒त्यं॑* ॥ त्वोतो॑वा॒ज्यह्र॑यो॒ऽभिपूर्व॑स्मा॒दप॑रः । प्रदा॒श्वाँ

(१।१३।१) उपप्रयन्तइतिनवर्चस्यसूक्तस्यराहूगणोगोतमोग्निर्गायत्री ।

ऽअग्नेऽअस्थात् ॥ उतद्युमत्सुवीर्यंबृहदग्नेविवाससि । देवेभ्योदेवदाशुषे ॥ २२ ॥ (१।१३।२) जुषस्वसप्रथस्तमं
वचोदेवप्सरस्तमं । हव्याजुह्वानऽआसनि ॥ अथातेऽअंगिरस्तमाग्नेवेधस्तमप्रियं । वोचेमब्रह्मसानसि+ ॥ कस्तेजा
मिर्जनानामग्नेकोदाश्वध्वरः । कोहकस्मिन्नसिश्रितः+ ॥ त्वंजामिर्जनानामग्नेमित्रोऽअसिप्रियः । सखासखिभ्यऽईं
ड्यः ॥ यजानोमित्रावरुणायजादेवाँऽऋतंबृहत् । अग्नेयक्षिस्वंदमं ॥ २३ ॥ (१।१३।३) कातऽउपेतिर्मनसोवरा
यभुवदग्नेशंतमाकामनीषा । कोवायज्ञैःपरिदक्षंतऽआपकेनवातेमनसादाशेम । एह्यग्नऽइहहोतानिषीदादब्धःसुपुरऽ
एताभवानः । अवतांत्वारोदसीविश्वमिन्वेयजामहेसौमनसायदेवान्+ ॥ प्रसुविश्वान्रक्षसोधक्ष्यग्नेभवायज्ञानामभि
शस्तिपावा । अथावहसोमपतिंहरिभ्यामातिथ्यमस्मैचकृमासुदाव्ने ॥ प्रजावतावचसावह्निरासाचहुवेनिचसत्सीहदे
वैः । वेषिहोत्रमुतपोत्रंयजत्रबोधिप्रयंतर्जनितर्वसूनां ॥ यथाविप्रस्यमनुषोहविर्भिर्देवाँऽअयजःकविभिःकविःसन् ।
एवाहोतःसत्यतरत्वमद्याग्नेमंद्रयाजुह्वायजस्व ॥ २४ ॥ (१।१३।४) कथादाशेमाग्नयेकास्मैदेवजुष्टोच्यतेभामिने
गीः । योमर्त्येष्वमृतऽऋतावाहोतायजिष्ठऽइत्कृणोतिदेवान्+ ॥ योऽअध्वरेषुशंतमऽऋतावाहोतातमूनमोभिराकृणु ॥३४॥

(१।१३।२) जुषस्वेतिपंचर्चस्यसूक्तस्यगोतमोग्निर्गायत्री । (१।१३।३) कातइतिपंचर्चस्यसूक्तस्यगोतमोग्निस्त्रिष्टुप् । (१।१३।४) कथादाशेमेतिपंचर्चस्यसूक्तस्यगोतमोग्निस्त्रिष्टुप् ।

ध्वं । अ॒ग्निर्यद्वेर्मर्ता॑यदे॒वान्त्सचा॒बोधा॑ति॒मन॑सायजाति ॥ सहिक्रतुः॒समर्य॒ःसस॒ाधुर्मि॒त्रोनभू॒दद्भु॑तस्यर॒थीः । तंमेधे॑षुप्रथ॒मंदे॑व॒यंती॒र्विश॒उप॑ब्रुवतेद॒स्ममारीः॑ ॥ सनो॑नृ॒णांनृत॑मोरि॒शादा॑ऽअ॒ग्निर्गिरो॑व॑सावेतुधी॒तिं । तना॑च॒येम॒घवा॑न॒ःशविष्ठा॒वाज॑प्रसूताऽइ॒षयं॑त॒मन्म॑ ॥ ए॒वाग्निर्गोत॑मेभि॒ऽर्ऋ॒ता॒वा॒विप्रे॑भिरस्तोष्टजा॒तवे॑दाः । सऽए॑षुद्यु॒म्नंपी॑पय॒त्सवाजं॒सपु॒ष्टिंया॑ति॒जोष॒माचि॑कि॒त्वान्+ ॥ २५ ॥ (१।१३।५) अ॒भित्वा॒गोत॑मागि॒राजात॑वेदो॒विच॑र्षणे । द्यु॒म्नैर॒भिप्रणो॑नुमः ॥ तमु॑त्वा॒गोत॑मोगि॒रारा॒यस्का॑मोदुवस्यति । द्यु॒म्नै० ॥ तमु॑त्वावाज॒सात॑ममंगिर॒स्वद्ध॑वामहे । द्यु॒म्नै० ॥ तमु॑त्वावृत्र॒हंत॑मं॒योदस्यूँ॑रवधूनु॒षे । द्यु॒म्नै० ॥ अवो॑चाम॒रहू॑गणाऽअ॒ग्नये॒मधु॑म॒द्वचः॑ । द्यु॒म्नै० ॥ २६ ॥ (१।१३।६) हिर॑ण्यकेशो॒रज॑सोविसा॒रेहि॒र्धुनि॒र्वात॑ऽइव॒ध्रजी॑मान् । शुचि॑भ्राजाऽउ॒षसो॒नवे॑दा॒यश॑स्वतीरप॒स्युवो॒नस॒त्याः+ ॥ आते॑सुप॒र्णाऽअ॑मिनंत॒ँऽए॒वैःकृ॒ष्णोनो॑नाववृष॒भोयदी॒दं । शि॒वाभि॒र्नस्मय॑माना॒भिरागा॒त्पत॑न्ति॒मिहः॑स्त॒नयं॑त्य॒भ्रा+ ॥ यदी॑मृ॒तस्य॒पय॑सा॒पिया॑नो॒नय॑न्नृ॒तस्य॑प॒थिभि॒रजि॑ष्ठैः । अ॒र्य॒मामि॒त्रोवरु॑ण॒ःपरि॑ज्मा॒त्वचं॑पृंच॒न्त्युप॑रस्य॒योनौ॑ । अग्ने॒वाज॑स्य॒गोम॑त॒ऽईशा॑नःसहसोयहो । अ॒स्मेधे॑हिजातवेदो॒महि॒श्रवः॑ ॥ सऽइ॑धा॒नोवसु॒ष्क॒विर॒ग्निरी॒ळेन्यो॑गि॒रा । रे॒वद॒स्मभ्यं॑पुर्वणीकदी

(१।१३।५) अभित्वेतिपंचर्चस्यसूक्तस्यगोतमोग्निर्गायत्री । (१।१३।६) हिरण्यकेशइतिद्वादशर्चस्यसूक्तस्यगोतमोग्निर्गायत्रीआद्यास्तिस्रोनुष्टुभःततस्तिस्रउष्णिहः (आद्यानांतिसृणामग्निर्मध्यमोग्निःपार्थिवोवा)।

दिहि ॥ क्षपोरांजन्नुतत्मनाग्नेवस्तोरुतोषसः । सतिग्मजंभरक्षसोदहप्रति ॥ २७ ॥ अवानोऽअग्नऽऊतिभिर्गायत्रस्य
प्रभर्मणि । विश्वासुधीषुवंद्य ॥ आनोऽअग्नेरयिंभरसत्रासाहंवरेण्यं । विश्वासुपृत्सुदुष्टरं ॥ आनोऽअग्नेसुचेतुनार
यिंविश्वायुपोषसं । मार्डीकंधेहिजीवसे ॥ प्रपूतास्तिग्मशोचिषेवाचोगोतमाग्नये । भरस्वसुम्नयुर्गिरः ॥ योनोऽअग्ने
भिदासत्यंतिदूरेपदीष्टसः । अस्माकमिद्वृधेभव ॥ सहस्राक्षोविचर्षणिरग्नीरक्षांसिसेधति । होतागृणीतऽउक्थ्यः
॥ २८ ॥ (१।१३।७) इत्थाहिसोमऽइन्मदेब्रह्माचकारवर्धनं । शविष्ठवज्रिन्नोजसापृथिव्यानिःशशाऽअहिमर्चन्न
नुस्वराज्यं ॥ सत्वामदद्वृषामदःसोमःश्येनाभृतःसुतः । येनावृत्रंनिरद्भ्योजघंथवज्रिन्नोजसार्चन्ननु० ॥ प्रेह्यभीहिधृ
ष्णुहिनतेवज्रोनियंसते । इंद्रनृम्णंहितेशवोहनोवृत्रंजयाऽअपोर्चन्ननु० ॥ निरिंद्रभूम्याऽअधिवृत्रंजघंथनिर्दिवः । सृ
जामरुत्वतीरवजीवधन्याऽइमाऽअपोर्चन्न०॥ इंद्रोवृत्रस्यदोधतःसानुंवज्रेणहीळितः । अभिक्रम्यावजिघ्नतेपःसर्मायचो
दयन्नर्चन्न० ॥ २९ ॥ अधिसानौनिजिघ्नतेवज्रेणशतपर्वणा । मंदानऽइंद्रोऽअंधसःसखिभ्योगातुमिच्छत्यर्चन्न० ॥
इंद्रतुभ्यमिदद्रिवोनुत्तंवज्रिन्वीर्यं । यद्धत्यंमायिनंमृगंतमुत्वंमाययावधीरर्चन्न० ॥ वितेवज्रासोऽअस्थिरन्नवतिंना
व्याऽ३अनु । महत्तऽइंद्रवीर्यंबाह्वोस्तेबलंहितमर्चन्न० ॥ सहस्रंसाकमर्चतपरिष्टोभतविंशतिः । शतैनमन्वनोनवुरिंद्रा

(१।१३।७) इत्थाहीतिषोडशर्चस्यसूक्तस्यगोतमइंद्रोत्यायादध्यज्ञानुरथर्वाचपंक्तिः ।

यन्ब्रह्मोद्यंतमर्चन्न॰ ॥ इंद्रोवृत्रस्यतविषींनिरहन्त्सहसासहः । महत्तदस्यपौंस्यंवृत्रंजघन्वाँऽअसृजदर्चन्न॰ ॥ ३० ॥ इमेचित्तवमन्यवेवेपेतेभियसामही । यदिंद्रवज्रिन्नोजसावृत्रंमरुत्वाँऽअवधीरर्चन्न॰ ॥ नवेपसानतन्यतेंद्रंवृत्रोविबीभयत् । अभ्यैनंवज्रऽआयसःसहस्रभृष्टिरायतार्चन्न॰ ॥ यद्वृत्रंतवचाशनिंवज्रेणसमयोधयः । अहिमिंद्रजिघांसतोदिवितेबद्बधेशवोर्चन्न॰ ॥ अभिष्टनेतेऽअद्रिवोयत्स्थाजगच्चरेजते । त्वष्टाचित्तवमन्यवऽइंद्रवेविज्यतेभियार्चन्न॰ ॥ नहिनुयादधीमसींद्रंकोवीर्यापरः । तस्मिन्नृम्णमुतक्रतुंदेवाऽओजांसिसंदधुरर्चन्न॰ ॥ यामथर्वामनुष्पितादध्यङ्धियमत्नत । तस्मिन्ब्रह्माणिपूर्वथेंद्रऽउक्थासमग्मतार्च॰ ॥ ३१ ॥ इतिप्रथमाष्टकेपंचमोऽध्यायः ॥ ५ ॥

पंचमाध्यायेवर्गाः सूक्तानि ऋचः १८५ ॥ त्यागः ॥ इंद्रायेदं. २२ मरुद्भ्यइदं. १५ अग्नयइदं. १२० मध्यमायाग्नयइदं. ३ अग्नयइदं. ९ इंद्रायेदं. ११ ॥ इतिप्रथमेपंचमोऽध्यायः ॥

इंद्रोनवोपोषुषड्जगत्यंतंमश्वावतिजागतंमसाविविंशतिःषळनुष्टुभंऔष्णिहपांक्तगायत्रंत्रैष्टुभास्तृचाःप्रगाथःप्रयेद्वादशमारुतंहपंचम्यंत्येत्रिष्टुभौमरुतोदशगायत्रंप्रत्वक्षसःषड्जागतंमाविद्युन्मद्भिराद्यांत्येप्रस्तारपंक्तीपंचमीविराड्रूपांनोदशवैश्वदेवंतुपंचाद्याःसप्तमीचजगत्यःषष्ठीविराट्स्थानंऋजुनीतीनवगायत्रमंत्यानुष्टुप्त्वंसोमत्र्यधिकासौम्यंपंचम्यादिगायत्र्योद्वादशो [illegible] चतुर्जगत्यादिषळुष्णिगंतंतृचौंत्यआश्वि

CC-0. Prof. Acharya Kathmandu Collection

Digitization by eGangotri Funding MoE-Delhi

नौग्नीषोमौद्वादशाग्नीषोमीयंमाद्यास्तिस्रोनुष्टुभंउपांत्यास्तिस्रोगायत्र्यौष्टमीजगतीवेमंषोळशंकुत्सआग्नेयंतद्वित्रि
ष्टुवंतंपूर्वोदेवास्त्रयःपादादेवास्तन्नोमित्रोर्धर्चोलिंगोक्तदेवतोयद्दैवत्यंवासूक्तम् ॥ ६ ॥ ॥ ॥
हरिःओ३म् ॥ (१।१३।८) इंद्रोमदायवावृधेशवसेवृत्रहानृभिः । तमिन्महत्स्वाजिषूतेमर्भेहवामहेसवाजेषुप्र
नोविषत् ॥ असिहिवीरसेन्योसिभूरिपरादुदिः । असिदभ्रस्यचिद्वृधोयजमानायशिक्षसिसुन्वतेभूरितेवसु ॥ यदुदीर
तऽआजयोधृष्णवेधीयतेधना । युक्ष्वामदच्युताहरीकंहनःकंवसौदधोस्माँऽइंद्रवसौदधः ॥ ऋत्वामहाँऽअनुष्वधंभी
मऽआवावृधेशवः । श्रियऽऋष्वऽउपाकयोर्निशिप्रीहरिवान्दधेहस्तयोर्वज्रमायसं+ ॥ आपप्रौपार्थिवंरजोबद्धधेरोच
नादिवि । नत्वावाँऽइंद्रकश्चननजातोनजनिष्यतेतिविश्वंववक्षिथ ॥ १ ॥ योऽअर्योमर्तभोजनंपरादादातिदाशुषे ।
इंद्रोऽअस्मभ्यंशिक्षतुविभजाभूरितेवसुभक्षीयतवराधसः ॥ मदेमदेहिनोददिर्यूथागवामृजुक्रतुः । संगृभायपुरूशतो
भयाहस्त्यावसुशिशीहिरायऽआभर ॥ मादयस्वसुतेसचाशवसेशूरराधसे । विद्माहित्वापुरूवसुमुपकामान्त्ससृज्महे
थानोविताभव ॥ एतेतऽइंद्रजंतवोविश्वंपुष्यंतिवार्यं । अंतर्हिख्योजनानामर्योवेदोऽअदाशुषांतेषांनोवेदऽआभर
॥ २ ॥ (१।१३।९) उपोषुशृणुहीगिरोमघवन्मातथाऽइव । यदानःसूनृतावतःकरऽआदर्थयासऽइद्योजान्विंद्रते

(१।१३।८) इंद्रोमदायेतिनवर्चस्यसूक्तस्यगोतमइंद्रःपंक्तिः । (१।१३।९) उपोष्वितिषळर्चस्यसूक्तस्यगोतमइंद्रःपंक्तिरंत्याजगती ।

हरी॑ ॥ अक्ष॒न्नमी॑मदं॑त॒ह्यव॑प्रि॒या॑ऽअंधूषत । अस्तो॑षत॒स्वभा॑नवो॒विप्रा॒नवि॑ष्ठयाम॒तीयो॑जा॒० ॥ सु॒सं॒दृशं॑त्वाव॒यंमघ॑वन्वं
दि॒षीमा॑हिं । प्रनू॒नंपू॒र्णवं॑धुरः॒स्तु॒तोया॑हि॒वशाँ॒ऽअनु॒योजा॒० ॥ सघा॒तंवृष॑णं॒रथ॒मा॑धिति॑ष्ठातिगो॒विदं॑ । यःपात्रं॑हारियोज॒
नंपू॒र्णमिं॑द्र॒चिकै॑तति॒योजा॒० ॥ यु॒क्तस्ते॑अस्तु॒दक्षि॑णऽउ॒तस॒व्यःशं॑तक्रतो । तेनं॑जा॒यामुप॑प्रि॒यांमं॑दा॒नोया॒ह्यंध॑सो॒योजा॒० ॥
यु॒नज्मि॑ते॒ब्रह्म॑णाके॒शिना॒हरी॒ऽउप॒प्रया॑हिदधि॒षेगभ॑स्त्योः । उत्त्वा॑सु॒तासो॑रभ॒साऽअ॑मंदिषुःपूष॒ण्वान्व॑ज्रि॒न्त्समु॒पत्न्या॑
मदः ॥ ३ ॥ (१।१३।१०) अश्वा॑वतिप्रथ॒मोगोषु॑गच्छतिसुप्रा॒वीरिं॑द्र॒मर्त्य॒स्तवो॒तिभिः॑ । तमित्पृ॑णक्षि॒वसु॒नाभवी॑
यसा॒सिंधु॒मापो॒यथा॒भितो॒विचे॑तसः ॥ आपो॒नदे॒वीरुप॑यंतिहो॒त्रिय॑म॒वःप॑श्यंति॒वित॑तं॒यथा॒रजः॑ । प्रा॒चैर्दे॒वासः॒प्रण॑यंति
देव॒युंब्रह्म॒प्रियं॑जोषयं॑तेव॒राऽइं॑व ॥ अधि॒द्वयो॑रदधाऽउ॒क्थ्यं॑१॒वचो॒यत॑स्रु॒चामि॑थु॒नायास॑प॒र्यतः॑ । असं॑यत्तो॒व्रते॑तेक्षेति॒
पुष्य॑तिभ॒द्राश॒क्तिर्यज॑मानायसुन्व॒ते+ ॥ आदंगि॑राःप्रथ॒मंद॑धिरे॒वय॑ऽइ॒द्धाग्न॑यः॒शम्या॒येसु॑कृ॒त्यया॑ । सर्वं॑प॒णेःसम॑विंदं
त॒भोज॑न॒मश्वा॑वंतं॒गोमं॑त॒मापशुंनरः॑ ॥ य॒ज्ञैरथ॑र्वाप्रथ॒मःप॒थस्त॑ते॒ततः॒सूर्यो॑व्रत॒पावे॒नऽआज॑नि । आगाऽआ॑जदु॒शना॑का॒
व्यःसचा॑यु॒मस्यं॑जा॒तम॒मृतं॑यजामहे ॥ ब॒र्हिर्वा॒यत्स्व॑प॒त्याय॑वृ॒ज्यते॒र्को॑वा॒श्लोक॑मा॒घोष॑तेदि॒वि । ग्रावा॒यत्र॒वद॑तिका॒रुरु॒
क्थ्य॑१॒स्तस्येदिंद्रो॑अभिपि॒त्वेषु॑रण्यति ॥ ४ ॥ (१।१३।११) असा॑वि॒सोम॑ऽइंद्रते॒शवि॑ष्ठधृष्ण॒वाग॑हि । आत्वा॑पृण

(१।१३।१०) अश्वावतीतिषळर्चस्यसूक्तस्यगोतमइंद्रोजगती । (१।१३।११) असावीतिविंशत्यृचस्यसूक्तस्यगोतमइंद्रआद्याःषळनुष्टुभः

क्त्विंद्रियंरजःसूर्योनरश्मिभिः ॥ इंद्रमिद्धरीवहतोऽप्रतिधृष्टशवसं । ऋषीणांचस्तुतीरुपयज्ञंचमानुषाणां ॥ आतिष्ठ
वृत्रहन्रथंयुक्तातेब्रह्मणाहरी । अर्वाचीनंसुतेमनोग्रावाकृणोतुवग्नुना ॥ इममिंद्रसुतंपिबज्येष्ठममर्त्यंमदं । शुक्रस्यत्वा
भ्यक्षरन्धाराऽऋतस्यसादने ॥ इंद्रायनूनमर्चतोक्थानिचब्रवीतन । सुताऽअमत्सुरिंदवोज्येष्ठंनमस्यतासहः ॥ ५ ॥
नकिष्ट्वद्रथीतरोहरीयदिंद्रयच्छसे । नकिष्ट्वानुमज्मनानकिःस्वश्वऽआनशे ॥ यऽएकऽइद्विदयतेवसुमर्तायदाशुषे ।
ईशानोऽअप्रतिष्कुतऽइंद्रोऽअंग+ ॥ कदामर्तमराधसंपदाक्षुंपमिवस्फुरत् । कदानःशुश्रवद्गिरइंद्रो० ॥ यश्चिद्धित्वा
बहुभ्यऽआसुतावाँऽआविवासति । उग्रंतत्पत्यतेशवऽइंद्रो० ॥ स्वादोरित्थाविषूवतोमध्वःपिबंतिगौर्यः । याऽइंद्रेण
सयावरीर्वृष्णामदंतिशोभसेवस्वीरनुस्वराज्यं ॥ ६ ॥ ताऽअस्यपृशनायुवःसोमंश्रीणंतिपृश्नयः । प्रियाऽइंद्रस्यधेनवो
वज्रंहिन्वंतिसायकंवस्वी० ॥ ताऽअस्यनमसासहःसपर्यंतिप्रचेतसः । व्रतान्यस्यसश्चिरेपुरूणिपूर्वचित्तयेवस्वी० ॥
इंद्रोदधीचोऽअस्थभिर्वृत्राण्यप्रतिष्कुतः । जघाननवतीर्नव ॥ इच्छन्नश्वस्ययच्छिरःपर्वतेष्वपश्रितं । तद्विदच्छर्यणा
वति ॥ अत्राहगोरमन्वतनामत्वष्टुरपीच्यं । इत्थाचंद्रमसोगृहे+ ॥ ७ ॥ कोऽअद्ययुंक्तेधुरिगाऽऋतस्यशिमीवतोभा
मिनोदुर्हृणायून् । आसन्निषून्हृत्स्वसोमयोभून्यऽएषांभृत्यामृणधत्सजीवात् ॥ कऽईषतेतुज्यतेकोबिभायकोमंसते

सप्तम्याद्यास्तिस्रउष्णिहःदशम्याद्यास्तिस्रःपंक्तयःत्रयोदशाद्यास्तिस्रोगायत्र्यःषोळश्याद्यास्तिस्रस्त्रिष्टुभःअंत्येद्वेबृहतीसतोबृहत्यौ ।

संतामिंद्रंकोऽअंतिं । कस्तोकायकऽइभायोतरायेधिब्रवत्तन्वे३ कोजनाय ॥ कोऽअग्निमीट्टेहविषाघृतेनंस्रुचायंजाताऽऋतुभिर्ध्रुवेभिः । कस्मैदेवाऽआवहानाशुहोमकोमंसतेवीतिहोत्रःसुदेवः+ ॥ त्वमंगप्रशंसिषोदेवःशविष्ठमर्त्यं । नत्वदन्योमघवन्नस्तिमर्डितेंद्रब्रवीमितेवचः ॥ मातेराधांसिमातऽऊतयोवसोस्मान्कदाचनादभन् । विश्वाचनऽउपमिमीहिमानुषवसूनिचर्षणिभ्यऽआ+ ॥ ८ ॥ (१।१४।१) प्रयेशुंभंतेजनयोनसप्तयोयामन्रुद्रस्यसूनवःसुदंससः । रोदसीहिमरुतश्चक्रिरेवृधेमदंतिवीराविदथेषुघृष्वयः ॥ तऽउक्षितासोमहिमानमाशतदिविरुद्रासोऽअधिचक्रिरेसदः । अर्चंतोऽअर्कंजनयंतऽइंद्रियमधिश्रियोदधिरेपृश्निमातरः ॥ गोमातरोयच्छुभयंतेऽअंजिभिस्तनूषुशुभ्रादधिरेविरुक्मतः । बाधंतेविश्वमभिमातिनमपवर्त्मान्येषामनुरीयतेघृतं+ ॥ वियेभ्राजंतेसुमखासऽऋष्टिभिःप्रच्यावयंतोऽअच्युताचिदोजसा । मनोजुवोयन्मरुतोरथेष्वावृषव्रातासःपृषतीरयुग्ध्वं ॥ प्रयद्रथेषुपृषतीरयुग्ध्वंवाजेऽअद्रिंमरुतोरंहयंतः । उतारुषस्यविष्यंतिधाराश्चर्मेवोदभिर्व्युंदंतिभूम ॥ आवोवहंतुसप्तयोरघुष्यदोरघुपत्वानःप्रजिगातबाहुभिः । सीदताबर्हिरुरुवःसदस्कृतंमादयध्वंमरुतोमध्वोऽअंधसः ॥ ९ ॥ तेवर्धंतस्वतवसोमहित्वनानाकंतस्थुरुरुचक्रिरेसदः । विष्णुर्यद्धावद्वृषणंमदच्युतंवयोनसीदन्नधिबर्हिषिप्रिये+ ॥ शूराऽइवेद्युयुधयोनजग्मयःश्रवस्यवोनपृतनासुयेतिरे ।

(१।१४।१) प्रयेशुंभंतइतिद्वादशर्चस्यसूक्तस्यगोतमोमारुतंजगत्यंत्येत्रिष्टुभौ।

Digitization by eGangotri. Funding MoE-IKS Delhi

ऋक्सं. भयंतेविश्वाभुवनामरुद्भ्योराजानऽइवत्वेषसंदृशोनरः ॥ त्वष्टायद्वज्रंसुकृतंहिरण्ययंसहस्रभृष्टिंस्वपाऽअवर्तयत् । मंडलं १
अ.१अ.६ धत्तऽइंद्रोनर्यपांसिकर्तवेहन्वृत्रंनिरपामौब्जदर्णवं+ ॥ ऊर्ध्वंनुनुद्रेवतंतऽओजसादादृहाणंचिद्बिभिदुर्विपर्वतं । धमं
तोवाणंमरुतःसुदानवोमदेसोमस्यरण्यानिचक्रिरे ॥ जिह्मंनुनुद्रेवतंतयादिशासिंचन्नुत्संगोतमायतृष्णजे । आगच्छं अनु. १४
॥३८॥ तीमवसाचित्रभानवःकामंविप्रस्यतर्पयंतधामभिः ॥ यावःशर्मशशमानायसंतित्रिधातूनिदाशुषेयच्छताधि । अस्म
भ्यंतानिमरुतोवियंतरयिंनोधत्तवृषणःसुवीरं ॥ १० ॥ (१।१४।२) मरुतोयस्यहिक्षयेपाथादिवोविमहसः । ससु
गोपातमोजनः ॥ यज्ञैर्वायज्ञवाहसोविप्रस्यवामतीनां । मरुतःशृणुताहवं ॥ उतवायस्यवाजिनोनुविप्रमतक्षत । सगं
तागोमतिव्रजे+ ॥ अस्यवीरस्यबर्हिषिसुतःसोमोदिविष्टिषु । उक्थंमदश्चशस्यते ॥ अस्यश्रोषंत्वाभुवोविश्वायश्चर्षणी
रभि । सूरंचित्सस्रुषीरिषः ॥ ११ ॥ पूर्वीभिर्हिददाशिमशरद्भिर्मरुतोवयं । अवोभिश्चर्षणीनां+ ॥ सुभगःसप्रयज्य
वोमरुतोऽअस्तुमर्त्यः । यस्यप्रयांसिपर्षथ ॥ शशमानस्यवानरःस्वेदस्यसत्यशवसः । विदाकामस्यवेनतः ॥ यूयंत
त्सत्यशवसऽआविष्कर्तमहित्वना । विध्यताविद्युतारक्षः ॥ गूहतागुह्यंतमोवियातविश्वमत्रिणं । ज्योतिष्कर्तायदु
श्मसि ॥ १२ ॥ (१।१४।३) प्रत्वक्षसःप्रतवसोविरप्शिनोनानताऽअविथुराऽऋजीषिणः । जुष्टतमासोनृतमासो ॥३८॥

(१।१४।२) मरुतोयस्येतिदशर्चस्यसूक्तस्यगोतमोमरुतोगायत्री । (१।१४।३) प्रत्वक्षसइतिषळर्चस्यसूक्तस्यगोतमोमरुतोजगती ।

ऽअंजिभिर्व्यानज्रेकेचिदुस्राऽइवस्तृभिः ॥ उपह्वरेषुयदचिध्वंययिंवयऽइवमरुतःकेनचित्पथा । श्चोतंतिकोशाऽउप
वोरथेष्वाघृतमुक्षतामधुवर्णमर्चते ॥ प्रैषामज्मेषुविथुरेवरेजतेभूमिर्यामेषुयद्धयुंजतेशुभे । तेक्रीळयोधुनयोभ्राजदृष्टयः
स्वयंमहित्वंपनयंतधूतयः ॥ सहिस्वसृत्पृषदश्वोयुवागणो३याऽईशानस्तविषीभिरावृतः । असिसत्यऽऋणयावानेद्यो
स्याधियःप्राविताथावृषागणः+ ॥ पितुःप्रत्नस्यजन्मनावदामसिसोमस्यजिह्वाप्रजिगातिचक्षसा । यदीमिंद्रंशम्यृक्वा
णऽआशतादिन्नामानियज्ञियानिदधिरे ॥ श्रियसेकंभानुभिःसंमिमिक्षिरेतेरश्मिभिस्तऽऋक्वभिःसुखादयः । तेवाशी
मंतऽइष्मिणोऽअभीरवोविद्रेप्रियस्यमारुतस्यधाम्नः ॥ १३ ॥ (१।१४।४) आविद्युन्मद्भिर्मरुतःस्वर्कैरथेभिर्यातऽ
ऋष्टिमद्भिरश्वपर्णैः । आवर्षिष्ठयानऽइषावयोनपप्ततासुमायाः ॥ तेरुणेभिर्वरमापिशंगैःशुभेकंयांतिरथतूर्भिरश्वैः ।
रुक्मोनचित्रःस्वधितीवान्पव्यारथस्यजंघनंतभूम ॥ श्रियेकंवोऽअधितनूषुवाशीर्मेधावनानकृणवंतऽऊर्ध्वा । युष्म
भ्यंकंमरुतःसुजातास्तुविद्युम्नासोधनयंतेऽअद्रिं ॥ अहानिगृध्राःपर्यावऽआगुरिमांधियंवार्कार्यांचदेवीं । ब्रह्मकृण्वं
तोगोतमासोऽअर्कैरूर्ध्वंनुनुद्रऽउत्सधिंपिबध्यै ॥ एतत्त्यन्नयोजनमचेतिसस्वर्हयन्मरुतोगोतमोवः । पश्यन्हिरण्यच
क्रानयोदंष्ट्रान्विधावतोवराहून् ॥ एषास्यावोमरुतोनुभर्त्रीप्रतिष्टोभतिवाघतोनवाणी । अस्तोभयद्वृथासामनुस्वधांग

(१।१४।४) आविद्युन्मद्भिरितिषळर्चस्यसूक्तस्यगोतमोमरुतस्त्रिष्टुप्आद्यांत्यप्रस्तारपंक्तीपंचमीविराड्रूपा ।

भंस्त्योः ॥ १४ ॥ (१।१४।५) आनोभद्राःक्रतवोयंतुविश्वतोदब्धासोऽअपरीतासऽउद्भिदः । देवानोयथासदमि
द्वृधेऽअसन्नप्रायुवोरक्षितारोदिवेदिवे ॥ देवानांभद्रासुमतिर्ऋजूयतांदेवानांरातिरभिनोनिवर्ततां । देवानांसख्यमुप
सेदिमावयंदेवानऽआयुःप्रतिरंतुजीवसे ॥ तान्पूर्वयानिविदाहूमहेवयंभगंमित्रमदितिंदक्षमस्रिधं । अर्यमणंवरुणंसो
ममश्विनासरस्वतीनःसुभगामयस्करत् ॥ तन्नोवातोमयोभुवातुभेषजंतन्मातापृथिवीतत्पिताद्यौः । तद्ग्रावाणःसोम
सुतोमयोभुवस्तदश्विनाशृणुतंधिष्ण्यायुवं+ ॥ तमीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयं । पूषानोयथावे
दसामसद्वृधेरक्षितापायुरदब्धःस्वस्तये ॥ १५ ॥ स्वस्तिनऽइंद्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः । स्वस्तिनस्तार्क्ष्यो
ऽअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ॥ पृषदश्वामरुतःपृश्निमातरःशुभंयावानोविदथेषुजग्मयः । अग्निजिह्वामन
वःसूरचक्षसोविश्वेनोदेवाऽअवसागमन्निह+ ॥ भद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः । स्थिरैरंगैस्तुष्टु
वांसस्तनूभिर्व्यशेमदेवहितंयदायुः ॥ शतमिन्नुशरदोऽअंतिदेवायत्रानश्चक्राजरसंतनूनां । पुत्रासोयत्रपितरोभवंति

(१।१४।५) आनोभद्राइतिदशर्चस्यसूक्तस्यगोतमोविश्वेदेवास्त्रिष्टुप् आद्यापंचसप्तमीचजगत्यःषष्ठीविराट्स्थाना । (सूक्तभेदप्रयोगपक्षेतुआद्यानांचतसृणांविश्वेदेवाःततएकस्याइंद्रापूषणौततश्चतसृणांविश्वेदेवाःततएकस्याअदितिःएवंदश । ऋजुनीतीत्येतदव्यवहिताग्रिमसूक्तेतुभेदप्रयोगकरणाशक्यत्वान्नवानामपिविश्वेदेवाएव) । ॥३९॥

मानो॑म॒ध्यारी॑रिष॒तायु॒र्गंतो॑ः ॥ अदि॑ति॒र्द्यौरदि॑तिर॒ंतरि॑क्ष॒मदि॑तिर्मा॒तासपि॒तासपु॒त्रः । विश्वे॑दे॒वाऽअदि॑तिः॒पंच॒जना॒ऽ
अदि॑तिर्जा॒तमदि॑ति॒र्जनि॑त्वं ॥ १६ ॥ (१।१४।६) ऋ॒जु॒नी॒तीनो॒वरु॑णोमि॒त्रोनय॑तुवि॒द्वान् । अ॒र्य॒मादे॒वैःस॒जोषा॑ः ॥
तेहिवस्वो॒वस॑वाना॒स्तेऽअप्र॑मूरा॒महो॑भिः । व्र॒तार॑क्षंतेवि॒श्वाहा॑ ॥ तेऽअ॒स्मभ्यं॒शर्म॑यंसन्न॒मृता॒मर्त्ये॑भ्यः । बाध॑माना॒ऽ
अप॒द्विष॑ः ॥ विन॑ःप॒थःसु॑वि॒ताय॑चि॒यंत्विंद्रो॑म॒रुत॑ः । पू॒षाभगो॒वंद्या॑सः ॥ उ॒तनो॒धियो॒गोऽअ॑ग्राःपूष॒न्विष्ण॒वेव॑यावः ।
कर्ता॑नःस्वस्ति॒मत॑ः ॥ १७ ॥ मधु॒वाता॑ऽऋताय॒तेमधु॑क्षरंति॒सिंध॑वः । माध्वी॑र्नःसं॒त्वोष॑धीः ॥ मधु॒नक्त॑मु॒तोषसो॒मधु॑
म॒त्पार्थि॑वं॒रज॑ः । मधु॒द्यौर॑स्तुनःपि॒ता+ ॥ मधु॑मान्नो॒वन॒स्पति॒र्मधु॑माँऽअस्तु॒सूर्य॑ः । माध्वी॒र्गावो॑भवंतुनः ॥ शंनो॑मि॒
त्रःशंवरु॑णः॒शंनो॑भवत्वर्य॒मा । शंन॒ऽइंद्रो॒बृह॒स्पतिः॒शंनो॒विष्णु॑रुरुक्र॒मः+ ॥ १८ ॥ (१।१४।७) त्वंसो॑म॒प्रचि॑कितो
म॒नीषा॒त्वंरजि॑ष्ठ॒मनु॑नेषि॒पंथा॑ं । तव॒प्रणी॑तीपि॒तरो॑नऽइंदोदे॒वेषु॒रत्न॑मभजंत॒धीरा॑ः ॥ त्वंसो॑म॒क्रतु॑भिःसु॒क्रतु॑र्भू॒स्त्वंदक्षै॑ःसु॒
दक्षो॑वि॒श्ववे॑दाः । त्वंवृषा॑वृष॒त्वेभि॑र्महि॒त्वाद्यु॒म्नेभि॑र्द्यु॒म्न्य॑भवोनृ॒चक्षा॑ः ॥ राज्ञो॒नुते॒वरु॑णस्यव्र॒तानि॑बृ॒हद्ग॑भी॒रंतव॑सोम॒धा
म॑ । शुचि॒ष्ट्वम॑सिप्रि॒योनमि॒त्रोद॒क्षाय्यो॑ऽअर्य॒मेवा॑सिसोम ॥ याते॒धामा॑निदि॒वियापृ॑थि॒व्यांयापर्व॑ते॒ष्वोष॑धीष्व॒प्सु । ते

(१।१४।६) ऋजुनीतीनइतिनवर्चस्यसूक्तस्यगोतमोविश्वेदेवागायत्रीअंत्यानुष्टुप् । (१।१४।७) त्वंसोमइतित्रयोविंशत्यृचस्यसूक्तस्य गोतमःसोमस्त्रिष्टुप्पंचम्यादिद्वादशगायत्र्यःसप्तदश्युष्णिक् ।

भि॑र्नो॒विश्वैः॑सु॒मना॒ऽअहे॑ळन्राज॑न्त्सोम॒प्रति॑ह॒व्यागृ॑भाय ॥ त्वंसो॑मासि॒सत्प॑ति॒स्त्वंराजो॒तवृ॑त्र॒हा । त्वंभ॒द्रोऽअ॑सि॒क्र
तुः ॥ १९ ॥ त्वंच॑सोम॒नो॒वशो॑जी॒वातुं॒नम॑रामहे । प्रि॒यस्तो॑त्रो॒वन॒स्पतिः॑ ॥ त्वंसो॑मम॒हेभगं॒त्वंयून॑ऽऋताय॒ते । दक्षं॑द
धासिजी॒वसे॑ ॥ त्वंनः॑सोमवि॒श्वतो॒रक्षा॑राजन्नघाय॒तः । नरि॑ष्ये॒त्त्वाव॑तः॒सखा॑ ॥ सोम॒यास्ते॑मयो॒भुव॑ऽऊ॒तयः॒संति॑दा॒शु
षे॑ । ताभि॑र्नो॑वि॒ताभ॑व ॥ इ॒मंय॒ज्ञमि॒दंवचो॑जुजुषा॒णऽउ॒पाग॑हि । सोम॒त्वंनो॑वृ॒धेभ॑व ॥ २० ॥ सोम॑गी॒र्भिष्ट्वा॑व॒यंव॒र्ध
या॑मोवच॒ोविदः॑ । सु॒मृ॒ळी॒कोन॒ऽआवि॑श ॥ ग॒य॒स्फानो॑ऽअमी॒वहा॒व॑सु॒वित्पु॑ष्टि॒वर्ध॑नः । सु॒मि॒त्रःसो॑मनोभव ॥ सोम॑
रा॒रं॑धिनो॑हृ॒दिगावो॒नयव॑से॒ष्वा । मर्य॑ऽइव॒स्वऽओ॒क्ये॑* ॥ यःसो॑मस॒ख्येतव॑रा॒रण॑द्दे॒वमर्त्यः॑ । तंदक्षः॑सचतेक॒विः+ ॥
उ॒रु॒ष्याणो॑ऽअ॒भिश॑स्तेः॒सोम॒निपा॒ह्यंह॑सः । सखा॑सु॒शेव॑ऽएधिनः ॥ २१ ॥ आप्या॑यस्व॒समे॑तुते॒विश्वतः॑सोम॒वृष्ण्यं॑ ।
भवा॒वाज॑स्यसंग॒थे+ ॥ आप्या॑यस्वमदिन्तम॒सोम॒विश्वे॑भिरं॒शुभिः॑ । भवा॑नःसु॒श्रव॑स्तमः॒सखा॑वृ॒धे+ ॥ संते॒पयां॑सि॒समु॑
यंतु॒वाजाः॒संवृष्ण्या॑न्यभिमाति॒षाहः॑ । आ॒प्याय॑मानोऽअ॒मृता॑यसोमदि॒विश्रवां॑स्युत्त॒मानि॑धिष्व ॥ याते॒धामा॑निह॒वि
षा॒यजं॑ति॒ताते॒विश्वा॑परि॒भूर॑स्तुय॒ज्ञं । ग॒य॒स्फानः॑प्र॒तर॑णःसु॒वीरो॒वीर॑हा॒प्रच॑रासोम॒दुर्या॑न् ॥ सोमो॑धे॒नुंसोमो॒ऽअर्व॑तमा॒
शुंसोमो॑वी॒रंक॑र्म॒ण्यं॑ददाति । सा॒द॒न्यं॑वि॒द॒थ्यं॑स॒भेयं॑पितृ॒श्रव॑णं॒योददा॑शदस्मै ॥ २२ ॥ अषा॑ळ्हंयु॒त्सुपृत॑नासु॒पप्रिं॑स्व॒र्षा
म॒प्सांवृ॒जन॑स्यगो॒पां । भ॒रे॒षु॒जांसु॑क्षि॒तिंसु॒श्रव॑सं॒जयं॑त॒त्वामनु॑मदेमसोम ॥ त्वमि॒माऽओष॑धीःसोम॒विश्वा॒स्त्वम॒पोऽअ॑ज

नयुस्त्वंगाः । त्वमातंतंथोर्व१तरिक्षंत्वंज्योतिषावितमोववर्थ ॥ देवेननोमनसादेवसोमरायोभागंसहसावन्नभियुध्य ।
मात्वातनदीशिषेवीर्यस्योभयेभ्यःप्रचिकित्सागविष्टौ ॥ २३ ॥ (१।१४।८) एताऽउत्याऽउषसःकेतुमक्रतपूर्वेऽअ
र्धेरजसोभानुमंजते । निष्कृण्वानाऽआयुधानीवधृष्णवःप्रतिगावोरुषीर्यंतिमातरः ॥ उदपप्तन्नरुणाभानवोवृथास्वा
युजोऽअरुषीर्गाऽअयुक्षत । अक्रन्नुषासोवयुनानिपूर्वथारुशंतंभानुमरुषीरशिश्रयुः ॥ अर्चंतिनारीरपसोनविष्टिभिः
समानेनयोजनेनापरावतः । इषंवहंतीःसुकृतेसुदानवेविश्वेदहयजमानायसुन्वते+ ॥ अधिपेशांसिवपतेनृतूरिवापो
र्णुतेवक्षऽउस्रेवबर्जहं । ज्योतिर्विश्वस्मैभुवनायकृण्वतीगावोनव्रजंव्यु१षाऽआवर्तमः ॥ प्रत्यर्चीरुशदस्याऽअदर्शिवि
तिष्ठतेबाधतेकृष्णमभ्वं । स्वरुंनपेशोविदथेष्वंजन्चित्रंदिवोदुहिताभानुमश्रेत् ॥ २४ ॥ अतारिष्मतमसस्पारमस्यो
षाऽउच्छंतीवयुनाकृणोति । श्रियेछंदोनस्मयतेविभातीसुप्रतीकासौमनसायाजीगः ॥ भास्वतीनेत्रीसूनृतानांदिवस्त
वेदुहितागोतमेभिः । प्रजावतोनृवतोऽअश्वबुध्यानुषोगोऽअग्राँऽउपमासिवाजान् ॥ उषस्तमश्यांयशसंसुवीरंदासप्र
वर्गंरयिमश्वबुध्यं । सुदंससाश्रवसायाविभासिवाजप्रसूतासुभगेबृहंतं ॥ विश्वानिदेवीभुवनाभिचक्ष्याप्रतीचीचक्षुरु
र्वियाविभाति । विश्वंजीवंचरसेबोधयंतीविश्वस्यवाचमविदन्मनायोः+ ॥ पुनःपुनर्जायमानापुराणीसमानंवर्णमभि

(१।१४।८) एताउत्याइत्यष्टादशर्चस्यसूक्तस्यगोतमउषाः अंत्यानांतिसृणामाश्विनं आद्याश्चतस्रोजगत्यःततोष्टौत्रिष्टुभःअंत्याःषळुष्णिहः ।

शुंभमाना । श्वघ्नीवकृत्नुर्विजऽआमिनानामर्तस्यद्वीजरयंत्यायुः ॥ २५ ॥ व्यूर्ण्वतीदिवोऽअंताँऽअबोध्यपस्वसारं
सनुतर्युयोति । प्रमिनतीमनुष्यायुगानियोषाजारस्यचक्षसाविभाति ॥ पशूनचित्रासुभगाप्रथानासिंधुर्नक्षोदऽउर्वि
याव्यंश्वैत् । अमिनतीदैव्यानिव्रतानिसूर्यस्यचेतिरश्मिभिर्दृशाना⁺ ॥ उषस्तच्चित्रमाभरास्मभ्यंवाजिनीवति । येन
तोकंचतनयंचधामहे ॥ उषोऽअद्येहगोमत्यश्वावतिविभावरि । रेवदस्मेव्युच्छसूनृतावति ॥ युक्ष्वाहिवाजिनीवत्य
श्वाँऽअद्यारुणाँऽउषः । अथानोविश्वासौभगान्यावह ॥ २६ ॥ अश्विनावर्तिरस्मदागोमद्दस्राहिरण्यवत् । अर्वाग्र
थंसमनसानियच्छतं ॥ यावित्थाश्लोकमादिवोज्योतिर्जनायचक्रथुः । आनऽऊर्जंवहतमश्विनायुवं⁺ ॥ एहदेवाम
योभुवादस्राहिरण्यवर्तनी । उषर्बुधोवहंतुसोमपीतये ॥ २७ ॥ (१।१४।९) अग्नीषोमाविमंसुमेशृणुतंवृषणाहवं ।
प्रतिसूक्तानिहर्यतंभवतंदाशुषेमयः ॥ अग्नीषोमायोऽअद्यवामिदंवचःसपर्यति । तस्मैधत्तंसुवीर्यंगवांपोषंस्वश्व्यं ॥
अग्नीषोमायऽआहुतिंयोवांदाशाद्धविष्कृतिं । सप्रजयासुवीर्यंविश्वमायुर्व्यश्नवत् ॥ अग्नीषोमाचेतितद्वीर्यंवांयदमु
ष्णीतमवसंपणिंगाः । अवातिरतंबृसयस्यशेषोविंदतंज्योतिरेकंबहुभ्यः ॥ युवमेतानिदिविरोचनान्यग्निश्चसोमसक्रतू
अधत्तं । युवंसिंधूँऽरभिशस्तेरवद्यादग्नीषोमावमुंचतंगृभीतान्⁺ ॥ आन्यंदिवोमातरिश्वाजभारामथ्नादन्यंपरिश्येनो

(१।१४।९) अग्नीषोमावितिद्वादशर्चंस्यसूक्तस्यगोतमोग्नीषोमौत्रिष्टुप् आद्यास्तिस्रोनुष्टुभो(ष्टमीजगतीवा)नवम्यादितिस्रोगायत्र्यः ।

ऽअद्रे॑ः । अग्नी॑षोमा॒ब्रह्म॑णावावृधा॒नोरुंय॒ज्ञाय॑चक्रथुरु॒लोकं+ ॥ २८ ॥ अग्नी॑षोमाह॒विष॒ःप्रस्थि॑तस्यवी॒तंहर्य॑तंवृषणा जु॒षेथां॑ । सु॒शर्मा॑णा॒स्वव॑सा॒हिभू॒तमथा॑धत्त॒ंयज॑माना॒यशंयोः ॥ योऽअ॒ग्नीषोमा॑ह॒विषा॑सप॒र्याद्दे॑व॒द्रीचा॒मन॑सा॒योघृ॒तेन॑ । तस्य॑व्र॒तंर॑क्षतंपा॒तमंह॑सोवि॒शेजना॑य॒महि॒शर्म॑यच्छतं ॥ अग्नी॑षोमा॒सवे॑दसा॒सहू॑तीवनतं॒गिर॑ः । संदे॑व॒त्राब॑भूवथुः ॥ अग्नी॑षोमाव॒नेन॑वा॒योवा॑ंघृ॒तेन॒दाश॑ति । तस्मै॑दीदयतंबृ॒हत्+ ॥ अग्नी॑षोमावि॒मानि॑नोयु॒वंह॒व्याजु॑जोषतं । आया॑त॒मुप॑ न॒ःसचा॑ ॥ अग्नी॑षोमापिपृ॒तमर्व॑तोन॒ऽआप्या॑यंतामु॒स्रिया॑हव्य॒सूद॑ः । अ॒स्मेबला॑निम॒घव॑त्सुधत्तंकृणु॒तंनो॑ऽअध्व॒रंश्रु॒ष्टि मंतं॑ ॥ २९ ॥ (१।१५।१) इ॒मंस्तोम॒मर्ह॑तेजा॒तवे॑दसे॒रथ॑मिव॒संम॑हेमाम॒नीष॑या । भ॒द्राहि॒नःप्रम॑तिरस्यसं॒सद्यग्ने॑स॒ख्येमारि॑षामाव॒यंतव॑ ॥ यस्मै॒त्वमा॒यज॑से॒ससा॑धत्यन॒र्वाक्षे॑ति॒दध॑तेसु॒वीर्य॑ं । सतू॑ताव॒नैन॑मश्नोत्यंह॒तिरग्ने॰ ॥ शु॒केम॑त्वा स॒मिधं॑सा॒धया॒धिय॒स्त्वेदे॒वाह॒विर॑द॒न्त्याहु॑तं । त्वमा॑दि॒त्याँआव॑ह॒तान्ह्यु१॒श्मस्यग्ने॰ ॥ भरा॑मे॒ध्मंकृ॒णवा॑माह॒वींषि॑तेचि॒तयं॑त॒ःपर्व॑णापर्वणाव॒यं । जी॒वात॑वेप्रत॒रंसा॑धया॒धियोग्ने॰ ॥ वि॒शांगो॒पाऽअ॑स्यचरंतिज॒न्तवो॑द्वि॒पच्च॒यदु॒तचतु॑ष्पद॒क्तु भिः॑ । चि॒त्रःप्रके॑त॒ऽउ॒षसो॑म॒हाँऽअ॒स्यग्ने॰ ॥ ३० ॥ त्वम॑ध्व॒र्युरु॒तहोता॑सिपू॒र्व्यःप्र॒शास्ता॒पोता॑ज॒नुषा॑पु॒रोहि॑तः । वि

(१।१५।१) इमंस्तोममितिषोळशर्चस्यसूक्तस्यआङ्गिरसःकुत्सोग्निःपूर्वोदेवाइत्यस्यादेवाअग्निश्चतन्नोमित्रइत्यंत्यार्धर्चस्यमित्रवरुणादितिसिंधुपृथिवीद्यावोजगतीअंत्येत्रिष्टुभौ(यद्दैवत्यंवासूक्तमितिपक्षेऽग्निरेवदेवता) ।

श्वांविद्वाँऽआर्त्विज्याधीरपुष्यस्यग्ने० ॥ योविश्वतःसुप्रतीकसदृङ्ङसिदूरेचित्संतळिदिवातिरोचसे । रात्र्याश्चिदंधो
ऽअतिदेवपश्यस्यग्ने० ॥ पूर्वोदेवाभवतुसुन्वतोरथोस्माकंशंसोऽअभ्यस्तुदूढ्यः । तदाजानीतोतपुष्यतावचोग्ने० ॥
वधैर्दुःशंसाँऽअपदूढ्योजहिदूरेवायेऽअंतिवाकेचिदत्रिणः । अथायज्ञायगृणतेसुगंकृध्यग्ने० ॥ यदयुक्थाऽअरुषारो
हितारथेवातजूतावृषभस्येवतेरवः । आदिन्वसिवनिनोधूमकेतुनाग्ने० ॥ ३१ ॥ अधस्वनादुतबिभ्युःपतत्रिणोद्रप्सा
यत्तेयवसादोव्यस्थिरन् ॥ सुगंतत्तेतावकेभ्योरथेभ्योग्ने० ॥ अयंमित्रस्यवरुणस्यधायसेवयातांमरुतांहेळोऽअद्भुतः ।
मृळासुनोभूत्वेषांमनःपुनरग्ने० ॥ देवोदेवानामसिमित्रोऽअद्भुतोवसुर्वसूनामसिचारुरध्वरे । शर्मन्त्स्यामतवसप्रथ
स्तमेग्ने०॥ तत्तेभद्रंयत्समिद्धःस्वेदमेसोमाहुतोजरसेमृळयत्तमः । दधासिरत्नंद्रविणंचदाशुषेग्ने०॥ यस्मैत्वंसुद्रविणोददा
शोनागास्त्वमदितेसर्वताता । यंभद्रेणशवसाचोदयासिप्रजावताराधसातेस्याम ॥ सत्वमग्नेसौभगत्वस्यविद्वानस्माक
मायुःप्रतिरेहदेव । तन्नोमित्रोवरुणोमामहंतामदितिःसिंधुःपृथिवीऽउतद्यौः॥३२॥ ॥ इतिप्रथमाष्टकेषष्ठोऽध्यायः॥६॥

षष्ठाध्यायेवर्गाः ३२ सूक्तानि १४ ऋचः १६३ ॥ त्यागः॥ इंद्रायेदं. ४१ मरुद्भ्यइदं. २४ विश्वेभ्योदेवेभ्यइदं. ४ इंद्रापूषभ्यामिदं.
विश्वेभ्योदेवेभ्यइदं. ४ अदित्याइदं. विश्वेभ्योदेवेभ्यइदं. ९ सोमायेदं. २३ उषसइदं. १५ अश्विभ्यामिदं. ३ अग्नीषोमाभ्यामिदं. १२
अग्नयइदं. ७ देवाग्निभ्यइदं (देवेभ्योऽग्निभ्य.) अग्नयइदं. ७ अग्निमित्रावरुणादितिसिंधुपृथिवीद्युभ्यइदं. ॥ इतिप्रथमेषष्ठोध्यायः ॥

द्वेएकादशौषसायवाग्नयेंसप्रत्नथानवद्रविणोदसैंपनोष्टौशुचयेगायत्रंवैश्वानरस्यतृचंवैश्वानरीयंजातवेदसएका
जातवेदस्यंमेतदादीन्येकभूयांसिंसूक्तसहस्रमेतत्तुकश्यपार्षंसयोवृषैकोना॑वार्षा॑गिराऋज्राश्वांबरीषंसहदेवभय
मानसुराधस॑ःप्रमंदिनएकादशकुत्सश्चतुस्त्रिष्टुबंत॑माद्यागर्भस्राविण्युपनिषदिंमांतेंत्यात्रिष्टुप्त॑त्तेष्टौयोनिर्नव॑चंद्र
माएकोनाप्त्यस्त्रितोवा॑वैश्वदेवंहिपांक्तमंत्यात्रिष्टु॑बष्टमीमहाबृहतीयवमध्यैंद्रंमित्रंसप्तत्रिष्टुबंतं॑यज्ञस्तृचंयइंद्रा
ग्नीसप्तोनैंद्राग्नंतु॑विह्यष्टौततंनवार्भवंतु॑पंचम्यंत्येत्रिष्टुभौतक्षन्पंचांत्यात्रिष्टु॑बीळेपंचाधिकाश्विनंमाद्यौपादौलिङ्गो
क्तदेवता॑वंत्येत्रिष्टुभौ ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥

हरिः॒ओ३म् ॥ (१।१५।२) द्वेविरू॑पेचरत॒ःस्वर्थे॑ऽअ॒न्यान्या॑व॒त्समुप॑धापयेते । हरि॑र॒न्यस्यां॒भव॑तिस्व॒धावा॑न्छु॒
क्रोऽअ॒न्यस्यां॑ददृशेसु॒वर्चाः॑ ॥ दशे॒मंत्वष्टु॑र्जनयंत॒गर्भ॒मतं॑द्रासोयुव॒तयो॒विभृ॑त्रं । ति॒ग्मानी॑कं॒स्वय॑शसं॒जने॑षुवि॒रोच॑मानं॒
परि॑षींनयंति ॥ त्रीणि॒जाना॒परि॑भूषंत्यस्यसमु॒द्रऽएकं॑दि॒व्येक॑म॒प्सु । पूर्वा॒मनु॒प्रदिशं॒पार्थि॑वानामृ॒तून्प्र॒शास॒द्विद॑धावनु॒
ष्ठु+ ॥ कऽइ॒मंवो॑नि॒ण्यमाचि॑केतव॒त्सोमा॒तॄर्ज॑नयतस्व॒धाभिः॑ । ब॒ह्वीनां॒गर्भो॑ऽअ॒पसा॑मु॒पस्था॑न्म॒हान्क॒विर्निश्च॑रतिस्व॒धा
वा॑न् ॥ आ॒विष्ट्यो॑वर्धते॒चारु॑रासुजि॒ह्मानां॑मू॒र्ध्वःस्वय॑शाऽउ॒पस्थे॑ । उ॒भेत्वष्टु॑र्बिभ्यतु॒र्जाय॑मानात्प्रती॒चीसिं॒हंप्रति॑जोषयेते

(१।१५।२) द्वेविरूपेइत्येकादशर्चस्यसूक्तस्यांगिरसःकुत्सउषोग्निस्त्रिष्टुप् । (इतआरभ्यजातवेदसइत्यतंशुद्धोग्निर्वा) ।

॥ १ ॥ उभेभद्रेजोषयेतेनमेनेगावोनवाश्राऽउपतस्थुरेवैः । सदक्षाणांदक्षपतिर्बभूवांजंतियंदक्षिणतोहविर्भिः ॥ उद्यंयमीतिसवितेवबाहूउभेसिचौयततेभीमऽऋंजन् । उच्छुक्रमत्कमजतेसिमस्मान्नवामातृभ्योवसनाजहाति ॥ त्वेषंरूपंकृणुतऽउत्तरंयत्संपृंचानःसदनेगोभिरद्भिः । कविर्बुध्नंपरिमर्मृज्यतेधीःसादेवतातासमितिर्बभूव ॥ उरुतेज्रयःपर्येतिबुध्नंविरोचमानंमहिषस्यधाम । विश्वेभिरग्नेस्वयशोभिरिद्धोदब्धेभिःपायुभिःपाह्यस्मान्+ ॥ धन्वन्त्स्रोतःकृणुतेगातुमूर्मिंशुक्रैरूर्मिभिरभिनक्षतिक्षां । विश्वासनानिजठरेषुधत्तेंतर्नवासुचरतिप्रसूषु ॥ एवानोऽअग्नेसमिधावृधानोरेवत्पावकश्रवसेविभाहि । तन्नोमित्रोवरुणोमामहंतामदितिःसिंधुःपृथिवीऽउतद्यौः+ ॥ २ ॥ (१।१५।३) सप्रत्नथासहसाजायमानःसद्यःकाव्यानिबळधत्तविश्वा । आपश्चमित्रंधिषणाचसाधन्देवाऽअग्निंधारयन्द्रविणोदां ॥ सपूर्वयानिविदाकव्यतायोरिमाःप्रजाऽअंजनयन्मनूनां । विवस्वताचक्षसाद्यामपश्चदेवा० ॥ तमीळतप्रथमंयज्ञसाधंविशऽआरीराहुतमृंजसानं । ऊर्जःपुत्रंभरतंसृप्रदानुंदेवा० ॥ समातरिश्वापुरुवारपुष्टिर्विदद्गातुंतनयायस्वर्वित् । विशांगोपाजनितारोदस्योर्देवा० ॥ नक्तोषासावर्णमामेम्यानेधापयेतेशिशुमेकंसमीची । द्यावाक्षामारुक्मोऽअंतर्विभातिदेवा० ॥ ३ ॥ रायोबुध्नःसंगमनोवसूनांयज्ञस्यकेतुर्मन्मसाधनोवेः । अमृतत्वंरक्षमाणासऽएनंदेवा० ॥ नूचपुराचसदनं

(१।१५।३) सप्रत्नथेतिनवर्चस्यसूक्तस्यकुत्सोद्रविणोदाअग्निस्त्रिष्टुप् ।

रयीणांजातस्यंचजायमानस्यचक्षां । सतश्चंगोपांभवंतश्चभूरेर्देवा० ॥ द्रविणोदाद्रविंणसस्तुरस्यंद्रविणोदाःसनंरस्य
प्रयंसत् । द्रविणोदावीरवंतीमिषंनोद्रविणोदारासतेदीर्घमायुः ॥ एवानोंऽअग्नेसमिधावृधानोरेवत्पावकश्रवंसेविभा
हि । तन्नोंमित्रोवरुणोमामहंतामदितिःसिंधुःपृथिवीऽउतद्यौः ॥ ४ ॥ (१।१५।४) अपंनःशोशुंचदघमग्नेंशुशु
ग्ध्यारयिं । अपंनःशोशुंचदघं+ ॥ सुक्षेत्रियासुंगातुयावंसूयाचंयजामहे । अपंनः० ॥ प्रयद्भंदिंष्ठऽएषांप्रास्माकांसश्च
सूरयंः । अपंनः० ॥ प्रयत्तेंऽअग्नेसूरयोजायेमहिप्रतेंवयं । अपंनः० ॥ प्रयदग्नेःसहंस्वतोविश्वतोयंतिभानवंः । अपं
नः० ॥ त्वंहिविंश्वतोमुखविश्वतंःपरिभूरसिं । अपंनः० ॥ द्विषोंनोविश्वतोमुखातिंनावेवंपारय । अपंनः० ॥ सनः
सिंधुंमिवनावयातिंपर्षास्वस्तयें । अपंनः० ॥ ५ ॥ (१।१५।५) वैश्वानरस्यंसुमतौस्यामराजाहिकंभुवंनानामभि
श्रीः । इतोजातोविश्वंमिदंविचंष्टेवैश्वानरोयंततेसूर्येंण ॥ पृष्टोदिविपृष्टोऽअग्निःपृथिव्यांपृष्टोविश्वाऽओषंधीराविंवे
श । वैश्वानरःसहंसापृष्टोऽअग्निःसनोदिवासरिषःपातुनक्तं ॥ वैश्वानरतवतत्सत्यमंस्त्वस्मान्रायोंमघवानःसचंतां ।
तन्नोंमित्रो० ॥ ६ ॥ (१।१५।६) जातवेंदसेसुनवामसोमंमरातीयतोनिदंहातिवेदंः । सनंःपर्षदतिंदुर्गाणिविश्वा

(१।१५।४) अपनइत्यष्टर्चस्यसूक्तस्यकुत्सःशुचिरग्निर्गायत्री । (१।१५।५) वैश्वानरस्येतितृचस्यसूक्तस्यकुत्सोवैश्वानरोग्निस्त्रिष्टुप् ।
(१।१५।६) जातवेदसइत्येकर्चस्यसूक्तस्यमारीचःकश्यपोजातवेदाअग्निस्त्रिष्टुप् ।

CC-0. Ram Acharya Kathmandu Collection

नावेवसिंधुंदुरितात्यग्निः ॥ ७ ॥ (१।१५।७) सयोवृषावृष्ण्येभिःसमोकामहोदिवःपृथिव्याश्चसम्राट् । सतीनस
त्वाहव्योभरेषुमरुत्वान्नोभवत्विंद्रऽऊती+ ॥ यस्यानाप्तःसूर्यस्येवयामोभरेभरेवृत्रहाशुष्मोऽअस्ति । वृषन्तमःसखिभिः
स्वेभिरेवैर्मरु० ॥ दिवोनयस्यरेतसोदुघानाःपंथासोयंतिशवसापरीताः । तरद्वेषाःसासहिःपौंस्येभिर्मरु० ॥ सोऽअंगि
रोभिरंगिरस्तमोभूद्वृषावृषभिःसखिभिःसखासन् । ऋग्मिभिर्ऋग्मीगातुभिर्ज्येष्ठोमरु० ॥ ससूनुभिर्नरुद्रेभिर्ऋभ्वानृ
षाह्येसासह्वाँऽअमित्रान् । सनीळेभिःश्रवस्यानितूर्वन्मरु० ॥ ८ ॥ समन्युमीःसमदनस्यकर्तास्माकेभिर्नृभिःसूर्यसन
त् । अस्मिन्नहन्त्सत्पतिःपुरुहूतोमरु० ॥ तमूतयोरणयन्छूरसातौतंक्षेमस्यक्षितयःकृण्वतत्रां । सविश्वस्यकरुणस्येश
ऽएकोमरु० ॥ तमप्संतशवसऽउत्सवेषुनरोनरमवसेतंधनाय । सोऽअंधेचित्तमसिज्योतिर्विदन्मरु० ॥ ससव्येनयम
तिव्राधतश्चित्सदक्षिणेसंगृभीताकृतानि । सकीरिणाचित्सनिताधनानिमरु० ॥ सग्रामेभिःसनितासरथेभिर्विदेविश्वा
भिःकृष्टिभिर्न्व१द्य । सपौंस्येभिरभिभूरशस्तीर्मरु० ॥ ९ ॥ सजामिभिर्यत्समजातिमीह्ळेजामिभिर्वापुरुहूतऽएवैः ।
अपांतोकस्यतनयस्यजेषेमरु० ॥ सवज्रभृद्दस्युहाभीमऽउग्रःसहस्रचेताःशतनीथऽऋभ्वा । चम्रीषोनशवसापांचज

(१।१५।७) सयोवृषेत्येकोनविंशत्यृचस्यसूक्तस्यवार्षागिराऋज्राश्वांबरीषसहदेवभयमानसुराधसइंद्रस्त्रिष्टुप् । (इतआरभ्यमरुत्वानिंद्र
इतिकश्चित् । तन्न । सर्वानुक्रमादिभिरनादृतत्वात्)।

न्योमरु० ॥ तस्यवज्रःक्रंदतिस्मत्स्वर्षादिवोनत्वेषोरवथःशिमीवान् । तंसचंतेसनयस्तंधनानिमरु० ॥ यस्याजस्रंशवसामानमुक्थंपरिभुजद्रोदसीविश्वतःसीं । सपारिषत्क्रतुभिर्मंदसानोमरु० ॥ नयस्यदेवादेवतानमर्ताऽआपश्चनशवसोऽअंतमापुः । सप्ररिक्वात्वक्षसाक्ष्मोदिवश्चमरु० ॥ १० ॥ रोहिच्छ्यावासुमदंशुर्ललामीर्द्युक्षारायऽऋज्राश्वस्य । वृषण्वंतंबिभ्रतीधूर्षुरथंमंद्राचिकेतनाहुषीषुविक्षु+ ॥ एतत्त्यत्तऽइंद्रवृष्णऽउक्थंवार्षागिराऽअभिगृणंतिराधः । ऋज्राश्वःप्रष्टिभिरंबरीषःसहदेवोभयमानःसुराधाः ॥ दस्यून्छिम्यूँऽश्चपुरुहूतऽएवैर्हत्वापृथिव्यांशर्वानिबर्हीत् । सनत्क्षेत्रंसखिभिःश्वित्न्येभिःसनत्सूर्यंसनदपःसुवज्रः ॥ विश्वाहेंद्रोअधिवक्तानोऽअस्त्वपरिह्वृताःसनुयामवाजं । तन्नोमित्रो० ॥ ११ ॥ (१।१५।८) प्रमंदिनेपितुमदर्चतावचोयःकृष्णगर्भानिरहन्नृजिश्वना । अवस्यवोवृषणंवज्रदक्षिणंमरुत्वंतंसख्यायहवामहे ॥ योव्यंसंजाहृषाणेनमन्युनायःशंबरंयोऽअहन्पिप्रुमव्रतं । इंद्रोयःशुष्णमशुषंन्यावृणङ्मरु० ॥ यस्यद्यावापृथिवीपौंस्यंमहद्यस्यव्रतेवरुणोयस्यसूर्यः । यस्येंद्रस्यसिंधवःसश्चतिव्रतंमरु० ॥ योऽअश्वानांयोगवांगोपतिर्वशीयऽआरितःकर्मणिकर्मणिस्थिरः । वीळोश्चिदिंद्रोयोऽअसुन्वतोवधोमरु० ॥ योविश्वस्यजगतःप्राणतस्पतिर्योब्रह्मणेप्रथमोगाऽअविंदत् । इंद्रोयोदस्यूँरधराँऽअवातिरन्मरु० ॥ यःशूरेभिर्हव्योयश्चभीरुभिर्योधावद्भिर्हूयतेयश्चजिग्यु

(१।१५।८) प्रमंदिनइत्येकादशर्चस्यसूक्तस्यांगिरसःकुत्सइंद्रोजगतीअंत्याश्चतस्रस्त्रिष्टुभः । (आद्यागर्भस्राविणीतिगुणः) ।

भिः । इंद्रंयंविश्वाभुवनाभिसंदधुर्मरु० ॥ १२ ॥ रुद्राणामेतिप्रदिशाविचक्षणोरुद्रेभिर्योषातनुतेपृथुज्रयः । इंद्रंम
नीषाऽअभ्यर्चतिश्रुतंमरु० ॥ यद्वामरुत्वःपरमेसधस्थेयद्वावमेवृजनेमादयासे । अतऽआयाह्यध्वरंनोऽअच्छात्वाया
हविश्चकृमासत्यराधः ॥ त्वायेंद्रसोमंसुषुमासुदक्षत्वायाहविश्चकृमाब्रह्मवाहः । अधानियुत्वःसगणोमरुद्भिरस्मिन्य
ज्ञेबर्हिषिमादयस्व ॥ मादयस्वहरिभिर्येतऽइंद्रविष्यस्वशिप्रेविसृजस्वधेने । आत्वासुशिप्रहरयोवहंतूशन्हव्यानिप्रति
नोजुषस्व ॥ मरुत्स्तोत्रस्यवृजनस्यगोपावयमिंद्रेणसनुयामवाजं । तन्नोमित्रो० ॥ १३ ॥ (१।१५।९) इमांतेधियंप्र
भरेमहोमहीमस्यस्तोत्रेधिषणायत्तऽआनजे । तमुत्सवेचप्रसवेचसासहिमिंद्रंदेवासःशवसामदन्ननु ॥ अस्यश्रवोनद्यः
सप्तबिभ्रतिद्यावाक्षामापृथिवीदर्शतंवपुः । अस्मेसूर्याचंद्रमसाभिचक्षेश्रद्धेकमिंद्रचरतोवितर्तुरं+ ॥ तंस्मारथंमघव
न्प्रावसातयेजैत्रंयंतेऽअनुमदामसंगमे । आजानइंद्रमनसापुरुष्टुतत्वायद्भ्योमघवञ्छर्मयच्छनः ॥ वयंजयेमत्वयायु
जावृतमस्माकमंशमुदवाभरेभरे । अस्मभ्यमिंद्रवरिवःसुगंकृधिप्रशत्रूणांमघवन्वृष्ण्यारुज ॥ नानाहित्वाहवमानाज
नाऽइमेधनानांधर्तरवसाविपन्यवः । अस्माकंस्मारथमातिष्ठसातयेजैत्रंहींद्रनिभृतंमनस्तव ॥ १४ ॥ गोजिताबाहूऽ
अमितक्रतुःसिमःकर्मन्कर्मञ्छतमूतिःखजंकरः । अकल्पऽइंद्रःप्रतिमानमोजसाथाजनाविह्वयंतेसिषासवः ॥ उत्तेश ॥४५॥

(१।१५।९) इमांतइत्येकादशर्चस्यसूक्तस्यकुत्सइंद्रोजगतीअंत्यात्रिष्टुप् ।

तान्मघवन्नुच्चभूयसऽउत्सहस्राद्रिरिचेकृष्टिषुश्रवः । अमात्रंत्वाधिषणातित्विषेमह्यधावृत्राणिजिघ्नसेपुरंदर ॥ त्रिवि
ष्टिधातुप्रतिमानमोजसस्तिस्रोभूमीर्नृपतेत्रीणिरोचना । अतीदंविश्वंभुवनंववक्षिथाशत्रुरिंद्रजनुषासनादसि ॥ त्वां
देवेषुप्रथमंहवामहेत्वंबभूथपृतनासुसासहिः । सेमंनःकारुमुपमन्युमुद्भिदमिंद्रःकृणोतुप्रसवेरथंपुरः+ ॥ त्वंजिगेथन
धनारुरोधिथार्भेष्वाजामघवन्महत्सुच । त्वामुग्रमवसेसंशिशीमस्यथानऽइंद्रहवनेषुचोदय ॥ विश्वाहेंद्रोऽअधिवक्ता
नोऽअस्त्वपरिह्वृताःसनुयामवाजं । तन्नोमित्रो० ॥१५॥ (१।१५।१०) तत्तऽइंद्रियंपरमंपराचैरधारयंतकवयःपुरे
दं । क्षमेदमन्यद्दिव्यं१न्यदस्यसमीपृच्यतेसमनेवकेतुः+ ॥ सधारयत्पृथिवींपप्रथच्चवज्रेणहत्वानिरपःसंसर्ज । अह
न्नहिमभिनद्रौहिणंव्यहन्व्यंसंमघवाशचीभिः ॥ सजातूभर्माश्रद्दधानऽओजःपुरोविभिंदन्नचरद्विदासीः । विद्वान्व
ज्रिन्दस्यवेहेतिमस्यार्यंसहोवर्धयाद्युम्नमिंद्र ॥ तदूचुषेमानुषेमायुगानिकीर्तेन्यंमघवानामबिभ्रत् । उपप्रयन्दस्युहत्या
यवज्रीयद्धसूनुःश्रवसेनामदधे+॥ तदस्येदंपश्यताभूरिपुष्टंश्रदिंद्रस्यधत्तनवीर्याय । सगाऽअविंदत्सोऽअविंददश्वान्त्स
ऽओषधीःसोऽअपःसवनानि ॥ १६ ॥ भूरिकर्मणेवृषभायवृष्णेसत्यशुष्मायसुनवामसोमं । यऽआदृत्यापरिपंथीवशू
रोयज्वनोविभजन्नेतिवेदः ॥ तदिंद्रप्रेववीर्यंचकर्थयत्ससंतंवज्रेणाबोधयोहिं । अनुत्वापत्नीर्हृषितंवयश्चविश्वेदेवासोऽ

(१।१५।१०) तत्तइत्यष्टर्चस्यसूक्तस्यकुत्सइंद्रस्त्रिष्टुप् ।

अमदन्ननुत्वा ॥ शुष्णंपिप्रुंकुयवंवृत्रमिंद्रयदावधीर्विपुरःशंबरस्य । तन्नोमित्रो० ॥ १७ ॥ (१।१५।११) योनिष्टऽइंद्रनिषदेऽअकारितमानिषीदस्वानोनार्वा । विमुच्यावयोवसायाश्वान्दोषावस्तोर्वहीयसःप्रपित्वे+ ॥ ओत्येनरऽइंद्रमूतयेगुर्नूचित्तान्त्सद्योऽअध्वनोजगम्यात् । देवासोमन्युंदासस्यश्चम्नन्तेनऽआवक्षन्त्सुवितायवर्णं ॥ अवत्मनाभरतेकेतवेदाऽअवत्मनाभरतेफेनमुदन् । क्षीरेणस्नातःकुयवस्ययोषेहतेतेस्यातांप्रवणेशिफायाः ॥ युयोपनाभिरुपरस्यायोःप्रपूर्वाभिस्तिरतेराष्टिशूरः । अंजसीकुलिशीवीरपत्नीपयोहिन्वानाऽउदभिर्भरंते ॥ प्रतियत्स्यानीथादर्शिदस्योरोकोनाच्छासदनंजानतीगात् । अधस्मानोमघवन्चर्कृतादिन्मानोमघेवनिष्षपीपरादाः ॥ १८ ॥ सत्वंनऽइंद्रसूर्येसोऽअप्स्वनागास्त्वऽआभजजीवशंसे । मांतरांभुजमारीरिषोनःश्रद्धितंतेमहतऽइंद्रियाय ॥ अधामन्येश्रत्तेऽअस्माऽअधायिवृषाचोदस्वमहतेधनाय । मानोऽअकृतेपुरुहूतयोनाविंद्रक्षुध्यद्भ्योवयंऽआसुतिंदाः ॥ मानोवधीरिंद्रमापरादामानःप्रियाभोजनानिप्रमोषीः । आंडामानोमघवन्छक्रनिर्भेन्मानःपात्राभेत्सहजानुषाणि ॥ अर्वाङेहिसोमकामंत्वाहुरयंसुतस्तस्यपिबामदाय । उरुव्यचाजठरऽआवृषस्वपितेवनःशृणुहिहूयमानः ॥ १९ ॥ (१।१५।१२) चंद्रमाऽ

(१।१५।११) योनिष्टइतिनवर्चस्यसूक्तस्यकुत्सइंद्रस्त्रिष्टुप् । (१।१५।१२) चंद्रमाइत्येकोनविंशत्यृचस्यसूक्तस्यआप्त्यस्त्रितोविश्वेदेवाःपंक्तिःअंत्यात्रिष्टुप्अष्टमीमहाबृहतीयवमध्या । (सूक्तभेदप्रयोगपक्षेतुआद्यायाविश्वेदेवाःद्वितीयायारोदसीतृतीयायाविश्वेदेवाःचतुर्थ्या

अ॒प्स्वं१॒तरासु॑प॒र्णोधा॑वतेदि॒वि । नवो॑हिरण्यनेमयःप॒दंवि॑दंतिविद्युतोवि॒त्तंमे॑ऽअ॒स्यरो॑दसी ॥ अर्थ॒मिद्वाऽउ॑ऽअ॒र्थिन॒ऽआजा॒यायु॑वते॒पति॑ं । तुं॒जाते॒वृष्ण्यं॒पय॑ःपरि॒दाय॒रसं॑दुहेवि॒त्तं० ॥ मोषुदे॑वाऽअ॒दःस्व१॒रव॑पादिदि॒वस्परि॑ । मासो॒म्यस्य॑शं॒भुव॒ःशूने॑भूम॒कदा॑च॒नवि॒त्तं० ॥ य॒ज्ञंपृ॑च्छाम्यव॒मंसतद्दू॒तोविवो॑चति । क्व॑ऽऋ॒तंपूर्व्यं॑ग॒तंकस्तद्बि॑भर्ति॒नूत॑नोवि॒त्तं० ॥ अ॒मीयेदे॑वा॒ःस्थन॑त्रि॒ष्वारो॑च॒नेदि॒वः । कद्व॑ऽऋ॒तंकदनृ॑तं॒क्व॑प्र॒त्नाव॒ऽआहु॑तिर्वि॒त्तं० ॥ २० ॥ कद्व॑ऽऋ॒तस्य॑धर्ण॒सिकद्वरु॑णस्य॒चक्ष॑णं । कद॑र्य॒म्णोम॒हस्प॒थाति॑क्रामेमदू॒ढ्यो॑वि॒त्तं० ॥ अ॒हंसोऽअ॑स्मि॒यःपु॒रासु॒तेवदा॑मि॒कानि॑चित् । तंमा॑व्यंत्या॒ध्यो॒३॒॑वृको॒नतृ॒ष्णजं॑मृ॒गंवि॒त्तं० ॥ संमा॑तपंत्य॒भित॑ःस॒पत्नी॑रिव॒पर्श॑वः । मूषो॒नशि॒श्नाव्य॑दंतिमा॒ध्य॑ःस्तो॒तारं॑तेशतक्रतोवि॒त्तं० ॥ अ॒मीयेस॒प्तर॒श्मय॒स्तत्रा॑मे॒नाभि॒रात॑ता । त्रि॒तस्तद्वे॑दा॒प्त्यःस॑जामि॒त्वाय॑रेभतिवि॒त्तं० ॥ अ॒मीयेपंचो॒क्षणो॒मध्ये॑त॒स्थुर्म॒होदि॒वः । दे॒व॒त्रानु॑प्र॒वाच्यं॑सध्रीची॒नानिवा॑वृतुर्वि॒त्तं० ॥ २१ ॥ सु॒प॒र्णाऽए॒तऽआ॑सते॒मध्य॑ऽआ॒रोध॑नेदि॒वः । तेसे॑धंतिप॒थोवृकं॒तरं॑तंय॒ह्वती॑र॒पोवि॒त्तं० ॥ नव्यं॒तदु॒क्थ्यं॑हि॒तंदेवा॑सःसुप्रवाच॒नं । ऋ॒तम॑र्षंति॒सिंध॑वःस॒त्यंता॑तान॒सूर्यो॑वि॒त्तं० ॥ अग्ने॒तव॒त्यदु॒क्थ्यं॑दे॒वेष्व॒स्त्याप्यं॑ । सनः॑स॒त्तोम॑नु॒ष्वदादे॒वान्य॑क्षिवि॒दुष्ट॑रोवि॒त्तं० ॥ स॒त्तोहोता॑मनु॒ष्वदा

अग्निरोदस्यःततस्तिसृणांविश्वेदेवाःअष्टम्याइंद्ररोदस्यःनवम्याःसूर्यरश्मिरोदस्यःदशम्याविश्वेदेवाःएकादश्याःसूर्यरश्मिरोदस्यःद्वादश्याविश्वेदेवाःततोद्वयोरग्निरोदसीततएकस्यावरुणरोदस्यःततोद्वयोर्विश्वेदेवाःततएकस्यारोदसीअंत्यायाविश्वेदेवाः । उत्तरसूक्तद्वयेविश्वेदेवाएव) ।

देवाँऽअच्छांविदुष्टरः । अग्निर्हव्यासुषूदतिदेवोदेवेषुमेधिरोवित्तं० ॥ ब्रह्माकृणोतिवरुणोगातुविदंतमीमहे ॥ व्यूर्णो
तिहृदामतिंनव्योजायतामृतंवित्तं० ॥ २२ ॥ असौयःपंथाऽआदित्योदिविप्रवाच्यंकृतः । नसदेवाऽअतिक्रमेतंम
र्तासोनपश्यथवित्तं० ॥ त्रितःकूपेवहितोदेवान्हवतऽऊतये । तच्छुश्रावबृहस्पतिःकृण्वन्नंहूरणादुरुवित्तं० ॥ अरुणो
मासकृद्वृकःपथायंतंददर्शहि । उज्जिहीतेनिचाय्यातष्टेवपृष्ठ्यामयीवित्तं० ॥ एनांगूषेणवयमिंद्रवंतोभिष्यामवृजनेस
र्ववीराः । तन्नोमित्रो० ॥ २३ ॥ (१।१६।१) इंद्रंमित्रंवरुणमग्निमूतयेमारुतंशर्धोऽअदितिंहवामहे । रथंनदुर्गा
द्वसवःसुदानवोविश्वस्मान्नोऽअंहसोनिष्पिपर्तन ॥ तऽआदित्याऽआगतासर्वतातयेभूतदेवावृत्रतूर्येषुशंभुवः । रथंन० ।
अवंतुनःपितरःसुप्रवाचनाऽउतदेवीदेवपुत्रेऽऋतावृधा । रथंन० ॥ नराशंसंवाजिनंवाजयन्निहक्षयद्वीरंपूषणंसुम्नैरी
महे । रथंन० ॥ बृहस्पतेसदमिन्नःसुगंकृधिशंयोर्यत्तेमनुर्हितंतदीमहे । रथंन० ॥ इंद्रंकुत्सोवृत्रहणंशचीपतिंकाटेनि
बाह्ळऽऋषिरह्वदूतये । रथंन० ॥ देवैर्नोदेव्यदितिर्निपातुदेवस्त्रातात्रायतामप्रयुच्छन् । तन्नोमित्रो० ॥ २४ ॥
(१।१६।२) यज्ञोदेवानांप्रत्येतिसुम्नमादित्यासोभवतामृळयंतः । आवोर्वाचीसुमतिर्ववृत्यादंहोश्चिद्यावरिवोवित्त

(१।१६।१) इंद्रंमित्रमितिसप्तर्चस्यसूक्तस्यकुत्सोविश्वेदेवाजगतीअंत्यात्रिष्टुप् । (१।१६।२) यज्ञोदेवानामितितृचस्यसूक्तस्यकुत्सो विश्वेदेवास्त्रिष्टुप् ।

रासत् ॥ उपनोदेवाऽअवसागमंत्वंगिरसांसामभिःस्तूयमानाः । इंद्रऽइंद्रियैर्मरुतोमरुद्भिरादित्यैर्नोऽअदितिःशर्मयं
सत् ॥ तन्नऽइंद्रस्तद्वरुणस्तदग्निस्तदर्यमातत्सविताचनोधात् । तन्नोमित्रो० ॥ २५ ॥ (१।१६।३) यऽइंद्राग्नी
चित्रतमोरथोवामभिविश्वानिभुवनानिचष्टे । तेनायातंसरथंतस्थिवांसाथासोमस्यपिबतंसुतस्य ॥ यावदिदंभुवनंवि
श्वमस्त्युरुव्यचावरिमतागभीरं । तावाँऽअयंपातवेसोमोऽअस्त्वरमिंद्राग्नीमनसेयुवभ्यां ॥ चक्राथेहिसध्र्य१ङ्नाम
भद्रंसध्रीचीनावृत्रहणाऽउतस्थः । ताविंद्राग्नीसध्र्यंचानिषद्यावृष्णःसोमस्यवृषणावृषेथां ॥ समिद्धेष्वग्निष्वानजाना
यतस्रुचाबर्हिरुतिस्तिराणा । तीव्रैःसोमैःपरिषिक्तेभिरर्वागेंद्राग्नीसौमनसाययातं ॥ यानींद्राग्नीचक्रथुर्वीर्याणियानि
रूपाण्युतवृष्ण्यानि । यावांप्रत्नानिसख्याशिवानितेभिःसोमस्यपिबतंसुतस्य ॥ २६ ॥ यदब्रवंप्रथमंवांवृणानो३यंसो
मोऽअसुरैर्नोविहव्यः । तांसत्यांश्रद्धामभ्याहियातमथासोमस्यपिबतंसुतस्य ॥ यदिंद्राग्नीमदथःस्वेदुरोणेयद्ब्रह्मणिरा
जनिवायजत्रा । अतःपरिवृषणावाहियातमथा० ॥ यदिंद्राग्नीयदुषुतुर्वशेषुयद्द्रुह्युष्वनुषुपूरुषुस्थः । अतःपरिवृषणा
वाहियातमथा० ॥ यदिंद्राग्नीऽअवमस्यांपृथिव्यांमध्यमस्यांपरमस्यामुतस्थः । अतःपरिवृषणावाहियातमथा० ॥
यदिंद्राग्नीपरमस्यांपृथिव्यांमध्यमस्यामवमस्यामुतस्थः । अतःपरिवृषणावाहियातमथा० ॥ यदिंद्राग्नीदिविष्ठोयत्पृथि

(१।१६।३) यइंद्राग्नीइतित्रयोदशर्चस्यसूक्तस्यकुत्सइंद्राग्नीत्रिष्टुप् ।

व्यांयत्पर्वतेष्वोषधीष्वप्सु । अतःपरिवृषणावाहियातमथा० ॥ यदिंद्राग्नीऽउदितासूर्यस्यमध्येदिवःस्वधयामादयेथे । अतःपरिवृषणावाहियातमथा० ॥ एवेंद्राग्नीपपिवांसासुतस्यविश्वास्मभ्यंसंजयतंधनानि । तन्नोमित्रो० ॥ २७ ॥ (१।१६।४) विह्यख्यंमनसावस्यंऽइच्छन्निंद्राग्नीज्ञासऽउतवासजातान् । नान्यायुवत्प्रमतिरस्तिमह्यंसवांधियंवाजयंतीमतक्षं ॥ अश्रवंहिभूरिदावत्तरावांविजामातुरुतवाघास्यालात् । अथासोमस्यप्रयंतीयुवभ्यामिंद्राग्नीस्तोमंजनयामिनव्यं ॥ माच्छेद्मरश्मीँरितिनाधमानाःपितृणांशक्तीरनुयच्छमानाः । इंद्राग्निभ्यांकंवृषणोमदंतिताह्यद्रीधिषणायाऽउपस्थे ॥ युवाभ्यांदेवीधिषणामदायेंद्राग्नीसोममुशतीसुनोति । तावश्विनाभद्रहस्तासुपाणीऽआधावतंमधुनापृङ्क्तमप्सु+ ॥ युवामिंद्राग्नीवसुनोविभागेतवस्तमाशुश्रववृत्रहत्ये । तावासद्यांबर्हिषियज्ञेऽअस्मिन्प्रचर्षणीमादयेथांसुतस्य ॥ २८ ॥ प्रचर्षणिभ्यःपृतनाहवेषुप्रपृथिव्यारिरिचाथेदिवश्च । प्रसिंधुभ्यःप्रगिरिभ्योमहित्वाप्रेंद्राग्नीविश्वाभुवनात्यन्या+ ॥ आभरतंशिक्षतंवज्रबाहूअस्माँऽइंद्राग्नीअवतंशचीभिः । इमेनुतेरश्मयःसूर्यस्ययेभिःसपित्वंपितरोनऽआसन् ॥ पुरंदराशिक्षतंवज्रहस्तास्माँऽइंद्राग्नीऽअवतंभरेषु । तन्नोमित्रो० ॥ २९ ॥ (१।१६।५) ततंमेऽअपस्तदुतायतेपुनःस्वादिष्ठाधीतिरुचथायशस्यते । अयंसमुद्रऽइहविश्वदेव्यःस्वाहाकृतस्यसमुतृप्णुतऽऋभवः ॥ आभोगयं

(१।१६।४)विह्यख्यमित्यष्टर्चस्यसूक्तस्यकुत्सइंद्राग्नीत्रिष्टुप् । (१।१६।५)ततंमइतिनवर्चस्यसूक्तस्यकुत्सऋभवोजगतीपंचम्यंत्येत्रिष्टुभौ ।

प्रयदिच्छंतऽऐतनापाकाःप्रांचोममकेचिदापयः । सौधंन्वनासश्चरितस्यंभूमनागच्छतसवितुर्दाशुषोगृहं+ ॥ तत्संवितावोमृतत्वमासुवदगोह्यंयच्छ्रवयंतऽऐतन । त्यंचिच्चमसमसुरस्यभक्षणमेकंसंतमकृणुताचतुर्वयं ॥ विष्ट्वीशमीतरणित्वेनवाघतोमर्तासःसंतोऽअमृतत्वमानशुः । सौधन्वनाऽऋभवःसूरचक्षसःसंवत्सरेसमपृच्यंतधीतिभिः ॥ क्षेत्रमिवविममुस्तेजनेनँऽएकंपात्रमृभवोजेहमानं । उपस्तुताऽउपमंनाधमानाऽअमर्त्येषुश्रवऽइच्छमानाः ॥ ३० ॥ आमनीषामंतरिक्षस्यनृभ्यःस्रुचेवघृतंजुहवामविद्मना । तरणित्वायेपितुरस्यसश्चिरऽऋभवोवाजमरुहंदिवोरजः ॥ ऋभुर्नऽइंद्रःशवसानवीयानृभुर्वाजेभिर्वसुभिर्वसुर्ददिः । युष्माकंदेवाऽअवसाहनिप्रिये३भितिष्ठेमपृत्सुतीरसुन्वतां ॥ निश्चर्मणऽऋभवोगामपिंशतसंवत्सेनासृजतामातरंपुनः । सौधन्वनासःस्वपस्ययानरोजिव्रीयुवानापितराकृणोतन ॥ वाजेभिर्नोवाजसातावविड्ढ्यृभुमाँऽइंद्रचित्रमादर्षिराधः । तन्नोमित्रो० ॥ ३१ ॥ (१।१६।६) तक्षन्रथंसुवृतंविद्मनापसस्तक्षन्हरीइंद्रवाहावृषण्वसू । तक्षन्पितृभ्यामृभवोयुवद्वयस्तक्षन्वत्सायमातरंसचाभुवं ॥ आनोयज्ञायतक्षतऽऋभुमद्वयः क्रत्वेदक्षायसुप्रजावतीमिषं । यथाक्षयामसर्ववीरयाविशातन्नःशर्धायधासथास्विंद्रियं+ ॥ आतक्षतसातिमस्मभ्यमृभवःसातिरथायसातिमर्वतेनरः । सातिंनोजैत्रींसंमहेतविश्वहाजामिमजामिंपृतनासुसक्षणिं ॥ ऋभुक्षणमिंद्रमाहुवऽ

(१।१६।६) तक्षन्रथमितिपंचर्चस्यसूक्तस्यकुत्सऋभवोजगतीअंत्यात्रिष्टुप् ।

ऊ॒तय॑ऽऋ॒भून्वाजा॑न्म॒रुत॒ःसोम॑पीतये । उ॒भामि॒त्रावरु॑णानू॒नम॒श्विना॒तेनो॑हिन्वंतुसा॒तये॑धि॒येजि॒षे+ ॥ ऋ॒भुर्भरा॑य॒सं शि॑शातुसा॒तिं॑स॑मर्य॒जिद्वाजो॑ऽअ॒स्माँ॑ऽअ॑विष्टु । तन्नो॑मि॒त्रो॰ ॥ ३२ ॥ (१।११६।७) ईळे॒द्यावा॑पृथि॒वीपू॒र्वचि॑त्तये॒ग्निंघ॒र्मं॑सु॒रुचं॑याम॑न्नि॒ष्टये॑ । याभि॒र्भरे॑का॒रमंशा॑य॒जिन्व॑थ॒स्ताभि॑रू॒षुऽऊ॒तिभि॑रश्वि॒नाग॑तं ॥ यु॒वोर्दा॒नाय॑सु॒भरा॑ऽअस॒श्चतो॒ रथ॒मात॑स्थुर्वच॒सं॑नमंत॑वे । याभि॒र्धियो॑व॑थ॒ःकर्म॑न्नि॒ष्टये॒ताभि॑॰ ॥ यु॒वंतासां॑दि॒व्यस्य॑प्र॒शास॑नेवि॒शांक्ष॑यथोऽअ॒मृत॑स्यम॒ज्मना॑ । याभि॑र्धे॒नुम॒स्वं॑१॒पिन्व॑थोनरा॒ताभि॑॰ ॥ याभि॒ःपरि॑ज्मा॒तन॑यस्यम॒ज्मना॑द्विमा॒तातू॒र्षुत॒रणि॑र्वि॒भूष॑ति । याभि॒स्त्रिमं॑तु॒रभ॑वद्विचक्ष॒णस्ताभि॑॰ ॥ याभी॑रे॒भंनिवृ॑तंसि॒तम॒द्भ्यऽउद्वंद॑न॒मैर॑यतं॒स्व॑र्दृ॒शे । याभि॒ःकण्वं॒प्रसिषा॑संत॒माव॑तं॒ताभि॑॰ ॥ ३३ ॥ याभि॒रंत॑कं॒जस॑मान॒मार॑णेभु॒ज्युंयाभि॑रव्य॒थिभि॑र्जिजि॒न्वथु॑ः । याभि॑ःक॒र्कंधुं॑व॒य्यं॑च॒जिन्व॑थ॒स्ताभि॑॰ ॥ याभि॑ःशु॒चंतिं॑धन॒सांसु॑ष॒ंसदं॑त॒प्तंघ॒र्मंमो॒म्याव॑त॒मत्र॑ये । याभि॒ःपृश्नि॑गुंपु॒रुकु॑त्स॒माव॑तं॒ताभि॑॰ ॥ याभि॒ःशची॑भिर्वृषणापरा॒वृजं॒प्रांधं॑श्रो॒णंचक्ष॑स॒ऽएत॑वेकृ॒थः । याभि॒र्वर्ति॑कांग्रसि॒ताम॑मुंचतं॒ताभि॑॰ ॥ याभि॒ःसिंधुं॒मधु॑मंत॒मस॑श्चतं॒वसि॑ष्ठं॒याभि॑रजरा॒वजि॑न्वतं । याभि॒ःकुत्सं॑श्रु॒तर्यं॒नर्य॒माव॑तं॒ताभि॑॰ ॥ याभि॑र्वि॒श्पलां॑धन॒साम॑थ॒र्व्यं॑स॒हस्र॑मीह्ळऽआ॒जावजि॑न्वतं । याभि॒र्वश॑म॒श्व्यंप्रे॒णिमाव॑तं॒ताभि॑॰ ॥ ३४ ॥ याभि॑ःसुदानूऽऔशि॒जाय॑व॒णिजे॑दी॒र्घश्र॑वसे॒मधु॒कोशो॒ऽअक्ष॑रत् । क॒क्षी

(१।११६।७) ईळेद्यावापृथिवीइतिपंचविंशत्यृचस्यसूक्तस्यकुत्सःआद्यायाद्यावापृथिव्यग्न्यश्विनःशिष्टानामश्विनौजगतीअंत्येद्वेत्रिष्टुभौ ।

वं॑तंस्तो॒तारं॒याभि॒रावं॑तं॒ताभि॑० ॥ याभी॑र॒सांक्षोदं॑सो॒द्नःपिं॑पि॒न्वथुं॑रन॒श्वंयाभी॒रथ॒मावं॑तंजि॒षे । याभि॑स्त्रि॒शोकं॑ऽउ॒स्रि
यां॑ऽउ॒दाजं॑तं॒ताभि॑० ॥ याभि॒ःसूर्यं॑परि॒याथः॑परा॒वतिं॑मंधा॒तारं॒क्षैत्रं॑पत्ये॒ष्वावं॑तं । याभि॒र्विप्रं॒प्रभ॒रद्वां॑ज॒मावं॑तं॒ताभि॑० ॥
याभि॑र्म॒हाम॑तिथि॒ग्वंकं॑शो॒जुवं॒दिवो॑दासंशंबर॒हत्य॒ऽआवं॑तं । याभि॑ःपू॒र्भिद्यें॑त्र॒सदं॑स्युमावं॑तं॒ताभि॑० ॥ याभि॑र्व॒म्रंवि॑पि
पा॒नमुं॑पस्तु॒तंक॒लिं॑याभि॑र्वि॒त्तजां॑निंदुव॒स्यथः॑ । याभि॒र्व्यं॑श्वमु॒तपृथि॒मावं॑तं॒ताभि॑० ॥ ३५ ॥ याभि॑र्नराश॒यवे॒याभि॒रत्रं॑
ये॒याभि॑ःपु॒रामनं॑वेगा॒तुमी॒षथुः॑ । याभि॒ःशारी॒राजं॑तं॒स्यूमं॑रश्मये॒ताभि॑० ॥ याभि॒ःपठं॑र्वा॒जठं॑रस्यम॒ज्मना॒ग्निर्नादी॑देच्चि॒
तऽइ॒द्धोऽअज्म॒न्ना । याभि॒ःशर्यां॑त॒मवं॑थोमहाध॒नेताभि॑० ॥ याभि॑रंगि॑र॒ोमनं॑सानिर॒ण्यथोग्रं॒गच्छं॑थोविव॒रेगोऽअ॑र्ण
सः । याभि॒र्मनुं॒शूरं॑मि॒षास॒मावं॑तं॒ताभि॑० ॥ याभि॒ःपत्नी॑र्विम॒दायं॑न्यूहथु॒राघं॑वा॒याभि॑ररु॒णीरशिं॑क्षतं । याभि॑ःसु॒दासं॑ऽ
ऊ॒हथुः॑सुदे॒व्यं॑१॒ताभि॑० ॥ याभि॒ःशंतां॑ती॒भवं॑थोद॒दाशुषें॑भु॒ज्युंयाभि॒रवं॑थो॒याभि॒रध्रिं॑गुं । ओ॒म्यावं॑तींसु॒भरां॑मृत॒स्तुभं॒
ताभि॑० ॥ ३६ ॥ याभि॑ःकृ॒शानु॒मसं॑नेदुव॒स्यथौं॑ज॒वेयाभि॒र्यूनो॒ऽअर्वं॑त॒मावं॑तं । मधुं॑प्रि॒यंभं॑रथो॒यत्स॒रड्भ्य॒स्ताभि॑० ॥
याभि॒र्नरं॑गोषु॒युधं॑नृ॒षाह्ये॒क्षेत्रं॑स्यसा॒तातनं॑यस्य॒जिन्वं॑थः । याभी॒रथाँ॒ऽअवं॑थो॒याभि॒रर्वं॑त॒स्ताभि॑० ॥ याभि॒ःकुत्सं॑मार्जुने॒यं
शं॑तक्रतू॒प्रतु॒र्वीतिं॒प्रचं॑द॒भीति॒मावं॑तं । याभि॑र्व॒र्तिकां॑ग्रसि॒ताममुं॑च॒तं॒ताभि॑० ॥ अप्नं॑स्वतीमश्विना॒वाचं॑म॒स्मेकृ॒तंनो॑दस्रावृ

CC-0. Ratri Acharya Kathmandu Collection

षणाम॒नीषां । अ॒द्यू॒त्येव॒से॒निह्व॑येवांवृ॒धेचनोभवत॒वाजसातौ ॥ द्युभिर॒क्तुभि॒ःपरिंपातम॒स्मानरिंष्टेभिरश्विना॒सौभंगेभिः । तन्नोंमि॒त्रो० ॥ ३७ ॥ ॥ इतिप्रथमाष्टकेसप्तमोऽध्यायः ॥ ७ ॥ ॥ ॥ ॥

सप्तमाध्यायेवर्गाः २७ सूक्तानि १८ ऋचः १७९ ॥ त्यागः ॥ उषसेग्नयइदं. ११ द्रविणोदसेग्नयइदं. ९ अग्नयेशुचयइदं. ८ अग्नयेवैश्वानरायेदं. ३ जातवेदसेग्नयइदं. इंद्रायेदं. ५८ विश्वेभ्योदेवेभ्यइदं. रोदसीभ्यामिदं. विश्वेभ्योदेवेभ्यइदं. अग्निरोदसीभ्यइदं. विश्वेभ्योदेवेभ्यइदं. ३ इंद्ररोदसीभ्यइदं. सूर्यरश्मिरोदसीभ्यइदं. विश्वेभ्योदेवेभ्यइदं. सूर्यरश्मिरोदसीभ्यइदं. विश्वोभ्योदेवेभ्यइदं. अग्निरोदसीभ्यइदं. २ वरुणरोदसीभ्यइदं. विश्वेभ्योदेवेभ्यइदं. २ रोदसीभ्यामिदं. विश्वेभ्योदेवेभ्यइदं. ११ इंद्राग्निभ्यामिदं. २१ ऋभुभ्यइदं. १४ द्यावापृथिव्यग्न्यश्विभ्यइदं. अश्विभ्यामिदं. २४ ॥ इतिप्रथमेसप्तमोऽध्यायः ॥

इदंविंशतिरुषस्यैंद्वितीयोर्धर्चोरात्रेश्चैमाएकादशरौद्रंद्वित्रिष्टुबंतंचित्रंषट्सौर्यंनासत्याभ्यांपंचाधिकांकक्षीवान्दैर्घतमसंउशिक्प्रसूतआश्विनंवैमध्वआवामेकादशांवांरथंदशजागतंकाराधद्वादशांत्यादुःस्वप्ननाशिन्याद्यागायत्रींद्वितीयाककुप्तृंतीयाचतुर्थ्यौंकाविराणष्टरूप्यौंपंचमीतनुशिरांषष्ठ्यक्षरैरुष्णिग्विष्टारबृहतींकृतिर्विराट्तिस्रोगायत्र्यःकंदित्थापंचोनावैश्वदेवंवा ॥ ८ ॥ ॥ ॥ ॥ ॥

हरिःओम् (१।१६।८) इ॒दंश्रेष्ठं॒ज्योतिं॒षांज्योति॒रागा॑च्चि॒त्रःप्रके॒तोऽअंजनिष्ट॒विभ्वां । यथा॒प्रसूं॒तासवि॒तुःस॒वायँ

(१।१६।८) इदंश्रेष्ठमितिविंशत्यृचस्यसूक्तस्यकुत्सउषाद्वितीयायाअर्धर्चोरात्रिस्त्रिष्टुप् ।

ऽए॒वारा॒त्र्यु॒षसे॒योनि॑मारैक् ॥ रुश॑द्वत्सा॒रुश॑तीश्वे॒त्यागा॒दारै॑गुकृ॒ष्णासद॑नान्यस्याः । स॒मा॒नबं॑धूऽअ॒मृते॑ऽअनू॒चीद्या
वा॒वर्णं॑चरतऽआमिना॒ने+ ॥ स॒मा॒नोऽअध्वा॒स्वस्रो॑रनं॒तस्तम॒न्यान्या॑चरतोदे॒वशि॑ष्टे । नमे॑थेते॒नतं॑स्थतुःसु॒मेके॒नक्तो॒षा
सा॒सम॑नसा॒विरू॑पे ॥ भास्व॑तीने॒त्रीसू॒नृता॑ना॒मचै॑तिचि॒त्राविदुरो॑नऽआवः । प्रार्प्या॒जग॒द्व्यु॑नोरा॒योऽअ॑ख्यदु॒षाऽअ॑जी
ग॒र्भुव॑नानि॒विश्वा॑ ॥ जि॒ह्म॒श्ये॒३॒चरि॑तवेम॒घोन्या॑भो॒गय॑ऽइ॒ष्टये॑रा॒यऽउ॑त्वं । द॒भ्रंपश्य॑द्भ्यऽउर्वि॒यावि॒चक्ष॑ऽउ॒षा० ॥
॥ १ ॥ क्ष॒त्राय॑त्व॒ंश्रव॑सेत्वंमही॒याऽइ॒ष्टये॑त्व॒मर्थ॑मिवत्वमि॒त्यै । विस॑दृशाजीवि॒ताभि॑प्र॒चक्ष॑ऽउ॒षा० ॥ ए॒षादि॒वोदु॑हि॒
ताप्रत्य॑दर्शि॒व्यु॒च्छंती॑युव॒तिःशु॒क्रवा॑साः । विश्व॒स्येशा॑ना॒पार्थि॑वस्य॒वस्व॒ऽउषो॑ऽअ॒द्येहसु॑भगे॒व्यु॑च्छ ॥ प॒रा॒य॒ती॒नाम॒न्वे॑
ति॒पाथ॑ऽआय॒ती॒नांप्र॑थ॒माशश्व॑तीनां । व्यु॒च्छंती॑जी॒वमु॑दी॒रयं॑त्यु॒षामृ॒तंकंच॒नबो॒धयं॑ती ॥ उ॒षो॒यद॒ग्निंस॒मिधे॑च॒कर्थ॒वि
यदाव॒श्चक्ष॑सा॒सूर्य॑स्य । यन्मानु॑षान्य॒क्ष्यमा॑णाँ॒ऽअजी॑ग॒स्तद्दे॒वेषु॑चकृषेभ॒द्रमप्नः॑ ॥ कि॒यात्यायत्स॒मया॒भवा॑ति॒यान्यू॒षुर्या
श्चनू॒नंव्यु॒च्छान् । अनु॒पूर्वाः॑कृपतेवावशा॒नाप्र॒दीध्या॑ना॒जोष॑म॒न्याभि॑रेति ॥ २ ॥ ई॒युष्टे॑येपूर्व॑तरा॒मप॑श्यन्व्यु॒च्छंती॑मु॒
षसं॒मर्त्या॑सः । अ॒स्माभि॑रू॒नुप्र॑ति॒चक्ष्या॑भू॒दोतेयं॑ति॒येऽअ॑प॒रीषु॒पश्या॑न् ॥ या॒व॒यद्द्वे॑षाऽऋत॒पाऽऋ॑ते॒जाःसु॑म्ना॒वरी॑सू॒नृता॑
ई॒रयं॑ती । सु॒मं॒ग॒लीर्बिभ्र॑तीदे॒ववी॑तिमि॒हाद्योष॒ःश्रेष्ठ॑तमा॒व्यु॑च्छ ॥ शश्व॑त्पु॒रोषाव्यु॑वासदे॒व्यथो॑ऽअ॒द्येदंव्या॑वोम॒घोनी॑ ।
अथो॒व्यु॑च्छा॒दुत्त॑रा॒ँऽअनु॒द्यून॒जरा॒मृता॑चरतिस्व॒धाभिः॑ ॥ व्यं॒जिभि॑र्दि॒वऽआता॑स्वद्यौ॒दप॑कृ॒ष्णांनि॒र्णिजं॑दे॒व्या॑वः ।

प्र॒बो॒धयं॑त्य॒रु॒णेभि॒रश्वै॒रोषा॒यां॑तिसु॒युजा॒रथे॑न ॥ आ॒वहं॑ती॒पो॑ष्या॒वार्या॑णि चि॒त्रंके॒तुंकृ॑णुते॒चेकि॑ताना । ई॒युषी॑णामुप॒मा
शश्वं॑तीनांविभा॒तीनां॑प्रथ॒मोषा॒व्यं॑श्वैत् ॥ ३ ॥ उदीं॑र्ध्वंजी॒वोऽअसुं॑र्न॒ऽआगा॒दप॒प्रागा॒त्तम॒ऽआज्योतिं॑रेति । अरै॒क्पं
थां॒यातं॑वे॒सूर्या॒यागं॑न्म॒यत्रं॑प्रति॒रंत॒ऽआयुः॑ ॥ स्यूमं॑नावा॒चऽउदिं॑यर्ति॒वह्नि॒ःस्तवा॑नोरे॒भऽउ॒षसो॑विभा॒तीः । अ॒द्यातदुं॑च्छ
गृण॒तेमं॑घो॒न्य॒स्मेऽआयु॒र्निदिं॑दीहि॒प्रजा॑वत् ॥ यागोमं॑तीरु॒षस॒ःसर्वं॑वीरा॒व्युच्छं॑तिदा॒शुषे॒मर्त्या॑य । वा॒योरिं॑वसू॒नृतां॑नामु
द॒र्कंताऽअंश्व॒दाऽअंश्ववत्सोम॒सुत्वा॑ ॥ माता॒दे॒वाना॒मदिं॑ते॒रनीं॑कंय॒ज्ञस्यं॑के॒तुर्बृं॑ह॒तीविभां॑हि । प्र॒श॒स्ति॒कृद्ब्रह्मं॑णेनो॒व्यु॒१
च्छा॒नो॒जनें॑जनयविश्ववारे ॥ यच्चि॒त्रमप्नं॑ऽउ॒षसो॒वहं॑तीजा॒नायं॑शशमा॒नायं॑भ॒द्रं । तन्नो॑मि॒त्रो० ॥ ४ ॥ (१।१६।९)
इ॒मारु॒द्रायं॑त॒वसें॑कप॒र्दिनें॑क्ष॒यद्वीं॑राय॒प्रभं॑रामहेम॒तीः । यथा॒शमसं॑द्द्वि॒पदे॒चतुं॑ष्पदे॒विश्वं॑पु॒ष्टंग्रामें॑ऽअ॒स्मिन्नं॑नातु॒रं+ ॥ मृ॒
ळानों॑रुद्रो॒तनो॒मयं॑स्कृधिक्ष॒यद्वीं॑राय॒नमं॑साविधेमते । यच्छं॑च॒योश्च॒मनुं॑राये॒जेपि॒तातदं॑श्याम॒तवं॑रुद्र॒प्रणीं॑तिषु ॥ अ॒श्या
मं॑तेसुम॒तिंदें॑वय॒ज्ययां॑क्ष॒यद्वीं॑रस्य॒तवं॑रुद्रमीढ्वः । सु॒म्ना॒यन्निद्विशों॑ऽअ॒स्माक॒माच॒रारिं॑ष्टवीराजुहवामतेह॒विः+ ॥ त्वे॒षं
व॒यंरु॒द्रंयं॑ज्ञ॒साधं॑व॒ंकुं॑क॒विमवं॑से॒निह्वं॑यामहे । आ॒रेऽअ॒स्मद्दैव्यं॒हेळों॑ऽअस्यतुसुम॒तिमिद्व॒यम॒स्यावृं॑णीमहे ॥ दि॒वोवं॑रा॒हमं॑
रु॒षंकं॑प॒र्दिनं॑त्वे॒षंरू॒पंनमं॑सा॒निह्वं॑यामहे । हस्ते॒बिभ्रं॑द्भेष॒जावार्यां॑णि॒शर्म॒वर्मं॑च्छ॒र्दिर॒स्मभ्यं॑यंसत् ॥५॥ इ॒दंपि॒त्रेम॒रुतां॑मुच्यते॒

(१।१६।९) इमारुद्रायेत्येकादशर्चस्यसूक्तस्यकुत्सोरुद्रोजगतीअंत्येद्वेत्रिष्टुभौ ।

वचःस्वादोःस्वादीयोरुद्रायवर्धनं। रास्वाचनोऽअमृतमर्तभोजनंत्मनेतोकायतनयायमृळ॥ मानोमहांतमुतमानोऽअर्भकंमानऽउक्षंतमुतमानऽउक्षितं। मानोवधीःपितरंमोतमातरंमानःप्रियास्तन्वोरुद्ररीरिषः॥ मानस्तोकेतनयेमानऽआयौमानोगोषुमानोऽअश्वेषुरीरिषः। वीरान्मानोरुद्रभामितोवधीर्हविष्मंतःसदमित्त्वाहवामहे ॥ उपतेस्तोमान्पशुपाऽइवाकरंरास्वापितर्मरुतांसुम्नमस्मे। भद्राहितेसुमतिर्मृळयत्तमाथावयमवऽइत्तेवृणीमहे ॥ आरेतेगोघ्नमुतपूरुषघ्नंक्षयद्वीरसुम्नमस्मेतेऽअस्तु। मृळाचनोअधिचब्रूहिदेवाधाचनःशर्मयच्छद्विबर्हाः॥ अवोचामनमोऽअस्माऽअवस्यवःशृणोतुनोहवंरुद्रोमरुत्वान्। तन्नोमित्रो० ॥ ६ ॥ (१।१६।१०) चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः। आप्राद्यावापृथिवीऽअंतरिक्षंसूर्यऽआत्माजगतस्तस्थुषश्च ॥ सूर्योदेवीमुषसंरोचमानांमर्योनयोषामभ्येतिपश्चात्। यत्रानरोदेवयंतोयुगानिवितन्वतेप्रतिभद्रायभद्रं+ ॥ भद्राऽअश्वाहरितःसूर्यस्यचित्राऽएतग्वाऽअनुमाद्यासः। नमस्यंतोदिवऽआपृष्ठमस्थुःपरिद्यावापृथिवीयंतिसद्यः+ ॥ तत्सूर्यस्यदेवत्वंतन्महित्वंमध्याकर्तोर्विततंसंजभार। यदेदयुक्तहरितःसधस्थादाद्रात्रीवासस्तनुतेसिमस्मै ॥ तन्मित्रस्यवरुणस्याभिचक्षेसूर्योरूपंकृणुतेद्योरुपस्थे। अनंतमन्यद्रुशदस्यपाजःकृष्णमन्यद्धरितःसंभरंति ॥ अद्यादेवाऽउदितासूर्यस्यनिरंहसःपिपृतानिरवद्यात्। तन्नोमित्रो० ॥ ७ ॥

(१।१६।१०) चित्रंदेवानामितिषळर्चस्यसूक्तस्यकुत्सःसूर्यस्त्रिष्टुप्।

(१।१७।१) नासत्याभ्यांबर्हिरिवप्रवृंजेस्तोमाऽइयर्म्यभ्रियेववातः । यावर्भगायविमदायजायांसेनाजुवान्यूहतूरथेन ॥ वीळुपत्मभिराशुहेमभिर्वादेवानांवाजूतिभिःशाशदाना । तद्रासभोनासत्यासहस्रमाजायमस्यप्रधनेजिगाय ॥ तुग्रोहभुज्युमश्विनोदमेघेरयिंनकश्चिन्ममृवाँऽअवाहाः । तमूहथुर्नौभिरात्मन्वतीभिरंतरिक्षप्रुद्भिरपोदकाभिः ॥ तिस्रःक्षपस्त्रिरहातिव्रजद्भिर्नासत्याभुज्युमूहथुःपतंगैः । समुद्रस्यधन्वन्नार्द्रस्यपारेत्रिभीरथैःशतपद्भिःषळश्वैः ॥ अनारंभणेतदवीरयेथामनास्थानेअग्रभणेसमुद्रे । यदश्विनाऊहथुर्भुज्युमस्तंशतारित्रांनावमातस्थिवांसं ॥ ८ ॥ यमश्विनाददथुःश्वेतमश्वमघाश्वायशश्वदित्स्वस्ति । तद्वांदात्रंमहिकीर्तेन्यंभूत्पैद्वोवाजीसदमिद्धव्योऽअर्यः+ ॥ युवंनरास्तुवतेपज्रियायकक्षीवतेऽअरदतंपुरंधिं । कारोतराच्छफादश्वस्यवृष्णःशतंकुंभाँऽअसिंचतंसुरायाः ॥ हिमेनाग्निंघ्रंसमवारयेथांपितुमतीमूर्जमस्माऽअधत्तं । ऋबीसेअत्रिमश्विनावनीतमुन्निन्यथुःसर्वगणंस्वस्ति+ ॥ परावतंनासत्यानुदेथामुच्चाबुध्नंचक्रथुर्जिह्मबारं । क्षरन्नापोनपायनायरायेसहस्रायतृष्यतेगोतमस्य ॥ जुजुरुषोनासत्योतवव्रिंप्रामुंचतंद्रापिमिवच्यवानात् । प्रातिरतंजहितस्यायुर्दस्रादित्पतिमकृणुतंकनीनां ॥ ९ ॥ तद्वांनराशंस्यंराध्यंचाभिष्टिमन्नासत्यावरूथं । यद्विद्वांसानिधिमिवापगूळ्हमुद्दर्शतादूपथुर्वंदनाय ॥ तद्वांनरासनयेदंसऽउग्रमाविष्कृणोमितन्यतुर्नवृष्टिं ।

(१।१७।१) नासत्याभ्यामितिपंचविंशत्यृचस्यसूक्तस्यदैर्घतमसःकक्षीवानश्विनौत्रिष्टुप् ।

द॒ध्यङ्ह॒यन्मध्वा॑थर्व॒णोवा॒मश्व॑स्यशी॒र्ष्णाप्रयदी॑मु॒वाच॑ ॥ अजो॑हवीन्नासत्याक॒रावां॑म॒हेयाम॑न्पुरुभुजा॒पुरं॑धिः । श्रु॒तंत
च्छासु॑रिववध्रिम॒त्याहिर॑ण्यहस्तमश्विनावदत्तं ॥ आ॒स्नोवृक॑स्य॒वर्ति॑काम॒भीके॑यु॒वंन॑रानासत्यामुमुक्तं । उ॒तोक॒विंपु॑रुभु
जायु॒वंह॒कृप॑माणमकृणुतंवि॒चक्षे॑ ॥ च॒रित्रं॒हिवेरि॒वाच्छे॑दिप॒र्णमा॒जाखे॒लस्य॒परि॑तक्म्यायां । स॒द्योजंघा॒माय॑सींवि॒श्पला॑
यै॒धने॑हि॒तेसर्त॑वे॒प्रत्य॑धत्तं ॥ १० ॥ श॒तंमे॒षान्वृ॒क्ये॑चक्षदा॒नमृ॒ज्राश्वं॒तंपि॒तांधंच॑कार । तस्मा॑ऽअ॒क्षीना॑सत्यावि॒चक्ष॒ऽ
आध॑त्तंदस्राभिषजावन॒र्वन्+ ॥ आवा॒ंरथं॑दुहि॒तासूर्य॑स्य॒कार्ष्मे॑वातिष्ठ॒दर्व॑ता॒जयं॑ती । विश्वे॑दे॒वाऽअन्व॑मन्यंतहृ॒द्भिःस
मु॑श्रि॒याना॑सत्यासचेथे ॥ यदया॑तं॒दिवो॑दासायव॒र्तिर्भ॒रद्वा॑जायाश्विना॒हयं॑ता । रे॒वदु॑वाहसच॒नोरथो॑वांवृष॒भश्च॑शिंशु॒
मार॑श्चयु॒क्ता+ ॥ र॒यिंसु॑क्ष॒त्रंस्व॑प॒त्यमायुः॑सु॒वीर्यं॑नासत्या॒वहं॑ता । आज॒ह्नावीं॒सम॑न॒सोप॒वाजै॒स्त्रिरह्नो॑भा॒गंदध॑तीमयातं ॥
परि॑विष्टंजाहु॒षंवि॒श्वतः॑सीं॑सु॒गेभि॒र्नक्त॑मूहथू॒रजो॑भिः । वि॒भि॒ंदुना॑नासत्या॒रथे॑न॒विपर्व॑ताँऽअजर॒यूऽअ॑यातं ॥ ११ ॥
एक॑स्या॒वस्तो॑रावतं॒रणा॑य॒वश॑मश्विनास॒नये॑स॒हस्रा॑ । निर॑हतंदु॒च्छुना॒ऽइंद्र॑वंतापृथु॒श्रव॑सोवृषणा॒वरा॑तीः ॥ श॒रस्य॑चि
दार्च॒त्कस्या॑व॒तादानी॒चादु॒च्चाच॑क्रथुः॒पात॑वे॒वाः । श॒यवे॑चिन्नासत्या॒शची॑भि॒र्जसु॑रयेस्त॒र्यं॑पिप्यथु॒र्गां+ ॥ अ॒व॒स्य॒तेस्तु॑व॒ते
कृ॑ष्णि॒याय॑ऽऋजूय॒तेना॑सत्या॒शची॑भिः । प॒शुंनन॒ष्टमि॑व॒दर्श॑नायविष्णा॒प्वं॑ददथु॒र्विश्व॑काय ॥ दश॒रात्री॒रशि॑वेना॒नव॒द्यून
व॑नद्धंश्नथि॒तम॒प्स्वं॑१॒तः । विप्रु॑तंरे॒भमु॒दनि॒प्रवृ॑क्त॒मुन्नि॑न्यथुः॒सोम॑मिवस्रु॒वेण ॥ प्रवां॒दंसां॑स्यश्विनाववोचम॒स्यपतिः॑स्यां

सुगवःसुवीरः । उतपश्यन्नश्नुवन्दीर्घमायुरस्तमिवेज्जरिमाणंजगम्याः ॥ १२ ॥ (११७।२) मध्वःसोमस्याश्विना
मदायप्रत्नोहोताविवासतेवां । बर्हिष्मतीरातिर्विश्रितागीरिषायातंनासत्योपवाजैः ॥ योवामश्विनामनसोजवीयान्र
थःस्वश्वोविशऽआजिगाति । येनगच्छथःसुकृतोदुरोणंतेननरावर्तिरस्मभ्यंयातं ॥ ऋषिंनरावंहसःपांचजन्यमृबीसा
दत्रिंमुंचथोगणेन । मिनंतादस्योरशिवस्यमायाऽअनुपूर्वंवृषणाचोदयंता ॥ अश्वंनगूळ्हमश्विनादुरेवैर्ऋषिंनरावृषणारे
भमप्सु । संतंरिणीथोविप्रुतंदंसोभिर्नवांजूर्यंतिपूर्व्याकृतानि ॥ सुषुप्वांसंननिर्ऋतेरुपस्थेसूर्यंनदस्रातमसिक्षियंतं ।
शुभेरुक्मंनदर्शतंनिखातमुदूपथुरश्विनावंदनाय ॥ १३ ॥ तद्वांनराशंस्यंपज्रियेणकक्षीवतानासत्यापरिज्मन् । श
फादश्वस्यवाजिनोजनायशतंकुंभाँऽअसिंचतंमधूनां ॥ युवंनरास्तुवतेकृष्णियायविष्णाप्वंददथुर्विश्वकाय । घोषायै
चित्पितृषदेदुरोणेपतिंजूर्यंत्याऽअश्विनावदत्तं ॥ युवंश्यावायरुशतीमदत्तंमहःक्षोणस्याश्विनाकण्वाय । प्रवाच्यंतद्वृष
णाकृतंवांयन्नार्षदायश्रवोऽअध्यधत्तं ॥ पुरूवर्पांस्यश्विनादधानानिपेदवऽऊहथुराशुमश्वं । सहस्रसांवाजिनमप्रतीत
महिहनंश्रवस्यं१तरुत्रं ॥ एतानिवांश्रवस्यासुदानूब्रह्मांगूषंसदनंरोदस्योः । यद्वांपज्रासोऽअश्विनाहवंतेयातमिषाच
विदुषेचवाजं ॥ १४ ॥ सूनोर्मानेनाश्विनागृणानावाजंविप्रायभुरणारदंता । अगस्त्येब्रह्मणावावृधानासंविश्पलांना

(११७।२) मध्वःसोमस्येतिपंचविंशत्यृचस्यसूक्तस्यकक्षीवानश्विनौत्रिष्टुप् ।

सत्यारिणीतं ॥ कुहयांतासुष्टुतिंकाव्यस्यदिवोनपातावृषणाशयुत्रा । हिरण्यस्येवकलशंनिखातमुदूपथुर्दशमेऽअश्वि
नाहन् ॥ युवंच्यवानमश्विनाजरंतंपुनर्युवानंचक्रथुःशचीभिः । युवोरथंदुहितासूर्यस्यसहश्रियानासत्यावृणीत ॥ युवं
तुग्रायपूर्व्येभिरेवैःपुनर्मन्यावभवतंयुवाना । युवंभुज्युमर्णसोनिःसमुद्राद्विभिरूहथुर्ऋज्रेभिरश्वैः ॥ अजोहवीदश्वि
नातौग्र्योवांप्रोह्ळःसमुद्रमव्यथिर्जगन्वान् । निष्टमूहथुःसुयुजारथेनमनोजवसावृषणास्वस्ति+ ॥ १५ ॥ अजोहवीद
श्विनावर्तिकावामास्नोयत्सीममुंचतंवृकस्य । विजयुषाययथुःसान्वद्रेर्जातंविष्वाचोऽअहतंविषेण ॥ शतंमेषान्वृक्ये
मामहानंतमःप्रणीतमशिवेनपित्रा । आक्षीऽऋज्राश्वेऽअश्विनावधत्तंज्योतिरंधायचक्रथुर्विचक्षे ॥ शुनमंधायभरमह्व
यत्सावृकीरश्विनावृषणानरेति । जारःकनीनऽइवचक्षदानऽऋज्राश्वःशतमेकंचमेषान्+ ॥ महीवामूतिरश्विनामयो
भूरुतस्रामंधिष्ण्यासंरिणीथः । अथायुवामिदह्वयत्पुरंधिरागच्छतंसींवृषणाववोभिः ॥ अधेनुंदस्रास्तर्यं१विषक्ताम
पिन्वतंशयवेऽअश्विनागां । युवंशचीभिर्विमदायजायांन्यूहथुःपुरुमित्रस्ययोषां ॥ १६ ॥ यवंवृकेणाश्विनावपंतेषंदु
हंतामनुषायदस्रा । अभिदस्युंबकुरेणाधमंतोरुज्योतिश्चक्रथुरार्याय ॥ आथर्वणायाश्विनादधीचेश्व्यंशिरःप्रत्यैरयतं ।
सवांमधुप्रवोचदृतायन्त्वाष्ट्रंयद्दस्रावपिकक्ष्यंवां ॥ सदाकवीसुमतिमाचकेवांविश्वाधियोऽअश्विनाप्रावतंमे । अस्मेर
यिंनासत्याबृहंतमपत्यसाचंश्रुत्यंरराथां ॥ हिरण्यहस्तमश्विनारराणापुत्रंनरावध्रिमत्याऽअदत्तं । त्रिधाहश्यावमश्वि

नाविकंस्तमुज्जीवसंऽऐरयतंसुदानू ॥ एतानिवामश्विनावीर्याणिप्रपूर्व्याण्यायवोवोचन् । ब्रह्मकृण्वंतोवृषणायुवभ्यांसुवीरासोविदथमावंदेम ॥ १७ ॥ (१ । १७ । ३) आवांरथोऽअश्विनाश्येनपत्वासुमृळीकःस्ववाँयात्ववाङ् । योमर्त्यस्यमनंसोजवीयान्त्रिवंधुरोवृषणावातरंहाः ॥ त्रिवंधुरेणंत्रिवृतारथेनत्रिचक्रेणंसुवृतायातमर्वाक् । पिन्वंतंगाजिन्वंतमर्वतोनोवर्धयंतमश्विनावीरमस्मे+ ॥ प्रवद्यामनासुवृतारथेनदस्राविमंशृणुतंश्लोकमद्रेः । किमंगवांप्रत्यवर्तिंगमिष्ठाहुर्विप्रासोऽअश्विनापुराजाः+ ॥ आवाँश्येनासोऽअश्विनावहंतुरथेयुक्तासंऽआशवःपतंगाः । येऽअप्तुरोदिव्यासोनगृध्राऽअभिप्रयोनासत्यावहंति ॥ आवांरथंयुवतिस्तिष्ठदत्रजुष्ट्वीनरादुहितासूर्यस्य । परिवामश्वावपुषःपतंगावयोवहंत्वरुषाऽअभीके ॥ १८ ॥ उद्वंदनमैरतंदंसनाभिरुद्रेभंदस्रावृषणाशचीभिः । निष्टौग्र्यंपारयथःसमुद्रात्पुनश्च्यवानंचक्रथुर्युवानं ॥ युवमत्रयेवनीतायतप्तमूर्जमोमानमश्विनावधत्तं । युवंकण्वायापिरिप्तायचक्षुःप्रत्यधत्तंसुष्टुतिंजुजुषाणा+ ॥ युवंधेनुंशयवेनाधितायापिन्वतमश्विनापूर्व्याय । अमुंचतंवर्तिकामंहसोनिःप्रतिजंघांविश्पलायाऽअधत्तं ॥ युवंश्वेतंपेदवऽइंद्रजूतमहिहनमश्विनादत्तमश्वं । जोहूत्रमर्योऽअभिभूतिमुग्रंसहस्रसांवृषणंवीड्वंगं ॥ तावांनरास्ववसेसुजाताहवामहेऽअश्विनानाधमानाः । आनऽउपवसुमतारथेनगिरोजुषाणासुवितायंयातं ॥ आश्ये

(१।१७।३) आवांरथइत्येकादशर्चस्यसूक्तस्यकक्षीवानश्विनौत्रिष्टुप् ।

नस्यजवसानूतनेनास्मेयातंनासत्यासजोषाः । हवेहिवामश्विनारातहव्यःशश्वत्तमायाऽउषसोव्युष्टौ॥१९॥(१।१७।४)
आवांरथंपुरुमायंमनोजुवंजीराश्वंयज्ञियंजीवसेहुवे । सहस्रकेतुंवनिनंशतद्वसुंश्रुष्टीवानंवरिवोधामभिप्रयः ॥ ऊर्ध्वा
धीतिःप्रत्यस्यप्रयामन्यधायिशस्मन्त्समयंतऽआदिशः । स्वदामिघर्मंप्रतियंत्यूतयऽआवामूर्जानीरथमश्विनारुहत् ॥
संयन्मिथःपस्पृधानासोऽअग्मतशुभेमखाऽअमिताजायवोरणे । युवोरहप्रवणेचेकितेरथोयदश्विनावहथःसूरिमावरं ॥
युवंभुज्युंभुरमाणंविभिर्गतंस्वयुक्तिभिर्निवहंतापितृभ्यऽआ । यासिष्टंवर्तिर्वृषणाविजेन्यं१दिवोदासायमहिचेतिवाम
वः ॥ युवोरश्विनावपुषेयुवायुजंरथंवाणीयेमतुरस्यशर्ध्यं । आवांपतित्वंसख्यायजग्मुषीयोषावृणीतजेन्यायुवांपती ॥
॥ २० ॥ युवंरेभंपरिषूतेरुरुष्यथोहिमेनघर्मंपरितप्तमत्रये । युवंशयोरवसंपिप्यथुर्गविप्रदीर्घेणवंदनस्तार्यायुषा ॥ यु
वंवंदनंनिर्ऋतंजरण्ययारथंनदस्राकरणासमिन्वथः । क्षेत्रादाविप्रंजनथोविपन्ययाप्रवामत्रविधतेदंसनाभुवत् ॥ अग
च्छतंकृपमाणंपरावतिपितुःस्वस्यत्यजसानिबाधितं । स्वर्वतीरितऽऊतीर्युवोरहचित्राऽअभीकेऽअभवन्नभिष्टयः ॥
उतस्यावांमधुमन्मक्षिकारपन्मदेसोमस्यौशिजोहुवन्यति । युवंदधीचोमनऽआविवासथोथाशिरःप्रतिवामश्व्यंवदत् ॥
युवंपेदवेपुरुवारमश्विनास्पृधांश्वेतंतरुतारंदुवस्यथः । शर्यैरभिद्युंपृतनासुदुष्टरंचर्कृत्यमिन्द्रमिवचर्षणीसहं ॥ २१ ॥

(१।१७।४) आवांरथमितिदशर्चस्यसूक्तस्यकक्षीवानाश्विनौजगती ।

(१।१७।५) कारांधद्धोत्राश्विनावांकोवांजोषऽउभयोः । कथाविधात्यप्रचेताः ॥ विद्वांसाविद्दुरंःपृच्छेदविद्वानि त्थापरोऽअचेताः । नूचिन्नुमर्तेऽअक्रौ ॥ ताविद्वांसाहवामहेवांतानोविद्वांसामन्मंवोचेतमद्य । प्रार्चद्दयमानोयुवा कुंः ॥ विपृच्छामिपाक्याऽनदेवान्वषट्कृतस्याद्भुतस्यदस्रा । पातंचसह्यसोयुवंचरभ्यंसोनः ॥ प्रयाघोषेभृगवाणेनशो भेययावाचायजंतिपज्रियोवां । प्रैषयुर्नविद्वान्+ ॥ २२ ॥ श्रुतंगायत्रंतकवानस्याहंचिद्धिरिरेभाश्विनावां । आक्षी शुंभस्पतीदन्+ ॥ युवंह्यास्तंमहोरन्युवंवायन्निरततंसतं । तानोवसूसुगोपास्यातंपातंनोवृकादघायोः+ ॥ माकस्मैधा तमभ्यमित्रिणेनोमाकुत्रानोगृहेभ्योधेनवोगुः । स्तनाभुजोऽअशिश्वीः ॥ दुहीयन्मित्रधितयेयुवाकुंरायेचंनोमिमीतं वाजवत्यै । इषेचंनोमिमीतंधेनुमत्यै ॥ अश्विनोरसनंरथमनश्वंवाजिनीवतोः । तेनाहंभूरिंचाकन ॥ अयंसमहमात नूह्यातेजनाँऽअनु । सोमपेयंसुखोरथंः ॥ अधस्वप्नस्यनिविंदेभुंजतश्चरेवतंः । उभातावस्निनश्यतः॥२३॥ (१।१८।१) कदित्थानॄंःपात्रंदेवयतांश्रवद्गिरोऽअंगिरसांतुरण्यन् । प्रयदानड्विशऽआहर्म्यस्योरुक्रंसतेऽअध्वरेयजत्रः ॥ स्तंभीद्ध

(१।१७।५) काराधदितिद्वादशर्चस्यसूक्तस्यकक्षीवानश्विनौआद्यागायत्रीद्वितीयाककुप्तृतीयाकाविराट्चतुर्थीनष्टरूपीपंचमीतनुशि राषष्ठ्युष्णिक्सप्तमीविष्टारबृहत्यष्टमीकृतिर्नवमीविराट्अंत्यास्तिस्रोगायत्र्यः (अंत्यादुःस्वप्ननाशिनी) । (१।१८।१) कदित्थेतिपंचद शर्चस्यसूक्तस्यकक्षीवानिंद्रस्त्रिष्टुप् (विश्वेदेवावा) ।

द्यांसधरुणँप्रुषायदृभुर्वाजायद्रविणंनरोगोः । अनुस्वजांमहिषश्चक्षतव्रांमेनामश्वस्यपरिमातरंगोः+ ॥ नक्षद्धवमरुणीःपूर्व्यंराट्तुरोविशामंगिरसामनुद्यून् । तक्षद्वज्रंनियुतंतस्तंभद्द्यांचतुष्पदेनर्यायद्विपादे ॥ अस्यमदेस्वर्यंदाऽऋतायापीवृतमुस्रियाणामनीकं । यद्धप्रसर्गेत्रिककुम्निवर्तदपद्रुहोमानुषस्यदुरोवः ॥ तुभ्यंपयोयत्पितरावनीतांराधःसुरेतस्तुरणेभुरण्यू । शुचियत्तेरेक्णऽआयजंतसबर्दुघायाःपयऽउस्रियायाः ॥ २४ ॥ अधप्रजज्ञेतरणिर्ममत्तुप्ररोच्यस्याऽउषसोनसूरः । इंदुर्येभिराष्टस्वेदुहव्यैःस्रुवेणसिंचंजरणाभिधाम ॥ स्विध्मायद्वनधितिरपस्यात्सूरोऽअध्वरेपरिरोधनागोः । यद्धप्रभासिकृत्व्याँऽअनुद्यूननर्विशेपश्विषेतुराय ॥ अष्टामहोदिवऽआदोहरीऽइहद्युम्नासाहमभियोधानऽउत्सं । हरियत्तेमंदिनंदुक्षन्वृधेगोरभसमद्रिभिर्वाताप्यं ॥ त्वमायसंप्रतिवर्तयोगोर्दिवोऽअश्मानमुपनीतमृभ्वा । कुत्साययन्त्रंपुरुहूतवन्वन्छुष्णमनंतैःपरियासिवधैः+ ॥ पुरायत्सूरस्तमसोऽअपीतेस्तमद्रिवःफलिगंहेतिमस्य । शुष्णस्यचित्परिहितंयदोजोदिवस्परिसुग्रथितंतदादः ॥ २५ ॥ अनुत्वामहीपाजसीऽअचक्रेद्यावाक्षामामदतामिंद्रकर्मन् । त्वंवृत्रमाशयानंसिरासुमहोवज्रेणसिष्वपोवराहुं ॥ त्वमिंद्रनर्योयाँऽअवोनॄन्तिष्ठावातस्यसुयुजोवहिष्ठान् । यंतेकाव्यऽउशनामंदिनंदाद्वृत्रहणंपार्यंततक्षवज्रं ॥ त्वंसूरोहरितोरामयोनॄन्भरच्चक्रमेतशोनायमिंद्र । प्रास्यपारंनवतिंनाव्यानामपिकर्तमवर्तयोयज्यून् ॥ त्वंनोऽअस्याऽइंद्रदुर्हणायाःपाहिवज्रिवोदुरितादभीके । प्रनोवाजान्रथ्यो३अश्वबुध्यानिषे

Digitized by eGangotri Funding MHRD-Delhi

यँधिश्रवंसेसूनृतांयै ॥ मासातेंऽअस्मत्सुमतिर्विदंसद्वाजंप्रमहःसमिषोंवरंत । आनोंभजमघवन्गोष्वर्योमंहिंष्ठास्तेसधमादंःस्याम ॥ २६ ॥ ॥ इतिप्रथमाष्टकेअष्टमोऽध्यायः ॥ ८ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥

अष्टमाध्यायेवर्गाः २६ सूक्तानि ९ ऋचः १३५ ॥ त्यागः ॥ उषोरात्रिभ्यामिदं. उषसइदं. १८ उषोमित्रावरुणादितिसिंधुपृथिवीद्युभ्यइदं. रुद्रायेदं. ११ सूर्यायेदं. ९ अश्विभ्यामिदं. ८३ इंद्रायेदं. १५ इतिप्रथमेष्टमोध्यायः ॥ ८ ॥

॥ इतिप्रथमाष्टकःसमाप्तः ॥

॥ अथद्वितीयाष्टकप्रारंभः ॥

ॐप्रवोवैश्वदेवंमावोविराड्रूपेपृथुःसप्तोनोषस्यंतूषाउच्छंतीप्रातारत्नंसप्तस्वनयस्यदानस्तुतिरुपजगत्यांवमंदानितिंकक्षीवान्दानतुष्टःपंचभिर्भावयव्यंतुष्टावांत्येअनुष्टुभौभावयव्यरोमशयोर्दंपत्योःसंवादोग्निमेकादशपरुच्छेपोदैवोदासिराग्नेयंतुपारुच्छेपंसर्वमात्यष्टंतत्रातिधृतिःषष्ठ्ययंजायताष्टौयंत्वमेकादशषष्ठ्यैंदवींप्रप्रावोतिशक्कर्यावष्टिरंत्यैंद्रयाहिदशांत्यात्रिष्टुबिंद्रायसप्तत्वयावयंषड्युवंतमैंद्रापार्वतोर्धर्चैंउभेसप्तादौत्रिष्टुप्तिस्रोनुष्टुभोगायत्रीधृतिरष्टिरात्वाषड्वायव्यंत्वंत्याष्टिःस्तीर्णनवचतुर्थ्याद्याःपंचैंद्रश्चोपांत्येअष्टीप्रसुसप्तमैत्रावरुणंत्वंत्योलिंगोक्तदेवतेअंत्यात्रिष्टुप् ॥ १ ॥ ॥ ॥ ॥ ॥ ॥

हरिःओम् ॥ (१।१८।२) प्रव॒ःपांतं॑रघुमन्यु॒वों॑धो॑य॒ज्ञं॑रु॒द्राय॑मी॒ळ्हुषे॑भरध्वं॑ । दि॒वोऽअ॑स्तो॒ष्यसुं॑रस्यवी॒रैरि॑षु॒ध्येवं॑ म॒रु॒तोरोद॑स्योः ॥ पत्नीं॑वपू॒र्वहूं॑तिंवावृ॒धध्या॑ऽउ॒षासा॒नक्ता॑पुरु॒धाविदा॑ने । स्त॒रीर्नात्कं॒व्युतं॒वसा॑ना॒सूर्यं॑स्यश्रि॒यासु॒दृशी॒हिर॑ण्यैः ॥ म॒मत्तु॑न॒ःपरि॑ज्मावसु॒र्हा॑म॒मत्तु॒वातो॑अ॒पांवृष॑ण्वान् । शि॒शी॒तमिं॑द्रापर्वतायु॒वंन॒स्तन्नो॒विश्वे॑वरिवस्यंतुदे॒वाः+॥ उ॒तत्यामे॑य॒शसा॑श्वे॒तना॑यै॒व्यं॑ता॒पांतौ॑शि॒जोहु॒वध्यै॑ । प्रवो॒नपा॑तम॒पांकृ॑णुध्वं॒प्रमा॒तरा॑रा॒स्पि॒नस्या॒योः+ ॥ आवो॑रुव॒ण्यु

(१।१८।२) प्रवःपांतमितिपंचदशर्चस्यसूक्तस्यदैर्घतमसःकक्षीवान्विश्वेदेवास्त्रिष्टुप्पंचमीषष्ठ्यौविराड्रूपे ।(भेदप्रयोगपक्षेतुआद्यानांषण्णांक्रमेणरुद्रमरुतउषासानक्ताविश्वेदेवाअश्विनौविश्वेदेवामित्रावरुणासिंधवोदेवताःततोद्वयोर्विश्वेदेवाःततोद्वयोर्मित्रावरुणौअंत्यपंचानांविश्वेदेवाःएवं १५) ।

मौशिजोहुवध्यैघोषेवशंसमर्जुनस्यनंशे । प्रवःपूष्णेदावनऽआँऽअच्छावोचेयवसुतातिमग्नेः+ ॥ १ ॥ श्रुतंमेमित्रावरु
णाहवेमोतश्रुतंसदनेविश्वतःसीं । श्रोतुनःश्रोतुरातिःसुश्रोतुःसुक्षेत्रासिंधुरद्भिः+ ॥ स्तुषेसावांवरुणमित्ररातिर्गवांश
तापृक्षयामेषुपज्रे । श्रुतरथेप्रियरथेदधानाःसद्यःपुष्टिंनिरुंधानासोऽअग्मन् ॥ अस्यस्तुषेमहिमघस्यराधःसचासनेमन
हुषःसुवीराः । जनोयःपज्रेभ्योवाजिनीवानश्वावतोरथिनोमह्यंसूरिः+ ॥ जनोयोमित्रावरुणावभिध्रुगपोनवांसुनोत्य
क्ष्णयाध्रुक् । स्वयंसयक्ष्मंहृदयेनिधत्तऽआपयदींहोत्राभिर्ऋतावा ॥ सव्राधतोनहुषोदंसुजूतःशर्धस्तरोनरांगूर्तश्रवाः ।
विसृष्टरातिर्यातिबाह्ळसृत्वाविश्वासुपृत्सुसदमिच्छूरः ॥ २ ॥ अधग्मंतानहुषोहवंसूरेःश्रोताराजानोऽअमृतस्यमंद्राः ।
नभोजुवोयन्निरवस्यराधःप्रशस्तयेमहिनारथवते ॥ एतंशर्धंधामयस्यसूरेरित्यवोचन्दशतयस्यनंशे । द्युम्नानियेषुवसु
तातीरारन्विश्वेसन्वंतुप्रभृथेषुवाजं ॥ मंदामहेदशतयस्यधासेर्द्विर्यत्पंचबिभ्रतोयंत्यन्ना । किमिष्टाश्वऽइष्टरश्मिरेतऽ
ईशानासस्तरुषऽऋंजतेनॄन्+ ॥ हिरण्यकर्णंमणिग्रीवमर्णस्तन्नोविश्वेवरिवस्यंतुदेवाः । अर्योगिरःसद्यऽआजग्मुषीरो
स्राश्चाकंतूभयेष्वस्मे+ ॥ चत्वारोमामशर्शारस्यशिश्वस्त्रयोराज्ञऽआयवसस्यजिष्णोः । रथोवांमित्रावरुणादीर्घाप्साः ॥ २ ॥
स्यूमगभस्तिःसूरोनाद्यौत् ॥ ३ ॥ (१।१८।३) पृथूरथोदक्षिणायाऽअयोज्यैनंदेवासोऽअमृतासोऽअस्थुः । कृष्णादु

(१।१८।३) पृथूरथइतित्रयोदशर्चस्यसूक्तस्यकक्षीवानुषास्त्रिष्टुप् ।

द॑स्थाद्॒र्या॑३ विहा॑य॒ाश्चिकि॑त्सं॑त॒ीमानु॑षाय॒क्षया॑य ॥ पूर्वा॒विश्वं॑स्मा॒द्भुव॑नादबोधि॒जयं॑ती॒वाजं॑बृह॒तीसनु॑त्री । उ॒च्चाव्यं॑
ख्यद्युव॒तिःपुन॒र्भूरोषाऽअं॑गन्प्रथ॒मापू॒र्वहू॑तौ ॥ यद॒द्यभ॒ागंवि॒भजा॑सि॒नृभ्य॒ऽउषो॑देविमर्त्य॒त्रासु॑जाते । दे॒वोनो॒ऽअत्रं॑स
वि॒तादमू॑ना॒ऽअना॑गसोवोचति॒सूर्या॑य ॥ गृ॒हंगृ॑हमह॒नाया॒त्यच्छा॑दि॒वेदि॑वे॒ऽअधि॒नामा॒दधा॑ना । सिषा॑संतीद्योत॒नाश
श्व॒दाग॒ादग्रं॑मग्र॒मिद्भ॑जते॒वसू॑नां ॥ भगं॑स्य॒स्वसा॒वरु॑णस्यजा॒मिरुषः॑सूनृतेप्रथ॒माजं॑रस्व । प॒श्चासद॑घ्या॒योऽअ॒घस्यं॑धा॒ता
जयै॑म॒तंदक्षि॑णया॒रथे॑न ॥ ४ ॥ उदी॑रतांसू॒नृता॒ऽउत्पुरं॑धी॒रुद॒ग्नयः॑शुशुचा॒नासो॑ऽअस्थुः । स्पा॒र्हावसू॑नि॒तम॒साप॑गूह्ळा
विष्कृ॑ण्वंत्यु॒षसो॑विभा॒तीः+ ॥ अपा॒न्यदे॑त्य॒भ्यं॑१॒न्यदे॑ति॒विषु॑रूपे॒ऽअह॑नी॒संचं॑रेते । प॒रि॒क्षि॒तोस्तमो॑ऽअ॒न्यागुहा॑क॒रद्यौ॑
दु॒षाःशोशु॑चता॒रथे॑न ॥ स॒दृशी॑र॒द्यस॒दृशी॒रिदु॒श्वोदी॒र्घं॑सचं॑ते॒वरु॑णस्य॒धाम॑ । अ॒न॒व॒द्यास्त्रिं॒शतं॑योजना॒न्येकै॑क॒ाक्रतुं॒परि॑यं
तिस॒द्यः+ ॥ जा॒न॒त्यह्नः॑प्रथ॒मस्य॒नाम॑शु॒क्राकृ॒ष्णाद॑जनिष्टश्विती॒ची । ऋ॒तस्य॒योषा॒नामिं॑नाति॒धामाह॑रहर्निष्कृ॒तमा॒चरं॑
ती ॥ क॒न्ये॑वत॒न्वा॒३॒ शाश॑दाना॒ँऽएषिं॑देविदे॒वमिय॑क्षमाणं । सं॒स्मय॑मानायुव॒तिःपु॒रस्ता॑दा॒विर्वक्षां॑सिकृणुषेविभा॒ती+
॥ ५ ॥ सु॒सं॒का॒शाम॒ातृमृ॑ष्टेव॒योषा॒विस्त॒न्वं॑कृणुषेदृ॒शेकं । भ॒द्रात्वमु॑षोवित॒रंव्यु॑च्छ॒नतत्ते॑ऽअ॒न्याऽउ॒षसो॑नशंत ॥ अ
श्वाव॑ती॒र्गोम॑तीर्वि॒श्ववा॑रा॒यत॑माना॒रश्मिभिः॒सूर्य॑स्य । परा॑च॒यंति॒पुन॒राचं॑यंतिभ॒द्रानाम॒वह॑मानाऽउ॒षासः॑ ॥ ऋ॒त
स्यं॑र॒श्मिमं॑नु॒यच्छ॑मानाभ॒द्रंभं॑द्रं॒क्रतु॑म॒स्मासु॑धेहि । उषो॑नो॒ऽअद्यसु॒हवा॒व्यु॑च्छा॒स्मासु॒रायो॑म॒घवं॑त्सुचस्युः ॥ ६ ॥

Digitization by eGangotri. Funding by MoE-IKS

(१।१८।४) उषाऽउच्छंतींसमिधानेऽअग्नाऽउद्यन्त्सूर्यंऽउर्वियाज्योतिरश्रेत् । देवोनोऽअत्रंसवितान्वर्थंप्रासांवीद्द्वि
पत्प्रचतुंष्पदित्यै+ ॥ अमिंनतीदैव्यांनिव्रतानिंप्रमिनतीमंनुष्यांयुगानिं । ईयुषीणामुपमाशश्वंतीनामायतीनांप्रथमो
षाव्यंद्यौत् ॥ एषादिवोदुंहिताप्रत्यंदर्शिज्योतिर्वसांनासमनापुरस्तांत् । ऋतस्यपंथामन्वेंतिसाधुप्रंजानतीवनदिशोंमि
नाति ॥ उपोंऽअदर्शिशुंध्युवोनवक्षोंनोधाऽईवाविरंकृतप्रियाणिं । अद्मसन्नसंसतोबोधयंतीशश्वत्तमागात्पुनंरेयुषीं
णां ॥ पूर्वेंऽअर्धेंरजंसोऽअह्न्यस्यगवांजनिंत्र्यकृतप्रकेतुं । व्युंप्रथतेवितरंवरींयऽओभापृणंतींपित्रोरुपस्थां ॥ ७ ॥
एवेदेषापुंरुतमांदृशेकंनाजांमिंनपरिंवृणक्तिजामिं । अरेपसांतन्वाऽशाशंदानानार्भांदीषंतेनमहोविंभाती+ ॥ अभ्रा
तेवंपुंसऽएंतिप्रतीचीगंर्तारुगिंवसनयेधनांनां । जायेवपत्यंऽउशतीसुवासांऽउषाहस्रेवनिरिंणीतेऽअप्सः ॥ स्वसास्व
स्रेज्यायंस्यैयोनिंमारैगपैत्यस्याःप्रतिचक्ष्येंव । व्युच्छंतींरश्मिभिःसूर्यंस्यांज्यंक्तेसमनगाऽईवव्राः+ ॥ आसांपूर्वासामहं
सुस्वसृंणामपंरापूर्वामभ्येंतिपश्चात् । ताःप्रंत्नवन्नव्यंसीर्नूनमस्मेरेवदुंच्छंतुसुदिनांऽउषासः ॥ प्रबोंधयोषःपृणतोमं
घोन्यबुंध्यमानाःपणयंःससंतु । रेवदुंच्छमघवंद्भ्योमघोनिरेवत्स्तोत्रेसूंनृतेजारयंती ॥ ८ ॥ अवेयमंश्वैद्युवतिःपुरस्तांद्युंक्ते
गवांमरुणानामनींकं । विनूनमुंच्छादसंतिप्रकेतुर्गृहंगृंहमुपंतिष्ठातेऽअग्निः+ ॥ उत्तेवयंश्चिद्वसतेरंपप्तन्नरंश्चयेपिंतुभा ॥ ३ ॥

(१।१८।४) उषाउच्छंतीतित्रयोदशर्चस्यसूक्तस्यकक्षीवानुषास्त्रिष्टुप् ।

जोव्युंष्टौ । अमासतेवंहसिभूरिंवाममुषोदेविदाशुषेमर्त्याय ॥ अस्तोढ्वंस्तोम्याब्रह्मणामेवीवृधध्वमुशतीरुषासः । युष्माकंदेवीरवसासनेमसहस्रिणंचशतिनंचवाजं ॥ ९ ॥ (१।१८।५) प्रातारत्नंप्रातरित्वादधातितंचिकित्वान्प्रतिगृह्यानिधत्ते । तेनप्रजांवर्धयमानऽआयूरायस्पोषेणसचतेसुवीरः ॥ सुगुरसत्सुहिरण्यःस्वश्वोबृहदस्मैवयऽइंद्रोदधाति । यस्त्वायंतंवसुनाप्रातरित्वोमुक्षीजयेवपदिमुत्सिनाति ॥ आयमद्यसुकृतंप्रातरिच्छन्निष्टेःपुत्रंवसुमतारथेन । अंशोःसुतंपाययमत्सरस्यक्षयद्वीरंवर्धयसूनृताभिः ॥ उपक्षरंतिसिंधवोमयोभुवऽईजानंचयक्ष्यमाणंचधेनवः । पृणंतंचपपुरिंचश्रवस्यवोघृतस्यधाराऽउपयंतिविश्वतः ॥ नाकस्यपृष्ठेऽअधितिष्ठतिश्रितोयःपृणातिसहदेवेषुगच्छति । तस्माऽआपोघृतमर्षंतिसिंधवस्तस्माऽइयंदक्षिणापिन्वतेसदा ॥ दक्षिणावतामिदिमानिचित्रादक्षिणावतांदिविसूर्यासः । दक्षिणावंतोऽअमृतंभजंतेदक्षिणावंतःप्रतिरंतऽआयुः ॥ मापृणंतोदुरितमेनऽआरन्माजारिषुःसूरयःसुव्रतासः । अन्यस्तेषांपरिधिरस्तुकश्चिदपृणंतमभिसंयंतुशोकाः ॥ १० ॥ (१।१८।६) अमंदान्त्स्तोमान्प्रभरेमनीषासिंधावधिक्षियतोभाव्यस्य ।

(१।१८।५) प्रातारत्नमितिसप्तर्चस्यसूक्तस्यकक्षीवान्त्स्वनयस्यदानस्तुतिस्त्रिष्टुप्चतुर्थीपंचम्यौजगत्यौ । (स्वनयनाम्नोराज्ञोदानस्तुतिरतःस्वनयोदेवता) । (१।१८।६) अमंदानितिसप्तर्चस्यसूक्तस्यकक्षीवानृषिःअगाधितेत्यस्यभावयव्यऋषिःरोमशादेवताउपोपमइत्यस्यरोमशाऋषिकास्वनयोदेवतात्रिष्टुप् । (स्वनयएव[illegible]र्याअंत्येद्वेऋचौतयोःपरस्परंसंवादःआद्याभिःपंचभि

Digitization by eGangotri Funding MLDF Delhi

योमेसहस्रममिमीतसवानतूर्तोराजाश्रवइच्छमानः ॥ शतंराज्ञोनाधमानस्यनिष्काच्छतमश्वान्प्रयतान्त्सद्यऽआदं । शतंकक्षीवाँऽअसुरस्यगोनांदिविश्रवोजरमाततान ॥ उपमाश्यावाःस्वनयेनदत्तावधूमंतोदशरथासोऽअस्थुः । षष्टिःसहस्रमनुगव्यमागात्सनत्कक्षीवाँऽअभिपित्वेऽअह्नां ॥ चत्वारिंशद्दशरथस्यशोणाःसहस्रस्याग्रेश्रेणिंनयंति । मदच्युतःकृशनावतोऽअत्यान्कक्षीवंतऽउदमृक्षंतपज्राः+ ॥ पूर्वामनुप्रयतिमाददेवस्त्रीन्युक्ताँऽअष्टावरिधायसोगाः । सुबंधवोयेविश्याऽइवव्राऽअनस्वंतःश्रवऽऐषंतपज्राः+ ॥ आगधितापरिगधितायाकशीकेवजंगहे । ददातिमह्यंयादुरीयाशूनांभोज्याशता+ ॥ उपोपमेपरामृशमामेदभ्राणिमन्यथाः । सर्वाहमस्मिरोमशागंधारीणामिवाविका+ ॥ ११ ॥

(१।११९।१) अग्निंहोतारंमन्येदास्वंतंवसुंसूनुंसहसोजातवेदसंविप्रंनजातवेदसं । यऽऊर्ध्वयास्वध्वरोदेवोदेवाच्याकृपा । घृतस्यविभ्राष्टिमनुवष्टिशोचिषाजुह्वानस्यसर्पिषः ॥ यजिष्ठंत्वायजमानाहुवेमज्येष्ठमंगिरसांविप्रमन्मभिर्विप्रेभिःशुक्रमन्मभिः । परिज्मानमिवद्यांहोतारंचर्षणीनां । शोचिष्केशंवृषणंयमिमाविशःप्रावंतुजूतयेविशः ॥ सहिपुरूचिदोजसाविरुक्मतादीद्यानोभवतिद्रुहंतरःपरशुर्नद्रुहंतरः । वीळुचिद्यस्यसमृतौश्रुवद्वनेवयत्स्थिरं । निष्षहमाणोय

॥ ४ ॥

दीर्नतुष्टःकक्षीवान्भावयव्यमस्तौत्ततश्चसएवदेवता) । (१।११९।१) अग्निंहोतारमित्येकादशर्चस्यसूक्तस्यदैवोदासिःपरुच्छेपोरग्निरत्यष्टी षष्ठ्यतिधृतिः ।

मते॒नाय॑तेधन्वा॒सहा॒नाय॑ते ॥ दृ॒ह्ळाचि॑दस्मा॒ऽअनु॑दु॒र्यथा॑वि॒देतेजि॑ष्ठाभिर॒रणि॑भि॒र्दा॒ष्ट्यव॑से॒ग्नये॑दा॒ष्ट्यव॑से । प्रयःपु॒रूणि॒
गाह॑ते॒तक्ष॒द्वने॑वशो॒चिषा॑ । स्थि॒राचि॒दन्ना॒निरि॑णा॒त्योज॑सा॒निस्थि॒राणि॑चि॒दोज॑सा ॥ तम॑स्यपृ॒क्षमुप॑रासुधीमहि॒नक्तं॑यः
सुदर्श॑तरो॒दिवा॑तरा॒दप्रा॑युषे॒दिवा॑तरात् । आद॒स्यायु॒र्ग्रभ॑णवद्वी॒ळुशर्म॒नसू॒नवे॑ । भ॒क्तमभ॑क्त॒मवो॒व्यं॑तो॑ऽअ॒जरा॑ऽअ॒ग्न
यो॒व्यं॑तो॑ऽअ॒जरा॑ः ॥ १२ ॥ सहि॒शर्धो॒नमारु॑तंतुवि॒ष्वणि॒रप्न॑स्वतीषू॒र्वरा॑स्वि॒ष्टनि॒रार्त॑नास्वि॒ष्टनिः॑ । आद॑द्ध॒व्यान्या॑द॒
दि॒र्य॒ज्ञस्य॑के॒तुर॒र्हणा॑ । अध॑स्मास्य॒हर्ष॑तो॒हृषी॑वतो॒विश्वे॑जुषं॑त॒पंथा॒ंनरः॑शु॒भेनपंथा॑ं ॥ द्वि॒तायदीं॑की॒स्तासो॑ऽअ॒भिद्य॑वोनम॒
स्यं॑त॒ऽउप॒वोचं॑त॒भृग॑वोम॒थ्नंतो॑दा॒शाभृग॑वः । अ॒ग्निरी॑शे॒वसू॑ना॒ंशुचि॒र्यो॑ध॒र्णिरे॑षां । प्रि॒याँऽअ॑पि॒धीँऽर्व॑निषी॒ष्टमेधि॑र॒ऽआ
व॑निषी॒ष्टमेधि॑रः ॥ विश्वा॑सांत्वावि॒शांप॑तिंहवामहे॒सर्वा॑सांसमा॒नंदंप॑तिंभु॒जेस॒त्यगि॑र्वाहसंभु॒जे । अति॑थिं॒मानु॑षाणांपि॒
तु॒र्नय॒स्यास॒या । अ॒मीच॒विश्वे॑ऽअ॒मृता॑स॒ऽआवयो॑ह॒व्यादे॒वेष्वावयः॑ ॥ त्वम॑ग्ने॒सह॑सा॒सह॑न्तमःशु॒ष्मिन्त॑मोजायसेदे॒व
ता॑तये॒र॒यिर्न॑दे॒वता॑तये । शु॒ष्मिन्त॑मो॒हिते॒मदो॑द्युम्निन्त॑म॒ऽउ॒तक्रतुः॑ । अध॑स्माते॒परि॑चरं॒त्यजर॒श्रुष्टी॑वानो॒नाज॑र ॥
प्रवो॑म॒हेसह॑सा॒सह॑स्वत॒ऽउ॒ष॒र्बुधे॑पशु॒षेनाग्नये॒स्तोमो॑बभूत्व॒ग्नये॑ । प्रति॒यदीं॑ह॒विष्मा॒न्विश्वा॑सु॒क्षासु॒जोगु॑वे । अग्रे॑रे॒भोनज॑
रत॒ऽऋषू॒णांजूर्णि॒र्होत॑ऽऋषू॒णां+ ॥ सनो॒नेदि॑ष्ठं॒ददृ॑शान॒ऽआभ॒राग्ने॑दे॒वेभिः॒सच॑नाःसुचे॒तुना॑म॒होरा॒यःसु॒चे॒तुना॑ । महि॑

शविष्ठनस्कृधिसंचक्षेभुजेऽअस्यै । महिस्तोतृभ्योमघवन्त्सुवीर्यंमथीरुग्रोनशवसा ॥ १३ ॥ (१।१९।२) अयंजाय
तमनुषोधरीमणिहोतायजिष्ठउशिजामनुव्रतमग्निःस्वमनुव्रतं । विश्वश्रुष्टिःसखीयतेरयिरिवश्रवस्यते । अदब्धोहोता
निषददिळस्पदेपरिवीतइळस्पदे+ ॥ तंयज्ञसाधमपिवातयामस्यृतस्यपथानमसाहविष्मतादेवताताहविष्मता । सन
ऽऊर्जामुपाभृत्ययाकृपानजूर्यति । यंमातरिश्वामनवेपरावतोदेवंभाःपरावतः ॥ एवैनसद्यःपर्यैतिपार्थिवंमुहुर्गीरेतो
वृषभःकनिक्रदद्दधद्रेतःकनिक्रदत् । शतंचक्षाणोऽअक्षभिर्देवोवनेषुतुर्वणिः । सदोदधानऽउपरेषुसानुष्वग्निःपरेषुसानु
षु ॥ ससुक्रतुःपुरोहितोदमेदमेग्निर्यज्ञस्याध्वरस्यचेततिक्रत्वायज्ञस्यचेतति । क्रत्वावेधाऽइषूयतेविश्वाजातानिपस्पशे ।
यतोघृतश्रीरतिथिरजायतवह्निर्वेधाऽअजायत ॥ क्रत्वायदस्यतविषीषुपृंचतेग्नेरवेणमरुतांनभोज्येषिरायनभोज्या । सहि
ष्मादानमिन्वतिवसूनांचमज्मना । सनस्त्रासतेदुरितादभिह्रुतःशंसादघादभिह्रुतः ॥१४॥ विश्वोविहायाऽअरतिर्वसुर्द
धेहस्तेदक्षिणेतरणिर्नशिश्रथच्छ्रवस्ययानशिश्रथत् । विश्वस्माऽइदिषुध्यतेदेवत्राहव्यमोहिषे । विश्वस्माऽइत्सुकृतेवार
मृण्वत्यग्निर्द्वाराव्यृण्वति ॥ समानुषेवृजनेशंतमोहितो३ग्निर्यज्ञेषुजेन्योनविश्पतिःप्रियोयज्ञेषुविश्पतिः । सहव्यामा
नुषाणामिळाकृतानिपत्यते । सनस्त्रासतेवरुणस्यधूर्तेर्महोदेवस्यधूर्तेः+ ॥ अग्निंहोतारमीळतेवसुधितिंप्रियंचेतिष्ठमर

(१।१९।२) अयंजायतेत्यष्टर्चस्यसूक्तस्यपरुच्छेपोग्निरत्यष्टी ।

Digitized by eGangotri Funding MIDF-Delhi

तिंन्यैरिरेहव्यवाहंन्यैरिरे । विश्वायुंर्विश्ववेदसंहोतारंयजतंकविं । देवासौरण्वमवंसेवसूयवोगीर्भीरण्वंवंसूयवः
॥ १५ ॥ (१।१९।३) यंत्वंरथमिंद्रमेधसातयेपाकासंतमिषिरप्रणयसिप्रानवद्यनयसि । सद्यश्चित्तमभिष्टयेकरोव
शंश्चवाजिनं । सास्माकमनवद्यतूतुजानवेधसामिमांवाचंनवेधसां ॥ सःश्रुधियःस्मापृतनासुकासुचिद्दक्षाय्यंऽइंद्रभर
हूतयेनृभिरसिप्रतूर्तयेनृभिः । यःशूरैःस्वः१सनितायोविप्रैर्वाजंतरुता । तमीशानासऽइरधंतवाजिनंपृक्षमत्यंनवाजि
नं ॥ दस्मोहिष्मावृषणंपिन्वसित्वचंकंचिद्यावीरररुंशूरमर्त्यंपरिवृणक्षिमर्त्यं । इंद्रोततुभ्यंतद्दिवेतद्रुद्रायस्वयशसे ।
मित्रायवोचंवरुणायसप्रथःसुमृळीकायसप्रथः ॥ अस्माकंवऽइंद्रमुश्मसीष्टयेसखायंविश्वायुंप्रासहंयुजंवाजेषुप्रासहंयु
जं । अस्माकंब्रह्मोतयेवापृत्सुषुकासुचित् । नहित्वाशत्रुःस्तरतेस्तृणोषियंविश्वंशत्रुंस्तृणोषियं+ ॥ निषूनमातिमतिंकय
स्यचित्तेजिष्ठाभिररणिभिर्नोतिभिरुग्राभिरुग्रोतिभिः । नेषिणोयथापुरानेनाःशूरमन्यसे । विश्वानिपूरोरपपार्षिवह्नि
रासावह्निर्नोऽअच्छ ॥ १६ ॥ प्रतद्वोचेयंभव्यायेंदवेहव्योनयऽइषवान्मन्मरेजतिरक्षोहामन्मरेजति । स्वयंसोऽअस्मदा
निदोवधैरजेतदुर्मतिं । अवस्रवेदघशंसोवतरमवक्षुद्रमिवस्रवेत् ॥ वनेमतद्धोत्रयाचितंत्यावनेमरयिंरयिवःसुवीर्यंर
ण्वंसंतंसुवीर्यं । दुर्मन्मानंसुमंतुभिरेमिषापृचीमहि । आसत्याभिरिंद्रंद्युम्नहूतिभिर्यजत्रंद्युम्नहूतिभिः ॥ प्रप्रावोऽअ

(१।१९।३) यंत्वंरथमित्येकादशर्चस्यसूक्तस्यपरुच्छेपइंद्रःषष्ठयाइंदुरत्यष्टीअष्टमीनवम्यावतिशक्वर्यावेकादश्यष्टिः ।

स्मेस्वयंशोभिरूतीपरिविर्गऽइंद्रोदुर्मतीनांदरीमन्दुर्मतीनां । स्वयंसारिषयध्यैयानऽउपेषेऽअत्रैः । हतेमसन्नवक्षतिक्षि
प्ताजूर्णिर्नवक्षति ॥ त्वंनऽइंद्ररायापरीणसायाहिपथाँऽअनेहसापुरोयाह्यरक्षसा । सचस्वनःपराकऽआसचस्वास्तमी
कऽआ । पाहिनोदूरादारादभिष्टिभिःसदापाह्यभिष्टिभिः ॥ त्वंनऽइंद्ररायातरूषसोग्रंचित्त्वामहिमासक्षदवसेमहेमि
त्रंनावसे । ओजिष्ठत्रातरवितारथंकंचिदमर्त्य । अन्यमस्माद्रिरिषेःकंचिदद्रिवोरिरिक्षंतंचिदद्रिवः ॥ पाहिनऽइंद्रसु
ष्टुतस्त्रिधोवयातासदमिद्दुर्मतीनांदेवःसन्दुर्मतीनां ॥ हंतापापस्यरक्षसस्त्राताविप्रस्यमावतः । अधाहित्वाजनिताजी
जनद्वसोरक्षोहणंत्वाजीजनद्वसो ॥ १७ ॥ (१।१९।४) एंद्रयाह्युपनःपरावतोनायमच्छाविदथानीवसत्पतिरस्तंरा
जेवसत्पतिः । हवामहेत्वावयंप्रयस्वंतःसुतेसचा । पुत्रासोनपितरंवाजसातयेमंहिष्ठंवाजसातये ॥ पिबासोममिंद्रसुवान
मद्रिभिःकोशेनसिक्तमवतंनवंसगस्तातृषाणोनवंसगः । मदायहर्यतायतेतुविष्टमायधायसे । आत्वायच्छंतुहरितोन
सूर्यमहाविश्वेवसूर्यं ॥ अविंदद्दिवोनिहितंगुहानिधिंवेर्नगर्भंपरिवीतमश्मन्यनंतेऽअंतरश्मनि । व्रजंवज्रीगवामिवसिषा
सन्नंगिरस्तमः । अपावृणोदिषऽइंद्रःपरीवृताद्वारऽइषःपरीवृताः ॥ दादृहाणोवज्रमिंद्रोगभस्त्योःक्षद्मेवतिग्ममसनाय
संश्यदहिहत्यायसंश्यत् । संविव्यानऽओजसाशवोभिरिंद्रमज्मना । तष्टेववृक्षंवनिनोनिवृश्चसिपरश्वेवनिवृश्चसि ॥ ॥ ६ ॥

(१।१९।४) एंद्रयाहीतिदशर्चस्यसूक्तस्यपरुच्छेपइंद्रोऽत्यष्टिरंत्यात्रिष्टुप् । (अद्रीअद्रिरित्युभयविधोपिप्रयोगःसाधुः) ।

त्वंवृथा॑न॒द्यं॑ऽइंद्र॒सर्त॒वेच्छा॑समु॒द्रमं॑सृ॒जोरथाँ॑ऽइववाजय॒तोरथाँ॑ऽइव । इ॒तऽऊ॒तीर॑युंजतसमा॒नमर्थ॒मक्षि॑तं । धे॒नूरि॑व॒मन॑वे वि॒श्वदो॑हसो॒जना॑यवि॒श्वदो॑हसः ॥ १८ ॥ इ॒मांते॒वाचं॑वसू॒यंत॑ऽआ॒यवो॒रथं॒नधीरः॒स्वपा॑ऽअतक्षिषुःसु॒म्नाय॒त्वाम॑तक्षिषुः । शुं॒भंतो॒जेन्यं॑यथा॒वाजे॑षुवि॒प्रवा॒जिनं॑ । अत्यं॑मिव॒शवं॑सेसा॒तये॒धना॒विश्वा॒धना॑निसा॒तये॑ ॥ भि॒नत्पुरो॑नव॒तिमिं॑द्रपू॒रवे॒दिवो॑दासा॑य॒महिं॑दा॒शुषे॑नृतो॒वज्रे॑णदा॒शुषे॑नृतो । अ॒ति॒थि॒ग्वाय॒शंब॑रंगि॒रेरु॒ग्रोऽअवा॑भरत् । म॒होधना॑नि॒दय॑मान॒ऽओज॑सा॒विश्वा॒धना॒न्योज॑सा ॥ इंद्रः॑स॒मत्सु॒यज॑मान॒मार्यं॑प्राव॒द्विश्वे॑षुश॒तमू॑तिरा॒जिषु॒स्व॑मी॑ळ्हेष्वा॒जिषु॑ । मन॑वे॒शास॑दव्र॒तान्त्वचं॑कृ॒ष्णाम॑रंधयत् । दक्ष॒न्नविश्वं॑ततृषा॒णमो॑षति॒न्यर्श॑सा॒नमो॑षति ॥ सूरं॑श्च॒क्रंप्रवृ॑ह॒ज्जा॒तऽओज॑साप्रपि॒त्वेवाचं॑मरु॒णोमु॑षायती॒शा॒नऽआमु॑षायति । उ॒शना॒यत्प॑रा॒वतोज॑गन्नू॒तये॑कवे । सु॒म्नानि॒विश्वा॒मनु॑षेवतु॒र्वणि॒रहा॒विश्वे॑वतु॒र्वणिः॑ ॥ सनो॒नव्यै॑भिर्वृषकर्मन्नु॒क्थैःपुरां॑दर्तःपा॒युभिः॑पाहिश॒ग्मैः । दि॒वो॒दा॒सेभि॑रिंद्र॒स्तवा॑नोवावृधी॒थाऽअहो॑भिरिव॒द्यौः+ ॥ १९ ॥

(२।१९।५) इंद्रा॑य॒हिद्यौरसु॑रो॒ऽअन॑म्न॒तेंद्रा॑यम॒हीपृ॑थि॒वीवरी॑मभिर्द्यु॒म्नसा॑ता॒वरी॑मभिः । इंद्रं॒विश्वे॑स॒जोष॑सोदे॒वासो॑दधिरेपु॒रः । इंद्रा॑य॒विश्वा॒सव॑नानि॒मानु॑षारा॒तानि॑संतु॒मानु॑षा ॥ विश्वे॑षु॒हित्वा॒सव॑नेषुतुं॒जते॑समा॒नमेकं॒वृष॑मण्यवः॒पृथ॒क्स्वः॑सनि॒ष्यवः॒पृथ॑क् । तंत्वा॒नावं॒नप॒र्षणिं॑शू॒षस्य॑धु॒रिधी॑महि । इंद्रं॒नय॒ज्ञैश्चि॒तयं॑तऽआ॒यवः॒स्तोमे॑भि॒रिंद्रं॑मा॒यवः॑ ॥ वि

(२।१९।५) इंद्रायहीतिसप्तर्चस्यसूक्तस्यपरुच्छेपइंद्रोऋषिः ।

Digitization by eGangotri Funding MHRD Delhi

त्वांतत्संमिथुनाऽअवस्यवोव्रजस्यसातागव्यस्यनिःसृजःसक्षंतऽइंद्रनिःसृजः । यद्गव्यंताद्वाजनास्व१र्यंतासमूहसि ।
आविष्करिक्रद्वृषणंसचाभुवंवज्रमिंद्रसचाभुवं ॥ विदुष्टेऽअस्यवीर्यस्यपूरवःपुरोयदिंद्रशारदीरवातिरःसासहानोऽ
अवातिरः । शासस्तमिंद्रमर्त्यमयज्युंशवसस्पते । महीममुष्णाःपृथिवीमिमाऽअपोमंदसानऽइमाऽअपः+ ॥ आदित्ते
ऽअस्यवीर्यस्यचर्किरन्मदेषुवृषन्नुशिजोयदाविथसखीयतोयदाविथ । चकर्थकारमेभ्यःपृतनासुप्रवंतवे । तेऽअन्याम
न्यांनद्यंसनिष्णतश्रवस्यंतःसनिष्णत ॥ उतोनोऽअस्याऽउषसोजुषेतह्य१र्कस्यबोधिहविषोहवीमभिःस्वर्षाताहवीम
भिः । यदिंद्रहंतवेमृधोवृषावज्रिन्चिकेतसि । आमेऽअस्यवेधसोनवीयसोमन्मश्रुधिनवीयसः ॥ त्वंतमिंद्रवावृ
धानोऽअस्मयुरमित्रयंतंतुविजातमर्त्यंवज्रेणशूरमर्त्यं । जहियोनोऽअघायतिशृणुष्वसुश्रवस्तमः । रिष्टंनयामन्नपभूतु
दुर्मतिर्विश्वापभूतुदुर्मतिः+ ॥ २० ॥ (१।१९।६) त्वयावयंमघवन्पूर्व्येधनऽइंद्रत्वोताःसासह्यामपृतन्यतोवनुयाम
वनुष्यतः । नेदिष्ठेऽअस्मिन्नहन्यधिवोचानुसुन्वते । अस्मिन्यज्ञेविचयेमाभरेकृतंवाजयंतोभरेकृतं+ ॥ स्वर्जेषे
भरेऽआप्रस्यवक्मन्युषर्बुधःस्वस्मिन्नंजसिक्राणस्यस्वस्मिन्नंजसि । अहन्निंद्रोयथाविदेशीर्ष्णाशीर्ष्णोपवाच्यः । अस्म
त्रातेसध्र्यक्संतुरातयोभद्राभद्रस्यरातयः ॥ तत्तुप्रयःप्रत्नथातेशुशुक्वनंयस्मिन्यज्ञेवारमकृण्वतक्षयमृतस्यवारसिक्षयं । ॥ ७ ॥

(१।१९।६) त्वयावयमितिषळर्चस्यसूक्तस्यपरुच्छेपइंद्रोयुवंतमिंद्रेत्यर्धर्चइंद्रापर्वतावत्यष्टिः ।

वितद्धौंचेरधंद्धितांतःपंश्यंतिरश्मिभिः । सघांविदेऽअन्विद्रोंगवेषणोबंधुक्षिद्भ्योंगवेषणः ॥ नूऽइत्थातेंपूर्वथांचप्रवा
च्यंयदंगिंरोभ्योवृंणोरपंव्रजमिंद्रशिक्षन्नपंव्रजं । ऐभ्यंःसमान्यादिशास्मभ्यँजेषियोत्सिंच । सुन्वद्भ्योरंधयाकंचिंदव्रतं
हृणायंतँचिदव्रतं+ ॥ संयज्जनान्क्रतुंभिःशूरंऽईक्षयद्धनेंहितेतंरुषंतश्रवस्यवःप्रयंक्षंतश्रवस्यवंः । तस्माऽआयुंःप्रजाव
दिद्बाधेंऽअर्चंत्योजंसा । इंद्रंऽओक्यंदिधिषंतधीतयोंदेवाँऽअच्छानधीतयंः ॥ युवंतमिंद्रापर्वतापुरोयुधायोनंःपृत
न्यादपतंतमिद्धंतंवज्रेणतंतमिद्धतं । दूरेचत्तायंच्छन्त्सद्गहंनंयदिनंक्षत् । अस्माकंशत्रून्परिंशूरविश्वतोंदर्मादंर्षीष्टवि
श्वतंः ॥ २१ ॥ (१।१९।७) उभेपुंनामिरोदंसीऽऋतेनद्रुहोंदहामिसंमहीरंनिंद्राः । अभिव्लग्ययत्रंहताऽअमित्रा
वैलस्थानंपरिंतृह्लाऽअशैरन् ॥ अभिव्लग्यांचिदद्रिवःशीर्षायांतुमतीनां । छिंधिवंटूरिणांपदामहावंटूरिणापदा+ ॥
अवांसांमघवन्जहिशर्धौयातुमतीनां । वैलस्थानकेऽअर्मकेमहावैलस्थेऽअर्मके+ ॥ यासांतिस्रःपंचाशतोंभिव्लंगैरपावं
पः । तत्सुतेंमनायतितकत्सुतेंमनायति ॥ पिशंगंभृष्टिमंभृणंपिशाचिंमिंद्रसंमृंण । सर्वंरक्षोनिर्बर्हय ॥ अवर्महइंद्र
दादृहिश्रुधीनंःशुशोचहिद्यौःक्षानभीषाँऽअंद्रिवोघृणान्नभीषाँऽअंद्रिवः । शुष्मिन्तंमोहिशुष्मिभिर्वधैरुग्रेभिरीयंसे । अ
पूरुषघ्नोऽअप्रतीतशूरसत्वंभिस्त्रिसप्तैःशूरसत्वंभिः ॥ वनोतिहिसुन्वन्क्षयंपरींणसःसुन्वानोहिष्मायजत्यवद्विषोंदेवा

(१।१९।७) उभेपुनामीतिसप्तर्चस्यसूक्तस्यपरुच्छेपऐंद्रआद्यात्रिष्टुप्द्वितीयादितिस्रोनुष्टुभःपंचमीगायत्रीषष्ठीधृतिःसप्तम्यष्टिः ।

नामवद्विषः । सुन्वानऽइत्सिषासतिसहस्रावाज्यवृतः । सुन्वानायेन्द्रोददात्याभुवंरयिंददात्याभुवं॥२२॥(१।२०।१) आत्वाजुवोरारहाणाऽअभिप्रयोवायोवहन्त्विहपूर्वपीतयेसोमस्यपूर्वपीतये । ऊर्ध्वातेऽअनुसूनृतामनस्तिष्ठतुजानती । नियुत्वतारथेनायाहिदावनेवायोमखस्यदावने ॥ मन्दन्तुत्वामन्दिनोवायविन्दवोस्मत्क्राणासःसुकृताऽअभिद्यवोगोभिः क्राणाऽअभिद्यवः । यद्धक्राणाऽइरध्यैदक्षंसचन्तऽऊतयः । सध्रीचीनानियुतोदावनेधियऽउपब्रुवतईंधियः ॥ वायुर्युङ्क्तेरोहितावायुररुणावायूरथेऽअजिराधुरिवोळ्हवेवहिष्ठाधुरिवोळ्हवे । प्रबोधयापुरन्धिंजारऽआससतीमिव । प्रचक्षयरोदसीवासयोषसःश्रवसेवासयोषसः ॥ तुभ्यमुषासःशुचयःपरावतिभद्रावस्त्रातन्वतेदंसुरश्मिषुचित्रानव्येषुरश्मिषु । तुभ्यंधेनुःसबर्दुघाविश्वावसूनिदोहते । अजनयोमरुतोवक्षणाभ्योदिवऽआवक्षणाभ्यः ॥ तुभ्यंशुक्रासःशुचयस्तुरण्यवोमदेषूग्राऽइषणन्तभुर्वण्यपामिषन्तभुर्वणि । त्वांत्सारीदसमानोभगमीट्टेतक्ववीये । त्वंविश्वस्माद्भुवनात्पासिधर्मणासुर्यात्पासिधर्मणा ॥ त्वंनोवायवेषामपूर्व्यःसोमानांप्रथमःपीतिमर्हसिसुतानांपीतिमर्हसि । उतोविहुत्मतीनांविशांववर्जुषीणां । विश्वाऽइत्तेधेनवोदुह्रऽआशिरंघृतंदुह्रतऽआशिरम् ॥ २३ ॥ (१।२०।२) स्तीर्णंबर्हिरुपनोयाहि

(१।२०।१) आत्वाजुवइतिषळर्चस्यसूक्तस्यपरुच्छेपोवायुरत्यष्टिरंत्याष्टिः । (१।२०।२) स्तीर्णबर्हिरितिनवर्चस्यसूक्तस्यपरुच्छेपोवायुश्चतुर्थ्यादिपंचानामिंद्रोवाअत्यष्टिःसप्तम्यष्टम्यावष्टी ।

वीतयेंसहस्रेणनियुतांनियुत्वतेशतिनीभिर्नियुत्वते । तुभ्यंहिपूर्वपीतयेदेवादेवाययेमिरे । प्रतेसुतासोममधुमंतोऽअस्थिरन्मदायक्रत्वेऽअस्थिरन् ॥ तुभ्यायंसोमःपरिपूतोऽअद्रिभिःस्पार्हावसानःपरिकोशमर्षतिशुक्रावसानोऽअर्षति । तवायंभागऽआयुषुसोमोदेवेषुहूयते । वहवायोनियुतोयाह्यस्मयुर्जुषाणोयाह्यस्मयुः+ ॥ आनोनियुद्भिःशतिनीभिरध्वरंसहस्रिणीभिरुपयाहिवीतयेवायोहव्यानिवीतये । तवायंभागऽऋत्वियःसरश्मिःसूर्येसचा । अध्वर्युभिर्भरमाणाऽअयंसततवायोशुक्राऽअयंसत ॥ आवांरथोनियुत्वान्वक्षदवसेभिप्रयांसिसुधितानिवीतयेवायोहव्यानिवीतये । पिबतंमध्वोऽअंधसःपूर्वपेयंहिवांहितं । वायवाचंद्रेणराधसागतमिंद्रश्चराधसागतं ॥ आवांधियोववृत्युरध्वराँऽउपेममिंदुंमर्मृजंतवाजिनमाशुमत्यंनवाजिनं । तेषांपिबतमस्मयूऽआनोगंतमिहोत्या । इंद्रवायूसुतानामाद्रिभिर्युवंमदायवाजदायुवं+ ॥ २४ ॥ इमेवांसोमाऽअप्स्वासुताऽइहाध्वर्युभिर्भरमाणाऽअयंसततवायोशुक्राऽअयंसत । एतेवामभ्यसृक्षततिरःपवित्रमाशवः। युवायवोतिरोमाण्यव्ययासोमासोऽअत्यव्यया ॥ अतिवायोससतोयाहिशश्वंतोयत्रग्रावावदंतितत्रगच्छतंगृहमिंद्रश्चगच्छतं। विसूनृताददृशेरीयंतेघृतमापूर्णयानियुतायाथोऽअध्वरमिंद्रश्चयाथोऽअध्वरं+ ॥ अत्राहतद्वहेथेमध्वऽआहुतिंयमश्वत्थमुपतिष्ठंतजायवोस्मेतेसंतुजायवः। साकंगावःसुवतेपच्यतेयवोनतेवायऽउपदस्यंतिधेनवोनापदस्यंतिधेनवः ॥ इमेयेतेसुवायोबाह्वोजसोंतर्नदीतेपतयंत्युक्षणोमहिव्राधंतऽउक्षणः । धन्वंश्चिद्येऽअनाशवोजीरा

श्चिदगिरौकसः । सूर्यस्येवरश्मयोदुर्नियंतवोहस्तयोर्दुर्नियंतवः ॥ २५ ॥ (१।२०।१३) प्रसुज्येष्ठंनिचिराभ्यांबृहन्नमो
हव्यंमतिंभरतामृळयद्भ्यांस्वादिष्ठंमृळयद्भ्यां । तासम्राजाघृतासुतीयज्ञेयज्ञऽउपस्तुता । अथैनोःक्षत्रंनकुतश्चनाधृषेदेव
त्वंनूचिदाधृषे ॥ अदर्शिगातुरुरवेवरीयसीपंथाऽऋतस्यसमयंस्तरश्मिभिश्चक्षुर्भगस्यरश्मिभिः । द्युक्षंमित्रस्यसादनमर्य
म्णोवरुणस्यच । अथादधातेबृहदुक्थ्यं१वयंऽउपस्तुत्यंबृहद्वयः ॥ ज्योतिष्मतीमदितिंधारयत्क्षितिंस्वर्वतीमासचेते
दिवेदिवेजागृवांसादिवेदिवे । ज्योतिष्मत्क्षत्रमाशातेऽआदित्यादानुनस्पती । मित्रस्तयोर्वरुणोयातयज्जनोर्यमायात
यज्जनः ॥ अयंमित्रायवरुणायशंतमःसोमोभूत्ववपानेष्वाभगोदेवोदेवेष्वाभगः । तंदेवासोजुषेरतविश्वेऽअद्यसजोष
सः । तथाराजानाकरथोयदीमहऽऋतावानायदीमहे ॥ योमित्रायवरुणायाविधज्जनोनर्वाणंतंपरिपातोऽअंहसोदा
श्वांसंमर्तमंहसः । तमर्यमाभिरक्षत्यृजूयंतमनुव्रतं । उक्थैर्यऽएनोःपरिभूषतिव्रतंस्तोमैराभूषतिव्रतं+ ॥ नमोदिवेबृ
हतेरोदसीभ्यांमित्रायवोचंवरुणायमीळ्हुषेसुमृळीकायमीळ्हुषे । इंद्रमग्निमुपस्तुहिद्युक्षमर्यमणंभगं । ज्योग्जीवंतःप्रज

(१।२०।१३) प्रसुज्येष्ठमितिसप्तर्चस्यसूक्तस्यपरुच्छेपोमित्रावरुणौनमोदिवइत्यस्यारोदसीमित्रावरुणेंद्राग्न्यर्यमभगसोमादेवताःऊतीदेवानामित्यस्यादेवमरुदग्निमित्रवरुणमघवंतोदेवताअत्यष्टिःअंत्यात्रिष्टुप् ।

यां॑सचेमहि॒सोमं॑स्यो॒तीसं॑चेमहि ॥ ऊ॒तीदे॒वानां॑व॒यमिं॑द्रवं॑तोमं॑सी॒महि॒स्वयं॑शसोम॒रुद्भिः॑ । अ॒ग्निर्मि॒त्रोवरु॑ण॒ःशर्मं॑यं॑स॒न्त दं॑श्यामम॒घवा॑नोव॒यंच॑ ॥ २६ ॥ इतिद्वितीयाष्टकेप्रथमोऽध्यायः ॥ १ ॥ ॥ ॥ ॥

द्वितीयाष्टके सूक्तानि ११९ ऋचः ११५७

नवमाध्याये वर्गाः २६ सूक्तानि १५ ऋचः १३७ ॥ त्यागः ॥ रुद्रमरुद्भ्यइदं. उषासानक्ताभ्यामिदं. विश्वेभ्योदेवेभ्यइदं. अश्विभ्यामिदं. विश्वेभ्योदेवेभ्यइदं. मित्रावरुणसिंधुभ्यइदं. विश्वेभ्योदेवेभ्यइदं. २ मित्रावरुणाभ्यामिदं. २ विश्वेभ्योदेवेभ्यइदं. ५ उषसइदं. २६ स्वनयायेदं. ७ भावयव्यायेदं. ५ रोमशायेदं. भावयव्यायेदं. अग्नयइदं. १९ इंद्रायेदं. ५ इंदवइदं. इंद्रायेदं. २७ इंद्रापर्वतेंद्रेभ्यइदं. इंद्रायेदं. ७ वायवइदं. ९ इंद्रवायुभ्यामिदं. ५ वायवइदं. मित्रावरुणाभ्यामिदं. ९ सूर्यरोदसीमित्रावरुणरुद्रेंद्राग्न्यर्यमभगसोमेभ्यइदं. देवेंद्रमरुदग्निमित्रावरुणेभ्यइदं. १ ॥ इतिद्वितीयेप्रथमः ॥ १ ॥

सुषुमतृचमतिशाक्वरंप्रप्रचतुष्कंपौष्णमंस्तुश्रौषळेकादशंवैश्वदेवीमैत्रावरुण्याश्विन्यस्तिस्रंऐंद्र्याग्नेयीमारुत्यैंद्राग्नीबार्हस्पत्यावैश्वदेव्यंत्यात्रिष्टुप्पंचमीबृहतीवैश्वदेवंमेतदेवमन्यासामपिसूक्तप्रयोगेवैश्वदेवत्वंसूक्तभेदप्रयोगेयल्लिंगंसादेवतावेदिषदेसप्तोनादीर्घतमाऔचथ्यआग्नेयंतुद्वित्रिष्टुबंतंतुत्रिष्टुब्दशमीवावाळित्थासमिद्धआप्रियंआनुष्टुभमंत्यैंद्रीप्रतव्यसीमष्टावाग्नेयंतुंतत्रिष्टुबंतंमेतिप्रसप्तजागतंतंपृच्छतंपंचांत्यात्रिष्टुप्त्रिमूर्धानंकथामथीं

न्महःसवैराजंपुरुतृचमौष्णिहंमित्रंनवमैत्रावरुणंहिजागतंमै[illegible]यजामहेचतुष्कंविष्णोःषड्वैष्णवंहि
प्रवोजागतंत्वैंद्रश्चाद्यस्तृचोंभवपंचावोधिषळाश्विनंत्वंत्येत्रिष्टुभौ ॥ १ ॥ ॥ ॥

हरिःओम् (१।२०।४) सुषुमायातमद्रिभिर्गोश्रीतामत्सराऽइमेसोमासोमत्सराऽइमे। आराजानादिविस्पृशास्मत्रागं
तमुपनः। इमेवांमित्रावरुणागवाशिरःसोमाःशुक्रागवाशिरः ॥ इमऽआयातमिंदवःसोमासोदध्याशिरःसुतासोदध्या
शिरः। उतवामुषसोबुधिसाकंसूर्यस्यरश्मिभिः। सुतोमित्रायवरुणायपीतयेचारुर्ऋतायपीतये ॥ तांवांधेनुंनवासरीमंशुं
दुहंत्यद्रिभिःसोमंदुहंत्यद्रिभिः। अस्मत्रागंतमुपनोर्वाचासोमपीतये । अयंवांमित्रावरुणानृभिःसुतःसोमऽआपीतये
सुतः+॥ १ ॥ (१।२०।५) प्रप्रंपूष्णस्तुविजातस्यशस्यतेमहित्वमस्यतवसोनतंदतेस्तोत्रमस्यनतंदते। अर्चामिसुम्नयन्नहमं
त्यूतिंमयोभुवं। विश्वस्ययोमनऽआयुयुवेमखोदेवऽआयुयुवेमखः+ ॥ प्रहित्वापूषन्नजिरंनयामनिस्तोमेभिःकृण्वऽऋ
णवोयथामृधऽउष्ट्रोनपीपरोमृधः। हुवेयत्त्वामयोभुवंदेवंसख्यायमर्त्यः। अस्माकमांगूषान्द्युम्निनस्कृधिवाजेषुद्युम्नि
नस्कृधि ॥ यस्यंतेपूषन्त्सख्येविपन्यवःक्रत्वाचित्संतोवसाबुभुज्रिरऽइतिक्रत्वाबुभुज्रिरे । तामनुत्वानवीयसींनियुतं
रायऽईमहे। अहेळमानऽउरुशंससरीभववाजेवाजेसरीभव ॥ अस्याऽऊषुणऽउपसातयेभुवोहेळमानोररिवाँऽअंजा ॥१०॥

(१।२०।४) सुषुमेतितृचस्यसूक्तस्यपरुच्छेपोमित्रावरुणावतिशक्करी। (१।२०।५) प्रप्रपूष्णइतिचतुर्ऋचस्यसूक्तस्यपरुच्छेपःपूषात्यष्टिः।

श्वश्रवस्युतामंजाश्व । ओषुत्वाववृतीमहिस्तोमेभिर्दस्मसाधुभिः । नहित्वापूषन्नतिमन्यऽआघृणेनतेसख्यमपह्नुवे+ ॥
॥ २ ॥ (१।२०।६) अस्तुश्रौषट्पुरोऽअग्निंधियादधऽआनुतच्छर्धोदिव्यंवृणीमहऽइंद्रवायूवृणीमहे । यद्धक्राणा
विवस्वतिनाभासंदायिनव्यसी । अधप्रसूनऽउपयंतुधीतयोदेवाँऽअच्छानधीतयः ॥ यद्धत्यन्मित्रावरुणावृतादध्या
ददाथेऽअनृतंस्वेनमन्युनादक्षस्यस्वेनमन्युना । युवोरित्थाधिसद्मस्वपश्यामहिरण्ययं । धीभिश्चनमनसास्वेभिरक्षभिः
सोमस्यस्वेभिरक्षभिः ॥ युवांस्तोमेभिर्देवयंतोऽअश्विनाश्रावयंतऽइवश्लोकमायवोयुवांहव्याभ्या३यवः । युवोर्विश्वा
ऽअधिश्रियःपृक्षश्चविश्ववेदसा । प्रुषायंतेवांपवयोहिरण्ययेरथेदस्राहिरण्यये ॥ अचेतिदस्राव्यु१नाकमृण्वथोयुंजते
वांरथयुजोदिविष्टिष्वध्वस्मानोदिविष्टिषु । अधिवांस्थामवंधुरेरथेदस्राहिरण्यये । पथेवयंतावनुशासतारजोंजसाशा
संतारजः ॥ शचीभिर्नःशचीवसूदिवानक्तंदशस्यतं । मावांरातिरुपदसत्कदाचनास्मद्रातिःकदाचन+ ॥ ३ ॥ वृषन्निं

(१।२०।६) अस्तुश्रौषळित्येकादशर्चस्यसूक्तस्यपरुच्छेपआद्यायाविश्वेदेवाःद्वितीयायामित्रावरुणौतृतीयादितिसृणामाश्विनौषष्ठयाइंद्रः सप्तम्याअग्निरष्टम्यामरुतोनवम्याइंद्राग्नीदशम्याबृहस्पतिरंत्यायाविश्वेदेवाअत्यष्टिःपंचमीबृहत्यंत्यात्रिष्टुप् । (वैश्वदेवमेतत्सूक्तं । अत्रप्रत्येकं देवताविभागस्त्वाकरएवपठितः । अनयैवदिशासर्वत्रापिवैश्वदेवसूक्तेदेवताविभागःकर्तव्यइतिहितदनुज्ञा । यथाह—एवमन्यासामपिसूक्तप्रयोगेवैश्वदेवत्वं सूक्तभेदप्रयोगेतुयल्लिङ्गंसादेवतेति) ।

द्वृषपाणासऽइंदवऽइमेसुताऽअद्रिषुतासऽउद्भिदस्तुभ्यंसुतासऽउद्भिदः । तेत्वांमंदंतुदावनेंमहेचित्रायराधंसे । गी
र्भिर्गिर्वाहः स्तवमानऽआगंहिसुमृळीकोनऽआगंहि ॥ ओषूणोंऽअग्नेश्शृणुहित्वमींळितोदेवेभ्योंब्रवसियज्ञियेंभ्योराज
भ्योयज्ञियेंभ्यः । यद्धत्यामंगिंरोभ्योधेनुंदेंवाऽअदंत्तन । वितांदुंह्रेऽअर्यमाकर्तरीसचाँऽएषतांवेंदमेसचा ॥ मोषुवों
ऽअस्मदभितानिपौंस्यासनांभूवन्द्युम्नानिमोतजारिषुरस्मत्पुरोतजारिषुः । यद्वंश्चित्रंयुगेयुंगेनव्यंघोषादमर्त्यं । अस्मा
सुतन्मंरुतोयच्चंदुष्टरंदिधृतायच्चंदुष्टरं ॥ दध्यङ्हंमेजनुषंपूर्वोंऽअंगिंराःप्रियमेंधःकण्वोऽअत्रिर्मनुंर्विदुस्तेमेपूर्वेमनुर्विं
दुः । तेषांदेवेष्वायंतिरस्माकंतेषुनाभंयः । तेषांपदेनमह्यानंमेगिरेंद्राग्नीऽआनंमेगिरा + ॥ होतांयक्षद्वनिनोंवंतवार्यं
बृहस्पतिर्यजतिवेनऽउक्षाभिंःपुरुवारेंभिरुक्षभिंः । जगृभ्मादूरऽआदिशंश्लोकमद्रेरधत्मनां । अधांरयदररिंदानिसुक्र
तुःपुरूसद्मानिसुक्रतुंः ॥ येदेंवासोदिव्येकांदशस्थपृथिव्यामध्येकांदशस्थ । अप्सुक्षितोंमहिनैकांदशस्थतेदेंवासोयज्ञ
मिमंजुंषध्वं ॥ ४ ॥ (१।२१।१) वेदिषदेंप्रियधांमायसुद्युतेंधासिमिंवप्रभंरायोनिंमग्नयें । वस्त्रेणेववासयामन्मंना
शुचिंज्योतीरंथंशुक्रवंर्णंतमोहनं ॥ अभिद्विजन्मांत्रिवृदन्नंमृज्यतेसंवत्सरेवांवृधेजग्धमीपुनंः । अन्यस्यासाजिह्वयाजे
न्योवृषान्यं१न्येनंवनिनोंमृष्टवारणः + ॥ कृष्णप्रुतौंवेविजेऽअंस्यसक्षितांउभातंरेतेऽअभिमातराशिशुं । प्राचाजिह्वं

(१।२१।१) वेदिषदइतित्रयोदशर्चस्यसूक्तस्यऔचथ्योदीर्घतमाअग्निर्जगतीअंत्येद्वेत्रिष्टुभौदशमीत्रिष्टुब्वा ।

Digitization by eGangotri. Funding:MHRD-Delhi

ध्वसयंतंतृषुच्युतमासाच्यंकुपयंवर्धनंपितुः+ ॥ मुमुक्ष्वो३मनवेमानवस्यतेरघुद्रुवःकृष्णसीतासऽऊजुवः । असमनाऽ
अजिरासोरघुष्यदोवातजूताउपयुज्यंतऽआशवः ॥ आदस्यतेध्वसयंतोवृथेरतेकृष्णमभ्वंमहिवर्पःकरिक्रतः । यत्सीं
महीमवनिंप्राभिमर्मृशदभिश्वसन्स्तनयन्नेतिनानदत् ॥ ५ ॥ भूषन्नयोधिबभ्रूषुनम्नतेवृषेवपत्नीरभ्येतिरोरुवत् ।
ओजायमानस्तन्वश्चशुंभतेभीमोनशृंगादविधावदुर्गृभिः ॥ ससंस्तिरोविष्टिरःसंगृभायतिजानन्नेवजानतीर्नित्यऽआ
शये । पुनर्वर्धंतेऽअपियंतिदेव्यमन्यद्वर्पःपित्रोःकृण्वतेसचा ॥ तमग्रुवःकेशिनीःसंहिरेभिरऽऊर्ध्वास्तस्थुर्मम्रुषीःप्राय
वेपुनः । तासांजरांप्रमुंचन्नेतिनानददसुंपरंजनयंजीवमस्तृतं ॥ अधीवासंपरिमातूरिहन्नहतुविग्रेभिःसत्वभिर्यातिवि
ज्रयः । वयोदधत्पद्वतेरेरिहत्सदानुश्येनीसचतेवर्तनीरह ॥ अस्माकमग्नेमघवत्सुदीदिह्यधश्वसीवान्वृषभोदमूनाः ।
अवास्याशिशुमतीरदीदेर्वर्मेवयुत्सुपरिजर्भुराणः ॥ ६ ॥ इदमग्नेसुधितंदुर्धितादधिप्रियादुचिन्मन्मनःप्रेयोऽअस्तुते ।
यत्तेशुक्रंतन्वो३रोचतेशुचितेनास्मभ्यंवनसेरत्नमात्वं+ ॥ रथायनावमुतनोगृहायनित्यारित्रांपद्वतीँऽरास्यग्ने । अस्मा
कंवीराऽउतनोमघोनोजनाँश्चयापारयाच्छर्मयाच ॥ अभीनोऽअग्नऽउक्थमिज्जुगुर्याद्यावाक्षामासिंधवश्चस्वगूर्ताः ।
गव्यंयव्यंयंतोदीर्घाहेषंवरमरुण्योवरंत ॥ ७ ॥ (१।२१।२) बळित्थातद्वपुषेधायिदर्शतंदेवस्यभर्गःसहसोयतोजनि ।

(१।२१।२) बळित्थेतित्रयोदशर्चस्यसूक्तस्यदीर्घतमाअग्निर्जगतीअंत्येद्वेत्रिष्टुभौ ।

Digitization by eGangotri. Funding MoU-Delhi

यदीमुपह्वरंतेसाधंतेमतिर्ऋतस्यधेनांऽअनयंतसस्रुतः ॥ पृक्षोवपुःपितुमान्नित्यऽआशयेद्वितीयमासप्तशिवासुमातृषु ।
तृतीयमस्यवृषभस्यदोहसेदशप्रमतिंजनयंतयोषणः ॥ निर्यदींबुध्नान्महिषस्यवर्पसऽईशानासःशवसाक्रंतसूरयः । यदी
मनुप्रदिवोमध्वऽआधवेगुहासंतंमातरिश्वामथायति ॥ प्रयत्पितुःपरमान्नीयतेपर्यापृक्षुधोवीरुधोदंसुरोहति । उभाय
दस्यजनुषंयदिन्वतऽआदिद्यविष्ठोऽअभवद्घृणाशुचिः ॥ आदिन्मातॄराविशद्यास्वाशुचिरहिंस्यमानऽउर्वियाविवावृ
धे । अनुयत्पूर्वाऽअरुहत्सनाजुवोनिनव्यसीष्ववरासुधावते ॥ ८ ॥ आदिद्धोतारंवृणतेदिविष्टिषुभगमिवपपृचाना
संऽऋंजते । देवान्यत्क्रत्वामज्मनापुरुष्टुतोमर्तंशंसंविश्वधावेतिधायसे ॥ वियदस्थाद्यजतोवातचोदितोह्वारोनवक्वाज
रणाऽअनाकृतः । तस्यपत्मन्दक्षुषःकृष्णजंहसःशुचिजन्मनोरजऽआव्यध्वनः ॥ रथोनयातःशिक्वभिःकृतोद्यामंगेभि
ररुषेभिरीयते । आदस्यतेकृष्णासोदक्षिसूरयःशूरस्येवत्वेषथादीषतेवयः ॥ त्वयाह्यग्नेवरुणोधृतव्रतोमित्रःशाशद्रेऽअ
र्यमासुदानवः । यत्सीमनुक्रतुनाविश्वथाविभुररान्ननेमिःपरिभूरजायथाः ॥ त्वमग्नेशशमानायसुन्वतेरत्नंयविष्ठदेव
तातिमिन्वसि । तंत्वानुनव्यंसहसोयुवन्वयंभगंनकारेमहिरत्नधीमहि ॥ अस्मेरयिंनस्वर्थंदमूनसंभगंदक्षंनपपृचासिध ॥१२॥
र्णसिं । रश्मीँऽरिवयोयमतिजन्मनीऽउभेदेवानांशंसमृतऽआचसुक्रतुः ॥ उतनःसुद्योत्माजीराश्वोहोतामंद्रःशृणवच्चं
द्ररथः । सनोनेषन्नेषतमैरमूरोग्निर्वामंसुवितंवस्योऽअच्छ ॥ अस्ताव्यग्निःशिमीवद्भिरर्कैःसाम्राज्यायप्रतरंदधानः ।

अमीचयेमघवानोवयंचमिहंनसूरोऽअतिनिष्टतन्युः ॥ ९ ॥ (१।२१।३) समिद्धोऽअग्नऽआवहदेवाँऽअद्ययतस्रुचे ।
तंतुंतनुष्वपूर्व्यंसुतसोमायदाशुषे ॥ घृतवंतमुपमासिमधुमंतंतनूनपात् । यज्ञंविप्रस्यमावतःशशमानस्यदाशुषः ॥
शुचिःपावकोऽअद्भुतोमध्वायज्ञंमिमिक्षति । नराशंसस्त्रिरादिवोदेवोदेवेषुयज्ञियः ॥ ईळितोऽअग्नऽआवहेंद्रंचित्रमिह
प्रियं । इयंहित्वामतिर्ममाच्छासुजिह्ववच्यते ॥ स्तृणानासोयतस्रुचोबर्हिर्यज्ञेस्वध्वरे । वृंजेदेवव्यचस्तममिंद्रायशर्मस
प्रथः ॥ विश्रयंतामृतावृधःप्रयैदेवेभ्योमहीः । पावकासःपरुस्पृहोद्वारोदेवीरसश्चतः ॥ १० ॥ आभंदमानेऽउपाके
नक्तोषासासुपेशसा । यह्वीऽऋतस्यमातरासीदतांबर्हिरासुमत्+ ॥ मंद्रजिह्वाजुगुर्वणीहोतारादैव्याकवी । यज्ञंनोय
क्षतामिमंसिध्रमद्यदिविस्पृशं ॥ शुचिर्देवेष्वर्पिताहोत्रामरुत्सुभारती । इळासरस्वतीमहीबर्हिःसीदंतुयज्ञियाः ॥ त
न्नस्तुरीपमद्भुतंपुरुवारंपुरुत्मना । त्वष्टापोषायविष्यतुरायेनाभानोऽअस्मयुः+ ॥ अवसृजन्नुपत्मनादेवान्यक्षिवनस्प
ते । अग्निर्हव्यासुषूदतिदेवोदेवेषुमेधिरः ॥ पूषण्वतेमरुत्वतेविश्वदेवायवायवे । स्वाहागायत्रवेपसेहव्यमिंद्रायकर्त
न ॥ स्वाहाकृतान्यागह्युपहव्यानिवीतये । इंद्रागहिश्रुधीहवंत्वांहवंतेऽअध्वरे+ ॥ ११ ॥ (१।२१।४) प्रतव्यंसीं

(१।२१।३) समिद्धोअग्नइतित्रयोदशर्चस्यसूक्तस्यदीर्घतमाऋषिःइध्मस्तनूनपान्नराशंसइळोबर्हिर्देवीर्द्वारउषासानक्तादैव्यौहोतारौसरस्वती
ळाभारत्यस्त्वष्टावनस्पतिःस्वाहाकृतयइतिक्रमेणदेवताःअनुष्टुप् । (१।२१।४) प्रतव्यसीमित्यष्टर्चस्यसूक्तस्यदीर्घतमाअग्निर्जगतीअंत्यात्रिष्टुप् ।

नव्यसींधीतिमग्नयेवाचोमतिंसहसःसूनवेभरे । अपांनपाद्योवसुभिःसहप्रियोहोतापृथिव्यांन्यसीददृत्वियः ॥ सजाय
मानःपरमेव्योमन्याविरग्निरभवन्मातरिश्वने । अस्यक्रत्वासमिधानस्यमज्मनाप्रद्यावाशोचिःपृथिवीऽअरोचयत् ॥
अस्यत्वेषाऽअजराऽअस्यभानवःसुसंदृशःसुप्रतीकस्यसुद्युतः । भात्वक्षसोऽअत्यक्तुर्नसिंधवोग्नेरेजंतेऽअससंतोऽअज
राः ॥ यमेरिरेभृगवोविश्ववेदसंनाभापृथिव्याभुवनस्यमज्मना । अग्निंतंगीर्भिर्हिनुहिस्वऽआदमेयऽएकोवस्वोवरुणो
नराजति ॥ नयोवरायमरुतामिवस्वनःसेनेवसृष्टादिव्यायथाशनिः । अग्निर्जंभैस्तिगितैरत्तिभर्वतियोधोनशत्रून्त्सव
नान्यृंजते ॥ कुविन्नोऽअग्निरुचथस्यवीरसद्वसुष्कुविद्वसुभिःकाममावरत् । चोदःकुवित्तुतुज्यात्सातयेधियःशुचिप्रती
कंतमयाधियागृणे ॥ घृतप्रतीकंवऽऋतस्यधूर्षदमग्निंमित्रंनसमिधानऽऋंजते । इंधानोऽअक्रोविदथेषुदीद्यच्छुक्रवर्णा
मुदुनोयंसतेधियं ॥ अप्रयुच्छन्नप्रयुच्छद्भिरग्नेशिवेभिर्नःपायुभिःपाहिशग्मैः । अदब्धेभिरदृपितेभिरिष्टेनिमिषद्भिः
परिपाहिनोजाः+ ॥ १२ ॥ (१।२१।५) एतिप्रहोताव्रतमस्यमाययोर्ध्वांदधानःशुचिपेशसंधियं । अभिस्रुचःक्रम
तेदक्षिणावृतोयाऽअस्यधामप्रथमंहनिंसते ॥ अभीमृतस्यदोहनाऽअनूषतयोनौदेवस्यसदनेपरीवृताः । अपामुपस्थेवि
भृतोयदावसदधस्वधाऽअधयद्याभिरीयते ॥ युयूषतःसवयसातदिद्वपुःसमानमर्थंवितरित्रतामिथः । आदींभगोन ॥१३॥

(१।२१।५) एतीतिसप्तर्चस्यसूक्तस्यदीर्घतमाअग्निर्जगती ।

हव्यःसमस्मदावोह्वुर्नरश्मीन्त्समयंस्तसारथिः ॥ यमींद्वासवयसासपर्यतःसमानेयोनामिथुनासमोकसा । दिवानन
क्तंपलितोयुवाजनिपुरूचरन्नजरोमानुषायुगा+ ॥ तमींहिन्वंतिधीतयोदशव्रिशोदेवंमर्तासऽऊतयेहवामहे । धनोर
धिंप्रवतऽआसऽऋण्वत्यभिव्रजद्भिर्वयुनानवाधित ॥ त्वंह्यग्नेदिव्यस्यराजसित्वंपार्थिवस्यपशुपाऽइवत्मना । एनीतऽ
एतेबृहतीऽअभिश्रियाहिरण्ययीवक्करीबर्हिराशाते ॥ अग्नेजुषस्वप्रतिहर्यतद्वचोमंद्रस्वधावऽऋतजातसुक्रतो । योवि
श्वतःप्रत्यङ्ङसिदर्शतोरण्वःसंदृष्टौपितुमाँऽइववक्षयः ॥ १३ ॥ (१।२१।६) तंपृच्छतासजगामासवेदसाचिकित्वाँईय
तेसान्वीयते । तस्मिन्त्संतिप्रशिषस्तस्मिन्निष्टयःसवाजस्यशवसःशुष्मिणस्पतिः ॥ तमित्पृच्छंतिनसिमोविपृच्छतिस्वे
नेवधीरोमनसायदग्रभीत् । नमृष्यतेप्रथमंनापरंवचोस्यक्रत्वासचतेऽअप्रदृपितः ॥ तमिद्गच्छंतिजुह्व१स्तमर्वतीर्वि
श्वान्येकःशृणवद्वचांसिमे । पुरुप्रैषस्ततुरिर्यज्ञसाधनोच्छिद्रोतिःशिशुरादत्तसंरभः ॥ उपस्थायंचरतियत्समारतसद्यो
जातस्तत्सारयुज्येभिः । अभिश्वांतंमृशतेनांद्येमुदेयदीगच्छंत्युशतीरपिष्ठितं+ ॥ सईंमृगोऽअप्योवनर्गुरुपत्वच्युपम
स्यांनिधायि । व्यब्रवीद्वयुनामर्त्येभ्योग्निर्विद्वाँऽऋतचिद्धिसत्यः+ ॥ १४ ॥ (१।२१।७) त्रिमूर्धानंसप्तरश्मिंगृणी
षेनूनमग्निंपित्रोरुपस्थे । निषत्तमस्यचरतोध्रुवस्यविश्वादिवोरोचनापप्रिवांसं ॥ उक्षामहाँऽअभिववक्षऽएनेऽअजरस्त

(१।२१।६) तंपृच्छतेतिसप्तर्चस्यसूक्तस्यदीर्घतमाअग्निर्जगतीअंत्यात्रिष्टुप् ।(१।२१।७)त्रिमूर्धानमितिपंचर्चस्यसूक्तस्यदीर्घतमाअग्निस्त्रिष्टुप् ।

स्थावि॒तऽऊ॑तिर्ऋ॒ष्वः । उ॒र्व्याःप॒दोनिद॑धाति॒सानौ॑रि॒हंत्यूधो॑ऽअरु॒षासो॑ऽअस्य ॥ स॒मा॒नंव॒त्सम॒भिसं॒चरं॑ती॒विष्व॑क्धे॒
नूविच॑रतःसु॒मेके॑ । अ॒न॒प॒वृ॒ज्याँऽअध्व॑नो॒मिमा॑ने॒विश्वा॒न्केता॒ँऽअधि॑म॒होदधा॑ने ॥ धीरा॑सःप॒दंक॒वयो॑नयंति॒नाना॑हृ॒दा
रक्ष॑माणाऽअजु॒र्यं॑ । सिषा॑संत॒ःपर्य॑पश्यंत॒सिंधु॑मा॒विरे॑भ्योऽअभव॒त्सूर्यो॒नॄ॒न्+ ॥ दि॒दृ॒क्षेण्य॒ःपरि॒काष्ठा॑सु॒जेन्य॑ऽई॒ळेन्यो॑ ॥१४॥
म॒होऽअभी॑यजी॒वसे॑ । पु॒रु॒त्रायदभ॑व॒त्सूर॑है॑भ्यो॒गर्भे॑भ्योम॒घवा॑वि॒श्वद॑र्शतः ॥१५॥ (१।२१।८) क॒थाते॑ऽअग्ने॑शु॒चयं॑तऽआ॒
योर्द॑दा॒शुर्वाजे॑भिराशुषा॒णाः । उ॒भेयत्तो॒केतन॑ये॒दधा॑नाऽऋ॒तस्य॒साम॑न्र॒णयं॑तदे॒वाः+ ॥ बोधा॑मेऽअ॒स्यवच॑सोयविष्ठ॒मं
हि॑ष्ठस्य॒प्रभृ॑तस्यस्वधावः । पीय॑तित्वो॒ऽअनु॑त्वोगृणातिवं॒दारु॑स्तेत॒न्वं॑वंदेऽअग्ने ॥ येपा॒यवो॑मामते॒यंते॑ऽअग्ने॒पश्यं॑तोऽअं॒
धंदु॑रि॒तादर॑क्षन् । र॒रक्ष॒तान्त्सु॒कृतो॑वि॒श्ववे॑दा॒दिप्सं॑त॒ऽइद्रि॒पवो॒नाह॑देभुः ॥ योनो॑ऽअग्ने॒ऽअर॑रिवाँऽअघा॒युर॑राती॒वा
म॒र्चय॑तिद्व॒येन॑ । मंत्रो॑गु॒रुःपुन॑रस्तु॒सोऽअ॑स्मा॒ऽअनु॑मृक्षीष्टत॒न्वं॑दुरु॒क्तैः+ ॥ उ॒तवा॒यःस॑हस्यप्रवि॒द्वान्मर्तो॒मर्तं॑म॒र्चय॑ति
द्व॒येन॑ । अत॑ःपाहिस्तवमानस्तु॒वंत॒मग्ने॒माकि॑र्नो॒दुरि॒ताय॑धायीः ॥ १६ ॥ (१।२१।९) म॒थीद्यदीं॑वि॒ष्टोमा॑त॒रिश्वा॒हो
ता॑रंवि॒श्वाप्सुं॑वि॒श्वदे॑व्यं । नियंद॒धुर्म॑नु॒ष्या॑सुवि॒क्षुस्व१॒र्णचि॒त्रंव॑पुषेवि॒भावं॑ ॥ द॒दा॒नमिन्नद॑दभंत॒मन्मा॒ग्निर्व॑रू॒थंमम॒त ॥१४॥
स्यं॑चाकन् । जु॒षंत॒विश्वा॑न्यस्य॒कर्मोप॑स्तुतिं॒भर॑माणस्यका॒रोः+ ॥ नित्यं॑चि॒न्नुयंसद॑नेजगृ॒भ्रेप्रश॑स्तिभि॒र्दधि॒रेय॒ज्ञियां॑

(१।२१।८) कथातइतिपंचर्चस्यसूक्तस्यदीर्घतमाअग्निस्त्रिष्टुप् । (१।२१।९) मथीद्यदीमितिपंचर्चस्यसूक्तस्यदीर्घतमाअग्निस्त्रिष्टुप् ।

सः । प्रसूनयंतगृभयंतऽइष्टावश्वासोनरथ्योरारहाणाः ॥ पुरूणिदस्मोनिरिणातिजंभैराद्रोचतेवनऽआविभावा ।
आदस्यवातोऽअनुवातिशोचिरस्तुर्नशर्यामसनामनुद्यून् ॥ नयंरिपवोनरिषण्यवोगर्भेसंतंरेषणारेषयंति । अंधाऽअ
पश्यानदभन्नभिख्यानित्यासऽईंप्रेतारोऽअरक्षन् ॥ १७ ॥ (१।२१।१०) महःसरायऽएषतेपतिर्दन्निनऽइनस्यव
सुनःपदऽआ । उपध्रजंतमद्रयोविधन्नित् ॥ सयोवृषानरांनरोदस्योःश्रवोभिरस्तिजीवपीतसर्गः । प्रयःसस्राणःशि
श्रीतयोनौ ॥ आयःपुरंनार्मिणीमदीदेदत्यःकविर्नभन्यो३नार्वा । सूरोनरुरुक्वान्छतात्मा ॥ अभिद्विजन्मात्रीरोच
नानिविश्वारजांसिशुशुचानोऽअस्थात् । होतायजिष्ठोऽअपांसधस्थे ॥ अयंसहोतायोद्विजन्माविश्वादधेवार्याणिश्रव
स्या । मर्तोयोऽअस्मैसुतुकोददाश ॥ १८ ॥ (१।२१।११) पुरुत्वादाश्वान्वोचेरिरग्नेतवस्विदा । तोदस्येवशरण
ऽआमहस्य ॥ व्यनिनऽस्यधनिनःप्रहोषेचिदररुषः । कदाचनप्रजिगतोऽअदेवयोः ॥ सचंद्रोविप्रमर्त्योमहोव्राधन्त
मोदिवि । प्रप्रेत्तेऽअग्नेवनुषःस्याम ॥१९॥ (१।२१।१२) मित्रंनयंशिम्यागोषुगव्यवःस्वाध्योविदथेऽअप्सुजीजनन् ।
अरेजेतांरोदसीपाजसागिराप्रतिप्रियंयजतंजनुषामवः ॥ यद्धत्यद्वांपुरुमीढ्हस्यसोमिनःप्रमित्रासोनदधिरेस्वाभुवः ।

(१।२१।१०) महःसरायइतिपंचर्चस्यसूक्तस्यदीर्घतमाअग्निर्विराट् । (१।२१।११) पुरुत्वेतितृचस्यसूक्तस्यदीर्घतमाअग्निरुष्णिक् ।
(१।२१।१२) मित्रंनयमितिनवर्चस्यसूक्तस्यदीर्घतमामित्रावरुणा[illegible]जगती ।

अधक्रतुंविदतंगातुमर्चतऽउतश्रुतंवृषणापस्त्यावतः ॥ आवांभूषन्क्षितयोजन्मरोदस्योःप्रवाच्यंवृषणादक्षसेमहे ।
यदीमृतायभरथोयदर्वतेप्रहोत्रयाशिम्यावीथोऽअध्वरं+ ॥ प्रसाक्षितिरसुरयामहिप्रियऽऋतावानावृतमाघोषथोबृहत् ।
युवंदिवोबृहतोदक्षमाभुवंगांनधुर्युपयुंजाथेऽअपः+ ॥ महीऽअत्रमहिनावारमृण्वथोरेणवस्तुजऽआसद्मन्धेनवः । स्वरं
तिताऽउपरतातिसूर्यमानिम्रुचऽउषसस्तक्ववीरिव ॥ २० ॥ आवामृतायकेशिनीरनूषतमित्रयत्रवरुणगातुमर्चथः ।
अवत्मनासृजतंपिन्वतंधियोयुवंविप्रस्यमन्मनामिरज्यथः ॥ योवांयज्ञैःशशमानोहदाशतिकविर्होतायजतिमन्मसाध
नः । उपाहतंगच्छथोवीथोऽअध्वरमच्छागिरःसुमतिंगंतमस्मयू+ ॥ युवांयज्ञैःप्रथमागोभिरंजतऽऋतावानामनसोन
प्रयुक्तिषु । भरंतिवांमन्मनासंयतागिरोदृप्यतामनसारेवदाशाथे ॥ रेवद्वयोदधाथेरेवदाशाथेनरामायाभिरितऽऊ
तिमाहिनं । नवांद्यावोहभिर्नोतसिंधवोनदेवत्वंपणयोनानशुर्मघं+ ॥ २१ ॥ (१।२१।१३) युवंवस्त्राणिपीवसाव
साथेयुवोरच्छिद्रामंतवोहसर्गाः । अवातिरतमनृतानिविश्वऽऋतेनमित्रावरुणासचेथे ॥ एतच्चनत्वोविचिकेतदेषांस
त्योमंत्रःकविशस्तऽऋघावान् । त्रिरश्रिंहंतिचतुरश्रिरुग्रोदेवनिदोहप्रथमाऽअजूर्यन् ॥ अपादेतिप्रथमापद्वतीनांकस्त
द्वांमित्रावरुणाचिकेत । गर्भोभारंभरत्याचिदस्यऽऋतंपिपर्त्यनृतंनितारीत् ॥ प्रयंतमित्परिजारंकनीनांपश्यामसिनो

(१।२१।१३) युवंवस्त्राणीतिसप्तर्चस्यसूक्तस्यदीर्घतमामित्रावरुणौत्रिष्टुप् ।

प॑नि॒पद्य॑मानं । अनं॑वपृग्णा॒वित॑ता॒वसा॑नंप्रि॒यंमि॒त्रस्य॒वरु॑णस्य॒धाम॑ ॥ अ॒न॒श्वोजा॒तोऽअ॑नभी॒शुर॒र्वा॑कनि॑क्रदत्पतयदू॒र्ध्वसा॑नुः । अ॒चित्तं॒ब्रह्म॑जुजुषु॒र्युवा॑न॒ःप्रमि॒त्रेधाम॒वरु॑णेगृ॒णंत॑ः ॥ आधे॒नवो॑मामते॒यम॑वंतीर्ब्रह्म॒प्रियं॑पीपय॒न्त्सस्मि॒न्नूध॑न् । पि॒त्वोभि॑क्षेतव॒युना॑निवि॒द्वाना॒साविवा॑स॒न्नदि॑तिमुरुष्येत् ॥ आवां॑मित्रावरुणाह॒व्यजु॑ष्टिं॒नम॑सादेवा॒ववसा॑ववृत्यां । अ॒स्माकं॒ब्रह्म॒पृत॑नासुसह्या॒ऽअ॒स्माकं॑वृ॒ष्टिर्दि॒व्यासु॑पा॒रा+ ॥२२॥ (१।२१।१४) यजा॑महेवां॑म॒हःस॒जोषा॑ह॒व्येभि॑र्मित्रावरुणा॒नमो॑भिः । घृ॒तैर्घृ॑तस्नू॒ऽअध॒यद्वा॑म॒स्मेऽअ॑ध्व॒र्यवो॒न॒धीति॑भि॒र्भरं॑ति ॥ प्रस्तु॑ति॒र्वां॑धाम॒नप्रयु॑क्ति॒रया॑मिमित्रावरुणासुवृ॒क्तिः । अ॒नक्ति॒यद्वां॑वि॒दथे॑षु॒होता॑सु॒म्नंवां॑सू॒रिर्वृ॑षणा॒विय॑क्षन् ॥ पी॒पाय॑धे॒नुरदि॑तिर्ऋ॒ताय॒जना॑यमित्रावरुणाहवि॒र्दे । हि॒नोति॒यद्वां॑वि॒दथे॑सप॒र्यन्त्सरा॒तह॑व्यो॒मानु॑षो॒नहोता॑ ॥ उ॒तवां॑वि॒क्षुम॒द्यास्वंधो॒गाव॒ऽआप॑श्चपीपयंतदे॒वीः । उ॒तोनो॑ऽअ॒स्यपू॒र्व्यःपति॒र्दन्वी॒तंपा॒तंपय॑सऽउ॒स्रिया॑याः ॥ २३ ॥ (१।२१।१५) विष्णो॒र्नुकं॑वी॒र्या॑णि॒प्रवो॑चं॒यःपार्थि॑वानिविम॒मेरजां॑सि । योऽअस्क॑भाय॒दुत्त॑रंस॒धस्थं॑विचक्रमा॒णस्त्रे॒धोरु॑गा॒यः+ ॥ प्रतद्विष्णुः॑स्तवतेवी॒र्ये॑णमृ॒गोनभी॒मःकु॑च॒रोगि॑रि॒ष्ठाः । यस्यो॒रुषु॑त्रि॒षुवि॒क्रम॑णेष्वधिक्षि॒यंति॒भुव॑नानि॒विश्वा॑ ॥ प्रविष्ण॑वेशू॒षमे॑तु॒मन्म॑गिरि॒क्षित॑ऽउरुगा॒याय॒वृष्णे॑ ।

(१।२१।१४) यजामहइतिचतुर्ऋचस्यसूक्तस्यदीर्घतमामित्रावरुणौत्रिष्टुप् । (१।२१।१५) विष्णोर्नुकमितिषळर्चस्यसूक्तस्यदीर्घतमाविष्णुस्त्रिष्टुप् ।

यऽइदंदीर्घंप्रयतंसधस्थमेकोविममेत्रिभिरित्पदेभिः ॥ यस्यत्रीपूर्णामधुनापदान्यक्षीयमाणाःस्वधयामदंति । यऽउत्रि
धातुपृथिवीमुतद्यामेकोदाधारभुवनानिविश्वा ॥ तदस्यप्रियमभिपाथोऽअश्यांनरोयत्रदेवयवोमदंति । उरुक्रमस्यसहिबं
धुरित्थाविष्णोःपदेपरमेमध्वऽउत्सः ॥ तावांवास्तून्युश्मसिगमध्यैयत्रगावोभूरिशृंगाऽअयासः । अत्राहतदुरुगायस्य
वृष्णःपरमंपदमवभातिभूरि ॥ २४ ॥ (१।२१।१६) प्रवःपांतमंधसोधियायतेमहेशूरायविष्णवेचार्चत । यासानुनि
पर्वतानामदाभ्यामहस्तस्थतुरर्वतेवसाधुना ॥ त्वेषमित्थासमरणंशिमीवतोरिंद्राविष्णूसुतपावामुरुष्यति । यामर्त्या
यप्रतिधीयमानमित्कृशानोरस्तुरसनामुरुष्यथः ॥ ताऽईंवर्धंतिमह्यस्यपौंस्यंनिमातरानयतिरेतसेभुजे । दधातिपुत्रोव
रंपरंपितुर्नामतृतीयमधिरोचनेदिवः+ ॥ तत्तदिदस्यपौंस्यंगृणीमसीनस्यत्रातुरवृकस्यमीह्ळुषः । यःपार्थिवानित्रिभिरि
द्विगामभिरुरुक्रमिष्टोरुगायायजीवसे ॥ द्वेऽइदस्यक्रमणेस्वर्दृशोभिख्यायमर्त्योभुरण्यति । तृतीयमस्यनकिरादधर्ष
तिवयश्चनपतयंतःपतत्रिणः ॥ चतुर्भिःसाकंनवतिंचनामभिश्चक्रंनवृत्तंव्यतीँऽरवीविपत् । बृहच्छरीरोविमिमानऽऋक्व
भिर्युवाकुमारःप्रत्येत्याहवं+ ॥ २५ ॥ (१।२१।१७) भवामित्रोनशेव्योघृतासुतिर्विभूतद्युम्नऽएवयाऽउसप्रथाः । ॥१६॥

(१।२१।१६) प्रवःपांतमितिषळर्चस्यसूक्तस्यदीर्घतमाआद्यानांतिसृणामिंद्राविष्णूततस्तिसृणांविष्णुर्जगती । (१।२१।१७) भवा
मित्रइतिपंचर्चस्यसूक्तस्यदीर्घतमाविष्णुर्जगती ।

अधातेविष्णोविदुषाचिदर्ध्यःस्तोमोयज्ञश्चराध्योहविष्मता ॥ यःपूर्व्यायवेधसेनवीयसेसुमज्जानयेविष्णवेददाशति ।
योजातमस्यमहतोमहिब्रवत्सेदुश्रवोभिर्युज्यँचिदभ्यसत् ॥ तमुस्तोतारःपूर्व्यंयथाविदऽऋतस्यगर्भंजनुषापिपर्तन ।
आस्यजानंतोनामचिद्विवक्तनमहस्तेविष्णोसुमतिंभजामहे ॥ तमस्यराजावरुणस्तमश्विनाक्रतुंसचंतमारुतस्यवेधसः ।
दाधारदक्षमुत्तममहर्विदंव्रजंचविष्णुःसखिवाँऽअपोर्णुते+ ॥ आयोविवायसचथायदैव्यऽइंद्रायविष्णुःसुकृतेसुकृत्तरः ।
वेधाऽअजिन्वत्रिषधस्थऽआर्यमृतस्यभागेयजमानमाभजत् ॥ २६ ॥ (१।२२।१) अबोध्यग्निर्ज्मऽउदेतिसूर्योव्यु१
षाश्चंद्रामह्यावोऽअर्चिषा । आयुंक्षातामश्विनायातवेरथंप्रासावीद्देवःसविताजगत्पृथक् ॥ यद्युंजाथेवृषणमश्विनारथं
घृतेननोमधुनाक्षत्रमुक्षतं । अस्माकंब्रह्मपृतनासुजिन्वतंवयंधनाशूरसाताभजेमहि ॥ अर्वाङ्त्रिचक्रोमधुवाहनोरथो
जीराश्वोऽअश्विनोर्यातुसुष्टुतः । त्रिवंधुरोमघवाविश्वसौभगःशंनऽआवक्षद्विपदेचतुष्पदे ॥ आनऽऊर्जंवहतमश्विना
युवंमधुमत्यानःकशयामिमिक्षतं । प्रायुस्तारिष्टंनीरपांसिमृक्षतंसेधतंद्वेषोभवतंसचाभुवा ॥ युवंहगर्भंजगतीषुधत्थोयु
वंविश्वेषुभुवनेष्वंतः । युवमग्निंचवृषणावपश्चवनस्पतीँऽरश्विनावैरयेथां ॥ युवंहस्थोभिषजाभेषजेभिरथोहस्थोरथ्या३
राथ्येभिः । अथोहक्षत्रमधिधत्थऽउग्रायोवांहविष्मान्मनसाददाश ॥२७॥ ॥ इतिद्वितीयाष्टकेद्वितीयोऽध्यायः॥२॥

(१।२२।१) अबोध्यग्निरितिषळृचस्यसूक्तस्यदीर्घतमाअश्विनौजगत्यंत्येद्वेत्रिष्टुभौ ।

दशमाध्याये वर्गाः २७ सूक्तानि २१ ऋचः १४२ ॥ त्यागः—मित्रावरुणाभ्यामिदं. २ पूष्णइदं. ४ विश्वेभ्योदेवेभ्यइदं. मित्रावरुणाभ्यामिदं. अश्विभ्यामिदं. ३ इंद्रायेदं. अग्नयइदं. मरुद्भ्यइदं. इंद्राग्निभ्यामिदं. बृहस्पतयइदं. विश्वेभ्योदेवेभ्यइदं. अग्नयइदं. २६ समिद्धायाग्नयइदं. तनूनपातइदं. नराशंसायेदं. इळायेदं. बर्हिषइदं. देवीभ्योद्वार्भ्यइदं. उषासानक्ताभ्यामिदं. देवीभ्यांहोतृभ्यांप्रचेतोभ्यामिदं. सरस्वतीळाभारतीभ्यइदं. त्वष्ट्रइदं. वनस्पतयइदं. स्वाहाकृतीभ्यइदं. इंद्रायेदं. अग्नयइदं. ४३ मित्रायेदं. मित्रावरुणाभ्यामिदं. १९ विष्णवइदं. ६ इंद्राविष्णुभ्यामिदं. ३ विष्णवइदं. ८ अश्विभ्यामिदं. ६ ॥ इतिद्वितीयेद्वितीयः ॥ २ ॥

वसूअंत्यानुष्टुप्प्रद्यावापंचंद्यावापृथिवीयंतुजागतंतुंतेहिकिमुश्रेष्ठःषळूनार्भवंत्रिष्टुबंतंमानोद्व्यधिकाश्वस्तुतिस्तुं
तृतीयाषष्ठ्यौजगत्यौयदक्रंदःसप्तोनास्यद्विपंचाशदल्पस्तवंत्वेतंत्संशयोत्थापनप्रश्नंप्रतिवाक्यान्यत्रप्रायेणंज्ञान
मोक्षाक्षरप्रशंसाचंपंचपादंसाकंजानांयद्गायत्रेयंसशिंर्क्तंसप्तार्धगर्भागौरीरितिजगत्यएतदंतंतुवैश्वदेवंतस्याःस
मुद्रांइतिवाचःसमुद्रांआपोक्षरंसाप्रस्तारपंक्तिःशकमयमितिशकधूमंउक्षाणंपृश्निमितिसोमंस्त्रयःकेशिनइत्यग्निः
सूर्योवायुश्चकेशिनंश्चत्वारिवाग्वाचंइंद्रंमित्रंसौर्यौद्वादशेतिसंवत्सरसंस्थंकालचक्रवर्णनंयस्तेसरस्वत्यैयज्ञेनसा
ध्येभ्यःपरानुष्टुप्सौरींपर्जन्याग्निदेवतावांत्यासरस्वतेसूर्यायवाकयापंचोनासंवादंस्तृतीयाद्ययुजोमरुतांवाक्यंमं
त्यस्तृचोगस्त्यस्यर्चशिष्टाइंद्रस्यैकादशीर्चंमरुत्वांस्त्विंद्रोदेवता ॥ ३ ॥ ॥ ॥

हरिःओम् ॥ (१।२२।२) वसूरुद्रापुरुमंतूवृधंतादशस्यतंनोवृषणावभिष्टौ । दस्राहयद्रेक्णऽऔचथ्योवांप्रयत्सस्राथेऽअकवाभिरूती ॥ कोवांदाशत्सुमतयेचिदस्यैवसूयद्धेथेनमसापदेगोः । जिगृतमस्मेरेवतीःपुरंधीःकामप्रेणेवमनसाचरंता ॥ युक्तोहयद्वांतौग्र्यायपेरुर्विमध्येऽअर्णसोधायिपज्रः । उपवामवःशरणंगमेयंशूरोनाज्मपतयद्भिरेवैः ॥ उपस्तुतिरौचथ्यमुरुष्येन्मामामिमेपतत्रिणीविदुग्धां । मामामेधोदशतयश्चितोधाक्प्रयद्वांबद्धस्त्मनिखादतिक्षां ॥ नमागरन्नद्योमातृतमादासायदींसुसमुब्धमवाधुः । शिरोयदस्यत्रैतनोवितक्षत्स्वयंदासऽउरोऽअंसावपिग्ध ॥ दीर्घतमामामतेयोजुजुर्वान्दशमेयुगे । अपामर्थंयतीनांब्रह्माभवतिसारथिः ॥ १ ॥ (१।२२।३) प्रद्यावायज्ञैःपृथिवीऽऋतावृधामहीस्तुषेविदथेषुप्रचेतसा । देवेभिर्येदेवपुत्रेसुदंससेत्थाधियावार्याणिप्रभूषतः ॥ उतमन्येपितुरद्रुहोमनोमातुर्महिस्वतवस्तद्धवीमभिः । सुरेतसापितराभूमचक्रतुरुरुप्रजायाऽअमृतंवरीमभिः ॥ तेसूनवःस्वपसःसुदंससोमहीजज्ञुर्मातरापूर्वचित्तये । स्थातुश्चसत्यंजगतश्चधर्मणिपुत्रस्यपाथःपदमद्वयाविनः ॥ तेमायिनोममिरेसुप्रचेतसोजामीसयोनीमिथुनासमोकसा । नव्यंनव्यंतंतुमातन्वतेदिविसमुद्रेऽअंतःकवयःसुदीतयः ॥ तद्राधोऽअद्यसवि

(१।२२।२) वसूरुद्राइतिषळर्चस्यसूक्तस्यदीर्घतमाअश्विनौत्रिष्टुबंत्यानुष्टुप् । (१।२२।३) प्रद्यावायज्ञैरितिपंचर्चस्यसूक्तस्यदीर्घतमाद्यावापृथिव्यौजगती ।

तुर्वरेण्यंवयंदेवस्यप्रसवेमनामहे । अस्मभ्यंद्यावापृथिवीसुचेतुनारयिंधत्तंवसुमंतंशतग्विनं ॥ २ ॥ (१।२२।४)
तेहिद्यावापृथिवीविश्वशंभुवऽऋतावरीरजसोधारयत्कवी । सुजन्मनीधिषणेऽअंतरीयतेदेवोदेवीधर्मणासूर्यःशुचिः ॥
उरुव्यचसामहिनीऽअसश्चतापितामाताचभुवनानिरक्षतः । सुधृष्टमेवपुष्ये३नरोदसीपितायत्सीमभिरूपैरवासयत् ॥
सवह्निःपुत्रःपित्रोःपवित्रवान्पुनातिधीरोभुवनानिमायया । धेनुंचपृश्निंवृषभंसुरेतसंविश्वाहाशुक्रंपयोऽअस्यदुक्षत ॥
अयंदेवानामपसामपस्तमोयोजजानरोदसीविश्वशंभुवा । वियोममेरजसीसुक्रतूययाजरेभिःस्कंभनेभिःसमानृचे ॥
तेनोगृणानेमहिनीमहिश्रवःक्षत्रंद्यावापृथिवीधासथोबृहत् । येनाभिकृष्टीस्ततनामविश्वहापनाय्यमोजोऽअस्मेसमि
न्वतं ॥ ३ ॥ (१।२२।५) किमुश्रेष्ठःकिंयविष्ठोनऽआजगन्किमीयतेदूत्यं१कद्यदूचिम । ननिंदिमचमसंयोमहाकु
लोग्नेभ्रातर्द्रुणऽइद्भूतिमूदिम ॥ एकंचमसंचतुरःकृणोतनतद्वोदेवाऽअब्रुवंतद्वऽआगमं । सौधन्वनायद्येवाकरिष्यथ
साकंदेवैर्यज्ञियासोभविष्यथ ॥ अग्निंदूतंप्रतियदब्रवीतनाश्वःकर्त्वोरथऽउतेहकर्त्वः । धेनुःकर्त्वायुवशाकर्त्वाद्वातानि
भ्रातरनुवःकृत्व्येमसि ॥ चकृवांसऽऋभवस्तदपृच्छतक्वेदभूद्यःस्यदूतोनऽआजगन् । यदावाख्यच्चमसांचतुरःकृताना

(१।२२।४) तेहीतिपंचर्चस्यसूक्तस्यदीर्घतमाद्यावापृथिव्यौजगती । (१।२२।५) किमुश्रेष्ठइतिचतुर्दशर्चस्यसूक्तस्यदीर्घतमाऋभवो जगत्यंत्यात्रिष्टुप् ।

दित्त्वष्टाग्नास्वंतर्न्यानजे ॥ हनामैनाँऽइतित्वष्टायदब्रवीच्चमसंयेदेवपानमनिंदिषुः । अन्यानामानिकृण्वतेसुतेसचाँ
ऽअन्यैरेनान्कन्या३नामभिःस्परत् ॥ ४ ॥ इंद्रोहरीयुयुजेऽअश्विनारथंबृहस्पतिर्विश्वरूपामुपाजत । ऋभुर्विभ्वावा
जोदेवाँऽअगच्छतस्वपसोयज्ञियंभागमैतन ॥ निश्चर्मणोगामरिणीतधीतिभिर्याजरंतायुवशाताकृणोतन । सौधन्व
नाऽअश्वादश्वमतक्षतयुक्त्वारथमुपदेवाँऽअयातन ॥ इदमुदकंपिबतेत्यब्रवीतनेदंवाघापिबतामुंजनेजनं । सौधन्व
नायदितन्नेवहर्यथतृतीयेघासवनेमादयाध्वै ॥ आपोभूयिष्ठाऽइत्येकोऽअब्रवीदग्निर्भूयिष्ठऽइत्यन्योऽअब्रवीत् । वधर्यं
तींबहुभ्यःप्रैकोऽअब्रवीदृतावदंतश्चमसाँऽअपिंशत ॥ श्रोणामेकऽउदकंगामवाजतिमांसमेकःपिंशतिसूनयाभृतं ।
आनिम्रुचःशकृदेकोऽअपाभरत्किंस्वित्पुत्रेभ्यःपितराऽउपावतुः ॥ ५ ॥ उद्वत्स्वस्माऽअकृणोतनातृणंनिवत्स्वपःस्व
पस्ययानरः । अगोह्यस्ययदसस्तनागृहेतदद्येदमृभवोनानुगच्छथ ॥ संमील्ययद्भुवनापर्यसर्पतक्वस्वित्तात्यापितरावऽ
आसतुः । अशपतयःकरस्नंवऽआददेयःप्राब्रवीत्प्रोतस्माऽअब्रवीतन ॥ सुषुप्वांसऽऋभवस्तदपृच्छतागोह्यकऽइदंनो
ऽअबूबुधत् । श्वानंबस्तोबोधयितारमब्रवीत्संवत्सरऽइदमद्याव्यख्यत ॥ दिवायांतिमरुतोभूम्याग्निरयंवातोऽअंतरि
क्षेणयाति । अद्भिर्यातिवरुणःसमुद्रैर्युष्माँऽइच्छन्तःशवसोनपातः ॥ ६ ॥ (१।२२।६) मानोमित्रोवरुणोऽअर्य

(१।२२।६) मानोमित्रइतिद्वाविंशत्यृचस्यसूक्तस्यदीर्घतमाऋषिस्त्रिष्टुप्तृतीयाषष्ठ्यौजगत्यौ । (अश्वस्तुत्याश्वोदेवता) ।

ऋक्सं. मायुरिंद्रऽऋभुक्षामरुतःपरिख्यन् । यद्वाजिनोदेवजातस्यसप्तेःप्रवक्ष्यामोविदथेवीर्याणि ॥ यन्निर्णिजारेक्णसाप्रावृ मंडलं १
अ.२अ.३ तस्यरातिंगृभीतांमुखतोनयंति । सुप्राङजोमेम्यद्विश्वरूपऽइंद्रापूष्णोःप्रियमप्येतिपाथः ॥ एषच्छागःपुरोऽअश्वेनवा अनु. २२
जिनापूष्णोभागोनीयतेविश्वदेव्यः । अभिप्रियंयत्पुरोळाशमर्वतात्वष्टेदेनंसौश्रवसायजिन्वति ॥ यद्धविष्यमृतुशोदे
॥१९॥ वयानंत्रिर्मानुषाःपर्यश्वंनयंति । अत्रापूष्णःप्रथमोभागऽएतियज्ञंदेवेभ्यःप्रतिवेदयन्नजः+ ॥ होताध्वर्युरावयाऽअग्नि
मिंधोग्रावग्राभऽउतशंस्तासुविप्रः । तेनयज्ञेनस्वरंकृतेनस्विष्टेनवक्षणाऽआपृणध्वं ॥ ७ ॥ यूपव्रस्काऽउतयेयूपवाहा
श्चषालंयेऽअश्वयूपायतक्षति । येचार्वतेपचनंसंभरंत्युतोतेषामभिगूर्तिर्नऽइन्वतु ॥ उपप्रागात्सुमन्मेधायिमन्मदेवा
नामाशाऽउपवीतपृष्ठः । अन्वेनंविप्राऽऋषयोमदंतिदेवानांपुष्टेचकृमासुबंधुं ॥ यद्वाजिनोदामसंदानमर्वतोयाशीर्ष
ण्यारशनारज्जुरस्य । यद्वाघास्यप्रभृतमास्ये३तृणंसर्वाताते ऽअपिदेवेष्वस्तु ॥ यदश्वस्यक्रविषोमक्षिकाशयद्वास्वरौस्व
धितौरिप्तमस्ति । यद्धस्तयोःशमितुर्यन्नखेषुसर्वाताते ऽअपिदेवेष्वस्तु ॥ यदूवध्यमुदरस्यापवातियऽआमस्यक्रविषोगं
धोऽअस्ति । सुकृतातच्छमितारःकृण्वंतूतमेधंशृतपाकंपचंतु ॥ ८ ॥ यत्तेगात्रादग्निनापच्यमानादभिशूलंनिहतस्या ॥१९॥
वधावति । मातद्भूम्यामाश्रिषन्मातृणेषुदेवेभ्यस्तदुशद्भ्योरातमस्तु ॥ येवाजिनंपरिपश्यंतिपक्वंयऽईमाहुःसुरभिर्निर्हे
रेति । येचार्वतोमांसभिक्षामुपासतऽउतोतेषामभिगूर्तिर्नऽइन्वतु ॥ यन्नीक्षणंमांस्पचन्याऽउखायायापात्राणियूष्णऽ

आसेचनानि । ऊष्मण्यापिधानाचरूणामंकाःसूनाःपरिभूषंत्यश्वं ॥ निक्रमणंनिषदनंविवर्तनंयच्चपड्वींशमर्वतः । यच्चपपौयच्चघासिंजघाससर्वातातेऽअपिदेवेष्वस्तु ॥ मात्वाग्निर्ध्वनयीद्धूमगंधिर्मोखाभ्राजंत्यभिविक्तजघ्रिः । इष्टंवीतमभिगूर्तंवषट्कृतंतंदेवासःप्रतिगृभ्णंत्यश्वं ॥ ९ ॥ यदश्वायवासऽउपस्तृणंत्यधीवासंयाहिरण्यान्यस्मै । संदानमर्वंतंपड्वींशंप्रियादेवेष्वायामयंति ॥ यत्तेसादेमहसाशूकृतस्यपार्ष्ण्यावाकशयावातुतोद । स्रुचेवताहविषोऽअध्वरेषुसर्वातातेब्रह्मणासूदयामि ॥ चतुस्त्रिंशद्वाजिनोदेवबंधोर्वंक्रीरश्वस्यस्वधितिःसमेति । अच्छिद्रागात्रावयुनाकृणोतपरुष्परुरनुघुष्याविशस्त ॥ एकस्त्वष्टुरश्वस्याविशस्ताद्वायंतारांभवतस्तथऽऋतुः । यातेगात्राणामृतुथाकृणोमितातापिंडानांप्रजुहोम्यग्नौ+ ॥ मात्वातपत्प्रियऽआत्मापियंतंमास्वधितिस्तन्व१आतिष्ठिपत्ते । मातेगृध्नुरविशस्तातिहायछिद्रागात्राण्यसिनामिथूकः ॥ नवाउऽएतन्म्रियसेनरिष्यसिदेवाँऽइदेषिपथिभिःसुगेभिः । हरीतेयुंजापृषतीऽअभूतामुपास्थाद्वाजीधुरिरासभस्य ॥ सुगव्यंनोवाजीस्वश्व्यंपुंसःपुत्राँऽउतविश्वापुषंरयिं । अनागास्त्वंनोऽअदितिःकृणोतुक्षत्रंनोऽअश्वोवनतांहविष्मान् ॥ १० ॥ (१।२२।७) यदक्रंदःप्रथमंजायमानऽउद्यन्त्समुद्रादुतवापुरीषात् । श्येनस्यपक्षाहरिणस्यबाहूऽउपस्तुत्यंमहिजातंतेऽअर्वन् ॥ यमेनदत्तंत्रितऽएनमायुनगिंद्रऽएणंप्रथमोऽअध्यतिष्ठत् । गंधर्वोऽ

(१।२२।७) यदक्रंदइतित्रयोदशर्चस्यसूक्तस्य [illegible]

CC-0. Rajan Acharya Kathmandu Collection

अस्यरशनामंगृभ्णात्सूरादश्वंवसवोनिरंतष्ट ॥ असियमोऽअस्यादित्योऽअर्वन्नसित्रितोगुह्येनव्रतेन । असिसोमेनसम
याविपृक्तऽआहुस्तेत्रीणिदिविबंधनानि ॥ त्रीणितऽआहुर्दिविबंधनानित्रीण्यप्सुत्रीण्यंतःसमुद्रे । उतेवमेवरुणश्छ
न्त्स्यर्वन्यत्रातऽआहुःपरमंजनित्रं ॥ इमातेवाजिन्नवमार्जनानीमाशफानांसनितुर्निधाना । अत्रातेभद्रारशनाऽअप
श्यमृतस्ययाऽअभिरक्षंतिगोपाः+ ॥ ११ ॥ आत्मानंतेमनसारादजानामवोदिवापतयंतंपतंगं । शिरोऽअपश्यंपथि
भिःसुगेभिररेणुभिर्जेहमानंपतत्रि+ ॥ अत्रातेरूपमुत्तममपश्यंजिगीषमाणमिषऽआपदेगोः । यदातेमर्तोऽअनुभोग
मानळादिद्ग्रसिष्ठऽओषधीरजीगः ॥ अनुत्वारथोऽअनुमर्योऽअर्वन्ननुगावोनुभगःकनीनां । अनुव्रातासस्तवसख्यमी
युरनुदेवाममिरेवीर्यंते ॥ हिरण्यशृंगोयोऽअस्यपादामनोजवाऽअवरऽइंद्रऽआसीत् । देवाऽइदस्यहविरद्यमायन्योऽ
अर्वंतंप्रथमोऽअध्यतिष्ठत् ॥ ईर्मांतासःसिलिकमध्यमासःसंशूरणासोदिव्यासोऽअत्याः । हंसाऽइवश्रेणिशोयतंतेय
दाक्षिषुर्दिव्यमज्ममश्वाः ॥ १२ ॥ तवशरीरंपतयिष्ण्वर्वन्तवचित्तंवातऽइवध्रजीमान् । तवशृंगाणिविष्ठितापुरुत्रा
रण्येषुजर्भुराणाचरंति ॥ उपप्रागाच्छसनंवाज्यर्वादेवद्रीचामनसादीध्यानः । अजःपुरोनीयतेनाभिरस्यानुपश्चात्कव
योयंतिरेभाः+ ॥ उपप्रागात्परमंयत्सधस्थमर्वाँऽअच्छापितरंमातरंच । अद्यादेवान्जुष्टतमोहिगम्याऽअथाशास्तेदाशु

षे॒वार्या॑णि ॥ १३ ॥ (१।२२।८) अ॒स्यवा॒मस्य॑पलि॒तस्य॒होतु॒स्तस्य॒भ्राता॑मध्य॒मोऽअ॒स्त्यश्नः॑ । तृ॒तीयो॒भ्राता॑घृ॒तपृ॑ष्ठोऽअ॒स्यात्रा॑पश्यंवि॒श्पतिं॑स॒प्तपु॑त्रं ॥ स॒प्तयु॑ञ्जंति॒रथ॒मेक॑चक्र॒मेको॒ऽअश्वो॑वहतिस॒प्तना॑मा । त्रि॒नाभि॑च॒क्रम॒जर॑मन॒र्वंयत्रे॒माविश्वा॒भुव॒नाधि॑त॒स्थुः+ ॥ इ॒मंरथ॒मधि॒येस॒प्तत॒स्थुःस॒प्तच॑क्रंस॒प्तव॑हं॒त्यश्वाः॑ । स॒प्तस्वसा॑रोऽअ॒भिसंन॑वंते॒यत्र॒गवां॒निहि॑तास॒प्तनाम॑ ॥ कोद॑दर्शप्रथ॒मंजाय॑मानमस्थ॒न्वंतं॒यद॑न॒स्थाबिभ॑र्ति । भूम्या॒ऽअसु॒रसृ॑गा॒त्माक्व॑स्वि॒त्कोवि॒द्वांस॒मुप॑गा॒त्प्रष्टु॑मे॒तत्+ ॥ पाकः॑पृच्छामि॒मन॒सावि॑जानन्दे॒वाना॑मे॒नानिहि॑ताप॒दानि॑ । व॒त्सेब॒ष्कयेधि॑स॒प्ततंतू॒न्वित॑त्निरेक॒वय॒ऽओत॒वाऽउ॑ ॥ १४ ॥ अचि॑कित्वान्चिकि॒तुष॑श्चि॒दत्र॑क॒वीन्पृ॑च्छामिवि॒द्मने॒नवि॒द्वान् । वियस्त॒स्तंभ॒षळि॒मारजां॑स्य॒जस्य॑रू॒पेकिमपि॑स्वि॒देकं॑ ॥ इ॒हब्र॑वीतु॒यऽई॑मं॒गवे॑दा॒स्यवा॒मस्य॒निहि॑तंप॒दंवेः॑ । शी॒र्ष्णःक्षी॒रंदु॑ह्रते॒गावो॑ऽअस्यव॒व्रिंवसा॑नाऽउद॒कं

(१।२२।८) अस्यवामस्येतिद्विपंचाशदृचस्यसूक्तस्यदीर्घतमाआद्यानामेकचत्वारिंशदृचांविश्वेदेवास्तस्याःसमुद्राइत्यस्यावाक्समुद्राक्षरापः शकमयमित्यस्याःशकधूमसोमौत्रयःकेशिनइत्यस्याअग्निसूर्यवायवो (केशिनइतिगुणः) चत्वारिवागित्यस्यावाक्इंद्रंमित्रमितिद्वयोःसूर्यो द्वादशप्रधयेत्यस्याःकालचक्रं (अत्रसंवत्सरसंस्थंकालचक्रवर्णनं) यस्याइत्यस्याःसरस्वतीयज्ञेनेत्यस्याःसाध्याःसमानमित्यस्याःसूर्यो (पर्जन्याग्नीवा) दिव्यंसुपर्णमित्यस्याःसरस्वान् (सूर्योवा) त्रिष्टुप् द्वादशीपंचदशीत्रयोविंशीएकोनत्रिंशीषट्त्रिंश्येकचत्वारिंशीचजगत्यःद्विचत्वारिंशीप्रस्तारपंक्तिःएकपंचाशदनुष्टुप् ।

Digitized by eGangotri. Funding MoE-Delhi

प॒दापु॑ः ॥ मा॒तापि॒तर॑मृ॒तऽआब॑भाजधी॒त्यग्रे॒मन॑सा॒संहि॑ज॒ग्मे । साबी॒भ॒त्सुर्गर्भ॑रसा॒निवि॑द्धा॒नम॑स्वंत॒ऽइदु॑पवा॒कमी॑
युः ॥ यु॒क्तामा॒तासी॑द्धु॒रिदक्षि॑णाया॒ऽअति॑ष्ठ॒द्गर्भो॑वृज॒नीष्वं॒तः । अमी॑मेद्व॒त्सोऽअनु॒गाम॑पश्यद्विश्वरू॒प्यं॑त्रि॒षुयोज॑नेषु॥
॥२१॥ ति॒स्रोमा॒तॄस्त्रीन्पि॒तॄन्बिभ्र॒देक॑ऽऊ॒र्ध्वस्त॑स्थौ॒नेमव॑ग्लापयंति । मं॒त्रयं॑तेदि॒वोऽअ॒मुष्य॑पृ॒ष्ठेवि॑श्व॒विदं॒वाच॒मवि॑श्वमिन्वां
॥ १५ ॥ द्वाद॑शारंन॒हितज्जरा॑य॒वर्व॑र्तिच॒क्रंपरि॒द्यामृ॒तस्य॑ । आपु॒त्राऽअ॑ग्नेमिथु॒नासो॒ऽअत्र॑स॒प्तश॒तानि॑विंश॒तिश्च॑त
स्थुः ॥ पंच॑पादंपि॒तरं॒द्वाद॑शाकृतिंदि॒वऽआ॑हुः॒परे॒ऽअर्धे॑पुरी॒षिणं॑ । अथे॒मेऽअ॒न्यऽउप॑रेविचक्ष॒णंस॒प्तच॑क्रे॒षळ॑रऽआहु॒
रर्पि॑तं ॥ पंचा॑रेच॒क्रेप॑रि॒वर्त॑माने॒तस्मि॒न्नात॑स्थु॒र्भुव॑नानि॒विश्वा॑ । तस्य॒नाक्ष॑स्तप्यते॒भूरि॑भारःस॒नादे॒वनशी॑र्यते॒सना॑भिः ॥
सने॑मिच॒क्रम॒जरं॒विवा॑वृतऽउत्ता॒नायां॒दश॑यु॒क्ताव॑हंति । सूर्य॑स्य॒चक्षू॒रज॑सै॒त्यावृ॑तं॒तस्मि॒न्नार्पि॑ता॒भुव॑नानि॒विश्वा॑ ॥ सा॒कं॒
जानां॑स॒प्तथ॑माहुरेक॒जंष॑ळिद्य॒माऽऋष॑योदेव॒जाऽइति॑ । तेषा॑मि॒ष्टानि॒विहि॑तानिधाम॒शःस्था॒त्रेरे॑जंते॒विकृ॑तानिरू॒पशः+
॥ १६ ॥ स्त्रियः॑स॒तीस्ताँऽउ॑मेपुं॒सऽआ॑हुः॒पश्य॑दक्ष॒ण्वान्नविचे॑तदं॒धः । क॒विर्यः॑पु॒त्रःसई॒माचि॑केत॒यस्तावि॑जा॒नात्सपि॒तु
ष्पि॒तास॑त् ॥ अ॒वःपरे॑णप॒रऽए॒नाव॑रेणप॒दाव॒त्संबिभ्र॑ती॒गौरुद॑स्थात् । साक॒द्रीची॒कंस्वि॒दर्धं॒परा॑गा॒त्क्व॑स्वित्सूते॒नहियू॒थे ॥२१॥
ऽअ॒ंतः+ ॥ अ॒वःपरे॑णपि॒तरं॒योऽअ॑स्यानु॒वेद॑प॒रऽए॒नाव॑रेण । क॒वी॒यमा॑नः॒कऽइ॒हप्रवो॑चद्दे॒वंमनः॒कुतो॒ऽअधि॒प्रजा॑तं ॥
येऽअ॒र्वा॑च॒स्ताँऽउ॒परा॑चऽआहु॒र्येपरा॑च॒स्ताँऽउ॑ऽअ॒र्वाच॑ऽआहुः । इंद्र॑श्च॒याच॒क्रथुः॑सोम॒तानि॑धु॒रानयु॒क्तारज॑सोवहंति ॥

द्वासु॑प॒र्णा॑स॒युजा॒सखा॑यासमा॒नंवृ॒क्षंपरि॑षस्वजाते । तयो॑र॒न्यःपिप्प॑लंस्वा॒द्वत्त्यन॑श्नन्न॒न्योऽअ॒भिचा॑कशीति ॥ १७ ॥
यत्रा॑सुप॒र्णाऽअ॒मृतं॑स्यभा॒गमनिं॑मेषंवि॒दथा॑भि॒स्वरं॑ति । इ॒नोविश्वं॑स्य॒भुवं॑नस्यगो॒पाःसमा॒धीरः॒पाक॒मत्रावि॑वेश ॥ यस्मि
न्वृ॒क्षेम॒ध्वदः॑सुप॒र्णानिं॑वि॒शंते॒सुवं॑ते॒चाधि॒विश्वे॑ । तस्येदा॑हुः॒पिप्प॑लंस्वा॒द्वग्रे॒तन्नोन्न॑श॒द्यःपि॒तरं॒नवेदं॑ ॥ यद्गा॑य॒त्रेऽअधि
गाय॒त्रमाहिं॑तं॒त्रैष्टु॑भाद्वा॒त्रैष्टु॑भंनि॒रतं॑क्षत । यद्वा॒जग॒ज्जग॒त्याहिं॑तंप॒दंयऽइत्तद्वि॒दुस्तेऽअं॑मृत॒त्वमा॑नशुः ॥ गा॒य॒त्रेण॒प्रतिं॑मि
मीतेऽअ॒र्कम॒र्केण॒साम॒त्रैष्टु॑भेनवा॒कं । वा॒केनं॑वा॒कंद्वि॒पदा॒चतु॑ष्पदा॒क्षरे॑णमिमते॒सप्तवाणीः॑ ॥ जगं॑ता॒सिंधुं॑दि॒व्यं॑स्तभायद्रथं
त॒रेसूर्यं॒पर्यं॑पश्यत् । गा॒य॒त्रस्यं॑स॒मिधं॑स्ति॒स्रऽआ॑हुस्ततो॑म॒ह्नाप्ररिं॑रिचेमहि॒त्वा+ ॥ १८ ॥ उपं॑ह्वयेसु॒दुघां॑धे॒नुमे॒तांसु॒हस्तो॑
गो॒धुगु॒तदो॑हदेनां । श्रेष्ठं॑स॒वंसं॑वि॒तासा॑विषन्नो॒भीद्धो॑घ॒र्मस्तदु॒षुप्रवो॑चं ॥ हिं॒कृ॒ण्व॒तीवं॑सु॒पत्नी॒वसूं॑नांव॒त्समि॒च्छंती॒मनं॑सा
भ्यागा॑त् । दु॒हाम॒श्विभ्यां॒ऽपयो॑ऽअ॒घ्न्येयंसा॒वर्धं॑तांमह॒तेसौभं॑गाय ॥ गौर॑मीमे॒दनुं॑व॒त्संमि॒षंतं॑मू॒र्धानं॒हिङ्ङ्कृ॒णो॒न्मात॒
वाऽउ॑ । सृक्वा॑णंघ॒र्मम॒भिवा॑वशा॒नामिमा॑तिमा॒युंपयं॑ते॒पयो॑भिः ॥ अ॒यंसशिं॑क्ते॒येन॒गौर॒भीवृं॑ता॒मिमा॑तिमा॒युंध्व॒सना॒व
धिं॑श्रि॒ता । सा॒चि॒त्तिभि॒र्निहि॒चका॒रमर्त्यं॑वि॒द्युद्भवं॑ती॒प्रतिं॑व॒व्रिमौहं॑त ॥ अ॒नच्छ॑येतु॒रगा॑तुजी॒वमेजं॑ध्रु॒वंमध्य॒ऽआप॒स्त्या॑
नां । जी॒वोमृ॒तस्यं॑चरतिस्व॒धाभि॒रमं॑र्त्यो॒मर्त्ये॑ना॒सयो॑निः ॥ १९ ॥ अपं॑श्यंगो॒पामनिं॑पद्यमान॒माच॒परा॑च॒प॒थिभि॒श्चरं॑
तं । सस॒ध्रीची॒ःसविषूं॑ची॒र्वसा॑न॒ऽआवं॑रीवर्तिं॒भुवं॑नेष्वंतः+ ॥ यऽईं॑च॒कार॒नसोऽअ॒स्यवे॑द॒ऽयईं॑द॒दर्श॒हिरु॒गिन्नुतस्मा॑त् ।

Digitization by eGangotri. Funding MoE-Delhi

समातुर्योनापरिवीतोऽअंतर्बहुप्रजानिर्ऋतिमाविवेश ॥ द्यौर्मेपिताजनितानाभिरत्रबंधुर्मेमातापृथिवीमहीयं । उत्तान
यौश्चम्वो३र्योनिरंतरत्रापितादुहितुर्गर्भमाधात् ॥ पृच्छामित्वापरमंतंपृथिव्याःपृच्छामियत्रभुवनस्यनाभिः । पृच्छा
मित्वावृष्णोऽअश्वस्यरेतःपृच्छामिवाचःपरमंव्योम ॥ इयंवेदिःपरोऽअंतःपृथिव्याऽअयंयज्ञोभुवनस्यनाभिः । अयं
सोमोवृष्णोऽअश्वस्यरेतोब्रह्मायंवाचःपरमंव्योम ॥ २० ॥ सप्तार्धगर्भाभुवनस्यरेतोविष्णोस्तिष्ठंतिप्रदिशाविधर्मणि ।
तेधीतिभिर्मनसातेविपश्चितःपरिभुवःपरिभवंतिविश्वतः ॥ नविजानामियदिवेदमस्मिनिण्यःसंनद्धोमनसाचरामि ।
यदामागन्प्रथमजाऽऋतस्यादिद्वाचोऽअश्नुवेभागमस्याः+ ॥ अपाङ्प्राङेतिस्वधयागृभीतोमर्त्योमर्त्येनासयोनिः ।
ताशश्वंताविषूचीनावियंतान्य१न्यंचिक्युर्ननिचिक्युरन्यं+ ॥ ऋचोऽअक्षरेपरमेव्योमन्यस्मिन्देवाऽअधिविश्वेनिषे
दुः । यस्तन्नवेदकिमृचाकरिष्यतियइत्तद्विदुस्तऽइमेसमासते ॥ सूयवसाद्भगवतीहिभूयाऽअथोवयंभगवंतःस्याम ।
अद्धितृणमघ्न्येविश्वदानींपिबशुद्धमुदकमाचरंती ॥ २१ ॥ गौरीर्मिमायसलिलानितक्षत्येकपदीद्विपदीसाचतुष्पदी ।
अष्टापदीनवपदीबभूवुषीसहस्राक्षरापरमेव्योमन् ॥ तस्याःसमुद्राऽअधिविक्षरंतितेनजीवंतिप्रदिशश्चतस्रः । ततःक्ष
रत्यक्षरंतद्विश्वमुपजीवति ॥ शकमयंधूममारादपश्यंविषूवतापरऽएनावरेण । उक्षाणंपृश्निमपचंतवीरास्तानिधर्माणि
प्रथमान्यासन् ॥ त्रयःकेशिनऽऋतुथाविचक्षतेसंवत्सरेवपतऽएकएषां । विश्वमेकोऽअभिचष्टेशचीभिर्ध्राजिरेकस्यद

॥२२॥

दृशेनरूपं+ ॥ चत्वारिवाक्परिमितापदानितानिविदुर्ब्राह्मणायेमनीषिणः । गुहात्रीणिनिहितानेंगयंतितुरीयंवाचो
मनुष्यावदंति ॥ इंद्रंमित्रंवरुणमग्निमाहुरथोदिव्यःससुपर्णोगरुत्मान् । एकंसद्विप्राबहुधावदंत्यग्निंयमंमातरिश्वान
माहुः ॥ २२ ॥ कृष्णंनियानंहरयःसुपर्णाऽअपोवसानादिवमुत्पतंति । तऽआववृत्रन्त्सदनादृतस्यादिद्घृतेनपृथिवी
व्युद्यते ॥ द्वादशप्रधयश्चक्रमेकंत्रीणिनभ्यानिकऽउतच्चिकेत । तस्मिन्त्साकंत्रिशतानशंकवोर्पिताःषष्टिर्नचलाचला
सः ॥ यस्तेस्तनःशशयोयोमयोभूर्येनविश्वापुष्यसिवार्याणि । योरत्नधावसुविद्यःसुदत्रःसरस्वतितमिहधातवेकः ॥
यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन् । तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः+ ॥ समान
मेतदुदकमुच्चैत्यवचाहभिः । भूमिंपर्जन्याजिन्वंतिदिवंजिन्वंत्यग्नयः ॥ दिव्यंसुपर्णंवायसंबृहंतमपांगर्भंदर्शतमोषधी
नां । अभीपतोवृष्टिभिस्तर्पयंतंसरस्वंतमवसेजोहवीमि ॥ २३ ॥ (१।२३।१) कयाशुभासवयसःसनीळाःसमान्या
मरुतःसंमिमिक्षुः । कयामतीकुतऽएतासऽएतेर्चंतिशुष्मंवृषणोवसूया+ ॥ कस्यब्रह्माणिजुजुषुर्युवानःकोऽअध्वरेमरु
तऽआववर्त । श्येनाँऽइवध्रजतोऽअंतरिक्षेकेनमहामनसारीरमाम ॥ कुतस्त्वमिंद्रमाहिनःसन्नेकोयासिसत्पतेकिंतऽ

(१।२३।१) कयाशुभेतिपंचदशर्चस्यसूक्तस्यतृतीयाद्ययुगृचामेकादशीवर्ज्यानांमरुतःत्रयोदश्यादितिसृणामगस्त्यःशिष्टानामिंद्रऋषिः
सर्वसूक्तस्यमरुत्वानिंद्रोदेवतात्रिष्टुप्छंदः ।

इत्था । संपृच्छसेसमराणःशुभानैर्वोचेस्तन्नोहरिवोयत्तेऽअस्मे+ ॥ ब्रह्माणिमेमतयःशंसुतासःशुष्मइयर्तिप्रभृतोमेऽअ
द्रिः । आशासतेप्रतिहर्यंत्युक्थेमाहरीवहतस्तानोऽअच्छ ॥ अतोवयमंतमेभिर्युजानाःस्वक्षत्रेभिस्तन्व१ःशुंभमानाः ।
॥२३॥ महोभिरेताँऽउपयुज्महेन्विंद्रस्वधामनुहिनोबभूथ ॥ २४ ॥ क्व१स्यावोमरुतःस्वधासीद्यन्मामेकंसमधत्ताहिहत्ये ।
अहंह्यु१ग्रस्तविषस्तुविष्मान्विश्वस्यशत्रोरनमंवधस्नैः+ ॥ भूरिचकर्थयुज्येभिरस्मेसमानेभिर्वृषभपौंस्येभिः । भूरीणि
हिकृणवामशविष्ठेंद्रक्रत्वामरुतोयद्वशाम ॥ वधींवृत्रंमरुतऽइंद्रियेणस्वेनभामेनतविषोबभूवान् । अहमेतामनवेवि
श्वश्चंद्राःसुगाऽअपश्चकरवज्रबाहुः ॥ अनुत्तमातेमघवन्नकिर्नुनत्वावाँऽअस्तिदेवताविदानः । नजायमानोनशतेनजा
तोयानिकरिष्याकृणुहिप्रवृद्ध ॥ एकस्यचिन्मेविभ्व१स्त्वोजोयानुदधृष्वान्कृणवैमनीषा । अहंह्यु१ग्रोमरुतोविदानो
यानिच्यवामिंद्रऽइदीशऽएषां ॥ २५ ॥ अमंदन्मामरुतःस्तोमोऽअत्रयन्मेनरःश्रुत्यंब्रह्मचक्र । इंद्रायवृष्णेसुमखायम
ह्यंसख्येसखायस्तन्वेतनूभिः ॥ एवेदेतेप्रतिमारोचमानाऽअनेद्यःश्रवऽएषोदधानाः । संचक्ष्यामरुतश्चंद्रवर्णाऽअच्छां ॥२३॥
तमेछदयाथाचनूनं+ ॥ कोन्वत्रमरुतोमामहेवःप्रयातनसखीँऽरच्छासखायः । मन्मानिचित्राऽअपिवातयंतऽएषांभू
तनवेदामऽऋतानां ॥ आयद्दुवस्याद्दुवसेनकारुरस्मान्चक्रेमान्यस्यमेधा । ओषुवर्तमरुतोविप्रमच्छेमाब्रह्माणिजरिता

वोंऽअर्चंत् ॥ एषवःस्तोमोंमरुतऽइयंगीर्मांदार्यस्यमान्यस्यकारोः । एषायांसीष्टतन्वेवयांविद्यामेषंवृजनंजीरदानुं ॥
॥ २६ ॥ इतिद्वितीयाष्टकेतृतीयोऽध्यायः ॥ ३ ॥ ॥ ॥ ॥ ॥

एकादशाध्याये वर्गाः २६ सूक्तानि ८ ऋचः १३२ ॥ त्यागः॥ अश्विभ्यामिदं. ६ द्यावापृथिवीभ्यामिदं.१० ऋभुभ्यइदं. १४ अश्वायेदं. ३५ विश्वेभ्योदेवेभ्यइदं. ४१ वाक्समुद्राक्षरोभ्यइदं(वागभ्यइतिवा). शकधूमसोमाभ्यामिदं. केश्यग्निसूर्यवायुभ्यइदं. वाचइदं. सूर्यायेदं. २ कालचक्रायेदं. सरस्वत्याइदं. साध्येभ्यइदं. पर्जन्याग्निभ्यामिदं. सरस्वतइदं. मरुत्वत. इंद्रायेदं. १५॥इतिद्वितीयेतृतीयः ॥३॥

तन्वगस्त्योमारुतंहिद्वित्रिष्टुबंतंमित्रावरुणयोर्दीक्षितयोरुर्वशीमप्सरसंदृष्ट्वावासतीवरेकुंभेरेतोपतत्ततोगस्त्यवसिष्ठावजायेतांसहस्रमेकादशाद्यैंद्रींयज्ञायज्ञादशत्रित्रिष्टुबंतंमहोष्टौद्वितीयाविराण्नंनूनंपंचागस्त्येनैंद्रेहविषिमरुतामुद्यतंइंद्रागस्त्ययोःसंवादऐंद्रस्तत्राद्यातृतीयाचेंद्रवाक्यंचतुर्थीचादौबृहतींतिस्रोनुष्टुभःप्रतिवःषण्मारुतंतुचतस्रोंत्यामरुत्वतीयाश्वित्रस्तृचंगायत्रंगायत्सप्तोनात्वंराजादशमत्सिषळानुष्टुभंतुत्रिष्टुबंतंत्वाद्यास्कंधोग्रीवीवांमत्सिनआचर्षणिप्राःपंचयद्धस्यापूर्वीःषड्जायापत्योर्लोपामुद्रायाअगस्त्यस्यचद्व्यृचाभ्यांरत्यर्थसंवादंश्रुत्वांतेवासीब्रह्मचार्यंत्येबृहत्यादीअपश्यद्युवोर्दशाश्विनंकदुनवाभूदिदमष्टौषष्ठ्यंत्येत्रिष्टुभौतंयुंजाथांषट् ॥४॥

हरिःओम् ॥ (१।२३।२) तन्नुवोचामरभसायजन्मनेपूर्वंमहित्वंवृषभस्यकेतवे । ऐधेवयामन्मरुतस्तुविष्वणो
युधेवशक्रास्तविषाणिकर्तन ॥ नित्यंनसूनुंमधुबिभ्रतऽउपक्रीळंतिक्रीळाविदथेषुघृष्वयः । नक्षंतिरुद्राऽअवसानमस्वि
नंनमर्धंतिस्वतवसोहविष्कृतं ॥ यस्माऽऊमासोऽअमृताअरासतरायस्पोषंचहविषाददाशुषे । उक्षंत्यस्मैमरुतोहिताऽ
इवपुरूरजांसिपयसामयोभुवः ॥ आयेरजांसितविषीभिरव्यतप्रवऽएवासःस्वयतासोऽअध्रजन् । भयंतेविश्वाभवना
निहर्म्याचित्रोवोयामःप्रयतास्वृष्टिषु ॥ यत्त्वेषयामानदयंतपर्वतान्दिवोवापृष्ठंनर्याऽअचुच्यवुः । विश्वोवोऽअज्मन्भ
यतेवनस्पतीरथीयंतीवप्रजिहीतऽओषधिः ॥ १ ॥ यूयंनउग्रामरुतःसुचेतुनारिष्टग्रामाःसुमतिंपिपर्तन । यत्रावोदि
द्युद्रदतिक्रिविर्दतीरिणातिपश्वःसुधितेवबर्हणा ॥ प्रस्कंभदेष्णाऽअनवभ्रराधसोलातृणासोविदथेषुसुष्टुताः । अर्चं
त्यर्कंमदिरस्यपीतयेविदुर्वीरस्यप्रथमानिपौंस्या ॥ शतभुजिभिस्तमभिह्रुतेरघात्पूर्भीरक्षतामरुतोयमावत । जनंयमु
ग्रास्तवसोविरप्शिनःपाथनाशंसात्तनयस्यपुष्टिषु ॥ विश्वानिभद्रामरुतोरथेषुवोमिथस्पृध्येवतविषाण्याहिता । अंसे
ष्वावःप्रपथेषुखादयोक्षोवश्चक्रासमयाविवावृते ॥ भूरीणिभद्रानर्येषुबाहुषुवक्षःसुरुक्मारभसासोऽअंजयः । अंसेष्वे
ताःपविषुक्षुराऽअधिवयोनपक्षान्व्यनुश्रियोधिरे ॥ २ ॥ महांतोमह्नाविभ्वो३विभूतयोदूरेदृशोयेदिव्याऽइवस्तृभिः ।

(१।२३।२) तन्नुवोचामेतिपंचदशर्चस्यसूक्तस्यमैत्रावरुणिरगस्त्योमरुतोजगत्यंत्येद्वेत्रिष्टुभौ ।

मं॒द्राःसुजि॒ह्वाःस्वरि॑तारऽआ॒सभि॒ःसंमि॑श्ला॒ऽइंद्रे॑म॒रुत॑ःपरि॒ष्टुभ॑ः ॥ तद्व॑ःसुजातामरुतोमहित्व॒नंदी॒र्घंवो॑दा॒त्रमदि॑तेरि वव्र॒तं । इंद्र॑श्च॒नत्यज॑सा॒विह्रु॑णा॒तितज्जना॑य॒यस्मै॑सु॒कृते॒ऽअरा॑ध्वं ॥ तद्वो॑जामि॒त्वंम॑रुत॒ःपरे॑यु॒गेपु॒रूयच्छंस॑ममृतास॒ऽआ व॑त । अ॒याधि॒यामन॑वेश्रु॒ष्टिमा॒व्या॑सा॒कंनरो॑द॒ंसनै॒राचि॑कित्रिरे ॥ येन॑दी॒र्घंम॑रुतःशू॒शवा॑मयु॒ष्माके॑न॒परी॑णसातुरासः । आयत्त॒तन॑न्वृ॒जने॒जना॑सऽए॒भिर्य॒ज्ञेभि॒स्तद॒भीष्टि॑मश्यां ॥ ए॒षव॒ःस्तोमो॑मरुतइ॒यंगीर्मा॑दा॒र्यस्य॑मा॒न्यस्य॑का॒रोः । एषाया॑ सीष्टत॒न्वे॑व॒यांवि॒द्यामे॒षंवृ॒जनं॑जी॒रदा॑नुं ॥ ३ ॥ (१।२३।३) स॒हस्रं॑तऽइंद्रो॒तयो॑नःस॒हस्र॒मिषो॑हरिवोगू॒र्तत॑माः । स॒ह स्रं॑रायो॑माद॒यध्यै॑सह॒स्रिण॒ऽउप॑नोयंतु॒वाजा॑ः ॥ आनो॑वो॑भिर्म॒रुतो॑या॒ंत्वच्छा॒ज्येष्ठे॑भिर्वाबृ॒हद्दि॑वैःसु॒माया॑ः । अध॒यदे॑षां नि॒युत॑ःपर॒मा॑ःस॑मु॒द्रस्य॑चिद्ध॒नयं॑तपा॒रे+ ॥ मि॒म्यक्ष॒येषु॑सुधि॑ताघृ॒ता॒चीहिर॑ण्यनिर्णि॒गुप॑रा॒नऽऋ॒ष्टिः । गुहा॒चरं॑ती॒मनु॑ षो॒नयो॑षा॑स॒भाव॑तीविद॒थ्ये॑व॒संवाक्+ ॥ परा॑शु॒भ्राऽअ॒यासो॑य॒व्यासा॑धार॒ण्ये॑वम॒रुतो॑मिमिक्षुः । नरो॑द॒सीऽअप॑नुदंत घो॒राजु॒षंत॒वृधं॑स॒ख्याय॑दे॒वाः+ ॥ जोष॒द्यदी॑मसु॒र्या॑स॒चध्यै॒विषि॑तस्तुकारोद॒सीनृ॒मणा॑ः । आसू॒र्यैव॑विध॒तोरथं॑गात्त्वे॒षप्र॑ तीका॒नभ॑सो॒नेत्या+ ॥ ४ ॥ आस्था॑पयंतयुव॒तिंयुवा॑नःशु॒भेनिमि॑श्लांवि॒दथे॑षुप॒ज्रां । अ॒र्को॑यद्वो॑मरुतोह॒विष्मा॒न्गाय॑द्गा॒ थंसु॒तसो॑मोदुव॒स्यन्+ ॥ प्रतंवि॑वक्मि॒वक्म्यो॒यऽए॑षांम॒रुतां॑महि॒मास॒त्योऽअस्ति॑ । सचा॒यदी॒ंवृष॑मणाऽअहं॒युःस्थि॒रा

(१।२३।३) सहस्रंतइत्येकादशर्चस्यसूक्तस्यअगस्त्योमरुतआद्यायाइंद्रस्त्रिष्टुप् ।

चिज्जनीर्वहतेसुभागाः+ ॥ पांतिमित्रावरुणाववद्याच्चयतईमर्यमोऽअप्रशस्तान् । उतच्यवंतेऽअच्युताध्रुवाणिवावृधऽ
ईंमरुतोदातिवारः ॥ नहीनुवोमरुतोऽअंत्यस्मेऽआरात्ताच्चिच्छवसोऽअंतमापुः। तेधृष्णुनाशवसाशूशुवांसोर्णोनद्वेषोधृ
षतापरिष्ठुः ॥ वयमद्येंद्रस्यप्रेष्ठावयंश्वोवोचेमहिसमर्ये । वयंपुरामहिचनोऽअनुद्यून्तन्नऽऋभुक्षानरामनुष्यात् ॥ एष
वःस्तोमोमरुतऽइयंगीर्मांदार्यस्यमान्यस्यकारोः । एषायासीष्टतन्वेवयांविद्यामेषंवृजनंजीरदानुं ॥ ५ ॥ (१।२३।४)
यज्ञायज्ञावःसमनातुतुर्वणिर्धियंधियंवोदेवयाऽउंदधिध्वे । आवोर्वाचःसुवितायरोदस्योर्महेववृत्यामवसेसुवृक्तिभिः ॥
वव्रासोनयेस्वजाःस्वतवसऽइषंस्वरभिजायंतधूतयः । सहस्रियासोऽअपांनोर्मयऽआसागावोवंद्यासोनोक्षणः ॥ सोमा
सोनयेसुतास्तृप्तांशवोहृत्सुपीतासोदुवसोनासते । ऐषामंसेषुरंभिणीवरारभेहस्तेषुखादिश्चकृतिश्चसंदधे ॥ अवस्वयु
क्तादिवऽआवृथाययुरमर्त्याःकशयाचोदतत्मना । अरेणवस्तुविजाताऽअचुच्यवुर्दृह्ळानिचिन्मरुतोभ्राजदृष्टयः ॥
कोवोंतर्मरुतऽऋष्टिविद्युतोरेजतित्मनाहन्वेवजिह्वया । धन्वच्युतऽइषांनयामनिपुरुप्रैषाऽअहन्यो३नैतशः ॥ ६ ॥
क्वस्विदस्यरजसोमहस्परंक्वावरंमरुतोयस्मिन्नायय । यच्च्यावयथविथुरेवसंहितंव्यद्रिणापतथत्वेषमर्णवं+ ॥ सातिर्न
वोमवतीस्वर्वतीत्वेषाविपाकामरुतःपिपिष्वती । भद्रावोरातिःपृणतोनदक्षिणापृथुज्रयीऽअसुर्येवजंजती ॥ प्रतिष्टो

(१।२३।४) यज्ञायज्ञेतिदशर्चस्यसूक्तस्यअगस्त्योमरुतोजगतीअंत्यास्तिस्त्रस्त्रिष्टुभः ।

भंति॒सिंध॑वःप॒विभ्यो॒यद॒भ्रियां॒वाच॑मुदी॒रयं॑ति । अव॑स्मयंतवि॒द्युतः॑पृथि॒व्यां॑यदी॑घृ॒तंम॒रुतः॑प्रुष्णु॒वंति॑ ॥ असू॑त॒पृश्नि॑र्मह॒तेरणा॑यत्वे॒षम॒यासां॑म॒रुता॒मनी॑कं । तेस॑प्स॒रासो॑ऽजनयं॒ताभ्व॒मादित्स्व॒धामि॑षि॒रांपर्य॑पश्यन् ॥ ए॒षवः॒स्तोमो॑मरुतऽइ॒यंगीर्मां॑दा॒र्यस्य॑मा॒न्यस्य॑का॒रोः । एषाया॑सीष्टत॒न्वे॑व॒यांवि॒द्यामे॒षंवृ॒जनं॑जी॒रदा॑नुं ॥ ७ ॥ (१।२३।५) म॒हश्चि॒त्त्वमिं॑द्रय॒तऽए॒तान्म॒हश्चि॑दसि॒त्यज॑सोवरू॒ता । सनो॑वेधोम॒रुतां॑चिकि॒त्वान्त्सु॒म्नाव॑नुष्व॒तव॒हिप्रेष्ठा॑ ॥ अयु॑ज्रन्तऽइंद्रवि॒श्वकृ॑ष्टीर्विदा॒नासो॑नि॒ष्षिधो॑मर्त्य॒त्रा । म॒रुतां॑पृत्सु॒तिर्हास॑माना॒स्व॑र्मीह्ळस्यप्र॒धन॑स्यसा॒तौ+ ॥ अम्य॒क्सात॑इंद्रऋ॒ष्टिर॒स्मेसने॒म्यभ्वं॑म॒रुतो॑जुनंति । अ॒ग्निश्चि॒द्धिष्मा॑त॒सेशु॑शु॒क्वानापो॒नद्वी॒पंदध॑ति॒प्रयां॑सि ॥ त्वंतून॑ऽइंद्र॒तंर॒यिंदा॒ऽओजि॑ष्ठया॒दक्षि॑णयेवरा॒तिं । स्तुत॑श्च॒यास्ते॑च॒कनं॑तवा॒योःस्तनं॒नमध्वः॑पीपयंत॒वाजैः॑ ॥ त्वेराय॑ऽइंद्रतो॒शत॑माःप्रणे॒तारः॒कस्य॑चिदृता॒योः । तेषुणो॑म॒रुतो॑मृळयंतु॒येस्मा॑पु॒रागा॑तू॒यंती॑वदे॒वाः+ ॥ ८ ॥ प्रति॒प्रया॑हींद्रमी॒ह्ळुषो॒नॄन्म॒हःपार्थि॑वे॒सद॑नेयतस्व । अध॒यदे॑षांपृथुबु॒ध्नास॑ऽए॒तास्ती॒र्थेनार्यः॒पौंस्या॑नित॒स्थुः+ ॥ प्रति॑घो॒राणा॑मे॒ताना॑म॒यासां॑म॒रुतां॑शृण्वऽआय॒ताम॑ुप॒ब्दिः । येमर्त्यं॑पृतना॒यंत॒मूमै॑र्ऋणा॒वानं॒नप॒तयं॑त॒सर्गैः॑ ॥ त्वंमाने॑भ्यऽइंद्रवि॒श्वज॑न्या॒रदा॑म॒रुद्भिः॑शु॒रुधो॒गोऽअ॑ग्राः । स्तवा॑नेभिःस्तव

(१।२३।५) महश्चिदित्यष्टर्चस्यसूक्तस्यअगस्त्यइंद्रस्त्रिष्टुप्द्वितीयाविराट् ।

Digitization by eGangotri. Funding MHRD Delhi

सेदेवदे॒वैर्वि॒द्यामे॒षंवृ॒जनं॑जी॒रदा॑नुं ॥ ९ ॥ (१।२३।६) ननूनमस्ति॒नोश्वः॒कस्तद्वे॑द॒यदद्भु॑तं । अ॒न्यस्य॑चि॒त्तम॒भिसं॑
च॒रेण्य॑मु॒ताधी॑तं॒विन॑श्यति ॥ किंन॑ऽइंद्रजिघांससि॒भ्रात॑रोम॒रुत॒स्तव॑ । तेभिः॑कल्पस्वसाधु॒यामानः॑स॒मर॑णेवधीः ॥
किंनो॑भ्रातरगस्त्य॒सखा॒सन्नति॑मन्यसे । वि॒द्माहि॒ते॒यथा॒मनो॒स्मभ्य॒मिन्नदि॑त्ससि ॥ अरं॑कृण्वंतु॒वेदिं॒सम॒ग्निमिं॑धतांपु॒रः ।
तत्रा॒मृत॑स्य॒चेत॑नंय॒ज्ञंते॑तनवावहै ॥ त्वमी॑शिषेवसुपते॒वसू॑नां॒त्वंमि॒त्राणां॑मित्रपते॒धेष्ठः॑ । इंद्र॒त्वंम॒रुद्भिः॒संव॑द॒स्वाध॒प्रा
शा॑नऽऋतु॒थाह॒वींषि॑ ॥ १० ॥ (१।२३।७) प्रति॑वऽए॒नानम॑सा॒हमे॑मिसू॒क्तेन॑भिक्षेसुम॒तिंतु॒राणां॑ । र॒रा॒णता॑मरुतो
वे॒द्याभि॒र्निहेळो॑ध॒त्तविमु॑चध्व॒मश्वा॑न् ॥ ए॒षव॒ःस्तोमो॑मरुतो॒नम॑स्वान्हृ॒दात॒ष्टोमन॑साधायिदेवाः । उपे॒माया॑त॒मन॑साजु
षा॒णायू॒यंहि॑ष्ठानम॑स॒ऽइद्वृ॒धासः॑ ॥ स्तु॒तासो॑नोम॒रुतो॑मृळयंतू॒तस्तु॒तोम॒घवा॒शंभ॑विष्ठः । ऊ॒र्ध्वानः॑संतुको॒म्यावना॒न्यहा॑
नि॒विश्वा॑मरुतोजिगी॒षा+ ॥ अ॒स्माद॒हंत॑वि॒षादीष॑माण॒ऽइंद्रा॑द्भि॒याम॑रुतो॒रेज॑मानः । यु॒ष्मभ्यं॑ह॒व्यानिशि॑तान्यास॒न्ता
न्या॒रेच॑कृमामृ॒ळता॑नः ॥ येन॒माना॑सश्चि॒तयं॑तऽउ॒स्राव्यु॑ष्टिषु॒शव॑सा॒शश्व॑तीनां । सनो॑म॒रुद्भि॑र्वृषभ॒श्रवो॑धाउ॒ग्रऽउ॒ग्रे
भि॒ःस्थवि॑रःसहो॒दाः+ ॥ त्वंपा॑हींद्र॒सही॑यसो॒नॄन्भवा॑म॒रुद्भि॒रव॑यातहेळाः । सु॒प्र॒के॒तेभिः॑सास॒हिर्दधा॑नोवि॒द्यामे॒षंवृ॒जनं॑

(१।२३।६) ननूनमितिपंचर्चस्यसूक्तस्यप्रथमतृतीयचतुर्थीनामृचामिंद्रोगस्त्योद्वितीयापंचम्योरगस्त्यऋषिरिंद्रोदेवताआद्याबृहतीततस्तिस्रोनुष्टुभोंत्यात्रिष्टुप् । (१।२३।७) प्रतिवइतिषळर्चस्यसूक्तस्यअगस्त्योमरुतःअंत्यानांचतसृणांमरुत्वानिंद्रस्त्रिष्टुप् ।

जीरदानुं ॥ ११ ॥ (१।२३।८) चित्रोवोस्तुयामश्चित्रऽऊतीसुदानवः । मरुतोऽअहिंभानवः ॥ आरेसावःसु
दानवोमरुतऽऋंजतीशरुः । आरेऽअश्मायमस्यथ ॥ तृणस्कंदस्यनुविशःपरिवृंक्तसुदानवः । ऊर्ध्वान्नःकर्तजीवसे
॥ १२ ॥ (१।२३।९) गायत्सामनभन्यं१यथावेरर्चामतद्वावृधानंस्वर्वत् । गावोधेनवोबर्हिष्यदब्धाऽआयत्सद्मा
नंदिव्यंविवासान् ॥ अर्चद्वृषावृषभिःस्वेदुहव्यैर्मृगोनाश्नोऽअतियज्जुगुर्यात् । प्रमंदयुर्मनांगूर्तहोताभरतेमर्योमिथुना
यजत्रः ॥ नक्षद्धोतापरिसद्मामितायन्भरद्गर्भमाशरदःपृथिव्याः । क्रंददश्वोनयमानोरुवद्गौरंतरदूतोनरोदसीचरद्वा
क् ॥ ताकर्माषतरास्मैप्रच्यौत्नानिदेवयंतोभरंते । जुजोषदिंद्रोदस्मवर्चानासत्येवसुग्म्योरथेष्ठाः ॥ तमुष्टुहींद्रंयोह
सत्वायःशूरोमघवायोरथेष्ठाः । प्रतीचश्चिद्योधीयान्वृषण्वान्ववव्रुषश्चित्तमसोविहंता ॥ १३ ॥ प्रयदित्थामहिना
नृभ्योऽअस्त्यरंरोदसीकक्ष्ये३नास्मै । संविव्यऽइंद्रोवृजनंनभूमाभर्तिस्वधावाँऽओपशमिवद्यां ॥ समत्सुत्वाशूरसता
मुराणंप्रपथिंतमंपरितंसयध्यै । सजोषसऽइंद्रंमदेक्षोणीःसूरिंचिद्येऽअनुमदंतिवाजैः ॥ एवाहितेशंसवनासमुद्रऽआ
पोयत्तऽआसुमदंतिदेवीः । विश्वातेऽअनुजोष्याभूद्गौःसूरीँऽश्चिद्यदिधिषावेषिजनान् ॥ असामयथासुषखायऽएन
स्वभिष्टयोनरांनशंसैः । असद्यथानऽइंद्रोवंदनेष्ठास्तुरोनकर्मनयमानऽउक्था ॥ विष्पर्धसोनरांनशंसैरस्माकासदिं

(१।२३।८) चित्रोवइतितृचस्यागस्त्योमरुतोगायत्री । (१।२३।९) गायत्सामेतित्रयोदशर्चस्यसूक्तस्यअगस्त्यइंद्रस्त्रिष्टुप् ।

द्रोवज्रहस्तः । मित्रायुवोनपूर्पतिंसुशिष्टौमध्यायुवऽउपशिक्षंतियज्ञैः + ॥ १४ ॥ यज्ञोहिष्मेंद्रंकश्चिदृंधन्जुहुराणश्चिन्म
नंसापरीयन् । तीर्थेनाच्छातातृषाणमोकोदीर्घोनसिध्रमाकृणोत्यध्वा ॥ मोषूणंऽइंद्रात्रपृत्सुदेवैरस्तिहिष्मातेशुष्मिन्नव
वयाः । महश्चिद्यस्यमीह्लुषोयव्याहविष्मतोमरुतोवंदतेगीः + ॥ एषःस्तोमऽइंद्रतुभ्यमस्मेऽएतेनगातुंहरिवोविदोनः ।
आनोववृत्याःसुवितायदेवविद्यामेषंवृजनंजीरदानुं ॥ १५ ॥ (१।२३।१०) त्वंराजेंद्रयेचदेवारक्षानॄन्पाह्यसुरत्वम
स्मान् । त्वंसत्पतिर्मघवानस्तरुत्रस्त्वंसत्योवसवानःसहोदाः + ॥ दनोविशऽइंद्रमृध्रवाचःसप्तयत्पुरःशर्मशारदीर्दत् ।
ऋणोरपोऽअनवद्यार्णायूनेवृत्रंपुरुकुत्सायरंधीः ॥ अजावृतऽइंद्रशूरपत्नीर्द्यांचयेभिःपुरुहूतनूनं । रक्षोऽअग्निमशुषं
तूर्वयाणंसिंहोनदमेऽअपांसिवस्तोः ॥ शेषन्नुतऽइंद्रसस्मिन्योनौप्रशस्तयेपवीरवस्यमह्ना । सृजदर्णांस्यवयद्युधागास्ति
ष्ठद्धरीधृषतामृष्टवाजान् ॥ वहकुत्समिंद्रयस्मिन्चाकन्त्स्यूमन्यूऽऋज्रावातस्याश्वा । प्रसूरश्चक्रंवृहतादभीकेभिस्पृधो
यासिषद्वज्रबाहुः ॥ १६ ॥ जघन्वाँऽइंद्रमित्रेरूञ्चोदप्रवृद्धोहरिवोऽअदाशून् । प्रयेपश्यन्नर्यमणंसचायोस्त्वयाशूर्ता
वहमानाऽअपत्यं ॥ रपत्कविरिंद्रार्कसातौक्षांदासायोपवर्हणींकः । करत्तिस्रोमघवादानुचित्रानिदुर्योणेकुयवाचंमृ
धिश्रेत् ॥ सनातातऽइंद्रनव्याऽआगुःसहोनभोविरणायपूर्वीः । भिनत्पुरोनभिदोऽअदेवीर्ननमोवधरदेवस्यपीयोः + ॥

(१।२३।१०) त्वंराजेतिदशर्चस्यसूक्तस्यअगस्त्यइंद्रस्त्रिष्टुप् ।

त्वंधुनिरिंद्रधुनिमतीर्ऋणोरपःसीरानस्रवंतीः । प्रयत्समुद्रमतिशूरपर्षिपारयातुर्वशंयदुंस्वस्ति ॥ त्वमस्माकमिंद्रवि
श्वधंस्याऽअवृकतमोनरांनृपाता । सनोविश्वासांस्पृधांसहोदाविद्यामेषंवृजनंजीरदानुं ॥ १७ ॥ (१।२३।११) म
त्स्यपायितेमहःपात्रस्येवहरिवोमत्सरोमदः । वृषातेवृष्णऽइंदुर्वाजीसहस्रसातमः ॥ आनस्तेगंतुमत्सरोवृषामदोवरे
ण्यः । सहावाँऽइंद्रसानसिःपृतनाषाळमर्त्यः ॥ त्वंहिशूरःसनिताचोदयोमनुषोरथं । सहावांदस्युमव्रतमोषःपात्रंनशो
चिषा ॥ मुषायसूर्यंकवेचक्रमीशानऽओजसा । वहशुष्णायवधंकुत्संवातस्याश्वैः ॥ शुष्मिन्तमोहितेमदोद्युम्निन्तमऽ
उतक्रतुः । वृत्रघ्नावरिवोविदामंसीष्ठाऽअश्वसातमः ॥ यथापूर्वेभ्योजरितृभ्यऽइंद्रमयऽइवापोनतृष्यतेबभूथ । ता
मनुत्वानिविदंजोहवीमिविद्यामेषंवृजनंजीरदानुं ॥ १८ ॥ (१।२३।१२) मत्सिनोवस्यइष्टयऽइंद्रमिंदोवृषाविश ।
ऋघायमाणऽइन्वसिशत्रुमंतिनविंदसि ॥ तस्मिन्नावेशयागिरोयऽएकश्चर्षणीनां । अनुस्वधायमुप्यतेयवंनचर्कृषद्वृषा ॥
यस्यविश्वानिहस्तयोःपंचक्षितीनांवसु । स्पाशयस्वयोऽअस्मध्रुग्दिव्येवाशनिर्जहि ॥ असुन्वंतंसमंजहिदूणाशंयोनते
मयः । अस्मभ्यमस्यवेदनंदद्धिसूरिश्चिदोहते ॥ आवोयस्यद्विबर्हसोर्केषुसानुषगसत् । आजाविंद्रस्येंदोप्रावोवाजेषु

(१।२३।११) मत्स्यपायीतिषळर्चस्यसूक्तस्यअगस्त्यइंद्रोनुष्टुप्आद्यास्कंधोग्रीवीअंत्यात्रिष्टुप् । (१।२३।१२) मत्सिनइतिषळर्चस्यसूक्तस्यअगस्त्यइंद्रोनुष्टुबंत्यात्रिष्टुप् ।

वाजिनं ॥ यथापूर्वेभ्योजरितृभ्यंऽइंद्रमयऽइवापोनतृष्यतेबभूथ । तामनुत्वानिविदंजोहवीमिविद्यामेषंवृजनंजीरदानुं ॥ १९ ॥ (१।२३।१३) आचर्षणिप्रावृषभोजनानांराजाकृष्टीनांपुरुहूतऽइंद्रः । स्तुतःश्रवस्यन्नवसोपमद्रिग्युक्त्वाहरीवृषणायाह्यर्वाङ्+ ॥ येतेवृषणोवृषभासऽइंद्रब्रह्मयुजोवृषरथासोऽअत्याः । ताँऽआतिष्ठतेभिरायाह्यर्वाङ्हवामहेत्वासुतऽइंद्रसोमे ॥ आतिष्ठरथंवृषणंवृषातेसुतःसोमःपरिषिक्तामधूनि । युक्त्वावृषभ्यांवृषभक्षितीनांहरिभ्यांयाहिप्रवतोपमद्रिक्+ ॥ अयंयज्ञोदेवयाऽअयंमियेधऽइमाब्रह्माण्ययमिंद्रसोमः । स्तीर्णंबर्हिरातुशक्रप्रयाहिपिबानिषद्यविमुचाहरीऽइह+ ॥ ओसुष्टुतऽइंद्रयाह्यर्वाङुपब्रह्माणिमान्यस्यकारोः । विद्याम‌वस्तोरवसागृणंतोविद्यामेषंवृजनंजीरदानुं ॥ २० ॥ (१।२३।१४) यद्धस्यातेऽइंद्रश्रुष्टिरस्तिययाबभूथजरितृभ्यऽऊती । मानःकाममहयंतमाधग्विश्वातेऽअश्यांपर्यापऽआयोः+ ॥ नघाराजेंद्रऽआदभन्नोयानुस्वसाराकृणवंतयोनौ । आपश्चिदस्मैसुतुकाऽअवेषन्गमन्नऽइंद्रःसख्यावयश्च ॥ जेतानृभिरिंद्रःपृत्सुशूरःश्रोताहवंनाधमानस्यकारोः । प्रभर्तारथंदाशुषऽउपाकऽउद्यंतागिरोयदिचत्मनाभूत्+ ॥ एवानृभिरिंद्रःसुश्रवस्याप्रखादःपृक्षोऽअभिमित्रिणोभूत् । समर्यऽइषःस्तवतेविवाचिसत्राकरोयजमानस्यशंसः ॥ त्वयावयंमघवन्निंद्रशत्रूनभिष्यामममहतोमन्यमानान् । त्वंत्रातात्वमुनोवृधेभू

(१।२३।१३) आचर्षणिप्राइतिपंचर्चस्यसूक्तस्यअगस्त्यइंद्रस्त्रिष्टुप् । (१।२३।१४) यद्धस्यातइतिपंचर्चस्यसूक्तस्यअगस्त्यइंद्रस्त्रिष्टुप् ।

वि॒द्यामे॒षंवृ॒जनं॑जी॒रदा॑नुं ॥ २१ ॥ (१।२३।१५) पू॒र्वीर॒हंश॒रदः॑शश्रमा॒णादो॒षावस्तो॑रु॒षसो॑ज॒रयं॑तीः । मि॒नाति॒श्रियं॑ज॒रि॒मात॒नूना॒मप्यू॒नुपत्नी॒र्वृष॑णोजगम्युः ॥ येचि॒द्धिपूर्व॑ऽऋ॒तसा॑प॒ऽआस॑न्त्सा॒कंदे॒वेभि॒रव॑दन्नृ॒तानि॑ । तेचि॒दवा॑सु॒र्न॒ह्यंत॑मा॒पुःसमू॒नुपत्नी॒र्वृष॑भि॒र्जगम्युः ॥ नमृषा॑श्रा॒न्तंयदवं॑तिदे॒वाविश्वा॒ऽइत्स्पृधो॑ऽअ॒भ्य॑श्नवाव । जया॒वेदत्र॑श॒तनी॑थमा॒जिंयत्सं॒म्यंचा॑मिथु॒नाव॒भ्यजा॑व ॥ न॒दस्य॑मारु॒धतः॑का॒मऽआग॑न्नि॒तऽआजा॑तोऽअ॒मुतः॑कुत॑श्चित् । लोपा॑मुद्रा॒वृष॑णं॒नीरि॑णाति॒धीर॒मधी॑राधयतिश्व॒संतं॑ ॥ इ॒मंनुसोम॒मंति॑तोहृ॒त्सुपी॒तमुप॑ब्रुवे । यत्सी॒माग॑श्चकृ॒मातत्सुमृ॑ळतुपुलु॒कामो॒हिमर्त्यः॑ ॥ अ॒गस्त्यः॒खन॑मानःख॒नित्रैः॑प्र॒जामप॑त्यं॒बल॑मि॒च्छमा॑नः । उ॒भौवर्णा॒वृषि॑रु॒ग्रःपु॑पोषस॒त्यादे॒वेष्वा॒शिषो॑जगाम ॥ २२ ॥ (१।२४।१) यु॒वोरजां॑सिसु॒यमा॑सो॒ऽअश्वा॒रथो॒यद्वां॒पर्यर्णां॑सि॒दीय॑त् । हि॒र॒ण्ययावां॒प॒वयः॑प्रुषा॒यन्मध्वः॒पिबं॑ताऽउ॒षसः॑सचेथे ॥ यु॒वमत्य॒स्याव॑नक्षथो॒यद्विप॑त्मनो॒नर्य॑स्य॒प्रय॑ज्योः । स्वसा॒यद्वां॑विश्वगू॒र्ती॑भरा॑ति॒वाजा॒येट्टे॑मधुपावि॒षेचे॑ ॥ यु॒वंपय॑ऽउ॒स्रिया॑यामधत्तंप॒क्वमा॒माया॒मव॒पूर्व्यं॒गोः । अ॒न्तर्यद्व॒निनो॑वामृतप्सूह्वा॒रोनशुचि॒र्यज॑तेह॒विष्मा॑न् ॥ यु॒वंह॑घ॒र्मंमधु॑मंत॒मत्र॑ये॒पोनक्षोदो॑वृणीतमे॒षे । तद्वां॑नरावश्विना॒पश्व॑ऽइष्टी॒रथ्ये॑वच॒क्राप्रति॑यंति॒मध्वः॑ ॥ आवां॑दा॒नाय॑

(१।२३।१५) पूर्वीरहमितिषळर्चस्यसूक्तस्यागस्त्यःआद्ययोर्द्वयोर्लोपामुद्राऋषिकाअंत्ययोर्द्वयोरगस्त्यंतेवासीब्रह्मचारीऋषिःसर्वासांरतिर्देवतात्रिष्टुप्पंचमीबृहती । (१।२४।१) युवोर[illegible]अश्विनौत्रिष्टुप् ।

ववृतीयदस्रा॒गोरोहैणतौ॒ग्र्योनजिव्रि॑ः । अ॒पः॑क्षो॒णीस॑चत॒मा॑हि॑नावा॒जू॒र्णा॑वा॒मक्षु॒रं॑हं॑सो॑यजत्रा ॥ २३ ॥ नियद्यु॒वेथें॑नि॒युतं॑ःसुदानू॒ऽउप॑स्व॒धाभिः॑सृजथ॒ःपुरं॑धिं । प्रेष॒द्वेष॒द्वातो॒नसू॒रिरा॑म॒हेद॑देसु॒व्र॒तोनवाजं॑ ॥ व॒यंचि॒द्धिवां॑जरि॒तार॑ःस॒त्याविप॒न्याम॑हे॒विप॒णिर्हि॒तावा॑न् । अधा॑चि॒द्धिष्मा॑श्विनावनिं॑द्यापा॒थोहिष्मा॑वृषणा॒वंति॑देवं ॥ यु॒वांचि॒द्धिष्मा॑श्विना॒वनु॒द्यून्विरु॑द्रस्य॒प्रस्र॒वण॑स्यसा॒तौ । अ॒गस्त्यो॑न॒रांनृषु॒प्रश॑स्त॒ःकारा॑धुनीवचितयत्स॒हस्रैः॑ ॥ प्रयद्वहे॑थेमहि॒नारथ॑स्य॒प्रस्पं॑द्राया॒थोमनु॑षा॒नहोता॑ । ध॒त्तंसू॒रिभ्य॑ऽउ॒तवा॒स्वश्व्य॒ंनास॑त्यारयि॒षाच॑ःस्याम ॥ तंवां॒रथं॑व॒यम॒द्याहु॑वेम॒स्तोमै॑रश्विनासुवि॒ताय॒नव्यं॑ । अरि॑ष्टनेमिं॒परि॒द्यामि॑या॒नंवि॒द्यामे॒षंवृ॒जनं॑जी॒रदा॑नुं ॥ २४ ॥ (१।२४।२) कदु॒प्रेष्ठा॑वि॒षांर॑यी॒णाम॑ध्व॒र्यंता॒यदुन्नि॑नी॒थोऽअ॒पां । अ॒यंवां॑य॒ज्ञोऽअ॑कृ॒तप्रश॑स्ति॒वसु॑धिती॒ऽअवि॑ताराजनानां ॥ आवा॒मश्वा॑स॒ःशुच॑यःपय॒स्पावात॑रंहसोदि॒व्यास॒ोऽअत्या॑ः । म॒नो॒जुवो॒वृष॑णोवी॒तपृ॑ष्ठा॒ऽएहस्व॒राजो॑ऽअ॒श्विना॑वहंतु ॥ आवां॒रथो॒वनि॒र्न॒प्रवत्वा॑न्त्सृ॒प्रवं॑धुरःसुवि॒तार्य॑गम्याः । वृष्णः॑स्थाता॒रामन॑सो॒जवी॑यान॒हंपू॒र्वोय॑ज॒तोधि॑ष्ण्या॒यः+ ॥ इ॒हेह॑जा॒तासम॑वावशीतामरे॒पसा॑त॒न्वा॒३नाम॑भि॒ःस्वैः । जि॒ष्णुर्वा॑म॒न्यःसुम॑खस्यसू॒रिर्दि॒वोऽअ॒न्यःसु॒भगः॑पु॒त्रऽऊ॑हे ॥ प्रवां॑निचे॒रुःक॑कु॒होवशाँ॒ऽअनु॑पि॒शंग॑रूप॒ःसद॑नानिगम्याः । हरी॑ऽअ॒न्यस्य॑पी॒पयं॑त॒वाजै॑र्म॒थ्रारजां॑स्यश्विना॒विघोषैः॑ ॥ २५ ॥ प्रवां॑श॒रद्वा॑न्वृष॒भोननि॒ःषाट्पू॒र्वी

(१।२४।२) कदुप्रेष्ठेतिनवर्चस्यसूक्तस्यअगस्त्योश्विनौत्रिष्टुप् ।

रिषंश्चरतिमध्वऽइषणन् । एवैरन्यस्यंपीपयंतवाजैर्वेषंतीरूर्ध्वानद्योनऽआगुः ॥ असंजिवांस्थविरावेधसागीर्बाह्ळेऽअं
श्विनात्रेधाक्षरंती । उपस्तुताववतंनाधमानंयामन्नयामन्छृणुतंहवंमे ॥ उतस्यावांरुशतोवप्ससोगीस्त्रिबर्हिषिसदसि
पिन्वतेनॄन् । वृषावांमेघोवृषणापीपायगोर्नसेकेमनुषोदशस्यन्+ ॥ युवांपूषेवाश्विनापुरंधिरग्निमुषांनजरतेहविष्मा
न् । हुवेयद्वांवरिवस्यागृणानोविद्यामेषंवृजनंजीरदानुं ॥ २६ ॥ (१।२४।३) अभूदिदंवयुनमोषुभूषतारथोवृष
ण्वान्मदतामनीषिणः । धियंजिन्वाधिष्ण्याविश्पलावसूदिवोनपातासुकृतेशुचिंव्रता ॥ इंद्रंतमाहिधिष्ण्यामरुत्तमा
दस्रादंसिष्ठारथ्यारथीतमा । पूर्णंरथंवहेथेमध्वऽआचितंतेनदाश्वांसमुपयाथोऽअश्विना ॥ किमत्रदस्राकृणुथःकिमा
साथेजनोयःकश्चिदहविर्महीयते । अतिक्रमिष्टंजुरतंपणेरसुंज्योतिर्विप्रायकृणुतंवचस्यवे ॥ जंभयतमभितोरायतःशु
नोहतंमृधोविदथुस्तान्यश्विना । वाचंवाचंजरितूरत्निनींकृतमुभाशंसंनासत्यावतंमम ॥ युवमेतंचक्रथुःसिंधुषुप्लवमा
त्मन्वंतंपक्षिणंतौग्र्यायकं । येनदेवत्रामनसानिरूहथुःसुपप्तनीपेतथुःक्षोदसोमहः+ ॥ २७ ॥ अवविद्धंतौग्र्यमप्स्वं१
तरनारंभणेतमसिप्रविद्धं । चतस्रोनावोजठलस्यजुष्टाऽउदश्विभ्यामिषिताःपारयंति ॥ कःस्विद्वृक्षोनिष्ठितोमध्येऽ
अर्णसोयंतौग्र्योनाधितःपर्यषस्वजत् । पर्णामृगस्यपतरोरिवारभऽउदश्विनाऽऊहथुःश्रोमतायकं+ ॥ तद्वांनरानास

(१।२४।३) अभूदिदमित्यष्टर्चस्यसूक्तस्यअग[illegible]भौ ।

त्या॒वनु॑ष्या॒द्यद्वा॒माना॑सऽउ॒चथ॒मवो॑चन्। अ॒स्माद॒द्यसद॑सः सो॒म्यादा॑वि॒द्यामे॒षंवृ॒जनं॑जी॒रदा॑नुं ॥ २८ ॥ (१।२४।४)
तंयुँजा॒थांमन॑सो॒योजवी॑यान्त्रिवं॒धुरोवृ॑षणा॒यस्त्रि॑च॒क्रः। येनो॑पया॒थःसु॒कृतो॑दुरो॒णंत्रि॒धातु॑नापतथो॒विर्नप॒र्णैः+ ॥ सु॒वृ
द्रथो॑वर्तते॒यन्न॒भिक्षा॑यत्तिष्ठ॑थ॒ःक्रतु॑मं॒तानु॑पृ॒क्षे। वपु॑र्वपु॒ष्यास॑चतामि॒यंगीर्दि॒वोदु॑हि॒त्रोषसा॑सचेथे ॥ आति॑ष्ठतंसु॒वृतं॒यो
रथो॒वा॑मनु॑व्र॒तानि॒वर्तं॑तेह॒विष्मा॑न्। येन॑नरानासत्येष॒यध्यै॑व॒र्तिर्या॒थस्तन॑याय॒त्मने॑च ॥ मावा॒ंवृको॒मावृ॒कीरा॑दंधर्षी॒न्मा
परि॑वर्क्तमु॒तमाति॑धक्तं। अ॒यंवां॑भा॒गोनिहि॑तऽइ॒यंगीर्द॑स्रावि॒मेवां॑नि॒धयो॒मधू॑नां ॥ यु॒वांगोत॑मःपुरुमी॒ह्ळोऽअत्रि॒र्दस्रा॒ह
व॒तेव॑सेह॒विष्मा॑न्। दिशं॒नदि॒ष्टामृ॑जू॒येव॒यंतामे॒हवं॑नास॒त्योप॑यातं ॥ अता॑रिष्म॒तम॑सस्पा॒रम॒स्यप्रति॑वां॒स्तोमो॑ऽअश्वि
नावधायि। एहया॑तंप॒थिभि॑र्देव॒यानै॑र्वि॒द्यामे॒षंवृ॒जनं॑जी॒रदा॑नुं ॥ २९ ॥ इतिद्वितीयाष्टकेचतुर्थोऽध्यायः ॥ ४ ॥ ॥

द्वादशाध्याये वर्गाः २९ सूक्तानि १८ ऋचः १४२ ॥ त्यागः ॥ मरुद्भ्यइदं. १५ इंद्रायेदं. मरुद्भ्यइदं. २० इंद्रायेदं. १३ मरुद्भ्यइदं. २ मरुत्वतइंद्रायेदं. ४ मरुद्भ्यइदं. ३ इंद्रायेदं. ४५ रत्याइंद. ६ अश्विभ्यामिदं. ३३ ॥ इतिद्वितीयेचतुर्थः ॥ ४ ॥

तावांकतरैकादशंद्यावापृथिवीयमानोवैश्वदेवंपितुंन्वन्नस्तुतिर्गायत्रंत्वाद्यानुष्टुब्गर्भातृतीयांत्येपंचम्यांद्याश्चत स्रोनुष्टुभौत्याबृहतीवांसमिद्धआप्रियोंग्नेनयाष्टावाग्नेयंमनर्वाणंबार्हस्पत्यंकंकतःषोळशौपनिषदसृणसौर्यमानु

(१।२४।४) तंयुंजाथामितिषळर्चस्यसूक्तस्यअगस्त्योश्विनौत्रिष्टुप्।

ष्टुभैंविषशंकावानगस्त्यःप्राब्रवींद्दशम्याद्याश्चतिस्रोमहापंक्तयोंमहाबृहतीचंयआंगिरसःशौनहोत्रोभूत्वाभार्गवःशौनकोभवत्सगृत्समदोद्धितीयंमंडलमपश्यंत्त्वमग्नेजागतंतुयज्ञेनसप्तोनासमिद्धएकादशाप्रैंसप्तमीजगतींहुवेनवसोमाहुतिर्भार्गवोहंहोताष्टावानुष्टुभंमिमांमेगायत्रंहिंश्रेष्ठंषड्वाजयन्निवांत्यानुष्टुप् ॥ १ ॥

हरिःओम् ॥ (१।२४।५) तावा॑म॒द्यताव॑प॒रंहु॑वेमो॒च्छंत्या॑मु॒षसि॒वह्नि॑रु॒क्थैः । नास॑त्या॒कुहं॑चि॒त्संता॑व॒र्यो॑दि॒वोनपा॑तासु॒दास्त॑राय+ ॥ अ॒स्मेऽऊ॒षुवृ॑षणामादयेथा॒मुत्प॒णीँऽर्हं॑तमू॒र्म्या॑मदं॑ता । श्रु॒तंमे॒ऽअच्छो॑क्तिभिर्म॒तीनामेष्टा॑नरा॒निचे॑तारा॒चक॒र्णैः ॥ श्रि॒येपूं॑षन्निषु॒कृते॑वदे॒वानास॑त्यावह॒तुंसू॒र्याया॑ः । व॒च्यंते॑वांककु॒हाऽअ॒प्सुजा॒तायु॒गाजू॒र्णेव॒वरु॑णस्य॒भूरे॑ः ॥ अ॒स्मेसावां॑माध्वीरा॒तिर॑स्तु॒स्तोमं॑हिनोतंमा॒न्यस्य॑का॒रोः । अनु॒यद्वां॑श्रव॒स्या॑सुदानूसु॒वीर्या॑यचर्ष॒णयो॒मदं॑ति ॥ ए॒षवां॒स्तोमो॑ऽअश्विनावकारि॒माने॑भिर्मघवानासुवृ॒क्ति । या॒तंव॒र्तिस्त॑नयाय॒त्मने॑चा॒गस्त्ये॑नासत्या॒मदं॑ता ॥ अता॑रिष्म॒तम॑सस्पा॒रम॒स्यप्रति॑वां॒स्तोमो॑ऽअश्विनावधायि । एहया॑तंप॒थिभि॑र्देव॒यानै॑र्वि॒द्यामे॒षंवृ॒जनं॑जी॒रदा॑नुं ॥ १ ॥ (१।२४।६) कत॒रापूर्वा॑कत॒राप॑रा॒योःक॒थाजा॒तेक॑वयः॒कोविवे॑द । विश्वं॒त्मना॑बिभृतो॒यद्धनाम॒विव॑र्तते॒ऽअह॑नीच॒क्रियेव ॥ भूरिं॒द्वेऽअच॑रंती॒चर॑न्तंप॒द्वंत॒गर्भ॑म॒पदी॑दधाते । नित्यं॒नसू॒नुंपि॒त्रोरु॒पस्थे॒द्यावा॒रक्ष॑तंपृथिवीनो॒ऽअभ्वा॑त् ॥ अ॒नेहो॑दा॒त्रमदि॑तेरन॒

(१।२४।५) तावामितिषळर्चस्यसूक्तस्यागस्त्योश्विनौत्रिष्टुप् । (१।२४।६) कतरेत्येकादशर्चस्यसूक्तस्यअगस्त्योद्यावापृथिवीत्रिष्टुप् ।

वँहुवेस्वर्वर्दवधंनमस्वत् । तद्रोदसीजनयतंजरित्रद्यावा० ॥ अतप्यमानेऽअवसावँतीऽअनुष्यामरोदसीदेवपुत्रे । उभेदेवानामुभयेभिरह्नांद्यावा० ॥ संगच्छमानेयुवतीसमँतेस्वसाराजामीपित्रोरुपस्थे । अभिजिघ्रँतीभुवनस्यनाभिंद्यावा० ॥ २ ॥ उर्वीसद्मनीबृहतीऽऋतेनहुवेदेवानामवसाजनित्री । दधातेयेऽअमृतँसुप्रतीकेद्यावा० ॥ उर्वीपृथ्वीबहुलेदूरेऽअँतेऽउपब्रुवेनमसायज्ञेऽअस्मिन् । दधातेयेसुभगेसुप्रतूर्तीद्यावा० ॥ देवान्वायच्चकृमाकच्चिदागःसखायंवासदमिज्जास्पतिंवा । इयंधीर्भूयाऽअवयानमेषांद्यावा० ॥ उभाशंसानर्यामामविष्टामुभेमामूतीऽअवसासचेता । भूरिंचिदर्यःसुदास्तरायेषामदँतऽइषयेमदेवाः ॥ ऋतंदिवेतदवोचंपृथिव्याऽअभिश्रावायप्रथमंसुमेधाः । पातामवद्यादुरितादभीकेपितामाताचरक्षतामवोभिः ॥ इदंद्यावापृथिवीसत्यमस्तुपितर्मातर्यदिहोपब्रुवेवां । भूतंदेवानामवमेऽअवोभिर्विद्यामेषंवृजनँजीरदानुं ॥ ३ ॥ (१।२४।७) आनऽइळाभिर्विदथेसुशस्तिविश्वानरःसवितादेवऽएतु । अपियथायुवानोमत्सथानोविश्वंजगदभिपित्वेमनीषा ॥ आनोविश्वऽआस्क्रागमंतुदेवामित्रोऽअर्यमावरुणःसजोषाः । भुवन्यथानोविश्वेवृधासःकरन्त्सुषाहाविथुरंनशवः ॥ प्रेष्ठंवोऽअतिथिंगृणीषेग्निंशस्तिभिस्तुर्वणिःसजोषाः ।

(१।२४।७) आनइळेत्येकादशर्चस्यसूक्तस्यअगस्त्योविश्वेदेवास्त्रिष्टुप् (सूक्तभेदप्रयोगेतु-आद्यचतसृणांविश्वेदेवाःततएकस्याअहिर्बुध्न्यःततएकस्यास्त्वष्टाततएकस्याइंद्रःततोद्वयोर्मरुतःततोद्वयोर्विश्वेदेवाःएवमेकादश)।

असद्यथानोवरुणःसुकीर्तिरिषश्चपर्षदरिगूर्तःसूरिः+ ॥ उपवऽएषेनमसाजिगीषोषासानक्तासुदुघेवधेनुः । समानेऽअहन्विमिमानोऽअर्कंविषुरूपेपयसिसस्मिन्नूधन् ॥ उतनोहिर्बुध्न्योमयस्कःशिशुंनपिप्युषीववेतिसिंधुः । येननपातमपांजुनामर्मनोजुवोवृषणोयंवहंति ॥ ४ ॥ उतनऽईंत्वष्टागंत्वच्छास्मत्सूरिभिरभिपित्वेसजोषाः । आवृत्रहेंद्रश्चर्षणिप्रास्तुविष्टमोनरांनऽइहगम्याः ॥ उतनईंमतयोश्वयोगाःशिशुंनगावस्तरुणंरिहंति । तमींगिरोजनयोनपत्नीःसुरभिष्टमंनरांनसंत ॥ उतनऽईंमरुतोवृद्धसेनाःस्मद्रोदसीसमनसःसदंतु । पृषदश्वासोवनयोनरथारिशादसोमित्रयुजोनदेवाः+ ॥ प्रनुयदेषांमहिनाचिकित्रेप्रयुंजतेप्रयुजस्तेसुवृक्ति । अधयदेषांसुदिनेनशरुर्विश्वमेरिणंप्रुषायंतसेनाः ॥ प्रोऽअश्विनाववसेकृणुध्वंप्रपूषणंस्वतवसोहिसंति । अद्वेषोविष्णुर्वातऽऋभुक्षाऽअच्छासुम्नायववृतीयदेवान्+ ॥ इयंसावोऽअस्मेदीधितिर्यजत्राऽअपिप्राणीचसदनीचभूयाः । नियादेवेषुयततेवसूयुर्विद्यामेषंवृजनंजीरदानुं ॥५॥ (१।२४।८) पितुंनुस्तोषंमहोधर्माणंतविषीं । यस्यत्रितोव्योजसावृत्रंविपर्वमर्दयत् ॥ स्वादोपितोमधोपितोवयंत्वाववृमहे । अस्माकमविताभव ॥ उपनःपितवाचरशिवःशिवाभिरूतिभिः । मयोभुरद्विषेण्यःसखासुशेवोऽअद्वयाः ॥ तवत्येपितोरसारजांस्यनुविष्ठिताः । दिविवाताऽइवश्रिताः+ ॥ तवत्येपितोददतस्तवस्वादिष्ठतेपितो । प्रस्वाद्मानोरसानांतुविग्री

(१।२४।८) पितुंन्वित्येकादशर्चस्यसूक्तस्य अगस्त्योऽगायत्र्याद्यानुष्टुब्भागतीयापंचमाद्याश्चतस्रोनुष्टुभोंत्याबृहतीवा ।

वांऽइवेरते ॥ ६ ॥ त्वेपिंतोमहानांदेवानांमनोहितं । अकारिचारुकेतुनातवाहिमवंसावधीत् ॥ यद्दोपिंतोऽअजं
गन्विवस्वपर्वतानां । अत्रांचिन्नोमधोपितोरंभक्षायंगम्याः ॥ यदपामोषधीनांपरिंशमारिशामहे । वातापेपीवऽइद्भ्द
व ॥ यत्तेंसोमगवांशिरोयवांशिरोभजांमहे । वातापे० ॥ करंभऽओषधेभवपीवोंवृक्कऽउंदारथिः । वातापे० ॥
तंत्वांवयंपिंतोवचोंभिर्गावोनहव्यासुंषूदिम । देवेभ्यस्त्वासधमादंमस्मभ्यंत्वासधमादं ॥ ७ ॥ (१।२४।९) समिं
द्धोऽअद्यरांजसिदेवोदेवैःसंहस्रजित् । दूतोहव्याकविर्वंह ॥ तनूंनपादृतंयतेमध्वांयज्ञःसमंज्यते । दधंत्सहस्रिणीरि
षः ॥ आजुह्वांनोनऽईड्योंदेवाँऽआवंक्षियज्ञियांन् । अग्नेसहस्रसाऽअंसि ॥ प्राचीनंबर्हिरोजंसासहस्रंवीरमस्तृणन् ।
यत्रांदित्याविराजंथ ॥ विराट्सम्राड्विभ्वीःप्रभ्वीर्बह्वीश्चभूयंसीश्चयाः । दुरोंघृतान्यंक्षरन् ॥ ८ ॥ सुरुक्मेहिसुपेश
साधिंश्रियाविराजंतः । उषासावेहसींदतां ॥ प्रथमाहिसुवाचंसाहोतारादैव्यांकवी । यज्ञंनोंयक्षतामिमं ॥ भारती
ळेसरंस्वतियावःसर्वांऽउपब्रुवे । तानंश्चोदयतश्रिये ॥ त्वष्टांरूपाणिहिप्रभुःपशून्विश्वांन्त्समानजे । तेषांनःस्फाति
मायंज ॥ उपत्मन्यांवनस्पतेपाथोंदेवेभ्यंःसृज । अग्निर्हव्यानिंसिष्वदत् ॥ पुरोगाऽअग्निर्देवानांगायत्रेणसमंज्यते ।

(१।२४।९) समिद्धइत्येकादशर्चस्यसूक्तस्यअगस्त्यइध्मस्तनूनपादिळोबर्हिर्देवीर्द्वारउषासानक्तादैव्यौहोतारौसरस्वतीळाभारत्यस्त्वष्टा
वनस्पतिस्वाहाकृतयइतिक्रमेणदेवताःगायत्रीच्छंदः ।

स्वाहाकृतीषुरोचते ॥ ९ ॥ (१।२४।१०) अग्नेनयसुपथारायेऽअस्मान्विश्वानिदेववयुनानिविद्वान् । युयोध्य१
स्मज्जुहुराणमेनोभूयिष्ठांतेनमऽउक्तिंविधेम ॥ अग्नेत्वंपारयानव्योऽअस्मान्त्स्वस्तिभिरतिदुर्गाणिविश्वा । पूश्चपृथ्वी
बहुलानऽउर्वीभवातोकायतनयायशंयोः+ ॥ अग्नेत्वमस्मद्युयोध्यमीवाऽअनग्नित्राऽअभ्यमंतकृष्टीः । पुनरस्मभ्यंसु
वितायदेववक्षांविश्वेभिरमृतेभिर्यजत्र ॥ पाहिनोऽअग्नेपायुभिरजस्रैरुतप्रियेसदनऽआशुशुक्वान् । मातेभयंजरितारंय
विष्ठनूनंविदन्मापरंसहस्वः ॥ मानोऽअग्नेवसृजोऽअघायाविष्यवेरिपवेदुच्छुनायै । मादत्वतेदशतेमादतेनोमारीषंते
सहसावन्परादाः ॥ १० ॥ विघत्वावाँऽऋतजातयंसद्गृणानोऽअग्नेतन्वे३वरूथं । विश्वाद्रिरिक्षोरुतवानिनित्सोरभि
ह्रुतामसिहिदेवविष्पट्+ ॥ त्वंताँऽअग्नऽउभयान्विविद्वान्वेषिप्रपित्वेमनुषोयजत्र । अभिपित्वेमनवेशास्योभूर्मर्मृजे
न्यऽउशिग्भिर्नाक्रः+ ॥ अवोचामनिवचनान्यस्मिन्मानस्यसूनुःसहसानेऽअग्नौ । वयंसहस्रमृषिभिःसनेमविद्यामेषंवृ
जनंजीरदानुं ॥ ११ ॥ (१।२४।११) अनर्वाणंवृषभंमंद्रजिह्वंबृहस्पतिंवर्धयानव्यमर्कैः । गाथान्यःसुरुचोयस्यदे
वाऽआशृण्वंतिनवमानस्यमर्ताः ॥ तमृत्वियाऽउपवाचःसचंतेसर्गोनयोदेवयतामसर्जि । बृहस्पतिःसह्यंजोवरांसिवि
भ्वाभवत्समृतेमातरिश्वा ॥ उपस्तुतिंनमसऽउद्यतिंचश्लोकंयंसत्सवितेवप्रबाहू । अस्यक्रत्वाहन्यो३योऽअस्तिमृगोन

(१।२४।१०) अग्नेनयेत्यष्टर्चस्यसूक्तस्यअगस्त्योग्निस्त्रिष्टुप् । (१।२४।११) अनर्वाणमित्यष्टर्चस्यसूक्तस्यअगस्त्योबृहस्पतिस्त्रिष्टुप् ।

भीमोऽअरक्षसस्तुविष्मान् ॥ अस्यश्लोकोदिवीयतेपृथिव्यामत्योनयंसद्यक्षभृद्विचेताः । मृगाणांनहेतयोयंतिचेमाबृह
स्पतेरहिमायाँऽअभिद्यून्+ ॥ येत्वादेवोस्त्रिकंमन्यमानाःपापाभद्रमुपजीवंतिपज्राः । नदूढ्ये३ अनुददासिवामंबृहस्प
तेचयसऽइतिपियारुं ॥ १२ ॥ सुप्रैतुःसूयवसोनपंथादुर्नियंतुःपरिप्रीतोनमित्रः । अनर्वाणोऽअभियेचक्षतेनोपीवृताऽ
अपोर्णुवंतोऽअस्थुः ॥ संयंस्तुभोवनयोनयंतिसमुद्रंनस्रवतोरोधचक्राः । सविद्वाँऽउभयंचष्टेऽअंतर्बृहस्पतिस्तरऽआप
श्चगृध्रः ॥ एवामहस्तुविजातस्तुविष्मान्बृहस्पतिर्वृषभोधायिदेवः । सनःस्तुतोवीरवद्धातुगोमद्विद्यामेषंवृजनंजीरदा
नुं ॥ १३ ॥ (१।२४।१२) कंकतोनकंकतोथोसतीनकंकतः । द्वावितिप्लुषीऽइतिन्यं१दृष्टाऽअलिप्सत ॥ अदृष्टा
न्हंत्यायत्यथोहंतिपरायती । अथोऽअवघ्नतीहंत्यथोपिनष्टिपिंषती+ ॥ शरासःकुशरासोदर्भासःसैर्याऽउत । मौंजा
ऽअदृष्टावैरिणाःसर्वेसाकंन्यलिप्सत ॥ निगावोगोष्ठेऽअसदन्निमृगासोऽअविक्षत । निकेतवोजनानांन्यं१दृष्टाऽअलि
प्सत ॥ एतऽउत्येप्रत्यदृश्रन्प्रदोषंतस्कराऽइव । अदृष्टाविश्वदृष्टाःप्रतिबुद्धाऽअभूतन ॥ १४ ॥ द्यौर्वःपितापृथिवी
मातासोमोभ्रातादितिःस्वसा । अदृष्टाविश्वदृष्टास्तिष्ठतेलयतासुकं ॥ येऽअंस्यायेऽअंग्याःसूचीकायेप्रकंकताः । अदृ
ष्टाःकिंचनेहवःसर्वेसाकंनिजस्यत ॥ उत्पुरस्तात्सूर्यऽएतिविश्वदृष्टोऽअदृष्टहा । अदृष्टान्त्सर्वान्जंभयन्त्सर्वाश्चयातुधा ॥३३॥

(१।२४।१२)कंकतइतिषोळशर्चस्यसूक्तस्यअगस्त्योमृणसूर्याअनुष्टुप्दशम्याद्यास्तिस्रोमहापंक्तयस्त्रयोदशीमहाबृहती(विषघ्नमेतत्सूक्तं) ।

न्यः ॥ उदपप्तदसौसूर्यःपुरुविश्वानिनिजूर्वन् । आदित्यःपर्वतेभ्योविश्वदृष्टोऽअदृष्टहा+ ॥ सूर्येविषमासंजामिदृतिंसुरावतोगृहे । सोचिन्नुनमरातिनोवयंमरामारेऽअस्ययोजनंहरिष्ठामधुत्वामधुलाचकार ॥ १५ ॥ इयत्तिकाशकुंतिकासकाजघासतेविषं । सोचिन्नु० ॥ त्रिःसप्तविष्पुलिंगकाविषस्यपुष्पमक्षन् । ताश्चिन्नु० ॥ नवानांनवतीनांविषस्यरोपुषीणां । सर्वासामग्रभंनामारे० ॥ त्रिःसप्तमयूर्यःसप्तस्वसारोऽअग्रुवः । तास्तेविषंविजभ्रिरऽउदकंकुंभिनीरिव ॥ इयत्तकःकुषुंभकस्तकंभिनद्म्यश्मना । ततोविषंप्रवावृतेपराचीरनुसंवतः ॥ कुषुंभकस्तदब्रवीद्गिरेःप्रवर्तमानकः । वृश्चिकस्यारसंविषमरसंवृश्चिकतेविषं ॥ १६ ॥ (इतिशातर्चिंनंप्रथमंमंडलं ॥ अत्रसूक्तानि १९१) ॥ ॥ (परिशिष्टं ॥ माबिभेर्नमरिष्यसिपरित्वापामिसर्वतः । घनेनहन्मिवृश्चिकमहिंदंडेनागतं ॥ आदित्यरथवेगेनविष्णुबाहुबलेनच । गरुडपक्षनिपातेनभूमिंगच्छमहायशाः ॥ गरुडस्यजातमात्रेणत्रयोलोकाःप्रकंपिताः । प्रकंपितामहीसर्वासशैलवनकानना ॥ गगनंनष्टचंद्रार्कज्योतिषंनप्रकाशते । देवताभयभीताश्चमारुतोनप्लवायतिमारुतोनप्लवायत्योंनमः ॥ भोसर्पभद्रभद्रंतेदूरंगच्छमहायशाः । जनमेजयस्ययज्ञांतेऽआस्तीकवचनंस्मर ॥ आस्तीकवचनंश्रुत्वायःसर्पोननिवर्तते । शतधाभिद्यतेमूर्ध्निशिंशवृक्षफलंयथा ॥ नर्मदायैनमःप्रातर्नर्मदायैनमोनिशि । नमोस्तुनर्मदेतुभ्यंत्राहिमांविषसर्पतः ॥

योजरत्कारुणाजातोजरत्कन्यांमहायशाः । तस्यसर्पापभद्रंतेदूरंगच्छमहायशाः ॥ १ ॥) ॥ (२।१।१) त्वमग्नेद्यु
भिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि । त्वंवनेभ्यस्त्वमोषधीभ्यस्त्वंनृणांनृपतेजायसेशुचिः ॥ तवाग्नेहोत्रंतव
पोत्रमृत्वियंतवनेष्ट्रंत्वमग्निर्ऋतायतः । तवप्रशास्त्रंत्वमध्वरीयसिब्रह्माचासिगृहपतिश्चनोदमे ॥ त्वमग्नऽइंद्रोवृषभःस ॥३४॥
तामसित्वंविष्णुरुरुगायोनमस्यः । त्वंब्रह्मारयिविद्ब्रह्मणस्पतेत्वंविधर्तःसचसेपुरंध्या ॥ त्वमग्नेराजावरुणोधृतव्रतस्त्वं
मित्रोभवसिदस्मऽईड्यः । त्वमर्यमासत्पतिर्यस्यसंभुजंत्वमंशोविदथेदेवभाजयुः+ ॥ त्वमग्नेत्वष्टाविधतेसुवीर्यंतवग्ना
वोमित्रमहःसजात्यं । त्वमाशुहेमाररिषेस्वश्व्यंत्वंनरांशर्धोऽअसिपुरूवसुः ॥ १७ ॥ त्वमग्नेरुद्रोऽअसुरोमहोदिवस्त्वं
शर्धोमारुतंपृक्षऽईशिषे । त्वंवातैररुणैर्यासिशंगयस्त्वंपूषाविधतःपासिनुत्मना ॥ त्वमग्नेद्रविणोदाऽअरंकृतेत्वंदेवः
सवितारत्नधाऽअसि । त्वंभगोनृपतेवस्वऽईशिषेत्वंपायुर्दमेयस्तेविधत् ॥ त्वामग्नेदमऽआविश्पतिंविशस्त्वांराजा
नंसुविदत्रमृंजते । त्वंविश्वानिस्वनीकपत्यसेत्वंसहस्राणिशतादशप्रति ॥ त्वामग्नेपितरमिष्टिभिर्नरस्त्वांभ्रात्राय
शम्यातनूरुचं । त्वंपुत्रोभवसियस्तेविधत्त्वंसखासुशेवःपास्याधृषः ॥ त्वमग्नऽऋभुराकेनमस्य१स्त्वंवाजस्यक्षुमतो ॥३४॥
रायऽईशिषे । त्वंविभास्यनुदक्षिदावनेत्वंविशिक्षुरसियज्ञमातनिः ॥ १८ ॥ त्वमग्नेऽअदितिर्देवदाशुषेत्वंहोत्राभार

(२।१।१) (अथगार्त्समदेद्वितीयेमंडलेचतस्रोनुवाकाः) ॥ त्वमग्नइतिषोळशर्चस्यसूक्तस्यशौनकोगृत्समदोग्निर्जगती ।

तीवर्धसेगिरा । त्वमिळाशतहिमासिदक्षसेत्वंवृत्रहावसुपतेसरस्वती ॥ त्वमग्नेसुभृतऽउत्तमंवयस्तवस्पार्हेवर्णऽआसंदृ
शिश्रियः । त्वंवाजःप्रतरणोबृहन्नसित्वंरयिर्बहुलोविश्वतस्पृथुः+ ॥ त्वामग्नऽआदित्यासऽआस्यं१त्वांजिह्वांशुचयश्च
क्रिरेकवे । त्वांरातिषाचोऽअध्वरेषुसश्चिरेत्वेदेवाहविरदंत्याहुतं ॥ त्वेऽअग्नेविश्वेऽअमृतासोऽअद्रुहऽआसादेवाहवि
रदंत्याहुतं । त्वयामर्तासःस्वदंतऽआसुतिंत्वंगर्भोवीरुधांजज्ञिषेशुचिः ॥ त्वंतान्संचप्रतिचासिमज्मनाग्नेसुजातप्रचदे
वरिच्यसे । पृक्षोयदत्रमहिनावितेभुवदनुद्यावापृथिवीरोदसीऽउभे+ ॥ येस्तोतृभ्योगोऽअग्रामश्वपेशसमग्नेरातिमुपसृ
जंतिसूरयः । अस्मान्चतांश्चप्रहिनेषिवस्यऽआबृहद्वदेमविदथेसुवीराः ॥ १९ ॥ (२।१।२) यज्ञेनवर्धतजातवेदसम
ग्निंयजध्वंहविषातनागिरा । समिधानंसुप्रयसंस्वर्णरंद्युक्षंहोतारंवृजनेषुधूर्षदं ॥ अभित्वानक्तीरुषसोववाशिरेग्नेवत्संन
स्वसरेषुधेनवः । दिवऽइवेदरतिर्मानुषायुगाक्षपोभासिपुरुवारसंयतः ॥ तंदेवाबुध्नेरजसःसुदंससंदिवस्पृथिव्योररतिं
न्येरिरे । रथमिववेद्यंशुक्रशोचिषमग्निंमित्रंनक्षितिषुप्रशंस्यं ॥ तमुक्षमाणंरजसिस्वऽआदमेचंद्रमिवसुरुचंह्वारऽआद
धुः । पृश्न्याःपतरंचितयंतमक्षभिःपाथोनपायुंजनसीऽउभेऽअनु ॥ सहोताविश्वंपरिभूत्वध्वरंतमुहव्यैर्मनुषऽऋंजते
गिरा । हिरिशिप्रोवृधसानासुजर्भुरद्द्यौर्नस्तृभिश्चितयद्रोदसीऽअनु ॥ २० ॥ सनोरेवत्समिधानःस्वस्तयेसंददस्वान्र

(२।१।२) यज्ञेनेतित्रयोदशर्चस्यसूक्तस्यगृत्समदोग्निर्जगती ।

यिमस्मासुदीदिहि । आनःकृणुष्वसुवितायरोदसीऽअग्नेहव्यामनुषोदेववीतये ॥ दानोऽअग्नेबृहतोदाःसहस्रिणोदु
रोनवाजंश्रुत्याऽअपावृधि । प्राचीद्यावापृथिवीब्रह्मणाकृधिस्व१र्णशुक्रमुषसोविदिद्युतुः ॥ सऽइधानऽउषसोराम्याऽ
अनुस्व१र्णदीदेदरुषेणभानुना । होत्राभिरग्निर्मनुषःस्वध्वरोराजाविशामतिथिश्चारुरायवे ॥ एवानोऽअग्नेऽअमृतेषु
पूर्व्यधीष्पीपायबृहद्दिवेषुमानुषा । दुहानाधेनुर्वृजनेषुकारवेत्मनाशतिनंपुरुरूपमिषणि ॥ वयमग्नेऽअर्वतावासुवीर्यं
ब्रह्मणावाचितयेमाजनाँऽअति । अस्माकंद्युम्नमधिपंचकृष्टिषूच्चास्व१र्णशुशुचीतदुष्टरं ॥ सनोबोधिसहस्यप्रशंस्योय
स्मिन्त्सुजाताऽइषयंतसूरयः । यमग्नेयज्ञमुपयंतिवाजिनोनित्येतोकेदीदिवांसंस्वेदमे ॥ उभयासोजातवेदःस्यामतेस्तो
तारोऽअग्नेसूरयश्चशर्मणि । वस्वोरायःपुरुश्चंद्रस्यभूयसःप्रजावतःस्वपत्यस्यशग्धिनः ॥ येस्तोतृभ्योगोऽअग्रामश्वपेश
समग्नेरातिमुपसृजंतिसूरयः । अस्माऽन्चतांश्चप्रहिनेषिवस्यऽआबृहद्वदेमविदथेसुविराः ॥ २१ ॥ (२।१।३) समिद्धो
ऽअग्निर्निहितःपृथिव्यांप्रत्यङ्विश्वानिभुवनान्यस्थात् । होतापावकःप्रदिवःसुमेधादेवोदेवान्यजत्वग्निरर्हन् ॥ नरा
शंसःप्रतिधामान्यंजन्तिस्रोदिवःप्रतिमह्नास्वर्चिः । घृतप्रुषामनसाहव्यमुंदन्मूर्धन्यज्ञस्यसमनक्तुदेवान् ॥ ईळितोऽ

(२।१।३) समिद्धोअग्निरित्येकादशर्चस्यसूक्तस्यगृत्समदइध्मोनराशंसइळोबर्हिर्देवीर्द्वारउषासानक्तादैव्यौहोतारौसरस्वातीळाभारत्य
स्त्वष्टावनस्पतिस्वाहाकृतयइतिक्रमेणदेवतात्रिष्टुप्षष्ठीसप्तम्यौजगत्यौ ।

अ॑ग्ने॒मन॑सा॒नो॒ऽअर्ह॑न्दे॒वान्य॑क्षि॒मानु॑षा॒त्पूर्वो॑ऽअ॒द्य । सऽआव॑हम॒रुता॑ꣳशर्धो॒ऽअच्यु॑त॒मिं॑द्र॑न्नरोव॒र्हि॒षद॑य्यजध्वं ॥ दे॒वं॑ब
र्हि॒र्वर्ध॑मानꣳसु॒वीर॑ꣳस्ती॒र्णꣳरा॒येसु॒भर॒ंवेद्य॒स्यां । घृ॒तेना॒क्तंव॑सवःसीदते॒दंविश्वे॑दे॒वाऽआदि॒त्याय॒ज्ञिया॑सः ॥ विश्र॑यन्तामु॒र्वि
याहू॒यमा॑ना॒द्वारो॑दे॒वीःसु॑प्राय॒णानमो॑भिः । व्यच॑स्वती॒र्वि॑प्र॑थन्तामजु॒र्या॑वर्णं॑पुना॒नाय॒शस॑ꣳसु॒वीर॑ं ॥ २२ ॥ सा॒ध्वपा॑ꣳसि
स॒नता॑नऽउक्षि॒तेऽउ॒षासा॒नक्ता॑व॒य्येवर॑ण्वि॒ते । तन्तु॑न्त॒तꣳसं॒वय॑न्तीस॒मीचीय॒ज्ञस्य॒पेश॑ःसुदु॒घेपय॑स्वती ॥ दैव्या॒होता॑राप्रथ॒
मावि॒दुष्ट॑रऽऋ॒जुय॑क्षत॒ःसमृ॒चाव॒पुष्ट॑रा । दे॒वान्यज॑न्तावृ॒तु॒थासम॑ञ्जतो॒नाभा॑पृथि॒व्याऽअधि॒सानु॑षुत्रि॒षु⁺ ॥ सर॑स्वती
सा॒धय॑न्ती॒धिय॑न्न॒ऽइळा॑दे॒वीभार॑तीवि॒श्वतू॑र्तिः । ति॒स्रोदे॒वीःस्व॒धया॑ब॒र्हिरे॑दमच्छि॑द्रंपा॑न्तुशर॒णन्नि॒षद्य॑ ॥ पि॒शङ्ग॑रूपःसुभ
रो॑वय॒ोधाःश्रु॒ष्टीवी॒रोजा॑यतेदे॒वका॑मः । प्र॒जान्त्वष्टा॒विष्य॑तु॒नाभि॑म॒स्मेऽअथा॑दे॒वाना॒मप्ये॑तु॒पाथ॑ः ॥ वन॒स्पति॑रवसृ॒जन्नु
प॑स्थाद॒ग्निर्ह॒विःसू॑दयाति॒प्रधी॒भिः । त्रि॒धासम॑क्तंनयतुप्रजा॒नन्दे॒वेभ्यो॒दैव्य॑ःशमि॒तोप॑ह॒व्यं⁺ ॥ घृ॒तम्मि॑मिक्षेघृ॒तम॑स्य॒योनि॑र्घृ॒तेश्रि॒तोघृ॒तम्व॑स्य॒धाम॑ । अ॒नु॒ष्व॒धमाव॑हमा॒दय॑स्व॒स्वाहा॑कृतंवृषभवक्षिह॒व्यं⁺ ॥ २३ ॥ (२।१।४) हु॒वेवः॑सु॒द्यो
त्मा॑नंसुवृ॒क्तिंवि॒शाम॒ग्निमति॑थिꣳसुप्र॒यस॑ं । मि॒त्रऽइ॑व॒योदि॑धि॒षाय्यो॒भूद्दे॒वऽआदे॑वे॒जने॑जा॒तवे॑दाः ॥ इ॒मंवि॒धन्तो॑ऽअ॒पांस॒
धस्थे॑द्वि॒तादं॑धु॒र्भृग॑वोवि॒क्ष्वा॒३ योः । ए॒षविश्वा॑न्य॒भ्यस्तु॒भूमा॑दे॒वाना॑म॒ग्निर॑र॒तिर्जी॒राश्वः॑ ॥ अ॒ग्निंदे॒वासो॒मानु॑षीषुवि॒क्षु

(२।१।४) हुवेवइतिनवर्चस्यसूक्तस्यभार्गवःसोमाहुतिरग्निस्त्रिष्टुप् ।

प्रियंधुंःक्षेष्यंतोनमित्रं । सदींदयदुशतीरूर्म्याऽआदक्षाय्योयोदास्वतेदमऽआ⁺ ॥ अस्यरण्वास्वस्यैवपुष्टिःसंदृष्टिरस्य
हियानस्यदक्षोंः । वियोभरिंभ्रदोषंधीषुजिह्वामत्योनरथ्योंदोधवीतिवारांन् ॥ आयन्मेऽअभ्वंवनदःपनंतोशि
ग्भ्योनामिंमीतवर्णौं । सचित्रेणंचिकितेरंसुभासाजुंजुर्वांयोमुहुरायुवाभूत्⁺ ॥ २४ ॥ आयोवनांतातृषाणोनभातिवा
र्णपथारथ्येंवस्वानीत् । कृष्णाध्वातपूरण्वश्चिंकेतद्यौरिंवस्मयंमानोनभोंभिः ॥ सयोव्यस्थांदभिदक्षंदुर्वींपशुर्नैतिंस्वयुर
गोंपाः। अग्निःशोचिष्माँऽअतसान्युषणन्कृष्णव्यंथिरस्वदयन्नभूमं ॥ नूतेपूर्वस्यावंसोऽअधींतौतृतीयेंविदथेमन्मंशंसि।
अस्मेऽअंग्नेसंयद्वीरंबृहंतंक्षुमंतंवाजंस्वपत्यंरयिंदाः ॥ त्वयायथांगृत्समदासोंऽअग्नेगुहांवन्वंतऽउपंराँऽअभिष्युः। सुवी
रांसोऽअभिमातिषाहःस्मत्सूरिभ्योंगृणतेतद्वयोंधाः ॥२५॥ (२।१।५) होतांजनिष्टचेतंनःपितापितृभ्यंऽऊतयें। प्रयक्ष
न्जेन्यंवसुशकेमंवाजिनोयमं ॥ आयस्मिन्त्सप्तरश्मयंस्ततायज्ञस्यंनेतारिं । मनुष्वद्दैव्यंमष्टमंपोताविश्वंतदिंन्वति ॥
दधन्वेवायदीमनुवोचद्ब्रह्माणिवेरुतत् । परिविश्वांनिकाव्यांनेमिश्चक्रमिंवाभवत् ॥ साकंहिशुचिंनाशुचिंःप्रशास्ताक्र
तुनाजंनि । विद्वाँऽअंस्यव्रताध्रुवावयाऽइवानुंरोहते ॥ ताऽअंस्यवर्णमायुवोनेष्टुंःसचंतधेनवंः । कुवित्तिसृभ्यऽआव
रंस्वसांरोयाऽइदंययुः⁺ ॥ यदींमातुरुपस्वसांघृतंभरंत्यस्थित । तासांमध्वर्युरागंतौयवोंवृष्टीवंमोदते ॥ स्वःस्वायधा

(२।१।५) होताजनिष्टेत्यष्टर्चस्यसूक्तस्यसोमाहुतिरग्निरनुष्टुप् ।

Digitization by eGangotri. Funding IKS-MoE Delhi

यंसेकृणुतामृत्विगृत्विजं । स्तोमैंयज्ञंचादरंवनेमाररिमावय ॥ यथाविद्वाँऽअरंकरद्विश्वेंभ्योयजतेभ्यंः । अयमंग्नेत्वेऽ
अपियंयज्ञंचकृमावयं+ ॥ २६ ॥ (२।१।६) इमांमेंऽअग्नेसमिधमिमामुपसदंवनेः । इमाऽउषुश्रुधीगिरंः ॥ अया
तेंऽअग्नेविधेमोर्जोनपादश्वमिष्टे । एनासूक्तेनंसुजात ॥ तंत्वांगीर्भिर्गिर्वणसंद्रविणस्युंद्रविणोदः । सपर्येमंसपर्यवंः ॥
सबोंधिसूरिर्मघवावसुंपतेवसुंदावन् । युयोध्यं१स्मद्द्वेषांसि ॥ सनोंवृष्टिंदिवस्परिसनोवाजंमनर्वाणं । सनंःसहस्रिणी
रिषंः ॥ ईळांनायावस्यवेयविष्ठदूतनोगिरा । यजिष्ठहोतरागहि ॥ अंतर्ह्यंग्नऽईयंसेविद्वान्जन्मोभयांकवे । दूतोजन्यें
वमित्र्यंः ॥ सविद्वाँऽआचंपिप्रयोयक्षिचिकित्वऽआनुषक् । आचास्मिन्त्सत्सिबर्हिषि ॥ २७ ॥ (२।१।७) श्रेष्ठंय
विष्ठभारताग्नेंद्युमंतमाभंर । वसोंपुरुस्पृहंरयिं+ ॥ मानोऽअरांतिरीशतदेवस्यमर्त्यंस्यच । पर्षितस्यांऽउतद्विषः+ ॥
विश्वांऽउतत्वयांवयंधारांऽउदन्यांऽइव । अतिंगाहेमहिद्विषंः॥ शुचिंःपावकवंद्योग्नेबृहद्विरोंचसे। त्वंघृतेभिराहुंतः ॥
त्वंनोंऽअसिभारताग्नेंवशाभिंरुक्षभिंः। अष्टापंदीभिराहुंतः॥ द्रुंनःसर्पिरांसुतिःप्रत्नोहोतावरेंण्यः । सहंसस्पुत्रोऽअद्भुतः
॥ २८ ॥ (२।१।८) वाजयन्निवनूरथान्योगाँऽअग्नेरुपंस्तुहि । यशस्तंमस्यमीढुषंः ॥ यःसुनीथोददाशुषेंजुर्योजरयंन्न

(२।१।६) इमांमइत्यष्टर्चस्यसूक्तस्यसोमाहुतिरग्निर्गायत्री । (२।१।७) श्रेष्ठमितिषळर्चस्यसूक्तस्यसोमाहुतिरग्निर्गायत्री ।
(२।१।८) वाजयन्नितिषळर्चस्यसूक्तस्यगृत्समदोग्निर्गायत्र्यंत्यानुष्टुप् ।

रिं। चारुंप्रतीकऽआहुतः ॥ यऽउंश्रियादमेष्वादोषोषसिंप्रशस्यते । यस्यंव्रतंनमीयंते ॥ आयःस्वं१र्णभानुनाचित्रोवि
भात्यर्चिषा । अंजानोऽअजरैरभि ॥ अत्रिमनुंस्वराज्यमग्निमुक्थानिवावृधुः । विश्वाऽअधिश्रियोदधे ॥ अग्नेरिंद्रस्य
सोमस्यदेवानामूतिभिर्वयं । अरिष्यंतःसचेमह्यभिष्यामपृतन्यतः ॥ २९ ॥ इतिद्वितीयाष्टकेपंचमोऽध्यायः ॥ ५ ॥

त्रयोदशाध्याये वर्गाः २९ सूक्तानि १६ ऋचः १५९ ॥ त्यागः ॥ अश्विभ्यामिदं. ६ द्यावापृथिवीभ्यामिदं. ११ विश्वेभ्योदेवेभ्यइदं. ४ अहयेबुध्न्यायेदं. त्वष्ट्रइदं. इंद्रायेदं. मरुद्भ्यइदं. २ विश्वेभ्योदेवेभ्यइदं. २ अन्नायेदं. ११ समिद्धायाग्नयइदं. तनूनपातइदं. इळायेदं. बर्हिषइदं. देवीभ्योद्वार्भ्यइदं. उषासानक्ताभ्या. देवीभ्यांहोतृभ्यांप्रचेतोभ्यामिदं. सरस्वतीळाभारतीभ्यइदं. त्वष्ट्रइदं. वनस्पतयइदं. स्वाहाकृतीभ्यइदं. अग्नयइदं. ८ बृहस्पतयइदं. ८ अप्तृणसूर्येभ्यइदं. १३ अग्नयइदं. २९ समिद्धायाग्नयइदं. नराशंसायेदं. इळायेदं. बर्हिषइदं. देवीभ्योद्वार्भ्यइदं. उषासानक्ताभ्यामिदं. देवीभ्यांहोतृभ्यांप्रचेतोभ्यामिदं. सरस्वतीळाभारतीभ्यइदं. त्वष्ट्रइदं. वनस्पतयइदं. स्वाहाकृतीभ्यइदं. अग्नयइदं. ३७ ॥ इतिद्वितीयेपंचमः ॥ ५ ॥

निहोताजोहूत्रःश्रुधिसैकैंद्रंविराट्स्थानमृतेंत्यांयोजातःपंचोनंऋतुःसप्तोनांत्यात्रिष्टुबध्वर्यवोद्वादशंप्रघदशप्र
वोनवांत्यात्रिष्टुप्सदस्यैद्वित्रिष्टुबंतंप्रातरपायिवयंतेंसनोविराड्रूपाविश्वजितेषट्त्रिष्टुबंतंत्रिकद्रुकेषुचतुष्कंम
ष्याद्यतिशाक्करमंत्याष्टिर्वांगणानामेकोनाब्राह्मणस्पत्यंहबार्हस्पत्यास्तुदृष्टलिंगाःपंचदश्यंत्येत्रिष्टुभौ ॥ १ ॥ ॥३७॥

हरिःओम् ॥ (२।१।९) निहोता॑होतृ॒षद॑ने॒विदा॑नस्त्वे॒षोदी॑दि॒वाँऽअ॑सदत्सु॒दक्षः॑ । अद॑ब्धव्रतप्रमति॒र्वसि॑ष्ठःसहस्रं॑भ॒रःशुचि॑जिह्वोऽअ॒ग्निः+ ॥ त्वंदू॒तस्त्वमु॑नःपर॒स्पास्त्वंव॑स्य॒ऽआवृ॑षभप्रणे॒ता । अग्ने॑तो॒कस्य॑न॒स्तने॑त॒नूना॒मप्र॑युच्छ॒न्दीद्य॑द्बोधिगो॒पाः+ ॥ वि॒धेम॑तेपर॒मेजन्म॑न्नग्नेवि॒धेम॒स्तोमै॒रव॑रेस॒धस्थे॑ । यस्मा॒द्योने॑रु॒दारि॑था॒यजे॒तंप्रत्वे॑ह॒वींषि॑जुहु॒रेसमि॑द्धे ॥ अग्ने॒यज॑स्वह॒विषा॒यजी॑यान्छ्रु॒ष्टीदे॒ष्णम॒भिगृ॑णीहि॒राधः॑ । त्वंह्यसि॑रयि॒पती॑रयी॒णांत्वंशु॒क्रस्य॒वच॑सोम॒नोता॑ ॥ उ॒भयं॑ते॒नक्षी॑यतेवस॒व्यं॑दि॒वेदि॑वे॒जाय॑मानस्यदस्म । कृ॒धिक्षु॒मंतं॑जरि॒तार॑मग्नेकृ॒धिपतिं॑स्वप॒त्यस्य॑रा॒यः+ ॥ सैना॑नीकेनसुवि॒दत्रो॑ऽअ॒स्मेयष्टा॑दे॒वाँऽआय॑जिष्ठःस्व॒स्ति । अद॑ब्धोगो॒पाऽउ॒तनः॑पर॒स्पाऽअग्ने॑द्यु॒मदु॒तरे॒वद्दि॑दीहि ॥ १ ॥(२।१।१०) जो॒हूत्रो॑ऽअ॒ग्निःप्र॑थ॒मःपि॒तेवे॒ळस्प॒देमनु॑षा॒यत्समि॑द्धः । श्रियं॒वसा॑नोऽअ॒मृतो॒विचे॑तामर्मृ॒जेन्यः॑श्रव॒स्य॑१॒ःसवा॒जी+ ॥ श्रू॒याऽअ॒ग्निश्चि॒त्रभा॑नु॒र्हवं॑मे॒विश्वा॑भि॒र्गीर्भि॑र॒मृतो॒विचे॑ताः । श्या॒वारथं॑वह॒तोरोहि॑तावो॒तारु॒षाह॑चक्रे॒विभृ॑त्रः ॥ उ॒त्ता॒नाया॑मजनय॒न्त्सुषू॑तं॒भुव॑द॒ग्निःपु॑रु॒पेशा॑सु॒गर्भः॑ । शिरि॑णायां॑चिद॒क्तुना॒महो॑भि॒रप॑रीवृतोवसति॒प्रचे॑ताः ॥ जि॒घर्म्य॒ग्निंह॒विषा॑घृ॒तेन॑प्रतिक्षि॒यंतं॒भुव॑नानि॒विश्वा॑ । पृ॒थुंति॒रश्चा॑वय॑सा॒बृहं॒तं॒व्यचि॑ष्ठ॒मन्नै॑रभ॒संदृशा॑नं ॥ आवि॒श्वतः॑प्र॒त्यंचं॑जिघर्म्यर॒क्षसा॒मन॑सा॒तज्जु॑षेत । मर्य॑श्रीःस्पृह॒यद्व॑र्णोऽअ॒ग्निर्ना॑भि॒मृशे॑त॒न्वा॒३॒जर्भु॑राणः ॥ ज्ञे॒याभा॒गंस॑हसा॒नोवरे॑ण॒त्वादू॑तासोमनु॒

(२।१।९) निहोतेतिषळर्चस्यसूक्तस्यगृत्समदोऽग्निस्त्रिष्टुप् । (२।१।१०) जोहूत्रइतिषळर्चस्यसूक्तस्यगृत्समदोग्निस्त्रिष्टुप् ।

वद्देम । अनूनमग्निंजुह्वावचस्यामधुपृचंधनसाजोहवीमि ॥ २ ॥ (२।१।११) श्रुधीहवमिंद्रमारिषण्यःस्यामतेदावनेवसूनां । इमाहित्वामूर्जोवर्धयंतिवसूयवःसिंधवोनक्षरंतः ॥ सृजोमहीरिंद्रयाऽअपिन्वःपरिष्ठिताऽअहिनाशूरपूर्वीः । अमर्त्यंचिद्दासंमन्यमानमवाभिनदुक्थैर्वावृधानः+ ॥ उक्थेष्विन्नुशूरयेषुचाकन्स्तोमेष्विंद्ररुद्रियेषुच । तुभ्येदेतायासुमंदसानःप्रवायवेसिस्रतेनशुभ्राः+ ॥ शुभ्रंनुतेशुष्मंवर्धयंतःशुभ्रंवज्रंबाह्वोर्दधानाः । शुभ्रस्त्वमिंद्रवावृधानोऽअस्मेदासीर्विशःसूर्येणसह्याः ॥ गुहाहितंगुह्यंगूढमप्स्वपीवृतंमायिनंक्षियंतं । उतोऽअपोद्यांतस्तभ्वांसमहन्नहिंशूरवीर्येण ॥ ३ ॥ स्तवानुतऽइंद्रपूर्व्यामहान्युतस्तवामनूतनाकृतानि । स्तवावज्रंबाह्वोरुशंतंस्तवाहरीसूर्यस्यकेतू+ ॥ हरीनुतऽइंद्रवाजयंताघृतश्चुतंस्वारमस्वार्ष्टां । विसमनाभूमिरप्रथिष्टारंस्तपर्वतश्चित्सरिष्यन्+ ॥ निपर्वतःसाद्यप्रयुच्छन्त्संमातृभिर्वावशानोऽअक्रान् । दूरेपारेवाणींवर्धयंतऽइंद्रेषितांधमनिंपप्रथन्नि+ ॥ इंद्रोमहांसिंधुमाशयानंमायाविनंवृत्रमस्फुरन्निः । अरेजेतांरोदसीभियानेकनिक्रदतोवृष्णोऽअस्यवज्रात् ॥ अरोरवीद्वृष्णोऽअस्यवज्रोमानुषंयन्मानुषोनिजूर्वात् । निमायिनोदानवस्यमायाऽअपादयत्पपिवान्त्सुतस्य ॥ ४ ॥ पिबापिबेदिंद्रशूरसोमंमंदंतुत्वामंदिनःसुतासः । पृणंतस्तेकुक्षीवर्धयंत्वित्थासुतःपौरऽइंद्रमाव ॥ त्वेऽइंद्राप्यभूमविप्राधियंवनेमऽऋतयासपंतः । अवस्यवो

(२।१।११) श्रुधीहवमित्येकविंशत्यृचस्यसूक्तस्यगृत्समदइंद्रोविराट्स्थानाअंत्यात्रिष्टुप् ।

धीमहिप्रशस्तिंसद्यस्तेरायोदावनेस्याम ॥ स्यामतेतऽइंद्रयेतऽऊतीऽअवस्यवऽऊर्जंवर्धयंतः । शुष्मिन्तंमंयंचाकनामदे
वास्मेरयिंरासिवीरवंतं ॥ रासिक्षयंरासिमित्रमस्मेरासिशर्धऽइंद्रमारुतंनः । सजोषसोयेचमंदसानाःप्रवायवःपांत्यग्रे
णीतिं ॥ व्यंत्विन्नुयेषुमंदसानस्तृपत्सोमंपाहिद्रह्यदिंद्र । अस्मान्त्सुपृत्स्वातरुत्रावर्धयोद्यांबृहद्भिरर्कैः+ ॥ ५ ॥ बृहंत
ऽइन्नुयेतेतरुत्रोक्थेभिर्वासुम्नमाविवासान् । स्तृणानासोबर्हिःपस्त्यावत्त्वोताऽइदिंद्रवाजमग्मन् ॥ उग्रेष्विन्नुशूरमंद
सानस्त्रिकद्रुकेषुपाहिसोममिंद्र । प्रदोधुवच्छ्मश्रुषुप्रीणानोयाहिहरिभ्यांसुतस्यपीतिं+ ॥ धिष्वाशवःशूरयेनवृत्रमवा
भिनद्दानुमौर्णवाभं । अपावृणोर्ज्योतिरार्यायनिसव्यतःसादिदस्युरिंद्र ॥ सनेमयेतऽऊतिभिस्तरंतोविश्वाःस्पृधऽआ
र्येणदस्यून् । अस्मभ्यंतत्त्वाष्ट्रंविश्वरूपमरंधयःसाख्यस्यत्रितायं ॥ अस्यसुवानस्यमंदिनस्त्रितस्यन्यर्बुदंवावृधानोऽअं
स्तः । अवर्तयत्सूर्योनचक्रंभिनद्वलमिंद्रोऽअंगिरस्वान् ॥ नूनंसातेप्रतिवरंजरित्रेदुहीयदिंद्रदक्षिणामघोनी । शिक्षा
स्तोतृभ्योमातिधग्भगोनोबृहद्वदेमविदथेसुवीराः ॥ ६ ॥ (२।२।१) योजातऽएवप्रथमोमनस्वान्देवोदेवान्क्रतुना
पर्यभूषत् । यस्यशुष्माद्रोदसीऽअभ्यसेतांनृम्णस्यमह्नासजनासऽइंद्रः ॥ यःपृथिवींव्यथमानामदृंहद्यःपर्वतान्प्रकुपि
ताँऽअरम्णात् । योऽअंतरिक्षंविममेवरीयोयोद्यामस्तभ्नात्सजनासऽइंद्रः ॥ योहत्वाहिमरिणात्सप्तसिंधून्योगाऽउदा

(२।२।१) योजातइतिपंचदशर्चस्यसूक्तस्यगृत्समदइंद्रस्त्रिष्टुप् ।

जंदपधावलस्यं । योऽअश्मनोरंतरग्निंजजानसंवृक्समत्सुसजनासऽइंद्रः ॥ येनेमाविश्वाच्यवनाकृतानियोदासंवर्णम
धरंगुहाकः । श्वघ्नीवयोजिगीवाँलक्षमाददर्यःपुष्टानिस० ॥ यंस्मापृच्छंतिकुहसेतिघोरमुतेमाहुर्नैषोऽअस्तीत्येनं । सो
ऽअर्यःपुष्टीर्विजऽइवामिनातिश्रदस्मैधत्तस० ॥ ७ ॥ योरध्रस्यचोदितायःकृशस्ययोब्रह्मणोनाधमानस्यकीरेः । युक्त
ग्राव्णोयोविताशुशिप्रःसुतसोमस्यस० ॥ यस्याश्वासःप्रदिशियस्यगावोयस्यग्रामायस्यविश्वेरथासः । यःसूर्यंयऽउषसं
जजानयोऽअपांनेतासजनास० ॥ यंक्रंदसीसंयतीविह्वयेतेपरेवरऽउभयाऽअमित्राः । समानंचिद्रथमातस्थिवांसाना
नाहवेतेस० ॥ यस्मान्नऽऋतेविजयंतेजनासोयंयुध्यमानाऽअहसेहवंते । योविश्वस्यप्रतिमानंबभूवयोऽअच्युतच्युत्स० ॥
यःशश्वतोमह्येनोदधानानमन्यमानान्छर्वाजघान । यःशर्धतेनानुददातिशृध्यांयोदस्योर्हंतास० ॥ ८ ॥ यःशंबरं
पर्वतेषुक्षियंतंचत्वारिंश्यांशरद्यन्वविंदत् । ओजायमानंयोऽअहिंजघानदानुंशयानंस० ॥ यःसप्तरश्मिर्वृषभस्तुवि
ष्मानवासृजत्सर्तवेसप्तसिंधून् । योरौहिणमस्फुरद्वज्रबाहुर्द्यामारोहंतंस० ॥ द्यावाचिदस्मैपृथिवीनमेतेशुष्माच्चिदस्य
पर्वताभयंते । यःसोमपानिंचितोवज्रबाहुर्योवज्रहस्तःस० ॥ यःसुन्वंतमवतियःपचंतंयःशंसंतंयःशशमानमूती । यस्य
ब्रह्मवर्धनंयस्यसोमोयस्येदंराधःस० ॥ यःसुन्वतेपचतेदुध्रऽआचिद्वाजंदर्दर्षिसकिलासिसत्यः । वयंतऽइंद्रविश्वहप्रिया

सः॑सु॒वीरा॑सोवि॒दथ॒माव॑देम ॥ ९ ॥ (२।२।२) ऋ॒तुर्जनि॑त्री॒तस्या॑ऽअ॒पस्परि॑म॒क्षूजा॒तऽआवि॑श॒द्यासु॒वर्ध॑ते । तदा॑ह॒नाऽअ॑भवत्पि॒प्युषी॒पयो॒शोंः॑पी॒यूषं॑प्रथ॒मंतदु॒क्थ्यं॑* ॥ स॒ध्रीमाय॑ँति॒परि॒बिभ्र॑ती॒ःपयो॑वि॒श्वप्स्न्या॑य॒प्रभ॑रंत॒भोज॑नं । स॒मा॒नोऽअध्वा॑प्र॒वता॑मनु॒ष्यदे॒यस्ताकृ॑णोःप्रथ॒मंसास्यु॒क्थ्य॑ः* ॥ अन्वेको॑वदति॒यद्ददा॑ति॒तद्रू॒पामि॒नन्तद॑पा॒ऽएक॑ऽईयते । वि॒श्वाऽएक॑स्यवि॒नुद॑स्तितिक्षते॒यस्ता० । प्र॒जाभ्य॑ःपु॒ष्टिंवि॒भज॑ंतऽआसतेर॒यिमि॑वपृ॒ष्ठंप्र॒भव॑ंतमाय॒ते । असि॑न्व॒न्दंष्ट्रैः॑पि॒तुर॑त्ति॒भोज॑न॒ंयस्ता० ॥ अधा॑कृणोःपृथि॒वींसं॒दृशे॑दि॒वेयोधौ॑ती॒नाम॑हिह॒न्नारि॑णक्प॒थः । तंत्वा॒स्तोमे॑भिरु॒दभि॒र्नवा॒जिनं॑दे॒वंदे॒वाऽअ॑जन॒न्त्सा० ॥ १० ॥ योभोज॑नं॒चदय॑सेच॒वर्ध॑नमा॒र्द्राद॑ाशुष्कं॒मधु॑मद्दु॒दोहि॑थ । सशे॑वा॒धिंनिद॑धिषेवि॒वस्व॑ति॒विश्व॒स्यैक॑ऽईशिषे॒सा० ॥ यःपु॒ष्पिणी॑श्चप्र॒स्व॑श्चध॒र्मणाधि॒दाने॒व्य१॒वनी॒रधा॑रयः । यश्चास॑मा॒ऽअज॑नोदि॒द्युतो॑दि॒वऽउ॒रुरू॒र्वाँऽअ॒भित॒ःसा० ॥ योना॑र्म॒रंस॒हव॑सुंनिहंत॑वेपृ॒क्षाय॑चदा॒सवे॑शाय॒चाव॑हः । ऊ॒र्जय॑न्त्या॒ऽअप॑रिविष्टमा॒स्य॑मु॒तैवाद्यपु॑रुकृ॒त्सा० ॥ श॒तंवा॒यस्य॒दश॑सा॒कमाद्य॒ऽएक॑स्यश्रु॒ष्टौयद्ध॑चो॒दमावि॑थ । अ॒र॒ज्जौदस्यू॒न्त्समु॑नब्द॒भीत॑येसुप्रा॒व्यो॑ऽअभव॒ःसा० ॥ विश्वेदनु॑रोध॒नाऽअ॑स्य॒पौंस्यं॑द॒दुर॑स्मैदधि॒रेकृ॒त्नवे॒धनं॑ ॥ षळ॑स्तभ्नावि॒ष्टिर॒ःपंच॑सं॒दृश॒ःपरि॑प॒रोऽअ॑भव॒ःसा० ॥ ॥११॥ सु॒प्र॒वा॒च॒नंत॑ववीरवी॒र्यं॑१॒यदेके॑न॒क्रतु॑नावि॒न्दसे॒वसु॑ । जा॒तूष्ठि॑रस्य॒प्रवय॒ःसह॑स्वतो॒याच॒कर्थ॒सेंद्र॒विश्वा॑स्यु॒क्थ्य॑ः* ॥

(२।२।२) ऋतुर्जनित्रीतित्रयोदशर्चस्यसूक्तस्य [illegible] इंद्रो [illegible] त्रिष्टुप् ।

CC-0. Rao Acharya Kathmandu Collection

Digitization by eGangotri. Funding: MoE-Delhi

अरमयःसरपसस्तरायकंतुर्वीतयेचवय्यायचस्रुतिं । नीचासंतमुदनयःपरावृजंप्रांधंश्रोणंश्रवयन्त्सा० ॥ अस्मभ्यंतद्व
सोदानायराधःसमर्थयस्वबहुतेवसव्यं । इंद्रयच्चित्रंश्रवस्याऽअनुद्यून्बृहद्वदेमविदथेसुवीराः ॥ १२ ॥ (२।२।३)
अध्वर्यवोभरतेंद्रायसोममामत्रेभिःसिंचतामद्यमंधः । कामीहिवीरःसदमस्यपीतिंजुहोतवृष्णेतदिदेषवष्टि ॥ अध्वर्य
वोयोऽअपोवव्रिवांसंवृत्रंजघानाशन्येववृक्षं । तस्माऽएतंभरततद्वशायँऽएषऽइंद्रोऽअर्हतिपीतिमस्य ॥ अध्वर्यवोयोदृ
भीकंजघानयोगाऽउदाजदपहिवलंवः । तस्माऽएतमंतरिक्षेनवातमिंद्रंसोमैरोर्णुतजूर्नवस्त्रैः ॥ अध्वर्यवोयऽउरणंजघा
नन्नवचख्वांसंनवतिंचबाहून् । योऽअर्बुदमवनीचाबबाधेतमिंद्रंसोमस्यभृथेहिनोत ॥ अध्वर्यवोयःस्वश्नंजघानयःशु
ष्णमशुषंयोव्यंसं । यःपिप्रुंनमुचिंयोरुधिक्रांतस्माऽइंद्रायांधसोजुहोत ॥ अध्वर्यवोयःशतंशंबरस्यपुरोबिभेदाश्मनेवपू
र्वीः । योवर्चिनःशतमिंद्रःसहस्रमपावपद्भरतासोममस्मै ॥ १३ ॥ अध्वर्यवोयःशतमासहस्रंभूम्याऽउपस्थेवपज्जघ
न्वान् । कुत्सस्यायोरतिथिग्वस्यवीरान्न्यावृणग्भरतासोममस्मै ॥ अध्वर्यवोयन्नरःकामयाध्वेश्रुष्टीवहंतोनशथातदिं
द्रे । गभस्तिपूतंभरतश्रुतायेंद्रायसोमंयज्यवोजुहोत ॥ अध्वर्यवःकर्तनाश्रुष्टिमस्मैवनेनिपूतंवनऽउन्नयध्वं । जुषाणोह
स्त्यमभिवावशेवऽइंद्रायसोमंमदिरंजुहोत ॥ अध्वर्यवःपयसोधर्यथागोःसोमेभिरींपृणताभोजमिंद्रं । वेदाहमस्यनिभृं

(२।२।३) अध्वर्यवइतिद्वादशर्चस्यसूक्तस्यगृत्समदइंद्रस्त्रिष्टुप् ।

तंमऽए॒तद्दि॒त्सँ॑तं॒भूयो॑यज॒तश्चि॑केत ॥ अध्व॑र्यवो॒योदि॒व्यस्य॒वस्वो॒यःपार्थि॑वस्य॒क्षम्य॑स्य॒राजा॑ । तमूर्द॑रं॒नपृ॑णता॒यवे॒नेंद्रं॒सोमे॑भि॒स्तदपो॑वोऽअस्तु ॥ अ॒स्मभ्यं॒तद्व॑सोदा॒नाय॒राध॒ःसम॑र्थयस्वब॒हुते॑वस॒व्यं॑ । इंद्र॒यच्चि॒त्रंश्र॑व॒स्याऽअनु॒द्यून्बृ॒हद्व॑देमवि॒दथे॑सु॒वीरा॑ः ॥ १४ ॥ (२।२।४) प्रघा॒न्व॑स्यमह॒तोम॒हानि॑स॒त्यास॒त्यस्य॒कर॑णानिवोचं । त्रिक॑द्रुकेष्वपिबत्सु॒तस्या॒स्यमदे॒ऽअहि॒मिंद्रो॑जघान ॥ अ॒वं॒शेद्याम॑स्तभायद्बृ॒हंत॒मारोद॑सीऽअपृणद॒ंतरि॑क्षं । सधा॑रयत्पृथि॒वींप॒प्रथ॑च्च॒सोम॑स्य॒तामद॒ऽइंद्र॑श्चका॑र ॥ सद्मे॑व॒प्राचो॒विमि॑माय॒माने॒र्वज्रे॑ण॒खान्य॑तृणन्न॒दीनां॑ । वृथा॑सृजत्प॒थिभि॑र्दीर्घ॑या॒थैःसोम॑स्य॒० ॥ सप्र॑वो॒ळ्हॄन्प॑रि॒गत्या॑द॒भीते॒र्विश्व॑मधा॒गायु॑धमि॒द्धेऽअ॒ग्नौ । संगोभि॒रश्वै॑रसृज॒द्रथे॑भि॒ःसोम॑स्य॒० ॥ सऽईं॑म॒हींधुनि॒मेतो॑ररम्णा॒त्सोऽअ॑स्ना॒तॄन्पारयत्स्व॒स्ति । तऽउ॒त्स्नाय॑र॒यिम॒भिप्रत॑स्थु॒ःसोम॑स्य॒० ॥ १५ ॥ सोद॑ंचं॒सिंधु॑मरिणान्महि॒त्वावज्रे॒णानं॑ऽउ॒षस॒ःसंपि॑पेष । अ॒ज॒वसो॑ज॒विनी॑भिर्वि॑वृ॒श्चन्त्सोम॑स्य॒० ॥ सवि॒द्वाँऽअ॑पगो॒हंक॒नीना॑मा॒विर्भ॑व॒न्नुद॑तिष्ठत्परा॒वृक् । प्रति॑श्रो॒णःस्था॒द्व्यं॑१॒नग॑चष्ट॒सोम॑स्य॒० ॥ भि॒नद्व॒लमंगि॑रोभिर्गृ॒णानो॒विपर्व॑तस्यदृंहि॒तान्यै॑रत् । रि॒णग्रोधा॑ंसिकृ॒त्रिमा॑ण्येषा॒ंसोम॑स्य॒० ॥ स्वप्ने॑ना॒भ्युप्या॒चुमु॑रि॒ंधुनिं॑चज॒घं॑थ॒दस्युं॑प्रद॒भीति॑मावः । र॒ंभीचि॒दत्र॑विविदे॒हिर॑ण्यं॒सोम॑स्य॒० ॥ नू॒नंसा॒ते॒० ॥ १६ ॥ (२।२।५) प्रवः॑स॒तांज्येष्ठ॑तमायसुष्टु॒तिम॒ग्नावि॑वसमि॒धानेह॒विर्भ॑रे । इंद्र॑मजु॒र्यं॑ज॒रयं॑तमु॒क्षि॒तंस॒नाद्युवा॑न॒मव॑सेहवामहे ॥

(२।२।४) प्रघान्वितिदशर्चस्यसूक्तस्यगृत्समदइंद्रस्त्रिष्टुप् । (२।२।५) प्रवःसतामितिनवर्चस्यसूक्तस्यगृत्समदइंद्रोजगत्यंत्यात्रिष्टुप् ।

यस्मादिंद्राद्बृहतःकिंचनेमृतेविश्वान्यस्मिन्त्संभृताधिवीर्या । जठरेसोमंतन्वी३ सहोमहोहस्तेवज्रंभरतिशीर्षणिक्रतुं ॥ न
क्षोणीभ्यांपरिभ्वेतऽइंद्रियंनसमुद्रैःपर्वतैरिंद्रतेरथः । नतेवज्रमन्वश्नोतिकश्चनयदाशुभिःपतसियोजनापुरु ॥ विश्वेह्य
स्मैयजतायधृष्णवेक्रतुंभरंतिवृषभायसश्चते । वृषायजस्वहविषाविदुष्टरःपिबेंद्रसोमंवृषभेणभानुना ॥ वृष्णःकोशःपवते
मध्वऽऊर्मिर्वृषभान्नायवृषभायपातवे । वृषणाध्वर्यूवृषभासोऽअद्रयोवृषणंसोमंवृषभायसुष्वति ॥१७॥ वृषातेवज्रऽउ
ततेवृषारथोवृषणाहरीवृषभाण्यायुधा । वृष्णोमदस्यवृषभत्वमीशिषऽइंद्रसोमस्यवृषभस्यतृप्णुहि ॥ प्रतेनावंनसमने
वचस्युवंब्रह्मणायामिसवनेषुदाधृषिः । कुविन्नोऽअस्यवचसोनिबोधिषदिंद्रमुत्संनवसुनःसिचामहे ॥ पुरासंबाधादभ्या
ववृत्स्वनोधेनुर्नवत्संयवसस्यपिप्युषी । सकृत्सुतेसुमतिभिःशतक्रतोसंपत्नीभिर्नवृषणोनसीमहि ॥ नूनंसाते० ॥ १८ ॥
(२।२।६) तदस्मैनव्यमंगिरस्वदर्चतशुष्मायदस्यप्रत्नथोदीरते । विश्वायद्गोत्रासहसापरीवृतामदेसोमस्यदृंहितान्यैरं
यत् ॥ सभूतुयोहप्रथमायधायसऽओजोमिमानोमहिमानमातिरत् । शूरोयोयुत्सुतन्वंपरिव्यतशीर्षणिद्यांमहिनाप्र
त्यमुंचत ॥ अधाकृणोःप्रथमंवीर्यंमहद्यदस्याग्रेब्रह्मणाशुष्ममैरयः । रथेष्ठेनहर्यश्वेनविच्युताःप्रजीरयःसिस्रतेसध्य१
क्पृथक् ॥ अधायोविश्वाभुवनाभिमज्मनेशानकृत्प्रवयाऽअभ्यवर्धत । आद्रोदसीज्योतिषावह्निरातनोत्सीव्यन्तमां

(२।२।६) तदस्माइतिनवर्चस्यसूक्तस्यगृत्समदइंद्रोजगत्यंत्येद्वेत्रिष्टुभौ ।

सि॒दुधि॑ता॒सम॑व्ययत् ॥ सप्रा॒चीना॒न्पर्व॑तान्दृंह॒दोज॑साधरा॒चीन॑मकृणोद॒पामपः॑ । अधा॑रयत्पृथि॒वीं॑वि॒श्वधा॑यस॒मस्त॑भ्नान्मा॒यया॒द्याम॑व॒स्रसः॑ ॥ १९ ॥ सास्मा॒ऽअरं॑बा॒हुभ्या॒ं॑यंपि॒ताकृ॑णो॒द्विश्व॑स्मा॒दाज॒नुषो॒वेद॑स॒स्परि॑ । येना॑पृथि॒व्यांनिक्रिविं॑श॒यध्यै॒वज्रे॑णह॒त्व्यवृं॑णक्तुवि॒ष्वाणिः॑ ॥ अ॒मा॒जूरि॑वपि॒त्रोःसचा॑स॒तीस॑मा॒नादास॑दस॒स्त्वामि॑ये॒भगं॑ । कृ॒धिप्र॑के॒तमु॑प॑मा॒स्याभ॑रद॒द्धिभा॒गंत॒न्वो॒३॒॑येन॑मा॒मह॑ः ॥ भो॒जंत्वामिं॑द्रव॒यंहु॑वेमद॒दिष्ट्वमिं॑द्रा॒पांसि॒वाजा॑न् । अ॒वि॒ड्ढीं॑द्रचि॒त्रया॑नऊ॒तीकृ॒धिवृ॑षन्निंद्र॒वस्य॑सोनः ॥ नू॒नंसा॑ते॒प्र० ॥ २० ॥ (२।२।७) प्रा॒तार॑थो॒नवो॑योजि॒सस्नि॒श्चतु॑र्युगस्त्रिक॒शःस॒प्तर॑श्मिः । दशा॑रित्रोम॒नुष्यः॑स्व॒र्षाःसऽइ॒ष्टिभि॑र्म॒तिभी॒रंह्यो॑भूत् ॥ सास्मा॒ऽअरं॑प्रथ॒मंसद्वि॒तीय॑मु॒तोतृ॒तीयं॒मनु॑षः॒सहोता॑ । अ॒न्यस्या॒गर्भ॑म॒न्यऽऊं॑जनंत॒सोऽअ॒न्येभिः॑सचते॒जेन्यो॒वृषा॑ ॥ हरी॒नुकं॒रथ॒ऽइंद्र॑स्ययोजमा॒यैसू॒क्तेन॒वच॑सा॒नवे॑न । मोषुत्वाम॒त्रब॒हवो॒हिविप्रा॒निरी॑रम॒न्यज॑मानासोऽअ॒न्ये ॥ आद्वाभ्या॒ंहरि॑भ्यामिंद्रया॒ह्याच॒तुर्भि॒राष॒ड्भिर्हू॒यमा॑नः । आष्टाभि॑र्द॒शभिः॑सोम॒पेय॑म॒यंसु॒तःसु॑मख॒मामृध॑स्कः ॥ आविं॑श॒त्यात्रिं॒शता॑याह्य॒र्वाङाच॑त्वारिं॒शता॒हरि॑भिर्युजा॒नः । आपं॑चा॒शता॑सु॒रथे॑भिरिं॒द्रा॒षष्ट्या॒सप्त॒त्यासो॑म॒पेयं॑ ॥ २१ ॥ आशी॒त्यान॑व॒त्याया॑ह्य॒र्वाङा॒शतेन॒हरि॑भिरु॒ह्यमा॑नः । अ॒यंहि॑ते॒शुन॒हो॑त्रेषु॒सोम॒ऽइंद्र॑त्वा॒याप॑रिषि॒क्तोमदा॑य ॥ मम॒ब्रह्मे॑ंद्रया॒ह्यच्छा॒विश्वा॒हरी॑धु॒रिधि॑ष्वा॒रथ॑स्य । पु॒रु॒त्राहिवि॒हव्यो॑ब॒भूथा॒

(२।२।७) प्रातारथइतिनवर्चस्यसूक्तस्यगृत्समदऽइंद्रस्त्रिष्टुप् ।

CC-0. Ravi Acharya Kathmandu Collection

स्मिन्छूरसवनेमादयस्व ॥ नमऽइंद्रेणसख्यावियोषदस्मभ्यमस्यदक्षिणादुहीत । उपज्येष्ठेवरूथेगभस्तौप्रायेप्रायेजिगी
वांसःस्याम ॥ नूनंसाते० ॥ २२ ॥ (२।२।८) अपाय्यस्यांधसोमदायमनीषिणःसुवानस्यप्रयसः । यस्मिन्निंद्रःप्र
दिविवावृधानऽओकोदधेब्रह्मण्यंतश्चनरः ॥ अस्यमंदानोमध्वोवज्रहस्तोहिमिंद्रोऽअर्णोवृतंविवृश्चत् । प्रयद्वयोनस्वस
राण्यच्छाप्रयांसिचनदीनांचक्रमंत ॥ समाहिनऽइंद्रोऽअर्णोऽअपांप्रैरयदहिहाच्छासमुद्रं । अजनयत्सूर्यंविदद्गाऽअक्तु
नाह्नांवयुनानिसाधत् ॥ सोऽअप्रतीनिमनवेपुरूणींद्रोदाशद्दाशुषेहंतिवृत्रं । सद्योयोनृभ्योऽअतसाय्योभूत्पस्पृधाने
भ्यःसूर्यस्यसातौ+ ॥ ससुन्वतऽइंद्रःसूर्यमादेवोरिणङ्मर्त्यायस्तवान् । आयद्रयिंगुहदवद्यमस्मैभरदंशंनैतशोदशस्यन्+
॥ २३ ॥ सरंधयत्सदिवःसारथयेशुष्णमशुषंकुयवंकुत्साय । दिवोदासायनवतिंचनवेंद्रःपुरोव्यैरच्छंबरस्य ॥ एवा
तऽइंद्रोचथमहेमश्रवस्यानत्मनावाजयंतः । अश्यामतत्साप्तमाशुषाणाननमोवधरदेवस्यपीयोः+ ॥ एवातेगृत्ससदाः
शूरमन्मावस्यवोनवयुनानितक्षुः । ब्रह्मण्यंतऽइंद्रतेनवीयऽइषमूर्जंसुक्षितिंसुम्नमश्युः ॥ नूनंसाते० ॥२४॥ (२।२।९)
वयंतेवयऽइंद्रविद्धिषुणःप्रभरामहेवाजयुर्नरथं । विपन्यवोदीध्यतोमनीषासुम्नमियक्षंतस्त्वावतोनॄन्+ ॥ त्वंनऽइंद्र
त्वाभिरूतीत्वायतोऽअभिष्टिपासिजनान् । त्वमिनोदाशुषोवरूथेत्थाधीरभियोनक्षतित्वा ॥ सनोयुवेंद्रोजोहूत्रःसखा

(२।२।८) अपाय्यस्येतिनवर्चस्यसूक्तस्यगृत्समदइंद्रस्त्रिष्टुप् । (२।२।९) वयंतइतिनवर्चस्यसूक्तस्यगृत्समदइंद्रस्त्रिष्टुप्तृतीयाविराड्रूपा ।

शिवोनरामंस्तुपाता । यःशंसैंतंयःशशमानमूतीपचैंतंचस्तुवंतैंचप्रणेषत् ॥ तमुंस्तुषऽइंद्रंतंगृणीषेयस्मिन्पुरावावृधुः
शाशदुश्चं । सवस्वःकामैंपीपरदियानोब्रह्मण्यतोनूतंनस्यायोः+ ॥ सोऽअंगिरसामुचथाजुजुष्वान्ब्रह्मातूतोदिंद्रोगातु
मिष्णन् । मुष्णन्नुषसःसूर्यैणस्तवानश्वंस्यचिच्छिश्नथत्पूर्व्याणि ॥ २५ ॥ सहंश्रुतऽइंद्रोनामंदेवऽऊर्ध्वोभुवन्मनुंषेद्
स्मतंमः । अवंप्रियमर्शसानस्यंसाह्वान्छिरोंभरद्दासस्यंस्वधावान् ॥ सवृंत्रहेंद्रःकृष्णयोंनीःपुरंदरोदासीरैरयद्धि । अ
जंनयुन्मनंवेक्षामपश्चंसत्राशंसंयजंमानस्यतूतोत् ॥ तस्मैंतवस्यं१मनुंदायिसत्रेंद्रायदेवेभिरर्णसातौ । प्रतियदंस्यवज्रं
वाह्वोर्धुर्हत्वीदस्यून्पुरऽआयंसीर्निंतारीत् ॥ नूनंसाते० ॥२६॥ (२।२।१०) विश्वजितेंधनजितेंस्वर्जितेंसत्राजितेंनृजि
तेऽउर्वराजितें । अश्वजितेंगोजितेऽअब्जितेंभरेंद्रायसोमंयजतायंहर्यतं+ ॥ अभिभुवेंभिभंगायंवन्वतेषाळ्हायसहंमानाय
वेधसें । तुविग्रयेवह्नयेदुष्टरींतवेसत्रासाहेनमऽइंद्रायवोचत ॥ सत्रासाहोजंनभक्षोजंनंसहश्च्यवंनोयुध्मोऽअनुजोषंमु
क्षितः । वृतंचयःसहुरिर्विक्ष्वारितऽइंद्रंस्यवोचंप्रकृतानिंवीर्या* ॥ अनानुदोवृंषभोदोधंतोवधोगंभीरऽऋष्वोऽअसंम
ष्टकाव्यः । रध्रचोदःश्नथंनोवीळितस्पृथुरिंद्रःसुयज्ञऽउषसःस्वंर्जनत् ॥ यज्ञेनंगातुमप्तुरोंविविद्रिरेधियोंहिन्वानाऽउ
शिजोंमनीषिणंः । अभिस्वरांनिषदागाऽअंवस्यवऽइंद्रेंहिन्वानाद्रविंणान्याशत ॥ इंद्रश्रेष्ठांनिद्रविंणानिधेहिचित्तिं

(२।२।१०) विश्वजितइतिषळर्चस्यसूक्तस्यगृत्समदऋषिःइंद्रोदेवतात्रिष्टुप् ।

दक्षस्यसुभगत्वमस्मे । पोषंरयीणामरिष्टिंतनूनांस्वाद्मानंवाचःसुदिनत्वमह्नां ॥ २७ ॥ (२।२।११) त्रिकद्रु
केषुमहिषोयवाशिरंतुविशुष्मस्तृपत्सोमंमपिबद्विष्णुनासुतंयथावशत् । सऽईंममादमहिकर्मकर्तवेमहामुरुंसैनंसश्चद्दे
वोदेवंसत्यमिंद्रंसत्यऽइंदुः ॥ अधत्विषीमाँऽअभ्योजसाक्रिविंयुधाभवदारोदसीऽअपृणदस्यमज्मनाप्रवावृधे । अध
त्तान्यंजठरेप्रेमरिच्यतसैनं० ॥ साकंजातःक्रतुनासाकमोजसाववक्षिथसाकंवृद्धोवीर्यैःसासहिर्मृधोविचर्षणिः । दा
ताराधःस्तुवतेकाम्यंवसुसैनं० ॥ तवत्यन्नर्यंनृतोपऽइंद्रप्रथमंपूर्व्यंदिविप्रवाच्यंकृतं । यद्देवस्यशवसाप्रारिणाऽअसुंरि
णन्नपः । भुवद्विश्वमभ्यादेवमोजसाविदादूर्जंशतक्रतुर्विदादिषं ॥ २८ ॥ (२।३।१) गणानांत्वागणपतिंहवाम
हेकविंकवीनामुपमश्रवस्तमं । ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतऽआनःशृण्वन्नूतिभिःसीदसादनं ॥ देवाश्चित्तेऽअसुर्यप्रचे
तसोबृहस्पतेयज्ञियंभागमानशुः । उस्राऽइवसूर्योज्योतिषामहोविश्वेषामिज्जनिताब्रह्मणामसि ॥ आविबाध्यापरिरा
पस्तमांसिचज्योतिष्मंतंरथमृतस्यतिष्ठसि । बृहस्पतेभीममंमित्रदंभनंरक्षोहणंगोत्रभिदंस्वर्विदं ॥ सुनीतिभिर्नयसि
त्रायसेचनंयस्तुभ्यंदाशान्नतमंहोऽअश्नवत् । ब्रह्मद्विषस्तपनोमन्युमीरसिबृहस्पतेमहितत्तेमहित्वनं+ ॥ नतमंहोनदु

(२।२।११) त्रिकद्रुकेष्वितिचतुर्ऋचस्यसूक्तस्यगृत्समदइंद्रआद्याष्टिस्ततोद्वेअतिशक्वर्यावंत्याष्टिर्वा । (२।३।१) गणानामित्येकोनविंशत्यृचस्यसूक्तस्यगृत्समदःआद्यापंचमीनवम्येकादशीसप्तदश्यंत्यानांब्रह्मणस्पतिःशिष्टानांबृहस्पतिर्जगतीपंचदश्यंत्येत्रिष्टुभौ ।

रितंकुतश्चननारातयस्तितिरुर्नद्वयाविनः । विश्वाऽइदस्माद्ध्वरसोविबाधसेयंसुगोपारक्षसिब्रह्मणस्पते ॥ २९ ॥
त्वंनोगोपाःपथिकृद्विचक्षणस्तवव्रतायमतिभिर्जरामहे । बृहस्पतेयोनोऽअभिह्वरोदधेस्वातंमर्मर्तुदुच्छुनाहरस्वती ॥
उतवायोनोमर्चयादनागसोरातीवामर्तःसानुकोवृकः । बृहस्पतेऽअपतंवर्तयापथःसुगंनोऽअस्यैदेववीतयेकृधि ॥
त्रातारंत्वातनूनांहवामहेवस्पर्तरधिवक्तारमस्मयुं । बृहस्पतेदेवनिदोनिबर्हयमादुरेवाऽउत्तरंसुम्नमुन्नशन् ॥ त्वयावयं
सुवृधाब्रह्मणस्पतेस्पार्हावसुमनुष्याददीमहि । यानोदूरेतळितोयाऽअरातयोभिसंतिजंभयाताऽअनप्नसः ॥ त्वयाव
यमुत्तमंधीमहेवयोबृहस्पतेपप्रिणासस्निनायुजा । मानोदुःशंसोऽअभिदिप्सुरीशतप्रसुशंसामतिभिस्तारिषीमहि ॥३०॥
अनानुदोवृषभोजग्मिराहवंनिष्टप्ताशत्रुंपृतनासुसासहिः । असिसत्यऽऋणयाब्रह्मणस्पतऽउग्रस्यचिद्दमितावीळुहर्षि
णः ॥ अदेवेनमनसायोरिषण्यतिशासामुग्रोमन्यमानोजिघांसति । बृहस्पतेमाप्रणक्तस्यनोवधोनिकर्ममन्युंदुरेवस्यश
र्धतः ॥ भरेषुहव्योनमसोपसद्योगंतावाजेषुसनिताधनंधनं । विश्वाऽइदर्योऽअभिदिप्स्वो३मृधोबृहस्पतिर्विववर्हा
रथाँऽइव ॥ तेजिष्ठयातपनीरक्षसस्तपयेत्वानिदेदधिरेदृष्टवीर्यं । आविस्तत्कृष्वयदसत्तऽउक्थ्यं१बृहस्पतेविपरिरापो
ऽअर्दय ॥ बृहस्पतेऽअतियदर्योऽअर्हाद्द्युमद्विभातिक्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्रजाततदस्मासुद्रविणंधेहि
चित्रं ॥ ३१ ॥ मानःस्तेनेभ्योयेऽअभिद्रुहस्पदेनिरामिणोरिपवोन्नेषुजागृधुः । आदेवानामोहतेविव्रयोहृदिबृहस्प

ते॒नप॒रःसाम्नो॑विदुः ॥ विश्वे॑भ्यो॒हित्वा॒भुव॑नेभ्य॒स्परि॒त्वष्टाज॑न॒त्साम्नः॑साम्नः क॒विः । सऽऋ॑ण॒चिदृ॑ण॒याब्रह्म॑ण॒स्पति॑र्द्रु॒हो
हं॒ताम॒हऽऋ॒तस्य॑ध॒र्तरि॑ ॥ तवा॑श्रि॒येव्य॑जिहीत॒पर्व॑तो॒गवां॑गो॒त्रमु॒दसृ॑ज॒ोयदं॑गिरः । इंद्रे॑णयु॒जातम॑सा॒परी॑वृतं॒बृह॑स्पते॒निर॒
पामौ॑ब्जोऽअर्ण॒वं ॥ ब्रह्म॑णस्पते॒त्वम॒स्ययं॒तासू॒क्तस्य॑बोधि॒तन॑यंचजिन्व । विश्वं॒तद्भ॒द्रंयदव॑न्तिदे॒वाबृ॒हद्व॑देमवि॒दथे॑सु॒वी
रा॑ः ॥ ३२ ॥ ॥ इतिद्वितीयाष्टकेषष्ठोध्यायः ॥ ६ ॥ ॥ ॥ ॥ ॥

चतुर्दशाध्याये वर्गाः ३२ सूक्तानि १५ ऋचः १५७॥ त्यागः॥ अग्नयइदं. १२ इंद्रायेदं. १२३ ब्रह्मणस्पतयइदं. बृहस्पतयइदं. २ ब्रह्मणस्पतयइदं. बृहस्पतयइदं. ३ ब्रह्मणस्पतयइदं. बृहस्पतयइदं. ब्रह्मणस्पतयइदं. बृहस्पतयइदं. ५ ब्रह्मणस्पतयइदं. बृहस्पतयइदं. ब्रह्मणस्पतयइदं. ॥ इतिद्वितीयेषष्ठः ॥ ६ ॥

सेमांषोळशांत्यात्रिष्टुब्द्वादशीचसैंद्रीचैंधानःपंचजागतंत्वृजुश्चतुष्कमिमागिरस्त्र्यूनाकूर्मोगार्त्समदोहिवादित्यं
मिदमेकादशवारुणमुपांत्यादुःस्वप्ननाशिनीधृतव्रताःसप्तवैश्वदेवमृतमेकादशजगत्यंतंषष्ठ्यैंद्रासोमीसरस्वति
त्वमितिसारस्वतोर्धर्चोयोनोबार्हस्पत्यातंवोमारुत्यस्माकंसप्तवैश्वदेवंत्रिष्टुबंतमस्यमेष्टौजागतंत्र्यनुष्टुबंतंद्यावा
पृथिव्यैकाद्वेऐंद्र्यौत्वाष्ट्र्यौवाद्वेद्वेराकासिनीवाल्योरंत्यालिंगोक्तदेवताःतेपंचोनारौद्रंधारावरामारुतंत्रिष्टुबंतमु
पेमपोनप्त्रीयंतुभ्यंषळृतव्यंतुजागतंतु ॥ १ ॥ ॥ ॥ ॥ ॥

हरिः॑ओम् ॥ (२।३।२) सेमाम॑विड्ढि॒प्रभृ॑तिं॒यऽई॑शि॒षेऽया॒वि॑धेम॒नव॑या॒म॒हागि॒रा । यथा॑नोमी॒ढ्वान्त्स्तव॑ते॒सखा॒तव॒बृह॑स्पते॒सीष॑धः॒सोतनो॑म॒तिं+ ॥ योनंत्वा॒न्यनं॑म॒न्न्योजं॑सो॒तादर्द॑र्म॒न्युना॒शंब॑राणि॒वि । प्राच्या॑वय॒दच्यु॑ता॒ब्रह्म॑ण॒स्पति॒राचावि॑श॒द्वसु॑मंतं॒विपर्व॑तं ॥ तद्दे॒वानां॑दे॒वत॑माय॒कर्त्व॑मश्र॑थ्नन्दृ॒ह्ळाव्र॑दंतवीळि॒ता । उद्गाऽआ॑ज॒दभि॑न॒द्ब्रह्म॑णाव॒लमगू॑ह॒त्तमो॒व्य॑चक्षय॒त्स्वः॑* ॥ अश्मा॑स्यमव॒तंब्रह्म॑ण॒स्पति॒र्मधु॑धारम॒भियमोज॒सातृ॑णत् । तमे॒वविश्वे॑पपिरेस्व॒र्दृशो॑ब॒हुसा॒कंसि॑सिचु॒रुत्स॑मु॒द्रिणं॑ ॥ स॒नाताकाचि॒द्भुव॑ना॒भवी॑त्वामा॒द्भिःश॒रद्भि॒र्दुरो॑वरंतवः । अय॑तंताचरतोऽअ॒न्यद॑न्य॒दिद्याच॒कारं॑व॒युना॒ब्रह्म॑ण॒स्पतिः॑ ॥ १ ॥ अ॒भि॒नक्षं॑तोऽअ॒भियेतमा॑न॒शुर्नि॒धिंप॑णी॒नांप॑र॒मंगुहा॑हि॒तं । तेवि॒द्वांसः॑प्रति॒चक्ष्यानृ॑ता॒पुन॒र्यत॑ऽउ॒ऽआय॒न्तदुदी॑युरा॒विशं॑ ॥ ऋ॒तावा॑नःप्रति॒चक्ष्यानृ॑ता॒पुन॒रात॒ऽआत॑स्थुःक॒वयो॑म॒हस्प॒थः । तेबा॒हुभ्यां॑धमि॒तम॒ग्निमश्म॑नि॒नकि॒ष्षोऽअ॒स्त्यर॑णोज॒हुर्हि॑तं+ ॥ ऋ॒तज्ये॑नक्षि॒प्रेण॒ब्रह्म॑ण॒स्पति॒र्यत्र॒वष्टि॒प्रतद॑श्नोति॒धन्व॑ना । तस्य॑सा॒ध्वीरिष॑वो॒याभि॒रस्य॑तिनृ॒चक्ष॑सोदृ॒शये॒कर्ण॑योनयः ॥ ससं॑न॒यःसवि॑न॒यःपु॒रोहि॑तः॒ससुष्टु॑तः॒सयु॒धिब्रह्म॑ण॒स्पतिः॑ । चा॒क्ष्मोयद्वाजं॒भर॑तेम॒तीधनादित्सूर्य॑स्तपतितप्य॒तुर्वृथा॑ ॥ वि॒भुप्र॒भुप्र॑थ॒मंमे॒हना॑वतो॒बृह॒स्पतेः॑सुवि॒दत्रा॑णि॒राध्या॑ । इ॒मासा॒तानि॑वे॒न्यस्य॑वा॒जिनो॒येन॒जना॑ऽउ॒भये॑भुंज॒तेविशः॑ ॥२॥ योव॑रेवृ॒जने॑वि॒श्वथा॑वि॒भुर्म॒हामु॑र॒ण्वःशव॑साव॒वक्षि॑थ । सदे॒वोदे॒वान्प्रति॑

(२।३।२) सेमामितिषोळशर्चस्यसूक्तस्यगृत्समदोब्रह्मणस्पतिःप्रथमादशस्योबृहस्पतिर्द्वादश्यैंद्राब्रह्मणस्पतीजगतीद्वादश्यंत्येत्रिष्टुभौ ।

पप्रथेपृथुविश्वेदुतापरिभूर्ब्रह्मणस्पतिः ॥ विश्वंसत्यंमघवानायुवोरिदापश्चनप्रमिनंतिव्रतंवां । अच्छेंद्राब्रह्मणस्पतीहवि
र्नोन्नंयुजेववाजिनाजिगातं ॥ उताशिष्ठाऽअनुशृण्वंतिवह्नयःसभेयोविप्रोभरतेमतीधना । वीळुद्वेषाऽअनुवशऽऋणमाद्
दिःसहवाजीसमिथेब्रह्मणस्पतिः ॥ ब्रह्मणस्पतेरभवद्यथावशंसत्योमन्युर्महिकर्माकरिष्यतः । योगाऽउदाजत्सदिवेवि
चाभजन्महीवरीतिःशवसासरत्पृथक् ॥ ब्रह्मणस्पतेसुयमस्यविश्वहारायःस्यामरथ्यो३वयस्वतः । वीरेषुवीराँऽउपपृंग्धि
नस्त्वंयदीशानोब्रह्मणावेषिमेहवं ॥ ब्रह्मणस्पतेत्वमस्ययंतासूक्तस्यबोधितनयंचजिन्व । विश्वंतद्भद्रंयदवंतिदेवाबृहद्वदे
मविदथेसुवीराः ॥ ३ ॥ (२।३।३) इंधानोऽअग्निंवनवद्वनुष्यतःकृतब्रह्माशूशुवद्रातहव्यऽइत् । जातेनजातमतिसप्रस
र्सृतेयंयंयुजंकृणुतेब्रह्मणस्पतिः ॥ वीरेभिर्वीरान्वनवद्वनुष्यतोगोभीरयिंपप्रथद्बोधतित्मना । तोकंचतस्यतनयंचवर्धतेयं
यंयुजं० ॥ सिंधुर्नक्षोदःशिमीवाँऽऋघायतोवृषेववध्रीँऽरभिवष्ट्योजसा । अग्नेरिवप्रसितिर्नाहवर्तवेयंयंयुजं० ॥ तस्माऽअर्ष
तिदिव्याऽअसश्चतःससत्वभिःप्रथमोगोषुगच्छति । अनिभृष्टतविषिर्हंत्योजसायंयंयुजं० ॥ तस्माऽइद्विश्वेधुनयंतसिंधवो
च्छिद्राशर्मदधिरेपुरूणि । देवानांसुम्नेसुभगःसऽएधतेयंयंयुजं० ॥ ४ ॥ (२।३।४) ऋजुरिच्छंसोवनवद्वनुष्यतोदेवयन्निद
देवयंतमभ्यसत् । सुप्रावीरिद्वनवत्पृत्सुदुष्टरंयज्वेदयज्योर्विभजातिभोजनं ॥ यजस्ववीरप्रविहिमनायतोभद्रंमनःकृणु

(२।३।३) इंधानइतिपंचर्चस्यसूक्तस्यगृत्समदोब्रह्मणस्पतिर्जगती । (२।३।४) ऋजुरिदितिचतुर्ऋचस्यसूक्तस्यगृत्समदोब्रह्मणस्पतिर्जगती ।

ष्ववृ॒त्र॒तूर्ये॑।ह॒विष्कृ॑णुष्वसु॒भगो॒यथास॑सि॒ब्रह्म॑ण॒स्पते॒रव॒ऽआवृ॑णीमहे ॥ सऽइज्जने॑न॒सवि॒शासजन्म॑ना॒सपु॒त्रैर्वाजं॑भरते॒ध
ना॒नृभिः॑ । दे॒वाना॒ंयःपि॒तर॑मा॒विवा॑सतिश्र॒द्धाम॑नाह॒विषा॒ब्रह्म॑ण॒स्पति॑ ॥ योऽअ॑स्मैह॒व्यैर्घृ॒तव॑द्भि॒रवि॑ध॒त्प्रतं॒प्रा॒चान॑यति॒
ब्रह्म॑ण॒स्पतिः॑ । उ॒रु॒ष्यती॒मंह॑सो॒रक्ष॑तीरि॒षों३ होश्चि॑दस्माऽउरु॒चक्रि॒रद्भु॑तः ॥५॥ (२।३।५) इ॒मागिर॑ऽआदि॒त्येभ्यो॑घृ॒तस्नूः॑
स॒नाद्राज॑भ्योजु॒ह्वा॑जुहोमि । शृ॒णोतु॑मि॒त्रोऽअ॑र्य॒माभगो॑नस्तुविजा॒तोवरु॑णो॒दक्षो॒ऽअंशः॑ ॥ इ॒मंस्तोमं॒सक्र॑तवोमेऽअ॒द्यमि॒त्रो
ऽअ॑र्य॒मावरु॑णोजुषंत । आ॒दि॒त्यास॒ःशुच॑यो॒धार॑पूता॒ऽअवृ॑जिनाऽअनव॒द्याऽअरि॑ष्टाः ॥ तऽआदि॒त्यास॑ऽउ॒रवो॑गभी॒रा
ऽअद॑ब्धासो॒दिप्सं॑तोभूर्य॒क्षाः । अं॒तःप॑श्यंतिवृ॒जि॒नोतसा॒धुसर्वं॒राज॑भ्यःप॒रमाचि॒दंति॑ ॥ धा॒रयं॑तऽआदि॒त्यासो॒जग॒
त्स्थादे॒वाविश्व॑स्य॒भुव॑नस्यगो॒पाः । दी॒र्घाधियो॒रक्ष॑माणाऽअसु॒र्य॑मृ॒तावा॑न॒श्चय॑मानाऽऋ॒णानि॑ ॥ वि॒द्यामा॑दित्या॒ऽअव॑सो
वोऽअ॒स्ययद॑र्यमन्भ॒यऽआचि॑न्मयो॒भु । यु॒ष्माकं॑मित्रावरुणा॒प्रणी॑तौ॒परि॒श्वभ्रे॑वदुरि॒तानि॑वृज्यां ॥ ६ ॥ सु॒गोहिवो॑ऽ
अर्य॑मन्मित्र॒पंथा॑ऽअनृ॒क्षरो॑वरुणसा॒धुरस्ति॑ । तेना॑दित्या॒ऽअधि॑वोचता॒नोयच्छं॑तानोदुष्प॒रिहंतु॒शर्म॑ ॥ पिप॑र्तु॒नोऽअदि॑
ती॒राज॑पु॒त्राति॒द्वेषां॒स्यर्य॒मासु॒गेभिः॑ । बृ॒हन्मि॒त्रस्य॒वरु॑णस्य॒शर्मोप॑स्यामपु॒रुवी॒राऽअरि॑ष्टाः ॥ ति॒स्रोभूमी॒र्धारय॒न्त्रीँऽरु॒त
द्यू॒न्त्रीणि॑व्र॒ताविद॒थेऽअं॒तरे॑षां । ऋ॒तेना॑दित्या॒महि॑वोमहि॒त्वंतद॑र्यमन्वरुणमित्र॒चारु॑ ॥ त्रीरो॑च॒नादि॒व्याधा॑रयंतहि॒र

(२।३।५) इमागिरइतिसप्तदशर्चस्यसूक्तस्य [illegible]

ण्यया॒ःशुच॑यो॒धार॑पूताः । अस्व॑प्नजोऽअनिमि॒षाऽअद॑ब्धाऽउरु॒शंसा॑ऽऋ॒जवे॒मर्त्या॑य ॥ त्वंविश्वे॑षांवरुणासि॒राजा॒येच॑दे॒
वाऽअ॑सुर॒येच॒मर्ता᳚ः । श॒तंनो॑रास्वश॒रदो॑वि॒चक्षे॒ऽश्यामायूं॑षि॒सुधि॑तानि॒पूर्वा᳚ ॥ ७ ॥ नद॑क्षि॒णाविचि॑किते॒नस॒व्यानप्रा॒ची
न॑मादित्या॒नोतप॒श्चा । पा॒क्या॑चिद्वसवोधी॒र्या॑चिद्यु॒ष्मानी॑तो॒ऽअभ॑यं॒ज्योति॑रश्यां ॥ योराज॑भ्यऽऋत॒निभ्यो॑द॒दाश॒यंव॒
र्धयं॑तिपु॒ष्टय॑श्च॒नित्या॑ः । सरे॒वान्या॑तिप्रथ॒मोरथे॑नवसु॒दावा॑वि॒दथे॑षुप्रश॒स्तः+ ॥ शुचि॑र॒पःसू॒यव॑सा॒ऽअद॑ब्ध॒ऽउप॑क्षेतिवृ॒
द्धव॑याःसु॒वीर॑ः । नकि॒ष्टंघ्न॒न्त्यंति॑तो॒नदू॒राद्यऽआ॑दि॒त्यानां॒भव॑ति॒प्रणी॑तौ ॥ अदि॑ते॒मित्र॒वरु॒णोतमृ॑ळ॒यद्वो॑व॒यंच॑कृ॒माकच्चि॒
दाग॑ः । उ॒र्व॑श्या॒मभ॑यं॒ज्योति॑रिंद्र॒मानो॑दी॒र्घाऽअ॒भिन॑श॒न्तमि॑स्राः ॥ उ॒भेऽअ॑स्मैपीपयतःस॒मीचीदि॒वोवृ॒ष्टिंसु॒भगो॒नाम॒
पुष्य॑न् । उ॒भाक्षया॑वा॒जय॑न्यातिपृ॒त्सूभावर्धौ॑भवतःसा॒धूऽअ॑स्मै ॥ यावो॑मा॒याऽअ॑भि॒द्रुहे॑यजत्रा॒ःपाशा॑ऽआदित्यारि॒
पवे॒विचृ॑त्ताः । अ॒श्वीव॒ताँऽअति॑येषं॒रथे॒नारि॑ष्टाऽउ॒रावा॒शर्म॑न्त्स्याम ॥ माहंम॒घोनो॑वरुणप्रि॒यस्य॑भूरि॒दाव्न॒ऽआवि॑दं॒शून॑
मा॒पे॑ः । मारा॒योरा॑जन्त्सु॒यमा॒दव॑स्थांबृ॒हद्व॑देमवि॒दथे॑सु॒वीरा॑ः ॥ ८ ॥ (२।३।६) इ॒दंक॒वेरा॑दि॒त्यस्य॑स्व॒राजो॒विश्वा॑नि॒
सांत्य॒भ्य॑स्तुम॒ह्ना । अति॒योम॒न्द्रोय॒जथा॑यदे॒वःसु॑की॒र्तिंभि॑क्षे॒वरु॑णस्य॒भूरे॑ः ॥ तव॑व्र॒तेसु॒भगा॑सःस्यामस्वा॒ध्यो॑वरुणतुष्टु॒वां
स॑ः । उ॒पाय॑नऽउ॒षसां॒गोम॑तीनाम॒ग्नयो॒नजर॑माणा॒ऽअनु॒द्यून्+ ॥ तव॑स्यामपु॒रुवीर॑स्य॒शर्म॑न्नु॒रुशंस॑स्यवरुणप्रणेतः । यू॒यं

(२।३।६) इदंकवेरित्येकादशर्चस्यसूक्तस्यगार्त्समदःकूर्मोवरुणस्त्रिष्टुप् (दशमीदुःस्वप्ननाशिनीत्रिष्वपिसूक्तेषुपाक्षिकोगृत्समदोस्त्येव) ।

नःपुत्राऽअदितेरदब्धाऽअभिक्षंमध्वंयुज्यायदेवाः ॥ प्रसीमादित्योऽअसृजद्विधर्ताँऽऋतंसिंधवोवरुणस्ययंति । नश्रा
म्यंतिनविमुंचंत्येतेवयोनपप्तूरघुयापरिज्मन् ॥ विमच्छ्रथायरशनामिवागऽऋध्यामतेवरुणखामृतस्य । मातंतुश्छेदिव
यतोधियंमेमामात्राशार्यपसःपुरऽऋतोः+ ॥९॥ अपोसुम्यक्षवरुणभियसंमत्सम्राळृतावोनुमागृभाय । दामेववत्साद्वि
मुमुग्ध्यंहोनहित्वदारेनिमिषश्चनेशे ॥ मानोवधैर्वरुणयेतऽइष्टावेनःकृण्वंतमसुरभ्रीणंति । माज्योतिषःप्रवसथानिग
न्मविषूमृधःशिश्रथोजीवसेनः ॥ नमःपुरातेवरुणोतनूनमुतापरंतुविजातब्रवाम । त्वेहिकंपर्वतेनश्रितान्यप्रच्युतानि
दूळभव्रतानि ॥ परऽऋणासावीरधमत्कृतानिमाहंराजन्नन्यकृतेनभोजं । अव्युष्टाऽइन्नुभूयसीरुषासऽआनोजीवान्व
रुणतासुशाधि ॥ योमेराजन्युज्योवासखावास्वप्नेभयंभीरवेमह्यमाह । स्तेनोवायोदिप्सतिनोवृकोवात्वंतस्माद्वरुणपा
ह्यस्मान्+ ॥ माहं० ॥१०॥ (२।३।७) धृतव्रताऽआदित्याऽइषिराऽआरेमत्कर्तरहसूरिवागः । शृण्वतोवोवरुणमित्रदेवा
भद्रस्यविद्वाँऽअवसेहुवेवः ॥ यूयंदेवाःप्रमतिर्यूयमोजोयूयंद्वेषांसिसनुतर्युयोत । अभिक्षत्तारोऽअभिचक्षमध्वमद्याचनो
मृळयतापरंच ॥ किमूनुवःकृणवामापरेणकिंसनेनवसवऽआप्येन । यूयंनोमित्रावरुणादितेचस्वस्तिमिंद्रामरुतोदधात ॥
हयेदेवायूयमिदापयःस्थतेमृळतनाधमानायमह्यं । मावोरथोमध्यमवाळृतेभून्मायुष्मावत्स्वापिषुश्रमिष्म ॥ प्रवऽएको

(२।३।७) धृतव्रताइतिसप्तर्चस्यसूक्तस्यगार्त्समदःकूर्मोविश्वेदेवास्त्रिष्टुप् ([illegible]गो–आद्यानांषण्णांविश्वेदेवाःअंत्यायावरुणः)।

CC-0. Raghu Acharya, Kathmandu Collection

मिमयभूर्यागोयन्मापितेवकितवंशशास । आरेपाशाऽआरेऽअघानिदेवामामाधिपुत्रेविमिवग्रभीष्ट ॥ अर्वांचोऽअद्या
भवतायजत्राऽआवोहार्दिभयमानोव्ययेयं । त्राध्वंनोदेवानिजुरोवृकस्यत्राध्वंकर्तादवपदोयजत्राः ॥ माहं० ॥ ११ ॥
(२।३।८) ऋतंदेवायकृण्वतेसवित्रऽइंद्रायाहिघ्नेनरमंतऽआपः। अहरहर्यात्यक्तुरपांकियात्याप्रथमःसर्गऽआसां ॥ योवृ
त्रायसिनमत्राभरिष्यत्प्रतंजनित्रीविदुषऽउवाच। पथोरदंतीरनुजोषमस्मैदिवेदिवेधुनयोयंत्यर्थं ॥ ऊर्ध्वोह्यस्थादध्यंतरि
क्षेधावृत्रायप्रवधंजभार । मिहंवसानऽउपहीमदुद्रोत्तिग्मायुधोऽअजयच्छत्रुमिंद्रः ॥ बृहस्पतेतपुषाश्नेवविध्यवृकद्वरसो
ऽअसुरस्यवीरान्। यथाजघंथधृषतापुराचिदेवाजहिशत्रुमस्माकमिंद्र ॥ अवक्षिपदिवोऽअश्मानमुच्चायेनशत्रुंमंदसानो
निजूर्वाः। तोकस्यसातौतनयस्यभूरेरस्माँऽअर्धंकृणुतादिंद्रगोनां ॥ १२ ॥ प्रहिक्रतुंवृहथोयंवनुथोरध्रस्यस्थोयजमानस्य
चोदौ । इंद्रासोमायुवमस्माँऽअविष्टमस्मिन्भयस्थेकृणुतमुलोकं+ ॥ नमातमन्नश्रमन्नोततंद्रन्नवोचाममासुनोतेतिसो
मं । योमेपृणाद्योददद्योनिबोधाद्योमासुन्वंतमुपगोभिरायत् ॥ सरस्वतित्वमस्माँऽअविड्ढिमरुत्वतीधृषतीजेषिशत्रून् ।
त्यंचिच्छर्धंतंतविषीयमाणमिंद्रोहंतिवृषभंशंडिकानां ॥ योनःसनुत्यऽउतवाजिघत्नुरभिख्यायतंतिगितेनविध्य । बृ
हस्पतऽआयुधैर्जेषिशत्रून्द्रुहेरीषंतंपरिधेहिराजन् ॥ अस्माकेभिःसत्वभिःशूरशूरैर्वीर्याकृधियानितेकर्त्वानि । ज्योग

(२।३।८)ऋतंदेवायेत्येकादशर्चस्यसूक्तस्यगृत्समदइंद्रःषष्ठ्याइंद्रासोमौअष्टम्याःसरस्वतीनवम्याबृहस्पतिरेकादश्यामरुतस्त्रिष्टुबंत्याजगती ।

भूवन्ननुधूपितासोहत्वीतेषामाभंरानोवसूंनि ॥ तंवःशर्धंमारुंतंसुम्नयुर्गिरोपंब्रुवेनमंसादैव्यंजनं । यथारयिंसर्वंवीरंन
शामहाऽअपत्यसाचंश्रुत्यंदिवेदिंवे ॥ १३ ॥ (२।३।९) अस्माकंमित्रावरुणावतंरथंमादित्यैरुद्रैर्वसुंभिःसचाभुवा ।
प्रयद्वयोनपप्तन्वस्मंनस्परिंश्रवस्यवोहृषींवंतोवनर्षदंः ॥ अधंस्मानऽउर्दंवतासजोषसोरथंदेवासोऽअभिविक्षुवांजयुं ।
यदाशवःपद्यांभिस्तित्रंतोरजंःपृथिव्याःसानौजंघंनंतपाणिभिः ॥ उतस्यनऽइंद्रोविश्वचंर्षणिर्दिवःशर्धंनमारुंतेनसुक्र
तुः । अनुनुस्थांत्यवृकाभिंरूतिभीरथंमहेसनयेवाजंसातये ॥ उतस्यदेवोभुवंनस्यसक्षणिस्त्वष्टाग्नाभिंःसजोषांजूजुवद्र
थं । इळाभगोंबृहद्दिवोतरोदंसीपूषापुरंधिरश्विनावधापतीं ॥ उतत्येदेवीसुभगेंमिथूदृशोषासानक्ताजगंतामपीजुवां ।
स्तुषेयद्वांपृथिविनव्यंसावचंःस्थातुश्चवयस्त्रिवंयाऽउपस्तिरें ॥ उतवःशंसंमुशिजांमिवश्मस्यहिंर्बुध्न्योऽजएकंपादुत ।
त्रितऽऋभुक्षाःसंविताचनोंदधेपांनपांदाशुहेमांधियाशमिं ॥ एतावोंवश्म्युद्यंतायजत्राऽअतंक्षन्नायवोनव्यंसेसं । श्र
वस्यवोवाजंचकानाःसप्तिर्नरथ्योऽअहंधीतिमंश्याः ॥ १४ ॥ (२।३।१०) अस्यमेंद्यावापृथिवीऽऋतायतोभूतमंवि

(२।३।९) अस्माकमितिसप्तर्चंस्यसूक्तस्यगृत्समदोविश्वेदेवाजगत्यंत्यात्रिष्टुप् । (२।३।१०) अस्यमइत्यष्टर्चंस्यसूक्तस्यगृत्समदआद्याया द्यावापृथिवीद्वितीयातृतीययोरिंद्रः (त्वष्टावा) चतुर्थीपंचम्योराकाषष्ठीसप्तम्योःसिनीवालीअंत्यायागुंगूसिनीवालीराकासरस्वतींद्राणीवरुणान्योजगतीअंत्यास्तिस्रोनुष्टुभः । (भेदपक्षेआद्यायामित्रावरुणौद्वितीयाचतुर्थीपंचमीनांविश्वेदेवाःतृतीयायाउषासानक्ताषष्ठ्याद्यावापृथिवीसप्तम्याइंद्रः) ।

त्रीवर्चसःसिषासतः । ययोरायुंःप्रतरंतेऽइदंपुरऽउपस्तुतेवसूयुर्वांमहोदधे ॥ मानोगुह्यारिपंऽआयोरहंन्दभन्मानंऽ
आभ्योरीरधोदुच्छुनाभ्यः । मानोवियौंःसख्याविद्धितस्यंनःसुम्नायतामनसातत्त्वैंमहे ॥ अहेळतामनसाश्रुष्टिमावं
हदुहांनांधेनुंपिप्युषीमसश्चतं । पद्याभिराशुंवचंसाचवाजिनंत्वांहिंनोमिपुरूहूतविश्वहां ॥ राकामहंसुहवांसुष्टुतीहुंवे
शृणोतुंनःसुभगाबोधंतुत्मनां । सीव्यत्वपंःसूच्याच्छिद्यमानयाददांतुवीरंशतदांयमुक्थ्यं* ॥ यास्तेंराकेसुमतयंःसुपेशं
सोयाभिर्ददांसिदाशुषेवसूंनि । ताभिंर्नोंऽअद्यसुमनांऽउपागंहिसहस्रपोषंसुंभगेरराणा ॥ सिनींवालिपृथुंष्टुकेयादेवा
नामसिस्वसां । जुषस्वंहव्यमाहुंतंप्रजांदेंविदिदिड्ढिनः ॥ यासुंबाहुःस्वंगुरिःसुषूमांबहुसूवंरी । तस्यैंविश्पत्न्यैंहविःसिं
नीवाल्यैंजुंहोतन ॥ यागुंगूर्यासिंनीवालीयाराकायासरंस्वती । इंद्राणीमंह्वऽऊतयेंवरुणानींस्वस्तयें ॥ १५ ॥ (२।४।१)
आतेंपितर्मरुतांसुम्नमेंतुमानःसूर्यंस्यसंदृशोंयुयोथाः । अभिनोंवीरोऽअर्वंतिक्षमेतप्रजांयेमहिरुद्रप्रजाभिंः ॥ त्वादंत्ते
भीरुद्रशंतमेभिःशतंहिमांऽअशीयभेषजेभिंः । व्यं१स्मद्द्वेषोंवितरंव्यंहोव्यमींवाश्चातयस्वाविषूंचीः ॥ श्रेष्ठोंजातस्यंरु
द्रश्रियासिंतवस्तंमस्तवसांवज्रबाहो । पर्षिंणःपारमंहंसःस्वस्तिविश्वांऽअभींतीरपंसोयुयोधि ॥ मात्वांरुद्रचुक्रुधामान
मोंभिर्मादुष्टुंतीवृषभमासहूंती । उन्नोंवीराँऽअर्पयभेषजेभिंर्भिषक्तंमंत्वाभिषजांशृणोमि ॥ हवींमभिर्हवंतेयोहविर्भिरव

(२।४।१) आतेपितरितिपंचदशर्चस्यसूक्तस्यगृत्समदोरुद्रोजगतीअंत्यात्रिष्टुप् ।

स्तोमे॑भीरु॒द्रंदि॑षीय । ऋ॒दू॒दरः॑सु॒हवो॒मानो॑ऽअ॒स्यैब॒भ्रुःसु॒शिप्रो॑रीरधन्म॒नायै॑ ॥ १६ ॥ उन्मा॑ममंदवृष॒भोम॒रुत्वा॒न्त्व
क्षी॑यसा॒वय॑सा॒नाध॑मानं । घृणी॑वच्छा॒याम॑र॒पाऽअ॑शी॒यावि॑वासेयंरु॒द्रस्य॑सु॒म्नं+ ॥ क्व॑१॒स्यते॑रुद्रमृळ॒याकु॒र्हस्तो॒योऽअस्ति॑
भेष॒जोजला॑षः । अ॒प॒भ॒र्तार॑पसो॒दैव्य॑स्या॒भीनुमा॑वृषभचक्षमीथाः ॥ प्रब॒भ्रवे॑वृष॒भाय॑श्विती॒चेम॒होम॒हींसु॑ष्टु॒तिमी॑रया
मि । न॒म॒स्याक॑ल्मली॒किनं॒नमो॑भिर्गृ॒णीमसि॑त्वे॒षंरु॒द्रस्य॒नाम॑ ॥ स्थि॒रेभि॒रंगैः॑पुरु॒रूप॑ऽउ॒ग्रोब॒भ्रुःशु॒क्रेभिः॑पिपिशे॒हिर॑
ण्यैः । ईशा॑नाद॒स्यभुव॑नस्य॒भूरे॒र्नवाऽउ॑योषद्रु॒द्राद॑सु॒र्यं॑* ॥ अर्ह॑न्बिभर्षि॒साय॑कानि॒धन्वार्ह॑न्नि॒ष्कंय॑ज॒तंवि॒श्वरू॑पं । अर्ह॑
न्नि॒दंद॑यसे॒विश्व॒मभ्व॒ंनवाऽओजी॑योरुद्र॒त्वद॑स्ति ॥ १७ ॥ स्तु॒हिश्रु॒तंग॑र्त॒सदं॒युवा॑नंमृ॒गंनभी॒ममु॑पह॒त्नुमु॒ग्रं । मृ॒ळाज॑रि॒
त्रेरु॑द्र॒स्तवा॑नो॒ऽन्यंते॑ऽअ॒स्मन्निव॑पंतु॒सेनाः॑ ॥ कु॒मा॒रश्चि॑त्पि॒तरं॒वंद॑मानं॒प्रति॑नानामरुद्रोप॒यंतं॑ । भूरे॑र्दा॒तारं॒सत्प॑तिंगृणीषे
स्तु॒तस्त्वंभे॑ष॒जारा॑स्य॒स्मे+ ॥ यावो॑भेष॒जाम॑रुतः॒शुची॑नि॒याशंत॑मावृषणो॒याम॑यो॒भु । यानि॒मनु॒रवृ॑णीतापि॒तान॒स्ताशंच॒
योश्च॑रु॒द्रस्य॑वश्मि ॥ परि॑णोहे॒तीरु॒द्रस्य॑वृज्याः॒परि॑त्वे॒षस्य॑दुर्म॒तिर्म॒हीगा॑त् । अव॑स्थि॒राम॒घव॑द्भ्यस्तनुष्व॒मीढ्व॑स्तो॒काय॒तनं॑
यायमृळ ॥ ए॒वाब॑भ्रोवृषभचेकितान॒यथा॑देव॒नहृ॑णी॒षेनहंसि॑ । ह॒व॒न॒श्रुन्नो॑रुद्रे॒हबो॑धिबृ॒हद्व॑देमवि॒दथे॑सु॒वीराः॑ ॥ १८ ॥
(२।४।२) धा॒रा॒व॒राम॒रुतो॑धृ॒ष्ण्वो॑जसोमृ॒गानभी॒मास्तवि॑षीभिर॒र्चिनः॑ । अ॒ग्नयो॒नशु॑शुचा॒नाऽऋ॒जीषि॑णो॒भृमिं॒धमं॑तो

(२।४।२) धारावराइतिपंचदशर्चस्यसूक्तस्यगृत्समदोमरुतोजगत्यंत्यात्रिष्टुप् ।

ऽअप॒गाऽअ॑वृण्वत ॥ द्यावो॒नस्तृभि॑श्चितयंतखा॒दिनो॒व्य॑भ्रि॒यानद्युतयंतवृ॒ष्टयः॑ । रु॒द्रोयद्वो॑मरुतोरुक्मवक्षसो॒वृषा
ज॑नि॒पृश्न्याः॑शु॒क्रऽऊध॑नि ॥ उ॒क्षंते॒ऽअश्वाँ॒ऽअत्याँ॑ऽइवा॒जिषु॒नद॑स्य॒कर्णै॑स्तुरयंतऽआ॒शुभिः॑ । हिर॑ण्यशिप्रामरु॒तोदवि॑
ध्वतः॑पृ॒क्षंया॑थ॒पृष॑तीभिःसमन्यवः ॥ पृ॒क्षेताविश्वा॒भुव॑नावव॒क्षिरे॑मि॒त्राय॑वा॒सद॒माजी॒रदा॑नवः । पृष॑दश्वासोऽअनव॒भ्र
रा॑धसऽऋजि॒प्यासो॒नव॒युने॑षुधू॒र्षदः॑ ॥ इंध॑न्वभि॒र्धे॒नुभी॑र॒प्शदू॑धभिरध्व॒स्मभिः॑प॒थिभि॑र्भ्राजदृष्टयः । आहं॒सासो॒नस्व
स॑राणिगंतन॒मधो॒र्मदा॑यमरुतःसमन्यवः ॥ १९ ॥ आनो॒ब्रह्मा॑णिमरुतःसमन्यवोन॒रांनशंस॒ःसव॑नानिगंतन । अश्वा॑
मिवपिप्यतधे॒नुमूध॑नि॒कर्ता॒धियं॑जरि॒त्रेवाज॑पेशसं ॥ तंनो॑दातमरुतोवा॒जिनं॒रथ॑ऽआपा॒नंब्रह्म॑चि॒तयं॑दि॒वेदि॑वे । इषं॑
स्तो॒तृभ्यो॑वृ॒जने॑षुका॒रवे॑स॒निंमे॒धामरि॑ष्टंदु॒ष्टरं॒सहः॑ ॥ यद्यु॒ंजते॑म॒रुतो॑रु॒क्मव॑क्ष॒सोश्वा॒न्रथे॑षु॒भग॒ऽआसु॒दान॑वः । धे॒नुर्नशि
श्वे॒स्वस॑रेषुपिन्वते॒जना॑यरा॒तह॑विषेम॒हीमिषं॑ ॥ योनो॑मरुतोवृ॒कता॑ति॒मर्त्यो॑रि॒पुर्द॒धेव॑सवो॒रक्ष॑तारि॒षः । व॒र्तय॑त॒तपु॑षाच॒
क्रि॒याभितमव॑रुद्राऽअ॒शसो॑हंतना॒वधः॑ ॥ चि॒त्रंतद्वो॑मरु॒तोयाम॑चेकिते॒पृश्न्या॒यदूध॒रप्या॒पयो॑दु॒हुः । यद्वा॑नि॒देनव॑मान
स्यरुद्रियास्त्रि॒तंजरा॑यजु॒रताम॑दाभ्याः ॥ २० ॥ तान्वो॑म॒होम॒रुत॑ऽएव॒याव्नो॒विष्णो॑रे॒षस्य॑प्रभृ॒थेह॑वामहे । हिर॑ण्यवर्णा
न्ककु॒हान्य॒तस्रु॑चोब्रह्म॒ण्यंतः॒शंस्यं॒राध॑ऽईमहे ॥ तेदश॑ग्वाःप्रथ॒माय॒ज्ञमू॑हिरे॒तेनो॑हिन्वंतू॒षसो॒व्यु॑ष्टिषु । उ॒षानरा॒मीर॑रु॒
णैरपो॑र्णुतेम॒होज्योति॑षाशु॒चतागो॑ऽअर्णसा ॥ तेक्षो॒णीभि॑ररुणेभि॒र्नांजिभी॑रु॒द्राऽऋ॒तस्य॒सद॑नेषुवावृधुः । नि॒मेघ॑माना॒

ऽअत्यै॑न॒पाजं॑सासुश्चं॒द्रंवर्णं॑दधिरेसु॒पेश॑सं ॥ तां॑ऽई॒या॒नोम॑हि॒वरू॑थमू॒तय॒ऽउप॒घेदे॒नान॑म॑सागृणीमसि । त्रि॒तोनयान्पंच॒
होतॄं॑न॒भिष्ट॑यऽआव॒वर्त॒दव॑रांच॒क्रियाव॑से ॥ यया॑र॒ध्रंपा॒रय॒थात्यंहो॒यया॑नि॒दोमुं॒चथ॑वंदि॒तारं॑ । अ॒र्वाची॒साम॑रु॒तो॒याव॑
ऽऊ॒तिरोषुवा॒श्रेव॑सु॒म॒तिर्जि॑गातु ॥ २१ ॥ (२।४।३) उपे॑मसृक्षिवा॒ज॒युर्व॑च॒स्यांचनो॑दधीतना॒द्योगिरो॑मे । अ॒पांनपा॑
दाशु॒हेमा॑कु॒वित्ससु॒पेश॑सस्करति॒जोषि॑ष॒द्धि ॥ इ॒मंस्व॑स्मैहृ॒दऽआसु॑तष्टं॒मंत्रं॑वोचेमकु॒विद॑स्य॒वेद॑त् । अ॒पांनपा॑दसु॒र्य॑स्यम॒
ह्नाविश्वा॑न्य॒र्यो॑भुव॑नाजजान ॥ सम॒न्यायं॒त्युप॑यं॒त्य॒न्याःस॑मा॒नमू॒र्वंन॒द्यः॑पृणंति । तमू॒शुचिं॒शुच॑योदीदि॒वांस॑म॒पांनपा॑तं॒
परि॑तस्थु॒राप॑ः ॥ तम॒स्मेरा॑युव॒तयो॒युवा॑नंमर्मृ॒ज्यमा॑ना॒ःपरि॑यं॒त्याप॑ः । सशु॒क्रेभि॒ःशिक्व॑भीरे॒वद॒स्मेदी॒दाया॑नि॒ध्मोघृ॒तनि॑
र्णिग॒प्सु+ ॥ अ॒स्मैति॒स्रोऽअ॑व्य॒थ्याय॒नारी॑र्दे॒वाय॑दे॒वीर्दि॑धिष॒ंत्यन्नं॑ । कृता॑ऽइ॒वोप॒हिप्र॑स॒र्स्रेऽअ॒प्सुसपी॒यूषं॑धयतिपूर्व॒सू
नां॑ ॥ २२ ॥ अश्व॒स्यात्र॒जनि॑मा॒स्यच॒स्व॑र्द्रुहोरि॒षःसं॒पृच॑ःपाहिसू॒रीन् । आ॒मासु॑पू॒र्षुप॒रोऽअ॑प्रमृ॒ष्यंनारा॑तयो॒विन॑श॒न्नानृ॑
तानि ॥ स्वऽआदमे॑सु॒दुघा॒यस्य॑धे॒नुःस्व॒धांपी॑पायसु॒भ्वन्न॑मत्ति । सोऽअ॒पांनपा॑दू॒र्जय॑न्न॒प्स्वं१॒॑तर्व॑सु॒देया॑यविध॒तेविभा॑
ति ॥ योऽअ॒प्स्वाशुचि॑ना॒दैव्ये॑नऽऋ॒तावाज॑स्रऽउ॒र्वि॑यावि॒भाति॑ । व॒याऽइद॒न्याभुव॑नान्यस्य॒प्रजा॑यंते॒वी॒रुध॑श्च॒प्र॒जा
भि॑ः ॥ अ॒पांनपा॒दाह्यस्था॑दु॒पस्थं॑जि॒ह्मानां॑मू॒र्ध्वोवि॒द्युतं॒वसा॑नः । तस्य॒ज्येष्ठं॑महि॒मानं॒वहं॑ती॒र्हिर॑ण्यवर्णा॒ःपरि॑यंतिय॒ह्वीः+ ॥

(२।४।३) उपेमितिपंचदशर्चस्यसूक्तस्यगृत्समदोपांनपात्रिष्टुप् ।

Digitization by eGangotri Funding MoE-Delhi

हिरण्यरूपःसहिरण्यसंदृगपांनपात्सेदुहिरण्यवर्णः । हिरण्ययात्परियोनेर्निषद्याहिरण्यदाददत्यन्नमस्मै ॥ २३ ॥ तदस्या
नीकमुतचारुनामापीच्यंवर्धतेनप्तुरपां । यमिंधतेयुवतयःसमित्थाहिरण्यवर्णंघृतमन्नमस्य ॥ अस्मैबहूनामवमायसख्ये
यज्ञैर्विधेमनमसाहविर्भिः । संसानुमार्ज्मिदिधिषामिबिल्मैर्दधाम्यन्नैःपरिवंदऽऋग्भिः+ ॥ सऽईंवृषाजनयत्तासुगर्भंस
ऽईंशिशुर्धयतितंरिहंति । सोऽअपांनपादनभिम्लातवर्णोन्यस्येवेहतन्वाविवेष ॥ अस्मिन्पदेपरमेतस्थिवांसमध्वस्माभि
र्विश्वहादीदिवांसं । आपोनप्त्रेघृतमन्नंवहंतीःस्वयमत्कैःपरिदीयंतियह्वीः+ ॥ अयांसमग्नेसुक्षितिंजनायायांसमुमघवद्भ्यः
सुवृक्तिं । विश्वंतद्भद्रंयदवंतिदेवाबृहद्वदेमविदथेसुवीराः ॥ २४ ॥ (२।४।४) तुभ्यंहिन्वानोवसिष्टगाऽअपोधुक्षन्त्सी
मविभिरद्रिभिर्नरः । पिबेंद्रस्वाहाप्रहुतंवषट्कृतंहोत्रादासोमंप्रथमोयऽईशिषे ॥ यज्ञैःसंमिश्लाःपृषतीभिर्ऋष्टिभिर्यामं
न्छुभ्रासोऽअंजिषुप्रियाऽउत । आसद्याबर्हिर्भरतस्यसूनवःपोत्रादासोमंपिबतादिवोनरः ॥ अमेवनःसुहवाऽआहिगंत
ननिबर्हिषिसदतनारणिष्टन । अथामंदस्वजुजुषाणोऽअंधसस्त्वष्टर्देवेभिर्जनिभिःसुमद्गणः ॥ आवक्षिदेवाँऽइहविप्रय
क्षिचोशन्होतर्निषदायोनिषुत्रिषु । प्रतिवीहिप्रस्थितंसोम्यंमधुपिबाग्नीध्रात्तवभागस्यतृप्णुहि ॥ एषस्यतेतन्वोनृम्णवर्ध
नःसहऽओजःप्रदिविबाह्वोर्हितः । तुभ्यंसुतोमघवन्तुभ्यमाभृतस्त्वमस्यब्राह्मणादातृपत्पिब ॥ जुषेथांयज्ञंबोधतंहवस्य

(२।४।४) तुभ्यमितिषळर्चस्यसूक्तस्यगृत्समदःइंद्रोमरुतस्त्वष्टाग्निरिंद्रोमित्रावरुणावितिक्रमेणदेवताजगती ।

मेस॒त्तोहोता॑नि॒विदः॑पू॒र्व्या॑ऽअनु॑ । अच्छा॒राजा॑ना॒नम॑ऽएत्या॒वृतं॑प्रशा॒स्त्रादापि॑बतंसो॒म्यंमधु॑ ॥ २५ ॥ द्वितीयेसप्तमः ॥

पंचदशाध्याये वर्गाः २५ सूक्तानि १३ ऋचः १३७॥ त्यागः ॥ बृहस्पतयइदं. ब्रह्मणस्पतयइदं. ८ बृहस्पतय. ब्रह्मणस्पतय. इंद्राब्रह्मणस्पतिभ्या. ब्रह्मणस्पतय. १३ आदित्येभ्य. १७ वरुणाये. ११ विश्वेभ्योदेवेभ्यः ६ वरुणाये. इंद्राये. ५ इंद्रासोमाभ्या. इंद्राये. सरस्वतींइंद्राभ्या. बृहस्पतय. इंद्राये. मरुद्भ्य. मित्रावरुणाभ्या. विश्वेभ्योदेवेभ्य. इंद्राये. विश्वेभ्योदेवेभ्य. उषासानक्ताभ्या. विश्वेभ्योदेवेभ्य. २ द्यावापृथिवीभ्या. इंद्राये. २ राकायाइ. २ सिनीवाल्या. २ गुंगूसिनीवालीराकासरस्वतींद्राणीवरुणानीभ्य. रुद्राये. १५ मरुद्भ्य. १५ अपांनप्त्रेग्नय. १५ इंद्रायमधवइ. मरुद्भ्योमाधवायेदं. त्वष्ट्रेशुक्राये. अग्नयेशुचय. इंद्रायनभाये. मित्रावरुणाभ्यां नभस्याये.॥ द्वितीयेसप्तमः ॥७॥

मंदस्वोदुष्यएकादशसावित्रं॑ग्रावाणेवाष्टावाश्विनं॑सोमापूषणाषट्सोमापौष्णमंत्योर्धर्चोप्यदितेर्वायोसैकागाय
त्रं॑मुक्तादेवताःप्रउगेणां॑द्येतुतृचेंत्यैंद्रवायवींद्यावापृथिव्योंत्यस्तृचोहविर्धानोवां॑तृतीयःपादोवाग्नेयों॑वितमेनुष्टु
भौबृहतीर्चंकनिक्रदत्तृचंप्रदक्षिणिज्जागतं॑मध्येतिशक्वर्यष्टिवैंताभ्यां॑मृषिरध्वनिवाश्यमानंशकुंतंतुष्टावं॑कुशिक
स्त्वैषीरथिरिंद्रतुल्यंपुत्रमिच्छंन्ब्रह्मचर्यंचचार॑तस्यैंद्रएवगाथीपुत्रोजज्ञेंगाथिनोविश्वामित्रं॑ःसतृतीयंमंडलमपश्यं॑
त्सोमस्यत्र्यधिका॑वैश्वानरायपंचोनां॑वैश्वानरीयंतुजागतंतुंवैश्वानरायैकादशं॑समित्समिदाप्रियं॑ःप्रत्यग्निःप्रकार
वइत्याग्नेययौरन्यासामपिनिपातोदृश्यते ॥ १ ॥ ॥ ॥ ॥ ॥

हरिः ओम् (२।४।५)॥मंदस्वहोत्रादनुजोषमंधसोऽध्वर्यवःसपूर्णांवष्ट्यासिचं । तस्माऽएतंभरततद्वशोददिर्होत्रात्सोमंद्र
विणोदःपिबंऽऋतुभिः ॥ यमुपूर्वमहुवेतमिदंहुवेसेदुहव्योददिर्योनामपत्यते । अध्वर्युभिःप्रस्थितंसोम्यंमधुपोत्रात्सोमंद्र
वि० ॥ मेद्यंतुतेवह्नयोयेभिरीयसेरिषण्यन्वीळयस्वावनस्पते । आयूयांधृष्णोऽअभिगूर्यात्वंनेष्ट्रात्सोमंद्रवि० ॥ अपां
द्धोत्रादुतपोत्रादमत्तोतनेष्ट्रादंजुषतप्रयोहितं । तुरीयंपात्रममृक्तममर्त्यंद्रविणोदाःपिबतुद्राविणोदसः+ ॥ अर्वांचमद्य
यय्यंनृवाहणंरथंयुंजाथामिहवांविमोचनं । पृंक्तंहवींषिमधुनाहिकंगतमथासोमंपिबतंवाजिनीवसू ॥ जोष्यग्नेसमिधं
जोष्याहुतिंजोषिब्रह्मजन्यंजोषिसुष्टुतिं । विश्वेभिर्विश्वाँऽऋतुनावसोमहऽउशन्देवाँऽउशतःपाययाहविः ॥ १ ॥
(२।४।६) उदुष्यदेवःसवितासवायशश्वत्तमंतदपावह्निरस्थात् । नूनंदेवेभ्योविहिधातिरत्नमथाभजद्वीतिहोत्रंस्व
स्तौ ॥ विश्वस्यहिश्रुष्टयेदेवऽऊर्ध्वःप्रबाहवापृथुपाणिःसिसर्ति । आपश्चिदस्यव्रतऽआनिमृग्राऽअयंचिद्वातोरमतेपरि
ज्मन् ॥ आशुभिश्चिद्यान्विमुचातिनूनमरीरमदतमानंचिदेतोः । अह्यर्षूणांचिन्न्ययाँऽअविष्यामनुव्रतंसवितुर्मोक्या
गात् ॥ पुनःसमव्यद्वितंतंवयंतीमध्याकर्तोर्न्यधाच्छक्मधीरः । उत्संहायास्थाद्व्यृ१तूँरदर्धररमतिःसवितादेवऽआगा

(२।४।५) मन्दस्वेतिषळर्चस्यसूक्तस्यगृत्समदःआद्यानांचतसृणांद्रविणोदाःपंचम्याआश्विनौषष्ठ्याअग्निर्जगती । (२।४।६) उदुष्य
इत्येकादशर्चस्यसूक्तस्यगृत्समदःसवितात्रिष्टुप् ।

त् ॥ नानौकांसिदुर्योविश्वमायुर्वितिष्ठतेप्रभवःशोकोऽअग्नेः । ज्येष्ठंमातासूनवेभागमाधादन्वस्यकेतमिषितंसवित्रा ॥ २ ॥ समाववर्तिविष्ठितोजिगीषुर्विश्वेषांकामश्चरताममाभूत् । शश्वाँऽअपोविकृतंहित्व्यागादनुव्रतंसवितुर्दैव्यस्य ॥ त्वयाहितमप्यमप्सुभागंधन्वान्वामृगयसोवितस्थुः । वनानिविभ्योनकिरस्यतानिव्रतादेवस्यसवितुर्मिनंति ॥ याद्राध्यं१वरुणोयोनिमप्यमनिशितंनिमिषिजर्भुराणः । विश्वोमार्तांडोव्रजमापशुर्गात्स्थशोजन्मानिसविताव्याकः ॥ नयस्येंद्रोवरुणोनमित्रोव्रतमर्यमानमिनंतिरुद्रः । नारातयस्तमिदंस्वस्तिहुवेदेवंसवितारंनमोभिः ॥ भगंधियंवाजयंतःपुरंधिंनराशंसोग्नास्पतिर्नोऽअव्याः । आयेवामस्यसंगथेरयीणांप्रियादेवस्यसवितुःस्याम ॥ अस्मभ्यंतद्दिवोऽअद्भ्यःपृथिव्यास्त्वयादत्तंकाम्यंराधऽआगात् । शंयत्स्तोतृभ्यऽआपयेभवात्युरुशंसायसवितर्जरित्रे ॥ ३ ॥ (२।४।७) ग्रावाणेवतदिदर्थंजरेथेगृध्रेववृक्षंनिधिमंतमच्छ । ब्रह्माणेवविदथऽउक्थशासादूतेवहव्याजन्यापुरुत्रा ॥ प्रातर्यावाणारथ्येववीराजेवयमावरमासचेथे । मेनेऽइवतन्वा३शुंभमानेदंपतीवक्रतुविदाजनेषु ॥ शृंगेवनःप्रथमागंतमर्वाक्शफाविवजर्भुराणातरोभिः । चक्रवाकेवप्रतिवस्तोरुस्रावार्चायातंरथ्येवशक्रा ॥ नावेवनःपारयतंयुगेवनभ्येवनऽउपधीवप्रधीव । श्वानेवनोऽअरिषण्यातनूनांखृगलेवविस्रसःपातमस्मान् ॥ वातेवाजुर्यानद्येवरीतिरक्षीऽइवचक्षुषायातमर्वा

(२।४।७) ग्रावाणेवेत्यष्टर्चस्यसूक्तस्यगृत्समदोऋषिरश्विनौत्रिष्टुप् ।

CC-0. Radi Acharya Kathmandu Collection

क् । हस्ताविवतन्वेशंभविष्ठापादैवनोनयतंवस्योऽअच्छ ॥ ४ ॥ ओष्ठाविवमध्वास्नेवदंतास्तनाविवपिप्यतंजीवसे
नः । नासैवनस्तन्वौरक्षिताराकर्णाविवसुश्रुताभूतमस्मे ॥ हस्तैवशक्तिमभिसंददीनःक्षामेवनःसमजतंरजांसि ।
इमागिरोऽअश्विनायुष्मयंतीःक्ष्णोत्रेणेवस्वधितिंसंशिशीतं ॥ एतानिवामश्विनावर्धनानिब्रह्मस्तोमंगृत्समदासोऽअक्र
न् । तानिनराजुजुषाणोपयातंबृहद्वदेमविदथेसुवीराः ॥ ५ ॥ (२।४।८) सोमापूषणाजननारयीणांजननादिवो
जननापृथिव्याः । जातौविश्वस्यभुवनस्यगोपौदेवाऽअकृण्वन्नमृतस्यनाभिं ॥ इमौदेवौजायमानौजुषंतेमौतमांसिगू
हतामजुष्टा । आभ्यामिंद्रःपक्वमामास्वंतःसोमापूषभ्यांजनदुस्रियासु ॥ सोमापूषणारजसोविमानंसप्तचक्रंरथमवि
श्वमिन्वं । विषूवृतंमनसायुज्यमानंतंजिन्वथोवृषणापंचरश्मिं ॥ दिव्य१न्यःसदनंचक्रऽउच्चापृथिव्यामन्योऽअध्यं
तरिक्षे । तावस्मभ्यंपुरुवारंपुरुक्षुंरायस्पोषंविष्यतांनाभिमस्मे ॥ विश्वान्यन्योभुवनाजजानविश्वमन्योऽअभिच
क्षाणऽएति । सोमापूषणाववतंधियंमेयुवाभ्यांविश्वाःपृतनाजयेम ॥ धियंपूषाजिन्वतुविश्वमिन्वोरयिंसोमोरयिपति
र्दधातु । अवतुदेव्यदितिरनर्वाबृहद्वदेमविदथेसुवीराः ॥ ६ ॥ (२।४।९) वायोयेतेसहस्रिणोरथासस्तेभिरागहि ।

(२।४।८) सोमापूषणेतिषळर्चस्यसूक्तस्यगृत्समदःसोमापूषणौअंत्यायाःसोमपूषादित्यास्त्रिष्टुप्। (२।४।९) वायोइत्येकविंशत्यृचस्यसूक्तस्य गृत्समदआद्ययोर्द्वयोर्वायुस्तृतीयायाइंद्रवायूचतुर्थ्यादितिसृणांमित्रावरुणौसप्तम्यादितिसृणामश्विनौदशम्यादितिसृणामिंद्रःत्रयोदश्यादि

नियुत्वान्त्सोमंपीतये ॥ नियुत्वांन्वायवागह्ययंशुक्रोऽअयामित । गंतासिसुन्वतोगृहं+ ॥ शुक्रस्याद्यगवांशिरऽइंद्र
वायूनियुत्वंतः । आयांतंपिबंतंनरा ॥ अयंवांमित्रावरुणासुतःसोमंऽऋतावृधा । ममेदिहश्रुतंहवं ॥ राजांनावनंभि
द्रुहाध्रुवेसदंस्युत्तमे । सहस्रंस्थूणऽआसाते ॥ ७ ॥ तासम्राजांघृतासुंतीऽआदित्यादानुंनस्पतीं । सचैंतेऽअनंवह्वरं ॥
गोमंदूषुनांसत्याश्वांवद्यातमश्विना । वर्तीरुद्रानृपाय्यं ॥ नयत्परोनांतंरऽआदधर्षंद्वृषण्वसू । दुःशंसोमर्त्योरिपुः+ ॥
तानऽआवोंह्वमश्विनारयिंपिशंगसंदृशं । धिष्ण्यांवरिवोविदं ॥ इंद्रोऽअंगमहद्भयमभीषदपंचुच्यवत् । सहिस्थिरो
विचर्षणिः ॥ ८ ॥ इंद्रंश्चमृळयांतिनोननंःपश्चादघंनंशत् । भद्रंभंवातिनःपुरः+ ॥ इंद्रऽआशांभ्युस्परिसर्वांभ्योऽअ
भंयंकरत् । जेताशत्रून्विचर्षणिः ॥ विश्वेंदेवासऽआगंतश्रृणुतामंऽइमंहवं । एदंबर्हिर्निषींदत ॥ तीव्रोवोमधुंमाँऽ
अयंशुनहोंत्रेषुमत्सरः । एतंपिंबतकाम्यं ॥ इंद्रंज्येष्ठामरुंद्गणादेवांसःपूषंरातयः । विश्वेममंश्रुताहवं ॥ ९ ॥ अंबित
मेनदींतमेदेवितमेसरंस्वति । अप्रशस्ताऽइंवस्मसिप्रशंस्तिमंबनस्कृधि ॥ त्वेविश्वांसरस्वतिश्रितायूंषिदेव्यां । शुन
होंत्रेषुमत्स्वप्रजांदेंविदिदिड्ढिनः ॥ इमाब्रह्मंसरस्वतिजुषस्वंवाजिनीवति । यातेमन्मंगृत्समदाऽऋंतावरिप्रियादेवेषु
जुह्वंति ॥ प्रेतांयज्ञस्यंशंभुवांयुवामिदावृंणीमहे । अग्निंचंहव्यवाहंनं ॥ द्यावांनःपृथिवीऽइमंसिध्रमद्यादिंविस्पृशं ।

तिसृणांविश्वेदेवाःषोडश्यादितिसृणांसरस्वतीअंत्यानांतिसृणांद्यावापृथिवी (हविर्धानावा)गायत्रीअंबितमइतिद्वेअनुष्टुभौइमाब्रह्मेतिबृहती ।

यज्ञंदेवेषुयच्छतां ॥ आवामुपस्थमद्रुहादेवाःसीदंतुयज्ञियाः । इहाद्यसोमपीतये ॥ १० ॥ (२।४।१०) कनिक्रद
ज्जनुषंप्रब्रुवाणऽइयर्तिवाचमरितेवनावं । सुमंगलश्चशकुनेभवासिमात्वाकाचिदभिभाविश्व्यांविदत् ॥ मात्वांश्येन
ऽउद्वधीन्मासुपर्णोमात्वांविददिषुमान्वीरोऽअस्ता । पित्र्यामनुप्रदिशंकनिक्रदत्सुमंगलोभद्रवादीवदेह ॥ अवक्रंदद
क्षिणतोगृहाणांसुमंगलोभद्रवादीशकुंते । मानःस्तेनऽईशतमाघशंसोबृहद्वदेमविदथेसुवीराः ॥ ११ ॥ (२।४।११)
प्रदक्षिणिदभिगृणंतिकारवोवयोवदंतऽऋतुथाशकुंतयः । उभेवाचौवदतिसामगाऽइवगायत्रंचत्रैष्टुभंचानुराजति ॥
उद्गातेवशकुनेसामगायसिब्रह्मपुत्रऽइवसवनेषुशंससि । वृषेववाजीशिशुमतीरपीत्यासर्वतोनःशकुनेभद्रमावदविश्वतो
नःशकुनेपुण्यमावद ॥ आवदंस्त्वंशकुनेभद्रमावदतूष्णीमासीनःसुमतिंचिकिद्धिनः । यदुत्पतन्वदसिकर्करिर्यथाबृह
द्वदेमविदथेसुवीराः ॥१२॥ (इतिगार्त्समदंद्वितीयंमंडलंसमाप्तं अत्रसूक्तानि ४३) (परिशिष्टं॥ भद्रंवददक्षिणतोभ
द्रमुत्तरतोवद । भद्रंपुरस्तान्नोवदभद्रंपश्चात्कपिंजल ॥ भद्रंवदपुत्रैर्भद्रंवदगृहेषुच । भद्रमस्माकंनोवदभद्रंनोऽअभ
यंकृधि ॥ भद्रमधस्तान्नोवदभद्रमुपरिष्टान्नोवद । भद्रंभद्रंनऽआवदभद्रंनःसर्वतोवद ॥ असपत्नःपुरस्तान्नःशिवंदक्षि

(२।४।१०) कनिक्रददितितृचस्यसूक्तस्यगृत्समदःशकुंतस्त्रिष्टुप् । (२।४।११) प्रदक्षिणिदितितृचस्यसूक्तस्यगृत्समदःशकुंतोजगती द्वितीयातिशक्करीअष्टिर्वा ।

णतस्कृंधि । अभयंसतंतंपश्चाद्भद्रमुत्तरतोगृहे ॥ यौवनानिमहयंसिजिग्युषामिवदुंदुभिः । शकुंतकप्रदक्षिणंशतपत्राभिनोवद ॥ आवदँस्त्वं० ॥ इतिपरिशिष्टं ॥१॥) (३।१।१) सोमस्यमातवसंवक्ष्यग्नेवह्निंचकर्थविदथेयजंध्यै । देवाँऽअच्छादीद्यद्युंजेऽअद्रिंशमायेऽअग्नेतन्वंजुषस्व ॥ प्रांचंयज्ञंचकृमवर्धतांगीःसमिद्भिरग्निंनमसादुवस्यन् । दिवःशशासुर्विदथाकवीनांगृत्साययचित्तवसेगातुमीषुः ॥ मयोदधेमेधिरःपूतदक्षोदिवःसुबंधुर्जनुषापृथिव्याः । अविंदन्नुदर्शतमप्स्वं१तर्देवासोऽअग्निमपसिस्वसॄणां ॥ अवर्धयन्सुभगंसप्तयह्वीःश्वेतंजज्ञानमरुषंमहित्वा । शिशुंनजातमभ्यारुरश्वादेवासोऽअग्निंजनिमन्वपुष्यन्⁺ ॥ शुक्रेभिरंगैरजऽआततन्वान्क्रतुंपुनानःकविभिःपवित्रैः । शोचिर्वसानःपर्यायुरपांश्रियोमिमीतेबृहतीरनूनाः ॥ १३ ॥ वव्राजासीमनदतीरदब्धादिवोयह्वीरवसानाऽअनग्नाः । सनाऽअत्रयुवतयःसयोनीरेकंगर्भंदधिरेसप्तवाणीः ॥ स्तीर्णाऽअस्यसंहतोविश्वरूपाघृतस्ययोनौस्रवथेमधूनां । अस्थुरत्रधेनवःपिन्वमानामहीदस्मस्यमातरासमीची⁺ ॥ बभ्राणःसूनोसहसोव्यद्यौद्दधानःशुक्रारभसावपूंषि । श्चोततिधारामधुनोघृतस्यवृषायत्रवावृधेकाव्येन ॥ पितुश्चिदूधर्जनुषाविवेदव्यस्यधाराऽअसृजद्विधेनाः । गुहाचरंतंसखिभिःशिवेभिर्दिवोयह्वीभिर्नगुहाबभूव ॥ पितुश्चगर्भंजनितुश्चबभ्रेपूर्वीरेकोऽअधयत्पीप्यानाः । वृष्णेसपत्नीशुचयेसबंधूऽउभेऽअस्मैमनुष्ये३

अथवैश्वामित्रेतृतीयेमंडलेपंचानुवाकाः (३।१।१) सोमस्यमेतित्रयोविंशत्यृचस्यसूक्तस्यगाथिनोविश्वामित्रोग्निस्त्रिष्टुप् ।

Digitization by eGangotri and Sarayu Trust. Funding by MoE-Delhi

निपाहि ॥ १४ ॥ उरौमहाँऽअनिबाधेववर्धापोऽअग्निंयशसःसंहिपूर्वीः । ऋतस्ययोनावशयद्दमूनाजामीनामग्निरप
सिस्वसॄणां ॥ अक्रोनबभ्रिःसमिथेमहीनांदिदृक्षेयःसूनवेभाऽऋजीकः । उदुस्रियाजनितायोजजानापांगर्भोनृतमोय
ह्वोऽअग्निः+ ॥ अपांगर्भंदर्शतमोषधीनांवनाजजानसुभगाविरूपं । देवासश्चिन्मनसासंहिजग्मुःपनिष्ठंजातंतवसंदुव
स्यन् ॥ बृहंतऽइद्भानवोभाऽऋजीकमग्निंसचंतविद्युतोनशुक्राः । गुहेववृद्धंसदसिस्वेऽअंतरपारऽऊर्वेऽअमृतंदुहानाः ॥
ईळेचत्वायजमानोहविर्भिरीळेसखित्वंसुमतिंनिकामः । देवैरवोमिमीहिसंजरित्रेरक्षाजनोदम्येभिरनीकैः ॥ १५ ॥
उपक्षेतारस्तवसुप्रणीतेग्नेविश्वानिधन्यादधानाः । सुरेतसाश्रवसातुंजमानाऽअभिष्यामपृतनायूँरदेवान् ॥ आदेवाना
मभवःकेतुरग्नेमंद्रोविश्वानिकाव्यानिविद्वान् । प्रतिमर्ताँऽअवासयोदमूनाऽअनुदेवान्रथिरोयासिसाधन् ॥ निदुरो
णेऽअमृतोमर्त्यानांराजाससादविदथानिसाधन् । घृतप्रतीकऽउर्वियाव्यद्यौदग्निर्विश्वानिकाव्यानिविद्वान्+ ॥ आ
नोगहिसख्येभिःशिवेभिर्महान्महीभिरूतिभिःसरण्यन् । अस्मेरयिंबहुलंसंतरुत्रंसुवाचंभागंयशसंकृधीनः ॥ एतातेऽ
अग्नेजनिमासनानिप्रपूर्व्यायनूतनानिवोचं । महांतिवृष्णेसवनाकृतेमाजन्मन्जन्मन्निहितोजातवेदाः ॥ जन्मन्जन्म
न्निहितोजातवेदाविश्वामित्रेभिरिध्यतेऽअजस्रः । तस्यवयंसुमतौयज्ञियस्यापिभद्रेसौमनसेस्याम ॥ इमंयज्ञंसहसाव
न्त्वंनोदेवत्राधेहिसुक्रतोरराणः । प्रयंसिहोतर्बृहतीरिषोनोग्नेमहिद्रविणमायजस्व ॥ इळामग्नेपुरुदंसंसनिंगोःशश्वत्त

मंहवमानायसाध । स्यान्नःसूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे ॥ १६ ॥ (३।१।२) वैश्वानरायधिषणामृतावृधेघृतंनपूतमग्नयेजनामसि । द्विताहोतारंमनुषश्चवाघतोधियारथंनकुलिशःसमृण्वति ॥ सरोचयज्जनुषारोदसीऽउभेसमात्रोरभवत्पुत्रऽईड्यः । हव्यवाळग्निरजरश्चनोहितोदूळभोविशामतिथिर्विभावसुः ॥ क्रत्वादक्षस्यतरुषोविधर्मणिदेवासोऽअग्निंजनयंतचित्तिभिः । रुरुचानंभानुनाज्योतिषामहामत्यंनवाजंसनिष्यन्नुपब्रुवे ॥ आमंद्रस्यसनिष्यंतोवरेण्यंवृणीमहेऽअह्रयंवाजमृग्मियं । रातिंभृगूणामुशिजंकविक्रतुमग्निंराजंतंदिव्येनशोचिषा ॥ अग्निंसुम्नायदधिरेपुरोजनावाजश्रवसमिहवृक्तबर्हिषः । यतस्रुचःसुरुचंविश्वदेव्यंरुद्रंयज्ञानांसाधदिष्टिमपसां ॥ १७ ॥ पावकशोचेतवहिक्षयंपरिहोतर्यज्ञेषुवृक्तबर्हिषोनरः । अग्नेदुवऽइच्छमानासऽआप्यमुपासतेद्रविणंधेहितेभ्यः ॥ आरोदसीऽअपृणदास्वर्महज्जातंयदेनमपसोऽअधारयन् । सोऽअध्वरायपरिणीयतेकविरत्योनवाजसातयेचनोहितः ॥ नमस्यतहव्यदातिंस्वध्वरंदुवस्यतदम्यंजातवेदसं । रथीरृतस्यबृहतोविचर्षणिरग्निर्देवानामभवत्पुरोहितः ॥ तिस्रोयह्वस्यसमिधःपरिज्मनोग्नेरपुनन्नुशिजोऽअमृत्यवः । तासामेकामदधुर्मर्त्येभुजमुलोकमुद्वेऽउपजामिमीयतुः ॥ विशांकविंविश्पतिंमानुषीरिषःसंसीमकृण्वन्त्स्वधितिंनतेजसे । सऽउद्वतोनिवतोयातिवेविषत्सगर्भमेषभुवनेषुदीधरत् ॥१८॥ सजिन्वतेजठरे

(३।१।२) वैश्वानरायेतिपंचदशर्चस्यसूक्तस्यविश्वामित्रोवैश्वानरोग्निर्जगती ।

षुप्रजज्ञिवान्वृषाचित्रेषुनानदन्नसिंहः । वैश्वानरःपृथुपाजाऽअमर्त्योवसुरत्नादयमानोविदाशुषे ॥ वैश्वानरःप्रत्नथाना
कमारुहद्दिवस्पृष्ठंभंदमानःसुमन्मभिः । सपूर्ववज्जनयन्जंतवेधनंसमानमज्मंपर्येतिजागृविः ॥ ऋतावानंयज्ञियंविप्र
मुक्थ्य१मायंदधेमातरिश्वादिविक्षयं । तंचित्रयामंहरिकेशमीमहेसुदीतिमग्निंसुवितायनव्यसे ॥ शुचिंनयामन्नि
षिरंस्वर्दृशंकेतुंदिवोरोचनस्थामुषर्बुधं । अग्निंमूर्धानंदिवोऽअप्रतिष्कुतंतमीमहेनमसावाजिनंबृहत्⁺ ॥ मंद्रंहोतारंशु
चिमद्वयाविनंदमूनसमुक्थ्यंविश्वचर्षणिं । रथंनचित्रंवपुषायदर्शतंमनुर्हितंसदमिद्रायऽईमहे ॥ १९ ॥ (३।१।३)
वैश्वानरायपृथुपाजसेविपोरत्नाविधंतधरुणेषुगातवे । अग्निर्हिदेवाँऽअमृतोदुवस्यत्यथाधर्माणिसनतानदूदुषत् ॥ अं
तर्दूतोरोदसीदस्मईयतेहोतानिषत्तोमनुषःपुरोहितः । क्षयंबृहंतंपरिभूषतिद्युभिर्देवेभिरग्निरिषितोधियावसुः ॥ केतुंय
ज्ञानांविदथस्यसाधनंविप्रासोऽअग्निंमहयंतचित्तिभिः । अपांसियस्मिन्नधिसंदधुर्गिरस्तस्मिन्त्सुम्नानियजमानऽआच
के ॥ पितायज्ञानामसुरोविपश्चितांविमानमग्निर्वयुनंचवाघतां । आविवेशरोदसीभूरिवर्पसापुरुप्रियोभंदतेधामभिः
कविः⁺ ॥ चंद्रमग्निंचंद्ररथंहरिव्रतंवैश्वानरमप्सुषदंस्वर्विदं । विगाहंतूर्णितविषीभिरावृतंभूर्णिंदेवासऽइहसुश्रियंदधुः
॥ २० ॥ अग्निर्देवेभिर्मनुषश्चजंतुभिस्तन्वानोयज्ञंपुरुपेशसंधिया । रथीरंतरीयतेसाधदिष्टिभिर्जीरोदमूनाऽअभिश

(३।१।३) वैश्वानरायेत्येकादशर्चस्यसूक्तस्यविश्वामित्रोवैश्वानरोग्निर्जगती ।

स्ति॒चात॑नः ॥ अग्ने॒जर॑ंस्वस्वप॒त्यऽआयु॑न्यू॒र्जा॑पिन्वस्व॒समिषो॑दिदीहिनः । वयाँ॑सिजिन्वबृह॒तश्च॑जागृवऽउ॒शिग्दे॒वाना॒
मसि॑सु॒क्रतु॑र्वि॒पां+ ॥ वि॒श्पति॑य॒ह्वमति॑थि॒ंनर॒ःसदा॑य॒ंतार॒ंधी॒नामु॒शिजं॑चवा॒घता॑ँ । अ॒ध्व॒राणा॒ंचेत॑नंजा॒तवे॑दसं॒प्रशं॑संति॒
नम॑साजू॒तिभि॑र्वृ॒धे+ ॥ वि॒भावा॑दे॒वःसु॒रण॒ःपरि॑क्षि॒तीर॒ग्निर्ब॑भूव॒शव॑सासु॒मद्र॑थः । तस्य॑व्र॒तानि॑भूरिपो॒षिणो॑व॒यमुप॑भूषे
म॒दम॒ऽआसु॑वृ॒क्तिभि॑ः ॥ वैश्वा॑नर॒तव॒धामा॒न्याच॑के॒येभि॑ःस्व॒र्विद॑भ॑वोविचक्षण । जा॒तऽआपृ॑णो॒भुव॑नानि॒रोद॑सी॒ऽअ
ग्ने॒ताविश्वा॑परि॒भूर॑सि॒त्मना॑ ॥ वै॒श्वा॒न॒रस्य॑दं॒सना॑भ्योबृ॒हदरि॑णा॒देक॑ःस्वप॒स्यया॑क॒विः । उ॒भापि॒तरा॑म॒हय॑न्नजायता॒ग्नि
र्द्यावा॑पृथि॒वीभूरि॑रेतसा ॥ २१ ॥ (३।१।४) स॒मित्स॑मित्सु॒मना॑बोध्य॒स्मेशु॒चाशु॑चासुम॒तिंरा॑सि॒वस्वः॑ । आदे॑वदे॒वा
न्य॒जथा॑यवक्षि॒सखा॒सखीं॑न्त्सु॒मना॑यक्ष्यग्ने ॥ यंदे॒वास॒स्त्रिरह॑न्न॒ायजं॑तेदि॒वेदि॑वे॒वरु॑णोमि॒त्रोऽअ॒ग्निः । सेमंय॒ज्ञंमधु॑मंतं
कृ॒धीन॒स्तनू॑नपाद्धृ॒तयो॑निंवि॒धंत॑ं ॥ प्र॒दीधि॑तिर्वि॒श्ववा॑राजिगाति॒होता॑रमि॒ळःप्र॑थ॒मंयज॑ध्यै । अच्छा॒नमो॑भिर्वृष॒भंव॒ंद
ध्यै॒सदे॒वान्य॑क्षदिषि॒तोयजी॑यान् ॥ ऊ॒र्ध्वोवां॑गा॒तुर॑ध्व॒रेऽअ॑कार्यू॒र्ध्वाशो॒चींषि॒प्रस्थि॑ता॒रजाँ॑सि । दि॒वोवा॒नाभा॒न्य॑सादि॒
होता॑स्तृ॒णीम॑हिदे॒वव्य॑चा॒विब॒र्हिः+ ॥ स॒प्तहो॒त्राणि॒मन॑सावृ॒णानाऽइन्वं॑तो॒विश्वं॒प्रति॑यन्नृ॒तेन॑ । नृ॒पेश॑सोवि॒दथे॑षु॒प्रजा॒

(३।१।४) समित्समिदित्येकादशर्चस्यसूक्तस्यविश्वामित्रइध्मस्तनूनपादिळोबर्हिर्देवीर्द्वारउषासानक्तादैव्यौहोतारौसरस्वतीळाभारत्यस्त्वष्टावनस्पतिस्वाहाकृतयइतिक्रमेणदेवतास्त्रिष्टुप् ।

ताऽअभी३मंयज्ञंविचरंतपूर्वीः+ ॥ २२ ॥ आभंदमानेऽउषसाऽउपाकेऽउतस्मयेतेतन्वा३विरूपे । यथानोमित्रोवरु
णोजुजोषदिंद्रोमरुत्वाँऽउतवामहोभिः ॥ दैव्याहोताराप्रथमान्यृंजेसप्तपृक्षासःस्वधयामदंति । ऋतंशंसंतऽऋतमित्त
ऽआहुरनुव्रतंव्रतपादीध्यानाः ॥ आभारतीभारतीभिःसजोषाऽइळादेवैर्मनुष्येभिरग्निः । सरस्वतीसारस्वतेभिरर्वा
क्तिस्रोदेवीर्बर्हिरेदंसदंतु ॥ तन्नस्तुरीपमधपोषयित्नुदेवत्वष्टर्विरराणःस्यस्व । यतोवीरःकर्मण्यःसुदक्षोयुक्तग्रावाजा
यतेदेवकामः ॥ वनस्पतेवसृजोपदेवानग्निर्हविःशमितासूदयाति । सेदुहोतासत्यतरोयजातियथादेवानांजनिमानि
वेद ॥ आयाह्यग्नेसमिधानोऽअर्वाङिंद्रेणदेवैःसरथंतुरेभिः । बर्हिर्नऽआस्तामदितिःसुपुत्रास्वाहादेवाऽअमृतामादयं
तां ॥ २३ ॥ (३।१।५) प्रत्यग्निरुषसश्चेकितानोबोधिविप्रःपदवीःकवीनां । पृथुपाजादेवयद्भिःसमिद्धोपद्वारातम
सोवह्निरावः ॥ प्रेद्वग्निर्वावृधेस्तोमेभिर्गीर्भिःस्तोतृणांनमस्यऽउक्थैः । पूर्वीऽऋतस्यसंदृशश्चकानःसंदूतोऽअद्यौदुषसो
विरोके+ ॥ अधाय्यग्निर्मानुषीषुविक्ष्व१पांगर्भोमित्रऽऋतेनसाधन् । आहर्यतोयजतःसान्वस्थादभूदुविप्रोहव्योमती
ना+ ॥ मित्रोऽअग्निर्भवतियत्समिद्धोमित्रोहोतावरुणोजातवेदाः । मित्रोऽअध्वर्युरिषिरोदमूनामित्रःसिंधूनामुतपर्व ॥५६॥

(३।१।५) प्रत्यग्निरित्येकादशर्चस्यसूक्तस्यविश्वामित्रोग्निस्त्रिष्टुप् (प्रत्यग्निःप्रकारवःसूक्तयोरन्यासांद्यावापृथिव्यादीनांनिपाताद्दृश्यंते अतस्तयोर्लिंगोक्तादेवताःपाक्षिकाः)।

ता॒नां ॥ पातिं॑प्रि॒यंरि॒पोऽअग्रं॑प॒दंवेः॑पाति॑य॒ह्वश्चर॑णं॒सूर्य॑स्य । पाति॑ना॒भा॑स॒प्तशी॑र्षाणम॒ग्निःपातिं॑दे॒वाना॑मुप॒माद॑मृ॒ष्वः ॥ २४ ॥ ऋ॒भुश्च॑क्र॒ऽईड्यं॒चारु॒नाम॒विश्वा॑निदे॒वोव॒युना॑निवि॒द्वान् । स॒सस्य॒चर्म॑घृ॒तव॑त्प॒दंवेस्तदि॒दग्नीर॑क्ष॒त्यप्र॑युच्छन् ॥ आयोनिं॑म॒ग्निर्घृ॒तवं॑तमस्थात्पृ॒थुप्रं॑गाणमु॒शंतं॑मुशा॒नः । दीद्या॑नः॒शुचि॑र्ऋ॒ष्वःपा॑व॒कःपुनः॑पुनर्मा॒तरा॒नव्य॑सीकः ॥ स॒द्यो जा॒तऽओष॑धीभिर्ववक्षे॒यदी॒वर्धं॑तिप्र॒स्वो॑घृ॒तेन॑ । आप॑ऽइवप्र॒वता॒शुंभ॑मानाऽउरु॒ष्यद॒ग्निःपि॒त्रोरु॒पस्थे॑ ॥ उदु॑ष्टु॒तःस॒मिधा॑ य॒ह्वोऽअ॑द्यौ॒द्वर्ष्म॑न्दि॒वोऽअधि॒नाभा॑पृथि॒व्याः । मि॒त्रोऽअ॒ग्निरीड्यो॑मात॒रिश्वा॑दू॒तोव॑क्षद्य॒जथा॑यदे॒वान्+ ॥ उद॑स्तंभीत्स॒मिधा॒नाक॑मृ॒ष्वो॒३॒ग्निर्भव॑न्नुत्त॒मोरो॑च॒नानां॑ । यदी॒भृगु॑भ्य॒ःपरि॑मात॒रिश्वा॒गुहा॒संतं॑हव्य॒वाहं॑समी॒धे+ ॥ इळा॑मग्ने० ॥ २५ ॥ (३।१।६) प्रका॑रवोमन॒नाव॒च्यमा॑नादेव॒द्रीचीं॑नयतदेव॒यंतः॑ । द॒क्षि॒णा॒वाड्वा॒जिनी॒प्राच्ये॑तिह॒विर्भर॑न्त्य॒ग्नये॑घृ॒ताची॑ ॥ आ रोद॑सीऽअपृ॒णाजाय॑मानऽउ॒तप्ररि॑क्था॒ऽअध॒नुप्रय॑ज्यो । दि॒वश्चि॑दग्नेमहि॒नापृ॑थि॒व्याव॒च्यंता॑ंते॒वह्न॑यःस॒प्तजि॑ह्वाः ॥ द्यौश्च॑त्वापृथि॒वीय॒ज्ञिया॑सो॒निहोता॑रंसादयंते॒दमा॑य । यदी॒विशो॒मानु॑षीर्देव॒यंती॒ःप्रय॑स्वती॒रीळ॑तेशु॒क्रम॒र्चिः+ ॥ म॒हान्त्स॒धस्थे॑ध्रु॒वऽआनिष॑त्तो॒न्तर्द्यावा॒माहि॑ने॒हर्य॑माणः । आस्क्रे॑स॒पत्नी॑ऽअ॒जरे॒ऽअमृ॑क्तेसब॒र्दुघे॑ऽउरुगा॒यस्य॑धे॒नू+ ॥ व्र॒तातेऽअग्ने॑मह॒तोम॒हानि॒तव॒क्रत्वा॒रोद॑सी॒ऽआत॑तंथ । त्वंदू॒तोऽअ॑भवो॒जाय॑मान॒स्त्वंने॒तावृ॑षभचर्षणी॒नां+ ॥ २६ ॥ ऋ॒तस्य॑वाके॒

(३।१।६) प्रकारवइत्येकादशर्चस्यसूक्तस्यविश्वामित्रोग्निस्त्रिष्टुप् ।

शिनां॑यु॒ग्याभि॑र्घृ॒त॒स्नु॒वा॒रोहि॑ता॒धु॒रि॑धिष्व । अथा॑वहदे॒वान्दे॑व॒विश्वा॑न्त्स्वध्व॒राकृ॑णुहिजातवेदः ॥ दि॒वश्चि॒दाते॑रुचयं
त॒रोका॑ऽउ॒षोवि॑भा॒तीरनु॑भासिपू॒र्वीः । अ॒पोयद॑ग्नऽउ॒शध॒ग्वनेषु॒होतु॑र्मं॒द्रस्य॑प॒नयं॑तदे॒वाः+ ॥ उ॒रौवा॒येऽअं॒तरि॑क्षे॒मदं॑ति
दि॒वोवा॒येरो॑च॒नेसंति॑दे॒वाः । ऊमा॑वा॒येसु॒हवा॑सो॒यजं॑त्राऽआयेमि॒रे॒र॒थ्यो॑ऽअग्ने॒ऽअश्वाः॑ ॥ ऐभि॑रग्ने॒सरथं॑याह्य॒र्वाङ्ना॑ना
र॒थंवा॑वि॒भवो॒ह्यश्वाः॑ । पत्नी॑वतस्त्रिं॒शतं॒त्रीँश्च॑दे॒वान॑नुष्व॒धमा॑वह॒मादय॑स्व ॥ सहोता॒यस्य॒रोद॑सीचिदु॒र्वी॑य॒ज्ञंयं॑ज्ञम॒भिवृ॒
धे॑गृ॒णीतः । प्राची॑ऽअध्व॒रेवं॑तस्थतुःसु॒मेके॑ऽऋ॒ताव॑रीऽऋ॒तजा॑तस्यस॒त्ये+ ॥ इळा॑मग्नेपुरु॒दंसं॑स॒निंगोः॑शश्वत्त॒मंहवं॑मा
नायसाध । स्यान्नः॑सू॒नुस्तन॑यो॒विजावा॑ग्ने॒साते॑सुम॒तिर्भू॑त्व॒स्मे+ ॥ २७ ॥ इतिद्वितीयाष्टकेष्टमोऽध्यायः ॥ ८ ॥ ॥

षोडशाध्याये वर्गाः २७ सूक्तानि १३ ऋचः १४० ॥ त्यागः ॥ द्रविणोदसेग्नयइषायेदं. द्रविणोदसेग्नयऊर्जाये. द्रविणोदसेग्नयेसहाये. द्रविणोदसेग्नयेसहस्याये. अश्विभ्यांतपस. अग्नयेतपस्याये. सवित्र. ११ अश्विभ्या. ८ सोमापूषणाभ्या. ९ सोमापूषणादितिभ्य. वायव. २ इंद्रवायुभ्या. मित्रावरुणाभ्या. ३ अश्विभ्या. ३ इंद्राये. ३ विश्वेभ्योदेवेभ्य. ३ सरस्वत्याइ. ३ द्यावापृथिवीभ्या. ३ शकुंताये. ६ अग्नय. २३ वैश्वानरायाग्नय. २६ समिद्धायाग्नय. तनूनपात. इळाये. बर्हिष. देवीभ्योद्वार्भ्य. उषासानक्ताभ्या. देवीभ्यांहोतृभ्यां-प्रचेतोभ्यामि. सरस्वतीळाभारतीभ्य. त्वष्टृइ. वनस्पतय. स्वाहाकृतिभ्य. अग्नयइदं. २२ ॥ इतिद्वितीयेष्टमः ॥

॥ द्वितीयाष्टकःसमाप्तः ॥

॥ इतिद्वितीयोऽष्टकःसमाप्तः ॥

॥ अथतृतीयाष्टकप्रारंभः ॥

श्रीः ॥ प्रयेंऽजंतियूपस्तुतिंःषष्ठ्याद्यानिर्महवौत्याग्नश्चान्त्यष्टमीवैश्वदेवीवातृतीयासप्तम्यावनुष्टुभौसखायोनव बार्हतंत्रिष्टुबंतंत्वामग्नऔष्णिहंमग्निर्होतागायत्रींत्विंद्राग्नीऐंद्राग्नंप्रवःसप्तऋषभस्त्वानुष्टुभंमाहोताविपाजसांका त्योत्कीलस्त्वंयमग्निःषट्प्रागाथंसमिध्यमानःपंचकतोवैश्वामित्रस्तुंभवानोग्निंहोतारंगाथीहाग्निमुषसंमाद्यांत्ये वैश्वदेव्यांविमंनउपाद्येअनुष्टुभौविराड्रूपासतोबृहतीचांत्यायंसउपांत्यानुष्टुप्पुंरीष्येभ्योग्निभ्योंनिर्मथितोदेवश्र वादेववातश्चंभारतौतृतीयासतोबृहंत्यग्नेसहस्वगायत्रमाद्यानुष्टुबंग्नेदिवोवैराजंमुपांत्याग्नेंद्रींवैश्वानरंनवतृचौवै श्वानरीयंमारुतौजागतौद्वृचआत्मस्तुतिर्वांपूर्वात्मगीतांत्योपाध्यायस्तुतिंःप्रवःपंचोनागायत्रंत्वृंतव्यावाद्याग्ने जुषस्वषट्तृतीयाद्युष्णिक्त्रिष्टुप्जगत्यौस्तीदंषोळशांद्याचतुर्थींदशमीद्वादश्योनुष्टुभंःषष्ठ्येकादश्युपांत्येचजग त्यंःपंचम्यृत्विग्भ्योवा ॥ १ ॥ ॥ ॥ ॥ ॥ ॥

श्रीगणेशायनमः ॥ हरिःओम् ॥ (३।१।७) प्रयऽआरुःशिंतिपृष्ठस्यंधासेरामातरांविविशुःसप्तवाणीः । परि क्षितांपितरासंचंरेतेप्रसंर्स्रातेदीर्घमायुंःप्रयक्षें ॥ दिवक्षंसोधेनवोवृष्णोऽअश्वांदेवीरातंस्थौमधुंमद्वहंतीः । ऋतस्यंत्वा सदंसिक्षेमयंतंपर्येकांचरतिवर्तनिंगौः+ ॥ आसींमरोहत्सुयमाभवंतीःपतिंश्चिकित्वान्रंयिविद्रंयीणां । प्रनीलंपृष्ठोऽअ

(३।१।७) प्रयआरुरित्येकादशर्चस्यसूक्तस्यगाथिनोविश्वामित्रोग्निस्त्रिष्टुप् ।

तसस्यधासेस्ताऽअवासयत्पुरुधप्रतीकः ॥ महित्वाष्ट्रमूर्जयंतीरजुर्यंस्तभूयमानंवहतोवहंति । व्यंगेभिर्दिद्युतानःसध
स्थऽएकामिवरोदसीऽआविवेश ॥ जानंतिवृष्णोऽअरुषस्यशेवमुतब्रध्नस्यशासनेरणंति । दिवोरुचःसुरुचोरोचमानाऽ
इळायेषांगण्यामाहिनागीः+ ॥ १ ॥ उतोपितृभ्यांप्रविदानुघोषंमहोमहद्भ्यामनयंतशूषं । उक्षाहयत्रपरिधानमक्तोरनु
स्वंधामजरितुर्ववक्ष ॥ अध्वर्युभिःपंचभिःसप्तविप्राःप्रियंरक्षंतेनिहितंपदंवेः । प्रांचोमदंत्युक्षणोऽअजुर्यादेवादेवानाम
नुहिव्रतागुः+ ॥ दैव्याहोताराप्रथमान्यृंजेसप्तपृक्षासःस्वधयामदंति । ऋतंशंसंतऽऋतमित्तऽआहुरनुव्रतंव्रतपादीध्या
नाः ॥ वृषायंतेमहेऽअत्यायपूर्वीर्वृष्णेचित्रायरश्मयःसुयामाः । देवहोतर्मंद्रतरश्चिकित्वान्महोदेवान्रोदसीऽएहवक्षि ॥
पृक्षप्रयजोद्रविणःसुवाचःसुकेतवऽउषसोरेवदूषुः । उतोचिदग्नेमहिनापृथिव्याःकृतंचिदेनःसंमहेदशस्य ॥ इळामग्ने
पुरुदंसंसनिंगोःशश्वत्तमंहवमानायसाध । स्यान्नःसूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे+ ॥ २ ॥ (३।१।८) अं
जंतित्वामध्वरेदेवयंतोवनस्पतेमधुनादैव्येन । यदूर्ध्वस्तिष्ठाद्रविणेहधत्ताद्यद्वाक्षयोमातुरस्याऽउपस्थे ॥ समिद्धस्यश्र
यमाणःपुरस्ताद्ब्रह्मवन्वानोऽअजरंसुवीरं । आरेऽअस्मदमतिंबाधमानऽउच्छ्रयस्वमहतेसौभगाय ॥ उच्छ्रयस्ववनस्पते

(३।१।८) अंजंतीत्येकादशर्चस्यसूक्तस्यविश्वामित्रोयूपःषष्ठ्यादिपंचानांयूपाः (अष्टम्याविश्वेदेवावा) अंत्यायाव्रश्चनस्त्रिष्टुप्तृतीयासप्तम्यावनुष्टुभौ । ॥ २ ॥

वर्ष्म॑न्पृथि॒व्याऽअधि॑ । सुमि॑तीमी॒यमा॑नो॒वर्चो॑धाय॒ज्ञवा॑हसे ॥ युवा॑सु॒वासाः॒परि॑वीत॒ऽआगा॒त्सऽउ॒श्रेया॑न्भवति॒जाय॑मानः । तंधीरा॑सःक॒वय॒ऽउन्न॑यंतिस्वा॒ध्यो॒३॑मन॑सादेव॒यंतः॑ ॥ जा॒तोजा॑यतेसुदि॒नत्वेऽअह्ना॑सम॒र्य॑ऽआवि॒दथे॒वर्ध॑मानः । पुनं॑ति॒धीरा॑ऽअ॒पसो॑मनी॒षादे॑व॒याविप्र॒ऽउदि॑यर्ति॒वाचं॑ ॥ ३ ॥ यान्वो॒नरो॑देव॒यंतो॑निमि॒म्युर्वन॑स्पते॒स्वधि॑तिर्वा॑त॒तक्ष॑ । तेदे॒वासः॒स्वर॑वस्तस्थि॒वांसः॑प्र॒जाव॑द॒स्मेदि॑धिषंतु॒रत्नं॑ ॥ येवृ॒क्णासो॒ऽअधि॒क्षमि॒निमि॑तासोय॒तस्रु॑चः । तेनो॑व्यंतु॒वार्यं॑देव॒त्राक्षे॑त्र॒साध॑सः ॥ आ॒दि॒त्यारु॒द्रावस॑वःसुनी॒थाद्यावा॒क्षामा॑पृथि॒वीऽअं॒तरि॑क्षं । स॒जोष॑सोय॒ज्ञम॑वंतुदे॒वाऽऊ॒र्ध्वं॑कृ॑ण्वंत्वध्व॒रस्य॑के॒तुं+ ॥ हं॒साऽइ॑वश्रेणि॒शोयता॑नाःशु॒क्रावसा॑ना॒ःस्वर॑वोन॒ऽआगुः॑ । उ॒न्नी॒यमा॑नाःक॒विभिः॑पु॒रस्ता॑द्दे॒वादे॒वाना॒मपि॑यंति॒पाथः॑ ॥ श्रृंगा॑णीवेच्छृं॒गिणां॒संद॑दृश्रे॒च॒षाल॑वंत॒ःस्वर॑वःपृथि॒व्यां । वा॒घद्भि॑र्वाविह॒वेश्रोष॑माणाऽअ॒स्माँऽअ॑वंतुपृत॒नाज्ये॑षु ॥ वन॑स्पतेश॒तव॑ल्शो॒विरो॑हस॒हस्र॑वल्शा॒विव॒यं॑रुहेम । यंत्वाम॒यंस्वधि॑ति॒स्तेज॑मानःप्रणि॒नाय॑मह॒तेसौभ॑गाय ॥ ४ ॥ (३।१।९) सखा॑यस्त्वाववृमहेदे॒वंमर्ता॑सऽऊ॒तये॑ । अ॒पांनपा॑तंसु॒भगं॑सु॒दीदि॑तिंसु॒प्रतू॑र्तिमने॒हसं॑ ॥ काय॑मानोव॒नात्वंयन्मा॒तृरजं॑गन्न॒पः । नतत्ते॑ऽअग्नेप्र॒मृषे॑नि॒वर्त॑नं॒यद्दू॒रेसन्नि॒हाभ॑वः ॥ अति॑तृ॒ष्टंव॑वक्षि॒थाथै॒वसु॒मना॑ऽअसि । प्रप्रा॒न्येयंति॒पर्य॒न्यऽआस॑ते॒येषां॑स॒ख्येऽअसि॑श्रि॒तः+ ॥ ई॒यि॒वांस॒मति॒स्रिध॒ःशश्व॑ती॒रति॑स॒श्चतः॑ । अन्वी॑मविंद

(३।१।९) सखायइतिनवर्चस्यसूक्तस्यविश्वामित्रोग्निर्बृहत्यंत्यात्रिष्टुप ।

न्निचिरासोऽद्रुहोप्सुसिंहमिवश्रितं+ ॥ ससृवांसमिवत्मनाग्निमित्थातिरोहितं । ऐनंनयन्मातरिश्वापरावतोदेवे
भ्योमथितंपरि ॥ ५ ॥ तंत्वामर्ताऽअगृभ्णतदेवेभ्योहव्यवाहन । विश्वान्यद्यज्ञाँऽअभिपासिमानुषतवक्रत्वायवि
छ्य ॥ तद्भद्रंतवदंसनापाकायचिच्छदयति । त्वांयदग्नेपशवःसमासतेसमिद्धमपिशर्वरे+ ॥ आजुहोतास्वध्वरंशीरंपा
वकशोचिषं । आशुंदूतमजिरंप्रत्नमीड्यंश्रुष्टीदेवंसपर्यत ॥ त्रीणिशतात्रीसहस्राण्यग्निंत्रिंशच्चदेवानवचासपर्यन् ।
औक्षन्घृतैरस्तृणन्बर्हिरस्माऽआदिद्धोतारंन्यसादयंत ॥ ६ ॥ (३।१।१०) त्वामग्नेमनीषिणःसम्राजंचर्षणीनां ।
देवंमर्तासऽइंधतेसमध्वरे+ ॥ त्वांयज्ञेष्वृत्विजमग्नेहोतारमीळते । गोपाऽऋतस्यदीदिहिस्वेदमे ॥ सघायस्तेददाशति
समिधाजातवेदसे । सोऽअग्नेधत्तेसुवीर्यंसपुष्यति ॥ सकेतुरध्वराणामग्निर्देवेभिरागमत् । अंजानःसप्तहोतृभिर्हविष्म
ते ॥ प्रहोत्रेपूर्व्यंवचोग्नयेभरताबृहत् । विपांज्योतींषिबिभ्रतेनवेधसे ॥ ७॥ अग्निंवर्धतुनोगिरोयतोजायतऽउक्थ्यः ।
महेवाजायद्रविणायदर्शतः+ ॥ अग्नेयजिष्ठोऽअध्वरेदेवान्देवयतेयज । होतामंद्रोविराजस्यतिस्रिधः ॥ सनःपावक
दीदिहिद्युमदस्मेसुवीर्यं । भवास्तोतृभ्योऽअंतमःस्वस्तये ॥ तंत्वाविप्राविपन्यवोजागृवांसःसमिंधते । हव्यवाहममर्
त्यंसहोवृधं ॥ ८ ॥ (३।१।११) अग्निर्होतापुरोहितोध्वरस्यविचर्षणिः । सवेदयज्ञमानुषक्+ ॥ सहव्यवाळमर्त्य

(३।१।१०) त्वामग्नइतिनवर्चस्यसूक्तस्यविश्वामित्रोग्निरुष्णिक् । (३।१।११) अग्निर्होतेतिनवर्चस्यसूक्तस्यविश्वामित्रोग्निर्गायत्री ।

ऽउ॒शिग्दू॒तश्च॒नो॑हितः । अ॒ग्निर्धि॒यासमृ॑ण्वति ॥ अ॒ग्निर्धि॒यासचे॑तति के॒तुर्य॒ज्ञस्य॑पू॒र्व्यः । अर्थ॒ह्यस्यत॒रणि॑ ॥ अ॒ग्निंसू॒नुं
सनं॑श्रु॒तंसह॑सोजा॒तवे॑दसं । वह्नि॑दे॒वाऽअ॑कृण्वत ॥ अदा॑भ्यःपुरऽए॒तावि॒शाम॒ग्निर्मानु॑षीणां । तू॒र्णी॑र॒थःसदा॒नवः॑
॥ ९ ॥ सा॒ह्वान्विश्वा॑ऽअभि॒युज॒ःक्रतु॑र्दे॒वाना॒मम॑मृक्तः । अ॒ग्निस्तु॒विश्र॑वस्तमः ॥ अ॒भिप्रया॑ंसि॒वाह॑सादा॒श्वाँऽअ॑श्नोति॒
मर्त्यः॑ । क्षयं॑पाव॒कशो॑चिषः ॥ परि॒विश्वा॑नि॒सुधि॑ता॒ग्नेर॑श्याम॒मन्म॑भिः । विप्रा॑सोजा॒तवे॑दसः ॥ अग्ने॒विश्वा॑नि॒वार्या॒
वाजे॑षुसनिषामहे । त्वेदे॒वास॒ऽएरि॑रे ॥ १० ॥ (३।१।१२) इंद्रा॑ग्नी॒ऽआग॑तंसुतंगी॒र्भिर्न॒भोवरे॑ण्यं । अ॒स्यपा॑तंधि॒
येषि॒ता+ ॥ इंद्रा॑ग्नीजरि॒तुःसचा॑य॒ज्ञोजि॑गाति॒चेत॑नः । अ॒यापा॑तमि॒मंसु॒तं+ ॥ इंद्र॑म॒ग्निंक॑वि॒च्छदा॑य॒ज्ञस्य॑जू॒त्यावृ॑णे ।
तासोम॑स्ये॒हतृं॑पतां ॥ तो॒शावृ॑त्र॒हणा॑हुवेस॒जित्वा॒नाप॑राजिता । इं॒द्रा॒ग्नीवा॑ज॒सात॑मा ॥ प्रवा॑मर्चंत्यु॒क्थिनो॑नीथा॒विदो॑
जरि॒तार॑ः । इंद्रा॑ग्नी॒ऽइष॒ऽआवृ॑णे ॥ ११ ॥ इंद्रा॑ग्नीनव॒तिंपुरो॑दा॒सप॑त्नीरधूनुतं । सा॒कमेके॑न॒कर्म॑णा ॥ इंद्रा॑ग्नी॒ऽअप॑
स॒स्पर्यु॒पप्रयं॑तिधी॒तयः॑ । ऋ॒तस्य॑प॒थ्या॒३॒अनु॑ ॥ इंद्रा॑ग्नीतवि॒षाणि॑वांस॒धस्था॑नि॒प्रयां॑सिच । यु॒वोर॒प्तूर्यं॑हि॒तं+ ॥ इंद्रा॑ग्नी
रोच॒नादि॒वःपरि॒वाजे॑षुभूषथः । तद्वां॑चेति॒प्रवी॒र्यं॑+ ॥ १२ ॥ (३।२।१) प्रवो॑दे॒वाया॒ग्नये॒बर्हि॑ष्ठमर्चास्मै । गम॑द्दे॒वे
भि॒रासनो॒यजि॑ष्ठोब॒र्हिरास॑दत् ॥ ऋ॒तावा॒यस्य॒रोद॑सी॒दक्षं॑सचं॑तऽऊ॒तयः॑ । ह॒विष्मं॑त॒स्तमी॑ळते॒तंस॑नि॒ष्यंतो॑वसे ॥ सयं॒

(३।१।१२) इंद्राग्नीइतिनवर्चस्यसूक्तस्यविश्वामित्रइंद्राग्नीगायत्री । (३।२।१) प्रवोदेवायेतिसप्तर्चस्यसूक्तस्यवैश्वामित्रऋषभोग्निरनुष्टुप् ।

ताविप्रऽएषांसयज्ञानामथाहिषः । अग्निंतंवोदुवस्यतदातायोवनितामघं+ ॥ सनःशर्माणिवीतयेग्निर्यच्छतुशंतमा । य
तोनःप्रुष्णवद्वसुदिविक्षितिभ्योऽअप्स्वा+ ॥ दीदिवांसमपूर्व्यंवस्वीभिरस्यधीतिभिः । ऋक्वाणोऽअग्निमिंधतेहोतारं
विश्पतिंविशां+ ॥ उतनोब्रह्मन्नविषऽउक्थेषुदेवहूतमः । शंनःशोचामरुद्वृधोग्नेसहस्रसातमः ॥ नूनोरास्वसहस्रवत्तोक
वत्पुष्टिमद्वसु । द्युमदग्नेसुवीर्यंवर्षिष्ठमनुपक्षितं ॥ १३ ॥ (३।२।२) आहोतामंद्रोविदथान्यस्थात्सत्योयज्वाकवि
तमःसवेधाः । विद्युद्रथःसहसस्पुत्रोऽअग्निःशोचिष्केशःपृथिव्यांपाजोऽअश्रेत् ॥ अयामितेनमऽउक्तिंजुषस्वऽऋताव
स्तुभ्यंचेततेसहस्वः । विद्वाँऽआवक्षिविदुषोनिषत्सिमध्यऽआबर्हिरूतयेयजत्र ॥ द्रवंतांतऽउषसावाजयंतीऽअग्नेवात
स्यपथ्याभिरच्छ । यत्सीमंजंतिपूर्व्यंहविर्भिरावंधुरेवतस्थतुर्दुरोणे+ ॥ मित्रश्चतुभ्यंवरुणःसहस्वोग्नेविश्वेमरुतःसुम्नम
र्चन् । यच्छोचिषासहसस्पुत्रतिष्ठाऽअभिक्षितीःप्रथयन्त्सूर्योनॄन्+ ॥ वयंतेऽअद्यररिमाहिकाममुत्तानहस्तानमसो
पसद्य । यजिष्ठेनमनसायक्षिदेवानस्रेधतामन्मनाविप्रोऽअग्ने ॥ त्वद्धिपुत्रसहसोविपूर्वीर्देवस्ययंत्यूतयोविवाजाः ।
त्वंदेहिसहस्रिणंरयिंनोद्रोघेणवचसासत्यमग्ने ॥ तुभ्यंदक्षकविक्रतोयानीमादेवमर्तासोऽअध्वरेऽअकर्म । त्वंविश्वस्य
सुरथस्यबोधिसर्वंतदग्नेऽअमृतस्वदेह+ ॥ १४ ॥ (३।२।३) विपाजसापृथुनाशोशुचानोबाधस्वद्विषोरक्षसोऽअमी ॥ ४ ॥

(३।२।२) आहोतेतिसप्तर्चस्यसूक्तस्यऋषभोग्निस्त्रिष्टुप् । (३।२।३) विपाजसेतिसप्तर्चस्यसूक्तस्यकात्यउत्कीलोग्निस्त्रिष्टुप् ।

वाः । सुशर्मणोबृहतःशर्मणिस्यामग्नेरहंसुहवस्यप्रणीतौ ॥ त्वंनोऽअस्याऽउषसोव्युष्टौत्वंसूरऽउदितेबोधिगोपाः । जन्मेवनित्यंतनयंजुषस्वस्तोमंमेऽअग्नेतन्वासुजात ॥ त्वंनृचक्षावृषभानुपूर्वीःकृष्णास्वग्नेऽअरुषोविभाहि । वसोनेषिचपर्षिचात्यंहःकृधीनोरायऽउशिजोयविष्ठ ॥ अषाह्ळोऽअग्नेवृषभोदिदीहिपुरोविश्वाःसौभगासंजिगीवान् । यज्ञस्यनेताप्रथमस्यपायोर्जातवेदोबृहतःसुप्रणीते ॥ अच्छिद्राशर्मजरितःपुरूणिदेवाँऽअच्छादीद्यानःसुमेधाः । रथोनसस्निरभिवक्षिवाजमग्नेत्वंरोदसीनःसुमेके ॥ प्रपीपयवृषभजिन्ववाजानग्नेत्वंरोदसीनःसुदोघे । देवेभिर्देवसुरुचारुचानोमानोमर्तस्यदुर्मतिःपरिष्ठात् ॥ इळामग्ने० ॥ १५ ॥ (३।२।४) अयमग्निःसुवीर्यस्येशेमहःसौभगस्य । रायऽईशेस्वपत्यस्यगोमतऽईशेवृत्रहथानां ॥ इमंनरोमरुतःसश्चतावृधंयस्मिन्रायःशेवृधासः । अभियेसंतिपृतनासुदूढ्योविश्वाहाशत्रुमादभुः+ ॥ सत्वंनोरायःशिशीहिमीढ्वोऽअग्नेसुवीर्यस्य । तुविद्युम्नवर्षिष्ठस्यप्रजावतोनमीवस्यशुष्मिणः ॥ चक्रिर्योविश्वाभुवनाभिसासहिश्चक्रिर्देवेष्वादुवः । आदेवेषुयततऽआसुवीर्यऽआशंसऽउतनृणां+ ॥ मानोऽअग्नेमतयेमावीरतायैरीरधः । मागोतायैसहसस्पुत्रमानिदेपद्वेषांस्याकृधि ॥ शग्धिवाजस्यसुभगप्रजावतोग्नेबृहतोऽअध्वरे । संराया

(३।२।४) अयमग्निरितिषळर्चस्यसूक्तस्यउत्कीलोऋषिःआद्यातृतीयापंचम्योबृहत्यःद्वितीयाचतुर्थीषष्ठ्यःसतोबृहत्यः।

भूयसासृजमयोभुनातुविद्युम्नयशस्वता ॥ १६ ॥ (३।२।५) समिध्यमानःप्रथमानुधर्मासमक्तुभिरज्यतेविश्ववारः । शोचिष्केशोघृतनिर्णिक्पावकःसुयज्ञोऽअग्निर्यजथायदेवान्+ ॥ यथायजोहोत्रमग्नेपृथिव्यायथादिवोजातवेदश्चिकित्वान् । एवानेनहविषायक्षिदेवान्मनुष्वद्यज्ञंप्रतिरेममद्य+ ॥ त्रीण्यायूँषितवजातवेदस्तिस्रऽआजानीरुषसस्तेऽअग्ने । ताभिर्देवानामवोयक्षिविद्वानथाभवयजमानायशंयोः+ ॥ अग्निंसुदीतिंसुदृशंगृणंतोनमस्यामस्त्वेड्यंजातवेदः । त्वांदूतमरतिंहव्यवाहंदेवाऽअकृण्वन्नमृतस्यनाभिं ॥ यस्त्वद्धोतापूर्वोऽअग्नेयजीयान्द्विताचसत्तास्वधयाचशंभुः । तस्यानुधर्मप्रयजाचिकित्वोथानोधाऽअध्वरंदेववीतौ ॥ १७ ॥ (३।२।६) भवानोऽअग्नेसुमनाऽउपेतौसखेवसख्येपितरेवसाधुः । पुरुद्रुहोहिक्षितयोजनानांप्रतिप्रतीचीर्दहतादरातीः ॥ तपोष्वग्नेऽअंतराँऽअमित्रान्तपाशंसमररुषःपरस्य । तपोवसोचिकितानोऽअचित्तान्वितेतिष्ठंतामजराऽअयासः ॥ इध्मेनाग्नऽइच्छमानोघृतेनजुहोमिहव्यंतरसेबलाय । यावदीशेब्रह्मणावंदमानऽइमांधियंशतसेयायदेवीं+ ॥ उच्छोचिषासहसस्पुत्रस्तुतोबृहद्वयःशशमानेषुधेहि । रेवदग्नेविश्वामित्रेषुशंयोर्मर्मृज्मातेतन्वं१भूरिकृत्वः ॥ कृधिरत्नंसुसनितर्धनानांसघेदग्नेभवसियत्समिद्धः । स्तोतुर्दुरोणे ॥ ५ ॥

(३।२।५) समिध्यमानइतिपंचर्चस्यसूक्तस्यवैश्वामित्रःकतोग्निस्त्रिष्टुप् । (३।२।६) भवानइतिपंचर्चस्यसूक्तस्यकतोग्निस्त्रिष्टुप् ।

सु॒भगं॑स्यरे॒वत्सृ॒प्राकु॒रस्त्वां॑दधि॒षे॒वपूं॑षि ॥ १८ ॥ (३।२।७) अ॒ग्निंहोता॑रं॒प्रवृं॑णेमि॒येधे॒गृत्सं॑क॒विंवि॑श्व॒विद॒ममू॑रं ।
सनो॑यक्षद्दे॒वता॑ता॒यजी॑यान्रा॒येवाजा॑यवनतेम॒घानि॑ ॥ प्रतें॑ऽअग्नेह॒विष्मं॑तीमिय॒र्म्य॑च्छासुद्यु॒म्नांरा॒तिनीं॑घृ॒ताचीं॑ । प्र॒द॒
क्षि॒णिद्दे॒वता॑तिमु॒राणः॒संरा॒तिभि॒र्वसु॑भिर्य॒ज्ञम॑श्रेत् ॥ सतेजी॑यसा॒मन॑सा॒त्वोतः॑ऽउ॒तशिं॑क्षस्वप॒त्यस्य॑शि॒क्षोः । अग्ने॑रा॒योनृ
तं॑मस्य॒प्रभू॑तौभू॒याम॑तेसुष्टु॒तय॑श्च॒वस्वः॑ ॥ भूरी॑णि॒हित्वे॑दधि॒रे॑ऽअनी॒काग्ने॑दे॒वस्य॒यज्य॑वो॒जना॑सः । सऽआवं॑हदे॒वता॑तिंय
विष्ठ॒शर्धो॑यद॒द्यदि॒व्यंय॑जासि ॥ यत्त्वा॒होता॑र॒मनज॑न्मि॒येधे॑निषा॒दयं॑तोय॒जथा॑यदे॒वाः । सत्वंनो॑ऽअग्नेवि॒तेह॒बो॒ध्यधि॒श्र
वां॑सिधेहिनस्त॒नूषु॑ ॥ १९ ॥ (३।२।८) अ॒ग्निमु॒षसं॑म॒श्विना॑दधि॒क्रांव्यु॑ष्टिषुहवते॒वह्नि॑रु॒क्थैः । सु॒ज्योति॑षोनःशृण्वं
तुदे॒वाःस॒जोष॑सोऽअध्व॒रंवा॑वशा॒नाः+ ॥ अग्ने॒त्रीते॒वाजि॑ना॒त्रीष॒धस्था॑ति॒स्रस्ते॑जि॒ह्वाऽऋ॑तजातपू॒र्वीः । ति॒स्रऽउं॑तेत॒न्वो
दे॒ववा॑ता॒स्ताभि॑र्नःपाहि॒गिरो॒ऽअप्र॑युच्छन् ॥ अग्ने॒भूरी॑णि॒तव॑जातवेदो॒देव॑स्वधावो॒मृत॑स्य॒नाम॑ । याश्च॑मा॒यामा॒यिनां॑वि
श्वमिन्व॒त्वेपू॒र्वीःसं॑द॒धुःपृं॑ष्ठबंधो ॥ अ॒ग्निर्ने॒ताभग॑ऽइवक्षिती॒नांदैवी॑नांदे॒वऽऋ॑तु॒पाऽऋ॒ताबा॑ । सवृं॑त्र॒हास॒नयो॑वि॒श्ववे॑दाः
पर्ष॒द्विश्वाति॑दुरि॒तागृ॒णंतं॑ ॥ द॒धि॒क्राम॒ग्निमु॒षसं॑चदे॒वींबृह॒स्पतिं॑सवि॒तारं॑चदे॒वं । अ॒श्विना॑मि॒त्रावरु॑णा॒भगं॑च॒वसू॑न्रु॒द्राँऽ

(३।२।७) अग्निंहोतारमितिपंचर्चस्यसूक्तस्यकौशिकोगाथ्यग्निस्त्रिष्टुप् । (३।२।८) अग्निमुषसमितिपंचर्चस्यसूक्तस्यगाथ्यग्निः आद्यांत्ययोर्विश्वेदेवास्त्रिष्टुप् ।

आदित्याँऽइहहुवे ॥ २० ॥ (३।२।९) इमंनोयज्ञममृतेषुधेहीमंहव्याजातवेदोजुषस्व । स्तोकानामग्नेमेदसोघृतस्यहोतःप्राशानप्रथमोनिषद्य ॥ घृतवंतःपावकतेस्तोकाश्चोतंतिमेदसः । स्वधर्मन्देववीतयेश्रेष्ठंनोधेहिवार्यं ॥ तुभ्यंस्तोकाघृतश्चुतोग्नेविप्रायसंत्य । ऋषिःश्रेष्ठःसमिध्यसेयज्ञस्यप्राविताभव ॥ तुभ्यंश्चोतंत्यध्रिगोऽशचीवःस्तोकासोऽअग्नेमेदसोघृतस्य । कविशस्तोबृहताभानुनागाहव्याजुषस्वमेधिर ॥ ओजिष्ठंतेमध्यतोमेदऽउद्भृतंप्रतेवयंददामहे । श्चोतंतितेवसोस्तोकाऽअधित्वचिप्रतितान्देवशोविहि ॥ २१ ॥ (३।२।१०) अयंसोऽअग्निर्यस्मिन्त्सोममिंद्रःसुतंदधेजठरेवावशानः । सहस्रिणंवाजमत्यंनसप्तिंससवात्सन्त्स्तूयसेजातवेदः ॥ अग्नेयत्तेदिविवर्चःपृथिव्यांयदोषधीष्वप्स्वायजत्र । येनांतरिक्षमुर्वाततंथत्वेषःसभानुरर्णवोनृचक्षाः ॥ अग्नेदिवोऽअर्णमच्छाजिगास्यच्छादेवाँऽऊचिषेधिष्ण्याये । यारोचनेपरस्तात्सूर्यस्ययाश्चावस्तादुपतिष्ठंतऽआपः ॥ पुरीष्यासोऽअग्नयःप्रावणेभिःसजोषसः । जुषंतांयज्ञमद्रुहोनमीवाऽइषोमहीः+ ॥ इळामग्ने० ॥ २२ ॥ (३।२।११) निर्मथितःसुधितऽआसधस्थेयुवाकविरध्वरस्य

(३।२।९) इमंनइतिपंचर्चस्यसूक्तस्यगाथ्यग्निःआद्यात्रिष्टुप्द्वितीयातृतीयेअनुष्टुभौचतुर्थीविराड्रूपांत्यासतोबृहती । (३।२।१०) अयंसइतिपंचर्चस्यसूक्तस्यगाथीअग्निरुपांत्यायाःपुरीष्याग्नयस्त्रिष्टुप्चतुर्थ्यनुष्टुप् । (३।२।११) निर्मथितइतिपंचर्चस्यसूक्तस्यभारतौदेवश्रवोदेववातावग्निस्त्रिष्टुप् तृतीयासतोबृहती ।

॥ ६ ॥

प्रणेता । जूर्यत्स्वग्निरजरोवनेष्वत्रादधेऽअमृतंजातवेदाः ॥ अमंथिष्टांभारतारेवदग्निंदेवश्रवादेववातःसुदक्षं । अग्नेविपश्यबृहताभिरायेषांनोनेताभवतादनुद्यून्+ ॥ दशक्षिपःपूर्व्यंसीमजीजनन्त्सुजातंमातृषुप्रियं । अग्निंस्तुहिदैववातंदेवश्रवोयोजनानामसद्वशी+ ॥ नित्वादधेवरऽआपृथिव्याऽइळायास्पदेसुदिनत्वेऽअह्नां । दृषद्वत्यांमानुषऽआपयायांसरस्वत्यांरेवदग्नेदिदीहि ॥ इळामग्ने० ॥ २३ ॥ (३।२।१२) अग्नेसहस्वपृतनाऽअभिमातीरपास्य । दुष्टरस्तरन्नरातीर्वर्चोधायज्ञवाहसे ॥ अग्नऽइळासमिध्यसेवीतिहोत्रोऽअमर्त्यः । जुषस्वसूनोऽअध्वरं+ ॥ अग्नेद्युम्नेनजागृवेसहसःसूनवाहुत । एदंबर्हिःसदोमम ॥ अग्नेविश्वेभिरग्निभिर्देवेभिर्महयागिरः । यज्ञेषुयऽउचायवः ॥ अग्नेदादाशुषेरयिंवीरवंतंपरीणसं । शिशीहिनःसूनुमतः ॥२४॥ (३।२।१३) अग्नेदिवःसूनुरसिप्रचेतास्तनापृथिव्याऽउतविश्ववेदाः । ऋधग्देवाँऽइहयजाचिकित्वः ॥ अग्निःसनोतिवीर्याणिविद्वान्त्सनोतिवाजममृतायभूषन् । सनोदेवाँऽएहवहापुरुक्षो ॥ अग्निर्द्यावापृथिवीविश्वजन्येऽआभातिदेवीऽअमृतेऽअमूरः । क्षयन्वाजैःपुरुश्चंद्रोनमोभिः ॥ अग्नऽइंद्रश्चदाशुषोदुरोणेसुतावतोयज्ञमिहोपयातं । अमर्धंतासोमपेयायदेवा ॥ अग्नेऽअपांसमिध्यसेदुरोणेनित्यःसूनोसहसोजातवेदः । सधस्था

(३।२।१२) अग्नेसहस्वेतिपंचर्चस्यसूक्तस्यविश्वामित्रोग्निर्गायत्रीआद्यानुष्टुप् । (३।२।१३) अग्नेदिवइतिपंचर्चस्यसूक्तस्यविश्वामित्रोग्निश्चतुर्थ्याइंद्राग्नीविराट् ।

निमहर्यमानऽऊती+ ॥ २५ ॥ (३।२।१४) वैश्वानरंमनसाग्निंनिचाय्याहविष्मंतोऽअनुषत्यंस्वर्विदं । सुदानुंदेवं
रथिरंवसूयवोगीर्भीरण्वंकुशिकासोहवामहे ॥ तंशुभ्रमग्निमवसेहवामहेवैश्वानरंमातरिश्वानमुक्थ्यं । बृहस्पतिंमनु
षोदेवतातयेविप्रंश्रोतारमतिथिंरघुष्यदं ॥ अश्वोनक्रंदन्जनिभिःसमिध्यतेवैश्वानरःकुशिकेभिर्युगेयुगे । सनोऽअग्निः
सुवीर्यंस्वश्व्यंदधातुरत्नममृतेषुजागृविः ॥ प्रयंतुवाजास्तविषीभिरग्नयःशुभेसंमिश्लाःपृषतीरयुक्षत । बृहदुक्षोमरुतो
विश्ववेदसःप्रवेपयंतिपर्वताँऽअदाभ्याः ॥ अग्निश्रियोमरुतोविश्वकृष्टयऽआत्वेषमुग्रमवऽईमहेवयं । तेस्वानिनोरुद्रि
यावर्षनिर्णिजःसिंहानहेषक्रतवःसुदानवः ॥२६॥ व्रातंव्रातंगणंगणंसुशस्तिभिरग्नेर्भामंमरुतामोजऽईमहे । पृषदश्वासो
ऽअनवभ्रराधसोगंतारोयज्ञंविदथेषुधीराः ॥ अग्निरस्मिजन्मनाजातवेदाघृतंमेचक्षुरमृतंमऽआसन् । अर्कस्त्रिधातूर
जसोविमानोजस्रोघर्मोहविरस्मिनाम ॥ त्रिभिःपवित्रैरपुपोध्य१र्कंहृदामतिंज्योतिरनुप्रजानन् । वर्षिष्ठंरत्नमकृतस्व
धाभिरादिद्द्यावापृथिवीपर्यपश्यत् ॥ शतधारमुत्समक्षीयमाणंविपश्चितंपितरंवक्त्वानां । मेळिंमदंतंपित्रोरुपस्थेतंरो
दसीपिपृतंसत्यवाचं ॥ २७ ॥ (३।२।१५) प्रवोवाजाऽअभिद्यवोहविष्मंतोघृताच्या । देवान्जिगातिसुम्नयुः+ ॥ ॥ ७ ॥

(३।२।१४) वैश्वानरमितिनवर्चस्यसूक्तस्यविश्वामित्रःआद्यानांतिसृणांवैश्वानरोग्निश्चतुर्थ्यादितिसृणांमरुतःसप्तम्यष्टम्योरात्माअंत्यायाउपाध्यायःआद्याःषट्जगत्योंत्यास्तिस्रस्त्रिष्टुभः ।(३।२।१५)प्रवोवाजाइतिपंचदशर्चस्यसूक्तस्यविश्वामित्रोग्निःआद्यायाऋतवोवागायत्री ।

ईळेऽअग्निंविपश्चितंगिरायज्ञस्यसाधनं । श्रुष्टीवानंधितावानं ॥ अग्नेशकेमतेवयंयमंदेवस्यवाजिनः । अतिद्वेषांसितरेम ॥ समिध्यमानोऽअध्वरे३ग्निःपावकऽईड्यः । शोचिष्केशस्तमीमहे ॥ पृथुपाजाऽअमर्त्योघृतनिर्णिक्स्वाहुतः । अग्निर्यज्ञस्यहव्यवाट्+ ॥ २८ ॥ तंसबाधोयतस्रुचऽइत्थाधियायज्ञवंतः । आचक्रुरग्निमूतये ॥ होतादेवोऽअमर्त्यः पुरस्तादेतिमायया । विदथानिप्रचोदयन् ॥ वाजीवाजेषुधीयतेध्वरेषुप्रणीयते । विप्रोयज्ञस्यसाधनः ॥ धियाचक्रेवरेण्योभूतानांगर्भमादधे । दक्षस्यपितरंतना ॥ नित्वादधेवरेण्यंदक्षस्येळासहस्कृत । अग्नेसुदीतिमुशिजं ॥ २९ ॥ अग्निंयंतुरमप्तुरमृतस्ययोगेवनुषः । विप्रावाजैःसमिंधते ॥ ऊर्जोनपातमध्वरेदीदिवांसमुपद्यवि । अग्निमीळेकविक्रतुं ॥ ईळेन्योनमस्यस्तिरस्तमांसिदर्शतः । समग्निरिध्यतेवृषा ॥ वृषोऽअग्निःसमिध्यतेश्वोनदेववाहनः । तंहविष्मंतऽईळते ॥ वृषणंत्वावयंवृषन्वृषणःसमिधीमहि । अग्नेदीद्यतंबृहत्+ ॥ ३० ॥ (३।२।१६) अग्नेजुषस्वनोहविःपुरोळाशंजातवेदः । प्रातःसावेधियावसो ॥ पुरोळाऽअग्नेपचतस्तुभ्यंवाघापरिष्कृतः । तंजुषस्वयविष्ठ्य ॥ अग्नेवीहिपुरोळाशमाहुतंतिरोऽअह्न्यं । सहसःसूनुरस्यध्वरेहितः+ ॥ माध्यंदिनेसवनेजातवेदःपुरोळाशमिहकवेजुषस्व । अग्नेयह्वस्यतवभागधेयंनप्रमिनंतिविदथेषुधीराः ॥ अग्नेतृतीयेसवनेहिकानिषःपुरोळाशंसहसःसूनवाहुतं । अथादेवेष्वध्वरं

(३।२।१६) अग्नेजुषस्वेतिषळर्चस्यसूक्तस्यविश्वामित्रोग्निर्गायत्रीतृतीयोष्णिक्चतुर्थीत्रिष्टुप्पंचमीजगती ।

Digitization by eGangotri Funding MoE-IKS Delhi

विपन्ययाधारत्वंतममृतेषुजागृविं ॥ अग्नेवृधानऽआहुतिंपुरोळाशंजातवेदः । जुषस्वतिरोऽअह्न्यं॥३१॥(३।२।१७)
अस्तीदमधिमंथनमस्तिप्रजननंकृतं । एतांविश्पत्नीमाभराग्निंमंथामपूर्वथा ॥ अरण्योर्निहितोजातवेदागर्भऽइवसुधि
तोगर्भिणीषु । दिवेदिवऽईड्योजागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः+ ॥ उत्तानायामवभराचिकित्वान्त्सद्यःप्रवीता
वृषणंजजान । अरुषस्तूपोरुशदस्यपाजऽइळायास्पुत्रोवयुनेजनिष्ट ॥ इळायास्त्वापदेवयंनाभापृथिव्याऽअधि । जा
तवेदोनिधीमह्यग्नेहव्यायवोह्ळवे ॥ मंथतानरःकविमद्वयंतंप्रचेतसममृतंसुप्रतीकं । यज्ञस्यकेतुंप्रथमंपुरस्तादग्निंनरोज
नयतासुशेवं ॥ ३२ ॥ यदीमंथंतिबाहुभिर्विरोचतेश्वोनवाज्यरुषोवनेष्वा । चित्रोनयामन्नश्विनोरनिवृतःपरिवृण
क्त्यश्मनस्तृणादहन् ॥ जातोऽअग्नीरोचतेचेकितानोवाजीविप्रःकविशस्तःसुदानुः । यंदेवासऽईड्यंविश्वविदंहव्यवा
हमदधुरध्वरेषु ॥ सीदहोतःस्वऽउलोकेचिकित्वान्त्सादयायज्ञंसुकृतस्ययोनौ । देवावीर्देवान्हविषायजास्यग्नेबृहद्यज
मानेवयोधाः ॥ कृणोतधूमंवृषणंसखायोस्रेधंतऽइतनवाजमच्छ । अयमग्निःपृतनाषाट्सुवीरोयेनदेवासोऽअसहंत
दस्यून् ॥ अयंतेयोनिर्ऋत्वियोयतोजातोऽअरोचथाः । तंजानन्नग्नऽआसीदाथानोवर्धयागिरः ॥ ३३ ॥ तनूनपा

(३।२।१७) अस्तीदमितिषोळशर्चस्यसूक्तस्यविश्वामित्रोग्निस्त्रिष्टुप् (पंचम्याऋत्विजोवा) आद्याचतुर्थीदशमीद्वादश्योनुष्टुभःषष्ठ्येकादशीपंचदश्योजगत्यः ।

दुच्यते॒गर्भे॑ऽआसु॒रोनरा॒शंसो॑भवति॒यद्वि॒जाय॑ते । मा॒त॒रिश्वा॒यदमि॑मीतमा॒तरि॒वात॑स्य॒सर्गो॑ऽअभव॒त्सरी॑मणि ॥ सुनि॒र्मथा॒निर्मी॑थितःसुनि॒धानिहि॑तःक॒विः । अग्ने॑स्वध्व॒राकृ॑णुदे॒वान्दे॑वय॒तेय॑ज ॥ अजी॑जनन्न॒मृतं॒मर्त्या॑सोस्रे॒माणं॑त॒रणिं॑वी॒ळुजं॑भं । दश॒स्वसा॑रोऽअ॒ग्रुवः॑समी॒चीःपुमां॑संजा॒तम॒भिसंर॑भंते ॥ प्रस॒प्तहो॑तासन॒कादरो॑चतमा॒तुरु॒पस्थे॒यदशो॑च॒दूध॑नि । ननिमि॑षतिसु॒रणो॑दि॒वेदि॑वे॒यदसु॑रस्यज॒ठरा॒दजा॑यत ॥ अ॒मि॒त्रा॒युधो॑म॒रुता॑मिवप्र॒याःप्र॑थम॒जाब्रह्म॑णो॒विश्व॒मिद्वि॑दुः । द्यु॒म्नव॒द्ब्रह्म॑कुशि॒कास॒ऽएरि॑र॒ऽएक॑ऽएको॒दमे॑ऽअ॒ग्निंसमी॑धिरे ॥ यद॒द्यत्वा॑प्रय॒तिय॒ज्ञेऽअ॒स्मिन्होत॑श्चिकि॒त्वोवृ॑णीम॒हीह । ध्रुवम॑याध्रुवमु॒ताशमि॑ष्ठाःप्रजा॒नन्वि॒द्वाँऽउप॑याहि॒सोमं॑ ॥ ३४ ॥ ॥ इतितृतीयाष्टकेप्रथमोऽध्यायः ॥ १ ॥

तृतीयाष्टकेसूक्तानि १२२ ऋचः १२०९

सप्तदशाध्याये वर्गाः ३४ सूक्तानि २३ ऋचः १७६ ॥ त्यागः ॥ अग्नयइदं. ११ यूपायेदं. ५ यूपेभ्य. २ विश्वेभ्योदेवेभ्य. यूपेभ्य. ३ अग्नय. २७ इंद्राग्निभ्या. ९ अग्नय. ४२ विश्वेभ्योदेवेभ्य. अग्नय. ३ विश्वेभ्योदेवेभ्य. अग्नय. ८ पुरीष्येभ्योग्निभ्य. अग्नय. १४ इंद्राग्निभ्यामि. अग्नय. वैश्वानरायाग्नय. ३ मरुद्भ्योग्निभ्य. ३ आत्मन. २ उपाध्यायाये. ऋतुभ्य. अग्नय. २४ ऋत्विग्भ्यइ. अग्नय. ११ ॥ इतितृतीयेप्रथमः ॥ १ ॥

इच्छंतिद्व्यधिकैंद्रंशासत्कुशिकोविश्वामित्रएववाश्रुतरिंद्रसामैत्र्यूनाप्रपर्वतानांसप्तोनांसंवादोनदीभिर्विश्वामित्रस्योत्तितीर्षोस्तत्रनदीवाक्यंचतुर्थीषष्ठ्यष्टमीदशम्यःषष्ठीसप्तम्योस्त्विंद्रस्तुतिरंत्यानुष्टुबिंद्रःपूर्भिदेकादशतिष्ठाहरीइमामूर्षूपांत्यांघोरोपश्यत्सानिर्दहेच्छस्यमानेतिश्रूयतेवार्त्रहत्यायगायत्रमंत्यानुष्टुबभितष्टेवदशप्रजापतिःसवैश्वामित्रोवाच्योवाद्वौवातौनवैकोपींद्रंमतिर्नव ॥ १ ॥ ॥ ॥ ॥

॥ हरिःओम् ॥ (३।३।१) इ॒च्छंति॑त्वासो॒म्यास॒ःसखा॑यःसु॒न्वंति॒सोमं॒दध॑ति॒प्रयां॑सि । तिति॑क्षंतेऽअ॒भिश॑स्तिं॒जनां॑ना॒मिंद्र॒त्वदाक॒श्च॒नहि॒प्रके॒तः+ ॥ नतें॑दू॒रेप॑र॒मा॒चि॒द्रजां॑स्यातुप्रया॑हिहरि॒वोहरिं॑भ्यां । स्थि॒राय॒वृष्णे॒सव॑नाकृ॒तेमायु॒क्ताग्रावा॑णःसमि॒धानेऽअ॒ग्नौ+ ॥ इंद्र॑ःसु॒शिप्रो॑म॒घवा॒तरु॑त्रोम॒हाव्रा॑तस्तुविकू॒र्मिर्ऋघा॑वान् । यदु॒ग्रोधा॑बा॒धि॒तोमर्त्ये॑षु॒क्व॑१त्याते॑वृषभवी॒र्या॑णि ॥ त्वंहि॑ष्मा॑च्याव॒य॒न्नच्यु॑ता॒न्येकोवृ॒त्राचर॑सि॒जिघ्न॑मानः । तव॒द्यावा॑पृथि॒वीपर्व॑ता॒सोनु॑व्र॒ताय॒निमिं॑तेवतस्थुः ॥ उ॒ताभ॑येपुरुहूत॒श्रवो॑भि॒रेको॑दृ॒ळ्हम॑वदोवृ॒त्रहासन् । इ॒मेचि॑दिंद्र॒रोद॑सीऽअपा॒रेयत्सं॑गृभ्णाम॑घवन्का॒शिरित्ते॑ ॥ १ ॥ प्रसू॑तऽइंद्र॒प्रव॒ताहरि॑भ्या॒ंप्रते॒वज्र॑ःप्रमृ॒णन्ने॑तु॒शत्रू॑न् । ज॒हिप्र॑ती॒चोऽअन॑ूचःपरा॑चो॒विश्वं॑स॒त्यंकृ॑णुहिवि॒ष्टम॑स्तु ॥ यस्मै॒धायु॒रद॑धा॒मर्त्या॒याभ॑क्तंचिद्भजतेगे॒ह्यं॑१सः । भ॒द्राते॑ऽइंद्रसुम॒तिर्घृ॒ताचीस॒हस्र॑दानापुरुहूतरा॒तिः+ ॥

(३।३।१) इच्छंतित्वेतिद्वाविंशत्यृचस्यसूक्तस्यविश्वामित्रइंद्रस्त्रिष्टुप् ।

सहदानुंपुरुहूतक्षियंतमहस्तमिँद्रसंपिणक्कुणारुं । अभिवृत्रंवर्धमानंपियारुमपादमिंद्रतवसाजघंथ ॥ निसा
मनामिषिरामिंद्रभूमिंमहीमपारांसदनेससत्थ । अस्तभ्नाद्द्यांवृषभोऽअंतरिक्षमर्षन्त्वापस्त्वयेहप्रसूताः ॥ अलातृणो
वलऽइँद्रव्रजोगोःपुराहंतोर्भयमानोव्यार । सुगान्पथोऽअंकृणोन्निरजेगाःप्रावन्वाणीःपुरुहूतंधमँतीः ॥ २ ॥
एकोद्वेवसुमतीसमीचीऽइंद्रऽआपप्रौपृथिवीमुतद्यां । उतांतरिक्षादभिनःसमीकऽइषोरथीःसयुजःशूरवाजान् ॥ दि
शःसूर्योनमिनातिप्रदिष्टादिवेदिवेहर्यश्वप्रसूताः । संयदानळध्वंनऽआदिदश्वैर्विमोचनंकृणुतेतत्त्वस्य ॥ दिदृक्षंतऽउ
षसोयामन्नक्तोर्विवस्वत्यामहिंचित्रमनीकं । विश्वेजानंतिमहिनायदागादिंद्रस्यकर्मसुकृतापुरूणि ॥ महिज्योतिर्निहि
तंवक्षणास्वामापक्वंचरतिबिभ्रतीगौः । विश्वंस्वाद्मसंभृतमुस्रियायांयत्सीमिंद्रोऽअदधाज्जोजनाय ॥ इंद्रदृह्यंयामको
शाऽअभूवन्यज्ञायशिक्षगृणतेसखिभ्यः । दुर्मायवोदुरेवामर्त्यासोनिषंगिणोरिपवोहंत्वासः ॥ ३ ॥ संघोषःशृण्वेवमैर
मित्रैर्जहीन्येष्वशनिंतपिष्ठां । वृश्चेमधस्ताद्विरुजासहस्वजहिरक्षोमघवन्रंधयस्व ॥ उद्वृहरक्षःसहमूलमिंद्रवृश्चामध्यंप्र
त्यग्रंशृणीहि । आकीवतःसललूकंचकर्थब्रह्मद्विषेतपुषिंहेतिमस्य ॥ स्वस्तयेवाजिभिश्चप्रणेतःसंयन्महीरिषऽआसत्सि
पूर्वीः । रायोवंतारोबृहतःस्यामास्मेऽअस्तुभगऽइंद्रप्रजावान् ॥ आनोभरभगमिंद्रद्युमंतंनितेदेष्णस्यधीमहिप्ररेके ।
ऊर्वऽइवपप्रथेकामोऽअस्मेतमापृणवसुपतेवसूनां ॥ इमंकामंमंदयागोभिरश्वैश्चंद्रवताराधसापप्रथश्च । स्वर्यवोमति

भिस्तुभ्यंविप्राऽइंद्रायवाहःकुशिकासोऽअक्रन् ॥ आनोगोत्रादर्द्दहिगोपतेगाःसमस्मभ्यंसनयोयंतुवाजाः । दिवक्षाऽ
असिवृषभसत्यशुष्मोस्मभ्यंसुमघवन्बोधिगोदाः+ ॥ शुनंहुवेममघवानमिंद्रमस्मिन्भरेनृतमंवाजसातौ । शृण्वंतमुग्रमू
तयेसमत्सुघ्नंतंवृत्राणिसंजितंधनानां ॥ ४ ॥ (३।३।२) शासद्वह्निर्दुहितुर्नप्त्यंगाद्विद्वाँऽऋतस्यदीधितिंसपर्यन् ।
पितायत्रदुहितुःसेकमृंजन्त्संशग्म्येनमनसादधन्वे+ ॥ नजामयेतान्वोरिक्थमारैक्चकारगर्भंसनितुर्निधानं । यदी
मातरोजनयंतवह्निमन्यःकर्तासुकृतोरन्यऽऋंधन्+ ॥ अग्निर्जज्ञेजुह्वा३रेजमानोमहस्पुत्राँऽअरुषस्यप्रयक्षे । महान्ग
र्भोमह्याजातमेषांमहीप्रवृद्धर्यश्वस्ययज्ञैः+ ॥ अभिजैत्रीरसचंतस्पृधानंमहिज्योतिस्तमसोनिरजानन् । तंजानतीःप्र
त्युदायन्नुषासःपतिर्गवामभवदेकऽइंद्रः ॥ वीळौसतीरभिधीराऽअतृंदन्प्राचाहिन्वन्मनसासप्तविप्राः । विश्वामविंद
न्पथ्यामृतस्यप्रजानन्नित्तानमसाविवेश ॥ ५ ॥ विदद्यदीसरमारुग्णमद्रेर्महिपाथःपूर्व्यंसध्र्यक्कः । अग्रंनयत्सुपद्यक्षरा
णामच्छारवंप्रथमाजानतीगात् ॥ अगच्छदुविप्रतमःसखीयन्नसूदयत्सुकृतेगर्भमद्रिः । ससानमर्योयुवभिर्मखस्यन्नथा
भवदंगिराःसद्योऽअर्चन् ॥ सतःसंतःप्रतिमानंपुरोभूर्विश्वावेदजनिमाहंतिशुष्णं । प्रणोदिवःपदवीर्गव्युरर्चन्त्सखास
खीँऽरमुंचन्निरवद्यात्+ ॥ निर्गव्यतामनसासेदुरर्कैःकृण्वानासोऽअमृतत्वायगातुं । इदंचिन्नुसदनंभूर्येषांयेनमासाँऽ

(३।३।२) शासद्वह्निरितिद्वाविंशत्यृचस्यसूक्तस्य [illegible] इंद्रस्त्रिष्टुप् ।

असि॑षासन्नृ॒तेन॑ ॥ सं॒पश्य॑मानाऽअमदन्न॒भिस्वं॑पयः॑प्र॒त्नस्य॒रेत॑सो दु॒घा॑नाः । विरोद॑सीऽअतप॒द्घोष॑ऽएषांजा॒तेनि॒ष्ठाम
द॑धु॒र्गोषु॑वी॒रान्+ ॥ ६ ॥ सजा॒तेभि॑र्वृ॒त्र॒हासेदु॑ह॒व्यैरुदु॒स्रिया॑ऽअसृ॒जदिं॑द्रो॑ऽअ॒र्कैः । उ॒रू॒च्य॑स्मैघृ॒तव॒द्भर॑न्ती॒मधु॒स्वाद्म॑
दु॒दु॒ह्रेजेन्या॒गौः+ ॥ पि॒त्रेचि॑च्चक्रुःसद॑नं॒सम॑स्मै॒महि॒त्विषी॑मत्सु॒कृ॒तो॒विहि॒ख्यन् । वि॒ष्क॒भ्नन्त॒ःस्कंभ॑नेना॒जनि॑त्री॒ऽआसी॑
नाऽऊ॒र्ध्वंर॑भ॒संविमि॑न्वन् ॥ म॒हीयदिं॑धि॒षणा॑शि॒श्नथे॒धात्सं॑द्यो॒वृधं॑वि॒भ्वं१॒रोद॑स्योः । गिरो॒यस्मि॑न्ननव॒द्याःस॑मी॒चीर्वि॑
श्वा॒ऽइंद्रा॑य॒तवि॑षी॒रनं॑त्ताः ॥ मह्या॑ते॑स॒ख्यं॑व॑श्मिश॒क्तीरा॑वृ॑त्र॒घ्नेनि॒युतो॑यं॑ति॒पूर्वीः॑ । महि॑स्तो॒त्रमव॒ऽआग॑न्मसू॒रेर॒स्माकं॒सुम॑
घवन्बोधिगो॒पाः+ ॥ महि॒क्षेत्रं॑पु॒रुश्चं॒द्रं॑वि॑वि॒द्वानादि॑त्सखि॑भ्यश्च॒रथं॒सम॑रत् । इं॒द्रो॒नृभि॑रजन॒द्दीद्या॑नःसा॒कंसूर्य॑मु॒षसं॑गा॒
तुम॒ग्निं+ ॥ ७ ॥ अ॒पश्चि॑दे॒षवि॒भ्वो॒३दमू॑ना॒ःप्रस॒ध्रीची॑रसृजद्वि॒श्वश्चं॑द्राः । मध्वः॑पु॒ना॒नाःक॒विभि॑ःप॒वित्रै॒र्द्युभि॑र्हि॒न्वं॑त्य॒
क्तुभि॒र्धनु॑त्रीः ॥ अनु॑कृ॒ष्णेवसु॑धितीजिहातेऽउ॒भेसूर्य॑स्यमं॒हना॒यजं॑त्रे । परि॒यत्ते॑महि॒मानं॑वृ॒जध्यै॒सखा॑यऽइंद्र॒काम्या॑ऽ
ऋजि॒प्याः+ ॥ पति॑र्भववृत्रहन्त्सू॒नृता॑नांगि॒रांवि॒श्वायु॑र्वृ॒षभो॒वयो॒धाः । आनो॑गहिस॒ख्येभिः॑शि॒वेभि॑र्म॒हान्म॒हीभि॑रू॒
तिभिः॑सर॒ण्यन्+ ॥ तमं॑गिर॒स्वन्नम॑सासप॒र्यन्नव्यं॑कृणोमि॒सन्य॑सेपु॒राजां । द्रुह्नो॒विया॑हिबहु॒लाऽअदे॑वीः॒स्वश्च॑नोमघव
न्त्सा॒तये॑धाः ॥ मिहः॑पाव॒काःप्रत॑ताऽअभूवन्त्स्व॒स्तिनः॑पिपृहिपा॒रमा॑सां । इंद्र॒त्वंर॑थि॒रःपा॑हिनोरि॒षोम॒क्षूम॑क्षूकृणुहि
गो॒जितो॑नः ॥ अदे॑दिष्टवृत्र॒हागोप॑ति॒र्गाऽअं॒तःकृ॒ष्णाँऽअ॑रु॒षैर्धाम॑भिर्गात् । प्रसू॒नृता॑दि॒शमा॑नऽऋ॒तेन॒दुर॑श्च॒विश्वा॑ऽअ

वृणोदपस्वाः+ ॥ शुनंहुवेममघवानमिंद्रं० ॥ ८ ॥ (३।३।३) इंद्रसोमंसोमपतेपिबेमंमाध्यँदिनंसवनंचारुयत्ते ।
प्रप्रुथ्याशिप्रेमघवन्नृजीषिन्विमुच्याहरीऽइहमादयस्व ॥ गवाशिरंमंथिनमिंद्रशुक्रंपिबासोमँररिमातेमदाय । ब्रह्मकृ
तामारुतेनागणेनसजोषारुद्रैस्तृपदावृषस्व ॥ येतेशुष्मंयेतविषीमवर्धन्नर्चंतऽइंद्रमरुतस्तऽओजः । माध्यँदिनेसवनेव
ज्रहस्तपिबारुद्रेभिःसगणःसुशिप्र ॥ तऽइन्वस्यमधुमद्विविप्रऽइंद्रस्यशर्धोमरुतोयऽआसन् । येभिर्वृत्रस्येषितोविवेदा
मर्मणोमन्यमानस्यमर्म ॥ मनुष्वदिंद्रसवनंजुषाणःपिबासोमंशश्वतेवीर्याय । सऽआववृत्स्वहर्यश्वयज्ञैःसरण्युभिरपोऽ
अर्णांसिसर्षि ॥ ९ ॥ त्वमपोयद्धवृत्रंजघन्वाँऽअत्याँऽइवप्रासृजःसर्तवाजौ । शयानमिंद्रचरतावधेनवव्रिवांसंपरिदे
वीरदेवं ॥ यजामऽइन्नमसावृद्धमिंद्रंबृहंतमृष्वमजरंयुवानं । यस्यप्रियेममतुर्यज्ञियस्यनरोदसीमहिमानंममाते ॥ इं
द्रस्यकर्मसुकृतापुरूणिव्रतानिदेवानमिनंतिविश्वे । दाधारयःपृथिवींद्यामुतेमांजजानसूर्यमुषसँसुदंसाः ॥ अद्रोघसत्यं
तवतन्महित्वंसद्योयज्जातोऽअपिबोहसोमँ । नद्यावऽइंद्रतवसस्तऽओजोनाहानमासाःशरदोवरंत ॥ त्वंसद्योऽअपि
बोजातऽइँद्रमदायसोमँपरमेव्योमन् । यद्धद्यावापृथिवीऽआविवेशीरथाभवःपूर्व्यःकारुधायाः ॥ १० ॥ अहन्नहिंप
रिशयानमर्णऽओजायमानंतुविजाततव्यान् । नतेमहित्वमनुभूदधद्यौर्यदन्ययास्फिग्या३क्षामवस्थाः ॥ यज्ञोहितंऽ

(३।३।३) इंद्रसोममितिसप्तदशर्चस्यसूक्तस्यविश्वामित्रइंद्रस्त्रिष्टुप् ।

इंद्रवर्धनोभूदुतप्रियःसुतसोमोमियेधः । यज्ञेनयज्ञमवयज्ञियःसन्यज्ञस्तेवज्रमहिहत्यऽआवत् ॥ यज्ञेनेंद्रमवसाचक्रेऽ
अर्वागैनंसुम्नायनव्यसेववृत्यां । यःस्तोमेभिर्वावृधेपूर्व्येभिर्योमध्यमेभिरुतनूतनेभिः ॥ विवेषयन्माधिषणाजजानस्त
वैपुरापार्यादिंद्रमह्नः । अंहसोयत्रपीपरद्यथानोनावेवयांतमुभयेहवंते ॥ आपूर्णोऽअस्यकलशःस्वाहासेक्तेवकोशंसिसि
चेपिबध्यै । समुप्रियाऽआववृत्रन्मदायप्रदक्षिणिदभिसोमासऽइंद्रं ॥ नत्वागभीरःपुरुहूतसिंधुर्नाद्रयःपरिषंतोवरंत ।
इत्थासखिभ्यऽइषितोयदिंद्रादृळ्हंचिदरुजोगव्यमूर्वं+ ॥ शुनंहुवेम० ॥ ११ ॥ (३।३।४) प्रपर्वतानामुशतीऽउप
स्थादश्वेऽइवविषितेहासमाने । गावेवशुभ्रेमातरारिहाणेविपाट्छुतुद्रीपयसाजवेते ॥ इंद्रेषितेप्रसवंभिक्षमाणेऽअ
च्छासमुद्रंरथ्येवयाथः । समाराणेऽऊर्मिभिःपिन्वमानेऽअन्यावामन्यामप्येतिशुभ्रे ॥ अच्छासिंधुंमातृतमामयासं
विपाशमुर्वींसुभगामगन्म । वत्समिवमातरासंरिहाणेसमानंयोनिमनुसंचरंती ॥ एनावयंपयसापिन्वमानाऽअनुयो
निंदेवकृतंचरंतीः । नवर्तवेप्रसवःसर्गतक्तःकिंयुर्विप्रोनद्योजोहवीति ॥ रमध्वंमेवचसेसोम्यायऽऋतावरीरुपमुहूर्त
मेवैः । प्रसिंधुमच्छाबृहतीमनीषावस्युरह्वेकुशिकस्यसूनुः+ ॥ १२ ॥ इंद्रोऽअस्माँऽअरदद्वज्रबाहुरपाहन्वृत्रंपरिधिं

(३।३।४) प्रपर्वतानामितित्रयोदशर्चस्यसूक्तस्यविश्वामित्रऋषिःचतुर्थीषष्ठ्यष्टमीदशमीनांनदीऋषकानद्योदेवताःएनावयमेतद्वचआतेकारोरितितिसृणांविश्वामित्रोदेवताइंद्रोअस्मानितिद्वयोरिंद्रस्त्रिष्टुबंत्यानुष्टुप् ।

नदीनां । देवोनयत्सवितासुपाणिस्तस्यवयंप्रसवेयामऽउर्वीः ॥ प्रवाच्यंशश्वधावीर्यं१तदिंद्रस्यकर्मयदहिंविवृश्चत् ।
विवज्रेणपरिषदोजघानायन्नापोयनमिच्छमानाः ॥ एतद्वचोजरितर्मापिमृष्ठाऽआयत्तेघोषानुत्तरायुगानि । उक्थेषु
कारोप्रतिनोजुषस्वमानोनिकःपुरुषत्रानमस्ते ॥ ओषुस्वसारःकारवेशृणोतययौवोदूरादनसारथेन । निषूनमध्वंभव
तासुपाराऽअधोऽअक्षाःसिंधवःस्रोत्याभिः ॥ आतेकारोशृणवामावचांसिययाथदूरादनसारथेन । नितेनंसैपी
प्यानेवयोषामर्यायेवकन्याशश्वचैते ॥ १३ ॥ यदंगत्वाभरताःसंतरेयुर्गव्यन्ग्रामऽइषितऽइंद्रजूतः । अर्षादहप्र
सवःसर्गतक्तऽआवोवृणेसुमतिंयज्ञियानां ॥ अतारिषुर्भरतागव्यवःसमभक्तविप्रःसुमतिंनदीनां । प्रपिन्वध्वमिषयं
तीःसुराधाऽआवक्षणाःपृणध्वंयातशीभं ॥ उद्वऽऊर्मिःशम्याहंत्वापोयोक्त्राणिमुंचत । मादुष्कृतौव्येनसाघ्न्यौशूनमा
रतां ॥ १४ ॥ (३।३।५) इंद्रःपूर्भिदातिरद्दासमर्कैर्विदद्वसुर्दयमानोविशत्रून् । ब्रह्मजूतस्तन्वावावृधानोभूरिदात्र
ऽआपृणद्रोदसीऽउभे ॥ मखस्यतेतविषस्यप्रजूतिमियर्मिवाचममृतायभूषन् । इंद्रक्षितीनामसिमानुषीणांविशांदैवी
नामुतपूर्वयावा ॥ इंद्रोवृत्रमवृणोच्छर्धनीतिःप्रमायिनाममिनाद्वर्पणीतिः । अहन्व्यंसमुशधग्वनेष्वाविर्धेनाऽअकृ
णोद्राम्याणां ॥ इंद्रःस्वर्षाजनयन्नहानिजिगायोशिग्भिःपृतनाऽअभिष्टिः । प्रारोचयन्मनवेकेतुमह्नामविंदज्ज्योतिर्बृ

(३।३।५) इंद्रःपूर्भिरित्येकादशर्चस्यसूक्तस्यविश्वामित्रइंद्रस्त्रिष्टुप् ।

ह॒तेरणा॑य ॥ इंद्र॒स्तुजो॑ब॒र्हणा॒ऽआवि॑वेशनृ॒वद्दधा॑नो॒नर्या॑पु॒रूणि॑ । अचे॑तय॒द्धियं॑ऽइ॒माज॑रि॒त्रेप्रेमंवर्ण॑मतिरच्छु॒क्रमा॑सां
॥ १५ ॥ म॒होम॒हानि॑पनयंत्य॒स्येंद्र॑स्य॒कर्म॑सुकृ॑तापु॒रूणि॑ । वृ॒जने॑नवृजि॒नान्त्संपि॑पेषमा॒याभि॒र्दस्यूँ॑र॒भिभू॑त्योजाः ॥ यु॒
धेंद्रो॑म॒ह्नावरि॑वश्चकारदे॒वेभ्य॒ःसत्प॑तिश्चर्षणि॒प्राः । वि॒वस्व॑त॒ःसद॑नेऽअस्य॒तानि॒विप्रा॑ऽउ॒क्थेभि॑ःक॒वयो॑गृणंति ॥ स॒त्रा॒
साहं॒वरे॑ण्यंसहो॒दांस॑स॒वांसं॒स्व॑र॒पश्च॑दे॒वीः । स॒सान॒यःपृ॑थि॒वींद्यामु॒तेमामिंद्रं॑मदं॒त्यनु॒धीर॑णासः ॥ स॒सानात्याँ॑ऽउ॒तसूर्यं॑
स॒सानेंद्रः॑ससानपुरु॒भोज॑सं॒गां । हि॒र॒ण्यय॑मु॒तभोगं॑ससानह॒त्वीदस्यू॒न्प्रार्यं॒वर्ण॑मावत् ॥ इंद्र॒ऽओष॑धीरसनो॒दहा॑नि॒वन॒
स्पतीँ॑ऽरसनोदं॒तरि॑क्षं । बि॒भेद॑व॒लंनु॑नु॒देविवा॒चोथा॑भवद्दमि॒ताभिक्र॑तूनां ॥ शु॒नंहु॑वेम० ॥ १६ ॥ (३।३।६) तिष्ठा॒
हरी॒रथ॒ऽआयु॒ज्यमा॑नाया॒हिवा॒युर्न॑नि॒युतो॑नो॒ऽअच्छं॑ । पिबा॒स्यंधो॑ऽअ॒भिसृ॑ष्टोऽअ॒स्मेऽइंद्र॒स्वाहा॑ररि॒माते॒मदा॑य ॥ उपा॑
जि॒रापु॑रुहू॒ताय॒सप्ती॒हरी॒रथ॑स्यधू॒र्ष्वायु॑नज्मि । द्र॒वद्यथा॒संभृ॑तंवि॒श्वत॑श्चि॒दुपे॒मंय॒ज्ञमावं॑हात॒ऽइंद्रं॑ ॥ उपो॑नयस्व॒वृष॑णा
तपु॒ष्पोतेम॑व॒त्वंवृ॑षभस्वधावः । ग्रसै॑ता॒मश्वा॒विमु॑चे॒हशोणा॑दि॒वेदि॑वे॒सदृशी॑रद्धि॒धानाः+ ॥ ब्रह्म॑णातेब्रह्म॒युजा॑युनज्मि॒
हरी॒सखा॑यासध॒माद॑ऽआ॒शू । स्थि॒रंरथं॑सु॒खमिंद्रा॑धि॒तिष्ठ॑न्प्रजा॒नन्वि॒द्वाँ॑ऽउप॑याहि॒सोमं॑ ॥ माते॒हरी॒वृष॑णावी॒तपृ॑ष्ठा॒नि
रीर॑म॒न्यज॑मानासोऽअ॒न्ये । अ॒त्याया॑हि॒शश्व॑तोव॒यंतेरं॑सु॒तेभिः॑कृणवाम॒सोमैः॑ ॥ १७ ॥ तवा॒यंसोम॒स्त्वमेह्य॒र्वाङ्श॑श्व

(३।३।६) तिष्ठाहरीइत्येकादशर्चस्यसूक्तस्यविश्वामित्रइंद्रस्त्रिष्टुप ।

त्तमंसुमनाऽअस्यपाहि । अस्मिन्यज्ञेबर्हिष्यानिषद्यादधिष्वेमंजठरऽइंदुमिंद्र ॥ स्तीर्णंतेबर्हिःसुतऽइंद्रसोमःकृताधाना
ऽअत्तवेतेहरिभ्यां । तदोकसेपुरुशाकायवृष्णेमरुत्वतेतुभ्यंराताहवींषि ॥ इमंनरःपर्वतास्तुभ्यमापःसमिंद्रगोभिर्मधु
मंतमक्रन् । तस्यागत्यासुमनाऽऋष्वपाहिप्रजानन्विद्वान्पथ्या३ अनुस्वाः+ ॥ याँऽआभजोमरुतऽइंद्रसोमेयेत्वामवर्ध
न्नभवन्गणस्ते । तेभिरेतंसजोषावावशानो३ग्नेःपिबजिह्वयासोममिंद्र ॥ इंद्रपिबस्वधयाचित्सुतस्याग्नेर्वापाहिजिह्वया
यजत्र । अध्वर्योर्वाप्रयतंशक्रहस्ताद्धोतुर्वायज्ञंहविषोजुषस्व ॥ शुनंहुवेम० ॥ १८ ॥ (३।३।७) इमामूषुप्रभृतिंसा
तयेधाःशश्वच्छश्वदूतिभिर्यादमानः । सुतेसुतेवावृधेवर्धनेभिर्यःकर्मभिर्महद्भिःसुश्रुतोभूत्+ ॥ इंद्रायसोमाःप्रदिवो
विदानाऽऋभुर्येभिर्वृषपर्वाविहायाः । प्रयम्यमानान्प्रतिषूगृभायेंद्रपिबवृषधूतस्यवृष्णः ॥ पिबावर्धस्वतवघासुतास
ऽइंद्रसोमासःप्रथमाऽउतेमे । यथापिबःपूर्व्याँऽइंद्रसोमाँऽएवापाहिपन्योऽअद्यानवीयान् ॥ महाँऽअमत्रोवृजनेविर
प्श्युु१ग्रंशवःपत्यतेधृष्ण्वोजः । नाहविव्याचपृथिवीचनैनंयत्सोमासोऽहर्यश्वममंदन् ॥ महाँऽउग्रोवावृधेवीर्यायसमा
चक्रेवृषभःकाव्येन । इंद्रोभगोवाजदाऽअस्यगावःप्रजायंतेदक्षिणाऽअस्यपूर्वीः+ ॥ १९ ॥ प्रयत्सिंधवःप्रसवंयथाय
न्नापःसमुद्रंरथ्येवजग्मुः ॥ अतश्चिदिंद्रःसदसोवरीयान्यदींसोमःपृणतिदुग्धोऽअंशुः+ ॥ समुद्रेणसिंधवोयादमानाऽ

(३।३।७) इमामूष्वित्येकादशर्चस्यसूक्तस्यविश्वामित्रोदशम्याआंगिरसोघोरइंद्रस्त्रिष्टुप् ।

इंद्रा॑य॒सोमं॒सुषु॑तं॒भरं॑तः । अं॒शुंदु॑हंतिह॒स्तिनो॑भ॒रित्रै॒र्मध्वः॑पुनंति॒धार॑याप॒वित्रैः ॥ ह्र॒दाऽइ॑वकु॒क्षयः॑सोम॒धाना॒ःसमीं॑वि
व्याच॒सर्व॑नापु॒रूणि॑ । अन्ना॒यदिंद्रः॑प्रथ॒मा॑व्याश॑वृ॒त्रंज॑घ॒न्वाँऽअ॑वृणीत॒सोमं॑ ॥ आतू॑भर॒माकि॑रे॒तत्परि॑ष्ठाद्वि॒द्माहित्वा॒
वसु॑पति॒ंवसू॑नां । इंद्र॒यत्ते॒माहि॑नं॒दत्र॒मस्त्य॒स्मभ्यं॒तद्ध॑र्यश्व॒प्रयं॑धि ॥ अ॒स्मेप्रयं॑धिमघवन्नृजीषि॒न्निंद्र॑रा॒योवि॒श्ववा॑रस्य॒भूरेः॑ ।
अ॒स्मेश॒तंश॒रदो॑जी॒वसे॑धाऽअ॒स्मेऽवी॒रान्छश्वं॑तऽइंद्रशिप्रिन् ॥ शु॒नंहु॑वेम० ॥ २० ॥ (३।३।८) वार्त्र॑हत्याय॒शव॑सेपृ
त॒नाषाह्या॑यच । इंद्र॒त्वाव॑र्तयामसि ॥ अ॒र्वा॒चीनं॒सु॒ते॒मनं॑ऽउ॒तचक्षुः॑शतक्रतो । इंद्र॑कृ॒ण्वंतु॑वा॒घतः॑ ॥ नामा॑नितेशतक्र
तो॒विश्वा॑भिर्गी॒र्भिरी॑महे । इंद्रा॑भिमाति॒षाह्ये॑ ॥ पु॒रु॒ष्टु॒तस्य॒धाम॑भिःश॒तेनं॑महयामसि । इंद्र॑स्यचर्षणी॒धृतः॑ ॥ इंद्रं॑वृ॒त्रा
य॒हंत॑वेपुरुहू॒तमुप॑ब्रुवे । भरे॑षु॒वाज॑सातये ॥ २१ ॥ वाजे॑षुसास॒हिर्भ॑व॒त्वामी॑महेशतक्रतो । इंद्रं॑वृ॒त्राय॒हंत॑वे ॥ द्यु॒म्नेषु॑
पृ॒तनाज्ये॑पृत्सु॒तूर्षु॒श्रवः॑सुच॑ । इंद्र॒साक्ष्वा॒भिमा॑तिषु ॥ शु॒ष्मिन्तं॑मंनऽऊ॒तये॑द्यु॒म्निनं॑पाहि॒जागृ॑विं । इंद्र॒सोमं॑शतक्रतो ॥
इं॒द्रि॒याणि॑शतक्रतो॒याते॒जने॑षुपं॒चसु॑ । इंद्र॒तानि॑त॒ऽआवृ॑णे ॥ अग॑न्निंद्र॒श्रवो॑बृ॒हद्द्यु॒म्नंद॑धिष्वदु॒ष्टरं॑ । उत्ते॒शुष्मं॑तिरामसि ॥
अ॒र्वा॒वतो॑न॒ऽआग॒ह्यथो॑शक्रपरा॒वतः॑ । उ॒लो॒कोयस्ते॑ऽअद्रिव॒ऽइंद्रे॒हतत॒ऽआग॑हि ॥ २२ ॥ (३।३।९) अ॒भितष्टे॑वदी

(३।३।८) वार्त्रहत्यायेत्येकादशर्चस्यसूक्तस्यविश्वामित्रइंद्रोगायत्रीअंत्यानुष्टुप् । (३।३।९) अभितष्टेवेतिदशर्चस्यसूक्तस्यवैश्वामित्रः प्रजापतिरिंद्रस्त्रिष्टुप् (वाच्यःप्रजापतिर्वाविश्वामित्रोवा) ।

Digitization by eGangotri. Funding MHRD-Delhi

धयामनीषामत्योनवाजीसुधुरोजिहानः । अभिप्रियाणिमर्मृशत्पराणिकवीऽँरिच्छामिसंदृशेसुमेधाः+ ॥ इनोतपृच्छ
जनिमाकवीनांमनोधृतःसुकृतस्तक्षतद्यां । इमाऽउतेप्रण्यो३वर्धमानामनोवाताऽअधनुधर्मणिग्मन् ॥ निषीमिदत्रगु
ह्यादधानाऽउतक्षत्रायरोदसीसमंजन् । संमात्राभिर्ममिरेयेमुरुवींऽअंतर्महीसमृतेधायसेधुः ॥ आतिष्ठंतंपरिविश्वेऽ
अभूषन्छ्रियोवसानश्चरतिस्वरोचिः । महत्तद्वृष्णोऽअसुरस्यनामाविश्वरूपोऽअमृतानितस्थौ ॥ असूतपूर्वोवृषभोज्या
यानिमाऽअस्यशुरुधःसंतिपूर्वीः । दिवोनपाताविदथस्यधीभिःक्षत्रंराजानाप्रदिवोदधाथे ॥ २३ ॥ त्रीणिराजाना
विदथेपुरूणिपरिविश्वानिभूषथःसदांसि । अपश्यमत्रमनसाजगन्वान्व्रतेगंधर्वाँऽअपिवायुकेशान् ॥ तदिन्न्वस्यवृषभ
स्यधेनोरानामभिर्ममिरेसक्म्यंगोः । अन्यदन्यदसुर्यं१वसानानिमायिनोममिरेरूपमस्मिन् ॥ तदिन्न्वस्यसवितुर्नाकि
र्मेहिरण्ययीममतिंयामशिश्रेत् । आसुष्टुतीरोदसीविश्वमिन्वेऽअपीवयोषाजनिमानिवव्रे ॥ युवंप्रत्नस्यसाधथोमहोय
दैवीस्वस्तिःपरिणःस्यातं । गोपाजिह्वस्यतस्थुषोविरूपाविश्वेपश्यंतिमायिनःकृतानि ॥ शुनंहुवेम० ॥२४॥ (३।४।१)
इंद्रंमतिर्हृदऽआवच्यमानाच्छापतिंस्तोमंतष्टाजिगाति । याजागृविर्विदथेशस्यमानेंद्रयत्तेजायतेविद्धितस्य ॥ दिव
श्चिदापूर्व्याजायमानाविजागृविर्विदथेशस्यमाना । भद्रावस्त्राण्यर्जुनावसानासेयमस्मेसनजापित्र्याधीः+ ॥ यमाच्चि

(३।४।१) इंद्रंमतिरितिनवर्चस्यसूक्तस्यविश्वामित्रइंद्रस्त्रिष्टुप् ।

दत्रंयमसूरंसूतजिह्वायाऽअग्रंपतदाह्यस्थात् । वपूंषिजातामिथुनासंचेतेतमोहनातपुंषोवुध्नऽएतां ॥ नकिरेषांनिंदितामर्त्यैंषुयेऽअस्माकंपितरोगोषुयोधाः । इंद्रऽएषांदंहितामाहिनावानुद्गोत्राणिससृजेदंसनावान् ॥ सखाहयत्रसखिभिर्नवग्वैरभिज्वासत्वभिर्गाऽअनुग्मन् । सत्यंतदिंद्रोदशभिर्दशग्वैःसूर्यंविवेदतमसिक्षियंतं ॥२५॥ इंद्रोमधुसंभृतमुस्रियायांपद्वद्विवेदशफवन्नमेगोः । गुहाहितंगुह्यंगूळ्हमप्सुहस्तेदधेदक्षिणेदक्षिणावान् ॥ ज्योतिर्वृणीततमसोविजानन्नारेस्यामदुरितादभीके । इमागिरःसोमपाःसोमवृद्धजुषस्वेंद्रपुरुतमस्यकारोः+ ॥ ज्योतिर्यज्ञायरोदसीऽअनुष्यादारेस्यामदुरितस्यभूरेः। भूरिचिद्धितुंजतोमर्त्यस्यसुपारासोवसवोबर्हणावत् ॥ शुनं०॥२६॥ इतितृतीयाष्टकेद्वितीयोध्यायः ॥ २ ॥

अष्टादशाध्याये वर्गाः २६ सूक्तानि १० ऋचः १३७ ॥ त्यागः ॥ इंद्रायेदं. ६१ नद्याइ. २ नदीभ्य. विश्वामित्रा. नदीभ्य. इंद्राये. २ विश्वामित्राये. नदीभ्य. विश्वामित्राये. नदीभ्य. ३ इंद्राये. ६३ ॥ तृतीयेद्वितीयः ॥ २ ॥

इंद्रत्वागायत्रंह्यांतूनउपनआयाह्यष्टौवयंतेपंचवार्हतंत्वामंद्रैर्युध्मस्यमरुत्वांन्त्सद्योहशंसामहामिंद्रःस्वाहांचर्षणीधृतंद्वादशाद्यांत्यौतृचौजागतगायत्रौधानावंतमष्टौपूर्वार्धगायत्रंषष्ठीजगतींद्रापर्वताचतुर्विंशतिराद्यैंद्रापार्वतीपंचदश्यादिद्वेवाचैससर्पयैंचतस्रोरथांगस्तुतयौंत्याअभिशापार्थींस्तावसिष्ठद्वेषिण्योंनवसिष्ठाःशृण्वंतिदशमीषोळश्यौजगत्यौत्रयोदशीगायत्रींद्वादशीविंशीद्वाविंश्योनुष्टुभौष्टादशीबृहतींमंमहेव्यधिकोक्तगोत्रंःप्रजापतिर्हिंवैश्वदेवंहोषसः ॥ १ ॥

॥ हरिःओम् ॥ (३।४।२) इंद्रंत्वावृषभंवयंसुतेसोमेंहवामहे । सपाहिमध्वोऽअंधसः ॥ इंद्रंक्रतुविदंसुतंसोमंहर्यपुरुष्टुत । पिबावृषस्वतातृपिं ॥ इंद्रप्रणोधितावानंयज्ञंविश्वेभिर्देवेभिः । तिरस्तवानविश्पते ॥ इंद्रसोमाःसुताऽइमेतवप्रयंतिसत्पते । क्षयंचंद्रासऽइंदवः ॥ दधिष्वाजठरेसुतंसोममिंद्रवरेण्यं । तवद्युक्षासऽइंदवः ॥ १ ॥ गिर्वणःपाहिनःसुतंमधोर्धाराभिरज्यसे । इंद्रत्वादातमिद्यशः ॥ अभिद्युम्नानिवनिनऽइंद्रंसचंतेऽअक्षिता । पीत्वीसोमस्यवावृधे ॥ अर्वावतोनऽआगहिपरावतश्चवृत्रहन् । इमाजुषस्वनोगिरः ॥ यदंतरापरावतमर्वावतंचहूयसे । इंद्रेहततऽआगहि ॥ २ ॥ ३।४।३) आतूनऽइंद्रमद्र्यंग्घुवानःसोमपीतये । हरिभ्यांयाह्यद्रिवः ॥ सत्तोहोतानऽऋत्वियस्तिस्तिरेबर्हिरानुषक् । अयुंजन्प्रातरद्रयः ॥ इमाब्रह्मब्रह्मवाहःक्रियंतऽआबर्हिःसीद । वीहिशूरपुरोळाशं ॥ रारंधिसवनेषुणऽएषुस्तोमेषुवृत्रहन् । उक्थेष्विंद्रगिर्वणः ॥ मतयःसोमपामुरुंरिहंतिशवसस्पतिं । इंद्रंवत्संनमातरः ॥ ३ ॥ समंदस्वाह्यंधसोराधसेतन्वामहे । नस्तोतारंनिदेकरः ॥ वयमिंद्रत्वायवोहविष्मंतोजरामहे । उतत्वमस्मयुर्वसो ॥ मारेऽअस्मद्विमुमुचोहरिप्रियार्वाङ्याहि । इंद्रस्वधावोमत्स्वेह+ ॥ अर्वांचंत्वासुखेरथेवहतामिंद्रकेशिना । घृतस्नूब

(३।४।२) इंद्रत्वेतिनवर्चस्यसूक्तस्यविश्वामित्रइंद्रोगायत्री । (३।४।३) आतूनइंद्रेतिनवर्चस्यसूक्तस्यविश्वामित्रइंद्रोगायत्री ।

हिरासदे ॥ ४ ॥ (३।४१४) उपनःसुतमागहिसोममिंद्रगवाशिरं । हरिभ्यांयस्तेऽअस्मयुः+ ॥ तमिंद्रमदमागहिबर्हिष्ठांग्रावभिःसुतं । कुविन्न्वस्यतृष्णवः ॥ इंद्रमित्थागिरोममाच्छागुरिषिताऽइतः । आवृतेसोमपीतये ॥ इंद्रंसोमस्यपीतयेस्तोमैरिहहवामहे । उक्थेभिःकुविदागमत् ॥ इंद्रसोमाःसुताऽइमेतान्दधिष्वशतक्रतो । जठरेवाजिनीवसो ॥ ५ ॥ विद्माहित्वाधनंजयंवाजेषुदधृषंकवे । अधातेसुम्नमीमहे ॥ इममिंद्रगवाशिरंयवाशिरंचनःपिब । आगत्यावृषभिःसुतं+ ॥ तुभ्येदिंद्रस्वऽओक्ये३सोमंचोदामिपीतये । एषरारंतुतेहृदि+ ॥ त्वांसुतस्यपीतयेप्रत्नमिंद्रहवामहे । कुशिकासोऽअवस्यवः ॥ ६ ॥ (३।४१५) आयाह्यर्वाङुपवंधुरेष्ठास्तवेदनुप्रदिवःसोमपेयं । प्रियासखायाविमुचोपबर्हिस्त्वामिमेहव्यवाहोहवंते ॥ आयाहिपूर्वीरतिचर्षणीराँऽअर्यऽआशिषऽउपनोहरिभ्यां । इमाहित्वामतयःस्तोमतष्टाऽइंद्रहवंतेसख्यंजुषाणाः+ ॥ आनोयज्ञंनमोवृधंसजोषाऽइंद्रदेवहरिभिर्याहितूयं । अहंहित्वामतिभिर्जोहवीमिघृतप्रयाःसधमादेमधूनां ॥ आचत्वामेतावृषणावहातोहरीसखायासुधुरास्वंगा । धानावदिंद्रःसवनंजुषाणःसखासख्युःशृणवद्वंदनानि ॥ कुविन्मागोपांकरसेजनस्यकुविद्राजानंमघवन्नृजीषिन् । कुविन्मऽऋषिंपपिवांसंसुतस्यकुविन्मेवस्वोऽअमृतस्यशिक्षाः ॥ आत्वाबृहंतोहरयोयुजानाऽअर्वागिंद्रसधमादोवहंतु । प्रयेद्विताद्विवऽऋंजंत्याताःसुसंमृ

(३।४१४) उपनइतिनवर्चस्यसूक्तस्यविश्वामित्रइंद्रोगायत्री । (३।४१५) आयाह्यर्वाङित्यष्टर्चस्यसूक्तस्यविश्वामित्रइंद्रस्त्रिष्टुप् ।

Digitization by eGangotri. Funding MHRD Delhi

ष्टासोवृषभस्यंमूराः+ ॥ इंद्रपिबवृषधूतस्यवृष्णऽआयंतेश्येनऽउशतेजभारं । यस्यमदेच्यावयसिप्रकृष्टीर्यस्यमदेऽअप
गोत्राववर्थं ॥ शुनंहुवेम० ॥ ७ ॥ (३।४।६) अयंतेऽअस्तुहर्यतःसोमऽआहरिंभिःसुतः । जुषाणऽइंद्रहरिंभिर्नऽ
आगह्यातिष्ठहरिंतंरथं ॥ हर्यन्नुषसमर्चयःसूर्यंहर्यन्नरोचयः । विद्वाँश्चिकित्वान्हर्यश्ववर्धसऽइंद्रविश्वांऽअभिश्रियः ॥
द्यामिंद्रोहरिंधायसंपृथिवींहरिंवर्पसं । अधारयद्धरितोर्भूरिभोजनंययोरंतर्हरिश्चरंत् ॥ जज्ञानोहरिंतोवृषाविश्वमाभा
तिरोचनं । हर्यंश्वोहरिंतंधत्तऽआयुधमावज्रंबाह्वोर्हरिं ॥ इंद्रोहर्यंतमर्जुनंवज्रंशुक्रैरभीवृतं । अपावृणोद्धरिंभिरद्रि
भिःसुतमुद्गाहरिंभिराजत ॥ ८ ॥ (३।४।७) आमंद्रैरिंद्रहरिंभिर्याहिमयूररोमभिः । मात्वाकेचिन्नियमन्विंनपा
शिनोतिधन्वेवताँऽइंहि ॥ वृत्रखादोवलंरुजःपुरांदर्मोऽअपामजः । स्थातारथस्यहयोंरभिस्वरऽइंद्रोदृह्लाचिदारुजः+॥
गंभीराँऽउदधीँऽरिवक्रतुंपुष्यसिगाऽइव । प्रसुगोपायवसंधेनवोयथाहृदंकुल्याऽइवाशत ॥ आनस्तुजंरयिंभराशंनप्र
तिजानते । वृक्षंपक्वंफलमंकीवधूनुहींद्रसंपारणंवसु ॥ स्वयुरिंद्रस्वराळसिस्मद्दिष्टिःस्वयशस्तरः । सवावृधानऽओज
सापुरुष्टुतभवानःसुश्रवस्तमः ॥ ९ ॥ (३।४।८) युध्मस्यतेवृषभस्यस्वराजऽउग्रस्ययूनःस्थविरस्यघृष्वेः । अजूर्यतो

(३।४।६) अयंतइतिपंचर्चस्यसूक्तस्यविश्वामित्रइंद्रोबृहती । (३।४।७) आमंद्रैरितिपंचर्चस्यसूक्तस्यविश्वामित्रइंद्रोबृहती ।
(३।४।८) युध्मस्यतइतिपंचर्चस्यसूक्तस्यविश्वामित्रइंद्रस्त्रिष्टुप् ।

वज्रिणोवीर्या३ णींद्रंश्रुतस्यंमहतोमहानि ॥ महाँऽअसिमहिषवृष्ण्येभिर्धनस्पृदुग्रसहमानोऽअन्यान् । एकोविश्वस्यभु
वंनस्यराजासयोधयांचक्षययांचजनांन् ॥ प्रमात्राभीरिरिचेरोचमानःप्रदेवेभिर्विश्वतोऽअप्रतीतः । प्रमज्मनादिवऽ
इंद्रःपृथिव्याःप्रोरोर्महोऽअंतरिक्षादृजीषी+ ॥ उरुंगंभीरंजनुषाभ्यु१ग्रंविश्वव्यंचसमवतंमतीनां । इंद्रंसोमासःप्रदिवि
सुतासःसमुद्रंनस्रवतऽआविंशंति ॥ यंसोममिंद्रपृथिवीद्यावागर्भंनमाताबिभृतस्त्वाया । तंतेहिन्वंतितमुतेमृजंत्यध्व
र्यवोवृषभपातवाऽउ ॥ १० ॥ (३।४।९) मरुत्वाँऽइंद्रवृषभोरणायपिबासोममनुष्वधंमदाय । आसिंचस्वजठरेम
ध्वऽऊर्मिंत्वंराजासिप्रदिवःसुतानां ॥ सजोषाऽइंद्रसगणोमरुद्भिःसोमंपिबवृत्रहाशूरविद्वान् । जहिशत्रूँरपमृधोनुद
स्वाथाभयंकृणुहिविश्वतोनः ॥ उतऽऋतुभिर्ऋतुपाःपाहिसोममिंद्रदेवेभिःसखिभिःसुतंनः । याँऽआभजोमरुतोयेत्वा
न्वहन्वृत्रमदधुस्तुभ्यमोजः ॥ येत्वाहिहत्येमघवन्नवर्धन्येशांबरेहरिवोयेगविष्टौ । येत्वानूनमनुमदंतिविप्राःपिबेंद्रसो
मंसगणोमरुद्भिः ॥ मरुत्वंतंवृषभंवावृधानमकवारिंदिव्यंशासमिंद्रं । विश्वासाहमवसेनूतनायोग्रंसहोदामिहतंहुवेम
॥ ११ ॥ (३।४।१०) सद्योहजातोवृषभःकनीनःप्रभर्तुमावदंधसःसुतस्य । साधोःपिबप्रतिकामंयथातेरसाशिरःप्रथ
मंसोम्यस्य ॥ यज्जायथास्तदहरस्यकामेंशोःपीयूषमपिबोगिरिष्ठां । तंतेमातापरियोषाजनित्रीमहःपितुर्दमऽआसिंचद

(३।४।९) मरुत्वाँइंद्रेतिपंचर्चस्यसूक्तस्यविश्वामित्रइंद्रस्त्रिष्टुप । (३।४।१०) सद्योहजातइतिपंचर्चस्यसूक्तस्यविश्वामित्रइंद्रस्त्रिष्टुप् ।

ग्रें ॥ उपस्थायंमातरमन्नमैट्टतिग्ममपश्यदभिसोममूधः । प्रयावयन्नचरद्गृत्सोऽअन्यान्महानिचक्रेपुरुधप्रतीकः ॥ उ
ग्रस्तुराषाळभिभूत्योजायथावशंतन्वंचक्रऽएषः । त्वष्टारमिंद्रोजनुषाभिभूयामुष्यासोममपिबच्चमूषु ॥ शुनंहुवेम०
॥ १२ ॥ (३।४।११) शंसामहामिंद्रंयस्मिन्विश्वाऽआकृष्टयःसोमपाःकाममव्यन् । यंसुक्रतुंधिषणेविभ्वतष्टंघनंवृ
त्राणांजनयंतदेवाः+ ॥ यंनुनकिःपृतनासुस्वराजंद्वितातरतिनृतमंहरिष्ठां । इनतमःसत्वभिर्योहशूषैःपृथुज्रयाऽअमि
नादायुर्दस्योः ॥ सहावापृत्सुतरणिर्नार्वाव्यानशीरोदसीमेहनावान् । भगोनकारेहव्योमतीनांपितेवचारुःसुहवोवयो
धाः+ ॥ धर्तादिवोरजसस्पृष्टऽऊर्ध्वोरथोनवायुर्वसुभिर्नियुत्वान् । क्षपांवस्ताजनितासूर्यस्यविभक्ताभागंधिषणेववा
जं ॥ शुनंहुवेम० ॥ १३ ॥ (३।४।१२) इंद्रःस्वाहापिबतुयस्यसोमऽआगत्यातुम्रोवृषभोमरुत्वान् । ओरुव्यचाः
पृणतामेभिरन्नैरास्यहविस्तन्व१ःकाममृध्याः ॥ आतेसपर्यूजवसेयुनज्मिययोरनुप्रदिवःश्रुष्टिमावः । इहत्वाधेयुर्हर
यःसुशिप्रपिबात्व१स्यसुषुतस्यचारोः ॥ गोभिर्मिमिक्षुंदधिरेसुपारमिंद्रंज्यैष्ठ्यायधायसेगृणानाः । मंदानःसोमंपपिवाँ
ऽऋजिषिन्त्समस्मभ्यंपुरुधागाऽईषण्य ॥ इमंकामंमंदयागोभिरश्वैश्चंद्रवताराधसापप्रथश्च । स्वर्यवोमतिभिस्तुभ्यंवि ॥१७॥

(३।४।११) शंसामहामितिपंचर्चस्यसूक्तस्यविश्वामित्रइंद्रस्त्रिष्टुप् । (३।४।१२) इंद्रःस्वाहेतिपंचर्चस्यसूक्तस्यविश्वामित्रइंद्रस्त्रिष्टुप् ।

प्राऽइंद्रायवाहःकुशिकासोऽअक्रन् ॥ शुनंहुवेम० ॥ १४ ॥ (३।४।१३) चर्षणीधृतंमघवानमुक्थ्यं१मिंद्रंगिरोबृहतीरभ्यनूषत । वावृधानंपुरुहूतंसुवृक्तिभिरमर्त्यंजरमाणंदिवेदिवे ॥ शतक्रतुमर्णवंशाकिनंनरंगिरोमऽइंद्रमुपयंति विश्वतः । वाजसनिंपूर्भिदंतूर्णिमप्तुरंधामसाचमभिषाचंस्वर्विदं ॥ आकरेवसोर्जरितापनस्यतेनेहसःस्तुभऽइंद्रोदुवस्यति । विवस्वतःसदनऽआहिपिप्रियेसत्रासाहमभिमातिहनंस्तुहि ॥ नृणामुत्वानृतमंगीर्भिरुक्थैरभिप्रवीरमर्चतासबाधः । संसहसेपुरुमायोजिहीतेनमोऽअस्यप्रदिवऽएकऽईशे ॥ पूर्वीरस्यनिष्षिधोमर्त्येषुपुरूवसूनिपृथिवीबिभर्ति । इंद्रायद्यावऽओषधीरुतापोरयिंरक्षंतिजीरयोवनानि ॥ १५ ॥ तुभ्यंब्रह्माणिगिरऽइंद्रतुभ्यंसत्रादधिरेहरिवोजुषस्व । बोध्या३पिरवसोनूतनस्यसखेवसोजरितृभ्योवयोधाः ॥ इंद्रमरुत्वऽइहपाहिसोमंयथाशार्यातेऽअपिबःसुतस्य । तवप्रणीतीतवशूरशर्मन्नाविवासंतिकवयःसुयज्ञाः+ ॥ सवावशानऽइहपाहिसोमंमरुद्भिरिंद्रसखिभिःसुतंनः । जातंयत्त्वापरिदेवाऽअभूषन्महेभरायपुरुहूतविश्वे ॥ अप्तूर्येमरुतऽआपिरेषोमंदन्निंद्रमनुदातिवाराः । तेभिःसाकंपिबतुवृत्रखादःसुतंसोमंदाशुषःस्वेसधस्थे ॥ इदंह्यन्वोजसासुतंराधानांपते । पिबात्व१स्यगिर्वणः ॥ यस्तेऽअनुस्वधामसत्सुतेनि

(३।४।१३) चर्षणीधृतमितिद्वादशर्चस्यसूक्तस्यविश्वामित्रइंद्रस्त्रिष्टुप्आद्यास्तिस्रोजगत्यः अंत्यास्तिस्रोगायत्र्यः ।

यं॑च्छत॒न्वँ॑ । सत्वा॑ममत्तु॒सो॒म्यं+ ॥ प्रतेँ॑ऽअश्नोतु॒कुक्ष्योः॑प्रेंद्र॒ब्रह्म॑णा॒शिरः॑ । प्रबा॒हू॑शूर॒राध॑से ॥ १६ ॥ (३।४।१४)
धा॒नाव॑न्तंकर॒म्भिण॑मपू॒पव॑न्तमु॒क्थिन॑म् । इंद्र॑प्रा॒तर्जु॑षस्वनः ॥ पु॒रो॒ळाशं॑पच॒त्यं॑जु॒षस्वें॒द्रागु॑रस्वच । तु॒भ्यं॑ह॒व्यानि॑सिस्रते ॥
पु॒रो॒ळाशं॑चनो॒घसो॑जो॒षया॑से॒गिर॑श्चनः । व॒धू॒युरि॑व॒योष॑णां ॥ पु॒रो॒ळाशं॑सनश्रुतप्रा॒तः॒सा॒वेजु॑षस्वनः । इंद्र॒क्रतु॒र्हि॒ते॑बृ॒ह
न्+ ॥ माध्यं॑दिनस्य॒सव॑नस्य॒धा॒नाः॑पु॒रो॒ळाश॑मिंद्रकृ॒ष्वे॒हचारुं॑ । प्रयत्स्तो॒ताज॑रि॒तातूर्ण्य॑र्थोवृ॒षा॒यमा॑ण॒ऽउप॑गी॒र्भिरीट्टे॑
॥ १७ ॥ तृ॒तीये॑धा॒नाःसव॑नेपुरुष्टुतपु॒रो॒ळाश॒माहु॑तंमामहस्वनः । ऋ॒भु॒मंतं॒वाज॑वंतंत्वाकवे॒प्रय॑स्वंत॒ऽउप॑शिक्षेमधी॒ति
भिः॑ ॥ पू॒ष॒ण्वते॑तेचकृमाक॒रं॑भंहरि॑वते॒हर्य॑श्वाय॒धा॒नाः । अ॒पू॒पम॑द्धि॒सग॑णोम॒रुद्भिः॒सोमं॑पिबवृत्र॒हाशूर॑वि॒द्वान्+ ॥ प्र
ति॑धा॒नाभ॑रत॒तूय॑मस्मैपु॒रो॒ळाशं॑वी॒रत॑मायनृ॒णां । दि॒वेदि॑वे॒स॒दृशी॑रिंद्र॒तुभ्यं॒वर्धं॑तुत्वासोम॒पेया॑यधृष्णो ॥ १८ ॥
(३।४।१५) इंद्रा॑पर्वताबृह॒तारथे॑नवा॒मीरिष॒ऽआव॑हतंसु॒वीराः॑ । वी॒तंह॒व्यान्य॑ध्व॒रेषु॑देवा॒वर्धे॑थांगी॒र्भिरिळ॑या॒मदं॑ता ॥
तिष्ठा॒सुकं॑मघव॒न्मापरा॑गाः॒सोम॑स्य॒नुत्वा॒सुषु॑तस्ययक्षि । पि॒तुर्नपु॒त्रःसिच॒मार॑भेत॒ऽइंद्र॒स्वादि॑ष्ठया॒गि॒राश॑चीवः ॥ शंसा॑

(३।४।१४) धानावंतमित्यष्टर्चस्यसूक्तस्यविश्वामित्रइंद्रस्त्रिष्टुप्आद्याश्चतस्रोगायत्र्यःषष्ठीजगती । (३।४।१५) इंद्रापर्वतेतिचतुर्विंशत्यृचस्यसूक्तस्यविश्वामित्रऋषिरिंद्रोदेवताआद्यायाइंद्रापर्वतौपंचदश्यादिद्वयोर्वाक्ततश्चतसृणांरथांगानित्रिष्टुप् दशमीषोळश्यौजगत्यौद्वादशीविंशीद्वाविंश्योनुष्टुभःत्रयोदशीगायत्रीअष्टादशीबृहती ।

वाध्व॒र्योंप्रतिं॑मेगृणी॒हींद्रा॑य॒वाहः॑कृणवाव॒जुष्टं॑ । एदंव॒र्हिर्य॑जमानस्यसी॒दाथा॑चभूदु॒क्थमिंद्रा॑यश॒स्तं+ ॥ जा॒येदस्तं॑मघव॒न्त्सेदु॒योनि॒स्तदित्त्वा॑यु॒क्ताहर॑योवहंतु । य॒दाक॒दाचं॑सु॒नवा॑म॒सोमं॑म॒ग्निष्ट्वा॑दू॒तोधन्वा॒त्यच्छं॑ ॥ परा॑याहिमघव॒न्नाचं॑या॒हींद्रं॑भ्रातरु॒भय॑त्रा॒ते॒ऽअर्थं । य॒त्रार॑थ॒स्यबृह॒तोनि॒धानं॑वि॒मोच॑नं॒वाजि॒नोरास॑भस्य ॥ १९ ॥ अपाः॒सोम॑म॒स्तमिंद्र॒प्रया॑हिकल्या॒णीर्जा॒यासु॒रणं॑गृहेते॑ । य॒त्रार॑थ॒स्यबृह॒तोनि॒धानं॑वि॒मोच॑नं॒वाजि॒नोदक्षि॑णावत् ॥ इ॒मेभो॒जाऽअंगि॑रसो॒विरू॑पादि॒वस्पु॒त्रासो॒ऽअसु॑रस्यवी॒राः । वि॒श्वामि॑त्राय॒दद॑तोम॒घानिं॑सहस्रसा॒वेप्रति॑रंत॒ऽआयुः॑ ॥ रू॒पंरू॑पंम॒घवा॑बोभवीतिमा॒याःकृण्वा॒नस्त॒न्वं१॒ंपरि॒स्वां । त्रिर्यद्दि॒वःपरि॑मुहू॒र्तमागा॒त्स्वैर्मंत्रै॒रनृ॑तुपाऽऋ॒तावा॑ ॥ म॒हाँऽऋषि॑र्देव॒जादे॒वजू॑तोस्तभ्ना॒त्सिंधु॑मर्ण॒वंनृ॒चक्षाः॑ । वि॒श्वामि॑त्रो॒यदव॑हत्सु॒दास॒मप्रि॑यायतकुशि॒केभि॒रिंद्रः॑ ॥ हं॒साऽइ॑वकृणुथ॒श्लोक॒मद्रि॑भि॒र्मदं॑तोगी॒र्भिर॑ध्व॒रेसु॒ते॑सचा॑ । दे॒वेभि॒र्विप्राऽऋ॑षयोनृचक्षसो॒विपि॑बध्वंकुशिकाःसो॒म्यंमधु॑ ॥ २० ॥ उप॒प्रेत॑कुशिकाश्चे॒तय॑ध्व॒मश्वं॑रा॒येप्रमुं॑चतासु॒दासः॑ । राजा॑वृ॒त्रंजं॑घन॒त्प्रागपा॒गुद॒गथा॑यजाते॒वर॒ऽआपृ॑थि॒व्याः+ ॥ यऽइ॒मेरोद॑सीऽउ॒भेऽअ॒हमिंद्र॒मतु॑ष्टवं । वि॒श्वामि॑त्रस्यरक्षति॒ब्रह्मे॒दंभार॑तं॒जनं॑ ॥ वि॒श्वामि॑त्राऽअरासत॒ब्रह्मेंद्रा॑यव॒ज्रिणे॑ । कर॒दिन्नः॑सु॒राध॑सः ॥ किंते॑कृण्वंति॒कीक॑टेषु॒गावो॒नाशिरं॑दुह्रेनत॒पंतिघ॒र्मं । आनो॑भर॒प्रम॑गंदस्य॒वेदो॑नैचाशा॒खं॑मघवन्रंधयानः ॥ स॒स॒र्प॒रीरम॑तिं॒बाध॑मानावृ॒हन्मि॑मायज॒मद॑ग्निदत्ता । आसूर्य॑स्यदुहि॒ताततान॒श्रवो॑दे॒वेष्व॒मृत॑मजु॒र्यं+ ॥ २१ ॥ स॒स॒र्प॒रीर॑भर॒त्तूय॑मे॒भ्योधि॒

Digitization by eGangotri. Funding MDF-Delhi

श्रव॒ःपांच॑जन्यासुकृ॒ष्टि॑षु । साप॒क्ष्या॒३॒नव्य॒मायु॒र्दधा॑ना॒यांमे॑पलस्तिजमदग्न॒यो॑द॒दुः ॥ स्थि॒रौगावौ॑भवतां॒वी॒ळुरक्ष॒ोमेषा
विव॑र्हि॒मायु॒गंविशा॑रि । इंद्र॑ःपात॒ल्यैदद॒तां॒शरी॑तो॒ररि॑ष्टनेमेऽअ॒भिनः॑सचस्व ॥ बलं॑धेहित॒नूषु॑नो॒बल॑मिंद्रान॒ळुत्सु॑नः ।
बलं॑तो॒काय॒तन॑याय॒जीव॑से॒त्वंहिब॑ल॒दाऽअसि॑ ॥ अ॒भिव्य॑यस्वखदि॒रस्य॒सार॒मोजो॑धेहिस्पंद॒नेशिं॒शपा॑यां । अक्ष॑वीळो
वीळितवी॒ळय॑स्व॒मायामा॑द॒स्मादव॑जीहिपोनः ॥ अ॒यम॒स्मान्वन॒स्पति॒र्माच॒हामाच॑रीरिषत् । स्व॒स्त्यागृ॒हेभ्य॒ऽआव॒साऽ
आवि॒मोच॑नात् ॥ २२ ॥ इंद्रो॒तिभि॑र्बहु॒लाभि॑र्नोऽअ॒द्ययाच्छ्रे॒ष्ठाभि॑र्मघवन्छूरजिन्व । योन॒ोद्वेष्ट्यध॑र॒ःसस्प॑दीष्ट॒यमु॑द्वि॒
ष्मस्तमु॑प्रा॒णोज॑हातु ॥ प॒र॒शुंचि॒द्वित॑पतिशिंब॒लंचि॒द्विवृ॑श्चति । उ॒खाचि॑दिंद्र॒येष॑ंती॒प्रय॑स्ता॒फेन॑मस्यति ॥ नसाय॑कस्यचि
कितेजनासोलो॒धंन॑यंति॒पशु॒मन्य॑मानाः । नावा॑जिनंवा॒जिना॑हासयंति॒नगर्द॒भंपुरोऽअश्वा॑न्नयंति ॥ इ॒मऽइंद्रभर॒तस्य॑
पु॒त्राऽअ॑पपि॒त्वंचि॑कितु॒र्नप्र॑पि॒त्वं । हि॒न्वंत्यश्व॒मर॑णं॒ननित्यं॒ज्यावा॑जं॒परि॑णयंत्या॒जौ+ ॥२३॥ (३।५।१) इ॒मंम॒हेवि॑द॒थ्या॑
यशू॒षंशश्व॒त्कृत्व॒ऽईड्या॑य॒प्रज॑भ्रुः । शृ॒णोतु॑नो॒दम्ये॑भि॒रनी॑कैःशृ॒णोत्व॒ग्निर्दि॒व्यैरज॑स्रः ॥ महि॑म॒हेदि॒वेऽअ॑र्चापृथि॒व्यैका

(३।५।१) इमंमहइतिद्वाविंशत्यृचस्यसूक्तस्यवैश्वामित्रःप्रजापतिर्विश्वेदेवास्त्रिष्टुप् (सूक्तभेदप्रयोगपक्षेदेवताः क्रमेणअग्निः १ विश्वेदेवाः २ द्यावापृथिवी १ विश्वे. १ सूर्यद्यावापृथिव्यः १ द्यावापृथिवी २ द्यौः १ विश्वेदेवाः १ सविता १ विश्वे. २ विष्णुः १ इंद्रः १ अश्विनौ १ विश्वेदेवाः ५ अग्निः १ एवं २२ ॥ उत्तरसूक्तेअखिलाअपिविश्वेदेवाः) ।

मो॑मऽइ॒च्छन्च॑रतिप्र॒जा॒नन् । य॒यो॑र्ह॒स्तोमो॑वि॒दथे॑षुदे॒वाःस॒प॒र्यवो॑मा॒दयं॑त॒सचा॒योः+ ॥ यु॒वोर्ऋ॒तंरो॑दसीस॒त्यम॑स्तुम॒हेषु॒णः॑
सु॒वि॒ताय॒प्रभू॑तं । इ॒दंदि॒वेनमो॑ऽअग्ने॒पृथि॒व्यैस॑प॒र्यामि॒प्रय॑सा॒यामि॒रत्नं॑ ॥ उ॒तोहि॒वां॑पू॒र्व्याऽआ॑विवि॒द्रऽऋ॒ताव॑रीरोदसी
सत्य॒वाचः॑ । नर॑श्चि॒द्वां॑समि॒थेशूर॑सातौववं॑दि॒रेपृ॑थिविवे॒विदानाः ॥ कोऽअ॒द्धावे॑द॒कऽइ॒हप्रवो॑चद्दे॒वाँऽअच्छा॑प॒थ्या॒३
कास॒मेति । द॒दृश्रऽएषामव॒मासदां॑सि॒परे॑षु॒यागुह्ये॑षुव्र॒तेषु॑ ॥ २४ ॥ क॒विर्नृ॒चक्षा॑ऽअ॒भिषी॑मचष्टऽऋ॒तस्य॒योना॒विघृ॑ते॒
मदं॑ती । नाना॑चक्राते॒सद॑नं॒यथा॒वेःस॑मा॒नेन॒क्रतु॑नासंविदा॒ने+ ॥ स॒मा॒न्यावियु॑तेदू॒रेऽअं॑तेध्रु॒वेप॒देत॑स्थतु॒र्जाग॒रूके॑ । उ॒
तस्वसा॑रायुव॒तीभवं॑ती॒ऽआदु॑ब्रुवातेमिथु॒नानि॒नाम॑ ॥ विश्वेदे॒तेजनि॑मा॒संवि॑विक्तोम॒होदे॒वान्बिभ्र॑ती॒नव्य॑थेते । एज॑
द्ध्रुवं॑पत्यते॒विश्व॒मेकं॒चर॑त्पत॒त्रिविषु॑णं॒विजा॒तं+ ॥ सना॑पुरा॒णमध्ये॑म्या॒रान्म॒हःपि॒तुर्जनि॑तु॒र्जामि॒तन्नः॑ । दे॒वासो॒यत्र॑पनि॒
तार॒ऽएवै॑रु॒रौप॒थिव्यु॑तेत॒स्थुरं॒तः+ ॥ इ॒मंस्तोमं॑रोदसी॒प्रब्र॑वीम्यृदू॒दराः॑शृणवन्नग्निजि॒ह्वाः । मि॒त्रःस॒म्राजो॒वरु॑णो॒युवा॑न
ऽआदि॒त्यासः॑क॒वयः॑पप्र॒थानाः+ ॥ २५ ॥ हिर॑ण्यपाणिःसवि॒तासु॑जि॒ह्वस्त्रिरादि॒वोवि॒दथे॒पत्य॑मानः । दे॒वेषु॑चसवित॒ः
श्लोक॒मश्रे॒राद॒स्मभ्य॒मासु॑वस॒र्वता॑तिं ॥ सु॒कृत्सु॑पा॒णिःस्ववाँ॑ऽऋ॒तावा॑दे॒वस्त्वष्टाव॑से॒तानि॑नोधात् । पू॒ष॒ण्वं॑तऽऋभवोमा
दयध्वमू॒र्ध्वग्रा॑वाणोऽअध्व॒रम॑तष्ट ॥ वि॒द्युद्र॑थाम॒रुत॑ऽऋ॒ष्टिमं॑तोदि॒वोमर्या॑ऽऋ॒तजा॑ताऽअ॒यासः॑ । सर॑स्वतीशृणवन्य॒
ज्ञियासो॒धाता॑र॒यिंस॒हवी॑रंतुरासः ॥ विष्णुं॒स्तोमा॑सःपुरुद॒स्मम॒र्काभग॑स्येवका॒रिणो॒याम॑निग्मन् । उ॒रु॒क्र॒मःक॑कु॒होयस्य॑

Digitization by eGangotri. Funding:MDH-Delhi

पूर्वीर्नमंधंतीयुवतयोजनित्रीः ॥ इंद्रोविश्वैर्वीर्यैः पत्यमानऽउभेऽआपप्रौरोदसीमहित्वा । पुरंदरोवृत्रहाधृष्णुषेणः
संगृभ्यानऽआभराभूरिपश्वः+ ॥ २६ ॥ नासत्यामेपितरांबंधुपृच्छासजात्यमश्विनोश्चारुनाम । युवंहिस्थोरयिदौनो
रयीणांदात्रंरक्षेथेऽअकवैरदब्धा ॥ महत्तद्वःकवयश्चारुनामयद्धदेवाभवथविश्वऽइंद्रे । सखऽऋभुभिःपुरुहूतप्रिये
भिरिमांधियंसातयेतक्षतानः ॥ अर्यमाणोऽअदितिर्यज्ञियासोदब्धानिवरुणस्यव्रतानि । युयोतनोऽअनपत्यानिगंतोः
प्रजावान्नःपशुमाँऽअस्तुगातुः+ ॥ देवानांदूतःपुरुधप्रसूतोनागान्नोवोचतुसर्वताता । शृणोतुनःपृथिवीद्यौरुतापःसूर्यो
नक्षत्रैरुर्वं१तरिक्षं ॥ शृण्वंतुनोवृषणःपर्वतासोध्रुवक्षेमासऽइळयामदंतः । आदित्यैर्नोऽअदितिःशृणोतुयच्छंतुनोम
रुतःशर्मभद्रं+ ॥ सदासुगःपितुमाँऽअस्तुपंथामध्वादेवाऽओषधीःसंपिपृक्त । भगोमेऽअग्नेसख्येनमृध्याऽउद्रायोऽअ
श्यांसदनंपुरुक्षोः+ ॥ स्वदस्वहव्यासमिषोदिदीह्यस्मद्र्य१क्संमिमीहिश्रवांसि । विश्वाँऽअग्नेपृत्सुतान्जेषिशत्रूनहावि
श्वासुमनादीदिहीनः ॥ २७ ॥ (३।५।२) उषसःपूर्वाऽअधयद्व्यूषुर्महद्विजज्ञेऽअक्षरंपदेगोः । व्रतादेवानामुपनुप्र
भूषन्महद्देवानामसुरत्वमेकं ॥ मोषूणोऽअत्रजुहुरंतदेवामापूर्वेऽअग्नेपितरःपदज्ञाः । पुराण्योःसद्मनोःकेतुरंतर्महद्दे०॥
विमेपुरुत्रापतयंतिकामाःशम्यच्छादीद्येपूर्व्याणि । समिद्धेऽअग्नावृतमिद्वदेममहद्दे० ॥ समानोराजाविभृतःपुरुत्रा ॥२०॥

(३।५।२) उषसइतिद्वाविंशत्यृचस्यसूक्तस्यप्रजापतिर्विश्वेदेवास्त्रिष्टुप् ।

शयेशयासुप्रयुतोवनानु । अन्यावत्संभरतिक्षेतिमातामहद्दे० ॥ आक्षित्पूर्वास्वपराऽअनूरुत्सद्योजातासुतरुणीष्वंतः ।
अंतर्वतीःसुवतेऽअप्रवीतामहद्दे० ॥ २८ ॥ शयुःपरस्तादधनुद्विमाताबंधनश्चरतिवत्सऽएकः । मित्रस्यतावरुणस्यव्र
तानिमहद्दे० ॥ द्विमाताहोताविदथेषुसम्राळन्वग्रंचरतिक्षेतिबुध्नः । प्ररण्यानिरण्यवाचोभरंतेमहद्दे० ॥ शूरस्येवयु
ध्यतोऽअंतमस्यप्रतीचीनंददृशेविश्वमायत् । अंतर्मतिश्चरतिनिष्षिधंगोर्महद्दे० ॥ निवेवेतिपलितोदूतऽआस्वंतर्महाँ
श्चरतिरोचनेन । वपूंषिबिभ्रदभिनोविचष्टेमहद्दे० ॥ विष्णुर्गोपाःपरमंपातिपाथःप्रियाधामान्यमृतादधानः । अग्नि
ष्टाविश्वाभुवनानिवेदमहद्दे० ॥ २९ ॥ नानाचक्रातेयम्या३वपूंषितयोरन्यद्रोचतेकृष्णमन्यत् । श्यावीचयदरुषीच
स्वसारौमहद्दे० ॥ माताचयत्रदुहिताचधेनूसबर्दुघेधापयेतेसमीची । ऋतस्यतेसदसीळेऽअंतर्महद्दे० ॥ अन्यस्या
वत्संरिहतीमिमायकयाभुवानिदधेधेनुरूधः । ऋतस्यसापयसापिन्वतेळामहद्दे० ॥ पद्यावस्तेपुरुरूपावपूंष्यूर्ध्वात
स्थौत्र्यविंरेरिहाणा । ऋतस्यसद्मविचरामिविद्वान्महद्दे० ॥ पदेऽइवनिहितेदस्मेऽअंतस्तयोरन्यद्गुह्यमाविरन्यत् ।
सध्रीचीनापथ्या३साविषूचीमहद्दे० ॥ ३० ॥ आधेनवोधुनयंतामशिश्वीःसबर्दुघाःशशयाऽअप्रदुग्धाः । नव्यान
व्यायुवतयोभवंतीर्महद्दे० ॥ यदन्यासुवृषभोरोरवीतिसोऽअन्यस्मिन्यूथेनिदधातिरेतः । सहिक्षपावान्त्सभगःसरा
जामहद्दे० ॥ वीरस्यनुस्वश्व्यंजनासःप्रनुवोचामविदुरस्यदेवाः । षोळ्हायुक्ताःपंचपंचावहंतिमहद्दे० ॥ देवस्त्वष्टास

विताविश्वरूपःपुपोषप्रजाःपुरुधाजजान । इमाचविश्वाभुवनान्यस्यमहद्दे० ॥ महीसमैरच्चम्वासमीचीऽउभेतेऽअस्य वसुनान्यृष्टे । शृण्वेवीरोविंदमानोवसूनिमहद्दे० ॥ इमांचनःपृथिवींविश्वधायाऽउपक्षेतिहितमित्रोनराजा । पुरःसदःशर्मसदोनवीरामहद्दे० ॥ निष्षिध्वरीस्तऽओषधीरुतापोरयिंतऽइंद्रपृथिवीबिभर्ति । सखायस्तेवामभाजःस्याममहद्दे० ॥ ३१ ॥ इतितृतीयाष्टकेतृतीयोध्यायः ॥ ३ ॥ ॥ ॥ ॥ ॥

एकोनविंशाध्याये वर्गाः ३१ सूक्तानि १६ ऋचः १५८ ॥ त्यागः ॥ इंद्रायेदं. ९० इंद्रापर्वताभ्या. १ इंद्राये. १३ ससर्पर्यै वाचइ. २ रथांगेभ्य. ४ इंद्राये. ४ अग्नय. विश्वेभ्योदेवेभ्य. २ द्यावापृथिवीभ्या. विश्वेभ्योदेवेभ्य. सूर्यायद्यावापृथिवीभ्या. द्यावापृथिवीभ्या. २ द्यवइ. विश्वेभ्योदेवेभ्य. सवित्रइदं. विश्वेभ्योदेवेभ्य. २ विष्णवइ. इंद्राये. अश्विभ्यामि. विश्वेभ्योदेवेभ्य. ५ अग्नय. विश्वेभ्योदेवेभ्य. २२ ॥ इतितृतीयेतृतीयः ॥ ३ ॥

नताष्टौप्रमेषड्धेनुर्नवाश्विनंमित्रोमैत्रंचतुर्गायत्र्यंतमिहेहवःसप्तार्भवंजागतंतृचोंत्यऐंद्रश्चोषउषस्यमिमाउदूनैंद्रावरुणबार्हस्पत्यपौष्णंसावित्रसौम्यमैत्रावरुणास्तृचांअंत्योजमदग्न्यार्षोवांचतुर्थ्याद्यागायत्र्योयःपूजयितुंदेवपितृमनुष्यान्पेचआंत्राणिशुनःश्येनरूपेणैंद्रोवृत्त्यर्थमाहरन्मधुयस्यसवामदेवोगौतमश्चतुर्थमंडलमपश्यत्त्वांह्यग्नेविंशतिरष्ट्यतिजगतीधृतिरुपाद्याश्चतस्रोवारुण्यश्चर्वायोमर्त्येष्वावःषोळशाद्यारौद्रींकृणुष्वपंचोनाराक्षोघ्नं॥१॥ ॥२१॥

॥ हरिःओम् ॥ (३।५।३) नतामि॑नंतिमा॒यिनो॒नधीरा॑व्र॒तादे॒वानां॑प्रथ॒माध्रु॒वाणि॑ । नरोद॑सीऽअ॒द्रुहा॑वे॒द्याभि॒र्न पर्व॑तानि॒नमे॑तस्थि॒वांस॑ः ॥ षड्भा॒राँऽएको॒ऽअच॑रन्बिभर्त्यृ॒तंवर्षि॑ष्ठ॒मुप॒गाव॒ऽआगु॑ः । ति॒स्रोम॒हीरुप॑रास्तस्थु॒रत्या॒गुहा॒द्वे निहि॑ते॒दर्श्येका॑ ॥ त्रि॒पा॒ज॒स्योवृ॑ष॒भोवि॒श्वरू॑पऽउ॒तत्र्यु॒धापु॑रु॒धप्र॒जावा॑न् । त्र्य॒नी॒कःप॑त्यते॒माहि॑नावा॒न्तसरे॑तो॒धावृ॑ष॒भः शश्व॑तीनां ॥ अ॒भीक॑ऽआसांपद॒वीर॑बोध्यादि॒त्याना॑मह्वे॒चारु॒नाम॑ । आप॑श्चिदस्माऽअरमंतदे॒वीःपृथ॒ग्व्रजं॑तीः॒परि॑षीम वृंजन् ॥ त्रीष॒धस्था॑सिंधव॒स्त्रिःक॑वी॒नामु॒तत्रि॑मा॒तावि॒दथे॑षुस॒म्राट् । ऋताव॑री॒र्योष॑णास्ति॒स्रोऽअप्या॒स्त्रिरादि॒वोवि॒दथे॒ पत्य॑मानाः ॥ त्रिरादि॒वःस॑वि॒तर्वार्या॑णिदि॒वेदि॑व॒ऽआसु॑व॒त्रिर्नो॒ऽअह्न॑ः । त्रि॒धातु॑रा॒यऽआसु॑वा॒वसू॑नि॒भग॑त्रातर्धि॑षणे सा॒तये॑धाः ॥ त्रिरादि॒वःस॑वि॒तासो॑षवीति॒राजा॑नामि॒त्रावरु॑णासुपा॒णी । आप॑श्चिदस्य॒रोद॑सीचिदु॒र्वीरत्नं॑भिक्षंतसवि॒तुःस॒वाय॑ ॥ त्रिरु॑त्त॒मादू॒णशा॑रोच॒नानि॒त्रयो॑राज॒ंत्यसु॑रस्यवी॒राः । ऋ॒तावा॑नऽइषि॒रादू॒ळभा॑स॒स्त्रिरादि॒वोवि॒दथे॑संतुदे॒वाः+ ॥ १ ॥(३।५।४) प्रमे॑विवि॒क्वाँऽअ॑विदन्मनी॒षांधे॒नुंचरं॑तीं॒प्रयु॑ता॒मगो॑पां । स॒द्यश्चि॒द्यादु॑दु॒हेभूरि॑धा॒सेरिंद्र॒स्तद॒ग्निः

(३।५।३) नतामिनंतीत्यष्टर्चस्यसूक्तस्यगाथिनोविश्वामित्रोविश्वेदेवास्त्रिष्टुप् (भेदपक्षेविभागःक्रमेणविश्वेदेवाः १ संवत्सरादित्याः ३ सिंधवः १ सविता १ विश्वेदेवाः २ एवमष्टौ) । (३।५।४) प्रमेविविकानितिषळर्चस्यसूक्तस्यविश्वामित्रोविश्वेदेवास्त्रिष्टुप् (भेदपक्षे विश्वेदेवाः ४ अग्निः २ एवंषट्) ।

पनितारौऽअस्याः ॥ इंद्रःसुपूषावृषणासुहस्तादिवोनप्रीताःशशयंदुदुह्रे । विश्वेयदस्यांरणयंतदेवाःप्रवोत्रवसवःसुम्नमश्यां ॥ याजामयोवृष्णऽइच्छंतिशक्तिंनमस्यंतीर्जानतेगर्भमस्मिन् । अच्छापुत्रंधेनवोवावशानामहश्चरंतिबिभ्रतंवपूंषि ॥ अच्छाविवक्मिरोदसीसुमेकेग्राव्णोयुजानोऽअध्वरेमनीषा । इमाऽउतेमनवेभूरिवाराऽऊर्ध्वाभवंतिदर्शतायजत्राः ॥ यातेजिह्वामधुमतीसुमेधाऽअग्नेदेवेषूच्यतऽउरूची । तयेहविश्वाँऽअवसेयजत्रानासादयपाययाचामधूनि ॥ यातेऽअग्नेपर्वतस्येवधारासश्चंतीपीपयद्देवचित्रा । तामस्मभ्यंप्रमतिंजातवेदोवसोरास्वसुमतिंविश्वजन्यां ॥ २ ॥

(३।५।५) धेनुःप्रत्नस्यकाम्यंदुहानांतःपुत्रश्चरतिदक्षिणायाः । आद्योतनिंवहतिशुभ्रयामोषसःस्तोमोऽअश्विनावजीगः ॥ सुयुग्वहंतिप्रतिवामृतेनोर्ध्वाभवंतिपितरेवमेधाः । जरेथामस्मद्विपणेर्मनीषांयुवोरवश्चकृमायातमर्वाक्+ ॥ सुयुग्भिरश्वैःसुवृतारथेनदस्राविमंशृणुतंश्लोकमद्रेः । किमंगवांप्रत्यवर्तिंगमिष्ठाहुर्विप्रासोऽअश्विनापुराजाः+ ॥ आमन्येथामागतंकच्चिदेवैर्विश्वेजनासोऽअश्विनाहवंते । इमाहिवांगोऽऋजीकामधूनिप्रमित्रासोनददुरुस्रोऽअग्रे ॥ तिरःपुरूचिदश्विनारजांस्यांगूषोवांमघवानाजनेषु । एहयातंपथिभिर्देवयानैर्दस्राविमेवांनिधयोमधूनां ॥ ३ ॥ पुराणमोकःसख्यंशिवंवांयुवोर्नराद्रविणंजह्नाव्यां । पुनःकृण्वानाःसख्याशिवानिमध्वामदेमसहनूसमानाः+ ॥ अश्विनावा

(३।५।५) धेनुःप्रत्नस्येतिनवर्चस्यसूक्तस्यविश्वामित्रोश्विनौत्रिष्टुप् ।

युना॑यु॒वंसु॑दक्षानि॒युद्भिं॑श्चस॒जोष॑सायुवाना । नास॑त्याति॒रोऽअ॑ह्न्यंजुषा॒णासोमं॑पिबतम॒स्रिधा॑सुदानू ॥ अ॒श्विना॒परि॑ वा॒मिषः॑पुरू॒चीरी॒युगी॒र्भिर्यत॑माना॒ऽअमृ॑ध्राः । रथो॑हवामृत॒जाऽअद्रि॑जूत॒ःपरि॒द्यावा॑पृथि॒वीया॑तिस॒द्यः+ ॥ अ॒श्विना॑ मधु॒षुत्तं॑मोयु॒वाकु॒ःसोम॒स्तंपा॑त॒माग॑तंदु॒रोणे । रथो॑हवा॒ंभूरि॒वर्प॒ःकरि॑क्रत्सु॒ताव॑तोनिष्कृ॒तमाग॑मिष्ठः ॥ ४ ॥ (३।५।६) मि॒त्रोजना॑न्यातयतिब्रुवा॒णोमि॒त्रोदा॑धारपृथि॒वीमु॒तद्यां । मि॒त्रःकृ॒ष्टीरनि॑मिषा॒भिच॑ष्टेमि॒त्राय॑ह॒व्यंघृ॒तव॑ज्जुहोत ॥ प्रस मि॑त्र॒मर्तो॑ऽअस्तु॒प्रय॑स्वा॒न्यस्त॑ऽआदित्य॒शिक्ष॑तिव्र॒तेन॑ । नह॑न्यते॒नजी॑यते॒त्वोतो॒नैन॒मंहो॑ऽअश्नो॒त्यंति॑तो॒नदू॒रात्+ ॥ अ॒न॒मी॒वास॒ऽइळ॑या॒मदं॑तोमि॒तज्ञं॑वो॒वरि॑म॒न्नापृ॑थि॒व्याः । आ॒दि॒त्यस्य॑व्र॒तमु॑पक्षि॒यंतो॑व॒यंमि॒त्रस्य॑सुम॒तौस्या॑म ॥ अ॒यं मि॒त्रोन॑म॒स्य॑ःसु॒शेवो॒राजा॑सुक्ष॒त्रोऽअ॑जनिष्टवे॒धाः । तस्य॑व॒यंसु॑म॒तौय॒ज्ञिय॒स्यापि॑भ॒द्रेसौ॑मन॒सेस्या॑म ॥ म॒हाँऽआ॑दि॒त्योनम॑सोप॒सद्यो॑यातु॒यज्ञ॑नोगृण॒तेसु॒शेव॑ः । तस्मा॑ऽए॒तत्पन्य॑तमाय॒जुष्ट॑म॒ग्नौमि॒त्राय॑ह॒विरा॑जुहोत ॥ ५ ॥ मि॒त्रस्य॑ चर्षणी॒धृतो॑वोदे॒वस्य॑सान॒सि । द्यु॒म्नंचि॒त्रश्र॑वस्तमं ॥ अ॒भियो॑महि॒नादिवं॑मि॒त्रोब॒भूव॑स॒प्रथा॑ः । अ॒भिश्रवो॑भिःपृथि॒वीं+ ॥ मि॒त्राय॒पंच॑येमिरे॒जना॑ऽअ॒भिष्टि॑शवसे । सदे॒वान्विश्वा॑न्बिभर्ति ॥ मि॒त्रोदे॒वेष्वा॒युषु॒जना॑यवृ॒क्तब॑र्हिषे । इषं॑ऽ

(३।५।६) मित्रोजनानितिनवर्चस्यसूक्तस्यविश्वामित्रोमित्रस्त्रिष्टुप् अंत्याश्चतस्रोगायत्र्यः ।

इष्टव्रताऽअकः ॥ ६ ॥ (३।५।७) इहेहवोमनसाबंधुतानरउशिजोजग्मुरभितानिवेदसा । याभिर्मायाभिःप्रति
जूतिवर्पसःसौधन्वनायज्ञियंभागमानश+ ॥ याभिःशचीभिश्चमसाँऽअपिंशतययाधियागामरिणीतचर्मणः । येनह
रीमनसानिरतक्षततेनदेवत्वमृभवःसमानश ॥ इंद्रस्यसख्यमृभवःसमानशुर्मनोर्नपातोऽअपसोदधन्विरे । सौधन्व
नासोऽअमृतत्वमेरिरेविष्ट्वीशमीभिःसुकृतःसुकृत्यया ॥ इंद्रेणयाथसरथंसुतेसचाँऽअथोवशानांभवथासहश्रिया । न
वःप्रतिमैसुकृतानिवाघतःसौधन्वनाऽऋभवोवीर्याणिच ॥ इंद्रऽऋभुभिर्वाजवद्भिःसमुक्षितंसुतंसोममावृषस्वागभ
स्त्योः । धियेषितोमघवन्दाशुषोगृहेसौधन्वनेभिःसहमत्स्वानृभिः ॥ इंद्रऽऋभुमान्वाजवान्मत्स्वेहनोस्मिन्त्सवनेश
च्यापुरुष्टुत । इमानितुभ्यंस्वसराणियेमिरेव्रतादेवानांमनुषश्चधर्मभिः ॥ इंद्रऽऋभुभिर्वाजिभिर्वाजयन्निहस्तोमंजरि
तुरुपयाहियज्ञियं । शतंकेतेभिरिषिरेभिरायवेसहस्रणीथोऽअध्वरस्यहोमनि ॥ ७ ॥ (३।५।८) उषोवाजेनवाजि
निप्रचेताःस्तोमंजुषस्वगृणतोमघोनि । पुराणीदेवियुवतिःपुरंधिरनुव्रतंचरसिविश्ववारे ॥ उषोदेव्यमर्त्याविभाहिचं
द्ररथासूनृताऽईरयंती । आत्वावहंतुसुयमासोऽअश्वाहिरण्यवर्णांपृथुपाजसोये+ ॥ उषःप्रतीचीभुवनानिविश्वोर्ध्वाति ॥२३॥

(३।५।७) इहेहवइतिसप्तर्चस्यसूक्तस्यविश्वामित्रऋभवःअंत्यानांतिसृणामिंद्रऋभवोजगती । (३।५।८) उषोवाजेनेतिसप्तर्चस्यसूक्तस्यविश्वामित्रउषास्त्रिष्टुप् ।

ष्ठस्य॒मृतं॑स्यके॒तुः । स॒मा॒नमर्थं॑चरणी॒यमा॑नाच॒क्रमि॑वनव्य॒स्याव॑वृत्स्व ॥ अव॒स्यूमे॑वचि॒न्वती॑म॒घोन्यु॒षाया॑ति॒स्वस॑रस्य॒
पत्नीँ । स्वं१॒र्जनँतीसु॒भगाँसु॒दंसा॒ऽआंता॑द्दि॒वःपं॑प्रथ॒ऽआपृं॑थि॒व्याः+ ॥ अच्छा॑वोदे॒वीमु॒षसँ॑विभा॒तींप्रवो॑भरध्वं॒नमं॑सा
सुवृ॒क्तिं । ऊ॒र्ध्वंमं॑धु॒धादि॒विपाजो॑ऽअश्रे॒त्प्ररो॑च॒नारु॑रुचेर॒ण्वसं॑दृक् ॥ ऋ॒तावं॑रीदि॒वोऽअ॒र्कैर॑बो॒ध्यारे॒वती॒रोदं॑सीचि॒त्रमं॑
स्थात् । आ॒य॒तीमं॑ग्नऽउ॒षसं॑विभा॒तींवा॒मम॑षि॒द्रविं॑णं॒भिक्षं॑माणः ॥ ऋ॒तस्यं॑बु॒ध्नऽउ॒षसा॑मिष॒ण्यन्वृषा॑म॒हीरोदं॑सी॒ऽआविं॑वे
श । म॒हीमि॒त्रस्य॒वरु॑णस्यमा॒याचं॒द्रेवं॑भा॒नुंविद॑धेपु॒रुत्रा+ ॥ ८ ॥ (३।५।९) इ॒माऽउं॑वांभृ॒मयो॒मन्यं॑मानायु॒वाव॑ते॒न
तुज्या॑ऽअभूवन् । क्व१॒त्यदिं॑द्रावरु॒णाय॒शोवां॒येनं॑स्मा॒सिनं॒भरं॑थ॒ःसखिं॑भ्यः ॥ अ॒यमुं॑वांपु॒रु॒तमो॑र॒यीयन्छं॑श्वत्त॒मम॑वंसे
जोहवीति । स॒जोषा॑विंद्रावरुणाम॒रुद्भि॑र्दि॒वापृ॑थि॒व्याशृं॑णु॒तंहवं॑मे ॥ अ॒स्मेतदिं॑द्रावरु॒णावसुं॑ष्याद॒स्मेर॒यिर्मं॑रुत॒ःसर्वं॑वी
रः । अ॒स्मान्वरू॑त्रीःशर॒णैर॑वंत्व॒स्मान्होत्रा॒भार॑ती॒दक्षि॑णाभिः ॥ बृहं॑स्पतेजु॒षस्वं॑नोह॒व्यानि॑विश्वदेव्य । रास्व॒रत्ना॑नि
दा॒शुषें॑ । शुचि॑म॒र्कैर्बृह॒स्पतिं॑मध्व॒रेषुं॑नमस्यत । अ॒नाम्योज॒ऽआचं॑के ॥ ९ ॥ वृष॒भंचं॑र्षणी॒नांवि॒श्वरू॑प॒मदा॑भ्यं । बृह॒

(३।५।९) इमाउवामित्यष्टादशर्चस्यसूक्तस्यविश्वामित्रः (अंत्यतृचस्यजमदग्निर्वा) आद्यतिसृणामिंद्रावरुणौचतुर्थ्यादितिसृणांबृहस्पतिःइयंतइत्यादितिसृणांपूषातत्सवितुरित्यादितिसृणांसवितासोमइत्यादितिसृणांसोमआनोइत्यादितिसृणांमित्रावरुणौदेवताःआद्यास्तिस्रस्त्रिष्टुभःशिष्टाःपञ्चदशगायत्र्यः ।

स्पतिं॒वरे॑ण्यं ॥ इ॒यंते॑पूषन्नाघृणेसुष्टु॒तिर्दे॑व॒नव्य॑सी । अ॒स्माभि॑स्तुभ्यं॑शस्यते ॥ तांजु॑षस्व॒गिरं॒मम॑वाज॒यंती॑मवा॒धियं॑ ।
व॒धू॒युरि॑व॒योष॑णां ॥ योविश्वा॒भिवि॒पश्य॑ति॒भुव॑ना॒संच॒पश्य॑ति । सनः॑पू॒षावि॒ताभु॑वत् ॥ तत्स॑वि॒तुर्वरे॑ण्यं॒भर्गो॑दे॒वस्य॑
धीमहि । धियो॒योनः॑प्रचो॒दया॑त् ॥ १० ॥ दे॒वस्य॑सवि॒तुर्व॒यंवा॑ज॒यंत॒ःपुरं॑ध्या । भग॑स्यरा॒तिमी॑महे ॥ दे॒वंनरः॑सवि॒
तारं॒विप्रा॑य॒ज्ञैःसु॑वृ॒क्तिभिः॑ । न॒म॒स्यंति॑धि॒येषि॒ताः+ ॥ सोमो॑जिगातिगातु॒विद्दे॒वाना॑मेतिनिष्कृ॒तं । ऋ॒तस्य॒योनि॑म॒ा
सदं॑ ॥ सोमो॑ऽअ॒स्मभ्यं॑द्वि॒पदे॒चतु॑ष्पदेचप॒शवे॑ । अ॒न॒मी॒वाऽइष॑स्करत् ॥ अ॒स्माक॒मायु॑र्व॒र्धय॑न्न॒भिमा॑ती॒ःसह॑मानः ।
सोमः॑स॒धस्थ॒मास॑दत् ॥ आनो॑मित्रावरुणाघृ॒तैर्गव्यू॑तिमुक्षतं । मध्वा॒रजां॑सिसुक्रतू ॥ उ॒रु॒शंसा॑नमो॒वृधा॑म॒ह्नादक्ष॑स्य
राजथः । द्राघि॑ष्ठाभिःशुचिव्रता ॥ गृ॒णा॒नाज॒मद॑ग्निना॒योना॑वृ॒तस्य॑सीदतं । पा॒तंसोम॑मृतावृधा ॥ ११ ॥ (इतिवैश्वा
मित्रंतृतीयंमंडलंसमाप्तं अत्रसूक्तानि ६२) (४।१।१) त्वांह्य॑ग्ने॒सद॒मित्स॑म॒न्यवो॑दे॒वासो॑दे॒वम॑र॒तिंन्ये॑रि॒रइति॒क्रत्वा॑न्ये
रि॒रे । अम॑र्त्यंयजत॒मर्त्ये॒ष्वादे॒वमादे॑वंजनत॒प्रचे॑तसं॒विश्व॒मादे॑वंजनत॒प्रचे॑तसं ॥ सभ्रात॑रं॒वरु॑णमग्न॒ऽआव॑वृत्स्वदे॒वाँऽ
अच्छा॑सुम॒तीय॒ज्ञव॑नसं॒ज्येष्ठं॑य॒ज्ञव॑नसं । ऋ॒तावा॑नमादि॒त्यंच॑र्षणी॒धृतं॒राजा॑नंचर्षणी॒धृतं॑ ॥ सखे॒सखा॑यम॒भ्याव॑वृत्स्वा॒शुं

वामदेवेचतुर्थेमंडलेपंचानुवाकाः (४।१।१) त्वांह्यग्नइतिविंशत्यृचस्यसूक्तस्यगौतमोवामदेवोग्निर्द्वितीयादिचतसृणामग्निवरुणौत्रिष्टुप्आद्यास्तिस्रःक्रमेणाष्ट्यतिजगतीधृतयः ।

नचक्रंरथ्यैंवरंह्यास्मभ्यंदस्मरंह्यां । अग्नेमृळीकंवरुणेसचांविदोमरुत्सुंविश्वभांनुषु । तोकायंतुजेशुंशुचानशंकृंध्यस्म
भ्यंदस्मशंकृधि ॥ त्वंनोंऽअग्नेवरुणस्यविद्वान्देवस्यहेळोवंयासिसीष्ठाः । यजिंष्ठोवह्नितमःशोशुंचानोविश्वाद्वेषांसिप्र
मुंमुग्ध्यस्मत्+ ॥ सत्वंनोंऽअग्नेवमोभवोतीनेदिंष्ठोऽअस्याऽउषसोव्युंष्टौ । अवंयक्ष्वनोवरुणंररांणोवीहिमृळीकंसुहवों
नऽएधि ॥ १२ ॥ अस्यश्रेष्ठांसुभगंस्यसंदृग्देवस्यचित्रतंमामर्त्येषु । शुचिंघृतंनतप्तमघ्न्यांयाःस्पार्हादेवस्यंमंहनेवधे
नोः+ ॥ त्रिरंस्यतापरमासंतिसत्यास्पार्हादेवस्यजनिंमान्यग्नेः । अनंतेऽअंतःपरिंवीतऽआगाच्छुचिंःशुक्रोऽअर्योरोरुं
चानः ॥ सदूतोविश्वेदभिवंष्टिसद्माहोताहिरंण्यरथोरंसुजिह्वः । रोहिदंश्वोवपुष्योविभावासदांरण्वःपिंतुमतींवसंस
त्+ ॥ सचेंतयन्मनुंषोयज्ञबंधुःप्रतंमह्यारंशनयांनयंति । सक्षेत्यस्यदुर्यांसुसाधन्देवोमर्तस्यसधनित्वमांप ॥ सतूनोंऽ
अग्निर्नयतुप्रजानन्नच्छारत्नंदेवभक्तंयदंस्य । धियायद्विश्वेऽअमृताऽअकृंण्वन्द्यौष्पिताजंनितासत्यमुंक्षन् ॥ १३ ॥
सजांयतप्रथमःपस्त्यांसुमहोबुध्नेरजंसोऽअस्ययोनौं । अपादंशीर्षागुहमांनोऽअंतायोयुंवानोवृषभस्यंनीळे+ ॥ प्रशर्धं
ऽआर्तंप्रथमंविंपन्याँऽऋतस्ययोनांवृषभस्यंनीळे । स्पार्होयुवांवपुष्योविभावांसप्तप्रियासोंजनयंतवृष्णे ॥ अस्माकमत्र
पितरोंमनुष्यांऽअभिप्रसेंदुर्ऋतमांशुषाणाः । अश्मंव्रजाःसुदुघांवव्रेऽअंतरुदुस्राऽआंजन्नुषसोंहुवानाः+ ॥ तेमंर्मृजत
ददृवांसोऽअद्रिंतदेंषामन्येऽअभितोविवोंचन् । पश्वयंत्रासोऽअभिकारमंर्चन्विदंतज्योतिंश्चकृपंतंधीभिः+ ॥ तेगंव्य

तामनंसाहृध्रमुग्धंगायैमानंपरिषंतमाद्रि । दृह्ळंनरोवचसादैव्येनव्रजंगोमंतमुशिजोविवव्रुः ॥ १४ ॥ तेमंन्वतप्रथमं
नामंधेनोस्त्रिःसप्तमातुःपंरमाणिविंदन् । तज्जानतीरभ्यंनूषतव्राऽआविर्भुवदरुणीर्यशसागोः+ ॥ नेशत्तमोदुधितंरो
चंतद्यौरुद्देव्याऽउषसोभानुरर्त । आसूर्योबृहतस्तिष्ठदज्राँऽऋजुमर्तेषुवृजिनाचपश्यंन् ॥ आदित्पश्चाबुंबुधानाव्यंख्य
न्नादिद्रत्नंधारयंतद्युभंक्तं । विश्वेविश्वासुदुर्यासुदेवामित्रंधियेवंरुणसत्यमंस्तु ॥ अच्छांवोचेयशुशुचानमग्निंहोतांरंवि
श्वभंरसंयजिष्ठं । शुच्यूधोंऽअतृणन्नगवामंधोनपूतंपरिंषिक्तमंशोः+ ॥ विश्वैषामदिंतिर्यज्ञियानांविश्वैषामतिंथिर्मानु
षाणां । अग्निर्देवानामवंऽआवृणानःसुंमृळीकोभंवतुजातवेदाः ॥ १५ ॥ (४।१।२) योमर्त्येष्वमृतंऽऋतावांदेवो
देवेष्वंरतिर्निधायिं । होतायजिंष्ठोमह्नाशुचध्यैहव्यैरग्निर्मनुंषऽईरयध्यै ॥ इहत्वंसूंनोसहसोनोऽअद्यजातोजाताँऽउभ
याँऽअंतरंग्ने । दूतऽईयसेयुयुजानऽऋष्वऽऋजुमुष्कान्वृषंणःशुक्राँश्चं ॥ अत्यांवृधस्नूरोहिंताघृतस्नूंऽऋतस्यंमन्येमनंसा
जविंष्ठा । अंतरीयसेऽअरुषायुंजानोयुष्माँश्चंदेवान्विशऽआचमर्तान् ॥ अर्यमणंवरुंणंमित्रमेषामिंद्राविष्णूमरुतोंऽ
अश्विनोत । स्वश्वोंऽअग्नेसुरथःसुराधाऽएदुंवहसुहविषेजनांय ॥ गोमाँऽअग्नेविमाँऽअश्वीयज्ञोनृवत्संखासदमिदंप्रमृ
ष्यः । इळांवाँऽएषोऽअंसुरप्रजावान्दीर्घोरयिःपृंथुबुध्नःसभावान् ॥ १६ ॥ यस्तंऽइध्मंजभरंत्सिष्विदानोमूर्धानंवा

(४।१।२) योमर्त्येष्वितिविंशत्यृचस्यसूक्तस्यवामदेवोग्निस्त्रिष्टुप् ।

ततपंतेत्वाया । भुवस्तस्यस्वतवाँःपायुरग्नेविश्वस्मात्सीमघायतऽउरुष्य ॥ यस्तेभरादन्नियतेचिदन्नंनिशिषन्मंद्रमतिथिमुदीरत् । आदेवयुरिनधत्तेदुरोणेतस्मिन्रयिर्ध्रुवोऽअस्तुदास्वान् ॥ यस्त्वांदोषायऽउषसिप्रशंसात्प्रियंवात्वाकृणवतेहविष्मान् । अश्वोनस्वेदमऽआहेम्यावान्तमंहसःपीपरोदाश्वांसं ॥ यस्तुभ्यमग्नेऽअमृतायदाशद्दुवस्त्वेकृणवतेयतस्रुक् । नसरायाशशमानोवियोषन्नैनमंहःपरिवरदघायोः+ ॥ यस्यत्वमग्नेऽअध्वरंजुजोषोदेवोमर्तस्यसुधितंरराणः । प्रीतेदसद्धोत्रासायविष्ठासामयस्यविधतोवृधासः ॥ १७ ॥ चित्तिमचित्तिंचिनवद्विविद्वान्पृष्ठेववीतावृजिनाचमर्तान् । रायेचनःस्वपत्यायदेवदितिंचरास्वादितिमुरुष्य ॥ कविंशशासुःकवयोदब्धानिधारयंतोदुर्यास्वायोः । अतस्त्वंदृश्याँऽअग्नएतान्पड्भिःपश्येरद्भुताँऽअर्यऽएवैः ॥ त्वमग्नेवाघतेसुप्रणीतिःसुतसोमायविधतेयविष्ठ । रत्नंभरशशमानायघृष्वेपृथुश्चन्द्रमवसेचर्षणिप्राः+ ॥ अधाहयद्वयमग्नेत्वायापड्भिर्हस्तेभिश्चकृमातनूभिः । रथंनक्रंतोऽअपसाभुरिजोर्ऋतंयेमुःसुध्यऽआशुषाणाः+ ॥ अधामातुरुषसःसप्तविप्राजायेमहिप्रथमावेधसोनॄन् । दिवस्पुत्राऽअंगिरसोभवेमाद्रिंरुजेमधनिनंशुचंतः ॥ १८ ॥ अधायथानःपितरःपरासःप्रत्नासोऽअग्नऽऋतमाशुषाणाः । शुचीदयन्दीधितिमुक्थशासःक्षामाभिंदंतोऽअरुणीरपव्रन् ॥ सुकर्माणःसुरुचोदेवयंतोयोनदेवाजनिमाधमंतः । शुचंतोऽअग्निंववृधंतऽइंद्रमूर्वंगव्यंपरिषदंतोऽअग्मन् ॥ आयूथेवक्षुमतिपश्वोऽअख्यद्देवानांयज्जनिमांत्युग्र । मर्तानांचिदुर्वशीरकृप्रन्वृधेचिद

यँऽउपरस्यायोः+ ॥ अकर्मतेस्वपसोऽअभूमऽऋतमवस्रन्नुषसोविभातीः । अनूनमग्निंपुरुधासुश्चंद्रंदेवस्यमर्मृजतश्चा
रुचक्षुः ॥ एतातेऽअग्नऽउचथानिवेधोवोचामकवयेताजुषस्व । उच्छौचस्वकृणुहिवस्यसोनोमहोरायःपुरुवारप्रयंधि
॥ १९ ॥ (४।१।३) आवोराजानमध्वरस्यरुद्रंहोतारंसत्ययजंरोदस्योः । अग्निंपुरातनयित्नोरचित्ताद्धिरण्यरूपमवसे
कृणुध्वं ॥ अयंयोनिश्चकृमायंवयंतेजायेवपत्यऽउशतीसुवासाः । अर्वाचीनःपरिवीतोनिषीदेमाऽउतेस्वपाकप्रतीचीः+ ॥
आशृण्वतेऽअदृपितायमन्मनृचक्षसेसुमृळीकायवेधः । देवायशस्तिममृतायशंसग्रावेवसोतामधुषुद्यमीळे+ ॥ त्वंचि
न्नःशम्याऽअग्नेऽअस्याऽऋतस्यबोध्यृतचित्स्वाधीः । कदातेऽउक्थासधमाद्यानिकदाभवंतिसख्यागृहेते ॥ कथाहत
द्वरुणायत्वमग्नेकथादिवेगर्हसेकन्नऽआगः । कथामित्रायमीह्लुषेपृथिव्यैब्रवःकदर्यम्णेकद्भगाय ॥ २० ॥ कद्धिष्ण्यासु
वृधसानोऽअग्नेकद्वातायप्रतवसेशुभंये । परिज्मनेनासत्यायक्षेब्रवःकदग्नेरुद्रायनृघ्ने+ ॥ कथामहेपुष्टिंभरायपूष्णेकद्रु
द्रायसुमखायहविर्दे । कद्विष्णवऽउरुगायायरेतोब्रवःकदग्नेशरवेबृहत्यै+ ॥ कथाशर्धायमरुतामृतायकथासूरेबृहतेपृ
च्छ्यमानः । प्रतिब्रवोदितयेतुरायसाधादिवोजातवेदश्चिकित्वान्+ ॥ ऋतेनऽऋतंनियतमीळऽआगोरामासचामधु
मत्पक्वमग्ने । कृष्णासतीरुशताधासिनैषाजामर्येणपयसापीपाय ॥ ऋतेनहिष्मावृषभाश्चिदक्तःपुमाँऽअग्निःपयसापृष्ठ्ये

(४।१।३) आवोराजानमितिषोडशर्चस्यसूक्तस्यवामदेवआद्यायारुद्रोद्वितीयादीनामग्निस्त्रिष्टुप् ।

न । अस्पँदमानोऽअचरद्वयोधावृषाशुक्रंदुदुहेपृश्निरूधः ॥ २१ ॥ ऋतेनाद्रिंव्यसन्भिदंतःसमंगिरसोनवंतगोभिः । शुनंनरःपरिषदन्नुषासमाविःस्वरभवज्जातेऽअग्नौ+ ॥ ऋतेनदेवीरमृताऽअमृक्ताऽअर्णोभिरापोमधुमद्भिरग्ने । वाजीनसर्गेषुप्रस्तुभानःप्रसदमित्स्रवितवेदधन्युः ॥ माकस्ययक्षंसदमिद्धुरोगामावेशस्यप्रमिनतोमापेः । माभ्रातुरग्नेऽअनृजोर्ऋणंवेर्मासख्युर्दक्षंरिपोर्भुजेम ॥ रक्षाणोऽअग्नेतवरक्षणेभीरारक्षाणःसुमखप्रीणानः । प्रतिष्फुरविरुजवीड्वंहोजहिरक्षोमहिचिद्वावृधानं+ ॥ एभिर्भवसुमनाऽअग्नेऽअर्कैरिमान्स्पृशमन्मभिःशूरवाजान् । उतब्रह्माण्यंगिरोजुषस्वसंतेशस्तिर्देववाताजरेत ॥ एताविश्वाविदुषेतुभ्यंवेधोनीथान्यग्नेनिण्यावचाँसि । निवचनाकवयेकाव्यान्यशंसिषंमतिभिर्विप्रऽउक्थैः+ ॥ २२ ॥ (४।१।४) कृणुष्वपाजःप्रसितिंनपृथ्वींयाहिराजेवामवाँऽइभेन । तृष्वीमनुप्रसितिंद्रूणानोस्तासिविध्यरक्षसस्तपिष्ठैः ॥ तवभ्रमासऽआशुयापतंत्यनुस्पृशधृषताशोशुचानः । तपूंष्यग्नेजुह्वापतंगानसंदितोविसृजविष्वगुल्काः+ ॥ प्रतिस्पशोविसृजतूर्णितमोभवापायुर्विशोऽअस्याऽअदब्धः । योनोदूरेऽअघशंसोयोऽअंत्यग्नेमाकिष्टेव्यथिरादधर्षीत् ॥ उदग्नेतिष्ठप्रत्यातनुष्वन्य१मित्राँओषतात्तिग्महेते । योनोऽअरातिंसमिधानचक्रेनीचातंधक्ष्यतसंनशुष्कं ॥ ऊर्ध्वोभवप्रतिविध्याध्यस्मदाविष्कृणुष्वदैव्यान्यग्ने । अवस्थिरातनुहियातुजूनांजामिमजामिंप्रमृणीहि

(४।१।४) कृणुष्वेतिपंचदशर्चस्यसूक्तस्यवामदेवोरक्षोहाग्निस्त्रिष्टुप् ।

शत्रून् ॥ २३ ॥ सतेजानातिसुमतिंयविष्ठयऽईवतेब्रह्मणेगातुमैरत् । विश्वान्यस्मैसुदिनानिरायोद्युम्नान्यर्योविदुरो
ऽअभिद्यौत् ॥ सेदग्नेऽअस्तुसुभगःसुदानुर्यस्त्वानित्येनहविषायऽउक्थैः । पिप्रीषतिस्वऽआयुषिदुरोणेविश्वेदस्मैसुदि
नासासदिष्टिः+ ॥ अर्चामितेसुमतिंघोष्यर्वाक्संतेवावाताजरतामियंगीः । स्वश्वास्त्वासुरथामर्जयेमास्मेक्षत्राणिधार
येरनुद्यून्+ ॥ इहत्वाभूर्याचरेदुपत्मन्दोषावस्तर्दीदिवांसमनुद्यून् । क्रीळंतस्त्वासुमनसःसपेमाभिद्युम्नातस्थिवांसोज
नानां ॥ यस्त्वास्वश्वःसुहिरण्योऽअग्नऽउपयातिवसुमतारथेन । तस्यत्राताभवसितस्यसखायस्तऽआतिथ्यमानु
षग्जुजोषत् ॥ २४ ॥ महोरुजामिबंधुतावचोभिस्तन्मापितुर्गोतमादन्वियाय । त्वंनोऽअस्यवचसश्चिकिद्धिहोतर्यवि
ष्ठसुक्रतोदमूनाः ॥ अस्वप्नजस्तरणयःसुशेवाऽअतंद्रासोवृकाऽअश्रमिष्ठाः । तेपायवःसध्र्यंचोनिषद्याग्नेतवनःपांत्वमू
र ॥ येपायवोमामतेयंतेऽअग्नेपश्यंतोऽअंधंदुरितादरक्षन् । ररक्षतान्त्सुकृतोविश्ववेदादिप्संतऽइद्रिपवोनाहदेभुः ॥
त्वयावयंसधन्य१स्त्वोतास्तवप्रणीत्यश्यामवाजान् । उभाशंसासूदयसत्यतातेनुष्ठुयाकृणुह्यह्रयाण ॥ अयातेऽअग्नेस
मिधाविधेमप्रतिस्तोमंशस्यमानंगृभाय । दहाशसोरक्षसःपाह्य१स्मान्द्रुहोनिदोमित्रमहोऽअवद्यात्+ ॥ २५ ॥ इति
तृतीयाष्टकेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ॥ ॥ ॥ ॥

विंशाध्यायेवर्गाः २५ सूक्तानि ११ ऋचः १३५ ॥ त्यागः ॥ विश्वेभ्योदेवेभ्य. संवत्सरादित्येभ्य. ३ सिंधुभ्य. सवित्र. विश्वेभ्योदेवेभ्य. ६ अग्नय. २ अश्विभ्यामि. ९ मित्राय. ९ ऋभुभ्य. ४ इंद्रऋभुभ्य. ३ उषस. ७ इंद्रावरुणाभ्यामि. ३ बृहस्पतय. ३ पूष्णइ. ३ सवित्र. ३ सोमाये. ३ मित्रावरुणाभ्या. ३ अग्नय. अग्नीवरुणाभ्या. ४ अग्नय. ३५ रुद्राये. अग्नय. १५ रक्षोघ्नेग्नय. १५ इतितृतीयेचतुर्थः ॥ ४ ॥

वैश्वानरायवैश्वानरीयंमूर्ध्वंऊष्वेकादशायमिहादौजगतींपंचानुष्टुभौदूतंवोष्टौगायत्रंत्वग्नेमृळाग्नेतमद्यपदपांक्तं पंचमीमहापदपंक्तिरंत्योष्णिक्चतुर्थींषष्ठ्युपांत्यावासप्तम्याःपंचकौमुख्यौतृतीयःसप्तकोनवकश्चाष्टम्याःपंचकः पादश्चतुष्कःसप्तकस्त्रैष्टुभश्चभद्रंषड्यस्त्वांप्रत्यग्निःपंचलिंगोक्तदैवतंत्वेकंप्रत्यग्निरग्निर्होतादशगायत्रंमृषिर्बोध दितिद्वाभ्यांसोमकंसाहदेव्यंमभ्यवदत्पराभ्यामस्याश्विनावायुरयाचतासत्यःसैकंद्रंत्वंमहाँअसिन्नयामेकपदां यंपंथाःसप्तोनासंवादंइंद्रादितिवामदेवानां ॥ १ ॥ ॥ ॥ ॥ ॥

॥ हरिःओम् (४।१।५) वै॒श्वा॒न॒राय॑मी॒ळ्हुषे॑स॒जोषाः॑क॒थादा॑शेमा॒ग्नये॑बृ॒हद्भाः । अनू॑नेनबृह॒ताव॒क्षथे॒नोप॑स्तभाय दुप॒मिन्नरोधः॑ ॥ मानिं॑दत॒यऽइ॒मांमह्यं॑रा॒तिंदे॒वोद॒दौमर्त्या॑यस्व॒धावा॑न् । पाका॑य॒गृत्सो॑ऽअ॒मृत॒ोविचे॑तावैश्वान॒रोनृत॑

(४।१।५) वैश्वानरायेतिपंचदशर्चस्यसूक्तस्यवामदेवोवैश्वानरोग्निस्त्रिष्टुप् ।

मोयह्वोऽअग्निः+ ॥ सामद्विबर्हामहितिग्मभृष्टिःसहस्ररेतावृषभस्तुविष्मान् । पदंनगोरपगूह्ळंविविद्वानग्निर्मह्यंप्रेदुवोचन्मनीषां+ ॥ प्रताँऽअग्निर्बभसत्तिग्मजंभस्तपिष्ठेनशोचिषायःसुराधाः । प्रयेमिनंतिवरुणस्यधामप्रियामित्रस्यचेततोध्रुवाणि ॥ अभ्रातरोनयोषणोव्यंतःपतिरिपोनजनयोदुरेवाः । पापासःसंतोऽअनृताऽअसत्याऽइदंपदमजनतागभीरं+ ॥ १ ॥ इदंमेऽअग्नेकियतेपावकामिनतेगुरुंभारंनमन्म । बृहद्दधाथधृषतागभीरंयह्वंपृष्ठंप्रयसासप्तधातु ॥ तमिन्वे३वसमनासमानमभिक्रत्वापुनतीधीतिरश्याः । ससस्यचर्मन्नधिचारुपृश्नेरग्रेरुपऽआरुपितंजबारु ॥ प्रवाच्यंवचसःकिंमेऽअस्यगुहाहितमुपनिणिग्वदंति । यदुस्रियाणामपवारिवव्रन्पातिप्रियंरुपोऽअग्रंपदंवेः+ ॥ इदमुत्यन्महिमहामनीकंयदुस्रियासचतपूर्व्यंगौः । ऋतस्यपदेऽअधिदीद्यानंगुहारघुष्यद्रघुयद्विवेद ॥ अधद्युतानःपित्रोःसचासामनुतगुह्यंचारुपृश्नेः । मातुष्पदेपरमेऽअंतिषद्गोर्वृष्णःशोचिषःप्रयतस्यजिह्वा+ ॥ २ ॥ ऋतंवोचेनमसापृच्छमानस्तवाशसाजातवेदोयदीदं । त्वमस्यक्षयसियद्धविश्वंदिवियद्द्रविणंयत्पृथिव्यां+ ॥ किंनोऽअस्यद्रविणंकद्धरत्नंविनोवोचोजातवेदश्चिकित्वान् । गुहाध्वनःपरमंयन्नोऽअस्यरेकुपदंननिदानाऽअगन्म ॥ कामर्यादावयुनाकद्धवाममच्छागमेमरघवोनवाजं । कदानोदेवीरमृतस्यपत्नीःसूरोवर्णेनततनन्नुषासः ॥ अनिरेणवचसाफल्ग्वेनप्रतीत्येनकृधुनातृपासः । अधातेऽअग्नेकिमिहावदंत्यनायुधासऽआसतासचंतां ॥ अस्यश्रियेसमिधानस्यवृष्णोवसोरनीकंदमऽआरुरोच ।

रुशद्वसांनःसुदृशीकरूपःक्षितिर्नरायापुरुवारोऽअद्यौत् ॥ ३ ॥ (४।१।६) ऊर्ध्वऽऊषुणोऽअध्वरस्यहोतरग्नेतिष्ठदेवतातायजीयान् । त्वंहिविश्वमभ्यसिमन्मप्रवेधसश्चित्तिरसिमनीषां+ ॥ अमूरोहोतान्यसादिविक्ष्व१ग्निर्मंद्रोविदथेषुप्रचेताः । ऊर्ध्वंभानुंसवितेवाश्रेन्मेतेवधूमंस्तभायदुपद्यां+ ॥ यतासुजूर्णीरातिनीघृताचीप्रदक्षिणिद्देवतातिमुराणः । उदुस्वरुर्नवजानाक्रःपश्वोऽअनक्तिसुधितःसुमेकः ॥ स्तीर्णेबर्हिषिसमिधानेऽअग्नाऽऊर्ध्वोऽअध्वर्युर्जुजुषाणोऽअस्थात् । पर्यग्निःपशुपानहोतात्रिविष्ट्येतिप्रदिवऽउराणः+ ॥ परित्मनामितद्रुरेतिहोताग्निर्मंद्रोमधुवचाऽऋतावा । द्रवंत्यस्यवाजिनोनशोकाभयंतेविश्वाभुवनायदभ्राट् ॥ ४ ॥ भद्रातेऽअग्नेस्वनीकऽसंदृग्घोरस्यसतोविषुणस्यचारुः । नयत्तेशोचिस्तमसावरंतनध्वस्मानस्तन्वी३रेपऽआधुः ॥ नयस्यसातुर्जनितोरवारिनमातरापितरानूचिदिष्टौ । अधामित्रोनसुधितःपावको३ग्निर्दीदायमानुषीषुविक्षु+ ॥ द्विर्यंपंचजीजनन्त्संवसानाःस्वसारोऽअग्निंमानुषीषुविक्षु । उषर्बुधमथर्यो३नदंतंशुक्रंस्वासंपरशुंनतिग्मं+ ॥ तवत्येऽअग्नेहरितोघृतस्नारोहितासऽऋज्वंचःस्वंचः । अरुषासोवृषणऽऋजुमुष्काऽआदेवतातिमह्वंतदस्माः+ ॥ येहत्येतेसहमानाऽअयासस्त्वेषासोऽअग्नेऽअर्चयश्चरंति । श्येनासोनदुवसनासोऽअर्थंतुविष्वणसोमारुतंनशर्धः ॥ अकारिब्रह्मसमिधानतुभ्यंशंसात्युक्थंयजतेव्यूधाः । होतारमग्निंमनुषोनिषेदु

(४।१।६) ऊर्ध्वऊषुणइत्येकादशर्चस्यसूक्तस्यवामदेवोग्निस्त्रिष्टुप् ।

नमस्यंतऽउशिजःशंसमायोः+ ॥ ५ ॥ (४।१।७) अयमिहप्रथमोधायिधातृभिर्होतायजिष्ठोऽअध्वरेष्वीड्यः । यम
प्नवानोभृगवोविरुरुचुर्वनेषुचित्रंविभ्वंविशेविशे ॥ अग्नेकदातऽआनुषग्भुवद्देवस्यचेतनं । अधाहित्वाजगृभ्रिरेमर्ता
सोविक्ष्वीड्यं ॥ ऋतावानंविचेतसंपश्यंतोद्यामिवस्तृभिः । विश्वेषामध्वराणांहस्कर्तारंदमेदमे ॥ आशुंदूतंविवस्वतो
विश्वायश्चर्षणीरभि । आजभ्रुःकेतुमायवोभृगवाणंविशेविशे ॥ तमींहोतारमानुषक्चिकित्वांसंनिषेदिरे । रण्वंपावक
शोचिषंयजिष्ठंसप्तधामभिः ॥ ६ ॥ तंशश्वतीषुमातृषुवनऽआवीतमश्रितं । चित्रंसंतंगुहाहितंसुवेदंकूचिदर्थिनं ॥
ससस्ययद्वियुतासस्मिन्नूधन्नृतस्यधामन्रणयंतदेवाः । महाँऽअग्निर्नमसारातहव्योवेरध्वरायसदमिदृतावा ॥ वेरध्वर
स्यदूत्यानिविद्वानुभेऽअंतारोदसीसंचिकित्वान् । दूतऽईयसेप्रदिवऽउराणोविदुष्टरोदिवऽआरोधनानि ॥ कृष्णंतऽ
एमरुशतःपुरोभाश्चरिष्ण्व१र्चिर्वपुषामिदेकं । यदप्रवीतादधतेहगर्भंसद्यश्चिज्जातोभवसीदुदूतः+ ॥ सद्योजातस्यददृ
शानमोजोयदस्यवातोऽअनुवातिशोचिः । वृणक्तितिग्मामतसेषुजिह्वांस्थिराचिदन्नादयतेविजंभैः ॥ तृषुयदन्नातृषु
णाववक्षतृषुंदूतंकृणुतेयह्वोऽअग्निः । वातस्यमेळिंसचतेनिजूर्वन्नाशुंनवाजयतेहिन्वेऽअर्वा ॥ ७ ॥ (४।१।८) दूतं

(४।१।७) अयमिहेत्येकादशर्चस्यसूक्तस्यवामदेवोग्निस्त्रिष्टुप्आद्याजगतीद्वितीयाद्याःपंचानुष्टुभः । (४।१।८) दूतंवइत्यष्टर्चस्यसूक्तस्यवामदेवोवैश्वानरोग्निर्गायत्री ।

वोविश्ववेदसंहव्यवाहममर्त्यं । यजिष्ठमृंजसेगिरा+ ॥ सहिवेदावसुधितिंमहाँऽआरोधनंदिवः । सदेवाँऽएहवक्षति ॥
सवेददेवऽआनमंदेवाँऽऋतायतेदमे । दातिंप्रियाणिचिद्वसु ॥ सहोतासेदुदूत्यंचिकित्वाँऽअंतरीयते । विद्वाँऽआरो
धनंदिवः+ ॥ तेस्यामयेऽअग्नयेददाशुर्हव्यदातिभिः । यऽईंपुष्यंतऽइंधते ॥ तेरायातेसुवीर्यैःससवांसोविशृण्विरे ।
येऽअग्नादधिरेदुवः ॥ अस्मेरायोदिवेदिवेसंचरंतुपुरुस्पृहः । अस्मेवाजासऽईरतां ॥ सविप्रश्चर्षणीनांशवसामानुषा
णां । अतिक्षिप्रेवविध्यति ॥ ८ ॥ (४।१।९) अग्नेमृळमहाँऽअसियऽईमादेवयुंजनं । इयेथबर्हिरासदं ॥ समानु
षीषुदूळभोविक्षुप्रावीरमर्त्यः । दूतोविश्वेषांभुवत् ॥ ससद्मपरिणीयतेहोतामंद्रोदिविष्टिषु । उतपोतानिषीदति ॥
उतग्नाऽअग्निरध्वरऽउतोगृहपतिर्दमे । उतब्रह्मानिषीदति ॥ वेषिह्यध्वरीयतामुपवक्ताजनानां । हव्याचमानुषाणां ॥
वेषीद्वस्यदूत्यं १ यस्यजुजोषोऽअध्वरं । हव्यंमर्तस्यवोळ्हवे ॥ अस्माकंजोष्यध्वरमस्माकंयज्ञमंगिरः । अस्माकंशृ
णुधीहवं ॥ परितेदूळभोरथोस्माँऽअश्नोतुविश्वतः । येनरक्षसिदाशुषः ॥ ९ ॥ (४।१।१०) अग्नेतमद्याश्वंनस्तो
मैःक्रतुंनभद्रंहृदिस्पृशं । ऋध्यामातऽओहैः ॥ अधाह्यग्नेक्रतोर्भद्रस्यदक्षस्यसाधोः । रथीऋतस्यबृहतोबभूथ ॥

(४।१।९) अग्नेमृळेत्यष्टर्चस्यसूक्तस्यवामदेवोग्निर्गायत्री । (४।१।१०) अग्नेतमद्येत्यष्टर्चस्यसूक्तस्यवामदेवोग्निःपदपंक्तिःपंचमीमहापदपंक्तिःअंत्येद्वेउष्णिहौ ।

एभिर्नोऽअर्कैर्भवानोऽअर्वाङ्स्व१र्णज्योतिः । अग्नेविश्वेभिःसुमनाऽअनीकैः ॥ आभिष्टेऽअद्यगीर्भिर्गृणंतोग्नेदा
शेम । प्रतेदिवोनस्तनयंतिशुष्माः ॥ तवस्वादिष्ठाग्नेसंदृष्टिरिदाचिदह्नऽइदाचिदक्तोः । श्रियेरुक्मोनरोचतऽउ
पाके+ ॥ घृतंनपूतंतनूररेपाःशुचिहिरण्यं । तत्तेरुक्मोनरोचतस्वधावः ॥ कृतंचिद्धिष्मासनेमिद्वेषोग्नऽइनोषिम
र्तात् । इत्थायजमानादृतावः ॥ शिवानःसख्यासंतुभ्रात्राग्नेदेवेषुयुष्मे । सानोनाभिःसदनेसस्मिन्नूधन् ॥ १० ॥
(४।२।१) भद्रंतेऽअग्नेसहसिन्ननीकमुपाकऽआरोचतेसूर्यस्य । रुशद्दृशेददृशेनक्तयाचिदरूक्षितंदृशऽआरूपेऽ
अन्नं ॥ विषाह्यग्नेगृणतेमनीषांखंवेपसातुविजातस्तवानः । विश्वेभिर्यद्वावनःशुक्रदेवैस्तन्नोरास्वसुमहोभूरिमन्म ॥
त्वदग्नेकाव्यात्वन्मनीषास्त्वदुक्थाजायंतेराध्यानि । त्वदेतिद्रविणंवीरपेशाऽइत्थाधियेदाशुषेमर्त्याय ॥ त्वद्वाजीवा
जंभरोविहायाऽअभिष्टिकृज्जायतेसत्यशुष्मः । त्वद्रयिर्देवजूतोमयोभुस्त्वदाशुर्जूजुवाँऽअग्नेऽअर्वा ॥ त्वामग्नेप्रथमंदे
वयंतोदेवंमर्ताऽअमृतमंद्रजिह्वं । द्वेषोयुतमाविवासंतिधीभिर्दमूनसंगृहपतिममूरं ॥ आरेऽअस्मदमतिमारेऽअंहऽआ
रेविश्वांदुर्मतिंयन्निपासि । दोषाशिवःसहसःसूनोऽअग्नेयंदेवऽआचित्सचसेस्वस्ति+ ॥ ११ ॥ (४।२।२) यस्त्वा
मग्नऽइनधतेयतस्रुक्त्रिस्तेऽअन्नंकृणवत्सस्मिन्नहन् । ससुद्युम्नैरभ्यस्तुप्रसक्षत्तवक्रत्वाजातवेदश्चिकित्वान्+ ॥ इध्मंय

(४।२।१) भद्रंतइतिषळर्चस्यसूक्तस्यवामदेवोग्निस्त्रिष्टुप् । (४।२।२) यस्त्वामग्नइतिषळर्चस्यसूक्तस्यवामदेवोग्निस्त्रिष्टुप् ।

स्तैजभरंच्छ्रश्रमाणोमहोऽअग्नेऽअनीकमासपर्यन्। सइधानःप्रतिदोषामुषासंपुष्यन्रयिंसचतेघ्नन्नमित्रान्॥ अग्निरीशेबृहतःक्षत्रियस्याग्निर्वाजस्यपरमस्यरायः। दधातिरत्नंविधतेयविष्ठोव्यानुषङ्मर्त्यायस्वधावान्॥ यच्चिद्धितेपुरुषत्रायविष्ठाचित्तिभिश्चकृमाकच्चिदागः। कृधीष्वं१स्माँऽअदितेरनागान्व्येनांसिशिश्रथोविष्वगग्ने॥ महश्चिदग्नऽएनसोऽअभीकऽऊर्वाद्देवानामुतमर्त्यानां। मातेसखायःसदमिद्रिषामयच्छातोकायतनयायशंयोः+॥ यथाहत्यद्वसवोगौर्यंचित्पदिषिताममुंचतायजत्राः। एवोष्वं१स्मन्मुंचताव्यंहःप्रतार्यग्नेप्रतरंनऽआयुः॥ १२॥ (४।२।३) प्रत्यग्निरुषसामग्रमख्यद्विभातीनांसुमनारत्नधेयं। यातमश्विनासुकृतोदुरोणमुत्सूर्योज्योतिषादेवऽएति॥ ऊर्ध्वंभानुंसवितादेवोऽअश्रेद्द्रप्संदविध्वद्गविषोनसत्वा। अनुव्रतंवरुणोयंतिमित्रोयत्सूर्यंदिव्यारोहयंति॥ यंसीमकृण्वन्तमसेविपृचेध्रुवक्षेमाऽअनवस्यंतोऽअर्थं। तंसूर्यंहरितःसप्तयह्वीःस्पशंविश्वस्यजगतोवहंति॥ वहिष्ठेभिर्विहरन्यासितंतुमवव्ययन्नसितंदेववस्म। दविध्वतोरश्मयःसूर्यस्यचर्मेवावाधुस्तमोऽअप्स्वं१तः+॥ अनायतोऽअनिबद्धःकथायन्न्यङ्ङुत्तानोवपद्यतेन। कयायातिस्वधयाकोददर्शदिवःस्कंभःसमृतःपातिनाकं॥ १३॥ (४।२।४) प्रत्यग्निरुषसोजातवेदाऽअख्यद्देवोरोच

(४।२।३) प्रत्यग्निरितिपंचर्चस्यसूक्तस्यवामदेवोग्निस्त्रिष्टुप्। (४।२।४) प्रत्यग्निरुषसइतिपंचर्चस्यसूक्तस्यवामदेवोग्निस्त्रिष्टुप् (अनयोःसूक्तयोःकेचिदाचार्यालिङ्गोक्तदेवताआहुःताश्चआद्यसूक्तेआद्यानांतिसृणामग्निःचतुर्थ्याःसवितृवरुणमित्राःपंचम्याःसूर्यः अपरसूक्तेक्रमेण-

मानामहोभिः । आनासत्योरुगायारथेनेमंयज्ञमुपनोयातमच्छ ॥ ऊर्ध्वंकेतुंसवितादेवोऽअश्रेज्ज्योतिर्विश्वस्मैभुवनाय
कृण्वन् । आप्राद्यावापृथिवीऽअंतरिक्षंविसूर्योरश्मिभिश्चेकितानः ॥ आवहंत्यरुणीर्ज्योतिषागान्महीचित्रारश्मिभि
श्चेकिताना । प्रबोधयंतीसुवितायदेव्यु१षाऽईयतेसुयुजारथेन ॥ आवांवहिष्ठाऽइहतेवहंतुरथाऽअश्वासऽउषसोव्यु
ष्टौ । इमेहिवांमधुपेयायसोमाऽअस्मिन्यज्ञेवृषणामादयेथां ॥ अनायतो० ॥ १४ ॥ (४।२।५) अग्निर्होतानोऽअ
ध्वरेवाजीसन्परिणीयते । देवोदेवेषुयज्ञियः ॥ परित्रिविष्ट्यध्वरंयात्यग्नीरथीरिव । आदेवेषुप्रयोदधत् ॥ परिवाजप
तिःकविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानिदाशुषे ॥ अयंयःसृंजयेपुरोदैववातेसमिध्यते । द्युमाँऽअमित्रदंभनः ॥
अस्यघावीरऽईवतोग्नेरीशीतमर्त्यः । तिग्मजंभस्यमीळ्हुषः ॥ १५ ॥ तमर्वंतंनसानसिमरुषंनदिवःशिशुं । मर्मृज्यंतेदिवेदि
वे ॥ बोधद्यन्माहरिभ्यांकुमारःसाहदेव्यः । अच्छानहूतऽउदरं ॥ उतत्यायंजताहरींकुमारात्साहदेव्यात् । प्रयंता
सद्यऽआददे ॥ एषवांदेवावश्विनाकुमारःसाहदेव्यः । दीर्घायुरस्तुसोमकः ॥ तंयुवंदेवावश्विनाकुमारंसाहदेव्यं ।
दीर्घायुषंकृणोतन ॥ १६ ॥ (४।२।६) आसत्योयातुमघवाँऽऋजीषीद्रवंत्वस्यहरयऽउपनः । तस्माऽइदंधःसुषुमा ॥३१॥

अग्न्यश्विनःसूर्यउषाअश्व्युषसःसूर्यइत्येवं ज्ञेयाः)। (४।२।५) अग्निर्होतेतिदशर्चस्यसूक्तस्यवामदेवोग्निःसप्तम्यष्टम्योःसोमःअंत्ययोरश्विनौगायत्री । (४।२।६) आसत्योयात्विल्येकविंशत्यृचस्यसूक्तस्यवामदेवइंद्रस्त्रिष्टुप् ।

सुदक्षमिहाभिपित्वंकरतेगृणानः+ ॥ अवस्यशूराध्वनोनांतेस्मिन्नोऽअद्यसवनेमंदध्यै । शंसात्युक्थमुशनेववेधाश्चिकि
तुषेऽअसुर्यायमन्म ॥ कविर्ननिण्यंविदथानिसाधन्वृषायत्सेकंविपिपानोऽअर्चात् । दिवऽइत्थाजीजनत्सप्तकारून
ह्नाचिच्चक्रुर्वयुनागृणंतः ॥ स्व१र्यद्वेदिसुदृशीकमर्कैर्महिज्योतीरुरुचुर्यद्धवस्तोः । अंधातमांसिदुधिताविचक्षेनृभ्यश्च
कारनृतमोऽअभिष्टौ ॥ ववक्षऽइंद्रोऽअमितमृजीष्यु१भेऽआपप्रौरोदसीमहित्वा । अतश्चिदस्यमहिमाविरेच्यभियो
विश्वाभुवनाबभूव ॥ १७ ॥ विश्वानिशक्रोनर्याणिविद्वानपोरिरेचसखिभिर्निकामैः । अश्मानंचिद्येबिभिदुर्वचोभि
र्व्रजंगोमंतमुशिजोविवव्रुः ॥ अपोवृत्रंवव्रिवांसंपराहन्प्रावत्तेवज्रंपृथिवीसचेताः । प्रार्णांसिसमुद्रियाण्यैनोःपतिर्भव
न्छवसाशूरधृष्णो ॥ अपोयदद्रिंपुरुहूतदर्दराविर्भुवत्सरमापूर्व्यंते । सनोनेतावाजमादर्षिभूरिंगोत्रारुजन्नंगिरोभिर्गृ
णानः+ ॥ अच्छाकविंनृमणोगाऽअभिष्टौस्वर्षातामघवन्नाधमानं । ऊतिभिस्तमिषणोद्युम्नहूतौनिमायावानब्रह्मादस्यु
रर्त ॥ आदस्युघ्नामनसायाह्यस्तंभुवत्तेकुत्सःसख्येनिकामः । स्वेयोनौनिषदतंसरूपाविवांचिकित्सदृतचिद्धनारी
॥ १८ ॥ यासिकुत्सेनसरथमवस्युस्तोदोवातस्यहर्योरीशानः । ऋज्रावाजंनगध्यंयुयूषन्कविर्यदहन्पार्यायभूषात् ॥
कुत्सायशुष्णमशुषंनिबर्हीःप्रपित्वेऽअह्नःकुयवंसहस्रा । सद्योदस्यून्प्रमृणकुत्स्येनप्रसूरश्चक्रंवृहतादभीके ॥ त्वंपिप्रुंमृ
गयंशूशुवांसमृजिश्वनेवैदथिनायरंधीः । पंचाशत्कृष्णानिवपःसहस्रात्कंनपुरोजरिमाविदर्दः ॥ सूरऽउपाकेतन्वं१द

धानोवियत्तेचेत्यमृतस्यवर्पः । मृगोनहस्तीतविषीमुषाणःसिंहोनभीमऽआयुधानिविभ्रंत् ॥ इंद्रंकामावसूयंतोऽअग्म
न्त्स्वर्मीह्ळेनसवनेचकानाः । श्रवस्यवःशशमानासऽउक्थैरोकोनरण्वासुदृशीवपुष्टिः+ ॥ १९ ॥ तमिद्वऽइंद्रंसुहवंहुवे
मयस्ताचकारनर्यापुरूणि । योमावतेजरित्रेगध्यंचिन्मक्षूवाजंभरतिस्पार्हराधाः ॥ तिग्मायदंतरशनिःपतातिकस्मि
न्चिच्छूरमुहुकेजनानां । घोरायदर्यसमृतिर्भवात्यधस्मानस्तन्वोबोधिगोपाः+ ॥ भुवोवितावामदेवस्यधीनांभुवःसखावृ
कोवाजसातौ । त्वामनुप्रमतिमाजगन्मोरुशंसोजरित्रेविश्वधस्याः ॥ एभिर्नृभिरिंद्रत्वायुभिष्ट्वामघवद्भिर्मघवन्विश्वऽ
आजौ । द्यावोनद्युम्नैरभिसंतोऽअर्यःक्षपोमदेमशरदश्चपूर्वीः+ ॥ एवेदिंद्रायवृषभायवृष्णेब्रह्माकर्मभृगवोनरथं । नू
चिद्यथानःसख्यावियोषदसन्नऽउग्रोवितातनूपाः+ ॥ नूष्टुतऽइंद्रनूगृणानऽइषंजरित्रेनद्यो३नपीपेः । अकारितेहरि
वोब्रह्मनव्यंधियास्यामरथ्यःसदासाः+ ॥ २० ॥ (४।२।७) त्वंमहाँऽइंद्रतुभ्यंहक्षाऽअनुक्षत्रंमंहनामन्यतद्यौः । त्वं
वृत्रंशवसाजघन्वान्त्सृजःसिंधूँरहिनाजग्रसानान्+ ॥ तवत्विषोजनिमन्रेजतद्यौरेजद्भूमिर्भियसास्वस्यमन्योः । ऋघायं
तसुभ्व१ःपर्वतासऽआर्द्धन्वानिसरयंतऽआपः ॥ भिनद्गिरिंशवसावज्रमिष्णन्नाविष्कृण्वानःसहसानऽओजः । वधी
द्वृत्रंवज्रेणमंदसानःसरन्नापोजवसाहतवृष्णीः ॥ सुवीरस्तेजनितामन्यतद्यौरिंद्रस्यकर्तास्वपस्तमोभूत् । यऽईंजजानस्वर्यं

(४।२।७) त्वंमहानित्येकविंशत्यृचस्यसूक्तस्यवामदेवइंद्रस्त्रिष्टुप्असिक्न्यामित्येकपदाविराट् ।

सुवज्रमनपच्युतंसदसोनभूमं ॥ यऽएकऽइच्च्यावयतिप्रभूमाराजाकृष्टीनांपुरुहूतऽइंद्रः । सत्यमेनमनुविश्वेमदंतिरा
तिंदेवस्यगृणतोमघोनः ॥ २१ ॥ सत्रासोमाऽअभवन्नस्यविश्वेसत्रामदासोबृहतोमदिष्ठाः । सत्राभवोवसुपतिर्वसूनां
दत्रेविश्वाऽअधिथाऽइंद्रकृष्टीः+ ॥ त्वमधप्रथमंजायमानोमेविश्वाऽअधिथाऽइंद्रकृष्टीः । त्वंप्रतिप्रवतऽआशयानम
हिंवज्रेणमघवन्विवृश्चः ॥ सत्राहणंदाधृषिंतुम्रमिंद्रंमहामपारंवृषभंसुवज्रं । हंतायोवृत्रंसनितोतवाजंदातामघानिमघवा
सुराधाः ॥ अयंवृतश्चातयतेसमीचीर्यऽआजिषुमघवाशृण्वऽएकः । अयंवाजंभरतियंसनोत्यस्यप्रियासःसख्येस्याम ॥
अयंशृण्वेऽअधजयन्नुतघ्नन्नयमुतप्रकृणुतेयुधागाः । यदासत्यंकृणुतेमन्युमिंद्रोविश्वंदृळ्हंभयतऽएजदस्मात् ॥ २२ ॥
समिंद्रोगाऽअजयत्संहिरण्यासमश्वियामघवायोहपूर्वीः । एभिर्नृभिर्नृतमोऽअस्यशाकैरायोविभक्तासंभरश्चवस्वः ॥ कि
यत्स्विदिंद्रोऽअध्येतिमातुःकियत्पितुर्जनितुर्योजजान । योऽअस्यशुष्मंमुहुकैरियर्तिवातोनजूतःस्तनयद्भिरभ्रैः+ ॥ क्षि
यंतंत्वमक्षियंतंकृणोतीयर्तिरेणुंमघवासमोहं । विभंजनुरशनिमाँऽइवद्यौरुतस्तोतारंमघवावसौधात् ॥ अयंचक्रमिष
णत्सूर्यस्यन्येतशंरीरमत्ससृमाणं । आकृष्णऽईंजुहुराणोजिघर्तित्वचोबुध्नेरजसोऽअस्ययोनौ ॥ असिक्न्यांयजमानोन
होता ॥ २३ ॥ गव्यंतऽइंद्रंसख्यायविप्राऽअश्वायंतोवृषणंवाजयंतः । जनीयंतोजनिदामक्षितोतिमाच्यावयामोव
तेनकोशं ॥ त्रातानोबोधिददृशानऽआपिरभिख्यातामर्डितासोम्यानां । सखापितापितृतमःपितॄणांकर्तेमुलोकमुश

ऋक्सं.
अ.३अ.५
॥२३॥

मंडलं ४
अनु. २

तेवयोधाः+ ॥ सखीयतामविताबोधिसखागृणानऽइंद्रस्तुवतेवयोधाः । वयंह्यातेचकृमासबाधऽआभिःशमीभिर्महयं
तऽइंद्र ॥ स्तुतऽइंद्रोमघवायद्धवृत्राभूरीण्येकोऽअप्रतीनिहंति । अस्यप्रियोजरितायस्यशर्मन्नकिर्देवावारयंतेनमर्ताः ॥
एवानऽइंद्रोमघवाविरप्शीकरत्सत्याचर्षणीधृदनर्वा । त्वंराजाजनुषांधेह्यस्मेऽअधिश्रवोमाहिनंयज्जरित्रे+ ॥ नूष्टुतऽ
इंद्र० ॥ २४ ॥ (४।२।८) अयंपंथाऽअनुवित्तःपुराणोयतोदेवाऽउदजायंतविश्वे । अतश्चिदाजनिषीष्टप्रवृद्धोमामा
तरममुयापत्तवेकः ॥ नाहमतोनिरयादुर्गहैतत्तिरश्चतापार्श्वान्निर्गमाणि । बहूनिमेऽअकृताकर्त्वानियुध्यैत्वेनसंत्वेन
पृच्छै ॥ परायतींमातरमन्वचष्टननानुगान्यनुनूगमानि । त्वष्टुर्गृहेऽअपिबत्सोममिंद्रःशतधन्यंचम्वोःसुतस्य ॥ किंस
ऽऋधक्कृणवद्यंसहस्रंमासोजभारशरदश्चपूर्वीः । नहीन्वस्यप्रतिमानमस्त्यंतर्जातेषूतयेजनित्वाः ॥ अवद्यमिवमन्यमा
नागुहाकरिंद्रंमातावीर्येणान्यृष्टं । अथोदस्थात्स्वयमत्कंवसानऽआरोदसीऽअपृणाज्जायमानः ॥ २५ ॥ एताऽअर्षंत्यल
लाभवंतीऽऋतावरीरिवसंक्रोशमानाः । एताविपृच्छकिमिदंभनंतिकमापोऽअद्रिंपरिधिंरुजंति ॥ किमुष्विदस्मैनि
विदोभनंतेंद्रस्यावद्यंदिधिषंतऽआपः । ममैतान्पुत्रोमहतावधेनवृत्रंजघन्वाँऽअसृजद्विसिंधून् ॥ ममच्चनत्वायुवतिः

॥२३॥

(४।२।८) अयंपंथाइतित्रयोदशर्चस्यसूक्तस्यवामदेवऋषिःआद्यायाइंद्रऋषिःनहीन्वस्येत्यादिसार्धतिसृणामदितिर्ऋषिकाआद्यायावामदेवोदेवता नाहमतइत्यादिपंचार्धर्चानामंत्यानांषण्णामृचामिंद्रोदेवतानहीन्वस्येतिसार्धतिसृणांवामदेवोदेवतात्रिष्टुप् ।

परासममंच्चनत्वांकुषवांजगारं । ममंच्चिदापःशिशंवेममृड्युर्ममंच्चिदिंद्रःसहसोदंतिष्ठत् ॥ ममंच्चनतेंमघवन्व्यंसोनि
विविध्वाँऽअपहनूंजघानं । अधानिविंद्धऽउत्तंरोबभूवाञ्छिरौंदासस्यसंपिणग्वधेनं ॥ गृष्टिःसंसूवस्थविंरंतवागामंनाधृ
ष्यंवृषभंतुम्रमिंद्रं । अरीह्ळंवत्संचरथांयमातास्वयंगातुंतन्वंऽइच्छमानं ॥ उतमातामंहिषमन्वंवेनदमीत्वांजहतिपुत्रदे
वाः । अथांब्रवीद्वृत्रमिंद्रोंहनिष्यन्त्सखेंविष्णोवितरंविक्रंमस्व ॥ कस्तेंमातरंविधवांमचक्रच्छयुंकस्त्वामंजिघांसच्चरं
तं । कस्तेंदेवोऽअधिमार्डीकऽआसीद्यत्प्राक्षिणाःपितरंपादगृह्यं ॥ अवंर्त्याशुनंऽआंत्राणिपेचेनदेवेषुंविविदेमर्डितारं ।
अपंश्यंजायाममंहीयमानामधांमेश्येनोमध्वाजंभार ॥ २६ ॥ इतितृतीयाष्टकेपंचमोऽध्यायः ॥ ५ ॥ ॥

एकविंशाध्यायेवर्गाः २६ सूक्तानि १४ ऋचः १४८ ॥ त्यागः ॥ वैश्वानरायाग्नय. १५ अग्नय. ५९ सवितृवरुणमित्रेभ्य० सूर्याये. ३ अग्न्यश्विभ्य. सूर्याये. उषस. अश्व्युषोभ्य. सूर्याये. अग्नय. ६ सोमकाये. २ अश्विभ्या. २ इंद्राये. ४२ वामदेवाये. इंद्राये. २ इंद्रवामदेवाभ्या. वामदेवाये. ३ इंद्राये. ६ ॥ इतितृतीयेपंचमः ॥ ५ ॥

एवैकादशानआयातुंयंनःकथोपांत्यस्तिस्रक्रतुदेव्योवांकासुष्टुतिरुपांत्यानुष्टुप्कोअद्याष्टावहंमनुःसप्तांद्याभिस्ति
सृभिरिंद्रमिवांत्मानमृषिस्तुष्टावेंद्रोवात्मानंपरानवाष्टौवाश्येनस्तुतिंर्गर्भेनुपंचांत्याशक्करींत्वायुजेंद्रासोमंवानः

स्तुतौनकिश्चतुर्विंशतिर्दिवश्चित्तृचउपस्यश्चगायत्र्यौष्णिह्यंत्यअनुष्टुभौककुयापंचोनाभीषुपादनिचृदांतूनश्चतुर्विंश
तिरंत्याभ्यामैंद्राश्वौस्तुतौ ॥ १ ॥ ॥ ॥ ॥ ॥ ॥

॥ हरिःओम् ॥ (४।२।९) एवात्वामिंद्रवज्रिन्नत्रविश्वेदेवासःसुहवासऽऊमाः । महामुभेरोदसीवृद्धमृष्वंनिरे
कमिद्वृणतेवृत्रहत्ये ॥ अवासृजंतजिव्रयोनदेवाभुवःसम्राळिंद्रसत्ययोनिः । अहन्नहिंपरिशयानमर्णःप्रवर्तनीररदोवि
श्वधेनाः ॥ अतृप्णुवंतंवियतमबुध्यमबुध्यमानंसुषुपाणमिंद्र । सप्तप्रतिप्रवतऽआशयानमहिंवज्रेणविरिणाऽअपर्व
न् ॥ अक्षोदयच्छवसाक्षामबुध्नंवार्णवातस्तविषीभिरिंद्रः । दृह्वान्यौभ्नादुशमानऽओजोवाभिनत्ककुभःपर्वतानां ॥
अभिप्रदद्रुर्जनयोनगर्भंरथाऽइवप्रययुःसाकमद्रयः । अतर्पयोविसृतऽउब्जऽऊर्मीन्त्वंवृताँऽअरिणाऽइंद्रसिंधून् ॥ १ ॥
त्वंमहीमवनिंविश्वधेनांतुर्वीतयेवय्यायक्षरंतीं । अरमयोनमसैजदर्णःसुतरणाँऽअकृणोरिंद्रसिंधून् ॥ प्राग्रुवोनभन्वो३
नवक्राध्वस्राऽअपिन्वद्युवतीरृतज्ञाः । धन्वान्यज्राँऽअपृणक्तृषाणाँऽअधोगिंद्रःस्तर्यो३दंसुपत्नीः ॥ पूर्वीरुषसःश
रदश्चगूर्तावृत्रंजघन्वाँऽअसृजद्विसिंधून् । परिष्ठिताऽअतृणद्बद्बधानाःसीराऽइंद्रःस्रवितवेपृथिव्या ॥ वम्रीभिःपुत्र
मग्रुवोऽअदानंनिवेशनाद्धरिवऽआजभर्थ । व्यं१धोऽअख्यदहिमाददानोनिर्भूदुखच्छित्समरंतपर्व ॥ प्रतेपूर्वाणिकर

(४।२।९) एवात्वामित्येकादशर्चस्यसूक्तस्यवामदेवइंद्रस्त्रिष्टुप् ।

णानिविप्राविद्वाँऽआहविदुश्चेकरांसि । यथायथावृष्ण्यानिस्वगूर्तापांसिराजन्नर्याविवेषीः ॥ नूष्टुतऽइंद्र० ॥ २ ॥ (४।२।१०) आनऽइंद्रोदूरादानऽआसादभिष्टिकृदवसेयासदुग्रः । ओजिष्ठेभिर्नृपतिर्वज्रबाहुःसंगेसमत्सुतुर्वणिःपृतन्यून्+ ॥ आनऽइंद्रोहरिभिर्यात्वच्छार्वाचीनोवसेराधसेच । तिष्ठातिवज्रीमघवाविरप्शीमंयज्ञमनुनोवाजसातौ ॥ इमंयज्ञंत्वमस्माकमिंद्रपुरोदधत्सनिष्यसिक्रतुंनः । श्वघ्नीवंवज्रिन्त्सनयेधनानांत्वयावयमर्यऽआजिंजयेम ॥ उशन्नुषुणःसुमनाऽउपाकेसोमस्यनुसुषुतस्यस्वधावः । पाऽइंद्रप्रतिभृतस्यमध्वःसमंधसाममदःपृष्ठ्येन ॥ वियोररप्शऽऋषिभिर्नवेभिर्वृक्षोनपक्वःसृण्योनजेता । मर्योनयोषामभिमन्यमानोच्छाविवक्मिपुरुहूतमिंद्रं ॥ ३ ॥ गिरिर्नयःस्वतवाँऽऋष्वऽइंद्रःसनादेवसहसेजातऽउग्रः । आदर्तावज्रंस्थविरंनभीमऽउद्नेवकोशंवसुनान्यृष्टं ॥ नयस्यवर्ताजनुषान्वस्तिनराधसऽआमरीतामघस्य । उद्वावृषाणस्तविषीवऽउग्रास्मभ्यंदद्धिपुरुहूतरायः+ ॥ ईक्षेरायःक्षयस्यचर्षणीनामुतव्रजमपवर्तासिगोनां । शिक्षानरःसमिथेषुप्रहावान्वस्वोराशिमभिनेतासिभूरिं ॥ कयातच्छृण्वेशच्याशचिष्ठोययाकृणोतिमुहुकाचिदृष्वः । पुरुदाशुषेविचयिष्ठोऽअंहोथादधातिद्रविणंजरित्रे+ ॥ मानोमर्धीराभरादद्धितन्नःप्रदाशुषेदातवेभूरियत्ते । नव्येदेष्णेशस्तेऽअस्मिन्तऽउक्थेप्रब्रवामवयमिंद्रस्तुवंतः ॥ नूष्टुतऽइंद्र० ॥ ४ ॥ (४।२।११) आयात्विंद्रोव

(४।२।१०) आनइंद्रइत्येकादशर्चस्यसूक्तस्यवामदेवइंद्रस्त्रिष्टुप् । (४।२।११) आयात्विंद्रइत्येकादशर्चस्यसूक्तस्यवामदेवइंद्रस्त्रिष्टुप् ।

सऽउपनऽइहस्तुतःसधमादस्तुशूरः । वावृधानस्तविषीर्यस्यपूर्वीर्द्यौर्नक्षत्रमभिभूतिपुष्यात् ॥ तस्येदिहस्तवथवृष्ण्यानितुविद्युम्नस्यतुविराधसोनॄन् । यस्यक्रतुर्विदथ्यो३नसम्राट्साह्वान्तरुत्रोऽअभ्यस्तिकृष्टीः+ ॥ आयात्विंद्रोदिवऽआपृथिव्यामक्षूसमुद्रादुतवापुरीषात् । स्वर्णरादवसेनोमरुत्वान्परावतोवासदनादृतस्य ॥ स्थूरस्यरायोबृहतोयऽईशेतमुष्टवामविदथेष्विंद्रं । योवायुनाजयतिगोमतीषुप्रधृष्णुयानयतिवस्योऽअच्छ ॥ उपयोनमोनमसिस्तभायन्नियर्तिवाचंजनयन्यजध्यै । ऋंजसानःपुरुवारऽउक्थैरैंद्रंकृण्वीतसदनेषुहोता ॥ ५ ॥ धिषायदिधिषण्यंतःसरण्यान्त्सदंतोऽअद्रिमौशिजस्यगोहे । आदुरोषाःपास्त्यस्यहोतायोनोमहान्त्संवरणेषुवह्निः ॥ सत्रायदींभार्वरस्यवृष्णःसिषक्तिशुष्मःस्तुवतेभराय । गुहायदीमौशिजस्यगोहेप्रयद्धियेप्रायसेमदाय ॥ वियद्वरांसिपर्वतस्यवृण्वेपयोभिर्जिन्वेऽअपांजवांसि । विदद्गौरस्यगवयस्यगोहेयदीवाजायसुध्यो३वहंति ॥ भद्रातेहस्तासुकृतोतपाणीप्रयंतारास्तुवतेराधऽइंद्र । कातेनिषत्तिःकिमुनोममत्सिकिंनोदुदुहर्षसेदातवाऽउ ॥ एवावस्वऽइंद्रःसत्यःसम्राड्ढंतावृत्रंवरिवःपूरवेकः । पुरुष्टुतक्रत्वानःशग्धिरायोभक्षीयतेवसोदैव्यस्य ॥ नूष्टुतऽइंद्र० ॥ ६ ॥ (४।३।१) यन्नऽइंद्रोजुजुषेयच्चवष्टितन्नोमहान्करतिशुष्म्याचित् । ब्रह्मस्तोमंमघवासोममुक्थायोऽअश्मानंशवसाबिभ्रदेति ॥ वृषावृषंधिंचतुरश्रिमस्यन्नुग्रोबाहुभ्यांनृ

(४।३।१) यन्नइंद्रइत्येकादशर्चस्यसूक्तस्यवामदेवइंद्रस्त्रिष्टुप् ।

त॑म॒ःशची॑वान् । श्रि॒येपरु॑ष्णीमु॒षमा॑ण॒ऽऊर्णा॒यस्या॒ःपर्वा॑णिस॒ख्याय॑वि॒व्ये+ ॥ योदे॒वोदे॒वत॑मो॒जाय॑मानोम॒होवाजे॑भि
र्म॒हद्भि॑श्च॒शुष्मैः॑ । दधा॑नो॒वज्रं॑बा॒ह्वोरु॒शंतं॒द्याम॑मे॑नरेजय॒त्प्रभूम॑ ॥ विश्वा॒रोधां॑सिप्र॒वत॑श्चपू॒र्वीर्द्यौर्ऋ॒ष्वाज्जनि॑मन्रेजत॒
क्षाः । आमा॒तरा॒भर॑तिशु॒ष्म्यागोर्नृ॒वत्परि॑ज्मन्नोनुवंत॒वाताः॑ ॥ तातू॑तऽइंद्रम॒हतोम॒हानि॒विश्वे॒ष्वित्सव॑नेषुप्र॒वाच्या॑ ।
यच्छू॑रधृष्णोधृष॒तादधृ॒ष्वानहि॒ंवज्रे॑ण॒शव॒साविवे॑षीः ॥ ७ ॥ तातू॑तेस॒त्यातु॑विनृम्ण॒विश्वा॒प्रधे॒नवः॑सिस्र॒तेवृष्ण॒ऽऊध्नः॑ ।
अधा॑ह॒त्वद्वृ॑षमणोभिया॒नाःप्रसिंध॑वो॒जव॑साचक्रमंत ॥ अत्राह॑तेहरिव॒स्ताऽउ॑दे॒वीरवो॑भिरिंद्रस्तवंत॒स्वसा॑रः । यत्सी॒म
नु॒प्रमु॒चोब॑द्बधा॒नादी॒र्घाम॑नु॒प्रसि॑तिंस्यंद॒यध्यै॑ ॥ पि॒पी॒ळेऽअं॒शुर्मद्यो॒नसिंधु॒रात्वा॒शमी॑शशमा॒नस्य॒शक्तिः॑ । अ॒स्म॒द्र्यं॑क्शुशु
चा॒नस्य॑यम्याऽआ॒शुर्न॑र॒श्मिंतु॒व्योज॑सं॒गोः+ ॥ अ॒स्मेवर्षि॑ष्ठाकृणुहि॒ज्येष्ठा॑नृ॒म्णानि॑स॒त्रास॑हुरे॒सहां॑सि । अ॒स्मभ्यं॑वृ॒त्रासु॒ह
ना॑निरंधिज॒हिवध॑र्व॒नुषो॒मर्त्य॑स्य ॥ अ॒स्माक॒मित्सुशृ॑णुहि॒त्वमिं॑द्रा॒स्मभ्यं॑चि॒त्राँऽउप॑माहि॒वाजा॑न् । अ॒स्मभ्यं॒विश्वा॑ऽइष
ण॒ःपुरं॑धीर॒स्माकं॒सुम॑घवन्बोधिगो॒दाः+ ॥ नूष्टु॒तऽइं॑द्र॒० ॥ ८ ॥ (४।३।२) क॒थाम॒हाम॑वृध॒त्कस्य॒होतु॑र्य॒ज्ञंजु॑षा॒णोऽअ॒
भिसोम॒मूधः॑ । पिब॑न्नुशा॒नोजु॒षमा॑णो॒ऽअंधो॑वव॒क्षऽऋ॒ष्वःशुं॑च॒तेधना॑य ॥ कोऽअ॑स्यवी॒रःस॑ध॒माद॑माप॒समा॑नंशसुम॒ति
भि॒ःकोऽअ॑स्य । कद॑स्यचि॒त्रंचि॑किते॒कदू॒तीवृ॒धेभु॑वच्छशमा॒नस्य॒यज्योः॑ ॥ क॒थाशृ॑णोतिहू॒यमा॑न॒मिंद्रः॑क॒थाशृ॒ण्वन्नव॑सा

(४।३।२) कथामहामित्येकादशर्चस्यसूक्तस्यवामदेवऋषिरिंद्रोदेवतात्रिष्टुप् (अंत्यानांतिसृणामृतंदेवतावा) ।

Digitization by eGangotri. Funding MoE-Delhi

मस्यवेद । काऽअ॑स्यपूर्वी॑रुप॑मातयोहक॒थै॑नमाहुःपपु॑रिं॑जरि॒त्रे+ ॥ क॒थास॒बाधःशशमा॒नोऽअ॑स्य॒नश॑द॒भिद्रवि॑ण॒ंदी
ध्या॑नः । दे॒वोभु॑व॒न्नवे॑दामऽऋ॒ता॒नां॑नमो॑जगृ॒भ्वाँऽअ॒भियज्जुजो॑षत् ॥ क॒थाकद॒स्याऽउ॒षसो॒व्यु॑ष्टौदे॒वोमर्त॑स्यस॒ख्यं॑जु॑
जोष । क॒थाकद॑स्यस॒ख्यं॑सखि॑भ्यो॒येऽअ॑स्मि॒न्काम॑सु॒युज॑तत॒स्रे+ ॥ ९ ॥ किमाद॑मत्रं॑स॒ख्यं॑सखि॑भ्यःक॒दानुते॑भ्रा॒त्रंप्रब्र॑
वाम । श्रि॒येसु॒दृशो॒वपु॑रस्य॒सर्गाः॒स्व॑१र्णचि॒त्रत॑ममि॒षऽआगोः+ ॥ द्रुहं॒जिघां॑सन्ध्व॒रस॑मनि॒द्रांतेति॑क्तेति॒ग्मातु॒जसे॒ऽअ
नीका । ऋ॒णाचि॒द्यत्र॑ऽऋण॒यान॑उ॒ग्रोदू॒रेऽअज्ञा॑ताऽउ॒षसो॑बबा॒धे+ ॥ ऋ॒तस्य॒हिशु॒रुधः॒सं॑तिपू॒र्वीर्ऋ॒तस्य॑धी॒तिर्वृ॑जि॒नानि॑
हंति । ऋ॒तस्य॒श्लोको॑बधि॒रात॑तर्द॒कर्णा॑बु॒धानः॑शु॒चमा॑नऽआ॒योः+ ॥ ऋ॒तस्य॑दृ॒ळ्हाध॒रुणा॑निसं॑तिपु॒रूणि॑चं॒द्रावपु॑षे॒वपू॑
षि । ऋ॒तेन॑दी॒र्घमि॑षण॑त॒पृक्ष॑ऽऋ॒तेन॒गाव॑ऽऋ॒तमावि॑वेशुः ॥ ऋ॒तं॑ये॒मानऽऋ॒तमिद्व॑नोत्यृ॒तस्य॒शुष्म॑स्तुर॒याऽउ॑ग॒व्युः ।
ऋ॒ताय॑पृ॒थ्वीब॑हु॒लेग॑भी॒रेऽऋ॒ताय॑धे॒नूप॑र॒मेदु॑हाते ॥ नूष्टु॒तऽइंद्र॒० ॥ १० ॥ (४।३।३) कासु॑ष्टु॒तिःशव॑सःसू॒नुमिंद्र॑म
र्वा॑ची॒नंराध॑स॒ऽआव॑वर्तत् । द॒दिर्हि॑वी॒रोगृ॑ण॒तेवसू॑नि॒सगोप॑तिर्नि॒ष्षिधां॑नोजनासः ॥ सवृ॑त्र॒हत्ये॒हव्य॒ःसऽईड्य॒ःससुष्टु॑
त॒ऽइंद्र॑ःस॒त्यरा॑धाः । सयाम॒न्नाम॒घवा॒मर्त्या॑यब्रह्मण्य॒तेसुष्व॑ये॒वरि॑वोधात् ॥ तमिन्नरो॒विह्व॑यंतेसमी॒केरि॑रि॒क्वांस॒स्त॒न्वः॑
कृण्वत॒त्रां । मि॒थोयत्त्या॒गमु॒भया॑सो॒ऽअग्म॒न्नर॑स्तो॒कस्य॒तन॑यस्यसा॒तौ+ ॥ ऋ॒तूयं॑ति॑क्षि॒तयो॒योग॑ऽउग्राशुषा॒णासो॑मि॒थो

(४।३।३) कासुष्टुतिरित्येकादशर्चस्यसूक्तस्यवामदेवइंद्रस्त्रिष्टुप्दशम्यनुष्टुप् ।

ऽअर्णसातौ । संयद्विशोववृत्रंतयुध्माऽआदिन्नेमऽइंद्रयंतेऽअभीके ॥ आदिद्धनेमऽइंद्रियंयजंतऽआदित्पक्तिःपुरोळा
शंरिरिच्यात् । आदित्सोमोविपपृच्यादसुष्वीनादिज्जुजोषवृषभंयजध्यै ॥ ११ ॥ कृणोत्यस्मैवरिवोयऽइत्थेंद्रायसोम
मुशतेसुनोति । सध्रीचीनेनमनसाविवेनन्तमित्सखायंकृणुतेसमत्सु ॥ यऽइंद्रायसुनवत्सोममद्यपचात्पक्तीरुतभृज्जा
तिधानाः । प्रतिमनायोरुचथानिहर्यन्तास्मिन्दधद्वृषणंशुष्ममिंद्रः ॥ यदासमर्यंव्यचेदृघावादीर्घयदाजिमभ्यख्यद
र्यः । अचिक्रदद्वृषणंपत्न्यच्छादुरोणऽआनिशितंसोमसुद्भिः ॥ भूयसावस्नमचरत्कनीयोविक्रीतोऽअकानिषंपुनर्यन् ।
सभूयसाकनीयोनारिरेचीद्दीनादक्षाविदुहंतिप्रवाणं+ ॥ कऽइमंदशभिर्ममेंद्रंक्रीणातिधेनुभिः । यदावृत्राणिजंघनद
थैनंमेपुनर्ददत् ॥ नूष्टुतऽइंद्र० ॥ १२ ॥ (४।३।४) कोऽअद्यनर्योदेवकामऽउशन्निंद्रस्यसख्यंजुजोष । कोवामहेव
सेपायीयसमिद्धेऽअग्नौसुतसोमऽईट्टे ॥ कोनानामवचसासोम्यायमनायुर्वाभवतिवस्तऽउस्राः । कऽइंद्रस्ययुज्यंकःसं
खित्वंकोभ्रात्रंवष्टिकवयेकऽऊती+ ॥ कोदेवानामवोऽअद्यावृणीतेकऽआदित्याँऽअदितिंज्योतिरीट्टे । कस्याश्विना
विंद्रोऽअग्निःसुतस्यांशोःपिबंतिमनसाविवेनं ॥ तस्माऽअग्निर्भारतःशर्मयंसज्ज्योक्पश्यात्सूर्यमुच्चरंतं । यऽइंद्रायसुन
वामेत्याहनरेनर्यायनृतमायनृणां+ ॥ नतंजिनंतिबहवोनदभ्राऽउर्वस्माऽअदितिःशर्मयंसत् । प्रियःसुकृत्प्रियऽइंद्रेम

(४।३।४) कोअद्येत्यष्टर्चस्यसूक्तस्यवामदेवइंद्रस्त्रिष्टुप् ।

ना॒युःप्रि॒यःसु॑प्रा॒वीःप्रि॒योऽअ॑स्यसो॒मी+ ॥ १३ ॥ सु॒प्रा॒व्यः॑प्रा॒शु॒षाळे॒षवी॒रःसुष्वेः॑प॒क्तिंकृ॑णु॒तेके॒व॒लेंद्रः॑ । नासु॑ष्वेरा॒पिर्नसखा॒नजा॒मिर्दु॑ष्प्रा॒व्यो॑वहं॒तेदवा॑चः ॥ नरे॒वतां॑प॒णिनां॑स॒ख्यमिंद्रोऽसु॑न्वतासुत॒पाःसंगृ॑णीते । आस्य॒वेदः॑खि॒दति॒हंति॑न॒ग्नंवि॑सुष्व॑येप॒क्तये॑केव॑लोभूत् ॥ इंद्रं॒परे॑वरे॑मध्य॒मास॒ऽइंद्रं॒यांतो॑वसि॑तास॒ऽइंद्रं॑ । इंद्रं॑क्षि॒यंत॑ऽउ॒तयुध्य॑माना॒ऽइंद्रं॒नरो॑वाज॒यंतो॑हवंते ॥ १४ ॥ (४।३।५) अ॒हंमनु॑रभवं॒सूर्य॑श्चा॒हंक॒क्षीवाँ॒ऽऋषि॑रस्मि॒विप्रः॑ । अ॒हंकुत्सं॑मार्जुने॒यंन्यृं॑जे॒हंक॒विरु॒शना॒पश्य॑तामा ॥ अ॒हंभूमि॑मददा॒मार्या॑या॒हंवृष्टिं॑दा॒शुषे॒मर्त्या॑य । अ॒हम॒पोऽअ॑नयंवाव॒शाना॒ममं॑दे॒वासो॒ऽअनु॒केत॑मायन् ॥ अ॒हंपुरो॑मंदसा॒नोव्यै॑रं॒नव॑सा॒कंन॑व॒तीःशंब॑रस्य । श॒त॒त॒मंवे॒श्यं॑स॒र्वता॑ता॒दिवो॑दासमतिथि॒ग्वंयदाव॑ं ॥ प्रसुषविभ्यो॑मरु॒तोविर॑स्तु॒प्रश्ये॒नःश्ये॒नेभ्य॑ऽआ॒शुप॑त्वा । अ॒च॒क्रया॒यत्स्व॒धया॑सुप॒र्णोह॒व्यंभर॒न्मन॑वेदे॒वजु॑ष्टं ॥ भर॒द्यदि॒विरतो॒वेवि॑जानःप॒थोरु॒णामनो॑जवाऽअसर्जि । तूयं॑ययौ॒मधु॑नासो॒म्येनो॒तश्रवो॑विविदेश्ये॒नोऽअत्र॑ ॥ ऋ॒जी॒पीश्ये॒नोदद॑मानोऽअं॒शुंप॑रा॒वतः॑शकु॒नोमं॒द्रंमद॑ं । सोमं॑भरद्दादृहा॒णोदे॒वावा॑न्दि॒वोऽअ॒मुष्मा॒दुत्त॑रादा॒दाय॑ ॥ आ॒दाय॑श्ये॒नोऽअ॑भर॒

(४।३।५) अहंमनुरितिसप्तर्चस्यसूक्तस्यवामदेवःआद्यानांतिसृणामात्मादेवताअंत्यानांचतसृणांश्येनस्त्रिष्टुप् (आद्यतृचेवामदेवेंद्रयोर्ऋषित्वविकल्पमाहुःकेचित्) ।

त्सोमंसहस्त्रंसवाँऽअयुतंचसाकं । अत्रापुरंधिरजहादरातीर्मदेसोमस्यमूराऽअमूरः ॥ १५ ॥ (४।३।६) गर्भेनुसन्नन्वैषामवेदमहंदेवानांजनिमानिविश्वा । शतंमापुरऽआयसीररक्षन्नधश्येनोजवसानिरदीयं ॥ नघासमामपजोषंजभाराभीमासत्वक्षसावीर्येण । ईर्मापुरंधिरजहादरातीरुतवाताँऽअतरच्छूशुवानः ॥ अवयच्छ्येनोऽअस्वनीदधद्योर्विंयद्यदिवातंऽऊहुःपुरंधिं । सृजद्यदस्माऽअवहक्षिपज्ज्यांकृशानुरस्तामनसाभुरण्यन्+ ॥ ऋजिप्यऽईमिंद्रावतोनभुज्युंश्येनोजंभारबृहतोऽअधिष्णोः । अंतःपततपतत्र्यस्यपर्णमधयामनिप्रसितस्यतद्वेः+ ॥ अधश्वेतंकलशंगोभिरक्तमापिप्यानंमघवाशुक्रमंधः । अध्वर्युभिःप्रयतंमध्वोऽअग्रमिंद्रोमदायप्रतिधत्पिबध्यैशूरोमदायप्रतिधत्पिबध्यै ॥ १६ ॥ (४।३।७) त्वायुजातवतत्सोमसख्यऽइंद्रोऽअपोमनवेसस्तुतस्कः । अहन्नहिमरिणात्सप्तसिंधूनपावृणोदपिहितेवखानि ॥ त्वायुजानिखिदत्सूर्यस्येंद्रश्चक्रंसहसासद्यऽइंदो । अधिष्णुनाबृहतावर्तमानंमहोद्रुहोऽअपविश्वायुधायि ॥ अहन्निन्द्रोऽअदहदग्निरिंदोपुरादस्यून्मध्यंदिनादभीके । दुर्गेदुरोणेक्रत्वानयातांपुरूसहस्त्राशर्वानिबर्हीत् ॥ विश्वस्मात्सीमधमाँऽइंद्रदस्यून्विशोदासीरकृणोरप्रशस्ताः । अबाधेथाममृणतंनिशत्रूनविन्देथामपचितिंवधत्रैः ॥ एवासत्यंम

(४।३।६) गर्भेन्वितिपंचर्चस्यसूक्तस्यवामदेवःश्येनस्त्रिष्टुवंत्याशक्करी (परानवाष्टौवेत्यनुक्रमण्यामुक्तेरधश्वेतमित्यस्यांपाक्षिकींद्रदेवता यदिश्येनदेवतायाअष्टर्चत्वंस्वीकृतंचेत्) । (४।३।७) त्वायुजेतिपंचर्चस्यसूक्तस्यवामदेवइंद्रस्त्रिष्टुप् (इंद्रासोमौवादेवते) ।

घवानायुवंतदिंद्रश्चसोमोर्वमश्व्यंगोः । आर्दर्दृतमपिंहितान्यश्नांरिरिचथुःक्षाश्चित्ततृदाना+ ॥ १७ ॥ (४।३।१८)
आनंःस्तुतऽउपवाजेभिरूतीऽइंद्रंयाहिहरिंभिर्मदसानः । तिरश्चिंदुर्यःसवनापुरूण्यांगूषेभिर्गृणानःसत्यराधाः ॥ आ
हिष्मायातिनर्यश्चिकित्वान्हूयमानःसोतृभिरुपंयज्ञं । स्वश्वोयोऽअभीरुर्मन्यमानःसुष्वाणेभिर्मदतिसंहवीरैः+ ॥ श्रा
वयेदस्यकर्णावाजयध्यैजुष्टामनुप्रदिशंमंदयध्यै । उद्वावृषाणोराधसेतुविष्मान्करन्नऽइंद्रःसुतीर्थाभयंच ॥ अच्छायो
गंतानाधमानमूतीऽइत्थाविप्रंहवमानंगृणंतं । उपत्मनिदधानोधुर्या३शून्सहस्राणिशतानिवज्रंबाहुः ॥ त्वोतासोमघ
वन्निंद्रविप्रावयंतेस्यामसूरयोगृणंतः । भेजानासोबृहद्दिवस्यरायऽआकाय्यस्यदावनेपुरुक्षोः+ ॥ १८ ॥ (४।३।१९)
नकिरिंद्रत्वदुत्तरोनज्यायाँऽअस्तिवृत्रहन् । नकिरेवायथात्वं+ ॥ सत्रातेऽअनुकृष्टयोविश्वाचक्रेववावृतुः । सत्रामहाँऽ
असिश्रुतः+ ॥ विश्वेचनेदनात्वादेवासऽइंद्रयुयुधुः । यदहानक्तमातिरः ॥ यत्रोतबाधितेभ्यश्चक्रंकुत्सायुयुध्यते ।
मुषायऽइंद्रसूर्यं ॥ यत्रदेवाँऽऋघायतोविश्वाँऽअयुध्यऽएकऽइत् । त्वमिंद्रवनूँरहन् ॥ १९ ॥ यत्रोतमर्त्यायकमरिणा
ऽइंद्रसूर्यं । प्रावःशचीभिरेतशं ॥ किमादुतासिवृत्रहन्मघवन्मन्युमत्तमः । अत्राहदानुमातिरः ॥ एतद्घेदुतवीर्यं१

(४।३।१८) आनःस्तुतइतिपंचर्चस्यसूक्तस्यवामदेवइंद्रस्त्रिष्टुप् । (४।३।१९) नकिरिंद्रेतिचतुर्विंशत्यृचस्यसूक्तस्यवामदेवइन्द्रःचतुर्दश्यादितिसृणाभिंद्रोषसौगायत्रीअष्टम्यंत्येअनुष्टुभौ ।

Digitization by eGangotri. Funding by MoE-IKS

मिंद्रं॑च॒कर्थ॒पौंस्यं॑ । स्त्रि॒यं॑यद्दु॑र्हणा॒युवं॒वधी॑र्दुहि॒तरं॑दि॒वः ॥ दि॒वश्चि॑द्घादुहि॒तरं॑म॒हान्म॑ही॒यमा॑नां । उ॒षास॑मिंद्र॒संपि॑ण
क् ॥ अपो॒षाऽअन॑सस्सर॒त्संपि॑ष्टा॒दह॑बि॒भ्युषी॑ । नियत्सीं॑शि॒श्नथ॒द्वृषा॑ ॥ २० ॥ ए॒तद॑स्या॒ऽअनः॑शये॒सुसं॑पिष्टं॒विपा॒
श्या । स॒सार॑सींपरा॒वतः॑ ॥ उ॒तसिंधुं॑विबा॒ल्यं॑वितस्था॒नामधि॒क्षमि॑ । परि॑ष्ठाऽइंद्रमा॒यया॑ ॥ उ॒तशुष्णं॑स्यधृष्णु॒याप्रमृ॒
क्षोऽअ॒भिवेद॑नं । पु॒रोयद॑स्यसंपि॒णक्+ ॥ उ॒तदा॒संकौ॑लित॒रंबृ॑ह॒तःपर्व॑ता॒दधि॑ । अवा॑हन्निंद्र॒शंब॑रं ॥ उ॒तदा॒सस्य॑व॒र्चि
नः॑स॒हस्रा॑णिश॒ताव॑धीः । अधि॒पंच॑प्र॒धीँऽरि॑व ॥ २१ ॥ उ॒तत्यंपु॒त्रम॒ग्रुवः॒परा॑वृक्तंश॒तक्र॑तुः । उ॒क्थेष्विंद्र॒ऽआभ॑जत् ॥
उ॒तत्यातु॒र्वशा॒यदू॑ऽअस्ना॒तारा॒शची॒पतिः॑ । इंद्रो॑वि॒द्वाँऽअ॑पारयत् ॥ उ॒तत्यास॒द्यऽआर्या॑स॒रयो॑रिंद्रपा॒रतः॑ । अर्णा॑चि॒
त्रर॑थावधीः ॥ अनु॒द्वाज॑हि॒तान॑यो॒धंश्रो॒णंच॑वृत्रहन् । नत॑त्तेसु॒म्नमष्ट॑वे ॥ श॒तम॑श्म॒न्मयी॑नांपु॒रामिंद्रो॒व्या॑स्यत् । दि
वो॑दासायदा॒शुषे॑ ॥ २२ ॥ अस्वा॑पयद्द॒भीत॑येस॒हस्रा॑त्रिं॒शतं॒हथैः॑ । दा॒साना॒मिंद्रो॑मा॒यया॑ ॥ सघेदु॒तासि॑वृत्रहन्त्समा॒
नऽइं॑द्र॒गोप॑तिः । यस्ताविश्वा॑निचिच्यु॒षे ॥ उ॒तनू॒नंयदिं॑द्रि॒यंक॑रि॒ष्याऽइं॑द्र॒पौंस्यं॑ । अ॒द्यानकि॒ष्टदामि॑नत् ॥ वा॒मंवा॑मं
तऽआदुरेदे॒वोद॑दात्वर्य॒मा । वा॒मंपू॒षावा॒मंभगो॑वा॒मंदे॒वःकरू॑ळती ॥ २३ ॥ (४।३।१०) कया॑नश्चि॒त्रऽआभु॑वदू॒तीस॒
दावृ॑ध॒ःसखा॑ । कया॒शचि॑ष्ठयावृ॒ता+ ॥ कस्त्वा॑स॒त्योमदा॑ना॒मंहि॑ष्ठोमत्स॒दंध॑सः । दृ॒ह्ळाचि॑दा॒रुजे॒वसु॑ ॥ अ॒भीषु॒णःस

(४।३।१०) कयानइतिपंचदशर्चस्यसूक्तस्यवामदेवइंद्रोगायत्रीतृतीयापादनिचृत् ।

खींनामविताजरितॄणां । शतंभवास्यूतिभिः ॥ अभीनऽआववृत्स्वचक्रंनवृत्तमर्वतः । नियुद्भिश्चर्षणीनां+ ॥ प्रवता
हिक्रतूनामाहापदेवगच्छसि । अभक्षिसूर्येसचा ॥ २४ ॥ संयत्तऽइंद्रमन्यवःसंचक्राणिदधन्विरे । अधत्वेऽअधसूर्ये ॥
उतस्माहित्वामाहुरिन्मघवानंशचीपते । दातारमविदीधयुं ॥ उतस्मासद्यऽइत्परिशशमानायसुन्वते । पुरूचिन्मंहसे
वसु ॥ नहिष्मातेशतंचनराधोवरंतऽआमुरः । नच्यौत्नानिकरिष्यतः+ ॥ अस्माँऽअवंतुतेशतमस्मान्त्सहस्रमूतयः ।
अस्मान्विश्वाऽअभिष्टयः ॥ २५ ॥ अस्माँऽइहावृणीष्वसख्यायस्वस्तये । महोरायेदिवित्मते ॥ अस्माँऽअविड्ढिवि
श्वहेंद्ररायापरीणसा । अस्मान्विश्वाभिरूतिभिः ॥ अस्मभ्यंताँऽअपावृधिव्रजाँऽअस्तेऽवगोमतः । नवाभिरिंद्रोतिभिः ॥
अस्माकंधृष्णुयारथोद्युमाँऽइंद्रानपच्युतः । गव्युरश्वयुरीयते ॥ अस्माकमुत्तमंकृधिश्रवोदेवेषुसूर्य । वर्षिष्ठंद्यामिवोपरि
॥ २६ ॥ (४।३।११) आतूनऽइंद्रवृत्रहन्नस्माकमर्धमागहि । महान्महीभिरूतिभिः ॥ भृमिश्चिद्घासितूतुजिराचित्रचि
त्रिणीष्वा । चित्रंकृणोष्यूतये ॥ दभ्रेभिश्चिच्छशीयांसंहंसिव्राधंतमोजसा । सखिभिर्येत्वेसचा ॥ वयमिंद्रत्वेसचावयं
त्वाभिनोनुमः । अस्माँऽअस्माँऽइदुदव ॥ सनश्चित्राभिरद्रिवोनवद्याभिरूतिभिः । अनाधृष्टाभिरागहि ॥ २७ ॥
भूयामोषुत्वावतःसखायऽइंद्रगोमतः । युजोवाजायघृष्वये ॥ त्वंह्येकऽईशिषऽइंद्रवाजस्यगोमतः । सनोयंधिमहीमि ॥३९॥

(४।३।११) आतूनइतिचतुर्विंशत्यृचस्यसूक्तस्यवामदेवइंद्रोंत्ययोरिंद्राश्वौगायत्री ।

षं ॥ नत्वावरंतेऽअन्यथायद्दित्ससिस्तुतोमघं । स्तोतृभ्यंऽइंद्रगिर्वणः ॥ अभित्वागोतमागिरानूषतप्रदावने । इंद्रवा
जायघृष्वये ॥ प्रतेवोचामवीर्या३ यामंदसानऽआरुजः । पुरोदासीरभीत्य ॥ २८ ॥ तातेगृणंतिवेधसोयानिचकर्थ
पौंस्या । सुतेष्विंद्रगिर्वणः ॥ अवीवृधंतगोतमाऽइंद्रत्वेस्तोमवाहसः । ऐषुधावीरवद्यशः ॥ यच्चिद्धिशश्वतामसींद्रसा
धारणस्त्वं । तंत्वावयंहवामहे ॥ अर्वाचीनोवसोभवास्मेसुमत्स्वांधसः । सोमानामिंद्रसोमपाः ॥ अस्माकंत्वामतीना
मास्तोमऽइंद्रयच्छतु । अर्वागावर्तयाहरी ॥ पुरोळाशंचनोघसोजोषयासेगिरश्चनः । वधूयुरिवयोषणां ॥ २९ ॥
सहस्रंव्यतीनांयुक्तानामिंद्रमीमहे । शतंसोमस्यखार्यः ॥ सहस्राते शतावयंगवामाच्यावयामसि । अस्मत्राराधऽएतु
ते ॥ दशंतेकलशानांहिरण्यानामधीमहि । भूरिदाऽअसिवृत्रहन् ॥ भूरिदाभूरिदेहिनोमादभ्रंभूर्याभर । भूरिघेदिं
द्रदित्ससि ॥ भूरिदाह्यसिश्रुतःपुरुत्राशूरवृत्रहन् । आनोभजस्वराधसि ॥ प्रतेबभ्रूविचक्षणशंसामिगोषणोनपात् ।
माभ्यांगाऽअनुशिश्रथः ॥ कनीनकेवविद्रधेनवेद्रुपदेऽअर्भके । बभ्रूयामेषुशोभेते ॥ अरंमऽउस्रयाम्णेरमनुस्रयाम्णे ।
बभ्रूयामेष्वस्रिधा ॥ ३० ॥ ॥ इतितृतीयाष्टकेषष्ठोध्यायः ॥ ६ ॥ ॥ ॥ ॥

द्वाविंशाध्यायेवर्गाः ३० सूक्तानि १४ ऋचः १५९ ॥ त्यागः ॥ इंद्रायेदं ५१ ऋतायेः ३ इंद्राये. २० आत्मन. ३ सुपर्णात्मनेश्येना
ये. ८ इंद्राये. इंद्रासोमाभ्यामि. ५ इंद्राये. १३ इंद्राषसाभ्यामि. २ इंद्राये. ५० इंद्राश्विभ्या. २ ॥ इतितृतीयेषष्ठः ॥ ६ ॥

प्रऋभुभ्यएकादशार्भवंवांऋभुर्विंभ्वेहोपमंवानध्योंत्यास्त्रिष्टुबुपनोष्टौचतुरनुष्टुबंतमुतोहिदशदाधिक्रंहिंद्यावापृथिव्याद्याशुंषळंत्यानुष्टुंब्दधिक्राव्णःपंचचतस्रोंत्याजगत्योंत्यासौरींद्राकोवामेकादशैंद्रावरुणंतुंममद्विताद्शत्रसदस्युःपौरुकुत्स्यंःषळाद्याआत्मस्तवंःकउश्रवत्सप्तपुरुमीह्लाजमीह्लौसौहोत्रौत्वाश्विनंहिंतंवामेषस्यत्रिष्टुबंतमग्रंवायव्याद्यैंद्रवायवंतुगायत्रंवायोचतुष्कमानुष्टुभंत्वाद्यावायव्यांविहिपंचवायव्यमिदंवांषळैंद्रावार्हस्पत्यंगायत्रंयस्तस्तंभैकादशबार्हस्पत्यमंत्येऐंद्र्यौचोपांत्याजगती ॥ १ ॥ ॥ ॥ ॥

॥ हरिःओम् ॥ (४।४।१) प्रऽऋ॒भुभ्यो॑दू॒तमि॑व॒वाच॑मिष्यऽउप॒स्तिरे॒श्वैत॑रीं॑धे॒नुमी॑ळे । येवात॑जूतास्त॒रणि॑भि॒रेवै॒ःपरि॒द्यां॑स॒द्योऽअ॒पसो॑बभू॒वुः+ ॥ य॒दार॒मक्र॑न्नृ॒भवः॑पि॒तृभ्यां॒परि॑विष्टीवे॒षणा॑दं॒सना॑भिः । आदि॑दे॒वाना॒मुप॑स॒ख्यमा॑य॒न्धीरा॑सःपु॒ष्टिम॑वहन्म॒नायै॑ ॥ पु॒नर्ये॑च॒क्रुःपि॒तरा॒युवा॑ना॒सना॒यूपे॑वज॒रणा॑शया॑ना । तेवाजो॒विभ्वाँ॑ऽऋ॒भुरिंद्र॑वंतो॒मधु॑प्सरसोनोवंतुय॒ज्ञं ॥ यत्सं॒वत्स॑मृ॒भवो॒गाम॑रक्ष॒न्यत्सं॒वत्स॑मृ॒भवो॒माऽअपिं॑शन् । यत्सं॒वत्स॒मभ॑र॒न्भासो॑ऽअस्या॒स्ताभि॒ःशमी॑भिरमृत॒त्वमा॑शुः ॥ ज्ये॒ष्ठऽआ॑हचम॒साद्वाक॒रेति॒कनी॑या॒न्लीन्कृ॑णवा॒मेत्या॑ह । क॒नि॒ष्ठऽआ॑हच॒तुर॑स्क॒रेति॒त्वष्ट॑ऽऋभव॒स्तत्प॑नय॒द्वचो॑वः ॥ १ ॥ स॒त्यमू॑चु॒र्नर॑ऽए॒वाहि॒चक्रु॒रनु॑स्व॒धामृ॒भवो॑जग्मुरे॒तां । वि॒भ्राज॑मानाँश्चम॒साँऽअहे॒वावे॑न॒त्त्वष्टा॑

(४।४।१) प्रऋभुभ्यइत्येकादशर्चस्यसूक्तस्यवामदेवऋभवस्त्रिष्टुप् ।

च॒तुरो॑दद्दृ॒श्वान्+ ॥ द्वाद॑श॒द्यून्यदगो॑ह्यस्याति॒थ्येरण॑न्नृ॒भवः॑स॒संतः॑ । सु॒क्षेत्रा॑कृण्व॒न्ननय॑न्त॒सिंधू॒न्धन्वाति॑ष्ठ॒न्नोष॑धीर्नि॒म्नमाप॑ः ॥ रथं॒येच॒क्रुःसु॒वृतं॑नरे॒ष्ठां॑येधे॒नुं॑विश्व॒जुवं॑वि॒श्वरू॑पां । तऽआत॑क्षंत्वृ॒भवो॑र॒यिंनः॒स्ववं॑स॒ःस्वप॑सःसु॒हस्ताः॑ ॥ अ॒पो॒ह्ये॑षा॒मजु॑षंतदे॒वाऽअ॒भिक्रत्वा॒मन॑सा॒दीध्या॑नाः । वाजो॑दे॒वाना॑मभवत्सु॒कर्मैं॑द्रस्यऽऋभु॒क्षावरु॑णस्य॒विभ्वा॑ ॥ येहरी॑मे॒धयो॒क्थामदं॑त॒ऽइंद्रा॑यच॒क्रुःसु॒युजा॒येऽअश्वा॑ । तेरा॒यस्पोषं॒द्रवि॑णान्य॒स्मेध॒त्तऽऋ॑भवःक्षेम॒यंतो॒नमि॒त्रं+ ॥ इ॒दाह्नः॑पी॒तिमु॒तवो॒मदं॑धु॒र्नऽऋ॒तेश्रां॑तस्य॑स॒ख्याय॑दे॒वाः । तेनू॒नम॒स्मेऽऋ॑भवो॒वसू॑नितृ॒तीये॑ऽअ॒स्मिन्त्सव॑नेदधात ॥ २ ॥ (४।४।२)

ऋ॒भुर्विभ्वा॒वाज॒ऽइंद्रो॑नो॒ऽअच्छे॒मंय॒ज्ञंर॑त्न॒धेयोप॑यात । इ॒दाहिवो॑धि॒षणा॑दे॒व्य॑ह्ना॒मधा॑त्पी॒तिंसंमदा॑ऽअग्मतावः ॥ वि॒दा॒नासो॒जन्म॑नोवाजरत्नाऽउ॒तऽऋ॒तुभि॑र्ऋभवोमादयध्वं । संवो॒मदा॒ऽअग्म॑त॒संपुरं॑धिःसु॒वीरा॑म॒स्मेर॒यिमेर॑यध्वं ॥ अ॒यंवो॑य॒ज्ञऽऋ॑भवोकारि॒यमा॒मनु॒ष्वत्प्रदि॑वो॒दधि॒ध्वे । प्रवो॒च्छा॑जुजुषा॒णासो॑ऽअस्थु॒रभू॑त॒विश्वे॑ऽअग्रि॒योतवा॑जाः ॥ अभू॑दुवो॒विध॒तेर॑त्न॒धेय॑मि॒दान॑रोदा॒शुषे॒मर्त्या॑य । पिबं॑तवाजाऽऋभवोद॒दे॒वो॒महिं॑तृ॒तीयं॒सव॑नं॒मदा॑य ॥ आवो॑जा॒यातो॒प॑नऽऋभुक्षा॒महो॒न॑रो॒द्रवि॑णसोगृ॒णा॒नाः । आवः॑पी॒तयो॑भिपि॒त्वेऽअह्ना॑मि॒माऽअस्तं॑नव॒स्व॑ऽइवग्मन् ॥ ३ ॥ आन॑पातःशवसोया॒तनोपे॒मंय॒ज्ञंनम॑सा॒हूयमा॑नाः । स॒जोष॑सःसूरयो॒यस्य॑च॒स्थमध्वः॑पातर॒त्नधाऽइंद्र॑वंतः ॥ स॒जोषा॑ऽइंद्र॒वरु॑णेन॒सोमं॑स॒

(४।४।२) ऋभुर्विभ्वेत्येकादशर्चस्यसूक्तस्यवामदेवऋभवस्त्रिष्टुप् ।

जोषा॑ःपाहिगिर्व॑णोम॒रुद्भिः॑। अ॒ग्ने॒पाभि॑र्ऋ॒तुपा॑भिःस॒जोषा॒ग्नास्पत्नी॑भीरत्न॒धाभि॑ःस॒जोषा॑ः॥ स॒जोष॑सऽआदि॒त्यैर्मा॑दयध्वंस॒जोष॑सऽऋभव॒ःपर्व॑तेभिः। स॒जोष॑सो॒दैव्ये॑नासवि॒त्रास॒जोष॑स॒ःसिंधु॑भीरत्न॒धेभि॑ः॥ येऽअ॒श्विना॒येपि॒तरा॒यऽऊ॒तीधे॒नुंत॑त॒क्षुर्ऋ॒भवो॒येऽअश्वा॑। येऽअंस॑त्रा॒यऽऋ॒धग्रोद॑सी॒येवि॒भ्वो॒नर॑ःस्वप॒त्यानि॑च॒क्रुः+ ॥ येगोमं॑तं॒वाज॑वंतंसु॒वीरं॑र॒यिंध॒त्थवसुंमंतंपुरु॒क्षुं। तेऽअ॑ग्रे॒पाऽऋ॑भवोमंदसा॒नाऽअ॒स्मेध॑त्त॒येच॑रा॒तिंगृ॒णंति॑ ॥ नापा॑भूत॒नवो॑तीतृषा॒मानि॑ःशस्ताऽऋभवोय॒ज्ञेऽअ॒स्मिन्। समिंद्रे॒णमद॑थ॒संम॒रुद्भि॒ःसंराज॑भीरत्न॒धेया॑यदेवाः ॥ ४ ॥ (४।४।३) इ॒होप॑यातशवसोनपा॒तःसौध॑न्वनाऽऋभवो॒माप॑भूत। अ॒स्मिन्हिव॒ःसव॑नेरत्न॒धेयं॒गमं॒त्विंद्र॒मनु॑वो॒मदा॑सः॥ आग॑न्नृ॒भूणा॑मि॒हर॑त्न॒धेय॒मभू॑त्सोम॑स्य॒सुषु॑तस्यपी॒तिः। सु॒कृ॒त्यया॒यत्स्व॑प॒स्यया॑चँ॒ऽएकं॑विच॒क्रच॑म॒संच॑तु॒र्धा॥ व्य॑कृणोतचम॒संच॑तु॒र्धा॑सखे॒विशि॒क्षेत्य॑ब्रवीत । अथै॑तवाजाऽअ॒मृत॑स्य॒पंथाँ॑ग॒णंदे॒वाना॑मृभवःसुहस्ताः॥ कि॒मय॑स्विच्चम॒सऽए॒षऽआ॑स॒यंकाव्ये॑नच॒तुरो॑विच॒क्र । अथा॑सुनुध्वं॒सव॑नं॒मदा॑यपा॒तऽऋ॑भवो॒मधु॑नःसो॒म्यस्य॑॥ शच्या॑कर्तपि॒तरा॒युवा॑ना॒शच्या॑कर्तचम॒संदे॑व॒पानँ॑ । शच्या॒हरी॒धनु॑तरावतष्टेंद्र॒वाहा॑वृभवोवाजरत्नाः॥ ५ ॥ योव॑ःसु॒नोत्य॑भिपि॒त्वेऽअह्नाँ॑ती॒व्रंवा॑जास॒ःसव॑नं॒मदा॑य। तस्मै॑र॒यिमृ॑भव॒ःसर्व॑वीर॒मात॑क्षतवृषणोमंदसा॒नाः+ ॥ प्रा॒तःसु॒तम॑पिबोहर्य॑श्व॒माध्यं॑दिनं॒सव॑नं॒केव॑लंते। समृ॒भुभि॑ःपिबस्वरत्न॒धेभि॒ःसखीँ॒ऽर्याँऽइंद्र

(४।४।३) इहोपेतिनवर्चस्यसूक्तस्यवामदेवऋभवस्त्रिष्टुप् ।

चक्रुषेसुकृत्या+ ॥ येदेवासोऽअभवतासुकृत्याश्येनाऽइवेदधिदिविनिषेद । तेरत्नंधातशवसोनपातःसौधन्वनाऽअभवतामृतासः ॥ यत्तृतीयंसवनंरत्नधेयमकृणुध्वंस्वपस्यासुहस्ताः । तदृभवःपरिषिक्तंवऽएतत्संमदेभिरिंद्रियेभिःपिबध्वं ॥ ६ ॥ (४।४।४) अनश्वोजातोऽअनभीशुरुक्थ्यो३रथस्त्रिचक्रःपरिवर्ततेरजः । महत्तद्वोदेव्यस्यप्रवाचनंद्यामृभवःपृथिवींयच्चपुष्यथ ॥ रथंयेचक्रुःसुवृतंसुचेतसोविह्वरंतंमनसस्परिध्यया । ताँऽऊन्व१स्यसवनस्यपीतयऽआवोवाजाऽऋभवोवेदयामसि ॥ तद्वोवाजाऽऋभवःसुप्रवाचनंदेवेषुविभ्वोऽअभवन्महित्वनं । जिव्रीयत्संतापितरासनाजुरापुनर्युवानाचरथायतक्षथ ॥ एकंविचक्रचमसंचतुर्वयंनिश्चर्मणोगामरिणीतधीतिभिः । अथादेवेष्वमृतत्वमानशश्रुष्टीवाजाऽऋभवस्तद्वऽउक्थ्यं ॥ ऋभुतोरयिःप्रथमश्रवस्तमोवाजश्रुतासोयमजीजनन्नरः । विभ्वतष्टोविदथेषुप्रवाच्योयंदेवासोवथासविचर्षणिः ॥ ७ ॥ सवाज्यर्वासऽऋषिर्वचस्ययासशूरोऽअस्तापृतनासुदुष्टरः । सरायस्पोषंससुवीर्यंदधेयंवाजोविभ्वाँऽऋभवोयमाविषुः ॥ श्रेष्ठंवःपेशोऽअधिधायिदर्शतंस्तोमोवाजाऽऋभवस्तंजुजुष्टन । धीरासोहिष्ठाकवयोविपश्चितस्तान्वऽएनाब्रह्मणावेदयामसि ॥ यूयमस्मभ्यंधिषणाभ्यस्परिविद्वांसोविश्वानर्याणिभोजना । द्युमंतंवाजंवृषशुष्ममुत्तममानोरयिमृभवस्तक्षतावयः ॥ इहप्रजामिहरयिंरराणाऽइहश्रवोवीरवत्तक्षतानः । येनवयंचि

(४।४।४) अनश्वोजातइतिनवर्चस्यसूक्तस्यवामदेवऋभवोजगत्यंत्यात्रिष्टुप् ।

तये॒मात्य॒न्यान्तंवाजँ॑चि॒त्रमृ॑भवोददानः ॥ ८ ॥ (४।४।५) उप॑नोवाजाऽअध्व॒रमृ॑भुक्षा॒देवा॑या॒तप॒थिभि॑र्दे॒व॒यानैः॑ ।
यथा॑य॒ज्ञंमनु॑षोवि॒क्ष्वा॒३सुद॑धि॒ध्वेर॑ण्वाःसुदि॒ने॒ष्वह्नाँ॑ ॥ तेवो॑हृ॒देमन॑सेसंतुय॒ज्ञाजुष्टा॑सोऽअ॒द्यघृ॒तनि॑र्णिजोगुः । प्रवः॑सु
तासो॑हरयंतपू॒र्णाःक्रत्वे॒दक्षा॑यहर्षयंतपी॒ताः+ ॥ त्र्यु॒दा॒यंदे॒वहि॑तं॒यथा॑वः॒स्तोमो॑वाजाऽऋभुक्षणोद॒दे॑वः । जु॒ह्वेम॑नु॒ष्वदु
प॑रासुवि॒क्षुयु॒ष्मेसचा॑बृहद्दि॑वेषु॒सोमं॑ ॥ पीवो॑ऽअश्वाःशु॒चद्र॑था॒हिभू॒ताय॑ःशिप्रावाजिनःसुनि॒ष्काः । इंद्र॑स्यसूनोशवसो
नपा॒तोनु॑वश्चेत्य॒ग्रियं॑मदा॑य ॥ ऋ॒भुमृ॑भुक्षणोर॒यिंवाजे॑वा॒जिन्त॑मं॒युजं॑ । इंद्र॑स्वन्तंहवामहेसदा॒सात॑मम॒श्विनं॑ ॥ ९ ॥
सेदृ॑भवो॒यमव॑थयू॒यमिंद्र॑श्च॒मर्त्यं॑ । सधी॒भिर॑स्तुसनि॑तामे॒धसा॑ता॒ऽसोऽअर्व॑ता ॥ विनो॑वाजाऽऋभुक्षणःप॒थश्चि॑तन॒यष्ट॑
वे । अ॒स्मभ्यं॑सूरयःस्तु॒ताविश्वा॒ऽआशा॑स्तरी॒षणि॑ ॥ तंनो॑वाजाऽऋभुक्षण॒ऽइंद्र॒नास॑त्यार॒यिं । सम॑श्वंचर्ष॒णिभ्य॒ऽआपु॒
रुशा॑स्तऽम॒घत्त॑ये ॥ १० ॥ (४।४।६) उ॒तोहि॒वांदा॒त्रासंति॒पूर्वा॒यापू॒रुभ्य॑स्त्र॒सद॑स्युर्नि॑तो॒शे । क्षे॒त्रा॒सांद॑दथुरुर्वरा॒सां
घ॒नंदस्यु॑भ्योऽअ॒भिभू॑तिमु॒ग्रं+ ॥ उ॒तवा॒जिनं॑पुरुनि॒ष्षिध्वा॑नंदधि॒क्रामु॑ददथुर्वि॒श्वकृ॑ष्टिं । ऋ॒जि॒प्यं॑श्ये॒नंप्रु॑षि॒तप्सु॑मा॒शुं
च॒र्कृत्य॑म॒र्योनृपाति॒ंनशूरं॑ ॥ यंसी॒मनु॑प्र॒वते॑व॒द्रवं॑तं॒विश्वः॑पू॒रुर्मद॑ति॒हर्ष॑माणः । प॒ड्भिर्गृध्यं॑तंमे॒धयुंनशूरं॑रथ॒तुरं॒वात॑मिव॒ध्र

(४।४।५) उपनइत्यष्टर्चस्यसूक्तस्यवामदेवऋभवस्त्रिष्टुप्अंत्याश्चतस्रोनुष्टुभः । (४।४।६) उतोहीतिदशर्चस्यसूक्तस्यवामदेवोदधिक्रावाआद्यायाद्यावापृथिवीत्रिष्टुप् ।

जंतं ॥ यःस्मारुंधानोगध्यासमत्सुसनुतरश्चरंतिगोषुगच्छंन् । आविर्ऋजीकोविदथानिचिक्यत्तिरोऽअरतिंपर्यापऽआ
योः+ ॥ उतस्मैनंवस्त्रमथिंनतायुमनुंक्रोशंतिक्षितयोभरेषु । नीचायमानंजसुरिंनश्येनंश्रवश्चाच्छापशुमच्चयूथं+ ॥११॥
उतस्मासुप्रथमःसरिष्यन्निवेवेतिश्रेणिभीरथानां । स्रजंकृण्वानोजन्योनशुभ्वारेणुंरेरिहत्किरणंदद्श्वान्+ ॥ उतस्य
वाजीसहुरिर्ऋतावाशुश्रूषमाणस्तन्वासमर्ये । तुरंयतीषुतुरयन्नृजिप्योधिभ्रुवोःकिरतेरेणुमृंजन्+ ॥ उतस्मास्यतन्यतो
रिवद्योर्ऋघायतोऽअभियुजोभयंते । यदासहस्रमभिषीमयोधीदुर्वर्तुःस्माभवतिभीमऽऋंजन्+ ॥ उतस्मास्यपनयंतिज
नाजूतिंकृष्टिप्रोऽअभिभूतिमाशोः । उतैनमाहुःसमिथेवियंतःपरादधिक्राऽअसरत्सहस्रैः ॥ आदधिक्राःशवसापंचकृ
ष्टीःसूर्यऽइवज्योतिषापस्ततान । सहस्रसाःशतसावाज्यर्वापृणक्तुमध्वासमिमावचांसि ॥ १२ ॥ (४।४।७) आशुं
दधिक्रांतमुनुष्टवामदिवस्पृथिव्याऽउतचर्किराम । उच्छंतीर्मामुषसःसूदयंत्वतिविश्वानिदुरितानिपर्षन् ॥ महश्चर्कृ
र्म्यर्वतःक्रतुप्रादधिक्राव्णःपुरुवारस्यवृष्णः । यंपूरुभ्योदीदिवांसंनाग्निंददथुर्मित्रावरुणाततुरिं ॥ योऽअश्वस्यदधिक्रा
व्णोऽअकारीत्समिद्धेऽअग्नाऽउषसोव्युष्टौ । अनागसंतमदितिःकृणोतुसमित्रेणवरुणेनासजोषाः ॥ दधिक्राव्णऽइष
ऽऊर्जोमहोयदमन्महिमरुतांनामभद्रं । स्वस्तयेवरुणंमित्रमग्निंहवामहऽइंद्रंवज्रबाहुं ॥ इंद्रमिवेदुभयेविह्वयंतऽउदीरा

(४।४।७) आशुमितिषळर्चस्यसूक्तस्यवामदे[illegible]त्रिष्टुप् ।

णायज्ञमुपप्रयंतः । दधिक्रामुसूदनंमर्त्यायददथुर्मित्रावरुणानोऽअश्वं ॥ दधिक्राव्णोऽअकारिषंजिष्णोरश्वस्यवाजि
नः । सुरभिनोमुखाकरत्प्रणऽआयूंषितारिषत् ॥ १३ ॥ (४।४।८) दधिक्राव्णऽइदुनुचर्किरामविश्वाऽइन्मामुष
सःसूदयंतु । अपामग्नेरुषसःसूर्यस्यबृहस्पतेरांगिरसस्यजिष्णोः+ ॥ सत्वाभरिषोगविषोदुवन्यसच्छ्रवस्यादिषऽउषसं
स्तुरण्यसत् । सत्योद्रवोद्रवरःपतंगरोदधिक्रावेषमूर्जंस्वर्जनत् ॥ उतस्मास्यद्रवतस्तुरण्यतःपर्णंनवेरनुवातिप्रगर्धिनः ।
श्येनस्येवध्रजतोऽअंकसंपरिदधिक्राव्णःसहोर्जातरित्रतः ॥ उतस्यवाजीक्षिपणिंतुरण्यतिग्रीवायांबद्धोऽअपिकक्षऽआ
सनि । क्रतुंदधिक्राऽअनुसंतवीत्वत्पथामंकांस्यन्वापनीफणत् ॥ हंसःशुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोण
सत् । नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽऋतं ॥ १४ ॥ (४।४।९) इंद्राकोवांवरुणासुम्नमाप
स्तोमोहविष्माँऽअमृतोनहोता । योवांहृदिक्रतुमाँऽअस्मदुक्तःपस्पर्शदिंद्रावरुणानमस्वान् ॥ इंद्राहयोवरुणाचक्रऽआ
पीदेवौमर्तःसख्यायप्रयस्वान् । सहंतिवृत्रासमिथेषुशत्रूनवोभिर्वामहद्भिःसप्रशृण्वे ॥ इंद्राहरत्नंवरुणाधेष्ठेत्थानृभ्यः
शशमानेभ्यस्ता । यदीसखायासख्यायसोमैःसुतेभिःसुप्रयसामादयैते ॥ इंद्रायुवंवरुणादिद्युमस्मिन्नोजिष्ठमुग्रानिव

(४।४।८) दधिक्राव्णइतिपंचर्चस्यसूक्तस्यवामदेवोदधिक्रावाअंत्यायाःसूर्यस्त्रिष्टुप्अंत्याश्चतस्रोजगत्यः । (४।४।९) इंद्राकोवामित्येकादशर्चस्यसूक्तस्यवामदेवइंद्रावरुणौत्रिष्टुप् ।

धिष्टं॒वज्रं॑ । योनो॑दु॒रेवो॑वृ॒कति॑र्द॒भीति॒स्तस्मि॑न्मिमाथाम॒भिभू॒त्योज॑ः ॥ इंद्रा॑यु॒वंवं॑रुणाभूतम॒स्याधि॒यःप्रे॒तारा॑वृष॒भेवं॑धे॒
नोः । सानो॑दुहीय॒द्यवं॑सेव॒गत्वीस॒हस्रं॑धारा॒पयं॑सा॒महीगौः॑+ ॥ १५ ॥ तो॒केहि॒तेतनं॑यऽउ॒र्वरा॑सुसू॒रो॒दृशी॑के॒वृषं॑णश्च॒पौं॑
स्ये॑ । इंद्रा॑नो॒ऽअत्र॒वरु॑णास्याता॒मवो॑भिर्द॒स्मापरि॑तक्म्यायां ॥ युवामिद्ध्यवं॑सेपू॒र्व्याय॒परि॒प्रभू॑तीग॒विषः॑स्वापी । वृ॒णी॒म
हे॑स॒ख्याय॑प्रि॒याय॒शूरा॒मंहि॑ष्ठापि॒तरे॑वशं॒भू+ ॥ ता॒वांधियोवं॑सेवा॒जयं॑तीरा॒जिंनजं॑ग्मुर्युव॒यूःसुदानू । श्रि॒येनगाव॒ऽउप॒
सोमं॑मस्थु॒रिंद्रं॒गिरो॒वरु॑णंमेमनी॒षाः+ ॥ इ॒माऽइंद्रं॒वरु॑णंमेमनी॒षाऽअग्म॒न्नुप॒द्रवि॑णमि॒च्छमा॑नाः । उपे॑मस्थुर्जो॒ष्टार॑ऽइव॒
वस्वो॑र॒घ्वीरि॑व॒श्रव॑सो॒भिक्ष॑माणाः ॥ अश्व्यं॑स्य॒त्मना॒रथ्यं॑स्यपु॒ष्टेर्नित्यं॑स्यरा॒यःपत॑यःस्याम । ताच॑क्रा॒णाऽऊ॒तिभि॒र्नव्यं॑
सीभिरस्म॒त्रारायो॑नि॒युतः॑सचंतां ॥ आनो॑बृहंताबृह॒तीभि॑रू॒तीऽइंद्र॑या॒तंवरु॑ण॒वाजं॑सातौ । यद्दि॒द्यवः॒पृत॑नासुप्र॒क्रीळा॒
न्तस्यं॑वांस्यामसनि॒तार॑ऽआ॒जेः+ ॥ १६ ॥ (४।४।१०) ममं॑द्वि॒तारा॒ष्ट्रंक्ष॒त्रियं॑स्यवि॒श्वायो॒र्विश्वे॑ऽअ॒मृता॒यथा॑नः ।
क्रतुं॑सचंते॒वरु॑णस्यदे॒वाराजा॑मिकृ॒ष्टेरु॑प॒मस्यं॑व॒व्रेः ॥ अ॒हंराजा॒वरु॑णो॒मह्यं॑तान्यं॑सु॒र्या॑णिप्रथ॒माधा॑रयंत । क्रतुं॑सचंते॒० ॥
अ॒हमिंद्रो॒वरु॑ण॒स्तेम॑हि॒त्वोर्वीग॑भी॒रेरज॑सीसु॒मेके॑ । त्वष्टे॑व॒विश्वा॒भुव॑नानिवि॒द्वान्त्समै॑रयं॒रोद॑सीधा॒रयं॑च ॥ अ॒हम॒पोऽअ॑
पिन्वमु॒क्षमा॑णाधा॒रयं॒दिवं॒सद॑नऽऋ॒तस्य॑ । ऋ॒तेन॑पु॒त्रोऽअदि॑तेर्ऋ॒तावो॒तत्रि॒धातु॑प्रथय॒द्विभूम॑ ॥ मांनरः॒स्वश्वा॑वा॒जयं॑तो॒

(४।४।१०) ममद्वितेतिदशर्चस्यसूक्तस्यपौरुकुत्स[illegible]सदस्युर्देवताअंत्यानांचतसृणामिंद्रावरुणौत्रिष्टुप् ।

मांवृताःसमरणेहवंते । कृणोम्याजिंमघवाहमिंद्रऽइयर्मिरेणुमभिभूत्योजाः ॥ १७ ॥ अहंताविश्वाचकरंनकिर्मादैव्यं
सहोवरतेऽअप्रतीतं । यन्मासोमासोममदन्यदुक्थोभेभयेतेरजंसीऽअपारे+ ॥ विदुष्टेविश्वाभुवनानितस्यताप्रब्रवी
षिवरुणायवेधः । त्वंवृत्राणिशृण्विषेजघन्वान्त्वंवृताँऽअरिणाऽइंद्रसिंधून् ॥ अस्माकमत्रपितरस्तऽआसन्त्सप्तऽऋष
योदौर्गहेबध्यमाने । तऽआयजंतत्रसदस्युमस्याऽइंद्रंनवृत्रतुरमर्धदेवं+ ॥ पुरुकुत्सानीहिवामदाशद्धव्येभिरिंद्रावरु
णानमोभिः । अथाराजानंत्रसदस्युमस्यावृत्रहणंददथुरर्धदेवं+ ॥ रायावयंससवांसोमदेमहव्येनदेवायवसेनगावः ।
तांधेनुमिंद्रावरुणायुवंनोविश्वाहाधत्तमनपस्फुरंतीं ॥ १८ ॥ (४।४।११) कऽउश्रवत्कतमोयज्ञियानांवंदारुदेवः
कंतमोजुषाते । कस्येमांदेवीममृतेषुप्रेष्ठांहृदिश्रेषामसुष्टुतिंसुहव्यां+ ॥ कोमृळातिकतमऽआगमिष्ठोदेवानामुकतमःशं
भविष्ठः । रथंकमाहुर्द्रवदश्वमाशुंयंसूर्यस्यदुहितावृणीत ॥ मक्षूहिष्मागच्छथऽईवतोद्यूनिंद्रोनशक्तिंपरितक्म्यायां ।
दिवऽआजातादिव्यासुपर्णाकयाशचीनांभवथःशचिष्ठा ॥ कावांभूदुपमातिःकयानऽआश्विनागमथोहूयमाना । को
वांमहश्चित्त्यजसोऽअभीकऽउरुष्यतंमाध्वीदस्रानऽऊती+ ॥ उरुवांरथःपरिनक्षतिद्यामायत्समुद्रादभिवर्ततेवां । म
ध्वामाध्वीमधुवांप्रुषायन्यत्सींवांपृक्षोभुरजंतपक्काः+ ॥ सिंधुर्हवांरसयासिंचदश्वान्घृणावयोरुषासःपरिग्मन् । तदूषु

(४।४।११) कउश्रवदितिसप्तर्चस्यसूक्तस्यसौहोत्रौपुरुमीह्ळाजमीह्ळावश्विनौत्रिष्टुप् ।

वा॑मजि॒रं॑चै॑ति॒याना॒ं॑ये॑न॒पती॒भव॑थःसू॒र्या॑याः ॥ इ॒हेह॒यद्वां॑सम॒ना॑पपृ॒क्षे॑सेयम॒स्मे॑सुम॒तिर्वाँ॑जरत्ना । उ॒रु॒ष्यतँ॑जरि॒तारँ॑यु॒वंह॑श्रि॒तःकामो॑नासत्यायुव॒द्रिक्+ ॥ १९ ॥ (४।४।१२) तंवा॒ंरथँ॑व॒यम॒द्याहु॑वेमपृथु॒ज्रय॑मश्विना॒संग॑ति॒ंगोः । यःसू॒र्यांवह॑तिवंधु॒रायु॒र्गिर्वा॑हसंपुरु॒तमँ॑वसू॒युं+ ॥ यु॒वंश्रिय॑मश्विनादे॒वता॒तांदिवो॑नपातावनथ॒ःशची॑भिः । यु॒वोर्वपु॑र॒भिपृक्षः॑सचं॑ते॒वहँ॑ति॒यत्क॑कु॒हासो॒रथे॑वां ॥ कोवा॑म॒द्याक॑रतेरा॒तह॑व्यऽऊ॒तये॑वासुत॒पेया॑यवा॒र्कैः । ऋ॒तस्य॑वावनु॒षे॑पू॒र्व्याय॒नमो॑येमा॒नो॒ऽअ॑श्वि॒नाव॑वर्तत् ॥ हि॒र॒ण्यये॑नपुरुभू॒रथे॑ने॒मंय॒ज्ञंना॑स॒त्योप॑यातं । पिबा॑थ॒ऽइन्मधु॑नःसो॒म्यस्य॒दध॑थो॒रत्नँ॑विध॒तेजना॑य ॥ आनो॑यातंदि॒वोऽअच्छा॑पृथि॒व्याहि॑र॒ण्यये॑नसु॒वृता॒रथे॑न । मावा॑म॒न्येनिय॑मन्देव॒यंत॒ःसंय॒द्देना॑भिःपू॒र्व्यावां॑ ॥ नू॒नोर॒यिंपु॑रु॒वीरँ॑बृ॒हंतं॒दस्रा॒मिमा॑थामु॒भये॑ष्व॒स्मे । नरो॒यद्वा॑मश्विना॒स्तोम॒माव॑न्त्स॒धस्तु॑तिमाजमी॒ळ्हासो॑ऽअग्मन् ॥ इ॒हेह॒यद्वां॰ ॥ २० ॥ (४।४।१३) ए॒षस्यभा॒नुरुदि॑यर्तियु॒ज्यते॒रथ॒ःपरि॑ज्मादि॒वोऽअ॒स्यसान॑वि । पृ॒क्षासो॑ऽअस्मिन्मिथु॒नाऽअधि॒त्रयो॒दृति॑स्तु॒रीयो॒मधु॑नो॒विर॑प्शते ॥ उद्वां॑पृ॒क्षासो॒मधु॑मन्तऽईरते॒रथा॒ऽअश्वा॑सऽउ॒षसो॒व्यु॑ष्टिषु । अ॒पो॒र्णुवंत॒स्तम॒ऽआपरी॑वृतं॒स्व॒१॒र्णशु॒क्रंत॒न्वंत॒ऽआरजः॑ ॥ मध्वः॑पिबतंमधु॒पेभि॑रा॒सभि॑रु॒तप्रि॒यंमधु॑नेयुजाथा॒ंरथँ॑ । आव॑र्त॒निंमधु॑नाजिन्वथस्प॒थोदृतिं॑वहेथे॒मधु॑मन्तमश्विना ॥ हं॒सासो॒येवा॒ंमधु॑मंतो॒ऽअ॒स्रिधो॒हिर॑ण्यपर्णा॒ऽउ॒हुव॑ऽउष॒र्बुध॑ः । उद्॒

(४।४।१२) तंवामितिसप्तर्चस्यसूक्तस्यपुरुमीळ्हाजमीळ्हावश्विनौत्रिष्टुप्। (४।४।१३)एषस्यइतिसप्तर्चस्यसूक्तस्यवामदेवोश्विनौजगत्यंत्यात्रिष्टुप्।

प्रुतो॑म॒ंदिनो॑मंदिनि॒स्पृशो॒मध्वो॒नमक्ष॒ःसव॑नानिगच्छथः ॥ स्व॒ध्व॒रासो॒मधुं॑मंतो॒ऽअ॒ग्नयं॑ऽउ॒स्राजरं॑ते॒प्रति॒वस्तो॑र॒श्विना॑ । यन्नि॒क्तहं॑स्तस्त॒रणि॑र्विचक्ष॒णःसोमं॑सु॒षाव॒मधुं॑मंत॒मद्रि॑भिः ॥ आ॒के॒नि॒पासो॒ऽअहं॑भि॒र्दवि॑ध्वत॒ःस्व॑१॒र्णशु॒क्रंत॒न्वंत॒ऽआरजं॑ः । सूरं॑श्चि॒दश्वा॑न्युयुजा॒नऽईं॑यते॒विश्वाँ॒ऽअनुं॑स्व॒धया॑चेतथस्प॒थः+ ॥ प्रवां॑मवोचमश्विनाधियं॒धारथ॒ःस्वश्वो॑ऽअ॒जरो॒योऽअस्ति॑ । येनं॑स॒द्यःपरि॒रजां॑सिया॒थोह॒विष्मं॑तंत॒रणिं॑भो॒जमच्छ॑ ॥ २१ ॥ (४।५।१) अग्रं॑पिबा॒मधूं॑नांसु॒तंवा॑यो॒दिवि॑ष्टिषु । त्वंहिपू॑र्व॒पाऽअसि॑ ॥ श॒तेनां॑नोऽअ॒भिष्टिं॑भिर्नि॒युत्वाँ॒ऽइंद्रं॑सारथिः । वायो॑सु॒तस्यं॑तृंपतं ॥ आवाँ॑स॒हस्रं॒हरं॑य॒ऽइंद्रं॑वायूऽअ॒भिप्रयं॑ः । वहं॑तु॒सोमं॑पीतये ॥ रथं॒हिरं॑ण्यवंधुर॒मिंद्रं॑वायूस्वध्व॒रं । आहिस्थाथो॑दिवि॒स्पृशं॑ ॥ रथें॑नपृथु॒पाजं॑सादा॒श्वांस॒मुपं॑गच्छतं । इंद्रं॑वायूऽइ॒हागं॑तं ॥ इंद्रं॑वायूऽअ॒यंसु॒तस्तंदे॒वेभिं॑ःस॒जोषं॑सा । पिबं॑तंदा॒शुषो॑गृ॒हे ॥ इ॒हप्र॒याणं॑मस्तुवा॒मिंद्रं॑वायूवि॒मोचं॑नं । इ॒हवां॒सोमं॑पीतये ॥ २२ ॥ (४।५।२) वायो॑शु॒क्रोऽअं॑यामिते॒मध्वो॒ऽअग्रं॒दिवि॑ष्टिषु । आयां॑हि॒सोमं॑पीतयेस्पा॒र्होदे॑वनि॒युत्वं॑ता ॥ इंद्रं॑श्चवायवेषां॒सोमां॑नांपी॒तिमं॑र्हथः । यु॒वांहियंतींद॑वोनि॒म्नमापो॒नस॒ध्र्यं॑क् ॥ वाय॒विंद्रं॑श्चशु॒ष्मिणां॑स॒रथं॑शवसस्पती । नि॒युत्वं॑तानऽऊ॒तय॒ऽआयां॑तं॒सोमं॑पीतये ॥ यावां॒संति॑पुरु॒स्पृहो॑

(४।५।१) अग्रंपिबेतिसप्तर्चस्यसूक्तस्यवामदेवःइंद्रवायूआद्यायावायुर्गायत्री । (४।५।२)वायोइतिचतुर्ऋचस्यसूक्तस्यवामदेवइंद्रवायूआद्यायावायुरनुष्टुप् ।

नि॒युतो॑दा॒शुषे॑नरा । अ॒स्मेता॑य॑ज्ञवाह॒सें॑द्रवायू॒नियं॑च्छतं ॥ २३ ॥ (४।५।३) वि॒हिहो॑त्रा॒ऽअवी॑ता॒विपो॒नरा॒यो॑ऽअ॒र्यः । वा॒यवा॒चं॒द्रे॒ण॒रथे॑नया॒हिसु॒तस्यं॑पी॒तये॑ ॥ नि॒र्यु॒वा॒णोऽअश॑स्तीर्नि॒युत्वाँ॒ऽइंद्र॑सारथिः । वा॒यवा॰ ॥ अनु॑कृ॒ष्णेवसु॑धिती॒ये॒माते॑वि॒श्वपे॑शसा । वा॒यवा॰ ॥ वहं॑तुत्वाम॒नो॒युजो॑यु॒क्तासो॑नव॒तिर्नव॑ । वा॒यवा॰ ॥ वा॒यो॑श॒तंहरी॑णांयु॒वस्व॒पोष्या॑णां । उ॒तवा॑तेसह॒स्रिणो॒रथ॒ऽआया॑तु॒पाज॑सा ॥ २४ ॥ (४।५।४) इ॒दंवा॑मा॒स्ये॑ह॒विःप्रि॒यमिं॑द्राबृहस्पती । उ॒क्थंमद॑श्चशस्यते ॥ अ॒यंवा॒ंपरि॑षिच्यते॒सोम॑ऽइंद्राबृहस्पती । चा॒रु॒र्मदा॑यपी॒तये॑ ॥ आन॑ऽइंद्राबृहस्पतीगृ॒हमिंद्र॑श्चगच्छतं । सो॒म॒पासोम॑पीतये ॥ अ॒स्मेऽइंद्राबृहस्पतीर॒यिंध॑त्तंशत॒ग्विनं॑ । अश्वा॑वंतंसह॒स्रिणं॑ ॥ इंद्रा॒बृह॒स्पती॑व॒यंसु॒तेगी॒र्भिर्ह॑वामहे । अ॒स्यसोम॑स्यपी॒तये॑ ॥ सोम॑मिंद्राबृहस्पती॒पिब॑तंदा॒शुषो॑गृ॒हे । मा॒दये॑था॒तदो॑कसा ॥ २५ ॥ (४।५।५) य॒स्त॒स्तंभ॒सह॑सा॒विज्मो॑ऽअंता॒न्बृह॒स्पति॑स्त्रिषध॒स्थोर॑वेण । तंप्र॒त्नास॒ऽऋष॑यो॒दीध्या॑नाः॒पु॒रोविप्रा॑दधिरेमं॒द्रजि॑ह्वं ॥ धु॒ने॑तंयःसु॒प्रके॒तंमद॑न्त॒तोबृह॑स्पतेऽअ॒भियेन॑स्तत॒स्रे । पृषं॑तंसृ॒प्रमद॑ब्धमू॒र्वंबृह॑स्पते॒रक्ष॑तादस्य॒योनिं॑ ॥ बृह॑स्पते॒यापर॑मापर॒राव॒दत॒ऽआत॑ऽऋत॒स्पृशो॒निषे॑दुः । तुभ्यं॑खा॒ताऽअव॒ताऽअद्रि॑दुग्धा॒मध्वः॑श्चोतंत्य॒भितो॑विर॒प्शं+ ॥ बृह॒स्पतिः॑प्रथ॒मंजाय॑

(४।५।३) विहिहोत्राइतिपंचर्चस्यसूक्तस्यवामदेवोवायुरनुष्टुप् । (४।५।४) इदंवामितिषळर्चस्यसूक्तस्यवामदेवइंद्राबृहस्पतीगायत्री । (४।५।५) यस्तस्तंभेत्येकादशर्चस्यसूक्तस्यवामदेवोबृहस्पतिरंत्ययोर्द्वयोरिंद्राबृहस्पतीत्रिष्टुप्दशमीजगती ।

मानोमहोज्योतिषःपरमेव्योमन् । सप्तास्यस्तुविजातोरवेणविसप्तरश्मिरधमत्तमांसि ॥ ससुष्टुभासऋक्वतागणेनवलंरुरोजफलिगंरवेण । बृहस्पतिरुस्रियाहव्यसूदःकनिक्रदद्वावशतीरुदाजत् ॥ २६ ॥ एवापित्रेविश्वदेवायवृष्णेयज्ञैर्विधेमनमसाहविर्भिः । बृहस्पतेसुप्रजावीरवंतोवयंस्यामपतयोरयीणां+ ॥ सऽइद्राजाप्रतिजन्यानिविश्वाशुष्मेणतस्थावभिवीर्येण । बृहस्पतिंयःसुभृतंबिभर्तिवल्गूयतिवंदतेपूर्वभाजं ॥ सऽइत्क्षेतिसुधितऽओकसिस्वेतस्माऽइळापिन्वतेविश्वदानीम् । तस्मैविशःस्वयमेवानमंतेयस्मिन्ब्रह्माराजनिपूर्वऽएति ॥ अप्रतीतोजयतिसंधनानिप्रतिजन्यान्युतयासजन्या । अवस्यवेयोवरिवःकृणोतिब्रह्मणेराजातमवंतिदेवाः+ ॥ इंद्रश्चसोमंपिबतंबृहस्पतेस्मिन्यज्ञेमंदसानावृषण्वसू । आवांविशंत्विंदवःस्वाभुवोस्मेरयिंसर्ववीरंनियच्छतं ॥ बृहस्पतऽइंद्रवर्धतंनःसचासावांसुमतिर्भूत्वस्मे । अविष्टंधियोजिगृतंपुरंधीर्जजस्तमर्योवनुषामरातीः ॥ २७ ॥ इतितृतीयाष्टकेसप्तमोध्यायः ॥ ७ ॥ ॥

त्रयोविंशाध्यायेवर्गाः २७ सूक्तानि १८ ऋचः १४४ ॥ त्यागः ॥ ऋभुभ्य. ४८ द्याव्यापृथिवीभ्या. दधिक्राव्णे. १९ सूर्याये. इंद्रावरुणाभ्या. ११ त्रसदस्यवआत्मन. ६ इंद्रावरुणाभ्या. ४ अश्विभ्या. २१ वायव. इंद्रावायुभ्या.३ वायव. ५ इंद्राबृहस्पतिभ्या. ६ बृहस्पतय. ९ इंद्राबृहस्पतिभ्या. २ ॥ इतितृतीयेसप्तमः ॥ ७ ॥

इदमुषस्यंतुंप्रतिष्यासप्तगायत्रंतद्देवस्यसावित्रंतुजागतमभूद्देवःषट्त्रिष्टुबंतंकोवोदशवैश्वदेवंत्रिगायत्र्यंतंतुमहीसप्तद्यावापृथिवीयंक्षेत्रस्याष्टौतिस्रःक्षैत्रपत्याःशुनायैकापरापुरउष्णिक्सांत्याचशुनासीराभ्यामुपांत्येसीतायैतेचानुष्टुभावाद्याचतुर्थींचसमुद्रादेकादशाग्नेयंजगत्यंतंसौर्यैवापंवागव्यंवाघृतस्तुतिर्वानमोत्रिभ्योभौमोत्रिःपंचमेमंडलेनुक्तगोत्रमात्रेयंविद्यात्पंक्त्यंतस्यचसूक्तस्यशेषमानुष्टुभंमबोधिद्वादशबुधगविष्ठिरौकुमारंकुमारोवृशोवाजानंउभौवाशक्कर्यंतंकवीत्यृचोस्तुवृशएवंत्वमग्नेवसुश्रुतआद्याविराट्तृतीयामारुतरौद्रावैष्णवीत्वामग्नएकादशंसुसमिद्धायाप्रंगायत्रमग्निंतंदशपांक्तंसखायइषःपंक्त्यंतंत्वामग्नेसप्तजागतं ॥ १ ॥ ॥ ॥

॥ हरिःओम् ॥ (४।५।६) इ॒दमु॒त्यत्पु॑रु॒तमं॑पु॒रस्ता॒ज्ज्योति॒स्तम॑सोव॒युना॑वदस्थात् । नू॒नंदि॒वोदु॑हि॒तरो॑विभा॒तीर्गा॒तुंकृ॑णवन्नु॒षसो॒जना॑य ॥ अस्थु॑रुचि॒त्राऽउ॒षसः॑पु॒रस्ता॑न्मि॒ताऽइ॑व॒स्वर॑वोध्व॒रेषु॑ । व्यू॑व्र॒जस्य॒तम॑सो॒द्वारो॒च्छंती॑रव्र॒न्छुच॑यःपाव॒काः+ ॥ उ॒च्छंती॑र॒द्यचि॑तयंत॒भोजा॒न्राधो॒देया॑यो॒षसो॑म॒घोनीः॑ । अ॒चि॒त्रेऽअं॒तःप॒णयः॑ससं॒त्वबु॑ध्यमाना॒स्तम॑सो॒विम॑ध्ये ॥ कु॒वित्सदे॑वीःस॒नयो॒नवो॑वा॒यामो॑बभूयादु॑षसोवोऽअ॒द्य । येन॒ानव॑ग्वे॒ऽअंगि॑रे॒दश॑ग्वेस॒प्तास्ये॑रेवतीरे॒वदू॒ष+ ॥ यू॒यंहिदे॑वीर्ऋ॒तयु॑ग्भि॒रश्वैः॑परिप्र॒याथभुव॑नानिस॒द्यः । प्र॒बो॒धयं॑तीरुषसःस॒संतं॑द्वि॒पाच्चतु॑ष्पा॒च्चरथा॑यजी॒वं+ ॥ १ ॥

(४।५।६) इदमुत्यदित्येकादशर्चस्यसूक्तस्यगौतमोवामदेवउषास्त्रिष्टुप् ।

क्वस्विदासांकतमापुराणीययाविधानाविदधुर्ऋभूणां । शुभंयच्छुभ्राऽउषसश्चरंतिनविज्ञायंतेसदृशीरजुर्याः+ ॥ ताघा
ताभद्राऽउषसःपुरासुरभिष्टिद्युम्नाऽऋतजातसत्याः । यास्वीजानःशशमानऽउक्थैःस्तुवञ्छंसंद्रविणंसद्यऽआप ॥ ता
ऽआचरंतिसमनापुरस्तात्समानतःसमनापप्रथानाः । ऋतस्यदेवीःसदसोबुधानागवांनसर्गाऽउषसोजरंते ॥ ताऽइ
न्न्वे३वसमनासमानीरमीतवर्णाऽउषसश्चरंति । गूहंतीरभ्वमसितंरुशद्भिःशुक्रास्तनूभिःशुचयोरुचानाः+ ॥ रयिंदि
वोदुहितरोविभातीःप्रजावंतंयच्छतास्मासुदेवीः । स्योनादावःप्रतिबुध्यमानाःसुवीर्यस्यपतयःस्याम ॥ तद्वोदिवोदु
हितरोविभातीरुपब्रुवऽउषसोयज्ञकेतुः । वयंस्यामयशसोजनेषुतद्द्यौश्चधत्तांपृथिवीचदेवी+ ॥ २ ॥ (४।५।७) प्र
तिष्यासूनरीजनीव्युच्छंतीपरिस्वसुः । दिवोऽअदर्शिदुहिता+ ॥ अश्वेवचित्रारुषीमातागवामृतावरी । सखाभूदश्वि
नोरुषाः+ ॥ उतसखास्यश्विनोरुतमातागवामसि । उतोषोवस्वऽईशिषे ॥ यावयद्द्वेषसंत्वाचिकित्वित्सूनृतावरि ।
प्रतिस्तोमैरभुत्स्महि ॥ प्रतिभद्राऽअदृक्षतगवांसर्गानरश्मयः । ओषाऽअप्राऽउरुज्रयः ॥ आपप्रुषीविभावरिव्याव
र्ज्योतिषातमः । उषोऽअनुस्वधामव ॥ आद्यांतनोषिरश्मिभिरांतरिक्षमुरुप्रियं । उषःशुक्रेणशोचिषा॥३॥ (४।५।८)
तद्देवस्यसवितुर्वार्यंमहद्वृणीमहेऽअसुरस्यप्रचेतसः । छर्दिर्येनदाशुषेयच्छतित्मनातन्नोमहाँऽउदयान्देवोऽअक्तुभिः ॥ ॥४७॥

(४।५।७) प्रतिष्येतिसप्तर्चस्यसूक्तस्यवामदेवउषागायत्री ।(४।५।८) तद्देवस्येतिसप्तर्चस्यसूक्तस्यवामदेवःसविताजगती ।

दि॒वोध॒र्ताभुव॑नस्यप्र॒जाप॑तिःपि॒शंगं॑द्रा॒पिंप्रति॑मुंचतेक॒विः । वि॒च॒क्ष॒णःप्र॒थय॑न्नापृ॒णन्नु॒र्व॑जीजनत्सवि॒तासु॒म्नमु॒क्थ्यं॑ ॥ आप्रा॒रजां॑सिदि॒व्यानि॒पार्थि॑वा॒श्लोकं॑दे॒वःकृ॑णुते॒स्वाय॒धर्म॑णे । प्रबा॒हूऽअ॑स्राक्सवि॒तासवी॑मनिनिवे॒शय॑न्प्रसु॒वन्न॒क्तुभि॒र्जग॑त् ॥ अदा॑भ्यो॒भुव॑नानिप्र॒चाक॑शद्व्र॒तानि॑दे॒वःस॑वि॒ताभिर॑क्षते । प्रास्रा॑ग्बा॒हूभुव॑नस्यप्र॒जाभ्यो॑धृ॒तव्र॑तोम॒होऽअज्म॑स्यराजति ॥ त्रिर॒ंतरि॑क्षंसवि॒ताम॑हित्व॒नात्रीरजां॑सिपरि॒भूस्त्रीणि॑रोच॒ना । ति॒स्रोदिवः॑पृथि॒वीस्ति॒स्रऽइ॑न्वतित्रि॒भिर्व्र॒तैर॒भिनो॑रक्षति॒त्मना॑ ॥ बृ॒हत्सु॑म्नःप्रसवी॒तानि॒वेश॑नो॒जग॑तःस्था॒तुरु॒भय॑स्य॒योव॒शी । सनो॑दे॒वःस॑वि॒ताशर्म॑यच्छत्व॒स्मेक्षया॑यत्रि॒वरू॑थ॒मंह॑सः ॥ आग॑न्दे॒वऽऋ॒तुभि॒र्वर्ध॑तु॒क्षयं॒दधा॑तुनःसवि॒तासु॑प्र॒जामिषं॑ । सनः॑क्ष॒पाभि॒रह॑भिश्चजिन्वतुप्र॒जाव॑तंर॒यिम॒स्मेसमि॑न्वतु ॥ ४ ॥ (४।५।९) अभू॑द्दे॒वःस॑वि॒तावंद्यो॒नुन॑ऽइ॒दानी॒मह्न॑ऽउप॒वाच्यो॒नृभिः॑ । वियोर॒त्नाभज॑तिमान॒वेभ्य॒ःश्रेष्ठं॑नो॒ऽअत्र॒द्रवि॑णं॒यथा॒दध॑त् ॥ दे॒वेभ्यो॒हिप्र॑थ॒मंय॒ज्ञियेभ्यो॑मृत॒त्वंसु॒वसि॑भा॒गमु॑त्त॒मं । आदिद्दा॒मानं॑सवित॒र्व्यू॑र्णुषेनूची॒नाजी॑वि॒तामानु॑षेभ्यः ॥ अचि॑त्ती॒यच्च॑कृ॒माद॑व्ये॒जने॑दी॒नैर्दक्षैः॑प्रभू॑तीपूरुष॒त्वता॑ । दे॒वेषु॑चसवित॒र्मानु॑षेषुच॒त्वंनो॒ऽअत्र॑सुवता॒दना॑गसः ॥ नप्र॒मिये॑सवि॒तुर्दैव्य॑स्य॒तद्यथा॒विश्वं॒भुव॑नंधारयि॒ष्यति॑ । यत्पृ॑थि॒व्यावरि॑म॒न्नास्वं॑गु॒रिर्वर्ष्म॑न्दि॒वःसु॒वाति॑स॒त्यम॑स्य॒तत्+ ॥ इंद्रं॑ज्येष्ठान्बृ॒हद्भ्यः॒पर्व॑तेभ्य॒ःक्षयाँ॑ऽएभ्यःसुवसिप॒स्त्याव॑तः । यथा॑यथाप॒तय॑न्तोवि

(४।५।९) अभूद्देवइतिषळर्चस्यसूक्तस्यवामदेवःसविताजगत्यंत्यात्रिष्टुप् ।

येमिरऽएवैवतंस्थुःसवितःसवायंते ॥ येतेत्रिरहन्त्सवितःसवासोदिवेदिवेसौभगमासुवंति । इंद्रोद्यावापृथिवीसिंधुर
द्भिरादित्यैर्नोऽअदितिःशर्मयंसत् ॥ ५ ॥ (४।५।१०) कोवस्त्रातावसवःकोवरूताद्यावाभूमीऽअदितेत्रासीथां
नः । सहीयसोवरुणमित्रमर्तात्कोवोध्वरेवरिवोधातिदेवाः ॥ प्रयेधामानिपूर्व्याण्यर्चान्वियदुच्छान्वियोतारोऽअमू
राः । विधातारोवितेदधुरजस्राऽऋतधीतयोरुरुचंतदस्राः+ ॥ प्रपस्त्या३मदितिंसिंधुमर्कैःस्वस्तिमीळेसख्यायदेवीं ।
उभेयथानोऽअहनीनिपातऽउषासानक्ताकरतामदब्धे ॥ व्यर्यमावरुणश्चेतिपंथामिषस्पतिःसुवितंगातुमग्निः । इंद्रा
विष्णूनृवदुषुस्तवानाशर्मनोयंतममवद्वरूथं ॥ आपर्वतस्यमरुतामवांसिदेवस्यत्रातुरव्रिभगस्य । पात्पतिर्जन्यादंहसोनो
मित्रोमित्रियादुतनऽउरुष्येत् ॥ ६ ॥ नूरोदसीऽअहिनाबुध्न्येनस्तुवीतदेवीऽअप्येभिरिष्टैः । समुद्रंनसंचरणेसनिष्यवो
घर्मस्वरसोनद्यो३अपव्रन् ॥ देवैर्नोदेव्यदितिर्निपातुदेवस्त्रातात्रायतामप्रयुच्छन् । नहिमित्रस्यवरुणस्यधासिमर्हाम
सिप्रमियंसान्वग्नेः+ ॥ अग्निरीशेवसव्यस्याग्निर्महःसौभगस्य । तान्यस्मभ्यंरासते ॥ उषोमघोन्यावहसूनृतेवार्या
पुरु । अस्मभ्यंवाजिनीवति ॥ तत्सुनःसविताभगोवरुणोमित्रोऽअर्यमा । इंद्रोनोराधसागमत्॥७॥ (४।५।११) मही

(४।५।१०) कोवस्त्रातेतिदशर्चस्यसूक्तस्यवामदेवोविश्वेदेवास्त्रिष्टुप्अंत्यास्तिस्रोगायत्र्यः। (भेदपक्षे–विश्वेदेवाः ७ अग्निः १ उषाः १ विश्वेदेवाः१एवंदश)। (४।५।११) महीइतिसप्तर्चस्यसूक्तस्यवामदेवोद्यावापृथिवीत्रिष्टुप्अंत्यास्तिस्रोगायत्र्यः।

द्यावा॑पृथि॒वीऽइ॒हज्ये॑ष्ठेरु॒चाभ॑वताशु॒चय॑द्भिर॒र्कैः । यत्सी॒ंवरि॑ष्ठेबृह॒तीवि॑मि॒न्वन्नु॒वद्धो॒क्षाप॑प्रथा॒नेभि॒रेवैः॑ ॥ दे॒वीदे॒वेभि॑र्यज॒तेयज॑त्रै॒रमि॑नतीतस्थतुरु॒क्षमा॑णे । ऋ॒ताव॑रीऽअ॒द्रुहा॑दे॒वपु॑त्रेय॒ज्ञस्य॑ने॒त्रीशु॒चय॑द्भिर॒र्कैः+ ॥ सऽइत्स्वपा॒भुव॑नेष्वास॒यऽइ॒मेद्यावा॑पृथि॒वीज॒जान॑ । उ॒र्वीग॑भी॒रेरज॑सीसु॒मेके॑ऽअवं॒शेधीर॒ःशच्या॒सम॑रत् ॥ नूरो॑दसीबृ॒हद्भि॑र्नो॒वरू॑थैः॒पत्नी॑वद्भिरि॒षय॑न्तीस॒जोषा॑ः । उ॒रू॒चीविश्वे॑यज॒तेनिपा॑तंधि॒यास्या॑मर॒थ्य॑ःसदा॒साः+ ॥ प्रवा॒ंमहि॒द्यवी॑ऽअ॒भ्युप॑स्तुतिंभरामहे । शु॒चीऽउ॒पप्रश॑स्तये ॥ पु॒ना॒नेत॒न्वा॑मि॒थःस्वेन॒दक्षे॑णराजथः । ऊ॒ह्याथे॑स॒नादृ॒तं+ ॥ म॒हीमि॒त्रस्य॑साधथ॒स्तर॑न्ती॒पिप्र॑तीऽऋ॒तं । परि॑य॒ज्ञंनिषे॑दथुः ॥ ८ ॥ (४।५।१२) क्षेत्र॑स्य॒पति॑नाव॒यंहि॒तेने॑वजयामसि । गामश्वं॑पोषयि॒त्न्वासनो॑मृळाती॒दृशे॑ ॥ क्षेत्र॑स्यपते॒मधु॑मन्तमू॒र्मिंधे॒नुरि॑व॒पयो॑ऽअ॒स्मासु॑धुक्ष्व । म॒धु॒श्चुतं॑घृ॒तमि॑व॒सुपू॑तमृ॒तस्य॑नः॒पत॑योमृळयन्तु ॥ मधु॑मती॒रोष॑धी॒र्द्याव॒ऽआपो॒मधु॑मन्नोभवत्व॒न्तरि॑क्षं । क्षेत्र॑स्य॒पति॒र्मधु॑मान्नोऽअ॒स्त्वरि॑ष्यन्तो॒ऽअन्वे॑नंचरेम ॥ शु॒नंवा॒हाः

(४।५।१२) क्षेत्रस्येत्यष्टर्चस्यसूक्तस्यवामदेवआद्यानांतिसृणांक्षेत्रपतिर्देवताचतुर्थ्याःशुनःपंचम्यष्टम्योःशुनासीरौषष्ठीसप्तम्योःसीता आद्याचतुर्थीषष्ठीसप्तम्योनुष्टुभःपंचमीपुरउष्णिक्शेषास्त्रिष्टुभः (अत्रचतुर्थ्याःशुनोऽदंतः। तथाशुनासीरावित्यत्रकेचिद्वाय्वादित्यावित्युच्चारयन्तितन्नचतुरस्रं यतःवायुःशुनःसूर्यएवात्रसीरःशुनासीरौवायुसूर्यौवदंति। शुनासीरंयास्कइंद्रंतुमेनेसूर्येंद्रौतौमन्यतेशाकपूणिरितिशुनासीरस्वरूपेशौनकेनाचार्यमतदर्शनव्याजेनवैविध्यंप्रतिपादितंतस्मात्प्रकृतिभूतशुनासीरशब्देनोच्चारणंयुक्तं)।

शु॒नंन॒रः॑शु॒नंकृ॑षतु॒लांग॑लं । शु॒नंव॑र॒त्राब॑ध्यंतां॒शु॒नमष्ट्रा॒मुदिं॑गय ॥ शुना॑सीरावि॒मांवाचं॑जुषेथां॒यद्दि॒विच॒क्रथुः॒पयः॑ । ते॒मामुप॑सिंचतं ॥ अ॒र्वाची॑सुभगेभव॒सीते॒वंदा॑महेत्वा । यथा॑नःसु॒भगास॑सि॒यथा॑नःसु॒फलास॑सि ॥ इंद्र॒ःसीतां॒निगृ॑ह्णातु॒तांपू॒षानु॑यच्छतु । सान॒ःपय॑स्वतीदुहा॒मुत्त॑रामुत्त॒रांसमां॑ ॥ शु॒नंन॒ःफाला॒विकृ॑षंतु॒भूमिं॑शु॒नंकी॒नाशा॑ऽअ॒भियं॑तुवा॒हैः । शु॒नंप॒र्जन्यो॒मधु॑ना॒पयो॑भि॒ःशुना॑सीराशु॒नम॒स्मासु॑धत्तं ॥ ९ ॥ (४।५।१३) स॒मु॒द्रादू॒र्मिर्मधु॑माँ॒ऽउदा॑र॒दुपां॒शुना॒सम॑मृ॒तत्वमा॑नट् । घृ॒तस्य॒नाम॒गुह्यं॒यदस्ति॑जि॒ह्वादे॒वाना॑म॒मृत॑स्य॒नाभिः॑ ॥ व॒यंनाम॒प्रब्र॑वामाघृ॒तस्या॒स्मिन्य॒ज्ञेधा॑रयाम॒ानमो॑भिः । उप॑ब्र॒ह्माशृ॑णवच्छ॒स्यमा॑नं॒चतुः॑शृंगोवमीद्गौ॒रऽए॒तत्^+^ ॥ च॒त्वारि॒शृंगा॒त्रयो॑ऽअस्य॒पादा॒द्वेशी॒र्षेस॒प्तहस्ता॑सोऽअस्य । त्रिधा॑ब॒द्धोवृ॑ष॒भोरो॑रवीतिम॒होदे॒वोमर्त्या॒ँऽआवि॑वेश ॥ त्रिधा॑हि॒तंप॒णिभि॑र्गु॒ह्यमा॑नं॒गवि॑दे॒वासो॑घृ॒तमन्व॑विंदन् । इंद्र॒ऽएकं॒सूर्य॒ऽएकं॑जजानवे॒नादेकं॑स्व॒धया॒निष्ट॑तक्षुः ॥ ए॒ताऽअ॑र्षंति॒हृद्या॑त्समु॒द्राच्छ॒तव्र॑जारि॒पुणा॒नाव॒चक्षे॑ । घृ॒तस्य॒धारा॑ऽअ॒भिचा॑कशीमिहि॒रण्ययो॑वे॒तसो॒मध्य॑ऽआसां ॥ १० ॥ स॒म्यक्स्र॑वंतिस॒रितो॒नधेना॑ऽअं॒तर्हृ॒दामन॑सापू॒यमा॑नाः । ए॒तेऽअ॑र्षंत्यू॒र्मयो॑घृ॒तस्य॑मृ॒गाऽइ॑वक्षिप॒णोरीष॑माणाः ॥ सिंधो॑रिवप्रा॒ध्व॒नेशू॑घ॒नासो॒वात॑प्रमियः॑पतयंतिय॒ह्वाः । घृ॒तस्य॒धारा॑ऽअरु॒षोनवा॒जीकाष्ठा॑भि॒न्दन्नू॒र्मिभि॒ःपिन्व॑मानः ॥ अ॒भिप्र॑वंत॒सम॑नेव॒योषाः॑कल्या॒ण्य॑१॒ःस्मय॑मानासो॒ऽअ॒ग्निं । घृ॒

(४।५।१३) समुद्रादूर्मिरित्येकादशर्चस्यसूक्तस्यवामदेवोग्निस्त्रिष्टुबंत्याजगती (सूर्योवापोवागावोवाघृतस्तुतिर्वादेवता) ।

तस्यधाराःसमिधोनसंततांजुषाणोहर्यतिजातवेदाः ॥ कन्याऽइववहतुमेतवाउऽअंज्यंजानाऽअभिचाकशीमि । यत्रसोमःसूयतेयत्रयज्ञोघृतस्यधाराऽअभितत्पवंते ॥ अभ्यर्षतसुष्टुतिंगव्यमाजिमस्मासुभद्राद्रविणानिधत्त । इमंयज्ञंनयतदेवतानोघृतस्यधारामधुमत्पवंते ॥ धामन्तेविश्वंभुवनमधिश्रितमंतःसमुद्रेहृद्यं१तरायुषि । अपामनीकेसमिथेयऽआभृतस्तमश्यामधुमंतंतऽऊर्मिं+ ॥ ११ ॥ (इतिवामदेवंचतुर्थंमंडलंसमाप्तं अत्रसूक्तानि ५८) (५।१।१) अबोध्यग्निःसमिधाजनानांप्रतिधेनुमिवायतीमुषासं । यह्वाऽइवप्रवयामुज्जिहानाःप्रभानवःसिस्रतेनाकमच्छ ॥ अबोधिहोतायजथायदेवानूर्ध्वोऽअग्निःसुमनाःप्रातरस्थात् । समिद्धस्यरुशददर्शिपाजोमहान्देवस्तमसोनिरमोचि ॥ यदींगणस्यरशनामजीगःशुचिरङ्क्तेशुचिभिर्गोभिरग्निः । आद्दक्षिणायुज्यतेवाजयंत्युत्तानामूर्ध्वोऽअधयज्जुहूभिः ॥ अग्निमच्छादेवयतामनांसिचक्षूंषीवसूर्येसंचरंति । यदींसुवातेऽउषसाविरूपेश्वेतोवाजीजायतेऽअग्रेऽअह्नां ॥ जनिष्टहिजेन्योऽअग्रेऽअह्नांहितोहितेष्वरुषोवनेषु । दमेदमेसप्तरत्नादधानोग्निर्होतानिषसादायजीयान् ॥ अग्निर्होतान्यसीदद्यजीयानुपस्थेमातुःसुरभाऽउलोके । युवाकविःपुरुनिष्ठऽऋतावाधर्ताकृष्टीनामुतमध्यऽइद्धः ॥ १२ ॥ प्रणुत्यंविप्रमध्वरेषुसाधुमग्निंहोतारमीळतेनमोभिः । आयस्ततानरोदसीऽऋतेननित्यंमृजंतिवाजिनंघृतेन ॥ मार्जाल्योमृज्यतेस्वे

आत्रेयेपंचमेमंडलेषडनुवाकाः (५।१।१) अबोधीतिद्वादशर्चस्यसूक्तस्यआत्रेयौबुधगविष्ठिरावग्निस्त्रिष्टुप् ।

दमूं॑नाःकविप्र॑श॒स्तोऽअति॑थिःशि॒वोनः॑ । स॒हस्र॑शृंगोवृ॒ष॒भस्तदो॑जा॒विश्वाँ॑ऽअ॒ग्ने॒सह॑सा॒प्रास्य॒न्यान्+ ॥ प्रस॒द्योऽअं॑ग्ने॒ऽअत्यैं॑ष्य॒न्याना॒विर्य॑स्मै॒चारु॑तमोब॒भूथं॑ । ई॒ळेन्यो॑वपु॒ष्यो॑वि॒भावा॑प्रि॒योवि॒शामति॑थि॒र्मानु॑षीणां ॥ तुभ्यं॑भरंतिक्षि॒तयो॑यविष्ठब॒लिमं॑ग्ने॒ऽअंति॑त॒ऽओतदू॒रात् । आभं॑दिं॑ष्ठस्यसुम॒तिंचिं॑किद्धिबृ॒हत्ते॑ऽअग्ने॒महि॒शर्म॑भ॒द्रं+ ॥ आद्यरथं॑भानुमोभानु॒मंत॒मग्ने॒तिष्ठ॑यज॒तेभि॒ःसमं॑तं । वि॒द्वान्पं॑थी॒नामु॒र्वं॑१॒तरिं॑क्ष॒मेहदे॒वान्हं॑वि॒रद्या॑यवक्षि ॥ अवो॑चामक॒वये॒मेध्या॑य॒वचो॑व॒न्दारु॑वृ॒ष॒भाय॒वृष्णे॑ । गवि॑ष्ठिरो॒नम॑सा॒स्तोम॑म॒ग्नौदि॒वी॑वरु॒क्मम॑रु॒व्यंचं॑मश्रेत् ॥ १३ ॥ (५।१।२) कु॒मा॒रंमा॒ता॒यु॑व॒तिःसमुं॑ब्ध॒ंगुहा॑बिभर्ति॒नदं॑दातिपि॒त्रे । अनी॑कमस्य॒नमि॒नज्जना॑सःपु॒रःपं॑श्यंति॒निहि॑तमर॒तौ ॥ कमे॒तंत्वंयु॑वतेकुमा॒रंपेषी॑बिभर्षि॒महि॑षीजजान । पू॒र्वीर्हिंगर्भः॑श॒रदो॑व॒वर्धा॒पश्यं॑जा॒तंयदसू॑तमा॒ता+ ॥ हिरं॑ण्यदं॒तंशुचि॑वर्णमा॒रात्क्षेत्रा॑दपश्यमा॒युधा॒मिमा॑नं । द॒दा॒नोऽअ॑स्मा॒ऽअमृतं॑वि॒पृक्व॒त्किंमाम॑नि॒न्द्राःकृं॑णवन्ननु॒क्थाः+ ॥ क्षेत्रा॑दपश्यंसनु॒तश्च॒रं॑तंसु॒मद्यू॒थंनपु॒रुशोभ॑मानं । नता॑ऽअगृभ्र॒न्नज॑निष्ट॒हिषःप॑लि॒क्नीरिद्यु॑व॒तयो॑भवंति ॥ केमे॒मर्य॒कंवि॑यवं॒तगोभि॒र्नयेषां॑गो॒पाऽअर॑णश्चि॒दासं॑ । यईंज॒गृभुरव॒तेसृं॑ज॒न्त्वाजा॑तिप॒श्वऽउप॑नश्चिकि॒त्वान्+ ॥ व॒सांरा॑जानं॑वस॒तिंजना॑ना॒मरा॑तयो॒निदं॑धु॒र्मर्त्यै॑षु । ब्रह्मा॒

(५।१।२) कुमारमितिद्वादशर्चस्यसूक्तस्यआत्रेयःकुमारऋषिःकमेतंविज्योतिषेत्यनयोर्जारोवृशोग्निस्त्रिष्टुपूअंत्याशक्करी (पाक्षिको जारोवृशःसर्वसूक्तेपि । यद्यपिमुद्रितामुद्रितपुस्तकेषुवहुत्रजानोवृशइत्युपलभ्यतेतथापिजरनाम्नऋषेःपुत्रोजारोवृशइतिभाष्येस्पष्टं)।

Digitization by eGangotri. Funding MHRD-Delhi

ण्यत्रेरवतंसृजंतुनिंदितारोनिंद्यासोभवंतु ॥ १४ ॥ शुनश्चिच्छेपंनिदितंसहस्राद्यूपादमुंचोऽअशमिष्टहिषः । एवास्मदग्नेविमुमुग्धिपाशान्होतश्चिकित्वऽइहतूनिषद्य ॥ हृणीयमानोऽअपहिमदय्येःप्रमेदेवानांव्रतपाऽउवाच । इंद्रोविद्वाँऽअनुहित्वाचचक्षतेनाहमग्नेऽअनुशिष्टऽआगां ॥ विज्योतिषाबृहताभात्यग्निराविर्विश्वानिकृणुतेमहित्वा । प्रादेवीर्मायाःसहतेदुरेवाःशिशीतेशृंगेरक्षसेविनिक्षे ॥ उतस्वानासोदिविषंत्वग्नेस्तिग्मायुधारक्षसेहंतवाऽउ । मदेचिदस्यप्ररुजंतिभामानवरंतेपरिबाधोऽअदेवीः ॥ एतंतेस्तोमंतुविजातविप्रोरथंनधीरःस्वपाऽअतक्षं । यदीदग्नेप्रतित्वंदेवहर्याःस्वर्वतीरपऽएनाजयेम ॥ तुविग्रीवोवृषभोवावृधानोशत्र्व१र्यःसमजातिवेदः । इतीममग्निममृताऽअवोचन्बर्हिष्मतेमनवेशर्मयंसद्धविष्मतेमनवेशर्मयंसत् ॥ १५ ॥ (५।१।३) त्वमग्नेवरुणोजायसेयत्त्वंमित्रोभवसियत्समिद्धः । त्वेविश्वेसहसस्पुत्रदेवास्त्वमिंद्रोदाशुषेमर्त्याय ॥ त्वमर्यमाभवसियत्कनीनांनामस्वधावन्गुह्यंबिभर्षि । अंजंतिमित्रंसुधितंनगोभिर्यद्दंपतीसमनसाकृणोषि ॥ तवश्रियेमरुतोमर्जयंतरुद्रयत्तेजनिमचारुचित्रं । पदंयद्विष्णोरुपमंनिधायितेनपासिगुह्यंनामगोनां ॥ तवश्रियासुदृशोदेवदेवाःपुरूदधानाऽअमृतंसपंत । होतारमग्निंमनुषोनिषेदुर्दशस्यंतऽउशिजःशंसमायोः+ ॥ नत्वद्धोताऽपूर्वोऽअग्नेयजीयान्नकाव्यैःपरोऽअस्तिस्वधावः । विशश्चयस्याऽअतिथिर्भवासिसय

(५।१।३) त्वमग्नइतिद्वादशर्चस्यसूक्तस्यआत्रेयोवसुश्रुतोग्निस्तृतीयायामरुद्रुद्रविष्णवस्त्रिष्टुबाद्याविराट् ।

ग्नेनंवनवद्देवमर्तान् ॥ वयमंग्नेवनुयामत्वोतावसूयवोहविषाबुध्यमानाः । वयंसमर्येविदथेष्वह्नांवयंरायासहसस्पुत्रम
र्तान् ॥ १६ ॥ योनऽआगोऽअभ्येनोभरात्यधीदघमघशंसेदधात । जहीचिकित्वोऽअभिशस्तिमेतामग्नेयोनोमर्चयं
तिद्वयेन ॥ त्वामस्याव्युषिदेवपूर्वेदूतंकृण्वानाऽअयजंतहव्यैः । संस्थेयदग्नऽईयसेरयीणांदेवोमर्तैर्वसुभिरिध्यमानः ॥
अवस्पृधिपितरंयोधिविद्वान्पुत्रोयस्तेसहसःसूनऽऊहे । कदाचिकित्वोऽअभिचक्षसेनोग्नेकदाँऽऋतचिद्यातयासे ॥ भू
रिनामवंदमानोदधातिपितावसोयदितज्जोषयासे । कुविद्देवस्यसहसाचकानःसुम्नमग्निर्वनतेवावृधानः+ ॥ त्वमंगज
रितारंयविष्ठविश्वान्यग्नेदुरितातिपर्षि । स्तेनाऽअदृश्रन्रिपवोजनासोज्ञातकेतावृजिनाऽअभूवन् ॥ इमेयामासस्त्व
द्रिगभूवन्वसवेवातदिदागोऽअवाचि । नाहायमग्निरभिशस्तयेनोनरीषतेवावृधानःपरादात् ॥ १७ ॥ (५।१।४)
त्वामग्नेवसुपतिंवसूनामभिप्रमंदेऽअध्वरेषुराजन् । त्वयावाजंवाजयंतोजयेमाभिष्यामपृत्सुतीर्मर्त्यानां ॥ हव्यवाळ
ग्निरजरःपितानोविभुर्विभावासुदृशीकोऽअस्मे । सुगार्हपत्याःसमिषोदिदीह्यस्मद्र्य१क्संमिमीहिश्रवांसि ॥ विशांक
विंविश्पतिंमानुषीणांशुचिंपावकंघृतपृष्ठमग्निं । निहोतारंविश्वविदंदधिध्वेसदेवेषुवनतेवार्याणि ॥ जुषस्वाग्नऽइळया
सजोषायतमानोरश्मिभिःसूर्यस्य । जुषस्वनःसमिधंजातवेदऽआचदेवान्हविरद्यायवक्षि ॥ जुष्टोदमूनाऽअतिथिर्दु ॥५१॥

(५।१।४) त्वामग्नइत्येकादशर्चस्यसूक्तस्यवसुश्रुतोग्निस्त्रिष्टुप ।

रोणऽइमंनोयज्ञमुपयाहिविद्वान् । विश्वाऽअग्नेऽअभियुजोविहत्याशत्रूयतामाभराभोजनानि ॥ १८ ॥ वधेनदस्युंप्रहिचातयस्ववयःकृण्वानस्तन्वे३स्वायै । पिपर्षियत्सहसस्पुत्रदेवान्त्सोऽअग्नेपाहिनृतमवाजेऽअस्मान् ॥ वयंतेऽअग्नऽउक्थैर्विधेमवयंहव्यैःपावकभद्रशोचे । अस्मेरयिंविश्ववारंसमिन्वास्मेविश्वानिद्रविणानिधेहि ॥ अस्माकमग्नेऽअध्वरंजुषस्वसहसःसूनोत्रिषधस्थहव्यं । वयंदेवेषुसुकृतःस्यामशर्मणानस्त्रिवरूथेनपाहि ॥ विश्वानिनोदुर्गहाजातवेदःसिंधुंननावादुरितातिपर्षि । अग्नेऽअत्रिवन्नमसागृणानो३स्माकंबोध्यवितातनूनां ॥ यस्त्वाहृदाकीरिणामन्यमानोमर्त्यंमर्त्योजोहवीमि । जातवेदोऽयशोऽअस्मासुधेहिप्रजाभिरग्नेऽअमृतत्वमश्यां ॥ यस्मैत्वंसुकृतेजातवेदऽउलोकमग्नेकृणवःस्योनं । अश्विनंसपुत्रिणंवीरवंतंगोमंतंरयिंनशतेस्वस्ति ॥ १९ ॥ (५।१।५) सुसमिद्धायशोचिषेघृतंतीव्रंजुहोतन । अग्नयेजातवेदसे ॥ नराशंसःसुषूदतीमंयज्ञमदाभ्यः । कविर्हिमधुहस्त्यः ॥ ईळितोऽअग्नऽआवहेंद्रंचित्रमिहप्रियं । सुखैरथेभिरूतये ॥ ऊर्णम्रदाविप्रथस्वाभ्य१र्काऽअनूषत । भवानःशुभ्रसातये ॥ देवीर्द्वारोविश्रयध्वंसुप्रायणानऽऊतये । प्रप्रयज्ञंपृणीतन ॥ २० ॥ सुप्रतीकेवयोवृधायह्वीऽऋतस्यमातरा । दोषामुषासमीमहे ॥ वातस्यप

(५।१।५) सुसमिद्धायेत्येकादशर्चस्यसूक्तस्यवसुश्रुतःइध्मोनराशंसइळोवर्हिर्देवीर्द्वारउषासानक्तादैव्यौहोतारौसरस्वतीळाभारत्यस्त्वष्टावनस्पतिस्वाहाकृतयोगायत्री ।

त्मंन्नीळितादैव्याहोतारामनुषः । इमंनोयज्ञमागत ॥ इळासरस्वतीमहीतिस्रोदेवीर्मयोभुवः । बर्हिःसीदंत्वस्रिधः ॥ शिवस्त्वष्टरिहागहिविभुःपोषंऽउतत्मना । यज्ञेयज्ञेनऽउदव ॥ यत्रवेत्थवनस्पतेदेवानांगुह्यानामानि । तत्रहव्यानिगामय ॥ स्वाहाग्नयेवरुणायस्वाहेंद्रायमरुद्भ्यः । स्वाहादेवेभ्योहविः+ ॥ २१ ॥ (५।१।६) अग्निंतंमन्येयोवसुरस्तंयंयंतिधेनवः । अस्तमर्वंतऽआशवोस्तंनित्यासोवाजिनऽइषंस्तोतृभ्यऽआभर ॥ सोऽअग्निर्योवसुर्गृणेसंयमायंतिधेनवः । समर्वंतोरघुद्रुवःसंसुजातासःसूरयऽइषँ० ॥ अग्निर्हिवाजिनंविशेददातिविश्वचर्षणिः । अग्नीरायेस्वाभुवंसप्रीतोयातिवार्यमिषँ० ॥ आतेऽअग्नऽइधीमहिद्युमंतंदेवाजरँ । यद्धस्यातेपनीयसीसमिद्दीदयतिद्यवीषँ० ॥ आतेऽअग्नऽऋचाहविःशुक्रस्यशोचिषस्पते । सुश्चंद्रदस्मविश्पतेहव्यवाट्तुभ्यंहूयतऽइषँ० ॥ २२ ॥ प्रोत्येऽअग्नयोग्निषुविश्वंपुष्यंतिवार्यँ । तेहिन्विरेतऽइन्विरेतऽइषण्यंत्यानुषगिषँ० ॥ तवत्येऽअग्नेऽअर्चयोमहिव्राधंतवाजिनः । येपत्वभिःशफानांव्रजाभुरंतगोनामिषँ० ॥ नवानोऽअग्नऽआभरस्तोतृभ्यःसुक्षितीरिषः । तेस्यामयऽआनृचुस्त्वादूतासोदमेदमऽइषँ० ॥ उभेसुश्चंद्रसर्पिषोदर्वीश्रीणीषऽआसनि । उतोनऽउत्पुपूर्याऽउक्थेषुशवसस्पतऽइषँ० ॥ एवाँऽअग्निमजुर्यमुर्गीर्भिर्यज्ञेभिरानुषक् । दधदस्मेसुवीर्यमुतत्यदाश्वश्व्यमिषँ० ॥ २३ ॥ (५।१।७) सखायःसंवःसम्यंचमिषंस्तो

(५।१।६) अग्निंतामितिदशर्चस्यसूक्तस्यवसुश्रुतोग्निःपंक्तिः । (५।१।७) सखायःसमितिदशर्चस्यसूक्तस्यआत्रेयइषोग्निरनुष्टुबंत्यापंक्तिः ।

मैंचाग्नयैं । वर्षिष्ठायक्षितीनामूर्जोनप्त्रेसहस्वते ॥ कुत्राचिद्यस्यसमृतौरण्वानरोनृषदने । अर्हंतश्चिद्यमिंधतेसंजनयंतिजंतवः ॥ संयद्दिषोवनामहेसंहव्यामानुषाणां । उतद्युम्नस्यशवसऽऋतस्यरश्मिमाददे ॥ सःस्मांकृणोतिकेतुमानक्तंचिद्दूरऽआसते । पावकोयद्वनस्पतीन्प्रस्मामिनात्यजरः ॥ अवस्मयस्यवेषणेस्वेदंपथिषुजुह्वति । अभीमहस्वजेन्यंभूमापृष्ठेवरुरुहुः ॥ २४ ॥ यंमर्त्यःपुरुस्पृहंविदद्विश्वस्यधायसे । प्रस्वादनंपितूनामस्ततातिंचिदायवे ॥ सहिष्माधन्वाक्षितंदातानदात्यापशुः । हिरिश्मश्रुःशुचिदन्नृभुरनिभृष्टतविषिः ॥ शुचिःष्मयस्माऽअत्रिवत्प्रस्वधितीवरीयते । सुषूरसूतमाताक्राणायदानशेभगं ॥ आयस्तेसर्पिरासुतेग्नेशमस्तिधायसे । ऐषुद्युम्नमुतश्रवऽआचित्तंमर्त्येषुधाः ॥ इतिचिन्मन्युमध्रिजस्त्वादातमापशुंददे । आदग्नेऽअपृणतोत्रिःसासह्याद्दस्यूनिषःसासह्यान्नॄन्+ ॥ २५ ॥ (५।१।८) त्वामग्नऽऋतायवःसमीधिरेप्रत्नंप्रत्नासऽऊतयेसहस्कृत । पुरुश्चंद्रंयजतंविश्वधायसंदमूनसंगृहपतिंवरेण्यं ॥ त्वामग्नेऽअतिथिंपूर्व्यंविशःशोचिष्केशंगृहपतिंनिषेदिरे । बृहत्केतुंपुरुरूपंधनस्पृतंसुशर्माणंस्ववसंजरद्विषं ॥ त्वामग्नेमानुषीरीळतेविशोहोत्राविदंविविचिंरत्नधातमं । गुहासंतंसुभगविश्वदर्शतंतुविष्वणसंसुयजंघृतश्रियं ॥ त्वामग्नेधर्णसिंविश्वधावयंगीर्भिर्गृणंतोनमसोपसेदिम । सनोजुषस्वसमिधानोऽअंगिरोदेवोमर्तस्ययशसासुदी

(५।१।८) त्वामग्नऋतायवइतिसप्तर्चस्यसूक्तस्यइषोग्निर्जगती ।

तिभि॑ः ॥ त्वम॑ग्नेपु॒रु॒रूपो॑वि॒शेवि॑शे॒वयो॑दधासिप्र॒त्नथा॑पुरुष्टुत । पु॒रूण्यन्ना॒सह॒साविरा॑जसि॒त्विषि॒ःसाते॑तित्विषा॒णस्य॒
नाधृषे॑ ॥ त्वाम॑ग्नेसमिधा॒नंय॑विष्ठ्यदे॒वादू॒तंच॑क्रिरेहव्य॒वाह॑नं । उ॒रु॒ज्रयं॑संघृ॒तयो॑नि॒माहु॑तंत्वे॒षंचक्षु॑र्दधिरेचोद॒यन्म॑ति ॥
त्वाम॑ग्नेप्र॒दिव॒ऽआहु॑तंघृ॒तैःसु॑म्ना॒यव॑ःसुष॒मिधा॒समी॑धिरे । सवा॑वृधा॒नऽओष॑धीभिरु॒क्षि॒तो॒३॒भिज्रयां॑सि॒पार्थि॑वा॒विति॑
ष्ठसे ॥ २६ ॥ इतितृतीयाष्टकेऽष्टमोध्यायः ॥ ८ ॥ ॥ ॥ ॥ ॥

चतुर्विंशाध्यायेवर्गाः २६ सूक्तानि १६ ऋचः १५२॥ त्यागः ॥ उषस. १८ सवित्र. १३ विश्वेभ्योदेवेभ्य. ७ अग्नय. उषस. विश्वेभ्योदेवेभ्य. द्यावापृथिवीभ्या. ७ क्षेत्रपतय. ३ शुनाये. शुनासीराभ्या. सीताया. २ शुनासीराभ्या. अग्नय. ३७ मरुद्रुद्रविष्णुभ्य. अग्नय. २० समिद्धायाग्नय. नराशंसाये. इळाये बर्हिषइ. देवीभ्योद्वार्भ्यइ. उषासानक्ताभ्या. देवीभ्यांहोतृभ्यां. प्रचेतोभ्या. सरस्वतीळाभारतीभ्य. त्वष्ट्र. वनस्पतय. स्वाहाकृतिभ्य. अग्नय. २७ ॥ इतितृतीयेऽष्टमः ॥ ८ ॥

॥ इतितृतीयोऽष्टकःसमाप्तः ॥

॥ अथचतुर्थाष्टकप्रारंभः ॥

ॐत्वामग्नेगयोंत्यापंचम्यौपंक्तीअन्नओजिष्ठमंत्याचतुर्थ्यौचंजनस्यषट्सुतंभरोजागतंप्राग्नयेर्चंतोगायत्रंत्वंग्निंस्तो
मेनंप्रवेधसेपंचांगिरसोधरुणोंबृहत्पूरुःपंक्त्यंतंह्यायज्ञैःप्रातर्मृक्तवाहांद्वितोभ्यवस्थावव्रिंर्गायत्रावनुष्टुभौविरा
ड्रूपांयमग्नेचतुष्कंप्रयस्वंतःपंक्त्यंतंहंमनुष्वत्ससःप्रविश्वसामन्विश्वसामांग्नेद्युम्नोविश्वचर्षणिरंग्नेत्वंगौपायना
लौपायनावांबंधुःसुबंधुःश्रुतबंधुर्विप्रबंधुश्चैकर्चाद्वैपदमच्छावोनववसूयवआनुष्टुभमंग्नेगायत्रमंत्यावैश्वदेव्य
नस्वंताषट्त्रैवृष्णःपौरुकुत्स्यौद्वौत्र्यरुणत्रसदस्यूराजानौभारतश्चाश्वमेधोंत्यास्तिस्रोनुष्टुभोंनात्मात्मनेदद्यादि
तिसर्वास्वत्रिंकेचिदंत्यैंद्राग्नीसमिद्धोविश्ववारात्रेयींत्रिष्टुब्जगतींत्रिष्टुवनुष्टुब्गायत्र्यौत्र्यर्यमापंचोनागौरिवीतिः
शाक्त्यऐंद्रमुशनायदौशनसोवापादःक्वस्यबभ्रुर्ऋणंचयोप्यत्रराजास्तुतंइंद्रोरथायसप्तोनावस्युरुग्रमितिकौत्स्यो
शनसौवापादौपरैंद्राकौत्स्यदर्दद्वादशगातुः ॥ १ ॥ ॥ ॥ ॥

॥ श्रीगणेशायनमः ॥ हरिःओम् ॥ (५।१।९) त्वामंग्नेहविष्मंतोदेवंमर्तासऽईळते । मन्येत्वाजातवेदसंसह
व्यावक्ष्यानुषक्+ ॥ अग्निर्होतादास्वतःक्षयंस्यवृक्तबर्हिषः । संयज्ञासश्चरंतियंसंवाजासःश्रवस्यवः ॥ उतस्मयंशिशुंय
थानवंजनिष्टारणी । धर्तारंमानुषीणांविशामग्निंस्वध्वरं+ ॥ उतस्मदुर्गृभीयसेपुत्रोनह्वार्याणां । पुरूयोदग्धासिवनाग्ने

(५।१।९) त्वामग्नइतिसप्तर्चस्यसूक्तस्यात्रेयोगयोग्निरनुष्टुप्पंचमीसप्तम्यौपंक्ती ।

पशुर्नयवसे ॥ अधस्मयस्यार्चयःसम्यक्संयातिधूमिनः । यदीमहत्रितोदिव्युपध्मातेवधमतिशिशीतेध्मातरीयथा ॥
तवाहमग्नऽऊतिभिर्मित्रस्यचप्रशस्तिभिः । द्वेषोयुतोनदुरितातुर्याममर्त्यानां ॥ तंनोऽअग्नेऽअभीनरोरयिंसहस्वऽआ
भर । सक्षेपयत्सपोषयन्भुवद्वाजस्यसातयऽउतैधिपृत्सुनोवृधे+ ॥ १ ॥ (५।१।१०) अग्नऽओजिष्ठमाभरद्युम्नमस्म
भ्यमध्रिगो । प्रनोरायापरीणसारत्सिवाजायपंथां ॥ त्वंनोअग्नेऽअद्भुतक्रत्वादक्षस्यमंहना । त्वेऽअसुर्यं१मारुहत्क्रा
णामित्रोनयज्ञियः ॥ त्वंनोऽअग्नऽएषांगयंपुष्टिंचवर्धय । येस्तोमेभिःप्रसूरयोनरोमघान्यानशुः+ ॥ येऽअग्नेचंद्रतेगि
रःशुंभंत्यश्वराधसः । शुष्मेभिःशुष्मिणोनरोदिवश्चिद्येषांबृहत्सुकीर्तिर्बोधतित्मना । तवत्येऽअग्नेऽअर्चयोभ्राजंतोयं
तिधृष्णुया । परिज्मानोनविद्युतःस्वानोरथोनवाजयुः+ ॥ नूनोऽअग्नऽऊतयेसवाधसश्चरातये । अस्माकासश्चसूर
योविश्वाऽआशास्तरीषणि ॥ त्वंनोऽअग्नेऽअंगिरःस्तुतस्तवानऽआभर ॥ होतर्विभ्वासहंरयिंस्तोतृभ्यःस्तवसेचनऽउतै
धिपृत्सुनोवृधे+ ॥ २ ॥ (५।१।११) जनस्यगोपाऽअजनिष्टजागृविरग्निःसुदक्षःसुवितायनव्यसे । घृतप्रतीकोबृह
तादिविस्पृशाद्युमद्विभातिभरतेभ्यःशुचिः ॥ यज्ञस्यकेतुंप्रथमंपुरोहितमग्निंनरस्त्रिषधस्थेसमीधिरे । इंद्रेणदेवैःसरथं

(५।१।१०) अग्नओजिष्ठमितिसप्तर्चस्यसूक्तस्यगयोग्निरनुष्टुप्चतुर्थीसप्तम्यौपंक्ती। (५।१।११) जनस्येतिषळर्चस्यसूक्तस्यात्रेयः
सुतंभरोग्निर्जगती ।

सब॒र्हिंषि॒सीद॒न्निहोता॑य॒जथा॑यसु॒क्रतुः ॥ असँमृष्टोजायसेमा॒त्रोःशुचि॑र्मं॒द्रःक॒विरुद॑तिष्ठोवि॒वस्व॑तः । घृ॒तेन॑त्वावर्ध॑यन्न ग्नऽआहुतधू॒मस्ते॑ँके॒तुर॑भवद्दि॒विश्रि॒तः+ ॥ अ॒ग्निर्नो॑य॒ज्ञमुप॑वेतुसा॒धुया॒ग्निंनरो॒विभ॑रंतेगृ॒हेगृ॑हे । अ॒ग्निर्दू॒तोऽअ॑भवद्धव्य॒वाह॑नो॒ग्निंवृ॑णा॒नावृ॑णतेक॒विक्र॑तुं ॥ तुभ्ये॒दम॑ग्ने॒मधु॑मत्तमं॒वच॒स्तुभ्यं॑मनी॒षाऽइ॒यम॑स्तु॒शंहृ॒दे । त्वांगिर॒ःसिंधु॑मिवा॒वनीर्म॒हीरापृ॑णंति॒शव॑साव॒र्धयँ॑तिच ॥ त्वाम॑ग्ने॒अंगि॑रसो॒गुहा॑हि॒तमन्व॑विंदन्छिश्रिया॒णंवने॑वने । सजा॑यसेम॒थ्यमा॑नः॒सहो॑म॒हत्त्वामा॑हुःसह॑सस्पु॒त्रमँ॑गिरः ॥ ३ ॥ (५।१।१२) प्राग्नयै॑बृह॒तेय॒ज्ञिया॑यऽऋ॒तस्य॒वृष्णे॒ऽअसु॑राय॒मन्म॑ । घृ॒तंनय॒ज्ञऽआ॒स्ये॒३सुपू॑तं॒गिरं॑भरेवृष॒भाय॑प्रती॒चीं+ ॥ ऋ॒तंचि॑कित्वऽऋ॒तमिच्चि॑किद्ध्यृ॒तस्य॒धारा॒ऽअनु॑तृंधिपू॒र्वीः । नाहंया॒तुंसह॑सा॒नद्व॒येनं॑ऽऋ॒तंस॑पाम्यरु॒षस्य॒वृष्ण॑ः ॥ कया॑नोऽअग्नऽऋ॒तय॑न्नृ॒तेन॒भुवो॒नवे॑दाऽउ॒चथ॑स्य॒नव्य॑ः । वेदा॑मेदे॒वऽऋ॒तुपाऽऋ॒तूनां॒नाहंपतिं॑सनि॒तुर॒स्यरा॒यः+ ॥ केते॑ऽअग्नेरि॒पवे॒बंध॑नासः॒केपा॒यव॑ःसनिषंतद्यु॒मंत॑ः । केधा॒सिम॑ग्ने॒ऽअनृ॑तस्यपांति॒कऽआस॑ंतो॒वच॑सःसंतिगो॒पाः+ ॥ सखा॑यस्ते॒विषु॑णाऽअग्नऽए॒तेशि॒वास॒ःसंतो॒ऽअशि॑वाऽअभूवन् । अधू॑र्षतस्व॒यमे॒तेवचो॑भिर्ऋ॒जूय॒तेवृ॑जि॒नानि॒ब्रुवंत॑ः ॥ यस्ते॑ऽअग्ने॒नम॑साय॒ज्ञमीट्ट॑ऽऋ॒तंसपा॑त्यरु॒षस्य॒वृष्ण॑ः । तस्य॒क्षय॑ःपृ॒थुरासा॒धुरे॑तु प्र॒सर्स्रा॑णस्य॒नहु॑षस्य॒शेषः॑ ॥ ४ ॥ (५।१।१३) अर्चं॑तस्त्वाहवाम॒हेर्चं॑त॒ःसमिं॑धीमहि । अ॒ग्नेऽअर्चं॑तऽऊ॒तये॑ ॥ अ॒ग्नेः

(५।१।१२) प्राग्नयइतिषळर्चस्यसूक्तस्यसुतंभरोग्निस्त्रिष्टुप् । (५।१।१३) अर्चंतइतिषळर्चस्यसूक्तस्यसुतंभरोग्निर्गायत्री ।

स्तोमंमनामहेसिध्रमद्यदिविस्पृशः । देवस्यद्रविणस्यवः ॥ अग्निर्जुषतनोगिरोहोतायोमानुषेष्वा । सयक्षद्दैव्यंजनं ॥
त्वमग्नेसप्रथाऽअसिजुष्टोहोतावरेण्यः । त्वयायज्ञंवितन्वते ॥ त्वामग्नेवाजसातमंविप्रावर्धंतिसुष्टुतं । सनोरास्वसुवी
र्यं ॥ अग्नेनेमिरराँऽइवदेवाँस्त्वंपरिभूरसि । आराधश्चित्रमृंजसे ॥ ५ ॥ (५।१।१४) अग्निंस्तोमेनबोधयसमिधा ॥ ३ ॥
नोऽअमर्त्यं । हव्यादेवेषुनोदधत् ॥ तमध्वरेष्वीळतेदेवंमर्ताऽअमर्त्यं । यजिष्ठंमानुषेजने ॥ तंहिशश्वंतऽईळतेस्रुचा
देवंघृतश्चुता । अग्निंहव्यायवोळ्हवे ॥ अग्निर्जातोऽअरोचतघ्नन्दस्यून्ज्योतिषातमः । अविंदद्गाऽअपःस्वः+ ॥ अग्नि
मीळेन्यंकविंघृतपृष्ठंसपर्यत । वेतुमेशृणवद्धवं ॥ अग्निंघृतेनवावृधुःस्तोमेभिर्विश्वचर्षणिं । स्वाधीभिर्वचस्युभिः ॥
॥ ६ ॥ (५।२।१) प्रवेधसेकवयेवेद्यायगिरंभरेयशसेपूर्व्याय । घृतप्रसत्तोऽअसुरःसुशेवोरायोधर्ताधरुणोवस्वोऽअ
ग्निः+ ॥ ऋतेनऽऋतंधरुणंधारयंतयज्ञस्यशाकेपरमेव्योमन् । दिवोधर्मन्धरुणेसेदुषोनॄन्जातैरजाताँऽअभियेननक्षुः+ ॥
अंहोयुवस्तन्वस्तन्वतेविवयोमहद्दुष्टरंपूर्व्याय । ससंवतोनवजातस्तुतुर्यात्सिंहंनक्रुद्धमभितःपरिष्ठुः ॥ मातेवयद्भरसेप
प्रथानोजनंजनंधायसेचक्षसेच । वयोवयोजरसेयद्दधानःपरित्मनाविषुरूपोजिगासि ॥ वाजोनुतेशवसस्पात्वंतमुरुं ॥ ३ ॥

(५।१।१४) अग्निंस्तोमेनेतिषळर्चस्यसूक्तस्यसुतंभरोग्निर्गायत्री । (५।२।१) प्रवेधसइतिपंचर्चस्यसूक्तस्यआंगिरसोग्निर्वरुणस्त्रिष्टुप् ।

दीर्घं᳚ध॒रुणं᳚देव॒रायः । प॒दंन॒तायुर्गुहा॒दधा॑नोम॒होरा॒येचि॒तय॒न्नत्रिं॑मस्पः ॥ ७ ॥ (५।२।२) बृ॒हद्व॒योहि॒भा॒नवेर्चा᳚दे॒वा
या॒ग्नये॑ । यंमि॒त्रंनप्रश॑स्तिभि॒र्मर्ता᳚सोद॒धि॒रेपुरः+ ॥ सहि॒द्युभि॒र्जना॑ना॒ंहोता॒दक्ष॑स्यबा॒ह्वोः । विह॒व्यम॒ग्निरा॑नु॒षग्भगो॒न
वार॑मृण्वति ॥ अ॒स्यस्तोमे᳚म॒घोन॑ःस॒ख्येवृ॒द्धशो᳚चिषः । विश्वा॒यस्मि॑न्तुवि॒ष्वणि॒सम॒र्ये᳚शुष्म॑माद॒धुः+ ॥ अधा॒ह्यग्नऽएषां॑
सुवीर्य᳚स्यम॒ंहना॑ । तमिद्य॒ह्वंनरोद॑सी॒परि॒श्रवो᳚बभूवतुः ॥ नून॒ऽएहि॒वार्य॒मग्ने᳚गृ॒णानऽआभ॑र । येव॒यंयेच॑सू॒रयः॑स्व॒स्ति
धाम॑हे॒सचो॒तैधि॑पृ॒त्सुनो᳚वृ॒धे+ ॥ ८ ॥ (५।२।३) आय॒ज्ञैर्दे᳚व॒मर्त्य᳚ऽइ॒त्थातव्या॑समूतये᳚ । अ॒ग्निंकृ॒तेस्व॑ध्व॒रेपू॒रुरी᳚ळि॒
ताव॑से ॥ अ॒स्यहि॒स्वय॑शस्तर॒ऽआसा᳚विध॒र्मन्मन्य॑से । तंनाकं᳚चि॒त्रशो᳚चिषंमं॒द्रंप॒रोम॑नी॒षया॑ ॥ अ॒स्यवासाऽउ॑ऽअ॒र्चिषा॒
यऽआयु॑क्तु॒जागि॒रा । दि॒वोनयस्य॒रेत॑साबृ॒हच्छोचं॑त्य॒र्चयः ॥ अ॒स्यक्रत्वा॒विचे᳚तसोद॒स्मस्य॒वसु॒रथ॒ऽआ । अधा॒विश्वा॑
सु॒हव्यो॒ग्निर्वि॒क्षुप्रश॑स्यते ॥ नून॒ऽइद्धिवार्य᳚मा॒सास॑चं॑तसू॒रयः । ऊर्जो᳚नपाद॒भिष्ट॑येपा॒हिश॒ग्धिस्व॒स्तय॑ऽउ॒तैधि॑पृ॒त्सुनो᳚वृ॒
धे+ ॥ ९ ॥ (५।२।४) प्रा॒तर॒ग्निःपु॑रुप्रि॒योवि॒शस्त॑वे॒ताति॑थिः । विश्वा॑नि॒योऽअम॑र्त्यो᳚ह॒व्यामर्ते᳚षु॒रण्य॑ति ॥ द्वि॒ता
यंमृ॒क्तवा॑हसे॒स्वस्य॒दक्ष॑स्यम॒ंहना॑ । इंदुं॒सधं॑त्तऽआनु॒षक्स्तो॒ताचि॑त्तेऽअमर्त्य ॥ तंवो᳚दी॒र्घायु॑शोचिषं॒गि॒राहु॑वेम॒घोना᳚ ।

(५।२।२) बृहद्वयइतिपंचर्चस्यसूक्तस्यात्रेयःपूरुरनुष्टुप्‌अंत्यापंक्तिः । (५।२।३) आयज्ञैरितिपंचर्चस्यसूक्तस्यपूरुरनुष्टुप्‌अंत्यापंक्तिः ।
(५।२।४) प्रातरग्निरितिपंचर्चस्यसूक्तस्यात्रेयोमृक्तवाहाद्वितोग्निरनुष्टुप्अंत्यापंक्तिः ।

अरिँष्टोयेषांरथोव्यंश्वदावन्नीयंते ॥ चित्रावायेषुदीधितिरासन्नुक्थापांतिये । स्तीर्णंवर्हिःस्वर्णरेश्रवांसिदधिरेपरिं ॥
येमेंपंचाशतंददुरश्वानांसधस्तुंति । द्युमदंग्नेमहिश्रवोंबृहत्कृंधिमघोनांनृवदंमृतनृणां+ ॥ १० ॥ (५।२।५) अभ्यं
वस्थाःप्रजायंतेप्रवव्रेर्वव्रिश्चिंकेत । उपस्थेमातुर्विचंष्टे ॥ जुहुरेविचितयंतोनिंमिषंनृम्णंपांति । आदृढांपुरंविविशुः ॥
आश्वैत्रेयस्यंजंतवोंद्युमद्वर्धंतकृष्टयंः । निष्कग्रीवोबृहदुंक्थऽएनामध्वानवांजयुः+ ॥ प्रियंदुग्धंनकाम्यमजांमिजा
म्योःसचां । घर्मोनवाजंजठरोदंब्धःशश्वंतोदभंः ॥ क्रीळंन्नोरश्मऽआभुवःसंभस्मंनावायुनावेविंदानः । ताऽअंस्यस
न्धृषजोनतिग्माःसुसंशितावक्ष्योंवक्षणेस्थाः+ ॥ ११ ॥ (५।२।६) यमंग्नेवाजसातमत्वंचिन्मन्यंसेरयिं । तंनोंगी
र्भिःश्रवाय्यंदेवत्रापंनयायुजं ॥ येऽअंग्नेनेरयंतितेवृद्धाऽउग्रस्यशवंसः । अपद्वेषोऽअपह्वरोन्यव्रंतस्यसश्चिरे ॥ होतां
रंत्वावृणीमहेग्नेदक्षंस्यसाधंनं । यज्ञेषुंपूर्व्यंगिराप्रयंस्वंतोहवामहे ॥ इत्थायथांतऽऊतयेसहंसावन्दिवेदिंवे । रायऽऋ
तायंसुक्रतोगोभिंःष्यामसधमादोंवीरैःस्यांमसधमादंः ॥ १२ ॥ (५।२।७) मनुष्वत्त्वानिधीमहिमनुष्वत्समिंधीम
हि । अग्नेमनुष्वदंगिरोदेवान्देवयतेयंज ॥ त्वंहिमानुंषेजनेग्नेसुप्रींतऽइध्यसे । स्रुचंस्त्वायंत्यानुषक्सुजांतसर्पिरासु

(५।२।५) अभ्यवस्थाइतिपंचर्चस्यसूक्तस्यात्रेयोवव्रिरग्निःआद्येद्वेगायत्र्यौतृतीयाचतुर्थ्यावनुष्टुभौपंचमीविराड्रूपा । (५।२।६) यमग्न इतिचतुर्ऋचस्यसूक्तस्यात्रेयःप्रयस्वंतोग्निरनुष्टुप्अंत्यापंक्तिः । (५।२।७) मनुष्वदितिचतुर्ऋचस्यसूक्तस्यात्रेयःससोग्निरनुष्टुप्अंत्यापंक्तिः ।

ते ॥ त्वांविश्वेंसजोषसोदेवासोंदूतमक्रत । सपर्यंतस्त्वाकवेयज्ञेषुदेवमीळते ॥ देवंवोंदेवयज्ययाग्निमीळीतमर्त्यः । समिद्धःशुक्रदीदिह्यृतस्ययोनिमासदःससस्ययोनिमासदः ॥ १३ ॥ (५।२।८) प्रविंश्वसामन्नत्रिवदर्चापावकशोचिषे । योऽअध्वरेष्वीड्योहोतामंद्रतमोविशि+ ॥ न्यं१ग्निंजातवेदसंदधातादेवमृत्विजं । प्रयज्ञऽएत्वानुषगद्यादेवव्यंचस्तमः ॥ चिकित्विन्मनसंत्वादेवंमर्तासऽऊतयें । वरेण्यस्यतेवसऽइयानासोऽअमन्महि ॥ अग्नेचिकिद्ध्यं१स्यनऽइदंवचःसहस्य । तंत्वासुशिप्रदंपतेस्तोमैर्वर्धंत्यत्रयोगीर्भिःशुंभंत्यत्रयः ॥ १४ ॥ (५।२।९) अग्नेसहंतमाभरद्युम्नस्यप्रासहारयिं । विश्वायश्चर्षणीरभ्या३सावाजेषुसासहत् ॥ तमग्नेपृतनाषहंरयिंसहस्वऽआभर । त्वंहिसत्योऽअद्भुतोदातावाजस्यगोमतः ॥ विश्वेहित्वासजोषसोजनासोवृक्तबर्हिषः । होतारंसद्मसुप्रियंव्यंतिवार्यापुरु+ ॥ सहिष्मा विश्वचर्षणिरभिमातिसहोंदधे । अग्नऽएषुक्षयेष्वारेवन्नःशुक्रदीदिहिद्युमत्पावकदीदिहि ॥१५॥ (५।२।१०) अग्नेत्वंनोऽअंतमऽउतत्राताशिवोभवावरूथ्यः+ ॥ वसुरग्निर्वसुश्रवाऽअच्छानक्षिद्युमत्तमंरयिंदाः ॥ सनोबोधिश्रुधीहवमुरुष्या

(५।२।८) प्रविश्वसामन्निितिचतुर्ऋचस्यसूक्तस्यात्रेयोविश्वसामाग्निरनुष्टुप्अंत्यापंक्तिः । (५।२।९) अग्नेसहंतमितिचतुर्ऋचस्यसूक्तस्यात्रेयोद्युम्नोविश्वचर्षणिरग्निरनुष्टुप्अंत्यापंक्तिः । (५।२।१०) अग्नेत्वंनइतिचतुर्ऋचस्यसूक्तस्यगौपायना (लौपायनावा) बंधुःसुबंधुःश्रुतबंधुर्विप्रबंधुश्चक्रमेणर्षयोऽग्निर्द्विपदाविराट् ।

णोऽअघायतःसंमस्मात् ॥ तंत्वाशोचिष्ठदीदिवःसुम्नायनूतमीमहेसखिभ्यः ॥१६॥ (५।२।११) अच्छावोऽअग्निमवसेदेवंगासिसनोवसुः । रासत्पुत्रऽऋषूणामृतावापर्षतिद्विषः+ ॥ सहिसत्योयंपूर्वेचिद्देवासश्चिद्यमीधिरे । होतारंमंद्रजिह्वमित्सुदीतिभिर्विभावसुं ॥ सनोधीतीवरिष्ठयाश्रेष्ठयाचसुमत्या । अग्नेरायोदिदीहिनःसुवृक्तिभिर्वरेण्य ॥ अग्निर्देवेषुराजत्यग्निर्मर्तेष्वाविशन् । अग्निर्नोहव्यवाहनोग्निंधीभिःसपर्यत ॥ अग्निस्तुविश्रवस्तमंतुविब्रह्माणमुत्तमं । अतूर्तंश्रावयत्पतिंपुत्रंददातिदाशुषे ॥ १७ ॥ अग्निर्ददातिसत्पतिंसासाहयोयुधानृभिः । अग्निरत्यंरघुष्यदंजेतारमपराजितं ॥ यद्वाहिष्ठंतदग्नयेबृहदर्चविभावसो । महिषीवत्वद्रयिस्त्वद्वाजाऽउदीरते ॥ तवद्युमंतोऽअर्चयोग्रावेवोच्यतेबृहत् । उतोतेतन्यतुर्यथास्वानोऽअर्ततमनादिवः+ ॥ एवाँऽअग्निंवसूयवःसहसानंववंदिम । सनोविश्वाऽअतिद्विषःपर्षन्नावेवसुक्रतुः ॥ १८ ॥ (५।२।१२) अग्नेपावकरोचिषामंद्रयादेवजिह्वया । आदेवान्वक्षियक्षिच ॥ तंत्वाघृतस्नवीमहेचित्रभानोस्वर्दृशं । देवाँऽआवीतयेवह ॥ वीतिहोत्रंत्वाकवेद्युमंतंसमिधीमहि । अग्नेबृहंतमध्वरे+ ॥ अग्नेविश्वेभिरागहिदेवेभिर्हव्यदातये । होतारंत्वावृणीमहे ॥ यजमानायसुन्वतऽआग्नेसुवीर्यंवह । देवैरासत्सिबर्हिषि

(५।२।११) अच्छावइतिनवर्चस्यसूक्तस्यात्रेयोवसूयवोग्निरनुष्टुप् । (५।२।१२) अग्नेपावकेतिनवर्चस्यसूक्तस्यवसूयवोग्निरंत्यायाविश्वेदेवागायत्री ।

॥ १९ ॥ समिधानःसहस्रजिदग्नेधर्माणिपुष्यसि । देवानाँदूतऽउक्थ्यः* ॥ न्य१ग्निंजातवेदसंहोत्रवाहंयविष्ठ्यं । दधातादेवमृत्विजं ॥ प्रयज्ञऽएत्वानुषगद्यादेवव्यचस्तमः । स्तृणीतवर्हिरासदे ॥ एदंमरुतोऽअश्विनामित्रःसीदंतुवरुणः । देवासःसर्वयाविशा+ ॥ २० ॥ (५।२।१३) अनस्वंतासत्पतिर्मामहेमेगावाचेतिष्ठोऽअसुरोमघोनः । त्रैवृष्णोऽअग्नेदशभिःसहस्रैर्वैश्वानरत्र्यरुणश्चिकेत ॥ योमेशताचविंशतिंचगोनांहरीचयुक्तासुधुराददाति । वैश्वानरसुष्टुतोवावृधानोग्नेयच्छत्र्यरुणायशर्म ॥ एवातेऽअग्नेसुमतिंचकानोनविष्ठायनवमंत्रसदस्युः । योमेगिरस्तुविजातस्यपूर्वीर्युक्तेनाभित्र्यरुणोगृणाति ॥ योमऽइतिप्रवोचत्यश्वमेधायसूरये । दददृचासनिंयतेददन्मेधामृतायते+ ॥ यस्यमापरुषाःशतमुद्धर्षयंत्युक्षणः । अश्वमेधस्यदानाःसोमाऽइवत्र्याशिरः ॥ इंद्राग्नीशतदाव्न्यश्वमेधेसुवीर्यं । क्षत्रंधारयतंवृहद्दिविसूर्यमिवाजरं ॥ २१ ॥ (५।२।१४) समिद्धोऽअग्निर्दिविशोचिरश्रेत्प्रत्यङ्ङुषसमुर्वियाविभाति । एतिप्रा

(५।२।१३) अनस्वंतेतिषळर्चस्यसूक्तस्यत्रैवृष्णस्त्र्यरुणःपौरुकुत्स्यस्त्रसदस्युर्भारतोश्वमेधश्चैतेऋषयोऽग्निरंत्यायाइंद्राग्नीत्रिष्टुप् अंत्यास्तिस्रोनुष्टुभः । (अस्मिन्सूक्तेभौमोत्रिरेवदेवतेतिकेचित् अन्यथायोमेशताचविंशतिंचगोनामित्यादिदातृक्रियायाअनुपपत्तेः । नैतदन्ये मन्यंतेआत्माध्यासपक्षस्वीकारेणतथाप्युपपत्तेः) । (५।२।१४) समिद्धइतिषळर्चस्यसूक्तस्यात्रेयीविश्ववाराऋषिकाग्निः आद्याःक्रमेणत्रिष्टुब्जगतीत्रिष्टुवनुष्टुभःअंत्येद्वेगायत्र्यौ ।

॥ ६ ॥

चींविश्ववांरानमोंभिर्देवाँऽईळांनाहविषांघृताची ॥ समिध्यमानोंऽअमृतस्यराजसिहविष्कृण्वंतंसचसेस्वस्तयें । वि
श्वंसधत्तेद्रविणंयमिन्वंस्यातिथ्यमंग्नेनिचंधत्तऽइत्पुरः ॥ अग्नेशर्धमहतेसौभंगायतवंद्युम्नान्युत्तमानिंसंतु । संजांस्प
त्यंसुयममाकृंणुष्वशत्रूयतामभितिंष्ठामहांसि ॥ समिंद्धस्यप्रमंहसोग्नेवंदेतवश्रियं । वृषभोद्युम्नवाँऽअसिसमंध्वरेष्विं
ध्यसे ॥ समिंद्धोऽअग्नऽआहुतदेवान्यंक्षिस्वध्वर । त्वंहिहंव्यवाळसिं ॥ आजुंहोतादुवस्यताग्निंप्रयंत्यंध्वरे । वृणी
ध्वंहंव्यवाहंनं ॥ २२ ॥ (५।२।१५) त्र्यंर्यमामनुंषोदेवतांतात्रीरोंचनादिव्याधांरयंत । अर्चंतित्वामरुतंःपूतदंक्षा
स्त्वमेंषामृषिंरिंद्रासिधीरंः ॥ अनुयदींमरुतोंमंदसानमार्चन्निंद्रंपपिवांसंसुतस्यं । आदंत्तवज्रमभियदहिंहन्नपोयह्वीर
सृजत्सर्तवाऽउं ॥ उतब्रंह्माणोमरुतोमेऽअस्येंद्रःसोमंस्यसुषुंतस्यपेयाः । तद्धिहव्यंमनुंषेगाऽअविंददहन्नाहिंपपिवाँऽइं
द्रोंऽअस्य ॥ आद्रोदंसीवितरंविष्कंभायत्संविव्यानश्चिंद्भियसेंमृगंकंः । जिगंर्तिमिंद्रोंऽअपजगुंराणःप्रतिंश्वसंतमवंदा
नवंहंन् ॥ अधक्रत्वांमघवन्तुभ्यंदेवाऽअनुविश्वेंऽअददुःसोमपेयं । यत्सूर्यस्यहरितःपतंतीःपुरःसतीरुपंराऽएतंशे
कः+ ॥ २३ ॥ नवयदंस्यनवतिंचंभोगान्त्साकंवज्रेंणमघवांविवृश्चत् । अर्चंतीद्रंमरुतंःसधस्थेत्रैष्टुंभेनवचंसाबाधत ॥ ६ ॥
द्यां+ ॥ सखासख्येंऽअपचत्तूयमग्निरस्यक्रत्वांमहिषात्रीशतानिं । त्रीसाकमिंद्रोमनुंषःसरांसिसुतंपिंबद्वृत्रहत्यांयसो

(५।२।१५) त्र्यर्यमेतिपंचदशर्चस्यसूक्तस्यशाक्त्योगौरिवीतिरिंद्रः(उशनायदितिपादस्योशनावा)त्रिष्टुप् ।

मँ ॥ त्रीयच्छतामहिषाणामघोमास्त्रीसरांसिमघवासोम्यापाः । कारंनविश्वेऽअह्वंतदेवाभरमिंद्राययदहिंजघान ॥
उशनायत्सहस्यै३रयातंगृहमिंद्रजूजुवानेभिरश्वैः । वन्वानोऽअत्रसरथंययाथकुत्सेनदेवैरवनोर्हशुष्णं ॥ प्रान्यच्चक्रम
वृहःसूर्यस्यकुत्सायान्यद्वरिवोयातवेकः । अनासोदस्यूँऽरमृणोवधेननिर्दुर्योणऽआवृणङ्मृध्रवाचः ॥ २४ ॥ स्तोमास
स्त्वागौरिवीतेरवर्धन्नरंधयोवैदथिनायपिप्रुं । आत्वामृजिश्वासख्यायचक्रेपचन्पक्तीरपिबःसोममस्य ॥ नवग्वासःसुत
सोमासऽइंद्रंदशग्वासोऽअभ्यर्चंत्यर्कैः । गव्यंचिदूर्वमपिधानवंतंतंचिन्नरःशशमानाऽअपव्रन् ॥ कथोनुतेपरिचरा
णिविद्वान्वीर्यामघवन्याचकर्थ । याचोनुनव्याकृणवःशविष्ठप्रेदुतातेविदथेषुब्रवाम ॥ एताविश्वाचकृवाँऽइंद्रभूर्यपरी
तोजनुषावीर्येण । याचिन्नुवज्रिन्कृणवोदधृष्वान्नतेवर्तातविष्याऽअस्तितस्याः ॥ इंद्रब्रह्मक्रियमाणाजुषस्वयातेशवि
ष्ठनव्याऽअकर्म । वस्त्रेवभद्रासुकृतावसूयूरथंनधीरःस्वपाऽअतक्षं ॥ २५ ॥ (५।२।१६) क१स्यवीरःकोऽअपश्य
दिंद्रंसुखरथमीयमानंहरिभ्यां । योरायावज्रीसुतसोममिच्छन्तदोकोगंतापुरुहूतऽऊती+ ॥ अवाचचक्षंपदमस्यसस्व
रुग्रंनिधातुरन्वायमिच्छन् । अपृच्छमन्याँऽउततेमऽआहुरिंद्रंनरोबुबुधानाऽअशेम ॥ प्रनुवयंसुतेयातेकृतानींद्रब्रवा
मयानिनोजुजोषः । वेददविद्वाञ्छृणवच्चविद्वान्वहतेयंमघवासर्वसेनः ॥ स्थिरंमनश्चकृषेजातऽइंद्रवेषीदेकोयुधयेभू

(५।२।१६) क१स्येतिपंचदशर्चस्यसूक्तस्य [illegible] देवतेत्रिष्टुप् ।

यसश्चित् । अश्मानंचिच्छवसादिद्युतोविविदोगवामूर्वमुस्रियाणां ॥ परोयत्त्वंपरमऽआजनिष्ठाःपरावतिश्रुत्यंनाम
बिभ्रत् । अतश्चिदिंद्राद्भयंतदेवाविश्वाऽअपोऽअजयद्दासपत्नीः ॥ २६ ॥ तुभ्येदेतेमरुतःसुशेवाऽअर्चंत्यर्कंसुन्वं
त्यंधः । अहिंमोहानमपऽआशयानंप्रमायाभिर्मायिनंसक्षदिंद्रः ॥ विषूमृधोजनुषादानमिन्वन्नहन्गवामघवन्त्संचका
नः । अत्रादासस्यनमुचेःशिरोयदवर्तयोमनवेगातुमिच्छन्+ ॥ युजंहिमामकृथाऽआदिदिंद्रशिरोदासस्यनमुचेर्मथा
यन् । अश्मानंचित्स्वर्यं१वर्तमानंप्रचक्रियेवरोदसीमरुद्भ्यः ॥ स्त्रियोहिदासऽआयुधानिचक्रेकिंमाकरन्नबलाऽअस्य
सेनाः । अंतर्ह्यख्यदुभेऽअस्यधेनेऽअथोपप्रैद्युधयेदस्युमिंद्रः ॥ समत्रगावोभितोनवंतेहेहवत्सैर्वियुतायदासन् । सं
ताऽइंद्रोऽअसृजदस्यशाकैर्यदींसोमासःसुषुताऽअमंदन् ॥ २७ ॥ यदींसोमाबभ्रुधूताऽअमंदन्नरोरवीद्वृषभःसादने
षु । पुरंदरःपपिवाँऽइंद्रोऽअस्यपुनर्गवामददादुस्रियाणां ॥ भद्रमिदंरुशमाऽअग्नेऽअक्रन्गवांचत्वारिददतःसहस्रा ।
ऋणंचयस्यप्रयतामघानिप्रत्यग्रभीष्मनृतमस्यनृणां+ ॥ सुपेशसंमावसृजंत्यस्तंगवांसहस्रैरुशमासोऽअग्ने । तीव्राऽइंद्रं
मममंदुःसुतासोक्तोर्व्युष्टौपरितक्म्यायाः ॥ औच्छत्सारात्रीपरितक्म्यायाँऽऋणंचयेराजनिरुशमानां । अत्योनवा
जीरघुरज्यमानोबभ्रुश्चत्वार्यसनत्सहस्रा ॥ चतुःसहस्रंगव्यस्यपश्वःप्रत्यग्रभीष्मरुशमेष्वग्ने । घर्मश्चित्तप्तःप्रवृजेयऽ

आसीदयस्मयस्तम्वादामविप्राः ॥ २८ ॥ (५।२।१७) इंद्रोरथायप्रवतंकृणोतियमध्यस्थान्मघवावाजयंतँ । यूथे
वपश्वोन्युनोतिगोपाऽअरिष्टोयातिप्रथमःसिषासन् ॥ आप्रद्रवहरिवोमाविवेनःपिशंगरातेऽअभिनःसचस्व । नहि
त्वदिंद्रवस्योऽअन्यदस्त्यमेनाँश्चिज्जनिवतश्चकर्थ ॥ उद्यत्सहःसहसऽआजनिष्टदेदिष्टऽइंद्रऽइंद्रियाणिविश्वा । प्राचो
दयत्सुदुघावव्रेऽअंतर्विज्योतिषासंववृत्वत्तमोवः ॥ अनवस्तेरथमश्वायतक्षन्त्वष्टावज्रंपुरुहूतद्युमंतँ । ब्रह्माणऽइंद्रंम
हयंतोऽअर्कैरवर्धयन्नहयेहंतवाऽउ ॥ वृष्णेयत्तेवृषणोऽअर्कमर्चानिंद्रग्रावाणोऽअदितिःसजोषाः । अनश्वासोयेपव
योरथाऽइंद्रेषिताऽअभ्यवर्तंतदस्यून् ॥ २९ ॥ प्रतेपूर्वाणिकरणानिवोचंप्रनूतनामघवन्याचकर्थ । शक्तींवोयद्विभरा
रोदसीऽउभेजयन्नपोमनवेदानुचित्राः ॥ तदिन्नुतेकरणंदस्मविप्राहिंयद्घ्नन्नोजोऽअत्रामिमीथाः । शुष्णस्यचित्परिं
मायाऽअगृभ्णाःप्रपित्वंयन्नपदस्यूँऽरसेधः ॥ त्वमपोयदवेतुर्वशायारमयःसुदुघाःपारऽइंद्र । उग्रमयातमवहोहकुत्सं
संहयद्वामुशनारंतदेवाः+ ॥ इंद्राकुत्सावहमानारथेनावामत्याऽअपिकर्णेवहंतु । निःषींमद्भ्योधमथोनिःषधस्थान्म
घोनोहृदोवरथस्तमाँसि ॥ वातस्ययुक्तान्त्सुयुजश्चिदश्वान्कविश्चिदेषोऽअजगन्नवस्युः । विश्वेतेऽअत्रमरुतःसखायऽ

(५।२।१७) इंद्रोरथायेतित्रयोदशर्चस्यसूक्तस्यात्रेयोवस्युरिंद्रः (उग्रमयातमित्यादिपादौकुत्सदैवत्यौउशनोदैवत्यौवा) नवम्या इंद्राकुत्सौत्रिष्टुप् ।

Digitized by eGangotri Funding MIDF Delhi

इंद्रब्रह्माणितविषीमवर्धन् ॥ ३० ॥ सूरश्चिद्रथंपरितक्म्यायांपूर्वंकरदुपरंजूजुवांसं । भरश्चक्रमेतशःसंरिणातिपुरो
दधत्सनिष्यतिक्रतुंनः ॥ आयंजनाऽअभिचक्षेजगामेंद्रःसखायंसुतसोममिच्छन् । वदन्ग्रावाववेदिंभ्रियातेयस्यजीर
मध्वर्यवश्चरंति ॥ येचाकनंतचाकनंतनूतेमर्ताऽअमृतमोतेऽअंहऽआरन् । वावंधियज्यूँऽरुततेषुधेह्योजोजनेषुयेषुते
स्याम ॥ ३१ ॥ (५।२।१८) अदर्दरुत्समसृजोविखानित्वमर्णवान्बद्बधानाँऽअरम्णाः । महांतमिंद्रपर्वतंवियद्वः
सृजोविधाराऽअवदानवंहन् ॥ त्वमुत्साँऽऋतुभिर्बद्बधानाँऽअरंहऽऊधःपर्वतस्यवज्रिन् । अहिंचिदुग्रप्रयुतंशयानंज
घन्वाँऽइंद्रतविषीमधत्थाः ॥ त्यस्यचिन्महतोनिर्मृगस्यवधर्जघानतविषीभिरिंद्रः । यऽएकऽइदप्रतिर्मन्यमानऽआद
स्मादन्योऽअजनिष्टतव्यान् ॥ त्यंचिदेषांस्वधयामदंतमिहोनपातंसुवृधंतमोगां । वृषप्रभर्मादानवस्यभामंवज्रेणवज्री
निजघानशुष्णं ॥ त्यंचिदस्यक्रतुभिर्निषत्तममर्मणोविददिदस्यमर्म । यदींसुक्षत्रप्रभृतामदस्ययुयुत्संतंतमसिहर्म्येधाः+॥
त्यंचिदित्थाकत्पयंशयानमसूर्येतमसिवावृधानं । तंचिन्मंदानोवृषभःसुतस्योच्चैरिंद्रोऽअपगूर्याजघान ॥ ३२ ॥ उ
द्यदिंद्रोमहतेदानवायवधर्यमिष्टसहोऽअप्रतीतं । यदींवज्रस्यप्रभृतौददाभविश्वस्यजंतोरधमंचकार ॥ त्यंचिदर्णंमधु ॥८॥
पंशयानमसिन्वंवव्रंमह्याददुग्रः । अपादमत्रंमहतावधेननिर्दुर्योणऽआवृणङ्मृध्रवाचं ॥ कोऽअस्यशुष्मंतविषींवरात

(५।२।१८) अदर्दरुत्समितिद्वादशर्चस्यसूक्तस्यात्रेयोगातुरिंद्रस्त्रिष्टुप् ।

ऽएकोधनाभरतेऽअप्रतीतः । इमेचिदस्यज्रयसोनुदेवीऽइंद्रस्यौजसोभियसाजिहाते ॥ न्यस्मैदेवीस्वधितिर्जिहीतऽइंद्रायगातुरुशतीवयेमे । संयदोजोयुवतेविश्वमाभिरनुस्वधाव्नेक्षितयोनमंत ॥ एकंनुत्वासत्पतिंपांचजन्यंजातंशृणोमियशसंजनेषु । तंमेजगृभ्रऽआशसोनविष्ठंदोषावस्तोर्हवमानासऽइंद्रं ॥ एवाहित्वामृतुथायातयंतंमघाविप्रेभ्योददतंशृणोमि । किंतेब्रह्माणोगृहतेसखायोयेत्वायानिदधुःकाममिंद्र ॥ ३३ ॥ इतिचतुर्थाष्टकेप्रथमोऽध्यायः ॥ १ ॥

चतुर्थाष्टकेसूक्तानि १३० ऋचः १२६९

पंचविंशाध्यायेवर्गाः ३३ सूक्तानि २४ ऋचः १६८ ॥ त्यागः ॥ अग्नयइदं. १०० विश्वेभ्योदेवेभ्य-अग्नय. ५ इंद्राग्निभ्या. अग्नय. ६ इंद्राये. ८ उशनसइंद्राभ्या. इंद्राये. १७ ऋणंचयेंद्राभ्या. ४ इंद्राये. ७ इंद्रकुत्सोशनोभ्य. इंद्रकुत्साभ्या. इंद्राये. १६ ॥ इतिचतुर्थेप्रथमः ॥

महिदशप्राजापत्यःसंवरणोजातशत्रुंनवत्रिष्टुबंतंयस्तेष्टौप्रभूवसुरांगिरसःपंक्त्यंतंसआगमत्षट्तृतीयाजगतीसंभानुनापंचात्रिरुरोरानुष्टुभंयदिंद्रपंक्त्यंतंमायाहिनवत्र्युष्णिगाद्यंत्यानुष्टुम्मध्येचसासौरींतदादीतिहासःस्तुतिकर्मत्वादत्रिरेवदेवःकोनुविंशतिर्वैश्वदेवंवैतंषोळश्याद्यातिजगत्यांत्यैकपदाप्रशंतमाव्यूनैकादशीरौद्र्यांधेनव

स्त्र्यूनैंतयोरुपांत्यैकपदांतंप्रत्नथापंचीनांकाश्यपीवत्सारीन्यचऋषयोदृष्टालिंगाद्धित्रिष्टुवंतेंविदाएकादशसदापृ
णोंहयोष्टौप्रतिक्षत्रोंत्योद्वृचोदेवपत्नीस्तवोंत्यात्रिष्टुप्द्वितीयाच ॥ १ ॥ ॥ ॥
॥ हरिःओम् ॥ (५।३।१) महिंमहेतवसेंदीध्येनॄनिंद्रांयेत्थातवसेऽअतंव्यान् । योऽअंस्मैसुमतिंवाजंसातौस्तु
तोजनेंसमर्यंश्चिकेतं ॥ सत्वंनंऽइंद्रधियसानोऽअर्कैर्हरीणांवृषन्योक्रंमश्रेः । याऽइत्थामंघवन्ननुजोषंवक्षोंऽअभिप्रार्यः
संक्षिजनांन् ॥ नतेतंऽइंद्राभ्यं१स्मदृष्वायुंक्तासोऽअब्रह्मतायदसंन् । तिष्ठारथमधितंवंज्रहस्तारश्मिंदेवयमसेस्वश्वंः॥
पुरूयत्तंऽइंद्रसंत्युक्थागवेंचकर्थोर्वरांसुयुध्यंन् । ततक्षेसूर्यांयचिदोकंसिस्वेवृषांसमत्सुंदासस्यनामंचित् ॥ वयंतेतंऽइं
द्रयेचनरःशर्धोंजज्ञानायाताश्चरथाः । आस्मान्जंगम्यादहिशुष्मसत्वाभगोनहव्यंःप्रभृथेषुचारुंः ॥ १ ॥ पपृक्षेण्यंमिं
द्रत्वेह्योजोंनृम्णानिंचनृतमांनोऽअमंर्तः । सनऽएनींवसवानोरयिंदाःप्रार्यःस्तुंषेतुविमघस्यदानं ॥ एवानंऽइंद्रोतिभिं
रवपाहिगृंणतःशूंरकारून् । उतत्वचंददंतोवाजंसातौपिप्रीहिमध्वःसुषुंतस्यचारोंः ॥ उतत्येमांपौरुकुत्स्यस्यंसूरेस्त्रस
दंस्योर्हिंरणिनोररांणाः । वहंतुमादशश्येतांसोऽअस्यगैरिक्षितस्यक्रतुंभिर्नुसंश्चे ॥ उतत्येमांमारुताश्वंस्यशोणाःक्रत्वां
मघासोविदथंस्यरातौ । सहस्रांमेच्यवंतानोददांनऽआनूकमर्योवपुंषेनार्चंत् ॥ उतत्येमांध्वन्यंस्यजुष्टांलक्ष्मण्यंस्यसुरु ॥ ९ ॥

(५।३।१) महिमहइतिदशर्चस्यसूक्तस्यप्राजापत्यःसंवरणइंद्रस्त्रिष्टुप् ।

चो॒यता॑नाः । म॒ह्ना॒राय॑ःसं॒वर॑णस्य॒ऽऋषे॑र्व्र॒जं॑नगाव॒ःप्रय॑ता॒ऽअपि॑ग्मन् ॥ २ ॥ (५।३।२) अजा॑तशत्रुम॒जरा॒स्व॑र्व॒त्य
नु॑स्व॒धामि॑ता॒दस्म॒मी॑यते । सु॒नोत॑न॒पच॑त॒ब्रह्म॑वाहसेपुरु॒ष्टुता॑यप्र॒तरं॑दधातन ॥ आय॑ःसोमे॑नज॒ठर॒मपि॑प्र॒ताम॑दतम॒घवा॒
मध्वो॒ऽअंध॑सः । यदी॑मृ॒गाय॒हंत॑वेम॒हाव॑धःस॒हस्र॑भृष्टिमु॒शना॑व॒धंयम॑त् ॥ योऽअ॑स्मैघ्रं॒सऽउ॒तवा॒यऽऊध॑नि॒सोमं॑सु॒नो
ति॒भव॑तिद्यु॒माँऽअह॑ । अपा॑पश॒क्रस्त॑त॒नुष्टि॑मूहतित॒नूशु॑भ्रंम॒घवा॒यःक॑वास॒खः+ ॥ यस्या॑वधीत्पि॒तरं॒यस्य॑मा॒तरं॒यस्य॑श॒
क्रोभ्रात॑रं॒नात॑ऽईषते । वेती॑द्वस्य॒प्रय॑तायतंक॒रोनकि॑ल्बिषादीषते॒वस्व॑ऽआक॒रः+ ॥ नपं॒चभि॑र्द॒शभि॑र्वृष्ट्या॒रभं॒नासु॑न्व
ता॒सच॑ते॒पुष्य॑ताच॒न । जि॒नाति॑वे॒द॑मुया॒हंति॑वा॒धुनि॒रादे॑वयुंभ॑जति॒गोम॑तिव्र॒जे+ ॥ ३ ॥ वि॒त्वक्ष॑ण॒ःसमृ॑तौचक्रमास॒
जोसु॑न्वतो॒विषु॑णःसुन्व॒तोवृ॒धः । इंद्रो॒विश्व॑स्यदमि॒ताविभी॑षणोयथाव॒शंन॑यतिदा॒समार्यः॑ ॥ समीं॑प॒णेर॑जति॒भोज॑नंमु॒
षेवि॒दाशु॒षेभ॑जतिसू॒नरं॒वसु॑ । दुर्गे॑च॒नध्रि॑यते॒विश्व॒ऽआपु॒रुज॒नोयोऽअ॑स्य॒तवि॑षी॒मचु॑क्रुधत् ॥ संयज्ज॑नौसु॒धनौ॑वि॒श्वश॑
र्धसा॒ववे॒दिंद्रो॑म॒घवा॒गोषु॑शु॒भ्रिषु॑ । यु॒जंह्य॑१॒न्यमकृ॑तप्रवे॒पन्यु॒दीं॑गव्यं॑सृजते॒सत्व॑भि॒र्धुनि॑ः ॥ स॒ह॒स्र॒सासा॑ग्निवे॒शिंगृ॑णी
षे॒शत्रि॑मग्न॒ऽउप॒मांके॒तुम॒र्यः । तस्मा॒ऽआपः॑सं॒यतः॑पीपयंत॒तस्मि॑न्क्ष॒त्रम॑मवत्त्वे॒षम॑स्तु ॥ ४ ॥ (५।३।३) यस्ते॒साधि॒ष्ठो

(५।३।२) अजातशत्रुमितिनवर्चस्यसूक्तस्यसंवरणइंद्रोजगत्यंत्यात्रिष्टुप् । (५।३।३) यस्तेसाधिष्ठइत्यष्टर्चस्यसूक्तस्यआंगिरसः
प्रभूवसुरिंद्रोनुष्टुवंत्यापंक्तिः ।

Digitization by eGangotri Funding MoE-IKS Delhi

व॑स॒ऽइंद्र॒क्रतु॒ष्टमाभ॑र । अ॒स्मभ्यँ॑चर्षणी॒सहं॑स॒स्निं॑वाजे॑षुदु॒ष्टरं॑ ॥ यदिं॑द्र॒ते॒चत॑स्रो॒यच्छू॑र॒संति॑ति॒स्रः । यद्वा॒पंच॑क्षिती॒नामव॒स्तत्सुन॒ऽआभ॑र ॥ आते॑वो॒वरे॑ण्यं॒वृष॑न्तमस्यहूमहे । वृष॑जूति॒र्हि॑ज॑ज्ञि॒षऽआ॒भूभि॑रिंद्रतु॒र्वणिः॑ ॥ वृषा॒ह्यसि॒राध॑से जज्ञि॒षेवृष्णि॑ते॒शवः॑ । स्वक्ष॑त्रंतेधृ॒षन्मनः॑सत्रा॒हमिँ॑द्र॒पौंस्यँ॑ ॥ त्वंतमिँ॑द्र॒मर्त्यँ॑ममित्र॒यंत॑मद्रिवः । स॒र्व॒र॒थाश॑तक्रतो॒निया॑हि॒शवसस्पते ॥ ५ ॥ त्वामि॒द्वृ॑त्रहन्तम॒जना॑सोवृ॒क्तब॑र्हिषः । उ॒ग्रंपू॒र्वी॑षुपू॒र्व्यँ॑हवँ॑ते॒वाज॑सातये ॥ अ॒स्माक॑मिंद्रदु॒ष्टरँ॑पुरो॒यावा॑नमा॒जिषु॑ । स॒यावा॑नं॒धने॑धनेवाज॒यंत॑मवा॒रथँ॑ ॥ अ॒स्माक॑मिं॒द्रेहि॑नो॒रथ॑मवा॒पुरँ॑ध्या । व॒यंश॑विष्ठ॒वार्यँ॑दि॒विश्रवो॑दधीमहिदि॒विस्तोमँ॑मनामहे ॥ ६ ॥ (५।३।४) सऽआग॑म॒दिंद्रो॒योव॑सूनां॒चिके॑त॒द्दातुं॑दाम॑नोर॒यीणां॑ । ध॒न्व॒च॒रोनवं॑स॑गस्तृ॒षाण॑श्च॑कमा॒नःपिब॑तुदु॒ग्धमं॒शुं+ ॥ आते॒हनूं॑हरिवःशूर॒शिप्रे॒रुह॒त्सोमो॒नपर्वँ॑तस्यपृ॒ष्ठे । अनुं॑त्वाराज॒न्नर्वँ॑तो॒नहि॒न्वन्गी॒र्भिर्मदे॑मपुरुहूत॒विश्वे॑ ॥ च॒क्रंनवृ॒त्तंपु॑रुहूतवेपते॒मनो॑भि॒यामे॒ऽअम॑ते॒रिद॑द्रिवः । र॒थादधि॑त्वाजरि॒तास॑दावृ॒धकु॒विन्नुस्तो॑षन्मघवन्पु॒रूवसुः॑ ॥ ए॒षग्रावे॑वजरि॒तात॑ऽइ॒ंद्रेय॑र्ति॒वाचँ॑बृ॒हदा॑शुषा॒णः । प्रस॒व्येन॑मघव॒न्यंसि॑रा॒यःप्रद॑क्षि॒णिद्ध॑रिवो॒माविवे॑नः ॥ वृषा॑त्वा॒वृष॑णंवर्धतु॒द्यौर्वृषा॒वृष॑भ्यांवहसे॒हरि॑भ्यां । सनो॒वृषा॒वृष॑रथःसुशिप्र॒वृष॑क्रतो॒वृषा॑वज्रि॒न्भरे॑धाः ॥ योरोहि॑तौवा॒जिनौ॑वा॒जिनी॑वान्त्रि॒भिःश॒तैःसच॑माना॒वदि॑ष्ट । यूने॒सम॑स्मैक्षि॒तयो॑नमंतांश्रु॒तर॑थायमरुतोदुवो॒

(५।३।४) सआगमदितिषळर्चस्यसूक्तस्यप्रभूवसुरिंद्रस्त्रिष्टुप्तृतीयाजगती ।

या+ ॥ ७ ॥ (५।३।५) संभानुनायततसूर्यस्याजुह्वानोघृतपृष्ठःस्वंचाः । तस्माऽअमृध्राऽउषसोव्युच्छान्यऽइंद्रा
यसुनवामेत्याहं ॥ समिद्धाग्निर्वनवत्स्तीर्णबर्हिर्युक्तग्रावासुतसोमोजराते । ग्रावाणोयस्येषिरंवदंत्ययंदध्वर्युर्हविषाव
सिंधुं ॥ वधूरियंपतिमिच्छंत्येतियऽईंवहातेमहिषीमिषिरां । आस्यंश्रवस्याद्रथऽआचंघोषात्पुरूसहस्रापरिवर्तयाते ॥
नसराजाव्यथतेयस्मिन्निंद्रस्तीव्रंसोमंपिबंतिगोसंखायं । आसंत्वनैरजंतिहंतिवृत्रंक्षेतिक्षितीःसुभगोनामपुष्यन् ॥ पु
ष्यात्क्षेमेऽअभियोगेभवात्युभेवृतौसंयतीसंजयाति । प्रियःसूर्येप्रियोऽअग्नाभवातियऽइंद्रायसुतसोमोददाशत् ॥८॥
(५।३।६) उरोष्टऽइंद्रराधसोविभ्वीरातिःशतक्रतो । अधानोविश्वचर्षणेद्युम्नासुक्षत्रमंहय ॥ यदीमिंद्रश्र
वाय्यमिषंशविष्ठदधिषे । पप्रथेदीर्घश्रुत्तमंहिरण्यवर्णदुष्टरं ॥ शुष्मासोयेतेऽअद्रिवोमेहनाकेतसापः । उभादेवाव
भिष्टयेदिवश्चग्मश्चराजथः ॥ उतोनोऽअस्यकस्यचिद्दक्षस्यतववृत्रहन् । अस्मभ्यंनृम्णमाभरास्मभ्यंनृमणस्यसे ॥
नूतऽआभिरभिष्टिभिस्तवशर्मन्छतक्रतो । इंद्रस्यामसुगोपाःशूरस्यामसुगोपाः+ ॥ ९ ॥ (५।३।७) यदिंद्रचित्र
मेहनास्तित्वादातमद्रिवः । राधस्तन्नोविदद्वसऽउभयाहस्त्याभर ॥ यन्मन्यसेवरेण्यमिंद्रद्युक्षंतदाभर । विद्याम

(५।३।५) संभानुनेतिपंचर्चस्यसूक्तस्यभौमोत्रिरिंद्रस्त्रिष्टुप् । (५।३।६) उरोष्टइतिपंचर्चस्यसूक्तस्यात्रिरिंद्रोनुष्टुप् । (५।३।७) य
दिंद्रेतिपंचर्चस्यसूक्तस्यात्रिरिंद्रोनुष्टुबंत्यापंक्तिः ।

ऋक्सं. अ.४अ.२ ॥११॥

मंडलं ५ अनु. ३

तस्यतेवयमकूपारस्यदावने ॥ यत्तेदित्सुप्रराध्यंमनोऽअस्तिश्रुतंबृहत् । तेनदृह्लाचिदद्रिवऽआवाजंदर्षिसातये ॥ मंहिष्ठंवोमघोनांराजानंचर्षणीनां । इंद्रमुपप्रशस्तयेपूर्वीभिर्जुजुषेगिरः ॥ अस्माऽइत्काव्यंवचऽउक्थमिंद्रायशंस्यं । तस्माऽउब्रह्मवाहसेगिरोवर्धंत्यत्रयोगिरःशुंभंत्यत्रयः ॥ १० ॥ (५।३।८) आयाह्यद्रिभिःसुतंसोमंसोमपतेपिब । वृषन्निंद्रवृषभिर्वृत्रहंतम ॥ वृषाग्रावावृषामदोवृषासोमोऽअयंसुतः । वृषन्निंद्र० ॥ वृषात्वावृषणंहुवेवज्रिन्चित्राभिरूतिभिः । वृषन्निंद्र० ॥ ऋजीषीवज्रीवृषभस्तुराषाट्च्छुष्मीराजावृत्रहासोमपावा । युक्त्वाहरिभ्यामुपयासदर्वाङ्माध्यंदिनेसवनेमत्सदिंद्रः ॥ यत्त्वासूर्यस्वर्भानुस्तमसाविध्यदासुरः । अक्षेत्रविद्यथामुग्धोभुवनान्यदीधयुः ॥ ११ ॥ स्वर्भानोरधयदिंद्रमायाऽअवोदिवोवर्तमानाऽअवाहन् । गूह्लंसूर्यंतमसापव्रतेनतुरीयेणब्रह्मणाविंददत्रिः ॥ मामामिमंतवसंतमत्रऽइरस्याद्रुग्धोभियसानिगारीत् । त्वंमित्रोऽअसिसत्यराधास्तौमेहावतंवरुणश्चराजा ॥ ग्राव्णोब्रह्मायुयुजानःसपर्यन्कीरिणादेवान्नमसोपशिक्षन् । अत्रिःसूर्यस्यदिविचक्षुराधात्स्वर्भानोरपमायाऽअघुक्षत् ॥ यंवैसूर्यंस्वर्भानुस्तमसाविध्यदासुरः । अत्रयस्तमन्वविंदन्नह्य१न्येऽअशक्नुवन् ॥ १२ ॥ (५।३।९) कोनुवांमित्रावरुणावृताय

(५।३।८)आयाहीतिनवर्चस्यसूक्तस्यात्रिःआद्यानांचतसृणामिंद्रःपंचम्याःसूर्यःषष्ठ्यादिचतसृणामत्रिर्देवता आद्यास्तिस्रउष्णिहःपंचम्यंत्येऽनुष्टुभौशिष्टास्त्रिष्टुभः।(५।३।९) कोनुवामितिविंशत्यृचस्यसूक्तस्यात्रिर्विश्वेदेवास्त्रिष्टुप्षोडशीसप्तदश्यावतिजगत्यावंत्यैकपदा।(भेदपक्षे ॥११॥

न्दिवोवामहःपार्थिवस्यवादे । ऋतस्यवासदसित्रासीथांनोयज्ञायतेवापशुषोनवाजान् ॥ तेनोमित्रोवरुणोऽअर्यमायु
रिंद्रऽऋभुक्षामरुतोजुषंत । नमोभिर्वायेदधंतेसुवृक्तिंस्तोमैरुद्रायमीह्ळुषेसजोषाः ॥ आवांयेष्ठाश्विनाहुवध्यैवातस्यप
त्मन्नथ्यस्यपुष्टौ । उतवादिवोऽअसुरायमन्मप्रांधांसीवयज्यवेभरध्वं ॥ प्रसक्षणोदिव्यःकण्वहोतात्रितोदिवःसजोषा
वातोऽअग्निः । पूषाभगःप्रभृथेविश्वभोजाऽआजिंनजग्मुराश्वश्वतमाः ॥ प्रवोरयिंयुक्ताश्वंभरध्वंरायऽएषेवसेदधी
तधीः । सुशेवऽएवैरौशिजस्यहोतायेवऽएवामरुतस्तुराणां ॥ १३ ॥ प्रवोवायुंरथयुजंकृणुध्वंप्रदेवंविप्रंपनितारमु
र्कैः । इषुध्यवऽऋतसापःपुरंधीर्वस्वीर्नोऽअत्रपत्नीराधियेधुः ॥ उपवऽएषेवंद्योभिःशूषैःप्रयह्वीदिवश्चितयद्भिरर्कैः । उ
षासानक्ताविदुषीवविश्वमाहावहतोमर्त्याययज्ञं+ ॥ अभिवोऽअर्चेपोष्यावतोनॄन्वास्तोष्पतिंत्वष्टारंरराणः । धन्यासु
जोषाधिषणानमोभिर्वनस्पतीँरोषधीरायऽएषे ॥ तुजेनस्तनेपर्वताःसंतुस्वैतवोयेवसवोनवीराः । पनितऽआप्त्योयज
तःसदानोवर्धान्नःशंसंनर्योऽअभिष्टौ ॥ वृष्णोऽअस्तोषिभूम्यस्यगर्भंत्रितोनपातमपांसुवृक्ति । गृणीतेऽअग्निरेतरीनशू
षैःशोचिष्केशोनिरिणातिवना ॥ १४ ॥ कथामहेरुद्रियायब्रवामकद्रायेचिकितुषेभगाय । आपऽओषधीरुतनोवंतु

–मित्रावरुणौ १ विश्वदेवाः १ अश्विनौ १ विश्वेदेवाः १ मरुतः १ विश्वेदेवाः १ उषासानक्ते १ विश्वेदेवाः २ अग्निः १ विश्वेदेवाः २
मरुतः १ विश्वेदेवाः १ भूमिः १ विश्वेदेवाः ३ भूमिः १ विश्वे १ सर्वं २० ।

द्यौर्वनागिरयोवृक्षकेशाः ॥ शृणोतुनऽऊर्जांपतिर्गिरःसनभस्तरीयाँइषिरःपरिज्मा । शृण्वंत्वापःपुरोनशुभ्राःपरिस्रुचोबबृहाणस्याद्रेः ॥ विदाचिन्नुमहांतोयेवऽएवाब्रवामदस्मावार्यंदधानाः । वयश्चनसुभ्व१आवयंतिक्षुभामर्तमनुयतंवधस्नैः+ ॥ आदैव्यानिपार्थिवानिजन्मापश्चाच्छासुमखायवोचं । वर्धंतांद्यावोगिरश्चंद्राग्राऽउदावर्धंतामभिषाताऽअर्णाः ॥ पदेपदेमेजरिमानिधायिवरूत्रीवाशक्रायापायुभिश्च । सिषक्तुमातामहीरसानःस्मत्सूरिभिर्ऋजुहस्तऽऋजुवनिः ॥ १५ ॥ कथादाशेमनमसासुदानूनेवयामरुतोऽअच्छोक्तौप्रश्रवसोमरुतोऽअच्छोक्तौ । मानोहिर्बुध्न्योरिषेधादस्माकंभूदुपमातिवनिः ॥ इतिचिन्नुप्रजायैपशुमत्यैदेवासोवनतेमर्त्योवऽआदेवासोवनतेमर्त्योवः । अत्राशिवांतन्वोधासिमस्याजरांचिन्मेनिर्ऋतिर्जग्रसीत ॥ तांवोदेवाःसुमतिमूर्जयंतीमिषमश्यामवसवःशसागोः । सानःसुदानुर्मृळयंतीदेवीप्रतिद्रवंतीसुवितायगम्याः ॥ अभिनऽइळायूथस्यमातास्मन्नदीभिरुर्वशीवागृणातु । उर्वशीवाबृहद्दिवागृणानाभ्यूर्ण्वानाप्रभृथस्यायोः + ॥ सिषक्तुनऽऊर्जव्यस्यपुष्टेः+ ॥ १६ ॥ (५।३।१०) प्रशंतमावरुणंदीधितीगीर्मित्रंभगमदितिंनूनमश्याः । पृषद्योनिःपंचहोताशृणोत्वतूर्तपंथाऽअसुरोमयोभुः+ ॥ प्रतिमेस्तोममदितिर्जगृभ्यात्सूनुंनमा

(५।३।१०) प्रशंतमेत्यष्टादशर्चस्यसूक्तस्यात्रिर्विश्वेदेवाःएकादश्यारुद्रस्त्रिष्टुप्सप्तदश्येकपदा । (भेदपक्षे—विश्वेदेवाः २ सविता १ इंद्रः १ विश्वेदेवाः १ इंद्रः १ बृहस्पतिः ३ मरुतः १ रुद्रः १ विश्वेदेवाः १ पर्जन्यः २ मरुतः १ विश्वेदेवाः २ अश्विनौ १ एवं १८)।

ताहृद्यं॑सु॒शेवं॑ । ब्रह्म॑प्रि॒यंदे॒वहि॑तं॒यदस्त्य॒हंमि॒त्रेवरु॑णे॒यन्म॑यो॒भु+ ॥ उदी॑रयक॒वित॑मंकवी॒नामु॒नत्तै॑नम॒भिमध्वां॑घृ॒तेनं॑ । सनो॒वसू॑नि॒प्रयं॑ताहि॒तानि॑चं॒द्राणि॑दे॒वःस॑वि॒तासु॑वाति ॥ समिं॑द्रणो॒मनं॑सानेषि॒गोभिः॒संसू॒रिभि॑र्हरिवः॒संस्व॒स्ति । संब्रह्म॑णादे॒वहि॑तं॒यदस्ति॒संदे॒वानां॑सुम॒त्याय॒ज्ञियां॑नां ॥ दे॒वोभगः॑सवि॒तारा॒योऽअंश॒ऽइंद्रो॑वृ॒त्रस्य॑सं॒जितो॒धनां॑नां । ऋ॒भुक्षा वाजं॑ऽउ॒तवा॒पुरं॑धि॒रवं॑तुनोऽअ॒मृतां॑सस्तु॒रासः॑ ॥ १७ ॥ म॒रुत्वं॑तो॒ऽअप्रं॑तीतस्यजि॒ष्णोरजू॑र्यत॒ःप्रब्रं॑वामाकृ॒तानि॑ । नते॒पूर्वें॑मघव॒न्नापं॑रासो॒नवी॒र्यं॑१॒नूतं॑न॒ःकश्च॒नापं॑ ॥ उपं॑स्तुहिप्रथ॒मंर॑त्न॒धेयं॒बृह॒स्पतिं॑सनि॒तारं॒धनां॑नां । यःशंसं॑तेस्तुव॒तेशंभ॑विष्ठःपु॒रूवसु॑रा॒गम॒ज्जोहुं॑वानं ॥ तवो॒तिभि॒ःसचं॑माना॒ऽअरिं॑ष्टा॒बृहं॑स्पतेम॒घवा॑नःसु॒वीराः॑ । येऽअ॑श्व॒दाऽउ॒तवा॒संति॑गो॒दायेवं॑स्त्र॒दाःसु॒भगा॒स्तेषु॑रायः॑ ॥ वि॒स॒र्माणं॑कृणुहिवि॒त्तमे॑षां॒येभुं॑जते॒ऽअपृं॑णंतो॒नऽउ॒क्थैः । अपं॑व्रतान्प्रस॒वेवा॑वृधा॒नान्ब्रं॑ह्म॒द्विष॒ःसूर्यां॑द्यावयस्व ॥ यऽओहं॑तेर॒क्षसो॑दे॒ववी॑तावच॒क्रेभि॒स्तंम॑रुतो॒नियां॑त । योव॒ःशमीं॑शशमा॒नस्य॒निंदां॑त्तु॒च्छ्यान्कामा॑न्करतेसिष्विदा॒नः+ ॥ १८ ॥ तमुं॑ष्टुहि॒यःस्वि॒षुःसु॒धन्वा॒योविश्वं॑स्य॒क्षयं॑तिभेष॒जस्यं॑ । यक्ष्वा॑म॒हेसौ॑मन॒सायं॑रु॒द्रंनमो॑भिर्दे॒वमसुं॑रंदुवस्य ॥ दमू॑नसो॒ऽअपसो॒येसु॒हस्ता॒वृष्ण॒ःपत्नी॑र्न॒द्यो॑विभ्वत॒ष्टाः । सरं॑स्वतीबृहद्दि॒वोतरा॒कादं॑श॒स्यं॑तीर्वरिवस्यं॑तुशु॒भ्राः+ ॥ प्रसूम॒हेसुं॑शर॒णायं॑मे॒धांगिरं॑भरे॒नव्यं॑सी॒जायं॑मानां । यऽआं॑हु॒नादुं॑हि॒तुर्व॒क्षणां॑सुरू॒पामिं॑ना॒नोऽअर्कृणोदि॒दंनः॑ ॥ प्रसुं॑ष्टु॒तिःस्त॒नयं॑तंरु॒वंतं॑मि॒ळस्पतिं॑जरितर्नू॒नमं॑श्याः । योऽअ॑ब्दि॒माँऽउं॑दनि॒माँऽइयं॑र्ति॒प्रवि॒द्युता॑रोदं॑

सीऽउक्षमाणः ॥ एषःस्तोमोमारुतंशर्धोऽअच्छारुद्रस्यसूनूँर्युवन्यूँरुदश्याः । कामोरायेहवतेमास्वस्त्युपस्तुहिपृषदश्वाँऽअयासः ॥ प्रैषःस्तोमःपृथिवीमंतरिक्षंवनस्पतीँऽरोषधीरायेऽअश्याः । देवोदेवःसुहवोभूतुमह्यंमानोमातापृथिवीदुर्मतौधात् ॥ उरौदेवाऽअनिबाधेस्याम ॥ समश्विनोरवसानूतनेनमयोभुवासुप्रणीतीगमेम। आनोरयिंवहतमोतवीरानाविश्वान्यमृतासौभगानि ॥ १९ ॥ (५।३।११) आधेनवःपयसातूर्ण्यर्थाऽअमर्धतीरुपनोयंतुमध्वा । महोरायेबृहतीःसप्तविप्रोमयोभुवोजरिताजोहवीति ॥ आसुष्टुतीनमसावर्तयध्यैद्यावावाजायपृथिवीऽअमृध्रे । पितामातामधुवचाःसुहस्ताभरेभरेनोयशसावविष्टां ॥ अध्वर्यवश्चकृवांसोमधूनिप्रवायवेभरतचारुशुक्रं । होतेवनःप्रथमःपाह्यस्यदेवमध्वोररिमातेमदाय ॥ दशक्षिपोयुंजतेबाहूऽअद्रिंसोमस्ययाशमितारासुहस्ता । मध्वोरसंसुगभस्तिर्गिरिष्ठांचनिश्चदद्दुदुहेशुक्रमंशुः+ ॥ असावितेजुजुषाणायसोमःक्रत्वेदक्षायबृहतेमदाय । हरीरथेसुधुरायोगेऽअर्वागिंद्रप्रियाकृणुहिहूयमानः ॥ २० ॥ आनोमहीमरमतिंसजोषाग्नांदेवींनमसारातहव्यां । मधोर्मदायबृहतीमृतज्ञामाग्नेवहपथिभिर्देवयानैः ॥ अंजंतियंप्रथयंतोनविप्रावपावंतंनाग्निनातपंतः । पितुर्नपुत्रऽउपसिप्रेष्ठऽआघर्मोऽअग्निमृतयन्नसादि॥

॥१३॥

(५।३।११) आधेनवइतिसप्तदशर्चस्यसूक्तस्यात्रिर्विश्वेदेवास्त्रिष्टुप्षोडश्येकपदाविराट् (भेदपक्षे—नदी १ द्यावापृथिवी १ वायुः १ सोमः१ इंद्रः १ अग्निः १ घर्मः १ अश्विनौ १ विश्वेदेवाः २ सरस्वती १ बृहस्पतिः १ अग्निः ३ विश्वेदेवाः १ अश्विनौ १ एवं १७) ।

अच्छा॑म॒हीबृ॑ह॒तीशंत॑मा॒गीर्दू॒तोनगं॑त्व॒श्विना॑हु॒वध्यै॑ । म॒यो॒भुवा॑स॒रथाया॑तम॒र्वाग्गं॒तंनि॒धिंधुर॑मा॒णिर्ननाभिं॑ ॥ प्रतव्यं॑
सो॒नमं॑ऽउक्तिंतु॒रस्या॒हंपू॒ष्णऽउ॒तवा॒योरं॑दिक्षि । याराधं॑साचोदि॒तारा॑मती॒नांयावाजं॑स्यद्रविणो॒दाऽउ॒तत्मन्+ ॥ आनामं॑
भिर्म॒रुतो॑वक्षि॒विश्वा॒नारू॒पेभि॑र्जातवेदोहुवा॒नः । य॒ज्ञंगिरो॑जरि॒तुःसु॑ष्टु॒तिंच॒विश्वे॑गंतम॒रुतो॒विश्वं॑ऽऊ॒ती+ ॥ २१ ॥ आ
नो॑दि॒वोबृ॑ह॒तःपर्व॑ता॒दासर॑स्वतीयज॒तागं॑तुय॒ज्ञं । हवं॑दे॒वीजु॑जुषा॒णाघृ॒ताची॑श॒ग्मां॑नो॒वाचं॑मुश॒तीशृ॑णोतु ॥ आवे॒धसं॒
नील॑पृष्ठंबृ॒हंतं॒बृह॒स्पतिं॒सदं॑नेसादयध्वं । सा॒दद्यो॑निं॒दम॒ऽआदी॑दि॒वांसं॒हिरं॑ण्यवर्णमरु॒षंसं॑पेम ॥ आध॑र्ण॒सिर्बृ॒हद्दि॑वो॒ररा॑
णो॒विश्वे॑भि॒र्गंत्वोमं॑भिर्हुवा॒नः । ग्नावसा॑न॒ऽओष॑धी॒रमृ॑ध्रस्त्रि॒धातु॑शृंगोवृष॒भोव॑यो॒धाः+ ॥ मा॒तुष्प॒देप॑र॒मेशु॒क्रऽआ॒यो
र्वि॑प॒न्यवो॑रास्पि॒रासो॑ऽअग्मन् । सु॒शेव्यं॒नमं॑सारा॒तहं॑व्याः॒शिशुं॑मृजंत्या॒यवो॒नवा॒से+ ॥ बृ॒हद्वयो॑बृह॒तेतुभ्यं॑मग्नेधिया॒
जुरो॑मिथु॒नासः॑सचंत । दे॒वोदे॑वःसु॒हवो॑भूतु॒मह्यं॒मानो॑मा॒तापृ॑थि॒वीदु॑र्म॒तौधा॑त् ॥ उ॒रौदे॑वाऽअनिबा॒धेस्या॑म ॥ सम॒
श्विनो॒रवं॑सा॒नूतं॑नेनमयो॒भुवा॑सु॒प्रणी॑तीगमेम । आनो॑र॒यिंवं॑हत॒मोतवी॒रानाविश्वा॑न्यमृता॒सौभं॑गानि॥२२॥(५।३।१२)
तंप्र॒त्नथा॑पू॒र्वथा॑वि॒श्वथे॒मथा॑ज्ये॒ष्ठता॑तिंबर्हि॒षदं॑स्व॒र्विदं॑ । प्र॒ती॒ची॒नंवृ॒जनं॑दोहसे॑गि॒राशुं॑जयं॑त॒मनु॒यासु॒वर्धं॑से ॥ श्रि॒येसु॒दृ

(५।३।१२) तंप्रत्नथेतिपंचदशर्चस्यसूक्तस्यकाश्यपोवत्सारोविश्वेदेवाजगत्यंत्येत्रिष्टुभौ (भेदपक्षे—इंद्रः २ अग्निः १ सूर्यः १ अग्निः १ विश्वेदेवाः १ सूर्यः १ अग्निः १ सूर्यः २ विश्वेदेवाः २ सुतंभरः १ अग्निः २ एवं १५)।

शीरुपरस्ययाःस्वंविरोचमानःककुभामचोदते । सुगोपाऽअसिनदभायसुक्रतोपरोमायाभिर्ऋतऽआसनामते ॥ अत्यं
हविःसंचतेसच्चधातुचारिष्टगातुःसहोतासहोभरिः । प्रसर्स्राणोऽअनुबर्हिर्वृषाशिशुर्मध्येयुवाजरोविस्रुहाहितः+ ॥ प्र
वऽएतेसुयुजोयामन्निष्टयेनीचीरमुष्मैयम्यऽऋतावृधः । सुयंतुभिःसर्वशासैरभीशुभिःक्रिविर्नामानिप्रवणेमुषायति ॥
संजर्भुराणस्तरुभिःसुतेगृभंवयाकिनंचित्तगर्भासुसुस्वरुः । धारवाकेष्वृजुगाथशोभसेवर्धस्वपत्नीरभिजीवोऽअध्वरे+
॥ २३ ॥ यादृगेवददृशेतादृगुच्यतेसंच्छाययादधिरेसिध्रयाप्स्वा । महीमस्मभ्यमुरुषामुरुज्रयोवृहत्सुवीरमनपच्युतं
सहः ॥ वेत्यग्रुर्जनिवान्वाऽअतिस्पृधःसमर्यतामनसासूर्यःकविः । घ्रंसंरक्षंतंपरिविश्वतोगयमस्माकंशर्मवनवत्स्वाव
सुः ॥ ज्यायांसमस्ययतुनस्यकेतुनऽऋषिस्वरंचरतियासुनामते । यादृश्मिन्धायितमपस्ययाविदद्यऽउस्वयंवहतेसोऽ
अरंकरत् ॥ समुद्रमासामवतस्थेऽअग्रिमानरिष्यतिसवनंयस्मिन्नायता । अत्रानहार्दिक्रवणस्यरेजतेयत्रामतिर्विद्यते
पूतबंधनी ॥ सहिक्षत्रस्यमनसस्यचित्तिभिरेवावदस्ययजतस्यसध्रेः । अवत्सारस्यस्पृणवामरण्वभिःशविष्ठंवाजंविदुषा
चिदर्ध्यं ॥ २४ ॥ श्येनऽआसामदितिःकक्ष्यो३मदोविश्ववारस्ययजतस्यमायिनः । समन्यमन्यमर्थयंत्येतवेविदुर्विषा
णंपरिपानमंतिते+ ॥ सदापृणोयजतोविद्विषोवधीद्बाहुवृक्तःश्रुतवित्तर्योवःसचा । उभासवराप्रत्येतिभातिचयदींग
णंभजतेसुप्रयावभिः ॥ सुतंभरोयजमानस्यसत्पतिर्विश्वासामूधःसधियामुदंचनः । भरद्धेनूरसवच्छिश्रियेपयोनुब्रु

वाणोऽअध्येतिनस्वपन्+ ॥ योजागारतमृचःकामयंतेयोजागारतमुसामानियंति । योजागारतमयंसोमऽआहतवाहमस्मिसख्येन्योकाः ॥ अग्निर्जागारतमृचःकामयंतेग्निर्जागारतमुसामानियंति । अग्निर्जागारतमयंसोमऽआहतवाहमस्मिसख्येन्योकाः ॥ २५ ॥ (परिशिष्टं ॥ जागर्षित्वंभुवनेजातवेदोजागर्षियत्रयजंतेहविष्मान् । इदंहविःश्रद्दधानोजुहोमितेनपासिगुह्यंनामगोनां ॥ (५।४।१) विदादिवोविष्यन्नद्रिमुक्थैरायत्याऽउषसोऽअर्चिनोगुः । अपावृतव्रजिनीरुत्स्वर्गाद्विदुरोमानुषीर्देवआवः ॥ विसूर्योऽअमतिंनश्रियंसादोर्वाद्गवांमाताजानतीगात् । धन्वर्णसोनद्यःखादोऽअर्णाःस्थूणेवसुमितादृंहतद्यौः+ ॥ अस्माऽउक्थायपर्वतस्यगर्भोमहीनांजनुषेपूर्व्याय । विपर्वतोजिहीतसाधतद्यौराविवासंतोदसयंतभूम ॥ सूक्तेभिर्वोवचोभिर्देवजुष्टैरिंद्रान्वग्नीऽअवसेहुवध्यै । उक्थेभिर्हिष्माकवयःसुयज्ञाऽआविवासंतोमरुतोयजंति ॥ एतोन्वद्यसुध्योभवामप्रदुच्छुनामिनवामावरीयः । आरेद्वेषांसिसनुतर्दधामायामप्रांचोयजमानमच्छ ॥ २६ ॥ एताधियंकृणवामासखायोपयामाताँऋणुतव्रजंगोः । ययामनुर्विशिशिप्रंजिगाययावणिग्वंकुरापापुरीषं ॥ अनूनोदत्रहस्तयतोऽअद्रिरार्चन्येनदशमासोनवग्वाः । ऋतंयतीसरमागाऽअविंदद्विश्वा

(५।४।१) विदादिवइत्येकादशर्चस्यसूक्तस्यात्रेयःसदापृणोविश्वेदेवास्त्रिष्टुप् (भेदपक्षे–इंद्रसूर्यौ १ विश्वेदेवाः २ इंद्राग्नी १ विश्वेदेवाः ६ आपः १ एवं ११ । अत्रसूक्तेसदापृणर्षेर्यजतइत्यादिलिंगोक्तऋषिभिःसमुच्चयइतिकेचित्) ।

ऋक्सं.
अ.४अ.२
॥१५॥

निसत्यांगिराश्चकार ॥ विश्वेऽअस्याव्युषिमाहिनायाःसंयद्गोभिरंगिरसोनवंत । उत्सऽआसांपरमेसधस्थऽऋतस्यपथा सरमाविदद्गाः+ ॥ आसूर्योयातुसप्ताश्वःक्षेत्रंयदस्योर्वियादीर्घयाथे । रघुःश्येनःपतयदंधोऽअच्छायुवाकविर्दीदयद्गोषुगच्छन् ॥ आसूर्योऽअरुहच्छुक्रमर्णोयुक्तयद्धरितोवीतपृष्ठाः । उद्गाननावमनयंतधीराऽआश्रृण्वतीरापोऽअर्वागतिष्ठन् ॥ धियंवोऽअप्सुदधिषेस्वर्षांययातरन्दशमासोनवग्वाः । अयाधियास्यामदेवगोपाऽअयाधियातुतुर्यामात्यंहः ॥ २७ ॥ (५।४।१२) हयोनविद्वाँऽअयुजिस्वयंधुरितांवहामिप्रतरणीमवस्युवं । नास्यावश्मिविमुचंनावृतंपुनर्विद्वान्पथःपुरऽएतऽऋजुनेषति ॥ अग्नऽइंद्रवरुणमित्रदेवाःशर्धःप्रयंतमारुतोतविष्णो । उभानासत्यारुद्रोऽअधग्नाःपूषाभगःसरस्वतीजुषंत ॥ इंद्राग्नीमित्रावरुणादितिंस्वःपृथिवींद्यांमरुतःपर्वताँऽअपः । हुवेविष्णुंपूषणंब्रह्मणस्पतिंभगंनुशंसंसवितारमूतये ॥ उतनोविष्णुरुतवातोऽअस्रिधोद्रविणोदाऽउतसोमोमयस्करत् । उतऽऋभवऽउतरायेनोऽअश्विनोतत्वष्टोतविभ्वानुमंसते ॥ उतत्यन्नोमारुतंशर्धऽआगमद्दिविक्षयंयजतंबर्हिरासदे । बृहस्पतिःशर्मपूषोतनोयमद्वरूथ्यं१वरुणोमित्रोऽअर्यमा+ ॥ उतत्येनःपर्वतासःसुशस्तयःसुदीतयोनद्यं१स्त्रामणेभुवन् । भगोविभक्ताश

मंडलं५
अनु.४
॥१५॥

(५।४।१२) हयोनेत्यष्टर्चस्यसूक्तस्यात्रेयःप्रतिक्षत्रोविश्वेदेवाजगतीसप्तम्यष्टम्योर्देवपत्न्यःद्वितीयांत्येत्रिष्टुभौ (भेदपक्षे–विश्वेदेवाः ६ देवपत्न्यः २ एवं ८)।

Digitization by eGangotri Funding MoE-Delhi

वसावसागमदुरुव्यचाऽअदितिःश्रोतुमहव ॥ देवानांपत्नीरुशतीरवंतुनःप्रावंतुनस्तुजयेवाजसातये । याःपार्थिवासोयाऽअपामपिव्रतेतानोदेवीःसुहवाःशर्मयच्छत ॥ उतग्नाव्यंतुदेवपत्नीरिंद्राण्य१ग्नाय्यश्विनीराट् । आरोदसीवरुणानीश्रृंणोतुव्यंतुदेवीर्यऽऋतुर्जनीनां ॥ २८ ॥ ॥ इतिचतुर्थाष्टकेद्वितीयोऽध्यायः ॥ २ ॥ ॥ ॥

षड्विंशाध्यायेवर्गाः २८ सूक्तानि १४ ऋचः १४६ ॥त्यागः॥ इंद्रायेदं. ५२ सूर्याये. अग्नय. ४ मित्रावरुणाभ्या. विश्वेभ्योदेवेभ्य. अश्विभ्या. विश्वेभ्योदेवेभ्य. मरुद्भ्य. विश्वेभ्योदेवेभ्य. उषासानक्ताभ्या. विश्वेभ्योदेवेभ्य. २ अग्नय. विश्वेभ्योदेवेभ्य. २ मरुद्भ्य. विश्वेभ्योदेवेभ्य. भूम्याइ. विश्वेभ्योदेवेभ्य.२ भूम्याइ. विश्वेभ्योदेवेभ्य. ३ सवित्र. इंद्राये. विश्वेभ्योदेवेभ्य. इंद्राये. बृहस्पतय.३ मरुद्भ्य. रुद्राये. विश्वेभ्योदेवेभ्य. पर्जन्याये. २ मरुद्भ्य. विश्वेभ्योदेवेभ्य. २ अश्विभ्या. नद्याइ. द्यावापृथिवीभ्या. वायव. सोमाये. इंद्राये. अग्नय. घर्माये. अश्विभ्या. विश्वेभ्योदेवेभ्य. २ सरस्वत्या. बृहस्पतय. अग्नय. ३ विश्वेभ्योदेवेभ्य. अश्विभ्या. इंद्राये. २ अग्नय. सूर्याये. अग्नय. विश्वेभ्योदेवेभ्य. सूर्याये. अग्नय. सूर्याये. २ विश्वेभ्योदेवेभ्य. २ सुतंभराये. अग्नय. २ इंद्रसूर्याभ्यामि. विश्वेभ्योदेवेभ्य. २ इंद्राग्निभ्या. विश्वेभ्योदेवेभ्य. ६ अद्भ्यइ. विश्वेभ्योदेवेभ्य. ६ देवानांपत्नीभ्य. २ ॥ इतिचतुर्थेद्वितीयः ॥

प्रयुंजतीसप्तप्रतिरथःकदुपंचप्रतिभानुर्जागतंदेवंवःप्रतिभौत्यातृणपाणिर्विश्वःस्वस्त्यात्रेयःपंक्त्यंतमग्नेपंचोनां चतुर्थ्यैंद्रवायवींवायव्यैकैंद्रवायव्यौचतस्रोगायत्र्यःषळुष्णिहस्तिस्रोजगत्यस्त्रिष्टुभोवांत्येअनुष्टुभौप्रश्यावाश्व

त्र्यूनांश्यावाश्वोमारुतंहतंपंक्तिःषष्ठ्यंत्यचकोवदषोळशंककुब्बृहत्यनुष्टुप्पुरउष्णिक्ककुप्सतोबृहत्यौगायत्रीसतोबृहतींककुभौगायत्रीसतोबृहत्यौककुप्सतोबृहतींप्रशर्धायपंचोनाजागतंमुपांत्यात्रिष्टुप्प्रयज्यवोदशांत्यात्रिष्टुबग्नेनवबार्हतंतृतीयासप्तम्यौसतोबृहत्यांवारुद्रासोष्टौद्वित्रिष्टुबंतंतमुप्रवस्त्रिष्टुबंतंमीळेद्विजगत्यंतंमाग्नेयंचवाकेष्टैकोनागायत्रंश्यावाश्वोत्रवैददश्वींतरंतपुरुमीह्लौदाभ्र्यंरथवीतिंमरुतश्चदानतुष्टःप्रशशंसबुद्ध्वाचतरंतमहिषींशशीयसींपंचम्यनुष्टुम्नवमीसतोबृहत्यृतेननवश्रुतविन्मैत्रावरुणंवैतत् ॥ ३ ॥ ॥ ॥ ॥

॥ हरिःॐम् ॥ ॥ (५।४।३) प्र॒युं॒ज॒तीदि॒वऽए॑तिब्रुवा॒णाम॒हीमा॒तादु॑हि॒तुर्बो॒धयं॑ती । आ॒वि॒वासं॑तीयुव॒तिर्म॑नी॒षापि॒तृभ्य॒ऽआसद॑ने॒जोहु॑वाना ॥ अ॒जि॒रास॒स्तद॑प॒ऽईय॑मानाऽआतस्थि॒वांसो॑ऽअ॒मृत॑स्य॒नाभिं॑ । अ॒नं॒तास॑ऽउ॒रवो॑ वि॒श्वतः॑सीं॒परि॒द्यावा॑पृथि॒वीयं॑ति॒पंथाः॑ ॥ उ॒क्षास॑मु॒द्रोऽअ॑रु॒षःसु॑प॒र्णःपूर्व॑स्य॒योनिं॑पि॒तुरावि॑वेश । मध्ये॑दि॒वोनिहि॑तः॒पृश्नि॒रश्मा॒विच॑क्रमे॒रज॑सस्पा॒त्यंतौ॑ ॥ च॒त्वार॑ऽईंबिभ्रतिक्षेम॒यंतो॒दश॒गर्भं॑च॒रसे॑धापयंते । त्रि॒धात॑वःपर॒माऽअ॑स्य॒गावो॑ दि॒वश्च॑रंति॒परि॑स॒द्योऽअंता॑न् ॥ इ॒दंव॑पु॒र्नि॒वच॑नंजनास॒श्चरं॑ति॒यन्न॒द्य॑स्त॒स्थुरापः॑ । द्वेयदीं॑बिभृ॒तोमा॒तुर॒न्येऽइ॒हेह॑जा॒ते

(५।४।३) प्रयुंजतीतिसप्तर्चस्यसूक्तस्यात्रेयःप्रतिरथोविश्वेदेवास्त्रिष्टुप् (भेदपक्षे–उषाः १ सूर्यरश्मयः १ सूर्यः ३ विश्वेदेवाः १ मित्रावरुणाग्नयः १ एवं ७) ।

यम्या३सबंधू ॥ वितन्वतेधियोऽअस्माऽअपांसिवस्त्रापुत्रायमातरोवयंति । उपप्रक्षेवृषणोमोदमानादिवस्पथावध्वो
यंत्यच्छ ॥ तदस्तुमित्रावरुणातदग्नेशंयोरस्मभ्यमिदमस्तुशस्तं । अशीमहिगाधमुतप्रतिष्ठांनमोदिवेबृहतेसादनाय
॥ १ ॥ (५।४।४) कदुप्रियायधाम्नेमनामहेस्वक्षत्रायस्वयशसेमहेवयं । आमेन्यस्यरजसोयदभ्रऽआँऽअपोवृणा
नावितनोतिमायिनी ॥ ताऽअत्नतवयुनंवीरवक्षणंसमान्यावृतयाविश्वमारजः । अपोऽअपाचीरपराऽअपेजतेप्रपूर्वा
भिस्तिरतेदेवयुर्जनः ॥ आग्रावभिरहन्येभिरक्तुभिर्वरिष्ठंवज्रमाजिघर्तिमायिनि । शतंवायस्यप्रचरन्त्स्वेदमेसंवर्तयं
तोविचवर्तयन्नहा ॥ तामस्यरीतिंपरशोरिवप्रत्यनीकमख्यंभुजेऽअस्यवर्पसः । सचायदिपितुमंतमिवक्षयंरत्नंदधाति
भरहूतयेविशे+ ॥ सजिह्वयाचतुरनीकऽऋंजतेचारुवसानोवरुणोयतन्नरिं । नतस्यविद्मपुरुषत्वतावयंयतोभगःसवि
तादातिवार्यं ॥ २ ॥ (५।४।५) देवंवोऽअद्यसवितारमेषेभगंचरत्नंविभजंतमायोः । आवांनरापुरुभुजाववृत्यांदि
वेदिवेचिदश्विनासखीयन्+ ॥ प्रतिप्रयाणमसुरस्यविद्वान्त्सूक्तैर्देवंसवितारंदुवस्य । उपब्रुवीतनमसाविजानञ्ज्येष्ठंच
रत्नंविभजंतमायोः+ ॥ अदत्रयादयतेवार्याणिपूषाभगोऽअदितिर्वस्तऽउस्रः । इंद्रोविष्णुर्वरुणोमित्रोऽअग्निरहानिभ

(५।४।४) कदुप्रियायेतिपंचर्चस्यसूक्तस्यात्रेयःप्रतिभानुर्विश्वेदेवाजगती (भेदपक्षे–विद्युतोग्निः १ उषाः १ इंद्रसूर्यौ १ अग्निः २ एवं ५) (५।४।५) देवंवइतिपंचर्चस्यसूक्तस्यात्रेयःप्रतिभानुर्विश्वेदेवास्त्रिष्टुप् (भेदपक्षे–विश्वेदेवाः १ सूर्यः १ विश्वेदेवाः ३ एवं ५)।

द्राजंनयंतदस्माः+ ॥ तन्नोऽअनर्वासवितावरूथंतत्सिंधवऽइषयंतोऽअनुग्मन् । उपयद्वोचेंऽअध्वरस्यहोतारायःस्यांमपतंयोवाजंरत्नाः ॥ प्रयेवसुंभ्यऽईवदानमोदुर्येमित्रेवरुणेसूक्तवाचः । अवैत्वभ्वंकृणुतावरीयोदिवस्पृथिव्योरवसासदेम ॥ ३ ॥ परिशिष्टं ॥ सूक्तांतेतृणान्यन्नावरण्येवोदकेपिंवा ॥ यत्स्तृणैरध्ययनंतदधीतंस्तृणानिभवतेभव ॥ वापीकूपतडागानांसमुद्रंगच्छस्वाहा ॥ ॥ (५।४।६) विश्वोदेवस्यनेतुर्मर्तोंवुरीतसख्यं । विश्वोरायऽइषुध्यतिद्युम्नंवृणीतपुष्यसे ॥ तेतेदेवनेतर्येचेमाँऽअनुशसे । तेरायातेह्या३पृचेसचेमहिसचथ्यैः* ॥ अतोनऽआनॄनतिथीनतःपत्नीर्दशस्यत । आरेविश्वंपथेष्ठांद्विषोयुयोतुयूयुविः ॥ यत्रवह्निरभिहितोदुद्रवद्द्रोण्यःपशुः । नृमणावीरपस्त्योर्णाधीरेवसनिता ॥ एषतेदेवनेतारथस्पतिःशंरयिः । शंरायेशंस्वस्तयऽइषःस्तुतोमनामहेदेवस्तुतोमनामहे ॥ ४ ॥ (५।४।७) अग्नेसुतस्यपीतयेविश्वैरूमेभिरागहि । देवेभिर्हव्यदातये ॥ ऋतंधीतयऽआगतसत्यधर्माणोऽअध्वरं । अग्नेःपिबतजि

(५।४।६) विश्वोदेवस्येतिपंचर्चस्यसूक्तस्यस्वस्त्यात्रेयोविश्वेदेवाअनुष्टुप्अंत्यापंक्तिः (भेदपक्षे सविता २ विश्वेदेवाः १ सविता २ एवं ५) (५।४।७) अग्नेसुतस्येतिपंचर्चस्यसूक्तस्यस्वस्त्यात्रेयोविश्वेदेवाश्चतुर्थीषष्ठीसप्तमीनामिंद्रवायुःपंचम्यावायुःआद्याश्चतस्रोगायत्र्यःपंचम्यादिषळुष्णिहःएकादश्यादितिस्रोजगत्यः (त्रिष्टुभोवा) अंत्येद्वेनुष्टुभौ (भेदपक्षे–अग्निः २ विश्वेदेवाः १ इंद्रवायू १ वायुः १ इंद्रवायू २ अग्निः ३ विश्वेदवाः ५ एवं १५) ।

ह्वया ॥ विप्रैभिर्विप्रसंत्यप्रातर्यावभिरागहि । देवेभिःसोमपीतये ॥ अयंसोमश्चमूसुतोऽमत्रेपरिषिच्यते । प्रियऽइंद्रायवायवे ॥ वायवायाहिवीतयेजुषाणोहव्यदातये । पिबासुतस्यांधसोऽअभिप्रयः ॥ ५ ॥ इंद्रश्चवायवेषांसुतानां पीतिमर्हथः । तान्जुषेथामरेपसावभिप्रयः ॥ सुताऽइंद्रायवायवेसोमासोदध्याशिरः । निम्नंनयंतिसिंधवोभिप्रयः ॥ सजूर्विश्वेभिर्देवेभिरश्विभ्यामुषसासजूः । आयाह्यग्नेऽअत्रिवत्सुतेरण ॥ सजूर्मित्रावरुणाभ्यांसजूःसोमेनविष्णुना । आयाह्यग्नेऽअत्रिवत्सुतेरण ॥ सजूरादित्यैर्वसुभिःसजूरिंद्रेणवायुना । आयाह्यग्नेऽअत्रिवत्सुतेरण ॥ ६ ॥ स्वस्तिनोमिमीतामश्विनाभगःस्वस्तिदेव्यदितिरनर्वणः । स्वस्तिपूषाऽअसुरोदधातुनःस्वस्तिद्यावापृथिवीसुचेतुना ॥ स्वस्तयेवायुमुपब्रवामहैसोमंस्वस्तिभुवनस्ययस्पतिः । बृहस्पतिंसर्वगणंस्वस्तयेस्वस्तयऽआदित्यासोभवंतुनः ॥ विश्वेदेवानोऽअद्यास्वस्तयेवैश्वानरोवसुरग्निःस्वस्तये । देवाऽअवंत्वृभवःस्वस्तयेस्वस्तिनोरुद्रःपात्वंहसः ॥ स्वस्तिमित्रावरुणास्वस्तिपथ्येरेवति । स्वस्तिनऽइंद्रश्चाग्निश्चस्वस्तिनोऽअदितेकृधि ॥ स्वस्तिपंथामनुचरेमसूर्याचंद्रमसाविव । पुनर्ददताघ्नताजानतासंगमेमहि ॥ ७ ॥ (परिशिष्टं ॥ ॥ स्वस्त्ययंनंताक्ष्यमरिष्टनेमिंमहद्भूतंवायसंदेवतानां । असुरघ्नमिंद्रसखंसमत्सुबृहद्यशोनावमिवारुहेम ॥ अंहोमुचंमांगिरंसंगयंचस्वस्त्यात्रेयंमनंसाचताक्ष्यँ । प्रयंतपाणिःशरणंप्रपद्ये

स्वस्तिसंबाधेष्वभयंनोऽअस्तु ॥) (५।४।८) प्रश्यावाश्वधृष्णुयार्चामरुद्भिर्ऋक्वभिः । येऽअद्रोघमनुष्वधंश्रवोम
दंतियज्ञियाः ॥ तेहिस्थिरस्यशवसःसखायःसंतिधृष्णुया । तेयामन्नाधृषद्विनस्त्मनापांतिशश्वतः ॥ तेस्पंद्रासोनोक्ष
णोतिष्कंदंतिशर्वरीः । मरुतामधामहोदिविक्षमाचमन्महे ॥ मरुत्सुवोदधीमहिस्तोमंयज्ञंचधृष्णुया । विश्वेयेमानुषा
युगापांतिमर्त्यंरिषः+ ॥ अर्हंतोयेसुदानवोनरोऽअसामिशवसः । प्रयज्ञंयज्ञियेभ्योदिवोऽअर्चामरुद्भ्यः ॥ ८ ॥ आरु
क्मैरायुधानरऽऋष्वाऽऋष्टीरसृक्षत । अन्वेनाँऽअहविद्युतोमरुतोजज्झतीरिवभानुरर्तत्मनादिवः+ ॥ येवावृधंत
पार्थिवायऽउरावंतरिक्षऽआ । वृजनेवानदीनांसधस्थेवामहोदिवः+ ॥ शर्धोमारुतमुच्छंससत्यशवसमृभ्वसं । उतस्म
तेशुभेनरःप्रस्पंद्रायुजतत्मना ॥ उतस्मतेपरुष्ण्यामूर्णावसतशुंध्यवः । उतपव्यारथानामद्रिंभिंदंत्योजसा ॥ आपथ
योविपथयोंतस्पथाऽअनुपथाः । एतेभिर्मह्यंनामभिर्यज्ञंविष्टारऽओहते ॥ ९ ॥ अधानरोन्योहतेधानियुतऽओहते ।
अधापारावताऽइतिचित्रारूपाणिदर्श्या ॥ छंदःस्तुभःकुभन्यवऽउत्समाकीरिणोनृतुः । तेमेकेचिन्नतायवऽऊमाऽआ
सन्दृशित्विषे+ ॥ यऽऋष्वाऽऋष्टिविद्युतःकवयःसंतिवेधसः । तमृषेमारुतंगणंनमस्यारमयागिरा+ ॥ अच्छऽऋषे
मारुतंगणंदानामित्रंनयोषणा । दिवोवाधृष्णवऽओजसास्तुताधीभिरिषण्यत ॥ नूमन्वानऽएषांदेवाँऽअच्छानवक्ष

(५।४।८) प्रश्यावाश्वेतिसप्तदशर्चस्यसूक्तस्यात्रेयःश्यावाश्वोमरुतोनुष्टुप्षष्ठ्यंत्येपंक्ती।

र्णा । दानासंचेतसूरिभिर्यामश्रुतेभिरंजिभिः ॥ प्रयेमेबंध्वेषेगांवोचंतसूरयःपृश्निंवोचंतमातरं । अधापितरमिष्मिणंरुद्रंवोचंतशिक्वसः ॥ सप्तमेसप्तशाकिनऽएकमेकाशताददुः । यमुनायामधिश्रुतमुद्राधोगव्यंमृजेनिराधोऽअश्व्यंमृजे ॥ १० ॥ (५।४।९) कोवेदजानमेषांकोवापुरासुम्नेष्वासमरुतां । यद्युयुज्रेकिलास्यः* ॥ ऐतान्रथेषुतस्थुषःकःशुश्राववकथाययुः । कस्मैसस्रुःसुदासेऽअन्वापयऽइळाभिर्वृष्टयःसह+ ॥ तेमऽआहुर्यऽआययुरुपद्युभिर्विभिर्मदे । नरोमर्याऽअरेपसऽइमान्पश्यन्नितिष्टुहि ॥ येऽअंजिषुयेवाशीषुस्वभानवःस्रक्षुरुक्मेषुखादिषु । श्रायारथेषुधन्वसु ॥ युष्माकंस्मारथाँऽअनुमुदेदधेमरुतोजीरदानवः । वृष्टीद्यावोयतीरिव ॥ ११ ॥ आयंनरःसुदानवोददाशुषेदिवःकोशमचुच्यवुः । विपर्जन्यंसृजंतिरोदसीऽअनुधन्वनायंतिवृष्टयः ॥ ततृदानाःसिंधवःक्षोदसारजःप्रसस्रुर्धेनवोयथा । स्यंनाऽअश्वाऽइवाध्वनोविमोचनेवियद्वर्ततऽएन्यः* ॥ आयातमरुतोदिवऽआंतरिक्षादमादुत । मावस्थातपरावतः ॥ मावोरसानितभाकुभाक्रुमुर्मावःसिंधुर्निरीरमत् । मावःपरिष्ठात्सरयुःपुरीषिण्यस्मेऽइत्सुम्नमस्तुवः ॥ तंवःशर्धंरथानांत्वेषंगणंमारुतंनव्यसीनां । अनुप्रयंतिवृष्टयः ॥ १२ ॥ शर्धंशर्धंवऽएषांव्रातंव्रातंगणंगणंसुशस्तिभिः । अनुक्रामे

(५।४।९) कोवेदेतिषोळशर्चस्यसूक्तस्यश्यावाश्वोमरुतः क्रमेणककुप्बृहत्यनुष्टुप्पुरउष्णिक्ककुप्सतोबृहतीसतोबृहतीगायत्रीसतोबृहतीककुप्ककुब्गायत्रीसतोबृहतीसतोबृहतीककुप्सतोबृहत्यः ।

मधीतिभिः ॥ कस्माऽअद्यसुजातायरातहव्यायप्रययुः । एनायामेनमरुतः ॥ येनतोकायतनयायधान्यँ१बीजंवह
ध्वेऽअक्षितं । अस्मभ्यंतद्धत्तनयद्वऽईमहेराधोविश्वायुसौभगं ॥ अतीयामनिदस्तिरःस्वस्तिभिर्हित्वावद्यमरातीः ।
वृष्ट्वीशंयोरापऽउस्रिभेषजंस्याममरुतःसह+ ॥ सुदेवःसमहासतिसुवीरोनरोमरुतःसमर्त्यः । यंत्रायध्वेस्याममते+ ॥
स्तुहिभोजान्स्तुवतोऽअस्ययामनिरणन्गावोनयवसे । यतःपूर्वाँऽइवसखीँऽरनुह्वयगिरागृणीहिकामिनः ॥ १३ ॥
(५।४।१०) प्रशर्धायमारुतायस्वभानवऽइमांवाचमनजापर्वतच्युते । घर्मस्तुभेदिवऽआपृष्ठयज्वनेद्युम्नश्रवसेमहिनृ
म्णमर्चत ॥ प्रवोमरुतस्तविषाऽउदन्यवोवयोवृधोऽअश्वयुजःपरिज्रयः । संविद्युतादधतिवाशतित्रितःस्वरंत्यापोव
नापरिज्रयः ॥ विद्युन्महसोनरोऽअश्मदिद्यवोवाततविषोमरुतःपर्वतच्युतः । अब्दयाचिन्मुहुराह्रादुनीवृतस्तनयद
मारभसाऽउदोजसः ॥ व्यँ१क्तून्रुद्राव्यहानिशिक्वसोव्यँ१तरिक्षंविरजांसिधूतयः । वियदज्राँऽअजथनावऽईयथावि
दुर्गाणिमरुतोनाहरिष्यथ ॥ तद्वीर्यंवोमरुतोमहित्वनंदीर्घंततानसूर्योनयोजनं । एतानयामेऽअगृभीतशोचिषोनश्व
दायन्व्ययातनागिरिं+ ॥ १४ ॥ अभ्राजिशर्धोमरुतोयदर्णसंमोषथावृक्षंकपनेववेधसः । अधस्मानोऽअरमतिंसजोष
सश्चक्षुरिवयंतमनुनेषथासुगं+ ॥ नसजीयतेमरुतोनहन्यतेनस्रेधतिनव्यथतेनरिष्यति । नास्यरायऽउपदस्यंतिनोतय

(५।४।१०) प्रशर्धायेतिपंचदशर्चस्यसूक्तस्यश्यावाश्वोमरुतोजगतीचतुर्दशीत्रिष्टुप् ।

ऽऋषिंवायंराजानंवासुषूदथ ॥ नियुत्वंतोग्रामजितोयथानरोर्यमणोनमरुतःकवंधिनः । पिन्वंत्युत्संयदिनासोऽअस्वरन्व्युंदंतिपृथिवींमध्वोऽअंधसा ॥ प्रवत्वंतीयंपृथिवीमरुद्भ्यःप्रवत्वंतीद्यौर्भवतिप्रयद्भ्यः । प्रवत्वंतीःपथ्याऽअंतरिक्ष्याःप्रवत्वंतःपर्वताजीरदानवः ॥ यन्मरुतःसभरसःस्वर्णरःसूर्यऽउदितेमदथादिवोनरः । नवोश्वाःश्रथयंताहसिस्रतःसद्योऽअस्याध्वनःपारमश्नुथ ॥ १५ ॥ अंसेषुवऽऋष्टयःपत्सुखादयोवक्षःसुरुक्मामरुतोरथेशुभः । अग्निभ्राजसोविद्युतोगभस्त्योःशिप्राःशीर्षसुवितताहिरण्ययीः ॥ तंनाकमर्योऽअगृभीतशोचिषंरुशत्पिप्पलंमरुतोविधूनुथ । समच्यंतवृजनातित्विषंतयत्स्वरंतिघोषंविततमृतायवः ॥ युष्मादत्तस्यमरुतोविचेतसोरायःस्यामरथ्यो३वयस्वतः । नयोयुच्छंतितिष्यो३यथादिवो३स्मेरारंतमरुतःसहस्रिणं ॥ यूयंरयिंमरुतःस्पार्हवीरंयूयमृषिमवथसामविप्रं । यूयमर्वंतंभरतायवाजंयूयंधत्थराजानंश्रुष्टिमंतं ॥ तद्वोयामिद्रविणंसद्यऽऊतयोयेनास्व१र्णततनामनॄँरभि । इदंसुमेमरुतोहर्यतावचोयस्यतरेमतरसाशतंहिमाः ॥ १६ ॥ (५।४।११) प्रयज्यवोमरुतोभ्राजदृष्टयोबृहद्वयोदधिरेरुक्मवक्षसः । ईयंतेऽअश्वैःसुयमेभिराशुभिःशुभंयातामनुरथाऽअवृत्सत ॥ स्वयंदधिध्वेतविषींयथाविदबृहन्महांतऽउर्वियाविराजथ । उतांतरिक्षंममिरेव्योजसाशुभं० ॥ साकंजाताःसुभ्वःसाकमुक्षिताःश्रियेचिदाप्रतरंवावृधुर्नरः । विरोकिणःसूर्य

(५।४।११) प्रयज्यवइतिदशर्चस्यसूक्तस्यश्यावाश्वोमरुतोजगतीअंत्यात्रिष्टुप् ।

स्येवर॒श्मय॒ःशुभं॑० ॥ आ॒भूषेण्यं॑वोमरुतोमहित्व॒नंदि॑दृ॒क्षेण्य॒ंसूर्य॑स्येव॒चक्षण॑ं । उ॒तोऽअ॒स्माँऽअ॑मृत॒त्वेद॑धातन॒शुभं॑० ॥
उदी॑रयथामरुतःसमुद्र॒तोयूयंवृ॒ष्टिंव॑र्षयथापुरीषिणः । नवोदस्रा॒ऽउप॑दस्यंतिधे॒नव॒ःशुभं॑० ॥ १७ ॥ यदश्वा॑न्धू॒र्षुपृष॑
ती॒रयु॑ग्ध्वंहिर॒ण्यया॒न्प्रत्यत्का॒ँऽअमु॑ग्ध्वं । विश्वा॒ऽइत्स्पृधो॑मरुतो॒व्य॑स्यथ॒शुभं॑० ॥ नपर्व॑ता॒नन॒द्यो॑वरंत॒वोयत्रा॒चि॑ध्वंम
रुतो॒गच्छ॒थेदु॒तत् । उ॒तद्यावा॑पृथि॒वीया॑थना॒परि॒शुभं॑० ॥ यत्पू॒र्व्यं॑मरुतो॒यच्च॒नूत॑नं॒यदु॒द्यते॑वसवो॒यच्च॑श॒स्यते॑ । विश्व॑
स्य॒तस्य॑भवथा॒नवे॑दस॒ःशुभं॑० ॥ मृ॒ळत॑नोमरुतो॒मावं॑धिष्टना॒स्मभ्यं॒शर्म॑बहु॒लंवियं॑तन । अधि॑स्तो॒त्रस्य॑स॒ख्यस्य॑गातन॒शु
भं॑० ॥ यू॒यम॒स्मान्नं॑यत॒वस्यो॒ऽअच्छा॒निरं॑ह॒तिभ्यो॑मरुतोगृण॒ानाः । जु॒षध्वं॑नोह॒व्यदा॑तिंयजत्राव॒यंस्या॑म॒पत॑योरयी॒णां+
॥ १८ ॥ (५।४।१२) अग्ने॒शर्ध॑त॒मागणंपि॒ष्टंरु॒क्मेभि॑रं॒जिभिः॑ । विशो॑ऽअ॒द्यम॒रुता॒मव॑ह्वयेदि॒वश्चि॑द्रोच॒नादधि॑ ॥
यथा॑चि॒न्मन्य॑सेहृ॒दातदिन्मे॑जग्मुरा॒शसः॑ । येते॒नेदि॑ष्ठं॒हव॑नान्या॒गम॒न्तान्व॑र्ध॒भीमसं॑दृशः ॥ मी॒ळ्हुष्म॑तीवपृथि॒वीपरा॑ह
ता॒मद॑ंत्येत्य॒स्मदा । ऋक्षो॒नवो॑मरु॒तःशिमी॑वाँ॒ऽअमो॑दु॒ध्रोगौरि॑वभीम॒युः+ ॥ नियेरि॒णंत्यो॑जसावृ॒थागावो॒नदु॒र्धुर॑ः ।
अश्मा॑नंचित्स्व॒र्यं१॒पर्व॑तंगि॒रिंप्रच्या॑वयंति॒याम॑भिः ॥ उत्तिं॑ष्ठनूनमे॑षां॒स्तोमैः॒समु॑क्षितानां । म॒रुतां॑पुरु॒तम॒मपू॑र्व्यं॒गवां॑स
र्ग॑मिवह्वये ॥ १९ ॥ यु॒ङ्ध्वंह्यरु॑षी॒रथे॑यु॒ङ्ध्वंरथे॑षुरो॒हितः॑ । यु॒ङ्ध्वंहरी॑ऽअजि॒राधु॒रिवोळ्ह॑वेव॒हिष्ठाधु॒रिवोळ्ह॑वे ॥ उ॒त

(५।४।१२) अग्नेशर्धंतमितिनवर्चस्यसूक्तस्यश्यावाश्वोमरुतोबृहतीतृतीयासप्तम्यौसतोबृहत्यौ ।

स्यवाज्यंरुषस्नुंविष्वणिंरिहस्मंधायिदर्शतः । मावोयामेषुमरुतश्चिरंकरत्प्रतंरथेषुचोदत ॥ रथंनुमारुतंवयंश्रवस्युमा
हुवामहे । आयस्मिन्तस्थौसुरणानिबिभ्रतीसचामरुत्सुरोदसी+ ॥ तंवःशर्धंरथेशुभंत्वेषंपनस्युमाहुवे । यस्मिन्त्सुजा
तासुभगामहीयतेसचामरुत्सुमीळ्हुषी+ ॥ २० ॥ (५।५।१) आरुद्रासऽइंद्रवंतःसजोषसोहिरण्यरथाःसुवितायगं
तन । इयंवोऽअस्मत्प्रतिहर्यतेमतिस्तृष्णजेनदिवऽउत्साऽउदन्यवे ॥ वाशीमंतऽऋष्टिमंतोमनीषिणःसुधन्वानऽइषुमं
तोनिषंगिणः । स्वश्वास्थसुरथाःपृश्निमातरःस्वायुधामरुतोयाथनाशुभं ॥ धूनुथद्यांपर्वतान्दाशुषेवसुनिवोवनाजिहते
यामनोभिया । कोपयथपृथिवींपृश्निमातरःशुभेयदुग्राःपृषतीरयुग्ध्वं ॥ वातत्विषोमरुतोवर्षनिर्णिजोयमाऽइवसुस
दृशःसुपेशसः । पिशंगाश्वाऽअरुणाश्वाऽअरेपसःप्रत्वक्षसोमहिनाद्यौरिवोरवः ॥ पुरुद्रप्साऽअंजिमंतःसुदानवस्त्वेष
संदृशोऽअनवभ्रराधसः । सुजातासोजनुषारुक्मवक्षसोदिवोऽअर्काऽअमृतंनामभेजिरे ॥ २१ ॥ ऋष्टयोवोमरुतोऽ
अंसयोरधिसहऽओजोबाह्वोर्वोबलंहितं । नृम्णाशीर्षस्वायुधारथेषुवोविश्वावःश्रीरधितनूषुपिपिशे ॥ गोमदश्वावद्रथ
वत्सुवीरंचंद्रवद्राधोमरुतोददानः । प्रशस्तिंनःकृणुतरुद्रियासोभक्षीयवोवसोदैव्यस्य ॥ हयेनरोमरुतोमृळतानस्तुवी

(५।५।१) आरुद्रासइत्यष्टर्चस्यसूक्तस्यश्यावाश्वोमरुतोजगत्यंत्येद्वेत्रिष्टुभौ ।

मधासोऽअमृंताऽऋतंज्ञाः । सत्यंश्रुतःकवयोयुवानोबृहद्गिरयोबृहदुक्षमाणाः ॥ २२ ॥ (५।५।२) तमुनूनंतविषी
मंतमेषांस्तुषेगणंमारुतंनव्यंसीनां । यऽआश्वंश्वाऽअमवद्वहंतऽउतेशिरेऽअमृतंस्यस्वराजः ॥ त्वेषंगणंतवसंखादिंह
स्तंधुनिंव्रतंमायिनंदातिंवारं । मयोभुवोयेऽअमितामहित्वावंदंस्वविप्रतुविराधंसोनॄन्+ ॥ आवोंयंतूदवाहासोऽअद्य
वृष्टिंयेविश्वेंमरुतोंजुनंतिं । अयंयोऽअग्निर्मरुतःसमिद्धऽएतंजुषध्वंकवयोयुवानः ॥ यूयंराजानमिर्यंजनायविभ्वतष्टं
जंनयथायजत्राः । युष्मदेंतिमुष्टिहाबाहुजूतोयुष्मत्सदंश्वोमरुतःसुवीरः ॥ अराऽइवेदचंरमाऽअहेवप्रप्रंजायंतेऽअकं
वामहोंभिः । पृश्नेःपुत्राऽउंपमासोरभिंष्ठाःस्वयामत्यामरुतःसंमिमिक्षुः ॥ यत्प्रायासिष्टपृषंतीभिरश्वैर्वीळुपविभिर्मरु
तोरथेंभिः । क्षोदंतऽआपोरिणतेवनान्यवोस्रियोंवृषभःक्रंदतुद्यौः+ ॥ प्रथिष्टयामन्पृथिवीचिंदेषांभर्तेवगर्भंस्वमिच्छ
वोधुः । वातान्ह्यश्वान्धुर्यायुयुज्रेवर्षंस्वेदंचक्रिरेरुद्रियासः ॥ हयेनरो० ॥२३॥ (५।५।३) प्रवःस्पळक्रन्त्सुवितायदाव
नेर्चांदिवेप्रपृथिव्याऽऋतंभरे । उक्षंतेऽअश्वान्तरुंषंतऽआरजोनुस्वंभानुंश्रथयंतेऽअर्णवैः+ ॥ अमादेषांभियसाभूमिरेज
तिनौर्नपूर्णाक्षंरतिव्यथिर्यती । दूरेदृशोयेचितयंतऽएमंभिरंतर्महेविदथेयेतिरेनरः ॥ गवामिवश्रियसेशृंगमुत्तमंसूर्योन
चक्षूरजंसोविसर्जने । अत्याऽइवसुभ्वं१श्चारवस्थनमर्याऽइवश्रियसेचेतथानरः ॥ कोवोमहांतिमहतामुदश्नवत्कस्का ॥२१॥

(५।५।२) तमुनूनमित्यष्टर्चस्यसूक्तस्यश्यावाश्वोमरुतस्त्रिष्टुप् । (५।५।३) प्रवःस्पळित्यष्टर्चस्यसूक्तस्यश्यावाश्वोमरुतोजगत्यंत्यात्रिष्टुप् ।

व्या॑मरुत॒ःकोह॒पौं॑स्या॑ । यू॒यंह॒भूमिं॑कि॒रणं॒नरे॑जथ॒प्रयद्भर॑ध्वेसुवि॒ताय॑दा॒वने॑ ॥ अश्वा॑ऽइ॒वेद॑रु॒षास॒ःसब॑न्धव॒ःशूरा॑ऽइवप्र॒युध॒ःप्रोतयु॑युधुः । मर्या॑ऽइवसु॒वृधो॑वावृधु॒र्नर॒ःसूर्य॑स्य॒चक्षु॒ःप्रमि॑नंतिवृ॒ष्टिभि॑ः ॥ तेऽअ॑ज्ये॒ष्ठाऽअक॑निष्ठासऽउ॒द्भिदोम॑ध्यमासो॒मह॒सा॒विवा॑वृधुः । सु॒जा॒तासो॑ज॒नुषा॒पृश्नि॑मातरोदि॒वोमर्या॒ऽआनो॒ऽअच्छा॑जिगातन ॥ वयो॒नयेश्रेणी॑ःप॒प्तुरोज॒सांता॑न्दि॒वोबृ॑ह॒तःसानु॑न॒स्परि॑ । अश्वा॑सऽएषामु॒भये॒यथा॑वि॒दुःप्रपर्व॑तस्यनभ॒नूँर॑चुच्यवुः ॥ मिमा॑तु॒द्यौरदि॑तिर्वी॒तये॑न॒ःसंदानु॑चि॒त्राऽउ॒षसो॑यतं॑ता॑ । आचु॑च्यवुर्दि॒व्यंकोश॑मे॒तऽऋषे॑रु॒द्रस्य॑म॒रुतो॑गृ॒णानाः॑+ ॥ २४॥ (५।५।४) ईळे॑ऽअ॒ग्निंस्वव॑सं॒नमो॑भिरि॒हप्र॑स॒त्तोविचे॑यत्कृ॒तंन॑ः । रथै॑रिव॒प्रभ॑रेवाज॒यद्भि॑ःप्रदक्षि॒णिन्म॒रुतां॒स्तोम॑मृध्यां ॥ आये॑त॒स्थुःपृष॑तीषुश्रु॒तासु॑सु॒खेषु॑रु॒द्राम॒रुतो॒रथे॑षु । वना॑चिदुग्राजिहते॒निवो॑भि॒यापृ॑थि॒वीचि॑द्रेजते॒पर्व॑तश्चित् ॥ पर्व॑तश्चि॒न्महि॑वृ॒द्धोबि॑भायदि॒वश्चि॒त्सानु॑रेजतस्व॒नेव॑ः । यत्क्रीळ॑थमरुतऽऋष्टि॒मंत॒ऽआप॑ऽइवस॒ध्र्य॑ंचोधवध्वे ॥ व॒राऽइ॒वेद्रै॑व॒तासो॒हिर॑ण्यैर॒भिस्व॒धाभि॑स्त॒न्व॑ःपिपिश्रे । श्रि॒येश्रेयां॑सस्त॒वसो॒रथे॑षुस॒त्रामहां॑सिचक्रिरेत॒नूषु॑ ॥ अ॒ज्ये॒ष्ठासो॒ऽअक॑निष्ठासऽए॒तेसंभ्रा॑तरोवावृधु॒ःसौभ॑गाय । युवा॑पि॒तास्वपा॑रु॒द्रऽए॑षांसु॒दुघा॒पृश्नि॑ःसु॒दिना॑म॒रुद्भ्य॑ः ॥ यदु॑त्त॒मेम॑रुतोमध्य॒मेवा॒यद्वा॑व॒मेसु॑भगासो॑दि॒विष्ठ । अतो॑नोरुद्राऽउ॒तवा॒न्वं॑१॒स्याग्ने॑वि॒त्ताद्ध॒विषो॒यद्यजा॑म ॥ अ॒ग्निश्च॒यन्म॑रुतोविश्ववेदसोदि॒वोवह॑ध्व॒ऽउत्त॑

(५।५।४) ईळेअग्निमित्यष्टर्चस्यसूक्तस्य [illegible] (आग्नेयंचवेत्यनुक्रमण्युक्तेरग्नामरुतोवा) ।

रादधिष्णुभिः । तेमंदसानाधुनयोरिशादसोवामंधत्तयजमानायसुन्वते+ ॥ अग्नेमरुद्भिःशुभयद्भिर्ऋक्वभिःसोमंपिब
मंदसानोगणश्रिभिः । पावकेभिर्विश्वमिन्वेभिरायुभिर्वैश्वानरप्रदिवाकेतुनासजूः+ ॥ २५ ॥ (५।५।५) केष्ठानरः
श्रेष्ठतमायऽएकऽएकऽआयय । परमस्याःपरावतः ॥ क्व१वोश्वाःक्वा३भीशवःकथंशेककथायय । पृष्ठेसदोनसोर्य
मः ॥ जघनेचोदऽएषांविसक्थानिनरोयमुः । पुत्रकृथेनजनयः ॥ परावीरासऽएतनमर्यासोभद्रजानयः । अग्नित
पोयथासथ ॥ सनत्साश्व्यंपशुमुतगव्यंशतावयं । श्यावाश्वस्तुताययादोर्वीरायोपबर्बृहत् ॥ २६ ॥ उतत्वास्त्रीशशी
यसीपुंसोभवतिवस्यसी । अदेवत्रादराधसः ॥ वियाजानातिजसुरिंवितृष्यंतंविकामिनं । देवत्राकृणुतेमनः ॥ उत
घानेमोऽअस्तुतःपुमाँऽइतिब्रुवेपणिः । सवैरदेयऽइत्समः+ ॥ उतमेरपद्युवतिर्ममंदुषीप्रतिश्यावायवर्तनिं । विरोहि
तापुरुमीह्ळाययेमतुर्विप्रायदीर्घयशसे ॥ योमेधेनूनांशतंवैददश्विर्यथाददत् । तरंतऽइवमंहना ॥ २७ ॥ यऽईंवहंत
ऽआशुभिःपिबंतोमदिरंमधु । अत्रश्रवांसिदधिरे ॥ येषांश्रियाधिरोदसीविभ्राजंतेरथेष्वा । दिविरुक्मऽइवोपरि ॥

(५।५।५) केष्ठानरइत्येकोनविंशत्यृचस्यसूक्तस्यश्यावाश्वः आद्यानांतिसृणांयईंवहंतइत्यादिषण्णांचमरुतःपंचम्यादितिसृणांतरंतमहिषीशशीयसी उतमेरपदित्यस्याःपुरमीह्ळोयोमेधेनूनामित्यस्यास्तरंतःएतंमेस्तोममित्यादितिसृणांरथवीतिर्गायत्रीपंचम्यनुष्टुप्नवमीसतोबृहती । (अत्रत्यौपुरुमीह्ळतरंतौवैददश्वी रथवीतिर्दार्भ्यः) ।

युवासमारुतोगणस्त्वेषरथोऽअनेद्यः । शुभंयावाप्रतिष्कुतः ॥ कोवेदनूनमेषांयत्रामदंतिधूतयः । ऋतजाताऽअरेप
सः ॥ यूयंमर्तंविपन्यवःप्रणेतारऽइत्थाधिया । श्रोतारोयामहूतिषु ॥ २८ ॥ तेनोवसूनिकाम्यापुरुश्चंद्रारिशादसः ।
आयज्ञियासोववृत्तन ॥ एतंमेस्तोममूर्म्येदार्भ्यायपरावह । गिरोदेविरथीरिव ॥ उतमेवोचतादितिसुतसोमेरथवी
तौ । नकामोऽअपवेतिमे ॥ एषक्षेतिरथवीतिर्मघवागोमतीरनु । पर्वतेष्वपश्रितः ॥ २९ ॥ (५।५।६) ऋतेनऽऋ
तमपिहितंध्रुवंवांसूर्यस्ययत्रविमुचंत्यश्वान् । दशशतासहतस्थुस्तदेकंदेवानांश्रेष्ठंवपुषामपश्यं ॥ तत्सुवांमित्रावरु
णामहित्वमीर्मातस्थुषीरहभिर्दुदुह्रे । विश्वाःपिन्वथःस्वसरस्यधेनाऽअनुवामेकःपविराववर्त ॥ अधारयतंपृथि
वीमुतद्यांमित्रराजानावरुणामहोभिः । वर्धयतमोषधीःपिन्वतंगाऽअववृष्टिंसृजतंजीरदानू ॥ आवामश्वासःसुयु
जोवहंतुयतरश्मयऽउपयंत्वर्वाक् । घृतस्यनिर्णिगनुवर्ततेवामुपसिंधवःप्रदिविक्षरंति ॥ अनुश्रुताममतिंवर्धदुर्वीं
बर्हिरिवयजुषारक्षमाणा । नमस्वंताधृतदक्षाधिगर्तेमित्रासाथेवरुणेळास्वंतः+ ॥ ३० ॥ अक्रविहस्तासुकृतेपरस्पायं
त्रासाथेवरुणेळास्वंतः । राजानाक्षत्रमहृणीयमानासहस्रस्थूणंबिभृथःसहद्वौ+ ॥ हिरण्यनिर्णिगयोऽअस्यस्थूणावि
भ्राजतेदिव्य१श्वाजनीव । भद्रेक्षेत्रेनिमितातिल्विलेवासनेममध्वोऽअधिगर्त्यस्य ॥ हिरण्यरूपमुषसोव्युष्टावयःस्थू

(५।५।६) ऋतेनऋतमितिनवर्चस्यसूक्तस्यात्रेयःश्रुतविन्मित्रावरुणौत्रिष्टुप् ।

णमुदितासूर्यस्य । आरोहथोवरुणमित्रगर्तमतश्चक्षाथेऽअदितिंदितिंच ॥ यद्बंहिष्ठंनातिविधेसुदानूऽअच्छिद्रंशर्मभुवनस्यगोपा । तेननोमित्रावरुणावविष्टंसिषासंतोजिगीवांसःस्याम ॥ ३१ ॥ इतिचतुर्थाऽष्टकेतृतीयोऽध्यायः ॥३॥

सप्तविंशाध्यायेवर्गाः ३१ सूक्तानि १६ ऋचः १६१ ॥ त्यागः ॥ उषसइ. सूर्यरश्मिभ्य. सूर्याये. ३ विश्वेभ्योदेवेभ्य. मित्रावरुणाभ्यामग्नय. विद्युतेग्नय. उषस. इंद्रसूर्याभ्या. अग्नय. २ विश्वेभ्योदेवेभ्य. सूर्याये. विश्वेभ्योदेवेभ्य. ३ सवित्र. २ विश्वेभ्योदेवे. सवित्र. २ अग्नय. २ विश्वेभ्योदेवेभ्य. इंद्रवायुभ्या. वायव. इंद्रवायुभ्या. २ अग्नय. ३ विश्वेभ्योदेवेभ्य. ५ मरुद्भ्य. ९१ अग्नामरुद्भ्य. ८ मरुद्भ्य. ४ शसीयस्याइ. ४ पुरुमीह्लाये. तरंताये. मरुद्भ्य. ६ रथवीतय. ३ मित्रावरुणाभ्या. ९ ॥ इतिचतुर्थेतृतीयः ॥

ऋतस्यसप्तार्चनानाजागतंवरुणंपंक्त्यंतंतुंयश्चिकेतषड्गातहव्यंआचिकितानानुष्टुभंतुंबळित्थापंचयजतःप्रवोगायत्रंत्रीरोचनाचतुष्कमुरुचक्रिःपुरूरुणागायत्रंत्वांनस्तृचंबाहुवृक्तआमित्रऔषिणहंयदद्यदशपौरंआश्विनंतदानुष्टुभंतुंकूष्ठःप्रतिनवावस्युःपांक्तमाभातिपंचात्रिःप्रातर्यावाणाश्विनौनवंसप्तवध्रिस्त्र्युष्णिगादिंचतुर्थीत्रिष्टुप्पंचानुष्टुभौंत्याःपंचगर्भस्त्राविण्यउपनिर्षन्महेदशसत्यश्रवाउषस्यंतुपांक्तंद्युतद्यामानंषड्युंजतेपंचश्यावाश्वःसावित्रंतुजागतंतत्सवितुर्नवगायत्रमाद्यानुष्टुबच्छदशात्रिःपार्जन्यंमुपाद्यास्तिस्रोजगत्यंउपांत्यानुष्टुब्बळित्थातृचंपार्थिवमानुष्टुभंप्रसम्राजेष्टौवारुणमिंद्राग्नीषळैंद्राग्नमानुष्टुभंविराट्पूर्वांतंप्रवोनवैवयामरुन्मारुतमतिजागतंबार्हस्पत्योभरद्वाजःषष्ठंमंडलमपश्यंत्त्वंह्यग्नेसप्तोना ॥ १ ॥ ॥ ॥ ॥

॥ हरिः ओम् ॥ (५।५।७) ऋतस्यगोपावधितिष्ठथोरथंसत्यधर्माणापरमेव्योमनि । यमत्रमित्रावरुणावथोयुवंतस्मैवृष्टिर्मधुमत्पिन्वतेदिवः+ ॥ सम्राजावस्यभुवनस्यराजथोमित्रावरुणाविदथेस्वर्दृशा । वृष्टिंवांराधोऽअमृतत्वमीमहेद्यावापृथिवीविचरंतितन्यवः ॥ सम्राजाऽउग्रावृषभादिवस्पतीपृथिव्यामित्रावरुणाविचर्षणी । चित्रेभिरभ्रैरुपतिष्ठथोरवंद्यांवर्षयथोऽअसुरस्यमायया ॥ मायावांमित्रावरुणादिविश्रितासूर्योज्योतिश्चरतिचित्रमायुधं । तमभ्रेणवृष्ट्यागूहथोदिविपर्जन्यद्रप्सामधुमंतऽईरते ॥ रथंयुंजतेमरुतःशुभेसुखंशूरोनमित्रावरुणागविष्टिषु । रजांसिचित्राविचरंतितन्यवोदिवःसम्राजापयसानऽउक्षतं ॥ वाचंसुमित्रावरुणाविरावतींपर्जन्यश्चित्रांवदतित्विषीमतीं । अभ्रावसतमरुतःसुमाययाद्यांवर्षयतमरुणामरेपसं ॥ धर्मणामित्रावरुणाविपश्चिताव्रतारक्षेथेऽअसुरस्यमायया । ऋतेनविश्वंभुवनंविराजथःसूर्यमाधत्थोदिविचित्र्यंरथं ॥ १ ॥ (५।५।८) वरुणंवोरिशादसमृचामित्रंहवामहे । परिव्रजेवबाह्वोर्जगन्वांसास्वर्णरं ॥ ताबाहवासुचेतुनाप्रयंतमस्माऽअर्चते । शेवंहिजार्यंवांविश्वासुक्षासुजोगुवे ॥ यन्नूनमश्यांगतिंमित्रस्ययायांपथा । अस्यप्रियस्यशर्मण्यहिंसानस्यसश्चिरे+ ॥ युवाभ्यांमित्रावरुणोपमंधेयामृचा । यद्धक्षये

(५।५।७) ऋतस्यगोपावितिसप्तर्चस्यसूक्तस्यात्रेयोर्चनानामित्रावरुणौजगती । (५।५।८) वरुणंवइतिसप्तर्चस्यसूक्तस्यार्चनानामित्रावरुणावनुष्टुबंत्यापंक्तिः ।

मघोनांस्तोतॄणांचस्पूर्धसे ॥ आनोमित्रसुदीतिभिर्वरुणश्चसधस्थऽआ । स्वेक्षयेमघोनांसखीनांचवृधसे ॥ युवंनोयेषुव
रुणक्षत्रंबृहच्चबिभृथः । उरुणोवाजसातयेकृतंरायेऽस्वस्तये ॥ उच्छंत्यांमेयजतादेवक्षत्रेरुशद्गवि । सुतंसोमंनहस्ति
भिरापड्भिर्धावतंनराबिभ्रंतावर्चनानसं ॥ २ ॥ (५।५।९) यश्चिकेतससुक्रतुर्देवत्रासब्रवीतुनः । वरुणोयस्यदर्शतोमित्रो
वावनंतेगिरः ॥ ताहिश्रेष्ठवर्चसाराजानादीर्घश्रुत्तमा । तासत्पतीऽऋतावृधऽऋतावानाजनेजने ॥ तावामियानोवसेपू
र्वाऽउपब्रुवेसचा । स्वश्वासःसुचेतुनावाजाँऽअभिप्रदावने ॥ मित्रोऽअंहोश्चिदादुरुक्षयायगातुंवनते । मित्रस्यहिप्रतूर्व
तःसुमतिरस्तिविधतः+ ॥ वयंमित्रस्यावसिस्यामसप्रथस्तमे । अनेहसस्त्वोतयःसत्रावरुणशेषसः ॥ युवंमित्रेमंजनंयत
थःसंचनयथः । मामघोनःपरिख्यतंमोऽअस्माकमृषीणांगोपीथेनऽउरुष्यतं ॥ ३ ॥ (५।५।१०) आचिकितानसु
क्रतूदेवौमर्तरिशादसा । वरुणायऽऋतपेशसेदधीतप्रयसेमहे+ ॥ ताहिक्षत्रमविह्रुतंसम्यगसुर्य१माशाते । अधव्रतेव
मानुषंस्व१र्णधायिदर्शतं+ ॥ तावामेषेरथानामुर्वींगव्यूतिमेषां । रातहव्यस्यसुष्टुतिंदधृक्स्तोमैर्मनामहे ॥ अधाहि
काव्यायुवंदक्षस्यपूर्भिरद्भुता । निकेतुनाजनानांचिकेथेपूतदक्षसा ॥ तदृतंपृथिविबृहच्छ्रवऽएषऽऋषीणां । ज्रयसा

(५।५।९) यश्चिकेतेतिषळर्चस्यसूक्तस्यात्रेयोरातहव्योमित्रावरुणावनुष्टुबंत्यापंक्तिः । (५।५।१०) आचिकितानेतिषळर्चस्यसूक्तस्य रातहव्योमित्रावरुणावनुष्टुप् ।

नावरँस्पृथ्वतिक्षरंतियामभिः ॥ आयद्वामीयचक्षसामित्रंवयंचंसूरयः । व्यचिंष्ठेबहुपाय्येयतैंमहिस्वराज्यैं ॥ ४ ॥
(५।५।११) बळित्थादेवनिष्कृतमादित्यायजतंबृहत् । वरुणमित्रार्यमन्वर्षिष्ठंक्षत्रमाशाथे ॥ आयद्योनिंहिरण्ययं
वरुणमित्रसदथः । धर्तारांचर्षणीनांयंतंसुम्नंरिशादसा ॥ विश्वेहिविश्ववेदसोवरुणोमित्रोऽअर्यमा । व्रतापदेवसश्चि
रेपांतिमर्त्यंरिषः+ ॥ तेहिसत्याऽऋतस्पृशऽऋतावानोजनेंजने । सुनीथासःसुदानवोंहोश्चिदुरुचक्रयः ॥ कोनुवाँमि
त्रास्तुतोवरुणोवातनूनाँ । तत्सुवामेषतेमतिरत्रिभ्यऽएषतेमतिः+ ॥ ५ ॥ (५।५।१२) प्रवोमित्रायगायतवरुणा
यविपागिरा । महिंक्षत्रावृतंबृहत्+ ॥ सम्राजायाघृतयोनीमित्रश्चोभावरुणश्च । देवादेवेषुप्रशस्ता+ ॥ तानःशक्तंपा
र्थिवस्यमहोरायोदिव्यस्य । महिंवांक्षत्रंदेवेषु ॥ ऋतमृतेनसपंतेषिरंदक्षमाशाते । अद्रुहादेवौवर्धेते ॥ वृष्टिद्यावारीत्या
पेषस्पतीदानुमत्याः । बृहंतंगर्तमाशाते ॥ ६ ॥ (५।५।१३) त्रीरोचनावरुणत्रीँऽरुतद्यून्त्रीणिमित्रधारयथोरजाँसि । वा
वृधानावमतिंक्षत्रियस्यानुव्रतंरक्षमाणावजुर्यं+ ॥ इरावतीर्वरुणधेनवोवांमधुमद्वांसिंधवोमित्रदुह्रे । त्रयस्तस्थुर्वृष
भासस्तिसृणांधिषणानांरेतोधाविद्युमंतः ॥ प्रातर्देवीमदितिंजोहवीमिमध्यंदिनऽउदितासूर्यस्य । रायेमित्रावरुणा

(५।५।११) बळित्थादेवेतिपंचर्चस्यसूक्तस्यात्रेयोयजतोमित्रावरुणावनुष्टुप् । (५।५।१२) प्रवोमित्रायेतिपंचर्चस्यसूक्तस्ययजतो मित्रावरुणौगायत्री । (५।५।१३) त्रीरोचनेतिचतुर्ऋचस्यसूक्तस्यात्रेयउरुचक्रिर्मित्रावरुणौत्रिष्टुप् ।

सर्वतातेळैतोकायतनयायशंयोः+ ॥ याधर्तारारजसोरोचनस्योतादित्यादिव्यापार्थिवस्य । नवांदेवाऽअमृताऽआमिनंतिव्रतानिमित्रावरुणाध्रुवाणि ॥ ७ ॥ (५।५।१४) पुरूरुणाचिद्ध्यस्त्यवोनूनंवांवरुण । मित्रवंसिवांसुमतिं+ ॥ तावांसम्यगद्रुह्वाणेषमश्यामधायसे । वयंतेरुद्रास्याम ॥ पातंनोरुद्रापायुभिरुतत्रायेथांसुत्रात्रा । तुर्यामदस्यून्तनूभिः ॥ माकस्याद्भुतक्रतूयक्षंभुजेमातनूभिः । माशेषसामातनसा ॥ ८ ॥ (५।५।१५) आनोगंतंरिशादसावरुणमित्रबर्हणा । उपेमंचारुमध्वरं+ ॥ विश्वस्यहिप्रचेतसावरुणमित्रराजथः । ईशानापिप्यतंधियः ॥ उपनःसुतमागतंवरुणमित्रदाशुषः । अस्यसोमस्यपीतये ॥ ९ ॥ (५।५।१६) आमित्रेवरुणेवयंगीर्भिर्जुहुमोऽअत्रिवत् । निबर्हिषिसदतंसोमपीतये ॥ व्रतेनस्थोध्रुवक्षेमाधर्मणायातयज्जना । निबर्हिषि० ॥ मित्रश्चनोवरुणश्चजुषेतांयज्ञमिष्टये । निबर्हिषिसदतांसोम० ॥१०॥ (५।६।१) यदद्यस्थःपरावतियदर्वावत्यश्विना । यद्वापुरूपुरुभुजायदंतरिक्षऽआगतं ॥ इहत्यापुरुभूतमापुरूदंसांसिबिभ्रता । वरस्यायाम्यध्रिगूहुवेतुविष्टमाभुजे+ ॥ ईर्मान्यद्वपुषेवपुश्चक्रंरथस्ययेमथुः । पर्यु

(५।५।१४) पुरूरुणेतिचतुर्ऋचस्यसूक्तस्योरुचक्रिर्मित्रावरुणौगायत्री । (५।५।१५) आनोगंतमितितृचस्यसूक्तस्यात्रेयोबाहुवृक्तोमित्रावरुणौगायत्री । (५।५।१६) आमित्रइतितृचस्यसूक्तस्यबाहुवृक्तोमित्रावरुणावुष्णिक् । (५।६।१) यदद्यस्थइतिदशर्चस्यसूक्तस्यात्रेयःपौरोश्विनावनुष्टुप् ।

न्यानाहुषायुगामह्नारजाँसिदीयथः ॥ तदूषुवामेनाकृतंविश्वायद्वामनुष्टवे । नानांजातावरेपसासमस्मेबंधुमेयथुः ॥
आयद्वांसूर्यारथंतिष्ठद्रघुष्यदंसदा । परिवामरुषावयोघृणावरंतऽआतपः ॥ ११ ॥ युवोरत्रिश्चिकेततिनरासुम्नेनचे
तसा । घर्मंयद्वामरेपसंनासत्यास्नाभुरण्यति ॥ उग्रोवांककुहोययिःशृण्वेयामेषुसंतनिः । यद्वांदंसोभिरश्विनात्रिर्न
राववर्तति ॥ मध्वऽऊषुमधूयुवारुद्रासिषक्तिपिप्युषी । यत्समुद्रातिपर्षथःपक्वाःपृक्षोभरंतवां ॥ सत्यमिद्वाऽउऽअश्वि
नायुवामाहुर्मयोभुवा । तायामन्यामहूतमायामन्नामृळयत्तमा ॥ इमाब्रह्माणिवर्धनाश्विभ्यांसंतुशंतमा । यातक्षा
मरथाँऽइवावोचामबृहन्नमः ॥ १२ ॥ (५।६।२) कूष्ठोदेवावश्विनाद्यादिवोमनावसू । तच्छ्रवथोवृषण्वसूऽअत्रि
र्वामाविवासति ॥ कुहत्याकुहनुश्रुतादिविदेवानासत्या । कस्मिन्नायतथोजनेकोवांनदीनांसचा ॥ कंयाथःकंहग
च्छथःकमच्छायुंजाथेरथं । कस्यब्रह्माणिरण्यथोवयंवामुश्मसीष्टये ॥ पौरंचिद्ध्युदप्रुतंपौरपौरायजिन्वथः । यदींगृ
भीततातयेसिंहमिवद्रुहस्पदे+ ॥ प्रच्यवानाज्जुजुरुषोवव्रिमत्कंनमुंचथः । युवायदीकृथःपुनराकाममृण्वेवध्वः+ ॥१३॥
अस्तिहिवामिहस्तोतास्मसिवांसंदृशिश्रिये । नूश्रुतंमऽआगतमवोभिर्वाजिनीवसू ॥ कोवामद्यपुरूणामावव्नेमर्त्यानां ।
कोविप्रोविप्रवाहसाकोयज्ञैर्वाजिनीवसू ॥ आवांरथोरथानांयेष्ठोयात्वश्विना । पुरूचिदस्मयुस्तिरऽआंगूषोमर्त्येष्वा+ ॥

(५।६।२) कूष्ठोदेवाविति दशर्चस्य सूक्तस्य पौरोऽत्रिरश्विनावनुष्टुप् ।

Digitization by eGangotri. Funding by MoE-IKS

शमूषुवांमधूयुवास्माकमस्तुचर्कृतिः । अर्वाचीनाविचेतसाविभिःश्येनेवदीयतं ॥ अश्विनायद्धकर्हिचिच्छुश्रूयातमि
मंहवं । वस्वीरूषुवांभुजःपृंचंतिसुवांपृचः ॥ १४ ॥ (५।६।३) प्रतिप्रियतमंरथंवृषणंवसुवाहनं । स्तोतावामश्वि
नावृषिःस्तोमेनप्रतिभूषतिमाध्वीममश्रुतंहवं ॥ अत्यायातमश्विनातिरोविश्वाऽअहंसना । दस्राहिरण्यवर्तनीसुषुम्ना
सिंधुवाहसामाध्वी० ॥ आनोरत्नानिविभ्रतावश्विनागच्छतंयुवं । रुद्राहिरण्यवर्तनीजुषाणावाजिनीवसूमाध्वी० ॥
सुष्टुभोवांवृषण्वसूरथेवाणीच्याहिता । उतवांककुहोमृगःपृक्षःकृणोतिवापुषोमाध्वी० ॥ बोधिन्मनसारथ्येषिराहवन
श्रुता । विभिश्च्यवानमश्विनानियाथोऽअद्वयाविनंमाध्वी० ॥ १५ ॥ आवांनरामनोयुजोश्वासःप्रुषितप्सवः ।
वयोवहंतुपीतयेसहसुम्नेभिरश्विनामाध्वी० ॥ अश्विनावेहगच्छतंनासत्यामाविवेनतं । तिरश्चिदर्ययापरिवर्तिर्यातम
दाभ्यामाध्वी० ॥ अस्मिन्यज्ञेऽअदाभ्याजरितारंशुभस्पती । अवस्युमश्विनायुवंगृणंतमुपभूषथोमाध्वी० ॥ अभूदु
षारुशत्पशुराग्निरधाय्यृत्वियः । अयोजिवांवृषण्वसूरथोदस्रावमर्त्योमाध्वी० ॥ १६ ॥ (५।६।४) आभात्यग्निरु
षसामनीकमुद्विप्राणांदेवयावाचोऽअस्थुः । अर्वाचानूनंरथ्येहयातंपीपिवांसमश्विनाघर्ममच्छ ॥ नसंस्कृतंप्रमिमीतो
गमिष्ठांतिनूनमश्विनोपस्तुतेह । दिवाभिपित्वेवसागमिष्ठाप्रत्यवर्तिंदाशुषेशंभविष्ठा ॥ उतायातंसंगवेप्रातरह्नोमध्यं ॥२६॥

(५।६।३)प्रतिप्रियतममितिनवर्चस्यसूक्तस्यात्रेयोवस्युरश्विनौपंक्तिः।.(५।६।४)आभात्यग्निरितिपंचर्चस्यसूक्तस्यभौमोत्रिरश्विनौत्रिष्टुप् ।

दिनऽउदितासूर्यस्य । दिवानक्तमवसाशंतमेननेदानींपीतिरश्विनाततान ॥ इदंहिवांप्रदिविस्थानमोकऽइमेगृहाऽअश्विनेदंदुरोणं । आनोदिवोबृहतःपर्वतादाद्भ्योयातमिषमूर्जंवहंता ॥ समश्विनोरवसानूतनेनमयोभुवासुप्रणीतीगमेम । आनोरयिंवहतमोतवीरानाविश्वान्यमृतासौभगानि ॥ १७ ॥ (५।६।५) प्रातर्यावाणाप्रथमायजध्वंपुरागृध्रादररुषःपिबातः । प्रातर्हियज्ञमश्विनादधातेप्रशंसंतिकवयःपूर्वभाजः ॥ प्रातर्यजध्वमश्विनाहिनोतनसायमस्तिदेवयाऽअजुष्टं । उतान्योऽअस्मद्यजतेविचावःपूर्वःपूर्वोयजमानोवनीयान् ॥ हिरण्यत्वङ्मधुवर्णोघृतस्नुःपृक्षोवहन्नारथोवर्ततेवां । मनोजवाऽअश्विनावातरंहायेनातियाथोदुरितानिविश्वा ॥ योभूयिष्ठंनासत्याभ्यांविवेषचनिष्ठंपित्वोररतेविभागे । सतोकमस्यपीपरच्छमीभिरनूर्ध्वभासःसदमित्तुतुर्यात् ॥ समश्विनो० ॥ १८ ॥ (५।६।६) अश्विनावेहगच्छतंनासत्यामाविवेनतं । हंसाविवपततमासुताँऽउप ॥ अश्विनाहरिणाविवगौराविवानुयवसं । हंसाविव० ॥ अश्विनावाजिनीवसूजुषेथांयज्ञमिष्टये । हंसाविव० ॥ अत्रिर्यद्वामवरोहन्नृबीसमजोहवीन्नाधमानेवयोषा । श्येनस्यचिज्जवसानूतनेनागच्छतमश्विनाशंतमेन ॥ १९ ॥ विजिहीष्ववनस्पतेयोनिःसूष्यंत्याऽइव । श्रुतंमेऽअश्विनाहवंस

(५।६।५) प्रातर्यावाणेतिपंचर्चस्यसूक्तस्यात्रेयोश्विनौत्रिष्टुप् । (५।६।६) अश्विनावितिनवर्चस्यसूक्तस्यात्रेयःसप्तवध्रिरश्विनावनुष्टुप् आद्यास्तिस्रउष्णिहश्चतुर्थीत्रिष्टुप् (पंचम्यादिपंचगर्भस्राविण्यउपनिषदः) ।

प्तवध्रिंचमुंचतं ॥ भीतायनाधमानायऽऋषयेसप्तवध्रये । मायाभिरश्विनायुवंवृक्षंसंचविचाचथः ॥ यथावातःपुष्करि
णींसमिंगयंतिसर्वतः । एवातेगर्भऽएजतुनिरैतुदशमास्यः ॥ यथावातोयथावनंयथासमुद्रऽएजति । एवात्वंदशमास्य
सहावेहिजरायुणा ॥ दशमासान्छशयानःकुमारोऽअधिमातरि । निरैतुजीवोऽअक्षतोजीवोजीवंत्याऽअधि ॥ २० ॥
(५।६।७) महेनोऽअद्यबोधयोषोरायेदिवित्मती । यथाचिन्नोऽअबोधयःसत्यश्रवसिवाय्येसुजातेऽअश्वसूनृते ॥ यासु
नीथेशौचद्रथेव्यौच्छोदुहितर्दिवः । साव्युच्छसहीयसिसत्य० ॥ सानोऽअद्याभरद्वसुव्युच्छादुहितर्दिवः । योव्यौच्छः
सहीयसिसत्य० ॥ अभियेत्वाविभावरिस्तोमैर्गृणंतिवह्नयः । मघैर्मघोनिसुश्रियोदामन्वंतःसुरातयःसुजाते० ॥ यच्चि
द्धितेगणाऽइमेछदयंतिमघत्तये । परिचिद्वष्टयोदधुर्ददतोराधोऽअह्रयंसुजाते० ॥ २१ ॥ ऐषुधावीरवद्यशऽउषोमघो
निसूरिषु । येनोराधांस्यह्रयामघवानोऽअरासतसुजा० ॥ तेभ्योद्युम्नंबृहद्यशऽउषोमघोन्यावह । येनोराधांस्यश्व्यागव्या
भजंतसूरयःसुजा० ॥ उतनोगोमतीरिषऽआवहादुहितर्दिवः । साकंसूर्यस्यरश्मिभिःशुक्रैःशोचद्भिरर्चिभिःसुजा० ॥
व्युच्छादुहितर्दिवोमाचिरंतनुथाऽअपः । नेत्त्वास्तेनंयथारिपुंतपातिसूरोऽअर्चिषासुजा० ॥ एतावद्वेदुषस्त्वंभूयोवादा
तुमर्हसि । यास्तोतृभ्योविभावर्युच्छंतीनप्रमीयसेसुजा० ॥२२॥ (५।६।८) द्युतद्यामानंबृहतीमृतेनऽऋतावरीमरुणप्सुं

(५।६।७) महेनइतिदशर्चस्यसूक्तस्यात्रेयःसत्यश्रवाउषाःपंक्तिः । (५।६।८) द्युतद्यामानमितिषळृचस्यसूक्तस्यसत्यश्रवाउषास्त्रिष्टुप् ।

विभातीं । देवीमुषसंस्वरावहंतींप्रतिविप्रासोमतिभिर्जरंते ॥ एषाजनंदर्शताबोधयंतीसुगान्पथःकृण्वतीयात्यग्रे । बृहद्रथाबृहतीविश्वमिन्वोषाज्योतिर्यच्छत्यग्रेऽअह्नां ॥ एषागोभिररुणेभिर्युजानास्रेधंतीरयिमप्रायुचक्रे । पथोरदंतीसुवितायदेवीपुरुष्टुताविश्ववाराविभाति ॥ एषाव्येनीभवतिद्विबर्हाऽआविष्कृण्वानातन्वंपुरस्तात् । ऋतस्यपंथामन्वेतिसाधुप्रजानतीवनदिशोमिनाति ॥ एषाशुभ्रानतन्वोविदानोर्ध्वेवस्नातीदृशयेनोऽअस्थात् । अपद्वेषोबाधमानातमांस्युषादिवोदुहिताज्योतिषागात् ॥ एषाप्रतीचीदुहितादिवोनॄन्योषेवभद्रानिरिणीतेऽअप्सः । व्यूर्ण्वतीदाशुषेवार्याणिपुनर्ज्योतिर्युवतिःपूर्वथाकः ॥२३॥ (५।६।९) युंजतेमनऽउतयुंजतेधियोविप्राविप्रस्यबृहतोविपश्चितः । विहोत्रादधेवयुनाविदेकऽइन्महीदेवस्यसवितुःपरिष्टुतिः ॥ विश्वारूपाणिप्रतिमुंचतेकविःप्रासावीद्भद्रंद्विपदेचतुष्पदे । विनाकमख्यत्सविताविरेण्योनुप्रयाणमुषसोविराजति ॥ यस्यप्रयाणमन्वन्यऽइद्ययुर्देवादेवस्यमहिमानमोजसा । यःपार्थिवानिविममेसऽएतशोरजांसिदेवःसवितामहित्वना+ ॥ उतयासिसवितस्त्रीणिरोचनोतसूर्यस्यरश्मिभिःसमुच्यसि । उतरात्रीमुभयतःपरीयसऽउतमित्रोभवसिदेवधर्मभिः ॥ उतेशिषेप्रसवस्यत्वमेकऽइदुतपूषाभवसिदेवयामभिः । उतेदंविश्वंभुवनंविराजसिश्यावाश्वस्तेसवितःस्तोममानशे ॥ २४ ॥ (५।६।१०) तत्सवितुर्वृणीमहेवयंदेवस्यभोजनं । श्रे

(५।६।९) युंजतेमनइतिपंचर्चस्यसूक्तस्यात्रेयःश्यावाश्वःसविताजगती । (५।६।१०) तत्सवितुरितिनवर्चस्यसूक्तस्यश्यावाश्वःसवि-

ष्ठँसर्वधातमंतुरंभगस्यधीमहि ॥ अस्यहिस्वयशस्तरंसवितुःकच्चनप्रियं । नमिनंतिस्वराज्यँ ॥ सहिरत्नानिदाशुषेसुवा
तिसविताभगः । तंभागंचित्रमीमहे ॥ अद्यानोदेवसवितःप्रजावत्सावीःसौभगं । परादुष्वप्न्यंसुव ॥ विश्वानिदेव
सवितर्दुरितानिपरासुव । यद्भद्रंतन्नऽआसुव ॥ २५ ॥ अनागसोऽअदितयेदेवस्यसवितुःसवे । विश्वावामानिधीम
हि ॥ आविश्वदेवंसत्पतिंसूक्तैरद्यावृणीमहे । सत्यसवंसवितारँ ॥ यऽइमेऽउभेऽअहनीपुरऽएत्यप्रयुच्छन् । स्वाधी
र्देवःसविता ॥ यऽइमाविश्वाजातान्याश्रावयतिश्लोकेन । प्रचसुवातिसविता+ ॥ २६ ॥ (५।६।११) अच्छा
वदतवसंगीर्भिराभिःस्तुहिपर्जन्यंनमसाविवास । कनिक्रदद्वृषभोजीरदानूरेतोदधात्योषधीषुगर्भँ ॥ विवृक्षान्हंत्युतहँ
तिरक्षसोविश्वँबिभायभुवनंमहावधात् । उतानागाऽईषतेवृष्ण्यावतोयत्पर्जन्यःस्तनयन्हंतिदुष्कृतः ॥ रथीवकशया
श्वाँऽअभिक्षिपन्नाविर्दूतान्कृणुतेवर्ष्याँ३अह । दूरात्सिंहस्यस्तनथाऽउदीरतेयत्पर्जन्यःकृणुतेवर्ष्यँ१नभः ॥ प्रवाता
वांतिपतयँतिविद्युतऽउदोषधीर्जिहतेपिन्वतेस्वः । इराविश्वस्मैभुवनायजायतेयत्पर्जन्यःपृथिवींरेतसावति ॥ यस्यव्र
तेपृथिवीनन्नमीतियस्यव्रतेशफवज्जर्भुरीति । यस्यव्रतऽओषधीर्विश्वरूपाःसनःपर्जन्यमहिशर्मयच्छ ॥ २७ ॥ दिवो
नोवृष्टिंमरुतोररीध्वंप्रपिन्वतवृष्णोऽअश्वस्यधाराः । अर्वाङेतेनस्तनयित्नुनेह्यपोनिषिंचन्नसुरःपितानः ॥ अभिक्रंद ॥२८॥

तागायत्रीआद्यानुष्टुप् । (५।६।११) अच्छावदेतिदशर्चस्यसूक्तस्यभौमोत्रिःपर्जन्यस्त्रिष्टुप्द्वितीयादितिस्रोजगत्योनवम्यनुष्टुप् ।

स्तनयगर्भमाधाऽउदन्वतापरिदीयारथेन । दृतिंसुकर्षविषितंन्यंचंसमाभवंतूद्वतौनिपादाः+ ॥ महांतंकोशमुदचानि
षिंचस्यंदंतांकुल्याविषिताःपुरस्तात् । घृतेनद्यावापृथिवीव्युंधिसुप्रपाणंभवत्वघ्न्याभ्यः ॥ यत्पर्जन्यकनिक्रदत्स्तनय
न्हांसिदुष्कृतः । प्रतीदंविश्वंमोदतेयत्किंचपृथिव्यामधि ॥ अवर्षीर्वर्षमुदुषूगृभायाकर्धन्वान्यत्येतवाऽउ । अजीजन
ऽओषधीर्भोजनायकमुतप्रजाभ्योविदोमनीषां+ ॥ २८ ॥ (५।६।१२) बळित्थापर्वतानांखिद्रंबिभर्षिपृथिवि ।
प्रयाभूमिंप्रवत्वतिमह्नाजिनोषिमहिनि ॥ स्तोमासस्त्वाविचारिणिप्रतिष्टोभंत्यक्तुभिः । प्रयावाजंनहेषंतंपेरुमस्यस्यर्जु
नि ॥ दृह्ळाचिद्यावनस्पतीन्क्ष्मयादर्धर्ष्योजसा । यत्तेऽअभ्रस्यविद्युतोदिवोवर्षंतिवृष्टयः ॥ २९ ॥ ॥ (परिशिष्टं ॥
वर्षंतुतेविभावरिदिवोऽअभ्रस्यविद्युतः । रोहंतुसर्वबीजान्यवब्रह्मद्विषोजहि ॥) (५।६।१३) प्रसम्राजेबृहदर्चा
गभीरंब्रह्मप्रियंवरुणायश्रुताय । वियोजघानशमितेवचर्मोपस्तिरेपृथिवींसूर्याय ॥ वनेषुव्यं१तरिक्षंततानवाजमर्वत्सु
पयऽउस्रियासु । हृत्सुक्रतुंवरुणोऽअप्स्व१ग्निंदिविसूर्यमदधात्सोममद्रौ ॥ नीचीनबारंवरुणःकवंधंप्रससर्जरोदसीऽ
अंतरिक्षं । तेनविश्वस्यभुवनस्यराजायवंनवृष्टिव्युनत्तिभूम ॥ उनत्तिभूमिंपृथिवीमुतद्यांयदादुग्धंवरुणोवष्ट्यादित् ।
समभ्रेणवसतपर्वतासस्तविषीयंतःश्रथयंतवीराः ॥ इमामूष्वासुरस्यश्रुतस्यमहींमायांवरुणस्यप्रवोचं । मानेनेवतस्थि

(५।६।१२) बळित्थेतितृचस्यसूक्तस्यभौमोत्रिः पृथिव्यनुष्टुप् । (५।६।१३) प्रसम्राजइत्यष्टर्चस्यसूक्तस्यभौमोत्रिर्वरुणस्त्रिष्टुप् ।

वाँऽअं॒तरि॑क्षे॒वियो॑म॒मेपृ॑थि॒वींसूर्ये॑ण ॥ ३० ॥ इ॒मामू॒नुक॒वित॑मस्यमा॒यांम॒हींदे॒वस्य॒नकि॒रादं॑धर्ष । ए॒कंयदु॒द्नानपृ॒णंत्ये
नीरासिं॒चंतीर॒वनं॑यःसमु॒द्रं+ ॥ अ॒र्य॒म्यं॑वरुणमि॒त्र्यं॑वा॒सखा॑यंवा॒सद॒मिद्भ्रात॑रंवा । वे॒शंवा॒नित्यं॑वरु॒णार॑णंवा॒यत्सी॒माग॑
श्चकृ॒माशि॒श्रथ॒स्तत्+ ॥ कि॒त॒वासो॒यद्रि॑रि॒पुर्न॑दी॒वियद्वा॑घास॒त्यमु॒तयन्नवि॒द्म । सर्वा॒ताविष्यं॑शिथि॒रेवं॑दे॒वाधा॑तेस्यामव
रुणप्रि॒यासः॑ ॥ ३१ ॥ (५।६।१४) इंद्रा॑ग्नी॒यम॑वंथऽउ॒भावाजे॑षु॒मर्त्यं॑ । दृ॒ळ्हाचि॒त्सप्रभे॑दतिद्यु॒म्नावाणी॑रिवत्रि॒तः+ ॥
यापृत॑नासुदु॒ष्टरा॒यावाजे॑षुश्र॒वाय्या॑ । यापंचं॑चर्ष॒णीर॒भीं॑द्रा॒ग्नीताहं॑वामहे ॥ तयो॒रिद॑मव॒च्छवं॑स्ति॒ग्मादि॒द्युन्म॒घो
नोः॑ । प्रति॒द्रुणा॒गभ॑स्त्यो॒र्गवां॑वृत्र॒घ्नऽएषं॑ते ॥ ता॒वामे॒षेरथा॑नामिंद्रा॒ग्नीहं॑वामहे । पती॑तु॒रस्य॒राधं॑सोवि॒द्वांसा॒गिर्वं॑णस्त
मा ॥ ताव्रृ॒धंता॒वनु॒द्यून्मर्ता॑यदे॒वाव॒दभा॑ । अर्हं॑ताचित्पु॒रोद॒धें॑शेवदे॒वावर्वं॑ते ॥ ए॒वेंद्रा॒ग्निभ्या॒महा॑विह॒व्यंशू॒ष्यं॑घृ॒तंनपू॒
तमद्रिं॑भिः । तासू॒रिषु॒श्रवो॑बृ॒हद्र॒यिंगृ॒णत्सुं॑दिधृ॒तमि॒षंगृ॒णत्सुं॑दिधृतं ॥ ३२ ॥ (५।६।१५) प्रवो॑म॒हेम॒तयो॑यंतु॒विष्ण॑
वेम॒रुत्वं॑तेगिरि॒जाऽए॑व॒याम॑रुत् । प्रशर्धा॑य॒प्रयं॑ज्यवेसु॒खादये॑त॒वसे॑भ॒ंददि॑ष्टये॒धुनि॑व्रताय॒शव॑से ॥ प्रयेजा॒तामं॑हि॒नायेच॒
नुस्व॒यंप्रवि॒द्मनां॑ब्रुवतंऽएव॒याम॑रुत् । क्रत्वा॒तद्वो॑मरु॒तोनाधृ॒षेशवो॑दा॒नाम॒ह्नातदे॑षा॒मधृ॑ष्टास॒ोनाद्र॑यः ॥ प्रयेदि॒वोबृ॒ह॒

(५।६।१४) इंद्राग्नीयमितिषळर्चस्यसूक्तस्यैंद्राग्न्यनुष्टुप्अंत्याविराट्पूर्वा । (५।६।१५) प्रवोमहइतिनवर्चस्यसूक्तस्यात्रेयएवयामरुन्मरुतोऽतिजगती ।

तःशृण्विरेगिरासुशुक्कानःसुभ्वंऽएवयामरुत् । नयेषामिरींसधस्थऽईष्टऽआँऽअग्नयोनस्वविद्युतःप्रस्पंद्रासोधुनीनां ॥
सचक्रमेमहतोनिरुरुक्रमःसमानस्मात्सदसऽएवयामरुत् । यदायुक्तत्मनास्वादधिष्णुभिर्विष्पर्धसोविमहसोजिगाति
शेवृधोनृभिः ॥ स्वनोनवोमवान्रेजयद्वृषात्वेषोययिस्तविषऽएवयामरुत् । येनासहंतऽऋंजतस्वरोचिषःस्थारश्मानोहिर्
ण्ययाःस्वायुधासऽइष्मिणः ॥ ३३ ॥ अपारोवोमहिमावृद्धशवसस्त्वेषंशवोवत्वेवयामरुत् । स्थातारोहिप्रसितौ
संदृशिस्थनतेनऽउरुष्यतानिदःशुशुक्कांसोनाग्नयः ॥ तेरुद्रासःसुमखाऽअग्नयोयथातुविद्युम्नाऽअवंत्वेवयामरुत् । दी
र्घंपृथुपप्रथेसद्मपार्थिवंयेषामज्मेष्वामहःशर्धास्यद्भुतैनसां ॥ अद्वेषोनोमरुतोगातुमेतनश्रोताहवंजरितुरेवयामरुत् ।
विष्णोर्महःसमन्यवोयुयोतनस्मद्रथ्यो३नदंसनापद्वेषांसिसनुतः+ ॥ गंतानोयज्ञंयज्ञियाःसुशमिश्रोताहवमरक्षऽएव
यामरुत् ।ज्येष्ठासोनपर्वतासोव्योमनियूयंतस्यप्रचेतसःस्यातदुर्धर्तवोनिदः+ ॥३४॥(इत्यात्रेयंपंचमंमंडलंसमाप्तम् ॥
अत्रसूक्तानि ८७) ॥ ५ ॥ (॥ परिशिष्टं ॥ हिरण्यवर्णांहरिणींसुवर्णरजतस्रजां । चंद्रांहिरण्मयींलक्ष्मींजातवे
दोमऽआवह ॥ तांमऽआवहजातवेदोलक्ष्मीमनपगामिनीं । यस्यांहिरण्यंविंदेयंगामश्वंपुरुषानहं ॥ अश्वपूर्वांरथमध्यां
हस्तिनादप्रमोदिनीं । श्रियंदेवीमुपह्वयेश्रीर्मादेवीजुषतां ॥ कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलंतींतृप्तांतर्पयंतीं ।
पद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियं ॥ चंद्रांप्रभासांयशसाज्वलंतींश्रियंलोकेदेवजुष्टामुदारां । तांपद्मिनीमींशरणमहं

CC-0. Radi Acharya Kathmandu Collection

प्रपंद्येऽलक्ष्मीर्मेनश्यतांत्वांवृणे ॥ १ ॥ आदित्यवर्णेतपसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः । तस्यफलानितपसानु
दंतुमायांतरायाश्चवाह्याऽअलक्ष्मीः ॥ उपैतुमांदेवसखःकीर्तिश्चमणिनासह । प्रादुर्भूतोस्मिराष्ट्रेस्मिन्कीर्तिमृद्धिंददातु
मे ॥ क्षुत्पिपासामलांज्येष्ठामलक्ष्मींनाशयाम्यहं । अभूतिमसंमृद्धिंचसर्वांनिर्णुदमेगृहात् ॥ गंधद्वारांदुराधर्षांनित्यपु
ष्टांकरीषिणीं । ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं ॥ मनसःकाममाकूतंवाचःसत्यमशीमहि । पशूनांरूपमन्नस्यम
यिश्रीःश्रयतांयशः ॥ २ ॥ कर्दमेनप्रजाभूतामयिसंभवकर्दम । श्रियंवासयमेकुलेमातरंपद्ममालिनीं ॥ आपस्रजंतु
स्निग्धानिचिक्लीतवसमेगृहे । निचदेवींमातरंश्रियंवासयमेकुले ॥ आर्द्रांपुष्करिणींपुष्टिंसुवर्णांहेममालिनीं । सूर्यांहि
रण्मयींलक्ष्मींजातवेदोमऽआवह ॥ आर्द्रांयःकरिणींयष्टिंपिंगलांपद्ममालिनीं । चंद्रांहिरण्मयींलक्ष्मींजातवेदोमऽआव
ह ॥ तांमऽआवहजातवेदोलक्ष्मीमनपगामिनीं । यस्यांहिरण्यंप्रभूतंगावोदास्योश्वान्विंदेयंपुरुषानहं ॥ ३ ॥ यःशु
चिःप्रयतोभूत्वाजुहुयादाज्यमन्वहं । सूक्तंपंचदशर्चंचश्रीकामःसततंजपेत् ॥ पद्माननेपद्मऽऊरूपद्माक्षीपद्मसंभवे ।
तन्मेभजसिपद्माक्षीयेनसौख्यंलभाम्यहं ॥ अश्वदायीगोदायीधनदायीमहाधने । धनंमेजुषतांदेविसर्वकामांश्चदेहिमे ॥
पद्माननेपद्मविपद्मपत्रेपद्मप्रियेपद्मदलायताक्षी । विश्वप्रियेविश्वमनोनुकूलेत्वत्पादपद्मंमयिसंनिधत्स्व ॥ पुत्रपौत्रधं
नंधान्यंहस्त्यश्वादिगवेरथं । प्रजानांभवसीमाताऽआयुष्मंतंकरोतुमे ॥ धनमग्निर्धनंवायुर्धनंसूर्योधनंवसुः । धनमिंद्रोबृ

हस्पतिर्वरुणंधनमस्तुते ॥ वैनतेयसोमंपिबसोमंपिबतुवृत्रहा । सोमंधनस्यसोमिनोमह्यंददातुसोमिनः ॥ नक्रोधोन
चमात्सर्यंनलोभोनाशुभामतिः । भवंतिकृतपुण्यानांभक्तानांश्रीसूक्तंजपेत् ॥ सरसिजनिलयेसरोजहस्तेधवलतरां
शुकगंधमाल्यशोभे । भगवतिहरिवल्लभेमनोज्ञेत्रिभुवनभूतिकरिप्रसीदमह्यं ॥ विष्णुपत्नींक्षमांदेवींमाधवींमाधवप्रि
यां । लक्ष्मींप्रियसखींदेवींनमाम्यच्युतवल्लभां ॥ महालक्ष्मीचविद्महेविष्णुपत्नीचधीमहि । तन्नोलक्ष्मीःप्रचोदयात् ॥
श्रीवर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानंमहीयते । धान्यंधनंपशुंबहुपुत्रलाभंशतसंवत्सरंदीर्घमायुः ॥ ४ ॥
इतिपरिशिष्टं ॥ ६ ॥) (६।१।१) त्वंह्यग्नेप्रथमोमनोतास्याधियोऽअभवोदस्महोता । त्वंसींवृषन्नकृणोर्दुष्टरीतु
सहोविश्वस्मैसहसेसहध्यै ॥ अधाहोतान्यसीदोयजीयानिळस्पदऽइषयन्नीड्यःसन् । तंत्वानरःप्रथमंदेवयंतोमहोराये
चितयंतोऽअनुग्मन् ॥ वृतेवयंतंबहुभिर्वसव्यै३स्त्वेरयिंजागृवांसोऽअनुग्मन् । रुशंतमग्निंदर्शतंबृहंतंवपावंतंविश्वहा
दीदिवांसं ॥ पदंदेवस्यनमसाव्यंतःश्रवस्यवःश्रवऽआपन्नमृक्तं । नामानिचिद्दधिरेयज्ञियानिभद्रायांतेरणयंतसंदृष्टौ ॥ त्वांवर्धंतिक्षितयःपृथिव्यांत्वांरायऽउभयासोजनानां । त्वंत्रातातरणेचेत्योभूःपितामातासदमिन्मानुषाणां
॥ ३५ ॥ सपर्येण्यःसप्रियोविक्ष्व१ग्निर्होतामंद्रोनिषसादायजीयान् । तंत्वावयंदमऽआदीदिवांसमुपज्ञुबाधोनमसा

भारद्वाजेषष्ठेमंडलेषडनुवाकाः । (६।१।१) त्वंह्यग्नइतित्रयोदशर्चस्यसूक्तस्यबार्हस्पत्योभरद्वाजोग्निस्त्रिष्टुप् ।

CC-0. [illegible] Collection

सदेम ॥ तंत्वा॑व॒यंसु॒ध्यो॒३ नव्य॑मग्नेसुम्ना॒यव॑ऽईमहेदे॒व॒यंतः । त्वंवि॒शो॑ऽअनयो॒दीद्या॑नोदि॒वोऽअ॑ग्नेबृह॒तारो॑च॒नेन॑ ॥
वि॒शांक॒विंवि॒श्पतिं॒शश्व॑तीनांनि॒तोश॑नंवृष॒भंच॑र्षणी॒नां । प्रेती॑षणिमि॒षयं॑तंपाव॒कंराजं॑न्तम॒ग्निंय॑ज॒तंर॑यी॒णां+ ॥ सोऽअ॑
ग्नऽईजेशश॒मेच॒मर्तो॒यस्त॒ऽआन॑ट्‌सु॒मिधा॑ह॒व्यदा॑तिं । यऽआहु॑ति॒म्परि॒वेदा॒नमो॑भि॒र्विश्वेत्स॒वामाद॑धते॒त्वोतः ॥ अ॒स्मा
ऽउ॑ते॒महि॑म॒हेवि॑धेम॒नमो॑भिरग्नेस॒मिधो॒तह॒व्यैः । वेदी॑सूनोसहसोगी॒र्भिरु॒क्थैराते॑भ॒द्राया॑सुम॒तौय॑तेम ॥ आयस्त॒तंथ॒रोद॑
सी॒विभा॒साश्रवो॑भिश्चश्रव॒स्यं१॒स्तरु॑त्रः । बृ॒हद्भि॒र्वाजैः॒स्थवि॑रेभिर॒स्मेरे॒वद्भि॑रग्नेवित॒रंविभा॑हि ॥ नृ॒वद्व॑सो॒सद॒मिद्धे॑ह्य॒स्मे
भूरि॑तो॒काय॒तन॑याय॒पश्वः । पू॒र्वीरिषो॑बृह॒तीरा॒रेऽअ॑घाऽअ॒स्मेभ॒द्रासौ॑श्रव॒सानि॑संतु ॥ पु॒रूण्य॑ग्नेपुरु॒धात्वा॒याव॑सू॒निरा
जन्व॒सुता॑तेऽअश्यां । पु॒रूणि॒हित्वेपु॑रुवा॒रसं॑त्यग्ने॒वसु॑विध॒तेराज॑नि॒त्वे+ ॥ ३६ ॥ इतिचतुर्थाष्टकेचतुर्थोऽध्यायः॥४॥

अष्टाविंशाध्याये वर्गाः ३६ सूक्तानि २६ ऋचः १७७ ॥ त्यागः ॥ मित्रावरुणाभ्या. ५० अश्विभ्या. ४८ उषस. १६ सवित्र.
१४ पर्जन्याये. १० पृथिव्या. ३ वरुणाये. ८ इंद्राग्निभ्यां. ६ मरुद्भ्य. ९ अग्नय. १३ ॥ इतिचतुर्थेचतुर्थः ॥

त्वंह्येकादशानुष्टुभंशक्वर्यंतमग्नेऽष्टौयथाहोतर्हुवेसप्तप्रनव्यसामूर्धानंवैश्वानरीयंहिंद्विजगत्यंतंपृक्षस्यांत्यात्रिष्टु
बंहश्चपुरोवोद्विपदांतंयजस्वषणमध्येत्वद्विश्वाग्नायआनुष्टुभंशक्वर्यंतमिमसूष्वेकोनावीतहव्यऋषिर्वाजागतंप्रा ॥३१॥

ग्दशम्यांस्तृतीयापंचदश्यौशक्वयौंषष्ठ्यतिशक्वर्यनुष्टुंब्बृहत्याउपांत्यैंत्वमग्नेष्टाचत्वारिंशद्गायत्रंवर्धमानाद्याषष्ठी चंसप्तविंश्यनुष्टुप्पंत्रिष्टुप्पूर्वेचांत्ये ॥ १ ॥ ॥ ॥ ॥ ॥

॥ हरिःओम् ॥ (६।१।२) त्वंहिक्षैत॑व॒द्यशोग्ने॑मि॒त्रोनपत्य॑से । त्वंवि॑चर्षणे॒श्रवो॒वसो॑पु॒ष्टिंनपु॑ष्यसि ॥ त्वांहि॑ष्मा॑ चर्ष॒णयो॑य॒ज्ञेभि॑र्गी॒र्भिरीळ॑ते । त्वांवा॒जीया॑त्यवृ॒को॑रज॒स्तूर्वि॒श्वच॑र्षणिः ॥ स॒जोष॑स्त्वादि॒वोनरो॑य॒ज्ञस्य॑के॒तुमिंधते । यद्ध॒स्यमानु॑षो॒जनः॑सु॒म्नायुर्जु॒ह्वेऽअ॑ध्व॒रे+ ॥ ऋध॒द्यस्ते॑सु॒दान॑वेधि॒यामर्तः॑श॒शम॑ते । ऊ॒तीषबृ॒ह॒तोदि॒वोद्वि॒षोऽअंहो॒नत॑रति ॥ स॒मि॒धाय॒स्तऽआहु॑ति॒न्निशि॑ति॒म्मर्त्यो॒नश॑त् । व॒यावं॑त॒ंसपु॑ष्यति॒क्षय॑मग्ने॒श॒तायु॑षं ॥ १ ॥ त्वे॒षस्ते॑धू॒मऽऋ॑ण्वति दि॒विष॒न्छु॒क्रऽआत॑तः । सूरो॒नहि॒द्युता॒त्वंकृ॒पापा॑वक॒रोच॑से ॥ अधा॒हिवि॒क्ष्वीड्योसि॑प्रि॒योनो॒ऽअति॑थिः । र॒ण्वःपु॒री॑व॒जूर्यः॑सू॒नुर्नत्र॑य॒याय्यः॑ ॥ ऋत्वा॒हिद्रोणे॑ऽअ॒ज्यसेग्ने॑वा॒जीनकृत्व्यः॑ । परि॑ज्मेवस्व॒धागयोत्यो॒नह्वा॒र्यःशिशुः॑ ॥ त्वंत्या चि॒दच्युता॒ग्नेप॒शुर्नयव॑से । धामा॑ह॒यत्तेऽअज॒रवना॑वृ॒श्चंति॒शिक्व॑सः ॥ वेषि॒ह्य॑ध्वरीय॒तामग्ने॒होता॒दमे॑वि॒शां । स॒मृधो॑वि श्पतेकृणु॒जुषस्व॑ह॒व्यमंगिरः ॥ अच्छा॑नोमित्रमहोदेवदे॒वानग्ने॒वोचः॑सुम॒तिंरोद॑स्योः । वी॒हिस्व॒स्तिंसु॑क्षि॒तिंदि॒वोनॄन्द्वि॒

६

(६।१।२) त्वंहिक्षैतवदित्येकादशर्चस्यसूक्तस्यबार्हस्पत्योभरद्वाजोऽग्निरनुष्टुबंत्याशक्वरी ।

षोऽंहांसिदुरितातरेमतातरेमतवावसातरेम ॥ २ ॥ (६।१।३) अग्नेसक्षेषदृतपाऽऋतेजाऽउरुज्योतिर्नशतेदेवयुष्टे। यंत्वंमित्रेणवरुणःसजोषादेवपासित्यजसामर्तमंहः ॥ ईजेयज्ञेभिःशशमेशमीभिर्ऋधद्वारायाग्नयेददाश । एवाचनतंयशसामजुष्टिर्नांहोमर्तंनशतेनप्रदृप्तिः ॥ सूरोनयस्यदृशतिररेपाभीमायदेतिशुचतस्तऽआधीः । हेषस्वतःशुरुधोनायमक्तोःकुत्राचिद्रण्वोवसतिर्वनेजाः+ ॥ तिग्मंचिदेममहिवर्पोऽअस्यभसदश्वोनयमसानऽआसा । विजेहमानःपरशुर्नजिह्वांद्रविर्नद्रावयतिदारुधक्षत् ॥ सऽइदस्तेवप्रतिधादसिष्यन्छिशीततेजोयसोनधारां । चित्रध्रजतिररतिर्योऽअक्तोर्वेर्नद्रुषद्वारघुपत्मजंहाः ॥ ३ ॥ सऽईरेभोनप्रतिवस्तऽउस्राःशोचिषारारपीतिमित्रमहाः । नक्तंयऽईमरुषोयोदिवानॄनमर्त्योऽअरुषोयोदिवानॄन्+ ॥ दिवोनयस्यविधतोनवीनोद्वृषारुक्षऽओषधीषुनूनोत्। घृणानयोध्रजसापत्मनायन्नारोदसीवसुनादंसुपत्नी ॥ धायोभिर्वायोयुज्येभिरर्कैर्विद्युन्नदविद्योत्स्वेभिःशुष्मैः । शर्धोवायोमरुतांततक्षऽऋभुर्नत्वेषोरभसानोऽअद्यौत् ॥ ४ ॥ (६।१।४) यथाहोतर्मनुषोदेवतातायज्ञेभिःसूनोसहसोयजासि । एवानोऽअद्यसमनासमानानुशन्नग्नऽउशतोयक्षिदेवान्+ ॥ सनोविभावाचक्षणिर्नवस्तोरग्निर्वन्दारुवेद्यश्चनोधात्। विश्वायुर्योऽअमृतोमर्त्येषूषर्भुद्भूदतिथिर्जातवेदाः ॥ द्यावोनयस्यपनयन्त्यभ्वंभासांसिवस्तेसूर्योनशुक्रः । वियऽइनोत्यजरःपावकोश्न

(६।१।३) अग्नेसक्षेषदित्यष्टर्चस्यसूक्तस्यभरद्वाजोऽग्निस्त्रिष्टुप् । (६।१।४) यथाहोतरित्यष्टर्चस्यसूक्तस्यभरद्वाजोऽग्निस्त्रिष्टुप् ।

स्यचिच्छिश्नथत्पूर्व्याणि ॥ वज्राहिसूनोऽअस्यंद्मसद्वाचक्रेऽअग्निर्जनुषाज्मान्नं । सत्वंनऽऊर्जसनऽऊर्जंधाराजेवजेर
वृकेक्षेष्यंतः+ ॥ नितिक्तियोवारणमन्नमत्तिवायुर्नराष्ट्र्यत्येत्यक्तून् । तुर्यामयस्तऽआदिशामरातीरत्योनहुतःपततः
परिहुत्+ ॥ ५ ॥ आसूर्योनभानुमद्भिरर्कैरग्नेततंथरोदसीविभासा । चित्रोनयत्परितमांस्यक्तःशोचिषापत्मन्नौशिजो
नदीयन् ॥ त्वांहिमंद्रतममर्कशोकैर्ववृमहेमहिनःश्रोष्यग्ने । इंद्रंनत्वाशवसादेवतावायुंपृणंतिराधसानृतमाः ॥ नूनो
ऽअग्नेवृकेभिःस्वस्तिवेषिरायःपथिभिःपर्ष्यंहः । तासूरिभ्योगृणतेरासिसुम्नंमदेमशतहिमाःसुवीराः ॥ ६ ॥(६।१।५)
हुवेवःसूनुंसहसोयुवानमद्रोघवाचंमतिभिर्यविष्ठं । यऽइन्वतिद्रविणानिप्रचेताविश्ववाराणिपुरुवारोऽअध्रुक्+ ॥ त्वे
वसूनिपुर्वणीकहोतर्दोषावस्तोरेरिरेयज्ञियासः । क्षामेवविश्वाभुवनानियस्मिन्त्संसौभगानिदधिरेपावके+ ॥ त्वंविक्षु
प्रदिवःसीदऽआसुक्रत्वारथीरभवोवार्याणां । अतऽइनोषिविधतेचिकित्वोव्यानुषग्जातवेदोवसूनि ॥ योनःसनुत्यो
ऽअभिदासदग्नेयोऽअंतरोमित्रमहोवनुष्यात् । तमजरेभिर्वृषभिस्तवस्वैस्तपातपिष्ठतपसातपस्वान् ॥ यस्तेयज्ञेनसमि
धायऽउक्थैरर्केभिःसूनोसहसोददाशत् । समर्त्येष्वमृतप्रचेतारायाद्युम्नेनश्रवसाविभाति ॥ सतत्कृधीषितस्तूयमग्ने
स्पृधोबाधस्वसहसासहस्वान् । यच्छस्यसेद्युभिरक्तोवचोभिस्तज्जुषस्वजरितुर्घोषिमन्म ॥ अश्यामतंकाममग्नेतवोतीऽ

(६।१।५) हुवेवइतिसप्तर्चस्यसूक्तस्यभरद्वाजोऽग्निस्त्रिष्टुप् ।

अश्यामरयिंरयिवःसुवीरं । अश्यामवाजमभिवाजयंतोऽश्यामद्युम्नमजराजरंते ॥७॥ (६।१।६) प्रनव्यंसासहंसःसूनुम
च्छायज्ञेनंगातुमवंऽइच्छमानः । वृश्चद्वनंकृष्णयामंरुशंतंवीतीहोतारंदिव्यंजिगाति ॥ सःश्वितानस्तन्यतूरोचनस्थाऽ
अजरेभिर्नानदद्भिर्यविष्ठः । यःपावकःपुरुतमःपुरूणिपृथून्यग्निरनुयातिभर्वन् ॥ वितेविष्वग्वातजूतासोऽअग्नेभामा
सःशुचेशुचयश्चरंति । तुविम्रक्षासोदिव्यानवग्वावनावनंतिधृषतारुजंतः ॥ येतेशुक्रासःशुचयःशुचिष्मःक्षांवपंतिवि
षितासोऽअश्वाः । अधभ्रमस्तऽउर्वियाविभातियातयमानोऽअधिसानुपृश्नेः ॥ अधजिह्वापापतीतिप्रवृष्णोगोषुयुधो
नाशनिःसृजाना । शूरस्येवप्रसितिःक्षातिरग्नेर्दुर्वर्तुर्भीमोदयतेवनानि ॥ आभानुनापार्थिवानिज्रयांसिमहस्तोदस्यधृ
षताततंथ । सबाधस्वापभयासहोभिःस्पृधोवनुष्यन्वनुषोनिर्जूर्व ॥ सचित्रचित्रंचितयंतमस्मेचित्रक्षत्रचित्रतमंवयो
धां । चंद्ररयिंपुरुवीरंबृहंतंचंद्रचंद्राभिर्गृणतेयुवस्व ॥ ८ ॥ (६।१।७) मूर्धानंदिवोऽअरतिंपृथिव्यावैश्वानरमृतऽ
आजातमग्निं । कविंसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः$^{+}$ ॥ नाभिंयज्ञानांसदनंरयीणांमहामाहावमभि
संनवंत । वैश्वानरंरथ्यमध्वराणांयज्ञस्यकेतुंजनयंतदेवाः$^{+}$ ॥ त्वद्विप्रोजायतेवाज्यग्नेत्वद्वीरासोऽअभिमातिषाहः ।
वैश्वानरत्वमस्मासुधेहिवसूनिराजन्स्पृहयाय्याणि ॥ त्वांविश्वेऽअमृतजायमानंशिशुंनदेवाऽअभिसंनवंते । तवक्रतु

(६।१।६)प्रनव्यसेतिसप्तर्चस्यसूक्तस्यभरद्वाजोऽग्निस्त्रिष्टुप्।(६।१।७)मूर्धानमितिसप्तर्चस्यसूक्तस्यबार्हस्पत्योवैश्वानरस्त्रिष्टुबंत्येद्वेजगत्यौ।

भिरमृतत्वमायन्वैश्वानरयत्पित्रोरदीदेः ॥ वैश्वानरतवतानिव्रतानिमहान्यग्नेनकिरादधर्ष । यज्जायमानःपित्रोरुपस्थेविंदःकेतुंवयुनेष्वह्नां ॥ वैश्वानरस्यविमितानिचक्षसासानूनिदिवोऽअमृतस्यकेतुना । तस्येदुविश्वाभुवनाधिमूर्धनिवयाऽइवरुरुहुःसप्तविस्रुहः ॥ वियोरजांस्यमिमीतसुक्रतुर्वैश्वानरोविदिवोरोचनाकविः । परियोविश्वाभुवनानिपप्रथेदब्धोगोपाऽअमृतस्यरक्षिता ॥ ९ ॥ (६।१।८) पृक्षस्यवृष्णोऽअरुषस्यनूसहःप्रनुवोचंविदथाजातवेदसः । वैश्वानरायमतिर्नव्यसीशुचिःसोमऽइवपवतेचारुरग्नये॥ सजायमानःपरमेव्योमनिव्रतान्यग्निर्व्रतपाऽअरक्षत । व्यं१तरिक्षममिमीतसुक्रतुर्वैश्वानरोमहिनानाकमस्पृशत् ॥ व्यस्तभ्नाद्रोदसीमित्रोऽअद्भुतोंतर्वावदकृणोज्ज्योतिषातमः । विचर्मणीवधिषणेऽअवर्तयद्वैश्वानरोविश्वमधत्तवृष्ण्यं ॥ अपामुपस्थेमहिषाऽअगृभ्णतविशोराजानमुपतस्थुऽऋग्मियं । आदूतोऽअग्निमभरद्विवस्वतोवैश्वानरंमातरिश्वापरावतः ॥ युगेयुगेविदथ्यंगृणद्भ्योग्नेरयिंयशसंधेहिनव्यसीं । पव्येवराजन्नघशंसमजरनीचानिवृश्चवनिनंनतेजसा ॥ अस्माकमग्नेमघवत्सुधारयानामिक्षत्रमजरंसुवीर्यं । वयंजयेमशतिनंसहस्रिणंवैश्वानरवाजमग्नेतवोतिभिः ॥ अदब्धेभिस्तवगोपाभिरिष्टेस्माकंपाहित्रिषधस्थसूरीन् । रक्षाचनोददु

(६।१।८) पृक्षस्येतिसप्तर्चस्यसूक्तस्यभरद्वाजोवैश्वानरोग्निर्जगत्यंत्यात्रिष्टुप् ।

षांशर्धोऽअग्नेवैश्वानरप्रचतारीःस्तवानः ॥ १० ॥ (६।१।९) अहश्चकृष्णमहरर्जुनंचविवर्तेतेरजसीवेद्याभिः । वैश्वानरोजायमानोनराजावातिरज्ज्योतिषाग्निस्तमांसि ॥ नाहंतंतुंनविजानाम्योतुंनयंवयंतिसमरेतमानाः । कस्यस्वित्पुत्रऽइहवक्त्वानिपरोवदात्यवरेणपित्रा+ ॥ सऽइत्तंतुंसविजानात्योतुंसवक्त्वान्यृतुथावदाति । यऽईंचिकेतदमृतस्यगोपाऽअवश्चरन्परोऽअन्येनपश्यन् ॥ अयंहोताप्रथमःपश्यतेममिदंज्योतिरमृतंमर्त्येषु । अयंसजज्ञेध्रुवऽआनिषत्तोमर्त्यस्तन्वा३वर्धमानः ॥ ध्रुवंज्योतिर्निहितंदृशयेकंमनोजविष्ठंपतयत्स्वंतः । विश्वेदेवाःसमनसःसकेताऽएकंक्रतुमभिवियंतिसाधु+ ॥ विमेकर्णापतयतोविचक्षुर्वी३दंज्योतिर्हृदयऽआहितंयत् । विमेमनश्चरतिदूरऽआधीःकिंस्विद्वक्ष्यामिकिमुनूमनिष्ये ॥ विश्वेदेवाऽअनमस्यन्भियानास्त्वामग्नेतमसितस्थिवांसँ । वैश्वानरोवतूतयेनोमर्त्योवतूतयेनः ॥ ११ ॥ (६।१।१०) पुरोवोमंद्रंदिव्यंसुवृक्तिंप्रयतियज्ञेऽअग्निमध्वरेदधिध्वं । पुरऽउक्थेभिःसहिनोविभावास्वध्वराकरतिजातवेदाः ॥ तमुद्युमःपुर्वणीकहोतरग्नेऽअग्निभिर्मनुषऽइधानः । स्तोमंयमस्मैममतेवशूषंघृतंनशुचिमतयःपवंते ॥ पीपायसःश्रवसामर्त्येषुयोऽअग्नयेददाशविप्रऽउक्थैः । चित्राभिस्तमूतिभिश्चित्रशोचिर्व्रजस्यसातागोमतो

(६।१।९) अहश्चकृष्णमितिसप्तर्चस्यसूक्तस्यभरद्वाजोवैश्वानरोग्निस्त्रिष्टुप् । (६।१।१०) पुरोवइतिसप्तर्चस्यसूक्तस्यभरद्वाजोग्निस्त्रिष्टुबंत्याद्विपदाविराट् ।

दधाति ॥ आयःपप्रौजायमानऽउर्वीदूरेदृशाभासाकृष्णाध्वा । अधबहुचित्तमऽऊर्म्यायास्तिरःशोचिषाददृशेपावकः+ ॥ नूनश्चित्रंपुरुवाजाभिरूतीऽअग्नेरयिंमघवद्भ्यश्चधेहि । येराधसाश्रवसाचात्यन्यान्त्सुवीर्येभिश्चाभिसंतिजनान् ॥ इमंयज्ञंचनोधाऽअग्नऽउशन्यंतऽआसानोजुहुतेहविष्मान् । भरद्वाजेषुदधिषेसुवृक्तिमवीर्वाजस्यगध्यस्यसातौ+ ॥ विद्वेषांसीनुहिवर्धयेळांमदेमशतहिमाःसुवीराः ॥ १२ ॥ (६।१।११) यजस्वहोतरिषितोयजीयानग्नेबाधोमरुतांनप्रयुंक्ति । आनोमित्रावरुणानासत्याद्यावाहोत्रायपृथिवीववृत्याः ॥ त्वंहोतामंद्रतमोनोऽअध्रुगंतर्देवोविदथामर्त्येषु । पावकयाजुह्वा३वह्निरासाग्नेयजस्वतन्वं१तवस्वां+ ॥ धन्याचिद्धित्वेधिषणावष्टिप्रदेवान्जन्मगृणतेयजध्यै । वेपिष्ठोऽअंगिरसांयद्धविप्रोमधुच्छंदोभनतिरेभऽइष्टौ+ ॥ आदिद्युतत्स्वपाकोविभावाग्नेयजस्वरोदसीऽउरूची । आयुंनयंनमसारातहव्याऽअंजंतिसुप्रयसंपंचजनाः ॥ वृंजेहयन्नमसाबर्हिरग्नावयामिस्रुग्घृतवतीसुवृक्तिः । अम्यक्षिसद्मसदनेपृथिव्याऽअश्रायियज्ञःसूर्येनचक्षुः ॥ दशस्यानःपुर्वणीकहोतर्देवेभिरग्नेऽअग्निभिरिधानः । रायःसूनोसहसोवाववसानाऽअतिस्रसेमवृजनंनांहः ॥ १३ ॥ (६।१।१२) मध्येहोतादुरोणेबर्हिषोराळग्निस्तोदस्यरोदसीयजध्यै । अयंससूनुःसहसऽऋतावादूरात्सूर्योनशोचिषाततान ॥ आयस्मिन्त्वेस्वपाकेयजत्रयक्षद्राजन्त्सर्वतातेवनुद्यौः । त्रिषध

(६।१।११) यजस्वहोतरितिषळर्चस्यसूक्तस्यभरद्वाजोऽग्निस्त्रिष्टुप् । (६।१।१२) मध्येहोतेतिषळर्चस्यसूक्तस्यभरद्वाजोऽग्निस्त्रिष्टुप् ।

स्थस्ततरुषोनजंहोहव्यामघानिमानुषायजध्यै ॥ तेजिष्ठायस्यारतिर्वनेराट्तोदोऽअध्वन्नवृधसानोऽअद्यौत् । अद्रोघोनद्रविताचेततित्मन्नमर्त्योऽवर्त्रऽओषधीषु ॥ सास्माकेभिरेतरीनशूषैरग्निष्टवेदमऽआजातवेदाः । द्र्वन्नोवन्वन्क्रत्वानार्वोस्रःपितेवजारयायियज्ञैः+ ॥ अधस्मास्यपनयंतिभासोवृथायत्तक्षदनुयातिपृथ्वीं । सद्योयस्पंद्रोविषितोधवीयानृणोनतायुरतिधन्वाराट् ॥ सत्वंनोऽअर्वन्निदायाविश्वेभिरग्नेऽअग्निभिरिधानः । वेषिरायोवियासिदुच्छुनामदेमशतहिमाःसुवीराः ॥ १४ ॥ (६।१।१३) त्वद्विश्वासुभगसौभगान्यग्नेवियंतिवनिनोनवयाः । श्रुष्टीरयिर्वाजोवृत्रतूर्येदिवोवृष्टिरीड्योरीतिरपां+ ॥ त्वंभगोनऽआहिरत्नमिषेपरिज्मेवक्षयसिदस्मवर्चाः । अग्नेमित्रोनबृहतऽऋतस्यासिक्षत्तावामस्यदेवभूरेः ॥ ससत्पतिःशवसाहंतिवृत्रमग्नेविप्रोविपणेर्भर्तिवाजं । यंत्वंप्रचेतऽऋतजातरायासजोषानप्त्रापांहिनोषि ॥ यस्तेसूनोसहसोगीर्भिरुक्थैर्यज्ञैर्मर्तोनिशितिंवेद्यानट् । विश्वंसदेवप्रतिवारमग्नेधत्तेधान्यं१पत्यतेवसव्यैः* ॥ तानृभ्यऽआसौश्रवसासुवीराग्नेसूनोसहसःपुष्यसेधाः । कृणोषियच्छवसाभूरिपश्वोवयोवृकायारयेजसुरये ॥ वद्मासूनोसहसोनोविहायाऽअग्नेतोकंतनयंवाजिनोदाः । विश्वाभिर्गीर्भिरभिपूर्तिमश्यांमदेमशतहिमाःसुवीराः ॥ १५ ॥ (६।१।१४) अग्नायोमर्त्योदुवोधियंजुजोषधीतिभिः । भसन्नुषप्रपूर्व्यऽइषंवुरीतावसे ॥

(६।१।१३) त्वद्विश्वेतिषळर्चस्यसूक्तस्यभरद्वाजोऽग्निस्त्रिष्टुप् । (६।१।१४) अग्नायइतिषळर्चस्यसूक्तस्यभरद्वाजोऽग्निरनुष्टुबंत्याशक्करी ।

ऽअग्निरिद्धिप्रचेताऽअग्निर्वेधस्तमऽऋषिः । अग्निंहोतारमीळतेयज्ञेषुमनुषोविशः ॥ नानाह्यं१ग्नेवसेस्पर्धंतेरायो
ऽअर्यः । तूर्वंतोदस्युमायवोव्रतैःसीक्षंतोऽअव्रतं+ ॥ अग्निरप्सामृतीषहंवीरंददातिसत्पतिं । यस्यत्रसंतिशवसः
संचक्षिशत्रवोभिया+ ॥ अग्निर्हिविद्मनानिदोदेवोमर्तमुरुष्यति । सहावायस्यावृतोरयिर्वाजेष्ववृतः ॥ अच्छानोमि
त्रमहोदेवदेवानग्नेवोचःसुमतिंरोदस्योः । वीहिस्वस्तिंसुक्षितिंदिवोनॄन्द्विषोऽअंहांसिदुरितातरेमतातरेमतवावसातरे
म ॥ १६ ॥ (६।१।१५) इममूषुवोऽअतिथिमुषर्बुधंविश्वासांविशांपतिमृंजसेगिरा । वेतीद्दिवोजनुषाकच्चिदाशु
चिर्ज्योक्चिदत्तिगर्भोयदच्युतं ॥ मित्रंनयंसुधितंभृगवोदधुर्वनस्पतावीड्यमूर्ध्वशोचिषं । सत्वंसुप्रीतोवीतहव्येऽअद्भु
तप्रशस्तिभिर्महयसेदिवेदिवे ॥ सत्वंदक्षस्यावृकोवृधोभूरर्यःपरस्यांतरस्यतरुषः । रायःसूनोसहसोमर्त्येष्वाछर्दिर्यच्छ
वीतहव्यायसप्रथोभरद्वाजायसप्रथः ॥ द्युतानंवोऽअतिथिंस्वर्णरमग्निंहोतारंमनुषःस्वध्वरं । विप्रंनद्युक्षवचसंसुवृक्ति
भिर्हव्यवाहमरतिंदेवमृंजसे ॥ पावकयायश्चितयंत्याकृपाक्षामन्रुरुचऽउषसोनभानुना । तूर्वन्नयामन्नेतशस्यनूरणऽ
आयोघृणेनततृषाणोऽअजरः ॥ १७ ॥ अग्निमग्निंवःसमिधादुवस्यतप्रियंप्रियंवोऽअतिथिंगृणीषणि । उपवोगीर्भिर

(६।१।१५) इममूष्वित्येकोनविंशत्यृचस्यसूक्तस्यांगिरसोवीतहव्यो (भरद्वाजोवा) ग्निर्जगतीतृतीयापंचदश्यौशक्वर्यौषष्ठ्यतिशक्वरी
सप्तदश्यनुष्टुप्अष्टादशीबृहतीशेषास्त्रिष्टुभः ।

मृतंविवासतदेवोदेवेषुवनतेहिवार्यंदेवोदेवेषुवनतेहिनोदुवः ॥ समिद्धमग्निंसमिधागिरागृणेशुचिंपावकंपुरोऽध्वरे
ध्रुवं । विप्रंहोतारंपुरुवारमद्रुहंकविंसुम्नैरीमहेजातवेदसं ॥ त्वांदूतमग्नेऽअमृतंयुगेयुगेहव्यवाहंदधिरेपायुमीड्यं । दे
वासश्चमर्तासश्चजागृविंविभुंविश्पतिंनमसानिषेदिरे ॥ विभूषन्नग्नऽउभयाँऽअनुव्रतादूतोदेवानांरजसीसमीयसे ।
यत्तेधीतिंसुमतिमावृणीमहेधस्मानस्त्रिवरूथःशिवोभव ॥ तंसुप्रतीकंसुदृशंस्वंचमाविद्वांसोविदुष्टरंसपेम । सयक्षद्वि
श्वावयुनानिविद्वान्प्रहव्यमग्निरमृतेषुवोचत् ॥ १८ ॥ तमग्नेपास्युततंपिपर्षियस्तऽआनट्कवयेशूरधीतिं । यज्ञस्यवा
निशितिंवोदितिंवातमित्पृणक्षिशवसोतराया+ ॥ त्वमग्नेवनुष्यतोनिपाहित्वमुनःसहसावन्नवद्यात् । संत्वाध्वस्मन्व
दभ्येतुपाथःसंरयिःस्पृहयाय्यःसहस्री+ ॥ अग्निर्होतागृहपतिःसराजाविश्वावेदजनिमाजातवेदाः । देवानामुतयोम
र्त्यानांयजिष्ठःसप्रयंजतामृतावा ॥ अग्नेयदद्यविशोऽअध्वरस्यहोतःपावकशोचेवेष्ट्वंहियज्वा । ऋतायजासिमहिना
वियद्भूर्हव्यावहयविष्ठयातेऽअद्य+ ॥ अभिप्रयांसिसुधितानिहिख्योनित्वादधीतरोदसीयजध्यै । अवानोमघवन्वा
जसातावग्नेविश्वानिदुरितातरेमतातरेमतवावसातरेम ॥ १९ ॥ अग्नेविश्वेभिःस्वनीकदेवैरूर्णावंतंप्रथमःसीदयोनिं ।
कुलायिनंघृतवंतंसवित्रेयज्ञंनययजमानायसाधु+ ॥ इममुत्यमथर्ववदग्निंमंथंतिवेधसः । यमंकूयंतमानयन्नमूरंश्या
व्याभ्यः ॥ जनिष्वादेववीतयेसर्वतातास्वस्तये । आदेवान्वक्ष्यमृतांऽऋतावृधोयज्ञंदेवेषुपिस्पृशः ॥ वयमुत्वागृह

पतेजनानामग्नेऽअर्कमसमिधाबृहंतं । अस्थूरिनोगार्हपत्यानिसंतुतिग्मेननस्तेजसासंशिशाधि ॥ २० ॥ (६।२।१)
त्वमग्नेयज्ञानांहोताविश्वेषांहितः । देवेभिर्मानुषेजने ॥ सनोमंद्राभिरध्वरेजिह्वाभिर्यजामहः । आदेवान्वक्षियक्षि
च ॥ वेत्थाहिवेधोऽअध्वनःपथश्चदेवांजसा । अग्नेयज्ञेषुसुक्रतो ॥ त्वामीळेऽअधद्विताभरतोवाजिभिःशुनं । ईजेय
ज्ञेषुयज्ञियं ॥ त्वमिमावार्यापुरुदिवोदासायसुन्वते । भरद्वाजायदाशुषे ॥ २१ ॥ त्वंदूतोऽअमर्त्यऽआवहादैव्यंज
नं । शृण्वन्विप्रस्यसुष्टुतिं+ ॥ त्वामग्नेस्वाध्यो३मर्तासोदेववीतये । यज्ञेषुदेवमीळते ॥ तवप्रयक्षिसंदृशमुतक्रतुंसुदा
नवः । विश्वेजुषंतकामिनः ॥ त्वंहोतामनुर्हितोवह्निरासाविदुष्टरः । अग्नेयक्षिदिवोविशः ॥ अग्नऽआयाहिवीतयेगृ
णानोहव्यदातये । निहोतासत्सिबर्हिषि ॥ २२ ॥ तंत्वासमिद्भिरंगिरोघृतेनवर्धयामसि । बृहच्छोचायविष्ठ्य ॥ स
नःपृथुश्रवाय्यमच्छादेवविवाससि । बृहदग्नेसुवीर्यं ॥ त्वामग्नेपुष्करादध्यथर्वानिरमंथत । मूर्ध्नोविश्वस्यवाघतः ॥
तमुत्वादध्यङ्ङृषिःपुत्रऽईधेऽअथर्वणः । वृत्रहणंपुरंदरं+ ॥ तमुत्वापाथ्योवृषासमीधेदस्युहंतमं । धनंजयंरणेरणे
॥ २३ ॥ एह्यूषुब्रवाणितेग्नऽइत्थेतराागिरः । एभिर्वर्धासऽइंदुभिः ॥ यत्रक्वचतेमनोदक्षंदधसऽउत्तरं । तत्रासदःकृ

(६।२।१) त्वमग्नेयज्ञानामित्यष्टाचत्वारिंशदृचस्यसूक्तस्यबार्हस्पत्योभरद्वाजोग्निर्गायत्रीआद्याषष्ठ्यौवर्धमानेसप्तविंश्यनुष्टुप्षट्चत्वारिं
शीत्रिष्टुप्अंत्येद्वेअनुष्टुभौ ।

णवसे ॥ नहितेपूर्तमक्षिपद्भुवन्नेमानांवसो । अथादुवोवनवसे ॥ आग्निरगामिभारतोवृत्रहापुरुचेतनः । दिवोदा
सस्यसत्पतिः ॥ सहिविश्वातिपार्थिवारयिंदाशन्महित्वना । वन्वन्नवातोऽअस्तृतः ॥ २४ ॥ सप्रत्नवन्नवीयसाग्नेद्यु
म्नेनसंयता । बृहत्ततंथभानुना ॥ प्रवःसखायोऽअग्नयेस्तोमंयज्ञंचधृष्णुया । अर्चगायचवेधसे ॥ सहियोमानुषायु
गासीद्धोताकविक्रतुः । दूतश्चहव्यवाहनः ॥ ताराजानाशुचिव्रतादित्यान्मारुतंगणं । वसोयक्षीहरोदसी ॥ वस्वी
तेऽअग्नेसंदृष्टिरिषयतेमर्त्याय । ऊर्जोनपादमृतस्य ॥ २५ ॥ क्रत्वादाऽअस्तुश्रेष्ठोद्यत्वावन्वन्त्सुरेक्णाः । मर्तऽआना
शसुवृक्तिं+ ॥ तेतेऽअग्नेत्वोताऽइषयंतोविश्वमायुः । तरंतोऽअर्योऽअरातीर्वन्वंतोऽअर्योऽअरातीः ॥ अग्निस्तिग्मेन
शोचिषायासद्विश्वंन्य१त्रिणं । अग्निर्नोवनतेरयिं+ ॥ सुवीरंरयिमाभरजातवेदोविचर्षणे । जहिरक्षांसिसुक्रतो ॥
त्वंनःपाह्यंहसोजातवेदोऽअघायतः । रक्षाणोब्रह्मणस्कवे ॥ २६ ॥ योनोऽअग्नेदुरेवऽआमर्तोवधायदाशति । तस्मा
न्नःपाह्यंहसः ॥ त्वंतंदेवजिह्वयापरिबाधस्वदुष्कृतं । मर्तोयोनोजिघांसति ॥ भरद्वाजायसप्रथःशर्मयच्छसहंत्य ।
अग्नेवरेण्यंवसु ॥ अग्निर्वृत्राणिजंघनद्द्रविणस्युर्विपन्यया । समिद्धःशुक्रऽआहुतः ॥ गर्भेमातुःपितुष्पिताविदिद्युता
नोऽअक्षरे । सीदन्नृतस्ययोनिमा+ ॥ २७ ॥ ब्रह्मप्रजावदाभरजातवेदोविचर्षणे । अग्नेयद्दीदयद्दिवि+ ॥ उपत्वार
ण्वसंदृशंप्रयस्वंतःसहस्कृत । अग्नेससृज्महेगिरः ॥ उपच्छायामिवघृणेरगन्मशर्मतेवयं । अग्नेहिरण्यसंदृशः ॥ यऽउ

ग्रऽई॑वशर्य॒हाति॒ग्मश्रृं॑गो॒नवंसं॑गः । अग्ने॒पुरो॑रु॒रोजि॑थ ॥ आयंह॑स्ते॒नखा॒दिनं॒शिशुं॑जा॒तंनबिभ्र॑ति । वि॒शाम॒ग्निंस्व॑ध्व॒रं+ ॥ २८ ॥ प्रदे॒वंदे॒ववी॑तये॒भर॑तावसु॒वित्त॑मं । आस्वेयोनौ॒निषी॑दतु ॥ आजा॒तंजा॒तवे॑दसिप्रि॒यंशि॑शी॒ताति॑थिं । स्यो॒नऽआगृ॒हप॑तिं ॥ अग्ने॑युक्ष्वाहि॒येतवाश्वा॑सोदेवसा॒धवः॑ । अरं॒वहं॑तिम॒न्यवे॑ ॥ अच्छा॑नोया॒ह्यावहा॒भिप्रयां॑सिवी॒तये॑ । आदे॒वान्त्सोम॑पीतये ॥ उद॑ग्नेभारतद्यु॒मदज॑स्रेण॒दवि॑द्युतत् । शोचा॒विभा॑ह्यजर ॥ २९ ॥ वी॒तीयोदे॒वंमर्तो॑दुव॒स्येद॒ग्निमी॑ळीताऽध्व॒रेह॒विष्मा॑न् । होता॑रंसत्य॒यजं॒रोद॑स्योरुत्ता॒नह॑स्तो॒नम॒सावि॑वासेत् ॥ आते॑ऽअग्नऽऋ॒चाह॒विर्हृ॒दात॒ष्टंभ॑रामसि । तेते॑भवंतू॒क्षण॑ऽऋ॒षभासो॑व॒शाऽउ॒त+ ॥ अ॒ग्निंदे॒वासो॑ऽअग्रि॒यमि॒न्धते॑वृत्र॒हन्त॑मं । येना॒वसू॒न्याभृ॑तातृ॒ह्ळारक्षां॑सिवा॒जिना॑ ॥ ३० ॥ इतिचतुर्थाष्टकेपंचमोऽध्यायः ॥ ५ ॥ ॥ ॥ ॥

एकोनत्रिंशाध्यायेवर्गाः ३० सूक्तानि १५ ऋचः १६० ॥ त्यागः ॥ अग्नय. ४१ वैश्वानरायाग्नय. २१ अग्नय. ९८ ॥ इति चतुर्थेपंचमः ॥

पिबपंचोनैंद्रंत्रैष्टुभंद्विपदांतंतमुष्टुहिमहान्त्सप्तोनांद्यौर्नविपिप्रोर्विंरांळिमाउद्वादशंनवम्येकादश्यौवैश्वदेव्यौय एकएकादशसुतइद्दशंवृषायातेनवश्रुधीनोष्टौकिमस्यांत्याचायमानस्यांभ्यावर्तिनोदानस्तुतिरागावोगव्यंद्वितीयैंद्रीचांत्यश्चपादोंत्यानुष्टुंब्जागतस्तृचोद्वितीयादिः ॥ १ ॥ ॥ ॥ ॥

॥ हरिःओम् ॥ (६।२।२) पिबासोममभियमुग्रतर्दऽऊर्वंगव्यंमहिगृणानऽइंद्र । वियोधृष्णोवधिषोवज्रहस्तवि
श्वावृत्रममित्रियाशवोभिः ॥ सऽईंपाहियऽऋजीषीतरुत्रोयःशिप्रवान्वृषभोयोमतीनां । योगोत्रभिद्वज्रभृद्योहरिष्ठाः
सऽइंद्रचित्राँऽअभितृंधिवाजान् ॥ एवापाहिप्रत्नथामंदतुत्वाश्रुधिब्रह्मवावृधस्वोतगीर्भिः । आविःसूर्यंकृणुहिपीपि
हीषोजहिशत्रूँरभिगाऽइंद्रतृंधि ॥ तेत्वामदाबृहदिंद्रस्वधावऽइमेपीताऽउक्षयंतद्युमंतं । महामनूनंतवसंविभूतिंमत्स
रासोजर्हृषंतप्रसाहं ॥ येभिःसूर्यमुषसंमंदसानोवासयोपदृह्लानिदद्रत् । महामद्रिंपरिगाऽइंद्रसंतंनुत्थाऽअच्युतंसद
सस्परिस्वात्+ ॥ १ ॥ तवक्रत्वातवतद्दंसनाभिरामासुपक्वंशच्यानिदीधः । और्णोर्दुरऽउस्रियाभ्योविदृह्लोदूर्वाद्गाऽ
असृजोऽअंगिरस्वान् ॥ पप्राथक्षांमहिदंसोव्यु१र्वीमुपद्यामृष्वोबृहदिंद्रस्तभायः । अधारयोरोदसीदेवपुत्रेप्रत्नेमातरा
यह्वीऽऋतस्य ॥ अधत्वाविश्वेपुरऽइंद्रदेवाऽएकंतवसंदधिरेभराय । अदेवोयदभ्यौहिष्टदेवान्त्स्वर्षातावृणतऽइंद्रम
त्रं ॥ अधद्यौश्चित्तेऽअपसानुवज्राद्द्वितानमद्भियसास्वस्यमन्योः । अहिंयदिंद्रोऽअभ्योहसानंनिचिद्विश्वायुःशयथेज
घानं ॥ अधत्वष्टातेमहऽउग्रवज्रंसहस्रभृष्टिंववृतच्छताश्रिं । निकाममरमणसंयेननवंतमहिंसंपिणगृजीषिन् ॥ २ ॥
वर्धान्यंविश्वेमरुतःसजोषाःपचच्छतंमहिषाँऽइंद्रतुभ्यं । पूषाविष्णुस्त्रीणिसरांसिधावन्वृत्रहणंमदिरमंशुमस्मै ॥ आ

(६।२।२) पिबासोममितिपंचदशर्चस्यसूक्तस्यबार्हस्पत्योभरद्वाजइंद्रस्त्रिष्टुबंत्याद्विपदात्रिष्टुप् ।

क्षोदोमहिवृतंनदीनांपरिष्ठितमसृजऽऊर्मिमपां । तासामनुप्रवतऽइंद्रपंथांप्रार्दयोनीचीरपसःसमुद्रं+ ॥ एवाताविश्वा
चकृवांसमिंद्रंमहामुग्रमजुर्यंसहोदां । सुवीरंत्वास्वायुधंसुवज्रमाब्रह्मनव्यमवसेववृत्यात् ॥ सनोवाजायश्रवसऽइषेच
रायेधेहिद्युमतऽइंद्रविप्रान् । भरद्वाजेनृवतऽइंद्रसूरीन्दिविचस्मैधिपायैनऽइंद्र ॥ अयावाजंदेवहितंसनेममदेमशत
हिमाःसुवीराः ॥ ३ ॥ (६।२।३) तमुष्टुहियोऽअभिभूत्योजावन्वन्नवातःपुरुहूतऽइंद्रः । अषाह्ळमुग्रंसहमानमाभि
र्गीर्भिर्वर्धवृषभंचर्षणीनां+ ॥ सयुध्मःसत्वाखजकृत्समद्वातुविम्रक्षोनदनुमाँऽऋजीषी । बृहद्रेणुश्च्यवनोमानुषीणामे
कःकृष्टीनामभवत्सहावा ॥ त्वंहनुत्यदंदमायोदस्यूँरेकःकृष्टीरवनोरार्याय । अस्तिस्विन्नुवीर्यं१तत्तऽइंद्रनस्विदस्तितदृ
तुथाविवोचः ॥ सदिद्धितेतुविजातस्यमन्येसहःसहिष्ठतुरतस्तुरस्य । उग्रमुग्रस्यतवसस्तवीयोरध्रस्यरध्रतुरोबभूव ॥
तन्नःप्रत्नंसख्यमस्तुयुष्मेऽइत्थावद्भिर्वलमंगिरोभिः । हन्नच्युतच्युद्दस्मेषयंतमृणोःपुरोविदुरोऽअस्यविश्वाः ॥ ४ ॥
सहिधीभिर्हव्योऽअस्त्युग्रऽईशानकृन्महतिवृत्रतूर्ये । सतोकसातातनयेसवज्रीवितंतसाय्योऽअभवत्समत्सु ॥ सम
ज्मनाजनिममानुषाणाममर्त्येननाम्नातिप्रसर्स्रे । सद्युम्नेनसशवसोतरायासवीर्येणनृतमःसमोकाः ॥ सयोनमुहेनमि
थूजनोभूत्सुमंतुनामाचुमुरिंधुनिंच । वृणक्पिप्रुंशंबरंशुष्णमिंद्रःपुरांच्यौत्नायशयथायनूचित् ॥ उदावतात्वक्षसाप

(६।२।३) तमुष्टुहीतिपंचदशर्चस्यसूक्तस्यभरद्वाजइंद्रस्त्रिष्टुप्

Digitization by eGangotri. Funding by MoE-IKS

न्यसाचवृत्रहत्यायरथमिंद्रतिष्ठ । धिष्ववज्रंहस्तऽआदक्षिणत्राभिप्रमंदपुरुदत्रमायाः+ ॥ अग्निर्नशुष्कंवनमिंद्रहेतीर
क्षोनिर्धक्ष्यशनिर्नभीमा । गंभीरयऽऋष्वयायोरुरोजाध्वानयद्दुरितादंभयच्च ॥ ५ ॥ आसहस्रंपथिभिरिंद्ररायातुवि
द्युम्नतुविवाजेभिरर्वाक् । याहिसूनोसहसोयस्यनूचिददेवऽईशेपुरुहूतयोतोः ॥ प्रतुविद्युम्नस्यस्थविरस्यघृष्वेर्दिवोरर
प्शेमहिमापृथिव्याः । नास्यशत्रुर्नप्रतिमानमस्तिनप्रतिष्ठिःपुरुमायस्यसह्योः ॥ प्रतत्तेऽअद्याकरणंकृतंभूत्कुत्संयदायु
मतिथिग्वमस्मै । पुरूसहस्रानिशिशाऽअभिक्षामुत्तूर्वयाणंधृषतानिनेथ ॥ अनुत्वाहिघ्नेऽअधदेवदेवामदन्विश्वेकवित
मंकवीनां । करोयत्रवरिवोबाधितायदिवेजनायतन्वेगृणानः+ ॥ अनुद्यावापृथिवीतत्तऽओजोमर्त्याजिहतऽइंद्रदे
वाः । कृष्वाकृत्नोऽअकृतंयत्तेऽअस्त्युक्थंनवीयोजनयस्वयज्ञैः+ ॥ ६ ॥ (६।२।४) महाँऽइंद्रोनृवदाचर्षणिप्राऽउ
तद्विबर्हाऽअमिनःसहोभिः । अस्मद्र्यग्वावृधेवीर्यायोरुःपृथुःसुकृतःकर्तृभिर्भूत् ॥ इंद्रमेवधिषणासातयेधाद्बृहंतमृष्व
मजरंयुवानं । अषाह्ळेनशवसाशूशुवांसंसद्यश्चिद्योवावृधेऽअसामि ॥ पृथूकरस्नाबहुलागभस्तीऽअस्मद्र्य१क्संमिमीहि
श्रवाँसि । यूथेवपश्वःपशुपादमूनाऽअस्माँऽइंद्राभ्याववृत्स्वाजौ+ ॥ तंवऽइंद्रंचतिनमस्यशाकैरिहनूनंवाजयंतोहुवेम ।
यथाचित्पूर्वेजरितारऽआसुरनेद्याऽअनवद्याऽअरिष्टाः ॥ धृतव्रतोधनदाःसोमवृद्धःसहिवामस्यवसुनःपुरुक्षुः । संजग्मिरे

(६।२।४) महाँइंद्रइतित्रयोदशर्चस्यसूक्तस्यभरद्वाजइंद्रस्त्रिष्टुप् ।

पथ्या३ रायोऽअस्मिन्त्समुद्रेनसिंधवोयादमानाः ॥ ७ ॥ शविंष्ठंनऽआभरशूरशवऽओजिष्ठमोजोऽअभिभूतऽउग्रं । विश्वाद्युम्नावृष्ण्यामानुषाणामस्मभ्यंदाहरिवोमादयध्यैँ ॥ यस्तेमदःपृतनाषाळमृध्रऽइंद्रतंनऽआभरशूशुवांसँ । येनतोकस्यतनयस्यसातौमँसीमहिजिगीवांसस्त्वोताः ॥ आनोभरवृषणंशुष्ममिंद्रधनस्पृतंशूशुवांसँसुदक्षँ । येनवंसामपृतनासुशत्रून्तवोतिभिरुतजामीँऽरजामीन् ॥ आतेशुष्मोवृषभऽएतुपश्चादोत्तरादधरादापुरस्तात् । आविश्वतोऽअभिसमेत्वर्वाङिंद्रद्युम्नंस्वर्वद्धेह्यस्मे+ ॥ नृवत्तऽइंद्रनृतमाभिरूतीवँसीमहिवामंश्रोमतेभिः । ईक्षेहिवस्वऽउभयस्यराजन्धारत्नंमहिस्थूरंबृहंतँ ॥ मरुत्वँतंवृषभंवावृधानमकवारिंदिव्यंशासमिंद्रँ । विश्वासाहमवसेनूतनायोग्रंसहोदामिहतंहुवेम ॥ जनंवज्रिन्महिचिन्मन्यमानमेभ्योनृभ्योरंधयायेष्वस्मि । अधाहित्वापृथिव्यांशूरसातौहवामहेतनयेगोष्वप्सु+ ॥ वयंतऽएभिःपुरुहूतसख्यैःशत्रोःशत्रोरुत्तरऽइत्स्याम । घ्नंतोवृत्राण्युभयानिशूररायामदेमबृहतात्वोताः ॥८॥

(६।२।५) द्यौर्नयऽइंद्राभिभूमार्यस्तस्थौरयिःशवसापृत्सुजनान् । तंनःसहस्रभरमुर्वरासांदद्धिसूनोसहसोवृत्रतुरँ ॥ दिवोनतुभ्यमन्विंद्रसत्रासुर्यँदेवेभिर्धायिविश्वँ । अहिंयद्वृत्रमपोवव्रिवांसंहन्नृजीषिन्विष्णुनासचानः+ ॥ तूर्वन्नोजीयान्तवसस्तवीयान्कृतब्रह्मेंद्रोवृद्धमहाः । राजाभवन्मधुनःसोम्यस्यविश्वासांयत्पुरांदर्त्नुमावत् ॥ शतैरपद्रन्पणयऽ

(६।२।५) द्यौर्नयइतित्रयोदशर्चस्यसूक्तस्यभरद्वाजइंद्रस्त्रिष्टुप्सप्तमीविराट्पंक्तिः ।

इंद्रात्रदशोणयेकवयेर्कसातौ । वधैःशुष्णस्याशुषस्यमायाःपित्वोनारिरेचीत्किंचनप्र+ ॥ महोद्रुहोऽअपविश्वायुधायि
वज्रस्ययत्पतनेपादिशुष्णः । उरुषसरथंसारथयेकरिंद्रःकुत्सायसूर्यस्यसातौ+ ॥ ९ ॥ प्रश्येनोनमदिरमंशुमस्मैशिरो
दासस्यनमुचेर्मथायन् । प्रावन्नमींसाप्यंससंतंपृणग्रायासमिषासंस्वस्ति+ ॥ विपिप्रोरहिमायस्यदृह्ळाःपुरोवज्रिन्छव
सानदर्दः । सुदामन्तद्रेक्णोऽअप्रमृष्यमृजिश्वनेदात्रंदाशुषेदाः ॥ सवेतसुंदशमायंदशोणिंतूतुजिमिंद्रःस्वभिष्टिसु
म्नः । आतुग्रंशश्वदिभंद्योतनायमातुर्नसीमुपसृजाऽइयध्यै ॥ सईंस्पृधोवनतेऽअप्रतीतोविभ्रद्वज्रंवृत्रहणंगभस्तौ ।
तिष्ठद्धरीऽअध्यस्तेवगर्तेवचोयुजावहतऽइंद्रंमृष्वं+ ॥ सनेमतेवसानव्यंऽइंद्रप्रपूरवस्तवंतऽएनायज्ञैः । सप्तयत्पुरःश
र्मशारंदीर्दर्द्धन्दासीःपुरुकुत्सायशिक्षन् ॥ त्वंवृधऽइंद्रपूर्व्योभूर्वरिवस्यन्नुशनेकाव्याय । परानववास्त्वमनुदेयंमहेपि
त्रेददाथस्वन्नपातं ॥ त्वंधुनिरिंद्रधुनिमतीर्ऋणोरपःसीरानस्रवंतीः । प्रयत्समुद्रमतिशूरपर्षिपारयातुर्वशंयदुंस्वस्ति+॥
तवहत्यदिंद्रविश्वमाजौसस्तोधुनीचुमुरीयाहसिष्वप् । दीदयदित्तुभ्यंसोमेभिःसुन्वन्दभीतिरिध्मभृतिःपक्थ्यं१र्कैः+
॥ १० ॥ (६।२।६) इमाऽउत्वापुरुतमस्यकारोर्हव्यंवीरहव्याहवंते । धियोरथेष्ठामजरंनवीयोरयिर्विभूतिरीयते
वचस्या+ ॥ तमुस्तुषऽइंद्रंयोविदानोगिर्वाहसंगीर्भिर्यज्ञवृद्धं । यस्यदिवमतिमह्नापृथिव्याःपुरुमायस्यरिरिचेमहि

(६।२।६) इमाउत्वेतिद्वादशर्चस्यसूक्तस्यभरद्वाजइंद्रोनवम्येकादश्योर्विश्वेदेवास्त्रिष्टुप् ।

त्वं+ ॥ सऽइत्तमोवयुनंततन्वत्सूर्येणवयुनवच्चकार । कदातेमर्ताऽअमृतस्यधामेयक्षंतोनमिनंतिस्वधावः ॥ यस्ताचकारसकुहस्विदिंद्रःकमाजनंचरतिकासुविक्षु । कस्तेयज्ञोमनसेशंवरायकोऽअर्कऽइंद्रकतमःसहोता ॥ इदाहितेवेविषतःपुराजाःप्रत्नासऽआसुःपुरुकृत्सखायः । येमध्यमासऽउतनूतनासऽउतावमस्यपुरुहूतबोधि ॥ ११ ॥ तंपृच्छंतोवरासःपराणिप्रत्नातऽइंद्रश्रुत्यानुयेमुः । अर्चामसिवीरब्रह्मवाहोयादेवविद्मतात्त्वामहांतं ॥ अभित्वापाजोरक्षसोवितस्थेमहिजज्ञानमभितत्सुतिष्ठ । तवप्रत्नेनयुज्येनसख्यावज्रेणधृष्णोऽअपतानुदस्व ॥ सतुश्रुधींद्रनूतनस्यब्रह्मण्यतोवीरकारुधायः । त्वंह्या३पिःप्रदिविपितृणांशश्वद्बभूथसुहवऽएष्टौ ॥ प्रोतयेवरुणंमित्रमिंद्रंमरुतःकृष्वावसेनोऽअद्य । प्रपूषणंविष्णुमग्निंपुरंधिंसवितारमोषधीःपर्वताँश्च ॥ इमऽउत्वापुरुशाकप्रयज्योजरितारोऽअभ्यर्चंत्यर्कैः । श्रुधीहवमाहुवतोहुवानोनत्वावाँऽअन्योऽअमृतत्वदस्ति ॥ नूमऽआवाचमुपयाहिविद्वान्विश्वेभिःसूनोसहसोयजत्रैः । येऽअग्निजिह्वाऽऋतसापऽआसुर्येमनुंचक्रुरुपरंदसाय ॥ सनोबोधिपुरऽएतासुगेषूतदुर्गेषुपथिकृद्विदानः । येऽअश्रमासऽउरवोवहिष्ठास्तेभिर्नऽइंद्राभिवक्षिवाजं ॥ १२ ॥ (६।२।७) यऽएकइद्धव्यश्चर्षणीनामिंद्रंतंगीर्भिरभ्यर्चऽआभिः । यःपत्यतेवृषभोवृष्ण्यावान्त्सत्यःसत्वापुरुमायःसहस्वान् ॥ तमुनःपूर्वेपितरोनवग्वाःसप्तविप्रासोऽअभिवाजयंतः ।

(६।२।७) यएकइदित्येकादशर्चस्यसूक्तस्य [illegible] त्रिष्टुप् ।

न॒क्ष॒द्दा॒भंततु॑रिंपर्व॑ते॒ष्ठामद्रो॑घवाचंम॒तिभि॒ःशवि॑ष्ठं ॥ तमी॑म॒ह॒ऽइंद्र॑मस्यरा॒यःपु॑रु॒वीर॑स्यनृ॒वत॑ःपुरु॒क्षोः । योऽअस्कृ॑धो
युर॒जर॒ःस्व॑र्वा॒न्तमाभ॑रहरिवोमाद॒यध्यै ॥ तन्नो॒विवो॑चो॒यदि॑तेपु॒राचिंज्जरि॒तार॑ऽआन॒शुःसु॒म्नमिं॑द्र । कस्ते॑भा॒गःकिंव
यो॑दुध्रखिद्व॒ःपुरु॑हूतपुरूवसोसुर॒घ्नः+ ॥ तंपृ॒च्छंती॒वज्र॑हस्तंर॒थे॒ष्ठामिंद्रं॒वेपी॒वक्व॑री॒यस्य॒नूगीः । तु॒वि॒ग्रा॒भंतु॑विकू॒र्मिंर॑भो॒
दां॑गा॒तुमि॑षे॒नक्ष॑ते॒तुम्र॒मच्छ॑ ॥ १३ ॥ अ॒याह॒त्यंमा॒यया॑वावृ॒धानं॑मनो॒जुवा॑स्वतव॒ःपर्व॑तेन । अच्यु॑ताचिद्वीळि॒तास्वो॑जो
रु॒जोविद्द॒ळ्हाधृ॑ष॒ताविं॑रप्शिन् ॥ तंवो॑धि॒यानव्यं॑स्या॒शवि॑ष्ठंप्र॒त्नंप्र॑त्न॒वत्प॑रितंस॒यध्यै॑ । सनो॑वक्षदनि॒मानःसु॒वह्मेंद्रो॒विश्वा॒
न्यति॑दु॒र्गहा॑णि ॥ आजना॑य॒द्रुह्व॑णे॒पार्थि॑वानिदि॒व्यानि॑दीपयो॒ंतरि॑क्षा । तपा॑वृषन्वि॒श्वत॑ःशो॒चिषा॒तान्ब्र॑ह्म॒द्विषे॑शोच
य॒क्षाम॒पश्च॑ ॥ भु॒वो॒जन॑स्यदि॒व्यस्य॒राजा॒पार्थि॑वस्य॒जग॑तस्त्वेषसंदृक् । धि॒ष्ववज्रं॒दक्षि॑णऽइंद्र॒हस्ते॒विश्वा॑ऽअजुर्यदयसे॒
विमा॒याः+ ॥ आसं॒यत॑मिंद्रणःस्व॒स्तिंश॑त्रु॒तूर्या॑यबृ॒ह॒तीममृ॑ध्रां । य॒यादासा॒न्यार्या॑णिवृ॒त्राकरो॑वज्रिन्त्सु॒तुका॒नाहु॑षा
णि ॥ सनो॑नि॒युद्भि॑ःपुरुहूतवेधोवि॒श्ववा॑राभि॒राग॑हिप्रयज्यो । नया॑ऽअदे॑वो॒वर॑ते॒नदे॒वऽआभि॑र्याहि॒तूय॒माम॑द्र्य॒द्रिक्+
॥ १४ ॥ (६।२।८) सु॒तऽइत्त्वंनिमि॑श्लऽइंद्र॒सोमे॒स्तोमे॒ब्रह्म॑णिश॒स्यमा॑नऽउ॒क्थे । यद्वा॑यु॒क्ताभ्यां॑मघव॒न्हरि॑भ्या॒ंबिभ्र॒द्व
ज्रंबा॒ह्वोरिं॑द्र॒यासि॑ ॥ यद्वा॑दि॒विपा॒र्ये॒सुष्वि॑मिंद्रवृत्र॒हत्ये॒व॑सि॒शूर॑सातौ । यद्वा॒दक्ष॑स्यबि॒भ्युषो॒ऽअबि॑भ्यद॒रंधय॒ःशर्ध॑तऽ

(६।२।८) सुतइदितिदशर्चस्यसूक्तस्यभरद्वाजइंद्रस्त्रिष्टुप् ।

इंद्र॒दस्यू॑न् ॥ पाता॑सु॒तमिंद्रो॑ऽअस्तु॒सोमँ॑प्रणे॒नीरु॒ग्रोज॑रि॒तार॑मू॒ती । कर्ता॑वी॒राय॒सुष्वं॑यऽउलो॒कंदाता॒वसुं॑स्तुव॒तेकी॒रयें
चित् ॥ गंतेयाँ॑ति॒सव॑ना॒हरि॑भ्यांब॒भ्रिर्वज्रँ॑प॒पिःसोमँ॑द॒दिर्गाः । कर्ता॑वी॒रंनर्यँ॑सर्ववी॑र॒ंश्रोता॒हवँ॑गृण॒तःस्तोम॑वाहाः ॥ अ
स्मैँव॒यंयद्वा॒वान॒तद्विं॑विष्म॒ऽइंद्रा॑य॒योनः॑प्र॒दि॒वोऽअप॒स्कः । सु॒तेसोमैँ॑स्तुमसि॒शंस॑दु॒क्थेंद्रा॑य॒ब्रह्म॒वर्धँ॑नं॒यथास॑त् ॥१५॥
ब्रह्मा॑णि॒हिच॑कृ॒षेवर्धँ॑नानि॒ताव॑त्तऽइंद्रम॒तिभि॑र्वि॑विष्मः । सु॒तेसोमैँ॑सुतपा॒ःशंत॑मानि॒रांड्या॑क्रियास्म॒वक्ष॑णानिय॒ज्ञैः+ ॥
सनो॑बोधिपु॒रोळा॒शंर॑रा॒णःपि॒बातु॒सोम॒ंगोऽऋ॑जीकमिंद्र । एदंब॒र्हिर्यज॑मानस्यसीद॒ोरुंकृं॑धि॒त्वाय॒तऽउँ॑लो॒कं+ ॥ समँ॑द
स्वा॒ह्यनु॒जोषँ॑मु॒ग्रप्रत्वा॑य॒ज्ञास॑ऽइ॒मेऽअँ॑श्नुवंतु । प्रेमे॒हवा॑सःपुरुहूतम॒स्मेऽआत्वे॒यंधीरव॑सऽइंद्रयम्याः ॥ तंवः॑सखाय॒ःसं
यथा॑सु॒ते॒षुसोमैँ॑भिरीं॑पृणताभो॒जमिंद्रँ॑ । कु॒वित्तस्मा॒ऽअस॑तिनो॒भरा॑य॒नसुष्वि॒मिंद्रोव॑सेमृधाति ॥ ए॒वेदिंद्रः॑सु॒तेऽअ॑स्ता
वि॒सोमैँ॑भ॒रद्वा॑जेषु॒क्षय॒दिन्म॒घोनः॑ । अस॒द्यथा॑जरि॒त्रऽउ॒तसू॒रिरिंद्रो॑रा॒योवि॒श्ववा॑रस्यदा॒ता+ ॥ १६ ॥ (६।३।१) वृषा॒
मद॒ऽइंद्रे॒श्लोक॑ऽउ॒क्थासचा॒सोमे॑षुसु॒तपा॒ऋजी॒षी । अ॒र्च॒त्र्यो॑म॒घवा॒नृभ्य॑ऽउ॒क्थैर्द्यु॒क्षोराजा॑गि॒रामक्षि॑तोतिः ॥ ततु॑
रिर्वी॒रोनर्यो॑विचे॑ता॒ःश्रोता॒हवँ॑गृण॒तऽउ॒र्व्यू॑तिः । वसुः॑शंसो॑न॒रांका॒रुधा॑यावा॒जीस्तु॒तोवि॒दथे॑दाति॒वाजँ॑ ॥ अक्षो॒नच॒
क्र्योः॑शूरबृ॒हन्प्रतेँ॑म॒ह्नारि॑रिचे॒रोद॑स्योः । वृ॒क्षस्य॒नुतेँ॑पुरुहूतव॒याव्यू॒३॑तयो॑रुरुहुरिंद्रपूर्वीः+ ॥ शची॑वतस्तेपुरुशाकु॒शा

(६।३।१) वृषामदइतिदशर्चस्यसूक्तस्यभरद्वाजइंद्रस्त्रिष्टुप् ।

का॒गवा॑मिवस्रु॒तयः॑सं॒चर॑णीः । व॒त्साना॒ंनतं॒तय॑स्तऽइंद्र॒दाम॒न्वंतो॑ऽअ॒दामा॑नःसुदामन् ॥ अ॒न्यद॒द्यकर्व॑रम॒न्यदु॒श्वोस॑
च्च॒सन्मुहु॑राच॒क्रिरिंद्रः॑ । मि॒त्रोनो॒ऽअत्र॒वरु॑णश्च॒पूषार्यो॑वश॑स्यपर्ये॒तास्ति॑ ॥ १७ ॥ वि॒त्वदापो॒नपर्व॑तस्यपृ॒ष्ठादु॒क्थेभि॑रिं
द्रा॒नयं॑तय॒ज्ञैः । तंत्वा॒भिःसु॑ष्टु॒तिभि॑र्वा॒जयं॑तऽआ॒जिंनजं॑ग्मुर्गि॒र्वाहो॒ऽअश्वाः॑ ॥ नयं॑जरं॑तिश॒रदो॒नमासा॒नद्याव॒ऽइंद्रं॑म
वक॒र्शयं॑ति । वृ॒द्धस्यं॑चिद्वर्धतामस्यत॒नूःस्तोमे॑भिरु॒क्थैश्च॑श॒स्यमा॑ना ॥ नवी॒ळवे॒नमं॑ते॒नस्थि॒राय॒नशर्ध॑ते॒दस्यु॑जूताय॒स्त॒
वान् । अ॒ज्राऽइंद्र॑स्यगि॒रय॑श्चिदृ॒ष्वागं॑भी॒रेचि॑द्भवतिगा॒धम॑स्मै ॥ गं॒भी॒रेण॑नऽउ॒रुणा॑मत्रि॒न्प्रेषोयं॑धिसुतपाव॒न्वाजा॑
न् । स्थाऽऊ॒षुऽऊ॒र्ध्वऽऊ॒तीऽअरि॑षण्यन्न॒क्तोर्व्यु॑ष्टौ॒परि॑तक्म्यायां ॥ सचं॑स्वना॒यमव॑सेऽअ॒भीकं॑ऽइ॒तोवा॒तमिं॑द्रपाहिरि॒
षः । अ॒माचै॑न॒मर॑ण्येपाहि॒रि॒षोमदे॑मश॒तहि॑माःसु॒वीराः॑ ॥ १८ ॥ (६।३।२) यातं॑ऽऊ॒तिर॑व॒मायापर॒माया॒मध्य॒में
द्रं॑शुष्मि॒न्नस्ति॑ । ताभि॑रू॒षुवृ॑त्र॒हत्ये॑वीर्न॑ऽए॒भिश्च॒वाजै॑र्म॒हान्न॑ऽउग्र ॥ आभि॒ःस्पृधो॑मिथ॒तीररि॑षण्यन्न॒मित्र॑स्यव्यथयाम॒
न्युमिंद्र । आभि॒र्विश्वा॑ऽअ॒भियु॒जोविषू॑ची॒रार्या॑य॒विशोवं॑तारी॒र्दासीः॑ ॥ इंद्र॑जा॒मय॑ऽउ॒तयेजा॑मयोर्वा॒ची॒नासो॑व॒नुषो॑यु
यु॒ज्रे । त्वमे॑षांविथु॒राशवां॑सिज॒हिवृष्ण्या॑निकृणु॒हीपरा॑चः ॥ शूरो॑वा॒शूरं॑वनते॒शरी॑रैस्तनू॒रुचा॑तरु॑षि॒यत्कृ॒ण्वैते॑ । तो॒के
वा॒गोषु॒तन॑ये॒यद॒प्सुविक्रं॑दसीऽउ॒र्वरा॑सु॒ब्रवै॑ते ॥ न॒हित्वा॒शूरो॒नतु॒रोनधृ॒ष्णुर्नत्वा॑यो॒धोमन्य॑मानोयु॒योध॑ । इंद्र॒नकि॑ष्ट्वा॒प्र

(६।३।२) यातऊतिरितिनवर्चस्यसूक्तस्यभरद्वाजइंद्रस्त्रिष्टुप् ।

त्यं॑स्त्येषां॒विश्वां॑जा॒तान्य॒भ्यं॑सि॒तानि॑ ॥ १९ ॥ सप॑त्यत॑ऽउ॒भयो॑र्नृ॒म्णम॒योर्यदी॑वे॒धसः॑समि॒थेहवं॑ते । वृ॒त्रेवा॑म॒होनृ॒वति॒
क्षयै॑वा॒व्यचं॑स्वंता॒यादिं॑वितंत॒सैतें॑ ॥ अधं॑स्मातेचर्ष॒णयो॒यदे॑जा॒निंद्रं॑त्रा॒तोतभं॑वावरू॒ता । अ॒स्माकां॑सो॒येनृतं॑मासो॑ऽअ॒र्यऽ
इंद्रं॑सू॒रयो॑दधि॒रे॑पु॒रोनः॑ ॥ अनुं॑तेदायि॒मह॑ऽइंद्रि॒यायं॑स॒त्राते॒विश्व॒मनुं॑वृ॒त्रहत्यें॑ । अनुं॑क्ष॒त्रमनु॒सहों॑यज॒त्रेंद्रं॑दे॒वेभि॒रनुं॑तेनृ॒
षह्यें॑ ॥ ए॒वान॒ःस्पृध॒ःसमं॑जा॒समत्स्विंद्रं॑रा॒रंधि॑मिथ॒तीरदे॑वीः । वि॒द्याम॒वस्तो॒रवं॑सागृ॒णंतो॑भ॒रद्वां॑जाऽउ॒ततं॑ऽइंद्रनू॒नं+
॥ २० ॥ (६।३।३) श्रु॒धीनं॑ऽइंद्र॒ह्वयां॑मसि॒त्वाम॒होवाजं॑स्यस॒तौवां॑वृषा॒णाः । संयद्विशो॑यं॑त॒शूरं॑साताऽउ॒ग्रंनो॑व॒ःपा
र्ये॒ऽअहं॒न्दाः ॥ त्वांवा॒जीहं॑वतेवाजि॒नेयो॑म॒होवाजं॑स्य॒गध्यं॑स्यस॒तौ । त्वांवृ॒त्रेष्विं॑द्र॒सत्पं॑तिं॒तरुं॑त्रं॒त्वांचं॑ष्टेमु॒ष्टिहागोषु॒युध्यं॑
न् ॥ त्वंक॒विंचो॑दयो॒र्कसां॑ता॒तौत्वंकुत्सां॑य॒शुष्णं॑दा॒शुषे॑वर्क् । त्वंशिरो॑ऽअम॒र्मणः॒परां॑हन्नतिथि॒ग्वाय॒शंस्यं॑करि॒ष्यन्+ ॥
त्वंरथं॒प्रभंरोयो॒धमृ॒ष्वमावो॒युध्यं॑तंवृष॒भंदशं॑द्युं । त्वंतुग्रं॑वेत॒सवे॒सचां॑ह॒न्त्वंतुजिं॑गृ॒णंतं॑मिंद्रतूतोः ॥ त्वंतदु॒क्थमिं॑द्रब॒र्ह
णां॑कः॒प्रयच्छ॒तास॒हस्रां॑शूर॒दर्षि॑ । अवं॑गि॒रेर्दासं॒शंबं॑रंह॒न्प्रावो॒दिवो॑दासंचि॒त्राभि॑रू॒ती+ ॥ २१ ॥ त्वंश्र॒द्धाभि॑र्मंदसा॒नः
सोमै॑र्द॒भीतं॑ये॒चुमुं॑रिमिंद्रसिष्वप् । त्वंर॒जिंपिठीं॑नसेदश॒स्यन्ष॒ष्टिंस॒हस्रा॒शच्या॒सचा॑हन् ॥ अ॒हंच॒नतत्सू॒रिभि॑रानश्यां॒त
व॒ज्याय॑ऽइंद्रसु॒म्नमोजः॑ । त्वया॒यत्स्तवं॑तेसधवीरवी॒रास्त्रि॒वरू॑थेन॒नहु॑षाशविष्ठ ॥ व॒यंतें॑ऽअ॒स्यामिं॑द्रद्यु॒म्नहू॑ता॒सखा॑यः

(६।३।३) श्रुधीनइत्यष्टर्चस्यसूक्तस्यभरद्वाजइंद्रस्त्रिष्टुप् ।

स्याममहिन्प्रेष्ठाः । प्रातर्दनिःक्षत्रश्रीरस्तुश्रेष्ठोघनेवृत्राणांसनयेधनानां ॥ २२ ॥ (६।३।४) किमस्यमदेकिम्वस्यपीताविंद्रःकिमस्यसख्येचकार । रणावायेनिषदिकिंतेऽअस्यपुराविविद्रेकिमुनूतनासः ॥ सदस्यमदेसद्वस्यपीताविंद्रःसदस्यसख्येचकार । रणावायेनिषदिसत्तेऽअस्यपुराविविद्रेसदुनूतनासः ॥ नहिनुतेमहिमनःसमस्यनमघवन्मघवत्त्वस्यविद्म । नराधसोराधसोनूतनस्येंद्रनकिर्ददृशऽइंद्रियंते ॥ एतत्त्यत्तऽइंद्रियमचेतियेनावधीर्वरशिखस्यशेषः । वज्रस्ययत्तेनिहतस्यशुष्मात्स्वनाच्चिदिंद्रपरमोददार ॥ वधीदिंद्रोवरशिखस्यशेषोभ्यावर्तिनेचायमानायशिक्षन् । वृचीवतोयद्धरियूपीयायांहन्पूर्वेऽअर्धेभियसापरोदर्त् ॥ २३ ॥ त्रिंशच्छतंवर्मिणऽइंद्रसाकंयव्यावत्यांपुरुहूतश्रवस्या । वृचीवंतःशरवेपत्यमानाःपात्राभिंदानान्यर्थान्यायन् ॥ यस्यगावावरुषासूयवस्यूऽअंतरूषुचरतोरेरिहाणा । ससृंजयायतुर्वशंपरादाद्वृचीवतोदैववातायशिक्षन् ॥ द्वयाँऽअग्नेरथिनोविंशतिंगावधूमतोमघवामह्यंसम्राट् । अभ्यावर्तीचायमानोददातिदूणाशेयंदक्षिणापार्थवानाम् ॥ २४ ॥ (६।३।५) आगावोऽअग्मन्नुतभद्रमक्रन्त्सीदंतुगोष्ठेरणयंत्वस्मे । प्रजावतीःपुरुरूपाऽइहस्युरिंद्रायपूर्वीरुषसोदुहानाः ॥ इंद्रोयज्वनेपृणतेचशिक्षत्युपेद्ददातिनस्वंमुषायति ।

(६।३।४) किमस्यमदइत्यष्टर्चस्यसूक्तस्यभरद्वाजइंद्रःअंत्यायाश्चायमानोराजान्त्रिष्टुप् । (६।३।५) आगावइत्यष्टर्चस्यसूक्तस्यभरद्वाजो गौस्त्रिष्टुप् (द्वितीयायाइंद्रश्चांत्यपादस्यच) द्वितीयाद्यास्तिस्रोजगत्योंत्यानुष्टुप् ।

भूयो॑भूयोर॒यिमिद॑स्यव॒र्धय॒न्नभि॑न्नेखि॒ल्येनिद॑धातिदेव॒युं+ ॥ नतान॑शंति॒नद॑भाति॒तस्क॑रो॒नासा॑मामि॒त्रोऽव्यथि॒राद॑धर्ष
ति। दे॒वाँश्च॒याभि॒र्यज॑ते॒ददा॑तिच॒ज्योगित्ताभि॑ःसचते॒गोप॑तिःस॒ह+॥ नताऽअर्वा॑रे॒णुक॑काटोऽअश्नुते॒नसं॑स्कृत॒त्रमुप॑यंति॒
ताऽअ॒भि । उ॒रु॒गा॒यमभ॑यं॒तस्य॒ताऽअनु॒गावो॒मर्त॑स्य॒विच॑रंति॒यज्व॑नः ॥ गावो॒भगो॒गाव॒ऽइंद्रो॑मेऽअच्छा॒न्गाव॒ःसोम॑स्य
प्रथ॒मस्य॑भ॒क्षः। इ॒मायागाव॒ःसज॑नास॒ऽइंद्र॑इ॒च्छामीद्धृ॒दामन॑साचि॒दिंद्र॑ं ॥ यू॒यंगा॑वोमेदयथाकृ॒शंचि॑दश्री॒रंचि॑त्कृणुथासु॒
प्रती॑कं । भ॒द्रंगृ॒हंकृ॑णुथभद्रवाचोबृ॒हद्वो॒वय॑ऽउच्यतेस॒भासु॑ ॥ प्र॒जाव॑तीःसू॒यव॑संरि॒शंती॑ःशु॒द्धाऽअ॒पःसु॑प्रपा॒णेपिबं॑तीः।
माव॑स्ते॒नऽई॑शत॒माघशं॑स॒ःपरि॑वोहे॒तीरु॒द्रस्य॑वृज्याः ॥ उपे॒दमु॑प॒पर्च॑नमा॒सुगोषूप॑पृच्यतां । उप॑ऽऋष॒भस्य॒रेत॒स्युपें॑द्र॒तव॑
वी॒र्यें॑* ॥ २५ ॥ इतिचतुर्थाष्टकेषष्ठोध्यायः ॥ ६ ॥ ॥ ॥ ॥ ॥

त्रिंशाध्यायेवर्गाः २५ सूक्तानि १२· ऋचः १३२ ॥ त्यागः॥ इंद्रायेदं. ६४ विश्वेभ्योदेवेभ्य. इंद्राये. विश्वेभ्योदेवेभ्य. इंद्राये. ९६ चायमानाये. गोभ्यइ. गवेंद्राभ्या गोभ्य. ५ गवेंद्राभ्या. ॥ इतिचतुर्थेषष्ठः ॥

इंद्रंषड्भूयःपंचा॑भूरेकःसुहोत्रस्तु॑चतुर्थीं॑शक्कर्यपूर्व्यी॑यओजिष्ठःशुनहोत्रस्तुसंचत्वेकदानरस्तु॑सत्रावा॑गपान्मंद्र
स्यैंद्रपिबाहेळमानःप्र॑त्यस्मैचतुष्कमानुष्टुभं॑बृहत्यं॑तंयस्यौ॑ष्णिहं॑योररयिवश्चतुर्विं॑शतिःशंयुर्बा॑र्हस्पत्यो॑ह्यादौषळनु
ष्टुभस्तिस्रश्च॑विराजोमध्यमैववासौ॑यआनयन्त्रयस्त्रिंशद्गायत्र्यं॑पुरुतममतिनिचृद॑धिबृबुःपादनिचृदं॑त्यानुष्टुप्प॑तृचें

त्येबृबुस्तक्षादैवतंत्वामिद्धिषळूनाप्रागाथस्वादुरेकात्रिंशद्गर्गःपंचाद्यौसौम्यौगव्यूत्यर्धर्चौलिंगोक्तदैवतःप्रस्तो
कइतित्रिष्टुबनुष्टुब्गायत्रीद्विपदासार्ञ्जयस्यप्रस्तोकस्यदानस्तुतिःपरौतृचौरथदुंदुभिदैवत्यावैंद्रोंत्योर्धर्चौयुजा
नोबृहतीत्रिष्टुब्द्विपदादिवस्पृथिव्याजगती ॥ १ ॥ ॥ ॥ ॥ ॥

॥ हरिःओम् ॥ (६।३।६) इंद्रंवोनरःसख्यायसेपुर्महोयंतःसुमतयेचकानाः । महोहिदातावज्रहस्तोऽअस्तिम
हामुरण्वमवसेयजध्वं ॥ आयस्मिन्हस्तेनर्यामिमिक्षुरारथेहिरण्ययेरथेष्ठाः । आरश्मयोगभस्त्योःस्थूरयोराध्वन्नश्वा
सोवृषणोयुजानाः+ ॥ श्रियेतेपादादुवऽआमिमिक्षुर्धृष्णुर्वज्रीशवसादक्षिणावान् । वसानोऽअत्कंसुरभिंदृशेकंस्व१
र्णनृतविषिरोबभूथ ॥ ससोमऽआमिश्लतमःसुतोभूद्यस्मिन्पक्तिःपच्यतेसंतिधानाः । इंद्रंनरःस्तुवंतोब्रह्मकाराऽउ
क्थाशंसंतोदेववाततमाः ॥ नतेऽअंतःशवसोधाय्यस्यवितुबाबधेऽरोदसीमहित्वा । आतासूरिःपृणतितूतुजानोयूथे
वाप्सुसमीजमानऽऊती+ ॥ एवेदिंद्रःसुहवऽऋष्वोऽअस्तूतीऽअनूतीहिरिशिप्रःसत्वा । एवाहिजातोऽअसमात्योजाःपु
रूचवृत्राहनतिनिदस्यून् ॥ १ ॥ (६।३।७) भूयऽइद्वावृधेवीर्यायँऽएकोऽअजुर्योदयतेवसूनि । प्ररिरिचेदिवऽइंद्रःपृथि
व्याऽअर्धमिदस्यप्रतिरोदसीऽउभे+ ॥ अधामन्येबृहदसुर्यमस्ययानिदाधारनकिरामिनाति । दिवेदिवेसूर्योदर्शतोभू

(६।३।६) इंद्रंवइतिषळर्चस्यसूक्तस्यभरद्वाजइंद्रस्त्रिष्टुप् । (६।३।७) भूयइतिपंचर्चस्यसूक्तस्यभरद्वाजइंद्रस्त्रिष्टुप् ।

द्विसद्मान्युर्वियासुक्रतुर्धात् ॥ अद्याचिन्नूचित्तदपोनदीनांयदाभ्योऽअरदोगातुमिंद्र । निपर्वताऽअद्मसदोनसेदुस्त्वयांदृह्लानिसुक्रतोरजांसि ॥ सत्यमित्तन्नत्वावाँऽअन्योऽअस्तींद्रदेवोनमर्त्योज्यायान् । अहन्नहिंपरिशयानमर्णोवासृजोऽअपोऽअच्छासमुद्रं+ ॥ त्वमपोविदुरोविषूचीरिंद्रदृह्लमरुजःपर्वतस्य । राजाभवोजगतश्चर्षणीनांसाकंसूर्यंजनयन्द्यामुषासं ॥ २ ॥ (६।३।८) अभूरेकोरयिपतेरयीणामाहस्तयोरधिथाऽइंद्रकृष्टीः । वितोकेऽअप्सुतनयेचसूरेवोचंतचर्षणयोविवाचः ॥ त्वद्भियेंद्रपार्थिवानिविश्वाच्युताचिच्च्यावयंतेरजांसि । द्यावाक्षामापर्वतासोवनानिविश्वंदृह्लंभयतेऽअज्मन्नाते ॥ त्वंकुत्सेनाभिशुष्णमिंद्राशुषंयुध्यकुयवंगविष्टौ । दशंप्रपित्वेऽअधसूर्यस्यमुषायश्चक्रमविवेरपांसि ॥ त्वंशतान्यवशंबरस्यपुरोजघंथाप्रतीनिदस्योः । अशिक्षोयत्रशच्याशचीवोदिवोदासायसुन्वतेसुतक्रेभरद्वाजायगृणतेवसूनि ॥ सत्यसत्वन्महतेरणायरथमातिष्ठतुविनृम्णभीमं । याहिप्रपथिन्नवसोपमद्रिक्प्रचश्रुतश्रावयचर्षणिभ्यः ॥ ३ ॥ (६।३।९) अपूर्व्यापुरुतमान्यस्मैमहेवीरायतवसेतुराय । विरप्शिनेवज्रिणेशंतमानिवचांस्यासास्थविरायतक्षं ॥ समातरासूर्येणाकवीनामवासयद्रुजदद्रिंगृणानः । स्वाधीभिर्ऋक्वभिर्वावशानऽउदुस्रियाणामसृजन्नि

(६।३।८) अभूरेकइतिपंचर्चस्यसूक्तस्यभारद्वजाःसुहोत्रइंद्रस्त्रिष्टुप्चतुर्थीशकरी (सुहोत्रःशुनहोत्रोनरोगर्गऋजिश्वाइत्येतेऋषयोबृहस्पतेःपौत्राउतदौष्यंतेर्भरतस्यपौत्राइतिविषयेइतिहासःश्रूयते) । (६।३।९) अपूर्व्येतिपंचर्चस्यसूक्तस्यसुहोत्रइंद्रस्त्रिष्टुप् ।

ऋक्सं.
अ.४अ.७
॥४५॥

मंडलं ६
अनु. ३

दानं ॥ सवह्निभिर्ऽऋक्वभिर्गोषुशश्वन्मितज्ञुभिःपुरुकृत्वाजिगाय । पुरःपुरोहासखिभिःसखीयन्दृह्वारुरोजकविभिःकविःसन्+ ॥ सनीव्याभिर्जरितारमच्छामहोवाजेभिर्महद्भिश्चशुष्मैः । पुरुवीराभिर्वृषभक्षितीनामागिर्वणःसुवितायप्रयाहि ॥ ससर्गेणशवसातक्तोऽअत्यैरपऽइंद्रोदक्षिणतस्तुराषाट् । इत्थासृजानाऽअनपावृदर्थंदिवेदिवेविविषुरप्रमृष्यं+ ॥ ४ ॥ (६।३।१०) यऽओजिष्ठऽइंद्रतंसुनोदामदोवृषन्त्स्वभिष्टिर्दास्वान् । सौवश्व्यंयोवनवत्स्वश्वोवृत्रासमत्सुसासहदमित्रान् ॥ त्वांहीं३द्रावसेविवाचोहवंतेचर्षणयःशूरसातो । त्वंविप्रेभिर्विपणीँऽरशायस्त्वोतऽइत्सनितावाजमर्वा ॥ त्वंताँऽइंद्रोभयाँऽअमित्रान्दासावृत्राण्यार्याचशूर । वधीर्वनेवसुधितेभिरत्कैरापृत्सुदर्षिनृणांनृतम ॥ सत्वंनऽइंद्राकवाभिरूतीसखाविश्वायुरवितावृधेभूः । स्वर्षातायद्ध्वयामसित्वायुध्यंतोनेमधितापृत्सुशूर ॥ नूनंनऽइंद्रापरायचस्याभवामृळीकऽउतनोऽअभिष्टौ । इत्थागृणंतोमहिनस्यशर्मन्दिविष्यामपार्येगोषतमाः ॥५॥ (६।३।११) संचत्वेजग्मुर्गिरऽइंद्रपूर्वीर्विचत्वद्यंतिविभ्वोमनीषाः । पुरानूनंचस्तुतयऽऋषीणांपस्पृध्रऽइंद्रेऽअध्युक्थार्का+ ॥ पुरुहूतोयःपुरुगूर्तऽऋभ्वाँऽएकःपुरुप्रशस्तोऽअस्तियज्ञैः । रथोनमहेशवसेयुजानो३स्माभिरिंद्रोऽअनुमाद्योभूत् । नयंहिंसंतिधीतयोनवाणीरिंद्रंनक्षंतीदभिवर्धयंतीः । यदिंस्तोतारःशतंयत्सहस्रंगृणंतिगिर्वणसंशंतदस्मै ॥ अस्माऽएतद्दि

॥४५॥

(६।३।१०) यओजिष्ठइतिपंचर्चस्यसूक्तस्यभारद्वाजःशुनहोत्रइंद्रस्त्रिष्टुप्। (६।३।११) संचत्वइतिपंचर्चस्यसूक्तस्यशुनहोत्रइंद्रस्त्रिष्टुप्।

व्यं॑१॒चै॑वं॑मा॒सामि॑मि॒क्षऽइं॑द्रे॒न्यं॑यामि॒सोमः॑ । जनं॒नधन्वं॑न्न॒भिसंयदापः॑स॒त्रावा॑वृधु॒र्हवं॑नानिय॒ज्ञैः॑+ ॥ अस्मा॑ऽए॒तन्मह्यां॑गू॒षमं॑स्मा॒ऽइंद्रा॑यस्तो॒त्रंम॒तिभि॑रवाचि । अस॒द्यथा॑मह॒तिवृं॑त्र॒तूर्य॒ऽइंद्रो॑वि॒श्वायुं॑रवि॒तावृ॒धश्चं॑ ॥ ६ ॥ (६।३।१२) कु॒दाभुं॑व॒न्नर्थ॑क्षया॒णि॒ब्रह्म॑कु॒दास्तो॒त्रेस॑हस्रपो॒ष्यं॑दाः । कु॒दास्तोमं॑वासयो॒स्य॑रा॒याकु॒दाधियः॑कर॑सि॒वाजं॑रत्नाः ॥ कर्हिं॑स्वि॒त्तादिं॑द्र॒यन्नृभि॒र्नॄन्वी॒रैर्वी॒रान्नी॒ळया॑से॒जया॒जीन् । त्रि॒धातु॒गाऽअधि॑जयासि॒गोष्विं॑द्र॒द्यु॒म्नंस्व॑र्वंद्धे॒ह्य॒स्मे+ ॥ कर्हिं॑स्वि॒त्तदिं॑द्र॒यज्जं॑रि॒त्रेवि॒श्वप्सु॒ब्रह्म॑कृ॒णवः॑शविष्ठ । कु॒दाधियो॒ननि॒युतो॑युवासेकु॒दागोम॑घा॒हवं॑नानिगच्छाः ॥ सगोमं॑घाजरि॒त्रेऽअश्वं॑श्चंद्रा॒वाजं॑श्रवसो॒ऽअधि॑धेहि॒पृक्षः॑ । पी॒पि॒हीषः॑सु॒दुघा॑मिंद्रधे॒नुंभ॒रद्वा॑जेषुसु॒रुचो॑रुरुच्याः ॥ तमानू॒नंवृ॒जनं॑म॒न्यथा॑चि॒च्छूरो॒यच्छ॑क्र॒विदुरो॑गृ॒णीषे । मानिर॑रंशुक्र॒दुघ॑स्यधे॒नोरां॑गि॒र॒सान्ब्रह्म॑णाविप्रजिन्व ॥ ७ ॥ (६।३।१३) स॒त्राम॑दा॑स॒स्तव॑वि॒श्वज॑न्याःस॒त्रारायो॑ध॒येपार्थि॑वासः । स॒त्रावाजा॑नामभवोविभ॒क्तायद्दे॒वेषु॑धा॒रयं॑थाऽअसु॒र्यं॑* ॥ अनु॒प्रयें॑जे॒जन॒ऽओजो॑ऽअस्यस॒त्राद॑धि॒रेऽअनुं॑वी॒र्या॑य । स्यू॒मगृ॒भेदु॒धये॒र्वंते॒चक्र॒तुंवृं॒जंत्यापिं॑वृत्र॒हत्ये॑ ॥ तंस॒ध्रीची॑रू॒तयो॒वृष्ण्या॑नि॒पौंस्या॑निनि॒युतः॑स॒श्चुरिंद्रं॑ । स॒मु॒द्रंनसिंध॑वऽउ॒क्थशु॑ष्माऽउरु॒व्यचं॑सं॒गिर॒ऽआवि॑शंति ॥ सरा॒यस्खा॒मुप॑सृजागृ॒णा॒नः

(६।३।१२) कदाभुवन्नितिपंचर्चस्यसूक्तस्यभारद्वाजोनरइंद्रस्त्रिष्टुप् । (६।३।१३) सत्रामदासइतिपंचर्चस्यसूक्तस्यभरद्वाजोनरइंद्रस्त्रिष्टुप् ।

पुरुश्चंद्रस्यत्वामिंद्रवस्वः । पतिर्बभूथासमोजनानामेकोविश्वस्यभुवनस्यराजा ॥ सतुश्रुधिश्रुत्यायोदुवोयुर्द्यौर्नभूमाभि
रायोऽअर्यः । असोयथानःशवसाचकानोयुगेयुगेवयसाचेकितानः ॥ ८ ॥ (६।३।१४) अर्वाग्रथंविश्ववारंतऽउग्रे
द्रंयुक्तासोहरयोवहंतु । कीरिश्चिद्धित्वाहवतेस्वर्वान्नृधीमहिंसधमादस्तेऽअद्य+ ॥ प्रोद्रोणेऽहरयःकर्माग्मन्पुनानासऽ
ऋज्यंतोऽअभूवन् । इंद्रोनोऽअस्यपूर्व्यःपपीयाद्युक्षोमदस्यसोम्यस्यराजा ॥ आसत्राणासःशवसानमच्छेंद्रंसुचक्रेरथ्या
सोऽअश्वाः । अभिश्रवऽऋज्यंतोवहेयुर्नूचिन्नुवायोरमृतंविदस्येत् ॥ वरिष्ठोऽअस्यदक्षिणामियर्तींद्रोमघोनांतुविकूर्मि
तमः । ययावज्रिवःपरियास्यंहोमघाचधृष्णोदयसेविसूरीन्+ ॥ इंद्रोवाजस्यस्थविरस्यदातेंद्रोगीर्भिर्वर्धतांवृद्धमहाः ।
इंद्रोवृत्रंहनिष्ठोऽअस्तुसत्वातासूरिःपृणतितूतुजानः ॥ ९ ॥ (६।३।१५) अपादितऽउदुनश्चित्रतमोमहीभर्षद्द्युम
तीमिंद्रहूतिं । पन्यसींधीतिंदैव्यस्ययामन्जनस्यरातिंवनतेसुदानुः ॥ दूराच्चिदावसतोऽअस्यकर्णाघोषादिंद्रस्यतन्यति
ब्रुवाणः । एयमेनंदेवहूतिर्ववृत्यान्मद्र्य१गिंद्रमियमृच्यमाना ॥ तंवोधियापरमयापुराजामजरमिंद्रमभ्यनूष्यर्कैः ।
ब्रह्माचगिरोदधिरेसमस्मिन्महाँश्चस्तोमोऽअधिवर्धदिंद्रे ॥ वर्धाद्यंयज्ञऽउतसोमऽइंद्रंवर्धाद्ब्रह्मगिरऽउक्थाचमन्म ।
वर्धाहैनमुषसोयामन्नक्तोर्वर्धान्मासाःशरदोद्यावऽइंद्रं ॥ एवाजज्ञानंसहसेऽअसामिवावृधानंराधसेचश्रुतायं । महा ॥४६॥

(६।३।१४) अर्वाग्रथमितिपंचर्चस्यसूक्तस्यभरद्वाजइंद्रस्त्रिष्टुप्। (६।३।१५) अपादितइतिपंचर्चस्यसूक्तस्यभरद्वाजइंद्रस्त्रिष्टुप् ।

मुग्रमवसेविप्रनूनमाविवासेमवृत्रतूर्येषु ॥ १० ॥ (६।३।१६) मंद्रस्यकवेर्दिव्यस्यवह्नेर्विप्रमन्मनोवचनस्यमध्वः ।
अपानस्तस्यसचनस्यदेवेषोयुवस्वगृणतेगोऽअग्राः ॥ अयमुशानःपर्यद्रिमुस्राऽऋतधीतिभिर्ऋतयुग्युजानः । रुजदरु
गणंविवलस्यसानुंपणीँऽर्वचोभिरभियोधदिंद्रः ॥ अयंद्योतयदद्युतोव्य१क्तून्दोषावस्तोःशरदऽइंदुरिंद्र । इमंकेतुम
दधुर्नूचिदह्नांशुचिजन्मनऽउषसश्चकार ॥ अयंरोचयदरुचोरुचानो३यंवासयद्व्यृ१तेनपूर्वीः । अयमीयतऽऋतयु
ग्भिरश्वैःस्वर्विदानाभिनाचर्षणिप्राः+ ॥ नूगृणानोगृणतेप्रत्नराजन्निषःपिन्ववसुदेयायपूर्वीः । अपऽओषधीरविषा
वनानिगाऽअर्वतोनॄनृचसेरिरीहि ॥ ११ ॥ (६।३।१७) इंद्रपिबतुभ्यंसुतोमदायावस्यहरीविमुचासखाया । उत
प्रगायगणऽआनिषद्याथायज्ञायगृणतेवयोधाः ॥ अस्यपिबयस्यजज्ञानऽइंद्रमदायक्रत्वेऽअपिबोविरप्शिन् । तमु
तेगावोनरऽआपोऽअद्रिरिंदुंसमह्यन्पीतयेसमस्मै ॥ समिद्धेऽअग्नौसुतऽइंद्रसोमऽआत्वावहंतुहरयोवहिष्ठाः । त्वाय
तामनसाजोहवीमींद्रायाहिसुवितायमहेनः ॥ आयाहिशश्वदुशताययाथेंद्रमहामनसासोमपेयँ । उपब्रह्माणिशृणवऽ
इमानोथातेयज्ञस्तन्वे३वयोधात् ॥ यदिंद्रदिविपार्येयदृधग्यद्वास्वेसदनेयत्रवासि । अतोनोयज्ञमवसेनियुत्वान्त्स

(६।३।१६) मंद्रस्यकवेरितिपंचर्चस्यसूक्तस्यभरद्वाजइंद्रस्त्रिष्टुप् । (६।३।१७) इंद्रपिबेतिपंचर्चस्यसूक्तस्यभरद्वाजइंद्रस्त्रिष्टुप् ।

जोषाःपाहिगिर्वणोमरुद्भिः ॥ १२ ॥ (६।३।१८) अहेळमानऽउपयाहियज्ञंतुभ्यंपवंतऽइंदवःसुतासः । गावोनवज्रिन्त्स्वमोकोऽअच्छेंद्रागहिप्रथमोयज्ञियानां ॥ यातेकाकुत्सुकृतायावरिष्ठाययाशश्वत्पिबसिमध्वऽऊर्मिं । तयापाहिप्रतेऽअध्वर्युरस्थात्संतेवज्रोवर्ततामिंद्रगव्युः+ ॥ एषद्रप्सोवृषभोविश्वरूपऽइंद्रायवृष्णेसमकारिसोमः । एतंपिबहरिवःस्थातरुग्रयस्येशिषेप्रदिवियस्तेऽअन्नं ॥ सुतःसोमोऽअसुतादिंद्रवस्यानयंश्रेयान्चिकितुषेरणाय । एतंतितिर्वऽउपयाहियज्ञंतेनविश्वास्तविषीरापृणस्व ॥ ह्वयामसित्वेंद्रयाह्यर्वाङरंतेसोमस्तन्वेभवाति । शतक्रतोमादयस्वासुतेषुप्रास्माँऽअवपृतनासुप्रविक्षु+ ॥ १३ ॥ (६।३।१९) प्रत्यस्मैपिपीषतेविश्वानिविदुषेभर । अरंगमायजग्मयेपश्चाद्दघ्वनेनरे ॥ एमेनंप्रत्येतनसोमेभिःसोमपातमं । अमत्रेभिर्ऋजीषिणमिंद्रंसुतेभिरिंदुभिः ॥ यदीसुतेभिरिंदुभिःसोमेभिःप्रतिभूषथ । वेदाविश्वस्यमेधिरोधृषत्तंतमिदेषते ॥ अस्माऽअस्माऽइदंधसोध्वर्योप्रभरासुतं । कुवित्समस्यजेन्यस्यशर्धतोभिशस्तेरवस्परत् ॥ १४ ॥ (६।३।२०) यस्यत्यच्छंबरंमदेदिवोदासायरंधयः । अयंससोमऽइंद्रतेसुतःपिब ॥ यस्यतीव्रसुतंमदंमध्यमंतंचरक्षसे । अयंस० ॥ यस्यगाऽअंतरश्मनोमदेदृळ्हाऽअवासृजः । अयंस० ॥

(६।३।१८) अहेळमानइतिपंचर्चस्यसूक्तस्यभरद्वाजइंद्रस्त्रिष्टुप् । (६।३।१९) प्रत्यस्माइतिचतुर्ऋचस्यसूक्तस्यभरद्वाजइंद्रोनुष्टुबंत्याबृहती । (६।३।२०) यस्यत्यदितिचतुर्ऋचस्यसूक्तस्यभरद्वाजइंद्रउष्णिक् ।

यस्यमंदानोऽअंधसोमाधोनंदधिषेशवः । अयंस० ॥ १५ ॥ (६।४।१) योरयिवोरयिंतमोयोद्युम्नैर्द्युम्नवत्तमः ।
सोमःसुतःसऽइंद्रतेस्तिस्वधापतेमदः ॥ यःशग्मस्तुविशग्मतेरायोदामामतीनां । सोमःसुतः० ॥ येनवृद्धोनशवसा
तुरोनस्वाभिरूतिभिः । सोमःसुतः० ॥ त्यमुवोऽअप्रहणंगृणीषेशवसस्पतिं । इंद्रंविश्वासाहंनरंमंहिष्ठंविश्वचर्षणिं ॥
यंवर्धयंतीद्गिरःपतिंतुरस्यराधसः । तमिन्न्वस्यरोदसीदेवीशुष्मंसपर्यतः ॥ १६ ॥ तद्वऽउक्थस्यबर्हणेंद्रायोपस्तृणी
षणि । विपोनयस्योतयोवियद्रोहंतिसक्षितः ॥ अविंदद्दक्षंमित्रोनवीयान्पपानोदेवेभ्योवस्योऽअचैत् । ससवान्स्तौ
लाभिर्धौतरीभिरुरुष्यापायुरभवत्सखिभ्यः ॥ ऋतस्यपथिवेधाऽअपायिश्रियेमनांसिदेवासोऽअक्रन् । दधानोनाम
महोवचोभिर्वपुर्दृशयेवेन्योऽव्यावः ॥ द्युमत्तमंदक्षंधेह्यस्मेसेधाजनानांपूर्वीररातीः । वर्षीयोवयःकृणुहिशचीभिर्धन
स्यसातावस्माँऽअविड्ढि ॥ इंद्रतुभ्यमिन्मघवन्नभूमवयंदात्रेहरिवोमाविवेनः । नकिरापिर्ददृशेमर्त्यत्राकिमंगरध्रचोद
नंत्वाहुः ॥ १७ ॥ माजस्वनेवृषभनोररीथामातेरेवतःसख्येरिषाम । पूर्वीष्टऽइंद्रनिष्षिधोजनेषुजह्यसुष्वीन्प्रवृहापृ
णतः ॥ उदभ्राणीवस्तनयन्नियर्तींद्रोराधांस्यश्व्यानिगव्या । त्वमसिप्रदिवःकारुधायामात्वादामानऽआदभन्मघो

(६।४।१) योरयिवइतिचतुर्विंशत्यृस्यसूक्तस्यबार्हस्पत्यःशंयुरिंद्रस्त्रिष्टुबाद्याःषळनुष्टुभःसप्तम्यादितिस्रोविराट्पंक्तयः। (तिसृष्वष्टम्येवविराट्सप्तमीनवम्यौतुत्रिष्टुभावितिकेचित्) ।

Digitization by eGangotri Funding MHRD Delhi

नः ॥ अध्वर्योवीरप्रमहेसुतानामिंद्रायभरसह्यस्यराजा । यःपूर्व्याभिरुतनूतनाभिर्गीर्भिर्वावृधेगृणतामृषीणा ॥ अ
स्यमदेपुरुवर्पांसिविद्वानिंद्रोवृत्राण्यप्रतीजघान । तमुप्रहोषिमधुमंतमस्मैसोमंवीरायशिप्रिणेपिबध्यै ॥ पातासुतमिं
द्रोऽअस्तुसोमंहंतावृत्रंवज्रेणमंदसानः । गंतायज्ञंपरावतश्चिदच्छावसुर्धीनामविताकारुधायाः ॥ १८ ॥ इदंत्यत्पा
त्रमिंद्रपानमिंद्रस्यप्रियममृतमपायि । मत्सद्यथासौमनसायदेवंव्यं१स्मद्द्वेषोयुयवद्व्यंहः ॥ एनामंदानोजहिशूरशत्रू
न्जामिमजामिंमघवन्नमित्रान् । अभिषेणाँऽअभ्या३देदिशानान्पराचऽइंद्रप्रमृणाजहीच ॥ आसुष्माणोमघवन्निंद्र
पृत्स्व१स्मभ्यंमहिवरिवःसुगंकः । अपांतोकस्यतनयस्यजेषऽइंद्रसूरीन्कृणुहिस्मानोऽअर्धं+ ॥ आत्वाहरयोवृषणोयुजा
नावृषरथासोवृषरश्मयोत्याः । अस्मत्रांचोवृषणोवज्रवाहोवृष्णेमदायसुयुजोवहंतु ॥ आतेवृषन्वृषणोद्रोणमस्थुर्घृत
प्रुषोनोर्मयोमदंतः । इंद्रप्रतुभ्यंवृषभिःसुतानांवृष्णेभरंतिवृषभायसोमं ॥ १९ ॥ वृषासिदिवोवृषभःपृथिव्यावृषा
सिंधूनांवृषभस्तियानां । वृष्णेतऽइंदुर्वृषभपीपायस्वादूरसोमधुपेयोवराय ॥ अयंदेवःसहसाजायमानऽइंद्रेणयुजाप
णिमस्तभायत् । अयंस्वस्यपितुरायुधानींदुरमुष्णादशिवस्यमायाः+ ॥ अयमकृणोदुषसःसुपत्नीरयंसूर्येऽअदधाज्ज्यो
तिरंतः। अयंत्रिधातुदिविरोचनेषुत्रितेषुविंददमृतंनिगूढं ॥ अयंद्यावापृथिवीविष्कभायदयंरथमयुनक्सप्तरश्मिं ।
अयंगोषुशच्यापक्वमंतःसोमोदाधारदशयंत्रमुत्सं ॥ २० ॥ (परिशिष्टं ॥ ॥ चक्षुश्चश्रोत्रंचमनश्चवाक्चप्राणापानौदे

हइदंशरीरं ॥ द्वौप्रत्यंचावनुलोमौविसर्गावितंतमन्यदर्शयंत्रमुत्सं ॥ नखंश्चपृष्ठश्चकरौचबाहूजंघेचोरूऽउदरंशिरश्च ॥
रोमाणिमांसंरुधिरंस्थिमज्जमेतच्छरीरंजलबुद्बुदोपमं ॥ भ्रुवौललाटेचतथाचकर्णौहनूकपोलौछुबुकंस्तथाच । ओष्ठौ
चदंताश्चतथैवजिह्वामेतच्छरीरंमुखरंत्नकोशं ॥) (६।४।२) यऽआनयत्परावतःसुनीतीतुर्वशंयदुं । इंद्रःसनोयुवा
सखा ॥ अविप्रेचिद्वयोदधदनाशुनाचिदर्वता । इंद्रोजेताहितंधनं ॥ महीरस्यप्रणीतयःपूर्वीरुतप्रशस्तयः । नास्यक्षी
यंतऽऊतयः ॥ सखायोब्रह्मवाहसेर्चतप्रचगायत । सहिनःप्रमतिर्मही+ ॥ त्वमेकस्यवृत्रहन्नविताद्वयोरसि । उतेद्द
शेयथावयं+ ॥ २१ ॥ नयसीद्वतिद्विषःकृणोष्युक्थशंसिनः । नृभिःसुवीरऽउच्यसे ॥ ब्रह्माणंब्रह्मवाहसंगीर्भिःस
खायमृग्मियं । गांनदोहसेहुवे ॥ यस्यविश्वानिहस्तयोरूचुर्वसूनिनिद्विता । वीरस्यपृतनाषहः ॥ विद्वळानिचिदद्रि
वोजनानांशचीपते । वृहमायाऽअनानत ॥ तमुत्वासत्यसोमपाऽइंद्रवाजानांपते । अहूमहिश्रवस्यवः ॥ २२ ॥
तमुत्वायःपुरासिथयोवानूनंहितेधने । हव्यःसःश्रुधीहवं ॥ धीभिरर्वद्भिरर्वतोवाजाँऽइंद्रश्रवाय्यान् । त्वयाजेष्महि
तंधनं ॥ अभूरुवीरगिर्वणोमहाँऽइंद्रधनेहिते । भरेवितंतसाय्यः ॥ यातऽऊतिरमित्रहन्मक्षूजवस्तमासति । तया
नोहिनुहीरथं ॥ सरथेनरथीतमोस्माकेनाभियुग्वना । जेषिजिष्णोहितंधनं ॥ २३ ॥ यऽएकइत्तमुष्टुहिकृष्टीनांविच

(६।४।२) यआनयदितित्रयस्त्रिंशदृचस्यसूक्तस्यशंयुरिंद्रोंत्यतृचस्यबृबुस्तक्षागायत्रीएकोनत्रिंश्यतिनिचृदेकात्रिंशीपादनिचृदंत्यानुष्टुप् ।

ष॑णिः । पति॑र्ज॒ज्ञेवृष॑क्रतुः ॥ योगृ॒णतामिदा॑सि॑था॒पिरू॒तीशि॒वःसखा॑ । सत्वंन॑ऽइंद्रमृळय ॥ धि॒ष्ववज्रं॒गभ॑स्त्योर
क्षो॒हत्या॑यवज्रिवः । सा॒स॒ही॒ष्ठाऽअ॒भिस्पृध॑ः ॥ प्र॒त्नंर॑यी॒णांयु॒जं॒सखा॑यंकीरि॒चोद॑नं । ब्रह्म॑वाहस्तमंहुवे ॥ सहिविश्वा॑
नि॒पार्थि॑वा॒ँऽएक॒ोवसू॑नि॒पत्य॑ते । गिर्वै॑णस्तमो॒ऽअध्रि॑गुः ॥ २४ ॥ सनो॑नि॒युद्भि॒रापृ॑ण॒कामं॒वाजे॑भिर॒श्विभि॑ः । गोम॑
द्भिर्गो॑पतेधृ॒षत्$^{+}$ ॥ तद्वो॑गायसु॒तेसचा॑पुरुहू॒ताय॒सत्व॑ने । शंयद्गवे॒नशा॒किने॑ ॥ नघा॒वसु॒र्निय॑मतेदा॒नंवाज॑स्य॒गोम॑तः ।
यत्सी॒मुप॒श्रव॒द्गिर॑ः ॥ कु॒वित्स॑स्य॒प्रहि॒व्रजं॒गोम॑तंदस्यु॒हागम॑त् । शची॑भि॒रप॑नोवरत् ॥ इ॒माऽउ॑त्वाशतक्रतो॒भिप्रणो॑नु
वु॒र्गिर॑ः । इंद्रं॑व॒त्संनमा॒तर॑ः ॥ २५ ॥ दू॒णाशँ॑स॒ख्यंतव॒गौर॑सिवीरगव्य॒ते । अश्वो॑ऽअश्वाय॒तेभ॑व ॥ समँ॑दस्वा॒ह्यंध॑
सो॒राधँ॑सेत॒न्वा॑म॒हे । नस्तो॒तारँ॑नि॒देक॑रः ॥ इ॒माऽउ॑त्वासु॒तेसु॑ते॒नक्षँ॑तेगिर्वणो॒गिर॑ः । व॒त्संगावो॒नधे॒नव॑ः ॥ पु॒रू॒तमँ॑पुरू॒
णांस्तो॒तॄ॒णांविवा॑चि । वाजे॑भिर्वाजय॒तां$^{+}$ ॥ अ॒स्माकं॑मिंद्रभूतुते॒स्तोमो॒वाहि॑ष्ठो॒ऽअंत॑मः । अ॒स्मान्रा॒येम॒हेहि॑नु ॥ अधि॑
बृ॒बुःप॑णी॒नांवर्षि॑ष्ठेमू॒र्धन्न॑स्थात् । उ॒रुःकक्षो॒नगां॒ग्यः$^{+}$ ॥ यस्य॑वा॒योरि॑वद्र॒वद्भ॒द्रारा॒तिःस॑ह॒स्रिणी॑ । स॒द्योदा॒नाय॒मंह॑ते ॥
तत्सुनो॒विश्वे॑ऽअ॒र्यऽआसदा॑गृणंतिका॒रव॑ः । बृ॒बुंस॑हस्र॒दात॑मंसू॒रिंस॑हस्र॒सात॑मं ॥ २६ ॥ (६।४।३) त्वामि॒द्धिहवा॑
महेसा॒तावाज॑स्यका॒रव॑ः । त्वांवृ॒त्रेष्विं॑द्र॒सत्प॑तिं॒नर॒स्त्वांकाष्ठा॒स्वर्व॑तः ॥ सत्वंन॑श्चित्रवज्रहस्तधृष्णु॒याम॒हस्त॑वा॒नोऽअ॑

(६।४।३) त्वामिद्धीतिचतुर्दशर्चस्यसूक्तस्यशंयुरिंद्रःअयुजोबृहत्यःयुजःसतोबृहत्यः ।

द्रिवः । गामश्वंरथ्यमिंद्रसंकिरसत्रावाजंनजिग्युषे ॥ यःसत्राहाविचर्षणिरिंद्रंतंहूमहेवयं । सहस्रमुष्कतुविनृम्णसत्प
तेभवासमत्सुनोवृधे+ ॥ बाधसेजनान्वृषभेवमन्युनाघृषौमीह्ळऽऋचीषम । अस्माकंबोध्यविताम्हाधनेतनूष्वप्सुसूर्ये ॥
इंद्रज्येष्ठंनऽआभरँऽओजिष्ठंपपुरिश्रवः । येनेमेचित्रवज्रहस्तरोदसीऽओभेसुशिप्रप्राः+ ॥ २७ ॥ त्वामुग्रमवसेचर्ष
णीसहंराजन्देवेषुहूमहे । विश्वासुनोविथुरापिब्दनावसोमित्रान्त्सुषहान्कृधि ॥ यदिंद्रनाहुषीष्वाँऽओजोनृम्णंचकृष्टि
षु । यद्वापंचक्षितीनांद्युम्नमाभरसत्राविश्वानिपौंस्या ॥ यद्वातृक्षौमघवन्द्रुह्यावाजनेयत्पूरौकच्चवृष्ण्यं । अस्मभ्यंत
द्रिरीहिसंनृषाह्येमित्रान्पृत्सुतुर्वणे ॥ इंद्रत्रिधातुशरणंत्रिवरूथंस्वस्तिमत् । छर्दिर्यच्छमघवद्भ्यश्चमह्यंचयावयादिद्युमे
भ्यः ॥ येगव्यतामनसाशत्रुमादभुरभिप्रघ्नंतिधृष्णुया । अधस्मानोमघवन्निंद्रगिर्वणस्तनूपाऽअंतमोभव ॥ २८ ॥
अधस्मानोवृधेभवेंद्रनायमवायुधि । यदंतरिक्षेपतयंतिपर्णिनोदिद्यवस्तिग्ममूर्धानः ॥ यत्रशूरासस्तन्वोवितन्वतेप्रि
याशर्मपितॄणां । अधस्मायच्छतन्वेतनेचछर्दिरचित्तंयावयद्द्वेषः ॥ यदिंद्रसर्गेऽअर्वतश्चोदयासेमहाधने । असमने
ऽअध्वनिवृजिनेपथिश्येनाँऽइवश्रवस्यतः+ ॥ सिंधूँऽरिवप्रवणऽआशुयायतोयदिक्रोशमनुष्वणि । आयेवयोनवर्वृत
त्यामिषिगृभीताबाह्वोर्गवि ॥ २९ ॥ (६।४।४) स्वादुष्किलायंमधुमाँऽउतायंतीव्रःकिलायंरसवाँऽउतायं ।

(६।४।४) स्वादुष्किलायमित्येकत्रिंशदृचस्यसूक्तस्यभारद्वाजोगर्गइंद्रःआद्यानांपंचानांसोमोगव्यूतीत्यस्यादेवभूमींद्राःप्रस्तोकइत्यादि

उतोन्वं१स्यपपिवांसमिंद्रंनकश्चनसंहतऽआहवेषु ॥ अयंस्वादुरिहमदिष्ठऽआसयस्येंद्रोवृत्रहत्येममाद । पुरूणियश्च्यौ
त्नाशंबरस्यविनंवतिंनवंचदेह्योऽ३हन्+ ॥ अयंमेपीतऽउदियर्तिवाचमयंमनीषामुशतीमजीगः । अयंषळुर्वीरमिमी
तधीरोनयाभ्योभुवनंकच्चनारे+ ॥ अयंसयोवरिमाणंपृथिव्यावर्ष्माणंदिवोऽअकृणोदयंसः । अयंपीयूषंतिसृषुप्रव
त्सुसोमोदाधारोर्व१तरिक्षं ॥ अयंविदच्चित्रदृशीकमर्णःशुक्रसद्मनामुषसामनीके । अयंमहान्महतास्कंभनेनोद्या
मस्तभ्नाद्वृषभोमरुत्वान् ॥ ३० ॥ धृषत्पिबकलशेसोममिंद्रवृत्रहाशूरसमरेवसूनां । माध्यंदिनेसवनऽआवृष
स्वरयिस्थानोरयिमस्मासुधेहि ॥ इंद्रप्रणःपुरऽएतेवपश्यप्रनोनयप्रतरंवस्योऽअच्छ । भवासुपारोऽअतिपारयोनो
भवासुनीतिरुतवामनीतिः ॥ उरुंनोलोकमनुनेषिविद्वान्त्स्वर्वज्ज्योतिरभयंस्वस्ति । ऋष्वातऽइंद्रस्थविरस्यबाहूऽ
उपस्थेयामशरणाबृहंता ॥ वरिष्ठेनऽइंद्रवंधुरेधावहिष्ठयोःशतावन्नश्वयोरा । इषमावक्षीषांवर्षिष्ठांमानस्तारीन्मघव
न्रायोऽअर्यः+ ॥ इंद्रमृळमह्यंजीवातुमिच्छचोदयधियमयसोनधारां । यत्किंचाहंत्वायुरिदंवदामितज्जुषस्वकृधिमा
देववंतं ॥ ३१ ॥ त्रातारमिंद्रमवितारमिंद्रंहवेहवेसुहवंशूरमिंद्रं । ह्वयामिशक्रंपुरुहूतमिंद्रंस्वस्तिनोमघवाधात्विंद्रः ॥

चतसृणांप्रस्तोकोवनस्पतइत्यादितिसृणांरथउपश्वासयेतिद्वयोर्दुंदुभिःआयूरजइत्यस्यादुंदुभींद्रौत्रिष्टुप् एकोनविंशीबृहतीत्रयोविंश्यनुष्टुप्च
तुर्विंशीगायत्रीपंचविंशीद्विपदासप्तविंशीजगती ।

इंद्रःसुत्रामास्ववाँऽअवोभिःसुमृळीकोभवतुविश्ववेदाः । बाधतांद्वेषोऽअभयंकृणोतुसुवीर्यस्यपतयःस्याम ॥ तस्यव
यंसुमतौयज्ञियस्यापिभद्रेसौमनसेस्याम । ससुत्रामास्ववाँऽइंद्रोऽअस्मेऽआराच्चिद्द्वेषःसनुतर्युयोतु ॥ अवत्वेऽइंद्रप्र
वतोनोर्मिर्गिरोब्रह्माणिनियुतोधवंते । उरूनराधःसवनापुरूण्यपोगावज्रिन्युवसेसमिंदून् ॥ कऽईंस्तवत्कःपृणात्को
यजातेयदुग्रमिन्मघवाविश्वहावेत् । पादाविवप्रहरन्नन्यमन्यंकृणोतिपूर्वमपरंशचीभिः ॥ ३२ ॥ शृण्वेवीरऽउग्रमु
ग्रंदमायन्नन्यमन्यमतिनेनीयमानः । एधमानद्विळुभयस्यराजाचोष्कूयतेविशऽइंद्रोमनुष्यान्* ॥ परापूर्वेषांसख्या
वृणक्तिवितर्तुराणोऽअपरेभिरेति । अनानुभूतीरवधून्वानःपूर्वीरिंद्रःशरदस्तर्तरीति ॥ रूपंरूपंप्रतिरूपोबभूवतदस्य
रूपंप्रतिचक्षणाय । इंद्रोमायाभिःपुरुरूपऽईयतेयुक्ताह्यस्यहरयःशतादश ॥ युजानोहरितारथेभूरित्वष्टेहराजति ।
कोविश्वाहाद्विषतःपक्षऽआसतऽउतासीनेषुसूरिषु ॥ अगव्यूतिक्षेत्रमागन्मदेवाऽउर्वीसतीभूमिरंहूरणाभूत् । बृह
स्पतेप्रचिकित्सागविष्टावित्थासतेजरित्रऽइंद्रपंथां ॥ ३३ ॥ दिवेदिवेसदृशीरन्यमर्धंकृष्णाऽअसेधदपसद्मनोजाः ।
अहन्दासावृषभोवस्नयंतोदव्रजेवर्चिनंशंबरंच ॥ प्रस्तोकऽइन्नुराधसस्तऽइंद्रदशकोशयीर्दशवाजिनोदात् । दिवोदा
सादतिथिग्वस्यराधःशांबरंवसुप्रत्यग्रभीष्म ॥ दशाश्वान्दशकोशान्दशवस्त्राधिभोजना । दशोहिरण्यपिंडान्दिवो
दासादसानिषं ॥ दशरथान्प्रष्टिमतःशतंगाऽअथर्वभ्यः । अश्वथःपायवेदात् ॥ महिराधोविश्वजन्यंदधानान्भर

द्वा॑जान्त्सा॒र्ङ्ग्यो॒ऽअ॒भ्य॑यष्ट ॥ ३४ ॥ वन॑स्पतेवी॒डूँ॑गो॒हिभू॒याऽअ॒स्मत्स॑खाप्र॒तर॑णःसु॒वीर॑ः । गोभि॒ःसंन॑द्धोऽअसिवी॒ळ॑यस्वा॒स्था॒ता॑तेँजय॑तु॒जेत्वा॑नि ॥ दि॒वस्पृ॑थि॒व्याःपर्यो॑ज॒ऽउद्भृ॑तं॒वन॒स्पति॑भ्य॒ःपर्या॑भृ॑तं॒सह॑ः । अ॒पाम॒ोज्मानं॒परि॒गोभि॒रावृ॑त॒मिंद्र॑स्य॒वज्रँ॑ह॒विषा॒रथँ॑यज ॥ इंद्र॑स्य॒वज्रो॑म॒रुता॒मनी॑कंमि॒त्रस्य॒गर्भो॒वरु॑णस्य॒नाभि॑ः । सेमांनो॑ह॒व्यदा॑तिंजुषा॒णोदेव॑रथ॒प्रति॑ह॒व्यागृ॑भाय ॥ उप॑श्वासयपृथि॒वीमु॒तद्यांपु॑रु॒त्रातेँ॑मनु॒तांविष्ठि॑तं॒जग॑त् । सदुँ॑दुभेस॒जूरिँ॑द्रेणदे॒वैर्दू॒राद्दवी॑यो॒ऽअप॑सेध॒शत्रू॑न् ॥ आक्रँ॑दय॒बल॒मोजो॑न॒ऽआधा॒निष्टँ॑निहिदुरि॒ताबाध॑मानः । अप॑प्रोथदुंदुभेदु॒च्छुना॑ऽइ॒तऽइंद्र॑स्यमु॒ष्टिर॑सिवी॒ळय॑स्व ॥ आमूर॑जप्र॒त्याव॑र्तये॒माःकेँ॑तु॒मद्दुँ॑दु॒भिर्वा॑वदीति । सम॑श्वप॒र्णाश्चर॑न्तिनो॒नरो॒ऽस्माक॑मिंद्ररथि॒नो॑जयंतु ॥ ३५ ॥ इतिचतुर्थाष्टकेसप्तमोध्यायः ॥ ७ ॥ ॥ ॥ ॥

एकत्रिंशाध्यायेवर्गाः ३५ सूक्तानि १९ ऋचः १७६ ॥ त्यागः ॥ इंद्रायेदं. १२८ बृबवइ. तक्षणइ. ३ इंद्राये. १४ सोमाये. ५ इंद्राये. १४ देवभूमिबृहस्पतींद्रेभ्य. इंद्राये. प्रस्तोकाये. ४ रथाये. दुंदुभ्या. २ दुंदुभींद्राभ्या. ॥ इतिचतुर्थेसप्तमः ॥

यज्ञायज्ञाद्यधिका॑शंयुस्तृणपाणिकंपृश्निसूक्तंप्रगाथौबृहतीमहासतोबृहतींमहाबार्हतबार्हतौप्रगाथावित्याग्नेय्यः काकुभःप्रगाथःपुरउष्णिग्बृहत्यतिजगतीतिमारुत्यौंत्यास्तिस्रोवा॑सांलिंगोक्तदेवता॑ःकाकुभःप्रगाथःपुरउष्णिग्बृहतीतिपौष्ण्योंबृहतीमहाबृहतीयवमध्यौंत्यानुष्टुम्मारुत्यौंत्याद्यावाभूम्योर्वापृश्नेर्वास्तुषेपंचोनऋजिश्वा

हवैश्वदेवंहशक्रयँतंहुवेवउदुत्यत्षोळशंत्र्युष्णिगनुष्टुबंतँनतंत्र्यूनांसप्तम्याद्याःषड्गायत्र्यंश्चतुर्दशीजगतीसुहोत्रादयोनुक्तगोत्रांभारद्वाजाःपौत्रांबृहस्पतेदौँषंतेर्वाभरतस्यंवयंदशपौष्णंतद्गायत्रंवैयांपूषन्ननुष्टुप्सँपूषन्नेहिवांषड्यंएनमंत्यानुष्टुबिंद्राग्वैंद्रंचंशुक्रंचतुष्कंद्वितीयाजगतींप्रनुदशैंद्राग्नंतुबार्हतंचतुरनुष्टुबंतंश्चथत्पंचोनागायत्रंतुत्रित्रिष्टुबादिंत्रिष्टुब्बृहत्यनुष्टुबंतंमियंषळूनासारस्वतंत्रिजगत्यादिंजगतीत्रिष्टुबंतं ॥ १ ॥ ॥ ॥

॥ हरिःओम् ॥ (६।४।५) य॒ज्ञाय॑ज्ञावोऽअ॒ग्नये॑गि॒रागि॑राच॒दक्ष॑से । प्रप्र॑व॒यम॒मृतं॑जा॒तवे॑दसंप्रि॒यंमि॒त्रंनशं॑सिषं ॥ ऊ॒र्जोनपा॑तं॒सहि॒नाय॑म॒स्म॒युर्दाशे॑मह॒व्यदा॑तये । भुव॒द्वाजे॑ष्ववि॒ताभुव॑द्वृ॒धऽउ॒तत्रा॒तात॒नूनाँ ॥ वृषा॒ह्य॑ग्नेऽअ॒जरो॑म॒हान्वि॒भास्य॒र्चिषा॑ । अज॑स्रेणशो॒चिषा॒शोशु॑चच्छुचेसुदी॒तिभिः॒सुदी॑दिहि ॥ म॒होदे॒वान्यज॑सि॒यक्ष्या॑नु॒षक्तव॒क्रत्वो॒तदं॒सना॑ । अ॒र्वाचः॑सीं॒कृणुह्य॒ग्नेवसे॑रास्व॒वाजो॒तवं॑स्व ॥ यमापो॒ऽअद्र॑यो॒वना॒गर्भ॑मृ॒तस्य॒पिप्र॑ति । सह॑सा॒योम॑थि॒तोजाय॑ते॒नृभिः॑पृथि॒व्याऽअधि॒सान॑वि ॥ १ ॥ आयः॑प॒प्रौभा॒नुना॒रोद॑सीऽउ॒भेधू॒मेन॑धावतेदि॒वि । ति॒रस्तमो॑ददृश॒ऽऊर्म्या॒स्वा

(६।४।५) यज्ञायज्ञावइतिद्वाविंशत्यृचस्यसूक्तस्यबार्हस्पत्यःशंयुः आद्यानांदशानामग्निरेकादश्यादिपंचानांमरुतस्ततश्चतुर्णांपूषाततस्त्र्यृचस्यमरुतः (त्रयोदश्यादितिसृणामिंद्रार्यमपूषविष्णवाद्यालिंगोक्तदेवतावाअंत्ययोर्द्यावाभूमीवापृश्निर्वा) आद्याबृहतीद्वितीयासतोबृहतीतृतीयाबृहतीचतुर्थीसतोबृहतीपंचमीबृहतीषष्ठीमहासतोबृहतीसप्तमीमहाबृहतीअष्टमीमहासतोबृहतीनवमीबृहतीदशमीसतोबृहती

श्या॒वास्वं॑रु॒षोवृ॑षा॑श्या॒वाऽअं॑रु॒षोवृ॑षा॑ ॥ बृ॒हद्भि॑रग्नेऽअ॒र्चिभिः॑शु॒क्रेण॑देव॒शो॒चिषा॑ । भ॒रद्वा॑जेसमि॒धा॒नोय॑विष्ठ्यरे॒वन्नः॑ शुक्रदीदिहिद्यु॒मत्पा॑वकदीदिहि ॥ विश्वा॑सांगृ॒हप॑ति॒र्वि॒शाम॑सि॒त्वम॑ग्ने॒मानु॑षीणां । श॒तंपू॒र्भिर्य॑विष्ठपा॒ह्यंह॑सःसमे॒द्धारं॑ श॒तंहिमाः॑स्तो॒तृभ्यो॒येच॒दद॑ति ॥ त्वंन॑श्चि॒त्रऽऊ॒त्यावसो॒राधां॑सिचोदय । अ॒स्यरा॒यस्त्वम॑ग्नेर॒थीर॑सिवि॒दागा॒धंतु॒चेतु नः॑ ॥ पर्षि॑तो॒कंतन॑यंप॒र्तृभि॒ष्ट्वमद॑ब्धै॒रप्र॑युत्वभिः । अग्ने॒हेळां॑सि॒दैव्या॑युयो॒धि॒नोदे॑वा॒नि॒ह्वरां॑सिच ॥ २ ॥ आस॑खायः सब॒र्दुघां॑धे॒नुम॑जध्व॒मुप॒नव्य॑सा॒वचः॑ । सृ॒जध्व॒मन॑पस्फुरां ॥ याशर्धा॑य॒मारु॑ताय॒स्वभा॑नवे॒श्रवोमृ॑त्यु॒धुक्ष॑त । यामृ॑ळी॒केम॒रुतां॑तु॒रा॒णांयासु॒म्नैरे॑व॒याव॑री ॥ भ॒रद्वा॑जा॒याव॑धुक्षत॒द्विता । धे॒नुंच॑वि॒श्वदो॑हस॒मिषं॑चवि॒श्वभो॑जसं ॥ तंव॒ऽइंद्रं॒नसु क्रतुं॒वरु॑णमिवमा॒यिनं॑ । अ॒र्य॒मणं॒नमं॒द्रंसृ॒प्रभो॑जसं॒विष्णुं॒नस्तु॒षऽआ॒दिशे॑ ॥ त्वे॒षंशर्धो॒नमारु॑तंतुवि॒ष्वण्य॑न॒र्वाणं॑पू॒षणं॒ संयथा॑श॒ता । संस॒हस्रा॒कारि॑षच्चर्ष॒णिभ्य॒ऽआँऽआ॒विर्गू॒ळ्हावसू॑करत्सु॒वेदा॑नो॒वसू॑करत् ॥ आमा॑पूष॒न्नुप॑द्रव॒शंसि॑ष॒न्नुते॑ऽ अपिक॒र्णऽआ॑घृणे । अ॒घाऽअ॒र्यो॑ऽअरा॑तयः ॥ ३ ॥ माका॑कं॒बीर॒मुद्वृ॑हो॒वन॒स्पति॒मश॑स्ती॒र्वि॑हि॒नीन॑शः । मोतसू॑रो॒ऽ अह॑ए॒वाच॒नग्री॒वाऽआ॒दध॑ते॒वेः+ ॥ इ॒तैरि॑वतेवृ॒क॑मस्तु॒सख्यं॑ । अच्छि॑द्रस्यदध॒न्वतः॒सुपू॑र्णस्यदध॒न्वतः॑ ॥ पु॒रोहि॑म

एकादशीककुप्द्वादशीसतोबृहतीत्रयोदशीपुरउष्णिक्चतुर्दशीबृहतीपंचदश्यतिजगतीषोडशीककुप्सप्तदशीसतोबृहतीअष्टादशीपुरउष्णिक् एकोनविंशीबृहतीविंशीबृहतीएकविंशीमहाबृहतीयवमध्याद्वाविंश्यनुष्टुप् । (पृश्निसूक्तमिदंतृणपाणिकंच) ।

त्यैरसिसमोदेवैरुतश्रिया । अभिख्यःपूषन्पृतनासुनस्त्वमवानूनंयथापुरा+ ॥ वामीवामस्यधूतयःप्रणीतिरस्तुसूनृता । देवस्यवामरुतोमर्त्यस्यवेजानस्यप्रयज्यवः ॥ सद्यश्चिद्यस्यचर्कृतिःपरिद्यांदेवोनैतिसूर्यः । त्वेषंशवोदधिरेनामयज्ञियंमरुतोवृत्रहंशवोज्येष्ठंवृत्रहंशवः ॥ सकृद्धद्यौरजायतसकृद्भूमिरजायत । पृश्न्यादुग्धंसकृत्पयस्तदन्योनानुजायते ॥ ४ ॥ (परिशिष्टं । सूक्तांतेतृणान्यग्नावरण्यैवोदकेपिवा । यत्स्तृणैरध्ययनंतदधीतंस्तृणानिभवतेभवं ॥ वापीकूपतडागानांसमुद्रंगच्छस्वाहा ॥) (६।४।६) स्तुषेजनंसुव्रतंनव्यसीभिर्गीर्भिर्मित्रावरुणासुम्नयंता । तऽआगमंतुतइहश्रुवंतुसुक्षत्रासोवरुणोमित्रोऽअग्निः+ ॥ विशोविशईड्यमध्वरेष्वदृप्तक्रतुमरतिंयुवत्योः । दिवःशिशुंसहसःसूनुमग्निंयज्ञस्यकेतुमरुषंयजध्यै ॥ अरुषस्यदुहितराविरूपेस्तृभिरन्यापिपिशेसूरोऽअन्या । मिथस्तुराविचरंतीपावकेमन्मश्रुतंनक्षतऽऋच्यमाने ॥ प्रवायुमच्छाबृहतीमनीषाबृहद्रयिंविश्ववारंरथप्रां । द्युतद्यामानियुतःपत्यमानःकविःकविमियक्षसिप्रयज्यो ॥ समेवपुश्छदयदश्विनोर्योरथोविरुक्मान्मनसायुजानः । येननरानासत्येषयध्यैवर्तिर्याथस्तनयायत्मनेच ॥ ५ ॥ पर्जन्यवातावृषभापृथिव्याःपुरीषाणिजिन्वतमप्यानि । सत्यश्रुतःकवयोयस्यगीर्भिर्ज

(६।४।६) स्तुषेजनमितिपंचदशर्चस्यसूक्तस्यभरद्वाजऋजिश्वाविश्वेदेवास्त्रिष्टुबंत्याशक्करी (इतश्चत्वारिवैश्व. । भेदपक्षे–विश्वेदेवाः १ अग्निः १ अहोरात्रे १ वायुः १ अश्विनौ १ विश्वेदेवाः १ सरस्वती १ पूषा १ अग्नित्वष्टारौ १ रुद्रः १ मरुतः २ विष्णुः १ विश्वेदेवाः २ एवं १५)

गंतःस्थातुर्जगदाकृणुध्वं ॥ पावीरवीकन्याचित्रायुःसरस्वतीवीरपत्नीधियंधात् । ग्नाभिरच्छिद्रंशरणंसजोषादुराधर्षंगृणतेशर्मयंसत् ॥ पथस्पथःपरिपतिंवचस्याकामेनकृतोऽअभ्यानळर्कं । सनोरासच्छुरुधश्चंद्राग्राधियंधियंसीषधातिप्रपूषा+ ॥ प्रथमभाजंयशसंवयोधांसुपाणिंदेवंसुगभस्तिमृभ्वं । होतायक्षद्यजतंपस्त्यानामग्निस्त्वष्टारंसुहवंविभावा ॥ भुवनस्यपितरंगीर्भिराभीरुद्रंदिवावर्धयारुद्रमक्तौ । वृहंतऽमृष्वमजरंसुषुम्नमृधग्घुवेमकविनेषितासः ॥ ६ ॥ आयुवानःकवयोयज्ञियासोमरुतोगंतगृणतोवरस्यां । अचित्रंचिद्धिजिन्वथावृधंतऽइत्थानक्षंतोनरोऽअंगिरस्वत्+ ॥ प्रवीरायप्रतवसेतुरायाजायूथेवपशुरक्षिरस्तं । सपिस्पृशतितन्विश्रुतस्यस्तृभिर्ननाकंवचनस्यविपः ॥ योरजांसिविममेपार्थिवानित्रिश्चिद्विष्णुर्मनवेबाधिताय । तस्यतेशर्मन्नुपदद्यमानेरायामदेमतन्वा३ तनाच ॥ तन्नोहिर्बुध्न्योऽअद्भिरर्कैस्तत्पर्वतस्तत्सविताचनोधात् । तदोषधीभिरभिरातिषाचोभगःपुरंधिर्जिन्वतुप्रराये+ ॥ नूनोरयिंरथ्यंचर्षणिप्रांपुरुवीरंमहऽऋतस्यगोपां । क्षयंदाताजरंयेनजनान्त्स्पृधोऽअदेवीरभिचक्रमामविशऽआदेवीरभ्य३श्नवाम ॥ ७ ॥ (६।५।१) हुवेवोदेवीमदितिंनमोभिर्मृळीकायवरुणंमित्रमग्निं । अभिक्षदामर्यमणंसुशेवंत्रातॄन्देवान्त्सवितारंभगं

(६।५।१) हुवेवइतिपंचदशर्चस्यसूक्तस्यऋजिश्वाविश्वेदेवास्त्रिष्टुप् (भेदपक्षे–विश्वे. १ सूर्यः १ द्यावापृथिवी १ मरुतः २ इंद्रः १ अपः १ सविता १ अग्निः १ अश्विनौ १ विश्वे०५ एवं १५) ।

च ॥ सुज्योतिषःसूर्यंदक्षपितृननागास्त्वेसुमहोवीहिदेवान् । द्विजन्मानोयऽऋतसापःसत्याःस्वर्वंतोयजताऽअग्निजिह्वाः+ ॥ उतद्यावापृथिवीक्षत्रमुरुबृहद्रोदसीशरणंसुषुम्ने । महस्करथोवरिवोयथानोस्मेक्षयायधिषणेऽअनेहः+ ॥ आनोरुद्रस्यंसूनवोनमंतामद्याहूतासोवसवोधृष्टाः । यदीमर्भेंमहतिवाहितासोबाधेमरुतोऽअह्वामदेवान्+ ॥ मिम्यक्षयेषुंरोदसीनुदेवीसिषक्तिपूषाऽअभ्यर्धयज्वा । श्रुत्वाहवंमरुतोयद्धयाथभूमारेजंतेऽअध्वनिप्रविक्ते ॥ ८ ॥ अभित्वंवीरंगिर्वणसमर्चेंद्रंब्रह्मणाजरितर्नवेन । श्रवदिद्धवमुपचस्तवानोरासद्वाजाँऽउपमहोगृणानः+ ॥ ओमानमापोमानुषीरमृक्तंधाततोकायतनयायशंयोः । यूयंहिष्ठाभिषजोमातृतमाविश्वस्यस्थातुर्जगतोजनित्रीः ॥ आनोदेवःसवितात्रायमाणोहिरण्यपाणिर्यजतोजगम्यात् । योदत्रवाँऽउषसोनप्रतीकंव्यूर्णुतेदाशुषेवार्याणि ॥ उतत्वंसूनोसहसोनोऽअद्यादेवाँऽअस्मिन्नध्वरेववृत्याः । स्यामहंतेसदमिद्रातौतवस्यामग्नेवसासुवीरः ॥ उतत्यामेहवमाजग्म्याततंनासंत्याधीभिर्युवमंगविप्रा । अत्रिंनमहस्तमसोमुमुक्तंतूर्वतंनरादुरितादभीके ॥ ९ ॥ तेनोरायोद्युमतोवाजवतोदातारोभूतनृवतःपुरुक्षोः । दशस्यंतोदिव्याःपार्थिवासोगोजाताऽअप्यामृळताचदेवाः ॥ तेनोरुद्रःसरस्वतीसजोषामीह्ळुष्मंतोविष्णुर्मृळंतुवायुः । ऋभुक्षावाजोदैव्योविधातापर्जन्यावातापिप्यतामिषंनः ॥ उतस्यदेवःसविताभगोनोपांनपादवतुदानुपप्रिः । त्वष्टादेवेभिर्जनिभिःसजोषाद्यौर्देवेभिःपृथिवीसमुद्रैः+ ॥ उतनोहिर्बुध्न्यःशृणोत्वजऽएकपात्पृ

थिवीसंमुद्रः । विश्वेदेवाऽऋतावृधोहुवानास्तुतामन्त्राःकविशस्ताऽअवन्तु ॥ एवानपातोममतस्यंधीभिर्भरद्वाजाऽअभ्यर्चंत्यर्कैः । ग्नाहुतासोवसवोधृष्टाविश्वेस्तुतासोभूतायजत्राः ॥१०॥ (६।५।२) उदुत्यच्चक्षुर्महिमित्रयोराँऽएतिप्रियंवरुणयोरदब्धं । ऋतस्यशुचिदर्शतमनीकंरुक्मोनदिवऽउदिताव्यद्यौत् ॥ वेदयस्त्रीणिविदथान्येषांदेवानांजन्मसनुतराचविप्रः । ऋजुमर्तेषुवृजिनाचपश्यन्नभिचष्टेसूरोअर्यऽएवान् ॥ स्तुषऽउवोमहऽऋतस्यगोपानदितिंमित्रंवरुणंसुजातान् । अर्यमणंभगमदब्धधीतीनच्छावोचेसधन्यःपावकान्+ ॥ रिशादसःसत्पतीँऽरदब्धान्महोराज्ञःसुवसनस्यदातॄन् । यूनःसुक्षत्रान्क्षयतोदिवोनॄनादित्यान्याम्यदितिंदुवोयु+ ॥ द्यौ३ष्पितःपृथिविमातरध्रुगग्नेभ्रातर्वसवोमृळतानः । विश्वऽआदित्याऽअदितेसजोषाऽअस्मभ्यंशर्मबहुलंवियंत ॥ ११ ॥ मानोवृकायवृक्येसमस्माऽअघायतेरीरधतायजत्राः । यूयंहिष्ठारथ्योनस्तनूनांयूयंदक्षस्यवचसोबभूव+ ॥ मावएनोऽअन्यकृतंभुजेममातत्कर्मवसवोयच्चयध्वे । विश्वस्यहिक्षयथविश्वदेवाःस्वयंरिपुस्तन्वंरीरिषीष्ट ॥ नमऽइदुग्रंनमऽआविवासेनमोदाधारपृथिवीमुतद्यां । नमोदेवेभ्योनमऽईशऽएषांकृतंचिदेनोनमसाविवासे ॥ ऋतस्यवोरथ्यःपूतदक्षानृतस्यपस्त्यसदोऽअदब्धान् ।

(६।५।२) उदुत्यदितिषोळशर्चस्यसूक्तस्यऋजिश्वाविश्वेदेवास्त्रिष्टुप्त्रयोदश्याद्यास्तिस्रउष्णिहोंत्यानुष्टुप् (भेदपक्षे—सूर्यः २ विश्वेदेवाः १० अग्निः १ सोमः १ विश्वेदेवाः २ एवं १६)।

ताँऽआनमोभिरुरुचक्षसोनृन्विश्वान्वऽआनमेमहोयजत्राः ॥ तेहिश्रेष्ठवर्चसस्तऽउंनस्तिरोविश्वानिदुरितानयँति ।
सुक्षत्रासोवरुणोमित्रोऽअग्निर्ऋतधीतयोवक्मराजसत्याः ॥ १२॥ तेनऽइंद्रःपृथिवीक्षामवर्धन्पूषाभगोऽअदितिःपंच
जनाः । सुशर्माणःस्ववसःसुनीथाभवँतुनःसुत्रात्रासःसुगोपाः+ ॥ नूसद्मानंदिव्यंनंशिदेवाभारद्वाजःसुमतिंयातिहो
ता । आसानेभिर्यजमानोमियेधैर्देवानांजन्मवसूयुर्ववंद ॥ अपत्यंवृजिनंरिपुंस्तेनमग्नेदुराध्यँ । दविष्ठमस्यसत्पतेकृ
धीसुगं+ ॥ ग्रावाणःसोमनोहिकँसखित्वनायवावशुः । जहीन्य१त्रिणँपणिंवृकोहिषः+ ॥ यूयंहिष्ठासुदानवऽइंद्रज्ये
ष्ठाऽअभिद्यवः । कर्ताँनोऽअध्वन्नासुगंगोपाऽअमा+ ॥ अपिपंथामगन्महिस्वस्तिगामनेहसँ । येनविश्वाःपरिद्विषो
वृणक्तिविंदतेवसु ॥ १३ ॥ (६।५।३) नतद्दिवानपृथिव्यानुमन्येनयज्ञेननोतशमीभिराभिः । उब्जंतुतंसुभ्व१:प
र्वतासोनिहीयतामतियाजस्ययष्टा+ ॥ अतिवायोमरुतोमन्यतेनोब्रह्मवायःक्रियमाणंनिनित्सात् । तपूँषितस्मैवृजि
नानिसंतुब्रह्मद्विषमभितंशोचतुद्यौः+ ॥ किमंगत्वाब्रह्मणःसोमगोपांकिमंगत्वाहुरभिशस्तिपांनः । किमंगनःपश्यसि
निद्यमानान्ब्रह्मद्विषेतपुषिंहेतिमस्य ॥ अवँतुमामुषसोजायमानाऽअवँतुमासिंधवःपिन्वमानाः । अवँतुमापर्वतासो

(६।५।३) नतद्दिवेतिसप्तदशर्चस्यसूक्तस्यभारद्वाजऋजिश्वाविश्वेदेवास्त्रिष्टुप्सप्तम्याद्याःषड्गायत्र्यश्चतुर्दशीजगती (भेदपक्षे–विश्वे देवाः २ सोमः १ विश्वे० ८ अग्निः १ विश्वे० ३ अग्निपर्जन्यौ १ विश्वे० १ एवं १७)।

ध्रुवासोवँतुमापितरौदेवहूतौ ॥ विश्वदानींसुमनसःस्यामपश्येमनुसूर्यमुच्चरंतं । तथाकरद्वसुपतिर्वसूनांदेवाँऽओहानोवसागमिष्ठः ॥ १४ ॥ इंद्रोनेदिष्ठमवसागमिष्ठःसरस्वतीसिंधुभिःपिन्वमाना । पर्जन्योनऽओषधीभिर्मयोभुरग्निःसुशंसःसुहवःपितेव ॥ विश्वेदेवासऽआगतशृणुतामऽइमंहवं । एदंबर्हिर्निषीदत ॥ योवोदेवाघृतस्नुनाहव्येनप्रतिभूषति । तंविश्वऽउपगच्छथ ॥ उपनःसूनवोगिरःशृण्वंत्वमृतस्यये । सुमृळीकाभवंतुनः ॥ विश्वेदेवाऽऋतावृधऽऋतुभिर्हवनश्रुतः । जुषंतांयुज्यंपयः ॥ १५ ॥ स्तोत्रमिंद्रोमरुद्गणस्त्वष्टृमान्मित्रोऽअर्यमा । इमाहव्याजुषंतनः ॥ इमंनोऽअग्नेऽअध्वरंहोतर्वयुनशोयज । चिकित्वान्दैव्यंजनं ॥ विश्वेदेवाःशृणुतेमंहवंमेयेऽअंतरिक्षेयऽउपद्यविष्ठ । येऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन्बर्हिषिमादयध्वं ॥ विश्वेदेवाममशृण्वंतुयज्ञियाऽउभेरोदसीऽअपांनपाच्चमन्म । मावोवचाँसिपरिचक्ष्याणिवोचंसुम्नेष्विद्वोऽअंतमामदेम ॥ येकेचज्मामहिनोऽअहिमायादिवोजज्ञिरेऽअपांसधस्थे । तेऽअस्मभ्यमिषयेविश्वमायुःक्षपऽउस्रावरिवस्यंतुदेवाः ॥ अग्नीपर्जन्याववतंधियंमेस्मिन्हवेसुहवासुष्टुतिंनः । इळामन्योजनयद्गर्भमन्यःप्रजावतीरिषऽआधत्तमस्मे+ ॥ स्तीर्णेबर्हिषिसमिधानेऽअग्नौसूक्तेनमहानमसाविवासे । अस्मिन्नोऽअद्यविदथेयजत्राविश्वेदेवाहविषिमादयध्वं ॥ १६ ॥ (६।५।४) वयमुत्वापथस्पतेरथंनवाजसातये ।

(६।५।४) वयमुत्वेतिदशर्चस्यसूक्तस्यभरद्वाजःपूषागायत्रीअष्टम्यनुष्टुप् ।

धियेपूषन्नयुज्महि ॥ अभिनोनर्यंवसुवीरंप्रयतदक्षिणं । वामंगृहपतिंनय ॥ आदित्संतंचिदाघृणेपूषन्दानायचोदय । पणेश्चिद्विम्रदामनः ॥ विपथोवाजसातयेचिनुहिविमृधोजहि । साधंतामुग्रनोधियः ॥ परितृंधिपणीनामारंयाहृदयाकवे । अथेमस्मभ्यंरंधय ॥ १७ ॥ विपूषन्नारयातुदपणेरिच्छहृदिप्रियं । अथे० ॥ आरिखकिकिराकृणुपणीनांहृदयाकवे । अथे० ॥ यांपूषन्ब्रह्मचोदनीमारांबिभर्ष्याघृणे । तयासमस्यहृदयमारिखकिकिराकृणु ॥ यातेऽअष्ट्रागोऽओपशाघृणेपशुसाधनी । तस्यास्तेसुम्नमीमहे ॥ उतनोगोषणिंधियमश्वसांवाजसामुत । नृवत्कृणुहिवीतये ॥ १८ ॥ (६।२।५) संपूषन्विदुषानययोऽअंजसानुशासति । यऽएवेदमितिब्रवत् ॥ समुपूष्णागमेमहियोगृहाँऽअभिशासति । इमऽएवेतिचब्रवत् ॥ पूष्णश्चक्रंनरिष्यतिनकोशोवपद्यते । नोऽअस्यव्यथतेपविः+ ॥ योऽअस्मैहविषाविधन्नतंपूषापिमृष्यते । प्रथमोविंदतेवसु ॥ पूषागाऽअन्वेतुनःपूषारक्षत्वर्वतः । पूषावाजंसनोतुनः ॥ १९ ॥ पूषन्ननुप्रगाऽइहियजमानस्यसुन्वतः । अस्माकंस्तुवतामुत+ ॥ माकिर्नेशन्माकींरिषन्माकींसंशारिकेवटे । अथारिष्टाभिरागहि ॥ शृण्वंतंपूषणंवयमिर्यमनष्टवेदसं । ईशानंरायऽईमहे ॥ पूषन्तवव्रतेवयंनरिष्येमकदाचन । स्तोतारस्तऽइहस्मसि ॥ परिपूषापरस्ताद्धस्तंदधातुदक्षिणं । पुनर्नोनष्टमाजतु ॥ २० ॥ (६।५।६) एहिवांविमुचोनपा

(६।५।५) संपूषन्नितिदशर्चस्यसूक्तस्यभरद्वाजःपूषागायत्री । (६।५।६) एहिवामितिषळर्चस्यसूक्तस्यभरद्वाजःपूषागायत्री ।

दाघृणेसंसचावहै । रथीऋतस्यनोभव ॥ रथीतमंकपर्दिनमीशानंराधसोमहः । रायःसखायमीमहे ॥ रायोधारा
स्याघृणेवसोराशिरजाश्व । धीवतोधीवतःसखा ॥ पूषणंन्व१जाश्वमुपस्तोषामवाजिनं । स्वसुर्योजारउच्यते ॥
मातुर्दिधिषुमब्रवंस्वसुर्जारःशृणोतुनः । भ्रातेंद्रस्यसखामम ॥ आजासःपूषणंरथेनिशृंभास्तेजनश्रियं । देवंवहंतुवि
भ्रतः॥२१॥(६।५।७)यऽएनमादिदेशतिकरंभादितिपूषणं।नतेनदेवऽआदिशे॥उतघासरथीतमःसख्यासत्पतिर्युजा।
इंद्रोवृत्राणिजिघ्नते ॥ उतादःपरुषेगविसूरश्चक्रंहिरण्ययं । न्यैरयद्रथीतमः ॥ यदद्यत्वापुरुष्टुतब्रवामदस्रमंतुमः ।
तत्सुनोमन्मसाधय ॥ इमंचनोगवेषणंसातयेसीषधोगणं । आरात्पूषन्नसिश्रुतः+ ॥ आतेस्वस्तिमीमहऽआरेऽअघा
मुपावसुं । अद्याचसर्वतातयेश्वश्चसर्वतातये ॥ २२ ॥ (६।५।८) इंद्रानुपूषणावयंसख्यायस्वस्तये । हुवेमवाजसा
तये ॥ सोममन्यऽउपासदत्पातवेचम्वोःसुतं । करंभमन्यऽइच्छति ॥ अजाऽअन्यस्यवह्नयोहरीऽअन्यस्यसंभृता ।
ताभ्यांवृत्राणिजिघ्नते ॥ यदिंद्रोऽअनयद्रितोमहीरपोवृषन्तमः । तत्रपूषाभवत्सचा ॥ तांपूष्णःसुमतिंवयंवृक्षस्यप्रव
यामिव । इंद्रस्यचारभामहे ॥ उत्पूषणंयुवामहेभीशूँऽरिवसारथिः । मह्याइंद्रंस्वस्तये ॥ २३ ॥ (६।५।९) शुक्रं

(६।५।७) यएनमितिषळर्चस्यसूक्तस्यभरद्वाजःपूषागायत्रीअंत्यानुष्टुप् । (६।५।८) इंद्रान्वितिषळर्चस्यसूक्तस्यभरद्वाजइंद्रापूषणौ गायत्री । (६।५।९) शुक्रंतइतिचतुर्ऋचस्यसूक्तस्यभरद्वाजःपूषात्रिष्टुब्द्वितीयाजगती ।

ते॑ऽअ॒न्यद्य॑ज॒तंते॑ऽअ॒न्यद्विषु॑रूपे॒ऽअह॑नी॒द्यौरि॑वासि । विश्वा॒हिमा॒याऽअव॑सिस्वधावोभ॒द्राते॑पूषन्नि॒हरा॒तिर॑स्तु ॥ अ॒जाश्वः॑पशु॒पावाज॑पस्त्योधियंजि॒न्वोभुव॑ने॒विश्वे॒ऽअर्पि॑तः । अष्ट्रां॑पू॒षाशि॑थि॒रामु॒द्वरी॑वृजत्सं॒चक्षा॑णो॒भुव॑नादे॒वऽई॑यते॥ यास्ते॑पूष॒न्नावो॑ऽअं॒तःस॑मु॒द्रेहि॑र॒ण्ययी॑रं॒तरि॑क्षे॒चरं॑ति । ताभि॑र्यासिदू॒त्यांसूर्य॑स्य॒कामे॑नकृत॒श्रव॑ऽइ॒च्छमा॑नः ॥ पू॒षासु॒बंधु॑र्दि॒वऽआपृ॑थि॒व्याऽइ॒ळस्पति॑र्म॒घवा॑द॒स्मव॑र्चाः । यंदे॒वासो॒ऽअद॑दुःसू॒र्यायै॒कामे॑नकृ॒तंत॒वसं॒स्वंचं॑ ॥ २४ ॥(६।५।१०)

प्रनुवो॑चासु॒तेषु॑वांवी॒र्या॒३यानि॑च॒क्रथुः॑ । ह॒तासो॑वांपि॒तरो॑दे॒वश॑त्रव॒ऽइंद्रा॑ग्नी॒जीव॑थोयु॒वं+ ॥ ब॒ळित्थाम॑हि॒मावा॒मिंद्रा॑ग्नी॒पनि॑ष्ठ॒ऽआ । स॒मा॒नोवां॑जनि॒ताभ्रात॑रायु॒वंय॒मावि॒हेह॑मातरा ॥ ओ॒कि॒वांसा॑सु॒तेस॒चाँऽअश्वा॒सप्ती॑ऽइ॒वाद॑ने । इं द्रा॒न्व॑१॒ग्नीऽअव॑से॒हव॒ज्रिणा॑व॒यंदे॒वाह॑वामहे ॥ यऽइं॑द्राग्नीसु॒तेषु॑वां॒स्तव॒त्तेष्वृ॑तावृधा । जो॒ष॒वा॒कंव॑दतःपज्रहोषिणा॒न दे॑वाभ॒सथ॑श्च॒न+ ॥ इंद्रा॑ग्नी॒कोऽअ॒स्यवां॒दे॑वौ॒मर्त॑श्चिकेतति । विषू॑चो॒ऽअश्वा॑न्युयुजा॒नऽई॑यत॒ऽएकः॑समा॒नऽआरथे॑ ॥ २५ ॥ इंद्रा॑ग्नीऽअ॒पादि॒यंपूर्वा॑गात्प॒द्वती॑भ्यः । हि॒त्वीशिरो॑जि॒ह्वया॒वाव॑द॒च्चर॑त्त्रिं॒शत्प॒दान्य॑क्रमीत् ॥ इंद्रा॑ग्नी॒ऽआ हित॑न्व॒तेन॒रोधन्वा॑निबा॒ह्वोः । मानो॑ऽअ॒स्मिन्म॑हाध॒नेपरा॑वर्क्तं॒गवि॑ष्टिषु ॥ इंद्रा॑ग्नी॒तपं॑तिमा॒घाऽअ॒र्यो॑ऽअरा॑तयः । अप॒द्वेषां॒स्याकृ॑तंयुयु॒तंसूर्या॒दधि॑ ॥ इंद्रा॑ग्नीयु॒वोरपि॒वसु॑दि॒व्यानि॒पार्थि॑वा । आन॑ऽइ॒हप्रय॑च्छतंर॒यिंवि॒श्वायु॑पोषसं ॥

(६।५।१०) प्रनुवोचेतिदशर्चस्यसूक्तस्यभरद्वाजइंद्राग्नीबृहतीअंत्याश्चतस्रोनुष्टुभः ।

इंद्राग्नीऽउक्थवाहसास्तोमेभिर्हवनश्रुता । विश्वाभिर्गीर्भिरागतमस्यसोमस्यपीतये ॥ २६ ॥ (६।५।११) श्नथद्वृ
त्रमुतसंनोतिवाजमिंद्रायोऽअग्नीसहुरीसपर्यात् । इरज्यंतावसव्यस्यभूरेःसहस्तमासहसावाजयंता ॥ तायोधिष्टम
भिगाऽइंद्रनूनमपःस्वरुषसोऽअग्नऽऊळ्हाः । दिशःस्वरुषसऽइंद्रचित्राऽअपोगाऽअग्नेयुवसेनियुत्वान् ॥ आवृत्रहणा
वृत्रहभिःशुष्मैरिंद्रयातंनमोभिरग्नेऽअर्वाक् । युवंराधोभिरकवेभिरिंद्राग्नेऽअस्मेभवतमुत्तमेभिः ॥ ताहुवेययोरिदंप
प्नेविश्वंपुराकृतं । इंद्राग्नीनमर्धतः ॥ उग्राविघनिनामृधऽइंद्राग्नीहवामहे । तानोमृळातऽईदृशे ॥ २७ ॥ हतोवृत्रा
ण्यार्याहतोदासानिसत्पती । हतोविश्वाऽअपद्विषः ॥ इंद्राग्नीयुवामिमे३भिस्तोमाऽअनूषत । पिबतंशंभुवासुतं ॥
यावांसंतिपुरुस्पृहोनियुतोदाशुषेनरा । इंद्राग्नीताभिरागतं ॥ ताभिरागच्छतंनरोपेदंसवनंसुतं । इंद्राग्नीसोमपीत
ये ॥ तमीळिष्वयोऽअर्चिषावनाविश्वापरिष्वजत् । कृष्णाकृणोतिजिह्वया ॥ २८ ॥ यऽइद्धऽआविवासतिसुम्नमिं
द्रस्यमर्त्यः । द्युम्नायसुतराऽअपः+ ॥ तानोवाजवतीरिषऽआशून्पिपृतमर्वतः । इंद्रमग्निंचवोळ्हवे ॥ उभावामिंद्रा
ग्नीऽआहुवध्याऽउभाराधसःसहमादयध्यै । उभादाताराविषांरयीणामुभावाजस्यसातयेहुवेवां ॥ आनोगव्येभिर
श्व्यैर्वसव्यै३रुपगच्छतं । सखायौदेवौसख्यायशंभुवेंद्राग्नीताहवामहे ॥ इंद्राग्नीशृणुतंहवंयजमानस्यसुन्वतः । वीतं

(६।५।११) श्नथद्वृत्रमितिपंचदशर्चस्यसूक्तस्यभरद्वाजइंद्राग्नीगायत्रीआद्यास्तिस्रस्त्रयोदशीचत्रिष्टुभःचतुर्दशीबृहत्यंत्यानुष्टुप् ।

ह॒व्यान्याग॑तं॒पिब॑तंसो॒म्यंमधु॑ ॥ २९ ॥ (६।५।१२) इ॒यम॑ददाद्रभ॒समृ॑ण॒च्युतं॒दिवो॑दासंवध्र्य॒श्वाय॑दा॒शुषे॑ । याशश्वं॑तमाच॒खादा॑व॒संप॒णिंताते॑दा॒त्राणि॑तवि॒षास॑रस्वति ॥ इ॒यंशुष्मे॑भिर्बिस॒खाऽइ॑वारुज॒त्सानु॑गिरी॒णांत॑वि॒षेभि॑रू॒र्मिभिः॑ । पा॒रा॒व॒त॒घ्नीमव॑सेसुवृ॒क्तिभिः॒सर॑स्वती॒मावि॑वासेमधी॒तिभिः॑ ॥ सर॑स्वतिदे॒व॒निदो॒निब॑र्हयप्र॒जांविश्व॑स्य॒बृस॑यस्यमा॒यिनः॑ । उ॒तक्षि॒तिभ्यो॒वनी॑रविंदोवि॒षमे॑भ्योऽअस्रवोवाजिनीवति ॥ प्रणो॑दे॒वीसर॑स्वती॒वाजे॑भिर्वा॒जिनी॑वती । धी॒नाम॑वि॒त्र्य॑वतु ॥ यस्त्वा॑देविसरस्वत्युपब्रू॒तेधने॑हि॒ते । इंद्रं॒नवृ॑त्र॒तूर्ये॑ ॥ ३० ॥ त्वंदे॑विसरस्व॒त्यवा॒वाजे॑षुवाजिनि । रदा॑पू॒षेव॑नःस॒निं+ ॥ उ॒तस्या॒नःसर॑स्वतीघो॒राहिर॑ण्यवर्तनिः । वृ॒त्र॒घ्नीव॑ष्टिसुष्टु॒तिं+ ॥ यस्या॑ऽअन॒ंतोऽअह्रु॑तस्त्वे॒षश्च॑रि॒ष्णुर॑र्ण॒वः । अम॒श्चर॑ति॒रोरु॑वत् ॥ सानो॒विश्वा॒ऽअति॒द्विषः॒स्वसॄ॑र॒न्याऽऋ॒ताव॑री । अत॒न्नहे॑व॒सूर्यः॑ ॥ उ॒तनः॑प्रि॒याप्रि॒यासु॑स॒प्तस्व॑सा॒सुजु॑ष्टा । सर॑स्वती॒स्तोम्या॑भूत् ॥ ३१ ॥ आ॒प॒प्रुषी॒पार्थि॑वान्यु॒रुरजो॑ऽअ॒ंतरि॑क्षं । सर॑स्वतीनि॒दस्पा॑तु ॥ त्रि॒ष॒धस्था॑स॒प्तधा॑तुः॒पंच॑जा॒ताव॒र्धयं॑ती । वाजे॑वाजे॒हव्या॑भूत् ॥ प्रया॑महि॒म्नाम॒हिना॑सुचेकि॑तेद्यु॒म्नेभि॑र॒न्याऽअ॒पसा॑म॒पस्त॑मा । रथ॑ऽइवबृह॒तीवि॒भ्वने॑कृ॒तोप॒स्तुत्या॑चिकि॒तुषा॒सर॑स्वती ॥ सर॑स्वत्य॒भिनो॑नेषि॒वस्यो॒माप॑स्फरीः॒पय॑सा॒मान॒ऽआध॑क् । जु॒षस्व॑नःस॒ख्यावे॒श्या॑च॒मात्वत्क्षेत्रा॒ण्यर॑णानिगन्म ॥ ३२ ॥ ॥ इतिचतुर्थाष्टकेऽष्टमोऽध्यायः ॥ ८ ॥

(६।५।१२) इयमददादितिचतुर्दशर्चस्यसूक्तस्यभरद्वाजःसरस्वतीगायत्र्याद्यास्तिस्रस्त्रयोदशीचजगत्योंत्यात्रिष्टुप् ।

द्वात्रिंशाध्यायेवर्गाः ३२ सूक्तानि १४ ऋचः १६६ ॥ त्यागः ॥ अग्नय. १० मरुद्भ्य. २ धेनवइषाये. इंद्रावरुणार्यमविष्णुभ्य. मरुद्भ्यः. पूष्ण. पूष्ण. ४ पृश्नय. २ द्यावाभूमिभ्या. विश्वेभ्योदेवेभ्य. अग्नय. अहोरात्राभ्या. वायव. अश्विभ्या. विश्वेभ्योदेवेभ्य. सरस्वत्याइ. पूष्ण. अग्नयेत्वष्ट्रइ. रुद्राये. मरुद्भ्य. २ विष्णव. विश्वेभ्योदेवेभ्य. ३ सूर्यायेदं. द्यावापृथिवीभ्या. मरुद्भ्य. २ इंद्राये. अद्भ्य. सवित्र. अग्नय. अश्विभ्या. विश्वेभ्योदेवेभ्य. ५ सूर्याये. २ विश्वेभ्योदेवेभ्य. १० अग्नय. सोमाये. विश्वेभ्योदेवेभ्य. ४ सोमाये. विश्वेभ्योदेवेभ्य. ८ अग्नय. विश्वेभ्योदेवेभ्य. ३ अग्निपर्जन्याभ्या. विश्वेभ्योदेवेभ्य. पूष्णइ. ३२ इंद्रापूषभ्या. ६ पूष्ण. ४ इंद्राग्निभ्या. २५ सरस्वत्याइ. १४ ॥ इतिचतुर्थेऽष्टमः ॥

॥ इतिचतुर्थाष्टकःसमाप्तः ॥

॥ अथपंचमाष्टकप्रारंभः ॥

श्रीः ॥ स्तुषएकादशाश्विनंतुक्तत्यैकपदांतत्रैष्टुभमाद्येविराजावुदुश्रियेषळुषस्यंत्वेषास्यावपुर्न्वेकादशमारुतंविश्वेषांमैत्रावरुणंश्रुष्टीवामैंद्रावरुणमुपांत्येजगत्यौसंवामष्टावैंद्रावैष्णवंघृतवतीषट्द्यावापृथिवीयंजागतमुदुष्यःसावित्रंत्रित्रिष्टुबंतमिंद्रासोमापंचैंद्रासोमंयोअद्रिभित्तृचंबार्हस्पत्यंसोमारुद्राचतुष्कंसोमारौद्रंजीमूतस्येवैकोनापायुर्भारद्वाजःसंग्रामांगान्यृक्शोभितुष्टाववर्मधनुर्ज्यामार्त्नीइषुधिंजगत्यर्धेसारथिमर्धेरश्मीनश्वान्रथंरथगोपान्जगत्याद्यालिंगोक्तदेवताद्वाभ्यामिषून्प्रतोदंहस्तघ्नंद्वाभ्यामिषून्पराःपंक्त्यादयोलिंगोक्तदेवताःसंग्रामाशिषोत्यानुष्टुंबृजीतआलाक्तेतिचद्वेद्वेयोब्ध्यःसंभूतोवसतीवरीषुगृह्यमाणासुपुष्करेस्थितवान्सर्वतःपुष्करंतत्रविश्वेदेवाअधारयन्नुत्थापयतोमहत्तपश्चकारादृष्टमिंद्रमन्यैर्ऋषिभिर्योदृष्टवांस्तपसापूर्वंस्तोमभागान्परितुष्टःशक्रःप्रब्रूतेयस्यसगुणतोनामजज्ञेवसतःश्रैष्ठ्यकर्मणःससप्तमंमंडलंवसिष्ठोपश्यदग्निंपंचाधिकाविराजोष्टादशाद्याः ॥ १ ॥

॥ श्रीगणेशायनमः ॥ ॥ हरिःओम् ॥ (६।६।१) स्तु॒षेनरा॑दि॒वोऽअ॒स्यप्र॒संता॒श्विना॑हुवे॒जर॑माणोऽअ॒र्कैः । यास॒द्यऽउ॒स्राव्युषि॒ज्मोऽअंता॒न्युयू॑षत॒ःपर्यु॒रूवरां॑सि ॥ ताय॒ज्ञमाशुचिं॑भिश्चक्र॒माणारथ॑स्यभा॒नुंरु॑रुचू॒रजो॑भिः । पुरूव॒रां॑स्यमि॑ता॒मिमा॑ना॒पोधन्वा॒न्यति॑याथो॒ऽअज्रा॑न् ॥ ताह॒त्यद्व॒र्तिर्यदर॑ध्रमुग्रे॒त्थाधिय॑ऽऊहथुः॒शश्व॒दश्वैः । मनो॑जवे

षष्ठेनुवाकेचतुर्दशसूक्तानि (६।६।१) स्तुषेनरेत्येकादशर्चस्यसूक्तस्यभरद्वाजोश्विनौत्रिष्टुप् ।

Digitization by eGangotri Funding MHRD Delhi

भिरिषिरैःशयध्यैपरिव्यथिर्दाशुषोमर्त्यस्य ॥ तानव्यसोजरमाणस्यमन्मोपभूषतोयुयुजानसप्ती । शुभंपृक्षमिषमूर्जंवहंताहोतायक्षत्प्रत्नोऽअध्रुग्युवाना ॥ तावल्गूदस्रापुरुशाकतमाप्रत्नानव्यसावचसाविवासे । याशंसतेस्तुवतेशंभविष्ठाबभूवतुर्गृणतेचित्रराती ॥ १ ॥ ताभुज्युंविभिरद्भ्यःसमुद्रात्तुग्रस्यसूनुमूहथूरजोभिः । अरेणुभिर्योजनेभिर्भुजंतापत्रिभिरर्णसोनिरुपस्थात् ॥ विजयुषारथ्यायातमद्रिंश्रुतंहवंवृषणावध्रिमत्याः । दशस्यंताशयवेपिप्यथुर्गामितिच्यवानासुमतिंभुरण्यू ॥ यद्रोदसीप्रदिवोऽअस्तिभूमाहेळोदेवानामुतमर्त्यत्रा । तदादित्यावसवोरुद्रियासोरक्षोयुजेतपुरघंदधात ॥ यऽईंराजानावृतुथाविदधद्रजसोमित्रोवरुणश्चिकेतत् । गंभीरायरक्षसेहेतिमस्यद्रोधायचिद्वचसऽआनवाय ॥ अंतरैश्चक्रैस्तनयायवर्तिर्द्युमतायातंनृवतारथेन । सनुत्येनत्यजसामर्त्यस्यवनुष्यतामपिशीर्षाववृक्तं ॥ आपरमाभिरुतमध्यमाभिर्नियुद्भिर्यातमवमाभिरर्वाक् । दृळ्हस्यचिद्गोमतोविव्रजस्यदुरोवर्तंगृणतेचित्रराती ॥ २ ॥

(६।६।२) क१त्यावल्गूपुरुहूताद्यदूतोनस्तोमोविदन्नमस्वान् । आयोऽअर्वाङ्नासत्याववर्तप्रेष्ठाह्यसथोऽअस्यमन्मन् ॥ अरंमेगंतंहवनायास्मैगृणानायथापिबाथोऽअंधः । परिहत्यद्वर्तिर्याथोरिषोनयत्परोनांतरस्तुतुर्यात्$^{+}$ ॥ अकारिवामंधसोवरीमन्नस्तारिबर्हिःसुप्रायणतमं । उत्तानहस्तोयुवयुर्ववंदावांनक्षंतोऽअद्रयऽआंजन् ॥ ऊर्ध्वोवामग्निरध्व

(६।६।२) क१त्येत्येकादशर्चस्यसूक्तस्यभरद्वाजोश्विनौत्रिष्टुप्आद्याविराळंत्यैकपदा ।

रेष्वस्थात्प्ररातिरेतिजूर्णिनीघृताची । प्रहोतागूर्तमनाऽउराणोयुक्तयोनासत्याहवीमन् ॥ अधिश्रियेदुहितासूर्यस्य रथंतस्थौपुरुभुजाशतोतिं । प्रमायाभिर्मायिनाभूतमत्रनरानृतूजनिमन्यज्ञियानां ॥ ३ ॥ युवंश्रीभिर्दर्शताभिराभिः शुभेपुष्टिमूहथुःसूर्यायाः । प्रवांवयोवपुषेनुपप्तन्नक्षद्वाणीसुष्टुताधिष्ण्यावां ॥ आवांवयोश्वासोवहिष्ठाऽअभिप्रयोनासत्यावहंतु । प्रवांरथोमनोजवाऽअसर्जीषःपृक्षऽइषिधोऽअनुपूर्वीः+ ॥ पुरुहिवांपुरुभुजादेष्णंधेनुंनऽइषंपिन्वतमसक्रां । स्तुतश्चवांमाध्वीसुष्टुतिश्चरसाश्चयेवामनुरातिमग्मन् ॥ उतमऽऋज्रेपुरयस्यरघ्वीसुमीह्ळेशतंपेरुकेचपक्वा । शांडोदाद्धिरणिनःस्मद्दिष्टीन्दशवशासोऽअभिषाचऽऋष्वान्+ ॥ संवांशतानासत्यासहस्राश्वानांपुरुपंथागिरेदात् । भरद्वाजायवीरनूगिरेदाद्धतारक्षांसिपुरुदंससास्युः ॥ आवांसुम्नेवरिमन्सूरिभिःष्यां ॥ ४ ॥ (६।६।३) उदुश्रियऽउषसोरोचमानाऽअस्थुरपांनोर्मयोरुशंतः । कृणोतिविश्वासुपथासुगान्यभूदुवस्वीदक्षिणामघोनी ॥ भद्राददृक्षऽउर्वियाविभास्युत्तेशोचिर्भानवोद्यामपप्तन् । आविर्वक्षःकृणुषेशुंभमानोषोदेविरोचमानामहोभिः ॥ वहंतिसीमरुणासोरुशंतोगावःसुभगामुर्वियाप्रथानां । अपेजतेशूरोऽअस्तेवशत्रून्बाधतेतमोऽअजिरोनवोह्ळा ॥ सुगोततेसुपथापर्वतेष्ववातेऽअपस्तरसिस्वभानो । सानऽआवहपृथुयामन्नृष्वेरयिंदिवोदुहितरिषयध्यै ॥ सावहयोक्षभिरवातोषोवरंवह

(६।६।३) उदुश्रियइतिषळर्चस्यसूक्तस्यभरद्वाजउषास्त्रिष्टुप् ।

सजोषमनु । त्वंदिवोदुहितर्याहदेवीपूर्वहूतौमंहनादर्शताभूः ॥ उत्तेवयश्चिद्वसतेरपप्तन्नरश्चयेपितुभाजोव्युष्टौ । अ
मासतेवहसिभूरिवाममुषोदेविदाशुषेमर्त्याय ॥ ५ ॥ (६।६।४) एषास्यानोदुहितादिवोजाःक्षितीरुच्छंतीमानुषीर
जीगः । याभानुनारुशताराम्यास्वज्ञायितिरस्तमसश्चिदक्तून्+ ॥ वितद्ययुररुणयुग्भिरश्वैश्चित्रंभांत्युषसश्चंद्ररथाः ।
अग्रंयज्ञस्यबृहतोनयंतीर्विताबाधंतेतमऽऊर्म्यायाः ॥ श्रवोवाजमिषमूर्जंवहंतीर्निदाशुषऽउषसोमर्त्याय । मघोनीर्वी
रवत्पत्यमानाऽअवोधातविधतेरत्नमद्य+ ॥ इदाहिवोविधतेरत्नमस्तीदावीरायदाशुषऽउषासः । इदाविप्रायजरतेय
दुक्थानिष्ममावतेवहथापुराचित् ॥ इदाहितऽउषोऽअद्रिसानोगोत्रागवामंगिरसोगृणंति । व्य१र्केणविभिदुर्ब्रह्म
णाचसत्यानृणामभवद्देवहूतिः ॥ उच्छादिवोदुहितःप्रत्नवन्नोभरद्वाजवद्विधतेमघोनि । सुवीरंरयिंगृणतेरिरीह्युरुगा
यमधिधेहिश्रवोनः ॥ ६ ॥ (६।६।५) वपुर्नुतच्चिकितुषेचिदस्तुसमानंनामधेनुपत्यमानं । मर्तेष्वन्यद्दोहसेपीपाय
सकृच्छुक्रंदुदुहेपृश्निरूधः ॥ येऽअग्नयोनशोशुचन्निधानाद्विर्यत्त्रिर्मरुतोवावृधंत । अरेणवोहिरण्ययासऽएषांसाकंनृ
म्णैःपौंस्येभिश्चभूवन् ॥ रुद्रस्ययेमीळ्हुषःसंतिपुत्रायांश्चोनुदाधृविर्भरध्यै । विदेहिमातामहोमहीषासेत्पृश्निःसुभ्वे३ग ॥ ३ ॥
र्भमाधात् ॥ नयऽईषंतेजनुषोयान्व१तःसंतोवद्यानिपुनानाः । निर्यद्दुह्रेशुचयोनुजोषमनुश्रियातन्वमुक्षमाणाः ॥

(६।६।४) एषास्येतिषळर्चस्यसूक्तस्यभरद्वाजउषास्त्रिष्टुप् । (६।६।५) वपुर्न्वित्येकादशर्चस्यसूक्तस्यभरद्वाजोमरुतस्त्रिष्टुप् ।

मक्षूनयेषुदोहसेचिदयाऽआनामधृष्णुमारुतंदधानाः । नयेस्तौनाऽअयासोमह्नानूचित्सुदानुरवयासदुग्रान्+ ॥ ७ ॥ तऽइदुग्राःशवसाधृष्णुषेणाऽउभेयुजंतरोदसीसुमेके । अधस्मैषुरोदसीस्वशोचिरामवत्सुतस्थौनरोकः ॥ अनेनोवोमरुतोयामोऽअस्त्वनश्वश्चिद्यमजत्यरथीः । अनवसोऽअनभीशूरजस्तूर्विरोदसीपथ्यायातिसाधन् ॥ नास्यवर्तानतरुतान्वस्तिमरुतोयमवथवाजसातौ । तोकेवागोषुतनयेयमप्सुसव्रजंदर्तापार्येऽअधद्योः+ ॥ प्रचित्रमर्कंगृणतेतुरायमारुतायस्वतवसेभरध्वं । येसहाँसिसहसासहंतेरेजंतेऽअग्नेपृथिवीमखेभ्यः ॥ त्विषीमंतोऽअध्वरस्येवदिद्युत्तृषुच्यवसोजुह्वो३नाग्नेः । अर्चत्रयोधुनयोनवीराभ्राजज्जन्मानोमरुतोऽअधृष्टाः ॥ तंवृधंतंमारुतंभ्राजदृष्टिंरुद्रस्यसूनुंहवसाविवासे । दिवःशर्धायशुचयोमनीषागिरयोनापऽउग्राऽअस्पृध्रन् ॥ ८ ॥ (६।६।६) विश्वेषांवःसतांज्येष्ठतमागीर्भिर्मित्रावरुणावावृधध्यै । संयारश्मेवयमतुर्यमिष्ठाद्वाजनाँऽअसमाबाहुभिःस्वैः+ ॥ इयंमद्वांप्रस्तृणीतेमनीषोपप्रियानमसाबर्हिरच्छ । यंतंनोमित्रावरुणावधृष्टंच्छर्दिर्यद्वांवरूथ्यंसुदानू ॥ आयातंमित्रावरुणासुशस्त्युपप्रियानमसाहूयमाना । संयावप्नःस्थोऽअपसेवजनान्छ्रुधीयतश्चिद्यतथोमहित्वा+ ॥ अश्वानयावाजिनापूतबंधूऽऋतायद्गर्भमदितिर्भरध्यै । प्रयामहिमहांताजायमानाघोरामर्तायरिपवेनिदीधः ॥ विश्वेयद्वांमंहनामंदमानाःक्षत्रंदेवासोऽअदधुःसजो

(६।६।६) विश्वेषामित्येकादशर्चस्यसूक्तस्यभरद्वाजोमित्रावरुणौत्रिष्टुप् ।

षा॑ः । प॒रि॒यद्भू॒थोरोद॑सीचिदु॒र्वीसंति॒स्पशो॒ऽअद॑ब्धासो॒ऽअमू॑राः ॥ ४ ॥ ताहिक्ष॒त्रंधा॒रये॑थे॒ऽअनु॒द्यून्दृं॒हे॑थे॒सानु॑मुप॒
मा॑र्दि॒वद्यो॑ः । दृ॒ह्लोनक्ष॑त्र॒ऽउ॒तवि॒श्वदे॑वो॒भूमि॒माता॒न्द्यांधा॒सिना॒योः+ ॥ तावि॒ग्रंधै॑थेज॒ठरं॑पृ॒णध्या॒ऽआयत्सद्म॒सभृ॑त
यः॑पृ॒णंति॑ । नमृ॑ष्यंतेयुव॒तयो॒वा॑ता॒वियत्पयो॑विश्वजिन्वा॒भरं॑ते ॥ ताजि॒ह्वया॒सद॒मेदंसु॑मे॒धाऽआयद्वां॑स॒त्योऽअर॑ति॒र्ऋ॒
तेभूत् । तद्वां॑महि॒त्वंघृ॑तान्नावस्तुयु॒वंदा॒शुषे॒विच॑यिष्ट॒मंहः॑ ॥ प्रयद्वां॑मित्रावरुणास्पू॒र्धन्प्रि॒याधाम॑युवधि॑ता॒मि॒नंति॑ ।
नयेदे॒वास॒ऽओह॑सा॒नमर्ता॒ऽअय॑ज्ञसा॒चोऽअप्यो॒नपु॒त्राः+ ॥ वियद्वाचं॑की॒स्तासो॒भरं॑ते॒शंस॑ंति॒केचि॑न्नि॒विदो॑मना॒नाः ।
आद्वां॑ब्रवामस॒त्यान्यु॒क्थानकि॑र्दे॒वेभि॒र्यतथो॑महि॒त्वा+ ॥ अ॒वोरि॒त्थावां॑छ॒र्दिषो॑ऽअ॒भिष्टौ॑यु॒वोर्मि॑त्रावरुणा॒वस्कृ॑धो
यु । अनु॒यद्गावः॑स्फु॒रानृ॑जि॒प्यंधृ॒ष्णुंयद्रणे॒वृष॑णंयु॒नज॑न् ॥ १० ॥ (६।६।७) श्रु॒ष्टीवाँ॑ऽय॒ज्ञऽउद्य॑तःस॒जोषा॑मनु॒ष्व
द्वृ॒क्तब॑र्हिषो॒यज॑ध्यै । आयऽइंद्रा॒वरु॑णावि॒षेऽअ॒द्यम॒हेसु॒म्नाय॑म॒हऽआ॑व॒वर्त॑त् ॥ ताहिश्रेष्ठा॑दे॒वता॑तातु॒जाशूरा॑णां॒शवि॑
ष्ठाताहिभूतं॑ । म॒घोना॒मंहि॑ष्ठातुवि॒शुष्म॑ऽऋ॒तेन॑वृत्र॒तुरा॒सर्व॑सेना ॥ तागृ॑णीहिनम॒स्ये॑भिःशू॒षैःसु॒म्नेभि॒रिंद्रा॒वरु॑णाचका॒
ना । वज्रे॑णा॒न्यःशव॑सा॒हंति॑वृ॒त्रंसिष॑क्त्य॒न्योवृ॒जने॑षु॒विप्रः॑ ॥ ग्नाश्च॒यन्नर॑श्चवावृ॒धंत॒विश्वे॑दे॒वासो॑न॒रांस्वगू॑र्ताः । प्रैभ्य॑
ऽइंद्रावरुणामहि॒त्वाद्यौश्च॑पृथिविभूतमु॒र्वी+ ॥ सऽइत्सु॒दानु॒ःस्ववाँ॑ऽऋ॒तावेंद्रा॒योवां॑वरुण॒दाश॑ति॒त्मन् । इ॒षासद्वि॒ष

(६।६।७) श्रुष्टीवामित्येकादशर्चस्यसूक्तस्यभरद्वाजइंद्रावरुणौत्रिष्टुप्नवमीसप्तम्यौजगत्यौ ।

स्तो॑रे॒ह्वा॒स्वा॒न्वं॑सं॒द्र॒यिं॑र॒यि॒वतं॑श्च॒जना॑न् ॥ ११ ॥ यंयु॒वंदा॒श्वं॑ध्वरायदेवार॒यिंध॒त्थोवसु॑मंतंपुरु॒क्षुं । अ॒स्मेसऽइं॑द्रावरुणा॒
वर्पि॑ष्या॒त्प्रयो॑भ॒नक्ति॑व॒नुषा॒मशं॑स्तीः ॥ उ॒तनः॑सु॒त्रात्रो॑दे॒वगो॑पाःसू॒रिभ्य॑ऽइंद्रावरुणार॒यिःष्या॑त् । येषा॒ंशुष्मः॒पृत॑नासु
सा॒ह्वान्प्र॒सद्यो॑द्यु॒म्नाति॒रते॒ततु॑रिः ॥ नूनऽइं॑द्रावरुणागृण॒ानापृं॒क्तंर॒यिंसौ॑श्रव॒सायदे॑वा । इ॒त्थागृ॒णंतो॑म॒हिनं॑स्य॒शर्धो॑पो
न॒नावादु॑रि॒ताति॑रेम ॥ प्रस॒म्राजे॑बृह॒तेमन्म॒नुप्रि॒यमर्च॑दे॒वाय॒वरु॑णायस॒प्रथः॑ । अ॒यंयऽउ॒र्वीम॑हि॒नामहि॑व्रत॒ःक्रत्वा॑वि॒
भा॒त्य॒जरो॒नशो॒चिषा॑ ॥ इंद्रा॑वरुणासुतपावि॒मंसु॒तंसोमं॑पिबतं॒मद्यं॑धृतव्रता । यु॒वोरथो॑ऽअध्व॒रंदे॒ववी॑तये॒प्रति॒स्वस॑र॒मु
पं॑यातिपी॒तये॑ ॥ इंद्रा॑वरुणा॒मधु॑मत्तमस्य॒वृष्णः॒सोम॑स्यवृष॒णावृ॑षेथां । इ॒दंवा॒मंधः॒परि॑षिक्तम॒स्मेऽआ॒सद्या॒स्मिन्ब॒र्हिषि॑
मादयेथां ॥ १२ ॥ (६।६।८) संवा॒कर्म॑णा॒समि॒षाहि॑नो॒मींद्रा॑विष्णू॒ऽअप॑सस्पा॒रेऽअ॒स्य । जु॒षेथां॑य॒ज्ञंद्रवि॑णंचधत्त॒म
रि॑ष्टैर्नः॒प॒थिभिः॒पा॒रयं॑ता ॥ याविश्वा॑सांजनि॒तारा॑मती॒नामिं॑द्रा॒विष्णू॑क॒लशा॑सोम॒धाना॑ । प्रवां॒गिरः॑श॒स्यमा॑नाऽअवं
तु॒प्रस्तोमा॑सोगी॒यमा॑नासोऽअ॒र्कैः+ ॥ इंद्रा॑विष्णूमदपतीमदा॒नामासोमं॑याता॒द्रवि॑णो॒दधा॑ना । संवा॑मंजं॒त्व॒क्तुभि॑र्मती॒
नांसंस्तोमा॑सःश॒स्यमा॑नासऽउ॒क्थैः+ ॥ आवा॒मश्वा॑सोऽअभिमाति॒षाह॒ऽइंद्रा॑विष्णूसध॒मादो॑वहंतु । जु॒षेथा॒ंविश्वा॒ह
वं॑नामती॒नामुप॒ब्रह्मा॑णिशृणु॒तंगिरो॑मे ॥ इंद्रा॑विष्णूतत्प॑न॒याय्यं॑वा॒ंसोम॑स्य॒मदऽउ॒रुचं॑क्रमाथे । अकृ॑णुतमं॒तरि॑क्षं॒वरी॒यो

(६।६।८) संवामित्यष्टर्चस्यसूक्तस्यभरद्वाजइंद्राविष्णूत्रिष्टुप् ।

प्र॑थतंजी॒वसे॑नो॒रजां॑सि ॥ इंद्रा॑विष्णूह॒विषा॑वावृधा॒नाग्रा॑द्वाना॒नम॑सारातहव्या । घृता॑सुती॒द्रवि॑णंधत्तम॒स्मेस॑मु॒द्रःस्थः॑
कु॒लशः॑सोम॒धानः॑ ॥ इंद्रा॑विष्णू॒पिब॑तं॒मध्वो॑ऽअ॒स्यसोम॑स्यदस्रा॒जठरं॑पृणेथां । आवा॒मंधां॑सिमदि॒राण्य॑ग्म॒न्नु॒प॒ब्रह्मा॑णि
शृणुतं॒हवं॑मे ॥ उ॒भाजि॑ग्यथु॒र्नपरा॑जयेथे॒नपरा॑जिग्येकत॒रश्च॒नैनोः॑ । इंद्र॑श्चविष्णो॒यदप॑स्पृधेथांत्रे॒धास॒हस्रं॒वितदैं॑रये
थां ॥ १३ ॥ (६।६।९) घृ॒तव॑ती॒भुव॑नानामभि॒श्रियो॒र्वीपृ॒थ्वीम॑धु॒दुघे॑सु॒पेश॑सा । द्यावा॑पृथि॒वीवरु॑णस्य॒धर्म॑णा॒वि
ष्कभि॑तेऽअ॒जरे॒भूरि॑रेतसा ॥ अस॑श्चंती॒भूरि॑धारे॒पय॑स्वतीघृ॒तंदु॑हातेसु॒कृते॒शुचि॑व्रते । राजं॑तीऽअ॒स्यभुव॑नस्यरोदसीऽ
अ॒स्मेरेतः॑सिंचतं॒यन्मनु॑र्हितं ॥ योवां॑मृ॒जवे॒क्रम॑णायरोद॒सीमर्तो॑द॒दाश॑धिषणे॒ससा॑धति । प्रप्र॒जाभि॑र्जायते॒धर्म॑ण॒स्प
रि॑यु॒वोः॑सि॒क्ताविषु॑रूपाणि॒सव्र॑ता ॥ घृ॒तेन॒द्यावा॑पृथि॒वीऽअ॒भीवृ॑तेघृ॒तश्रिया॑घृ॒तपृचा॑घृ॒तावृधा॑ । उ॒र्वीपृ॒थ्वीहोतृ॒वूर्ये॑पु॒
रोहि॑ते॒तेऽइद्विप्रा॑ऽईळतेसु॒म्नमि॒ष्टये॑ ॥ मधु॑नो॒द्यावा॑पृथि॒वीमि॑मिक्षतांमधु॒श्चुता॑मधु॒दुघे॒मधु॑व्रते । दधा॑नेय॒ज्ञंद्रवि॑णंच
दे॒वता॒महि॒श्रवो॒वाज॑म॒स्मेसु॒वीर्यं॑ ॥ ऊर्जं॑नो॒द्यौश्च॑पृथि॒वीच॑पिन्वतांपि॒तामा॒ताविश्व॒विदा॑सु॒दंस॑सा । सं॒र॒राणेरोद॑सीवि॒
श्वशं॑भुवास॒निंवाजं॑र॒यिम॒स्मेसमि॑न्वतां ॥ १४ ॥ (६।६।१०) उदु॒ष्यदे॒वःस॑वि॒ताहि॑र॒ण्यया॑बा॒हूऽअ॑यंस्त॒सव॑नायसु॒

॥ ५ ॥

(६।६।९) घृतवतीतिषळर्चस्यसूक्तस्यभरद्वाजोद्यावापृथिव्यौजगती । (६।६।१०) उदुष्येतिषळर्चस्यसूक्तस्यभरद्वाजःसविताजगती अंत्यास्तिस्रस्त्रिष्टुभः ।

क्रतुः । घृतेनपाणीऽअभिप्रष्णुतेमखोयुवासुदक्षोरजसोविधर्मणि ॥ देवस्यवयंसवितुःसवीमनिश्रेष्ठेस्यामवसुनश्चदाव
ने । योविश्वस्यद्विपदोयश्चतुष्पदोनिवेशनेप्रसवेचासिभूमनः ॥ अदब्धेभिःसवितःपायुभिष्ट्वंशिवेभिरद्यपरिपाहिनोग
यं । हिरण्यजिह्वःसुवितायनव्यसेरक्षामाकिर्नोऽअघशंसऽईशत॥ उदुष्यदेवःसवितादमूनाहिरण्यपाणिःप्रतिदोषम
स्थात्। अयोहनुर्यजतोमंद्रजिह्वऽआदाशुषेसुवतिभूरिवामं+ ॥ उदूऽअयाँऽउपवक्तेवबाहूहिरण्ययासवितासुप्रतीका ।
दिवोरोहाँस्यरुहत्पृथिव्याऽअरीरमत्पतयत्कच्चिदभ्वं ॥ वाममद्यसवितर्वाममुश्वोदिवेदिवेवाममस्मभ्यंसावीः । वाम
स्यहिक्षयस्यदेवभूरेरयाधियावामभाजःस्याम ॥ १५ ॥ (६।६।११) इंद्रासोमामहितद्वाँमहित्वंयुवंमहानिप्रथमानिच
क्रथुः । युवंसूर्यंविविदथुर्युवंस्व१र्विश्वातमाँस्यहतंनिदश्च ॥ इंद्रासोमावासयथऽउषासमुत्सूर्यंनयथोज्योतिषासह ।
उपद्यांस्कंभथुःस्कंभनेनाप्रथतंपृथिवीमातरंवि+ ॥ इंद्रासोमावहिमपःपरिष्ठांहथोवृत्रमनुवांद्यौरमन्यत । प्राणांस्यै
रयतंनदीनामासमुद्राणिपप्रथुःपुरूणि ॥ इंद्रासोमापक्वमामास्वंतर्निगवामिद्दधथुर्वक्षणासु । जगृभथुरनपिनद्धमासु
रुशच्चित्रासुजगतीष्वंतः+ ॥ इंद्रासोमायुवमंगतरुत्रमपत्यसाचंश्रुत्यंरराथे । युवंशुष्मंनर्यंचर्षणिभ्यःसंविव्यथुःपृत
नाषाहमुग्रा ॥ १६ ॥ (६।६।१२) योऽअद्रिभित्प्रथमजाऽऋतावाबृहस्पतिरांगिरसोहविष्मान् । द्विबर्हज्माप्राघ

(६।६।११)इंद्रासोमेतिपंचर्चस्यसूक्तस्यभरद्वाजइंद्रासोमौत्रिष्टुप्।(६।६।१२)योअद्रिभिदितितृचस्यसूक्तस्यभरद्वाजोबृहस्पतिस्त्रिष्टुप्।

र्म॒सत्पि॒तान॒ऽआरोद॑सीवृष॒भोरो॑रवीति ॥ जना॑यचि॒द्यईव॑तऽउलो॒कंबृह॒स्पति॑र्दे॒वहू॑तौच॒कार॑ । घ्नन्वृ॒त्राणि॒विपुरो॑दर्दरीति॒जय॒न्छत्रूँ॑र॒मित्रा॑न्पृ॒त्सुसाह॑न् ॥ बृह॒स्पति॒ःसम॑जय॒द्वसू॑निम॒होव्र॒जान्गोम॑तोदे॒वऽए॒षः । अ॒पःसिषा॑स॒न्त्स्व॑१॒रप्र॑तीतो॒बृह॒स्पति॒र्हंत्य॒मित्र॑म॒र्कैः+ ॥ १७॥ (६।६।१३) सोमा॑रुद्राधा॒रये॑थामसु॒र्यं॑१॒प्रवा॑मि॒ष्टयो॑रमश्नुवंतु । दमे॑दमेस॒प्तरत्ना॒दधा॑ना॒शंनो॑भूतंद्वि॒पदे॒शंचतु॑ष्पदे ॥ सोमा॑रुद्रा॒विवृ॑हत॒ंविषू॑ची॒ममी॑वा॒यानो॒गय॑मावि॒वेश॑ । आ॒रेबा॑धेथां॒निर्ऋ॑तिंपरा॒चैर॒स्मेभ॒द्रासौ॑श्रव॒सानि॑संतु ॥ सोमा॑रुद्रायु॒वमे॒तान्य॒स्मेविश्वा॑त॒नूषु॑भेष॒जानि॑धत्तं । अव॑स्यतंमु॒ंचत॒ंयन्नो॒ऽअस्ति॑त॒नूषु॑ब॒द्धंकृ॒तमेनो॑ऽअ॒स्मत्+ ॥ ति॒ग्मायु॑धौति॒ग्महे॑तीसु॒शेवौ॒सोमा॑रुद्रावि॒हसुमृ॑ळतंनः । प्रनो॑मुंचत॒ंवरु॑णस्य॒पाशा॑द्गोपा॒यतं॑नःसुमन॒स्यमा॑ना ॥ १८ ॥ (६।६।१४) जी॒मूत॑स्येवभवति॒प्रती॑कं॒यद्व॒र्मीया॑ति॒सम॑दामु॒पस्थे॑ । अना॑विद्धयात॒न्वा॑जय॒त्वंसत्वा॒वर्म॑णोमहि॒मापि॑पर्तु ॥ धन्व॑ना॒गाधन्व॑ना॒जिंज॑येम॒धन्व॑नाती॒व्राःस॒मदो॑जयेम । धनु॒ःशत्रो॑रपका॒मंकृ॑णोति॒धन्व॑ना॒स

(६।६।१३) सोमारुद्रेतिचतुर्ऋचस्यसूक्तस्यभरद्वाजःसोमारुद्रौत्रिष्टुप् । (६।६।१४) जीमूतस्येवेत्येकोनविंशत्यृचस्यसूक्तस्यभारद्वाजःपायुः आद्यानांनवानांक्रमेणवर्मधनुर्ज्याधनुष्कोटीषुधिःसारथीरश्मयोऽश्वारथोरथगोपाः । दशम्याब्राह्मणपितृसोमपृथिवीपूषाणः । एकादश्यादिद्वयोरिषवःत्रयोदश्याःप्रतोदःचतुर्दश्याहस्तत्राणं पंचदशीषोडश्योरिषवः सप्तदश्यायुद्धभूमिकवचब्रह्मणस्पत्यदित्यः अष्टादश्यावर्मसोमवरुणाःअंत्यायादेवब्रह्माणित्रिष्टुप् । षष्ठीदशम्यौजगत्यौद्वादशीत्रयोदशीपंचदशीषोळश्यंत्यानुष्टुभःसप्तदशीपंक्तिः । (त्रयो-

Digitization by eGangotri Funding: MoE-IKS Delhi

वीःप्रदिशोजयेम ॥ वक्ष्यंतीवेदागनीगंतिकर्णंप्रियंसखायंपरिषस्वजाना। योषेवशिङ्क्तेवितताधिधन्वन्ज्याऽइयंसमनेपारयंती ॥ तेऽआचरंतीसमनेवयोषामातेवपुत्रंबिभृतामुपस्थे । अपशत्रून्विध्यतांसंविदानेऽआर्त्नीऽइमेविष्फुरंतीऽअमित्रान् ॥ बह्वीनांपिताबहुरस्यपुत्रश्चिश्चाकृणोतिसमनावगत्य । इषुधिःसंकाःपृतनाश्चसर्वाःपृष्ठेनिनद्धोजयतिप्रसूतः ॥ १९ ॥ रथेतिष्ठन्नयतिवाजिनःपुरोयत्रयत्रकामयतेसुषारथिः । अभीशूनांमहिमानंपनायतमनःपश्चादनुयच्छंतिरश्मयः ॥ तीव्रान्घोषान्कृण्वतेवृषपाणयोश्वारथेभिःसहवाजयंतः । अवक्रामंतःप्रपदैरमित्रान्क्षिणंतिशत्रूँरनपव्ययंतः ॥ रथवाहनंहविरस्यनामयत्रायुधंनिहितमस्यवर्म । तत्रारथमुपशग्मंसदेमविश्वाहावयंसुमनस्यमानाः ॥ स्वादुषंसदःपितरोवयोधाःकृच्छ्रेश्रितःशक्तीवंतोगभीराः । चित्रसेनाऽइषुबलाऽअमृध्राःसतोवीराऽउरवोव्रातसाहाः+ ॥ ब्राह्मणासःपितरःसोम्यासःशिवेनोद्यावापृथिवीऽअनेहसा । पूषानःपातुदुरिताद्दृतावृधोरक्षामाकिर्नोऽअघशंसऽईशत ॥ २० ॥ सुपर्णंवस्तेमृगोऽअस्यादंतोगोभिःसंनद्धापततिप्रसूता । यत्रानरःसंचविचद्रवंतितत्रास्मभ्यमिषवःशर्मयंसन् ॥ ऋजीतेपरिवृंग्धिनोश्माभवतुनस्तनूः । सोमोऽअधिब्रवीतुनोदितिःशर्मयच्छतु ॥ आजंघंतिसान्वेषांजघनाँ

दश्याःप्रतोदइत्यत्राश्वोदेवतेतिकेचित् । चतुर्दश्याहस्तघ्नमित्यत्रहस्तत्राणंचतुर्दश्यामितिशौनकोक्तेर्हस्तत्राणमेवयुक्तं । पराःपंक्त्यादयोलिंगोक्तदेवताइत्येवमनुक्रमण्यांसत्यामंत्ययोर्द्वयोर्विश्वेदेवाइतिकेचिन्मन्यंतेबहुदेवतत्वात् पचदश्यादिद्वयोर्विषाक्तमुखबाणइतिशौनकः)।

॥ ७ ॥

ऽउपजिघ्नते । अश्वाजनिप्रचेतसोश्वान्त्समत्सुचोदय ॥ आहिरिवभोगैःपर्येतिबाहुंज्यायाहेतिंपरिबाधमानः । हस्तघ्नो
विश्वावयुनानिविद्वान्पुमान्पुमाँसंपरिपातुविश्वतः ॥ आलाक्तायारुरुशीर्ष्ण्यथोयस्याऽअयोमुखं । इदंपर्जन्यरेतस
ऽइष्वैदेव्यैबृहन्नमः ॥ २१ ॥ अवसृष्टापरापतशरव्येब्रह्मसंशिते । गच्छामित्रान्प्रपद्यस्वमामीषांकंचनोच्छिषः ॥
यत्रबाणाःसंपतंतिकुमाराविशिखाऽइव । तत्रानोब्रह्मणस्पतिरदितिःशर्मयच्छतुविश्वाहाशर्मयच्छतु ॥ मर्माणितेव
र्मणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ता । उरोर्वरीयोवरुणस्तेकृणोतुजयंतंत्वानुदेवामदंतु ॥ योनःस्वोऽअरणो
यश्चनिष्ट्योजिघाँसति । देवास्तंसर्वेधूर्वंतुब्रह्मवर्ममममांतरं ॥ २२ ॥ (इतिभारद्वाजंषष्ठंमंडलंसमाप्तं अत्रसूक्तानि७५)
(७।१।१) अग्निंनरोदीधितिभिररण्योर्हस्तच्युतीजनयंतप्रशस्तं । दूरेदृशंगृहपतिमथर्युं+ ॥ तमग्निमस्तेवसवोन्यृ
ण्वन्त्सुप्रतिचक्षमवसेकुतश्चित् । दक्षाय्योयोदमऽआसनित्यः ॥ प्रेद्धोऽअग्नेदीदिहिपुरोनोजस्रयासूर्म्यायविष्ठ ।
त्वांशश्वंतऽउपयंतिवाजाः ॥ प्रतेऽअग्नयोग्निभ्योवरंनिःसुवीरासःशोशुचंतद्युमंतः । यत्रानरःसमासतेसुजाताः+ ॥
दानोऽअग्नेधियारयिंसुवीरंस्वपत्यंसहस्यप्रशस्तं । नयंयावातरतियातुमावान् ॥ २३ ॥ उपयमेतियुवतिःसुदक्षंदो
षावस्तोर्हविष्मतीघृताची । उपस्वैनमरमतिर्वसूयुः+ ॥ विश्वाऽअग्नेपदहारातीर्येभिस्तपोभिरदहोजरूथं । प्रनिस्वरं

॥ ७ ॥

वासिष्ठेसप्तमेमंडलेषडनुवाकाः (७।१।१) अग्निंनरइतिपंचविंशत्यृचस्यसूक्तस्यमैत्रावरुणिर्वसिष्ठोग्निर्विराट्अंत्याःसप्तत्रिष्टुभः ।

चा॑तय॒स्वामी॑वां ॥ आय॑स्ते॑ऽअग्नऽइध॒ते॑ऽअनी॑कं॒वसि॑ष्ठ॒शुक्र॒दीदि॑वः॒पाव॑क । उ॒तोन॑ऽए॒भिःस्त॒वथै॑रि॒हस्या॑ः ॥ वि॑येते॑ऽअग्ने॒भेजि॒रेऽअनी॑कं॒मर्ता॒नर॒ःपित्र्या॑सःपुरु॒त्रा । उ॒तोन॑ऽए॒भिःसु॒मना॑ऽइ॒हस्या॑ः ॥ इ॒मेनरो॑वृत्र॒हत्ये॑षु॒शूरा॒विश्वा॒ऽअदे॑वीर॒भिसँ॑तु॒माया॑ः । येमे॒धियँ॑प॒नयँ॑तप्रश॒स्तां+ ॥ २४ ॥ माशूने॑ऽअग्ने॒निष॑दामनृ॒णांमाशेष॑सो॒वीर॑ता॒परि॑त्वा । प्र॒जाव॑तीषु॒दुर्या॑सुदुर्य ॥ यम॒श्वीनित्य॑मुप॒याति॑य॒ज्ञंप्र॒जाव॑न्तंस्वप॒त्यंक्षयँ॑नः । स्वज॑न्मना॒शेष॑सावावृ॒धानं+ ॥ पा॒हिनो॑ऽअग्ने॒रक्ष॒सोऽअजु॑ष्टात्पा॒हिधू॒र्तेरर॑रुषोऽअघा॒योः । त्वायु॒जापृ॑तना॒यूँर॒भिष्या॑ं ॥ सेद॒ग्निर॒ग्नीँऽरत्य॑स्त्व॒न्यान्यत्र॑वा॒जीतन॑योवी॒ळुपा॑णिः । स॒हस्र॑पाथाऽअ॒क्षरा॑स॒मेति॑ ॥ सेद॒ग्निर्यो॑वनुष्य॒तोनि॒पाति॑स॒मेद्धा॑र॒मंह॑सऽउरु॒ष्यात् । सु॒जाता॑स॒ःपरि॑चरंतिवी॒राः+ ॥ २५ ॥ अ॒यंसोऽअ॒ग्निराहु॑तःपुरु॒त्रायमीशा॑न॒ःसमिदि॒ंधेह॒विष्मा॑न् । परि॒यमेत्य॑ध्व॒रेषु॒होता॑ ॥ त्वेऽअ॑ग्नऽआ॒हव॑नानि॒भूरी॑शा॒नास॒ऽआजु॑हुयाम॒नित्या॑ । उ॒भाकृ॒ण्वंतो॑वह॒तूमि॒येधे॑ ॥ इ॒मोऽअ॑ग्ने॒वीत॑तमानिह॒व्याज॑स्रोवक्षिदे॒वता॑ति॒मच्छ॑ । प्रति॑नऽईँसुर॒भीणि॑व्यंतु ॥ मानो॑ऽअग्ने॒वीर॑ते॒परा॑दादु॒र्वास॒सेम॑तये॒मानो॑ऽअ॒स्यै । मान॑ःक्षु॒धेमार॒क्षस॑ऽऋतावो॒मानो॒दमे॒माव॒नऽआजु॑हूर्थाः ॥ नू॒मेब्रह्मा॑ण्यग्न॒ऽउच्छ॑शाधि॒त्वंदे॑वम॒घव॑द्भ्यःसुषूदः । रा॒तौस्या॑मो॒भया॑स॒ऽआते॑यू॒यंपा॑तस्व॒स्तिभि॒ःसदा॑नः ॥ २६ ॥ त्वम॑ग्नेसु॒हवो॑र॒ण्वसँ॑दृक्सुदी॒तीसू॑नोसहसोदिदीहि । मात्वेस॒चातन॑ये॒नित्य॒ऽआध॒ङ्मावी॒रोऽअ॒स्मन्न॒र्यो॑विदा॑सीत् ॥ मानो॑ऽअग्नेदु॒र्भृत॑ये॒सचै॒षुदे॒वेद्धे॑ष्व॒ग्निषु॒प्रवो॑चः । माते॑ऽअ॒स्मान्दु॑र्म॒तयो॑भृ॒माच्चि॑द्दे॒व

स्यं॑सूनोसहसोनशं॑त ॥ समर्तो॑अग्नेस्वनीकरे॒वानम॑र्त्ये॒यआ॒जुहो॑तिह॒व्यं । सदे॒वतां॑वसु॒वनिं॑दधाति॒यंसू॒रिर॒र्थीं॑पृ॒च्छमा
न॒ऽएतिं॑ ॥ म॒होनो॑ऽअग्नेसुवि॒तस्यं॑वि॒द्वान्र॒यिंसू॒रिभ्य॒ऽआव॑हाबृ॒हंतं॑ । येन॑व॒यंस॑हसाव॒न्मदे॒मावि॑क्षितास॒ऽआयु॑षासु॒वी
रां॑ः ॥ नूमे॒ब्रह्मा॑ण्य० ॥ २७ ॥ इतिपंचमाष्टकेप्रथमोऽध्यायः ॥ १ ॥ ॥ ॥ ॥

पंचमाष्टकेसूक्तानि १२९ ऋचः १२६३

त्रयस्त्रिंशाष्टकेवर्गाः २७ सूक्तानि १५ ऋचः १४३ ॥ त्यागः ॥ अश्विभ्यामिदं. २२ उषस. १२ मरुद्भ्य. ११ मित्रावरुणाभ्या. ११ इंद्रावरुणाभ्या. ११ इंद्राविष्णुभ्या. ८ द्यावापृथिवीभ्या. ६ सवित्र. ६ इंद्रासोमाभ्या. ५ बृहस्पतय. ३ सोमारुद्राभ्या. ४ वर्मणइ. धनुषइ. ज्यायाइ. धनुष्कोट्या. इषुध्याइ. सारथिरश्मिभ्य. अश्वेभ्य. रथाये. रथगोपेभ्य. ब्राह्मणपितृसोमद्यावापृथिवीपूषभ्य. इषुभ्य. २ प्रतोदाये. हस्तत्राणाये. इषुभ्य. २ युद्धभूमिकवचब्रह्मणस्पत्यदितिभ्य. वर्मसोमवरुणेभ्य. देवब्रह्मभ्य. अग्नये. २९ इतिपंचमेप्रथमः ॥

जुषस्वैकादशा॑प्रमग्निंवोदशप्रवं॑ःप्राग्नयेनववैश्वानरीयं॑तुंप्रसम्राजःसप्तं॑प्रवोदेवामिंधें॑बोधिषळुषोनपंचं॑महानगन्म
तृचं॑प्राग्नयेवैश्वानरीयं॑समिधाबृहत्यां॑द्युपसद्यायपंचोनागायत्रं॑मेनावोद्वादशप्रागाथमं॑ग्नेभवसप्तद्वैपदं॑त्रैष्टुभं॑त्वे
हपंचाधिकैं॑द्रैंसुदासःपैजवनस्यं॑चतस्रों॑त्यादानस्तुतिं॑र्यस्तिग्मशृं॑गएकादश ॥ २ ॥ ॥ ॥ ॥ ८ ॥

॥ हरिःओम् ॥ (७।१।२) जुषस्वनःसमिधमग्नेऽअद्यशोचाबृहद्यजतंधममृण्वन् । उपस्पृशदिव्यंसानुस्तूपैः संरश्मिभिस्ततनःसूर्यस्य ॥ नराशंसस्यमहिमानमेषामुपस्तोषामयजतस्ययज्ञैः । येसुक्रतवःशुचयोधियंधाःस्वदंतिदेवाऽउभयानिहव्या+ ॥ ईळेन्यंवोऽअसुरंसुदक्षमंतर्दूतंरोदसीसत्यवाचं । मनुष्वदग्निमनुनासमिद्धंसमध्वरायसदमिन्महेम ॥ सपर्यवोभरमाणाऽअभिज्ञुप्रवृंजतेनमसाबर्हिरग्नौ । आजुह्वानाघृतपृष्ठंपृषद्वदध्वर्यवोहविषामर्जयध्वं ॥ स्वाध्यो३विदुरोदेवयंतोशिश्रयूरथयुर्देवताता । पूर्वीशिशुंनमातरारिहाणेसमग्रुवोनसमनेष्वंजन् ॥ १ ॥ उतयोषणेदिव्येमहीनऽउषासानक्तासुदुघेवधेनुः । बर्हिषदापुरुहूतेमघोनीऽआयज्ञियेसुवितायश्रयेतां ॥ विप्रायज्ञेषुमानुषेषुकारूमन्येवांजातवेदसायजध्यै । ऊर्ध्वंनोऽअध्वरंकृतंहवेषुतादेवेषुवनथोवार्याणि ॥ आभारतीभारतीभिःसजोषाऽइळादेवैर्मनुष्येभिरग्निः । सरस्वतीसारस्वतेभिरर्वाक्तिस्रोदेवीर्बर्हिरेदंसदंतु ॥ तन्नस्तुरीपमधपोषयित्नुदेवत्वष्टर्विरराणःस्यस्व । यतोवीरःकर्मण्यःसुदक्षोयुक्तग्रावाजायतेदेवकामः ॥ वनस्पतेवसृजोपदेवानग्निर्हविःशमितासूदयाति । सेदुहोतासत्यतरोयजातियथादेवानांजनिमानिवेद ॥ आयाह्यग्नेसमिधानोऽअर्वाङिंद्रेणदेवैःसरथंतुरेभिः । बर्हि

(७।१।२) जुषस्वेत्येकादशर्चस्यसूक्तस्यमैत्रावरुणिर्वसिष्ठःइध्मोनराशंसइळोबर्हिर्देवीर्द्वारउषासानक्तादैव्यौहोतारौसरस्वतीळाभारत्यस्त्वष्टावनस्पतिस्वाहाकृतयस्त्रिष्टुप् ।

र्नऽआस्तामदितिःसुपुत्रास्वाहादेवाऽअमृतामादयंतां ॥ २ ॥ (७।१।३) अग्निंवोदेवमग्निभिःसजोषायजिष्ठंदूत
मध्वरेकृणुध्वं । योमर्त्येषुनिध्रुविर्ऋतावातपुर्मूर्धाघृतान्नःपावकः+ ॥ प्रोथदश्वोनयवसेविष्यन्यदामहःसंवरणाद्व्यस्था
त् । आदस्यवातोऽअनुवातिशोचिरधस्मतेव्रजनंकृष्णमस्ति ॥ उद्यस्यतेनवजातस्यवृष्णोग्नेचरंत्यजराऽइधानाः ।
अच्छाद्यामरुषोधूमऽएतिसंदूतोऽअग्नऽईयसेहिदेवान्+ ॥ वियस्यतेपृथिव्यांपाजोऽअश्रेत्तृषुयदन्नासमवृक्तजंभैः ।
सेनेवसृष्टाप्रसितिष्टऽएतियवंनदस्मजुह्वाविवेक्षि ॥ तमिद्दोषातमुषसियविष्ठमग्निमत्यंनमर्जयंतनरः । निशिशानाऽ
अतिथिमस्ययोनौदीदायशोचिराहुतस्यवृष्णः ॥ ३ ॥ सुसंदृक्तेस्वनीकप्रतीकंवियद्रुक्मोनरोचसऽउपाके । दिवोनते
तन्यतुरेतिशुष्मश्चित्रोनसूरःप्रतिचक्षिभानुं+ ॥ यथावःस्वाहाग्नयेदाशेमपरीळाभिर्घृतवद्भिश्चहव्यैः । तेभिर्नोऽअग्ने
ऽअमितैर्महोभिःशतंपूर्भिरायसीभिर्निपाहि ॥ यावातिसंतिदाशुषेऽअधृष्टागिरोवायाभिर्नृवतीरुरुष्याः । ताभिर्नः
सूनोसहसोनिपाहिस्मत्सूरीन्जरितॄन्जातवेदः ॥ निर्यत्पूतेवस्वधितिःशुचिर्गात्स्वयाकृपातन्वा३रोचमानः । आयोमा
त्रोरुशेन्योजनिष्टदेवयज्यायसुक्रतुःपावकः+ ॥ एतानोऽअग्नेसौभगादिदीह्यपिक्रतुंसुचेतसंवतेम । विश्वास्तोतृभ्यो
गृणतेचसंतुयूयंपातस्वस्तिभिःसदानः ॥ ४ ॥ (७।१।४) प्रवःशुक्रायभानवेभरध्वंहव्यंमतिंचाग्नयेसुपूतं । योदै

(७।१।३) अग्निंवइतिदशर्चस्यसूक्तस्यवसिष्ठोग्निस्त्रिष्टुप् । (७।१।४) प्रवःशुक्रायेतिदशर्चस्यसूक्तस्यवसिष्ठोग्निस्त्रिष्टुप् ।

व्यानिमानुषाजनूंष्यंतविंश्वानिविद्मनाजिगाति ॥ सगृत्सोऽअग्निस्तरुणश्चिदस्तुयतोयविंष्ठोऽअजनिष्टमातुः । संयोवनायुवतेशुचिंदन्भूरिंचिदन्नासमिदत्तिसद्यः+ ॥ अस्यदेवस्यसंसद्यनीकेयंमर्तासःश्येतंजगृभ्रे । नियोगृभंपौरुषेयीमुवोचदुरोकमग्निरायवेशुशोच ॥ अयंकविरकविषुप्रचेतामर्तेष्वग्निरमृतोनिधायि । समानोऽअत्रजुहुरःसहस्वःसदात्वेसुमनसःस्याम ॥ आयोयोनिंदेवकृतंससादक्रत्वाह्य१ग्निरमृताँऽअतारीत् । तमोषधीश्चवनिनश्चगर्भंभूमिश्चविश्वधायसंबिभर्ति ॥ ५ ॥ ईशेह्य१ग्निरमृतस्यभूरेरीशेरायःसुवीर्यस्यदातोः । मात्वावयंसहसावन्नवीरामाप्सवःपरिषदाममादुवः ॥ परिषद्यंह्यरणस्यरेक्णोनित्यस्यरायःपतयःस्याम । नशेषोऽअग्नेऽअन्यजातमस्त्यचेतानस्यमापथोविदुक्षः+ ॥ नहिग्रभायारणःसुशेवोन्योदर्योमनसामंतवाऽउं । अधाचिदोकःपुनरित्सऽएत्यानोवाज्यभीषाळेतुनव्यः ॥ त्वमंग्नेवनुष्यतोनिपाहित्वमुनःसहसावन्नवद्यात् । संत्वाध्वस्मन्वदभ्येतुपाथःसंरयिःस्पृहयाय्यःसहस्री+ ॥ एतानोऽअग्नेसौभगादिदीह्यपिक्रतुंसुचेतसंवतेम । विश्वास्तोतृभ्योगृणतेचसंतुयूयंपातस्वस्तिभिःसदानः ॥६॥ (७।१।५) प्राग्नयेतवसेभरध्वंगिरंदिवोऽअरतयेपृथिव्याः । योविश्वेषाममृतानामुपस्थेवैश्वानरोवावृधेजागृवद्भिः ॥ पृष्टोदिविधाय्यग्निःपृथिव्यांनेतासिंधूनांवृषभःस्तियानां । समानुषीरभिविशोविभातिवैश्वानरोवावृधानोवरेण ॥ त्वद्भिया

(७।१।५) प्राग्नयइतिनवर्चस्यसूक्तस्यवसिष्ठोवैश्वानरोग्निस्त्रिष्टुप् ।

Digitization by eGangotri Funding by MPF Delhi

विशऽआयन्नसिक्नीरसमनाजहतीर्भोजनानि । वैश्वानरपूरवेशोशुचानःपुरोयदग्नेदरयन्नदीदेः ॥ तवत्रिधातुपृथिवी
ऽउतद्यौर्वैश्वानरव्रतमग्नेसचंत । त्वंभासारोदसीऽआततंथाजस्रेणशोचिषाशोशुचानः ॥ त्वामग्नेहरितोवावशाना
गिरःसचंतेधुनयोघृताचीः । पतिंकृष्टीनांरथ्यंरयीणांवैश्वानरमुषसांकेतुमह्नाँऽ ॥ ७ ॥ त्वेऽअसुर्यं१वसवोन्यृण्वन्क्र
तुंहितेमित्रमहोजुषंत । त्वंदस्यूँरोकसोऽअग्नऽआजऽउरुज्योतिर्जनयन्नार्याय ॥ सजायमानःपरमेव्योमन्वायुर्नपाथः
परिपासिसद्यः । त्वंभुवनाजनयन्नभिक्रन्नपत्यायजातवेदोदशस्यन्+ ॥ तामग्नेऽअस्मेऽइषमेरयस्ववैश्वानरद्युमतीं
जातवेदः । ययाराधःपिन्वसिविश्ववारपृथुश्रवोदाशुषेमर्त्याय ॥ तंनोऽअग्नेमघवद्भ्यःपुरुक्षुंरयिंनिवाजंश्रुत्यंयुवस्व ।
वैश्वानरमहिनःशर्मयच्छरुद्रेभिरग्नेवसुभिःसजोषाः ॥ ८ ॥ (७।१।६) प्रसम्राजोऽअसुरस्यप्रशस्तिंपुंसःकृष्टीनाम
नुमाद्यस्य । इंद्रस्येवप्रतवसस्कृतानिवंदेदारुवंदमानोविवक्मि ॥ कविंकेतुंधासिंभानुमद्रेर्हिन्वंतिशंराज्यंरोदस्योः ।
पुरंदरस्यगीर्भिराविवासेग्नेर्व्रतानिपूर्व्यामहानि ॥ न्यक्रतून्ग्रथिनोमृध्रवाचःपणीँरश्रद्धाँऽअवृधाँऽअयज्ञान् । प्रप्रता
न्दस्यूँरग्निर्विवायपूर्वश्चकारापराँऽअयज्यून्+ ॥ योऽअपाचीनेतमसिमदंतीःप्राचीश्चकारनृतमःशचीभिः । तमीशा
नंवस्वोऽअग्निंगृणीषेनानतंदमयंतंपृतन्यून्+ ॥ योदेह्यो३अनमयद्वधस्नैर्योऽअर्यपत्नीरुषसश्चकार । सनिरुध्यानहु

(७।१।६) प्रसम्राजइतिसप्तर्चस्यसूक्तस्यवसिष्ठोवैश्वानरोग्निस्त्रिष्टुप् ।

षोयह्वोऽअग्निर्विशश्चक्रेबलिहृतःसहोभिः ॥ यस्यशर्मन्नुपविश्वेजनासऽएवैस्तस्थुःसुमतिंभिक्षमाणाः । वैश्वानरोव
रमारोदस्योराग्निःससादपित्रोरुपस्थं ॥ आदेवोददेबुध्न्या३वसूनिवैश्वानरऽउदितासूर्यस्य । आसमुद्रादवरादापरं
स्मादाग्निर्ददेदिवऽआपृथिव्याः+ ॥ ९ ॥ (७।१।७) प्रवोदेवंचित्सहसानमग्निमश्वंनवाजिनंहिषेनमोभिः । भवानो
दूतोऽअध्वरस्यविद्वान्त्मनादेवेषुविविदेमितद्रुः ॥ आयाह्यग्नेपथ्या३अनुस्वामंद्रोदेवानांसख्यंजुषाणः । आसानुशु
ष्मैर्नदयन्पृथिव्याजंभेभिर्विश्वमुशधग्वनानि ॥ प्राचीनोयज्ञःसुधितंहिबर्हिःप्रीणीतेऽअग्निरीळितोनहोता । आमा
तराविश्ववारेहुवानोयतोयविष्ठजज्ञिषेसुशेवः ॥ सद्योऽअध्वरेरथिरंजनंतमानुषासोविचेतसोयऽएषां । विशामधा
यिविश्पतिंदुरोणे३ग्निर्मंद्रोमधुवचाऽऋतावा ॥ असादिवृतोवह्निराजगन्वानग्निर्ब्रह्मानृषदनेविधर्ता । द्यौश्चयंपृथि
वीवावृधातेऽआयंहोतायजतिविश्ववारं ॥ एतेद्युम्नेभिर्विश्वमातिरंतमंत्रंयेवारंनर्याऽअतक्षन् । प्रयेविशस्तिरंतश्रोष
माणाऽआयेमेऽअस्यदीधयन्नृतस्य ॥ नूत्वामग्नऽईमहेवसिष्ठाऽईशानंसूनोसहसोवसूनां । इषंस्तोतृभ्योमघवद्भ्यऽआ
नड्यूयंपातस्वस्तिभिःसदानः ॥ १० ॥ (७।१।८) इंधेराजासमर्योनमोभिर्यस्यप्रतीकमाहुतंघृतेन । नरोहव्येभि
रीळतेसबाधऽआग्निरग्रंऽउषसामशोचि ॥ अयमुष्यसुमहाँऽअवेदिहोतामंद्रोमनुषोयह्वोऽअग्निः । विभाऽअकःससृ

(७।१।७) प्रवोदेवमितिसप्तर्चस्यसूक्तस्यवसिष्ठोग्निस्त्रिष्टुप् । (७।१।८) इंधेराजेतिसप्तर्चस्यसूक्तस्यवसिष्ठोग्निस्त्रिष्टुप् ।

Digitization by eGangotri. Funding MHRD Delhi

ज्ञानःपृथिव्यांकृष्णपविरोषधीभिर्ववक्षे ॥ कयानोऽअग्नेविवसःसुवृक्तिंकामुस्वधामृणवःशस्यमानः । कदाभवेमपत
यःसुदत्ररायोवंतारोदुष्टरस्यसाधोः+ ॥ प्रप्रायमग्निर्भरतस्यशृण्वेवियत्सूर्योनरोचतेबृहद्भाः । अभियःपूरुंपृतनासुत
स्थौद्युतानोदैव्योऽअतिथिःशुशोच ॥ असन्नित्वेऽआहवनानिभूरिभुवोविश्वेभिःसुमनाऽअनीकैः । स्तुतश्चिदग्नेशृ
ण्विषेगृणानःस्वयंवर्धस्वतन्वंसुजात ॥ इदंवचःशतसाःसंसहस्रमुदग्नयेजनिषीष्टद्विबर्हाः । शंयत्स्तोतृभ्यऽआपयेभ
वातिद्युमदमीवचातनंरक्षोहा+ ॥ नूत्वामग्नऽईमहेवसिष्ठाऽईशानंसूनोसहसोवसूनां । इषंस्तोतृभ्योमघवद्भ्यऽआन
ड्यूयंपातस्वस्तिभिःसदानः ॥ ११ ॥ (७।१।९) अबोधिजारऽउषसामुपस्थाद्धोतामंद्रःकवितमःपावकः । दधा
तिकेतुमुभयस्यजंतोर्हव्यादेवेषुद्रविणंसुकृत्सु ॥ ससुक्रतुर्योविदुरःपणीनांपुनानोऽअर्कंपुरुभोजसंनः । होतामंद्रोवि
शांदमूनास्तिरस्तमोददृशेराम्याणां ॥ अमूरःकविरदितिर्विवस्वान्त्सुसंसन्मित्रोऽअतिथिःशिवोनः । चित्रभानुरुषसां
भात्यग्रेपांगर्भःप्रस्व१आविवेश ॥ ईळेन्योवोमनुषोयुगेषुसमनगाऽअशुचज्जातवेदाः । सुसंदृशाभानुनायोविभातिप्र
तिगावःसमिधानंबुधंत ॥ अग्नेयाहिदूत्यं१मारिषण्योदेवाँऽअच्छाब्रह्मकृतागणेन । सरस्वतींमरुतोऽअश्विनापोय
क्षिदेवान्रत्नधेयायविश्वान् ॥ त्वामग्नेसमिधानोवसिष्ठोजरूथंहन्यक्षिरायेपुरंधिं । पुरुणीथाजातवेदोजरस्वयूयंपातस्व ॥११॥

(७।१।९) अबोधिजारइतिषळर्चस्यसूक्तस्यवसिष्ठोग्निस्त्रिष्टुप् ।

स्तिभि॒ःसदा॑नः ॥ १२ ॥ (७।१।१०) उ॒षोनजा॒रःपृ॒थुपाजो॑ऽअश्रे॒द्दवि॑द्युत॒द्दीद्य॒च्छोशु॑चानः । वृ॒षाहरि॒ःशुचि॒राभा॑तिभा॒साधियो॑हिन्वा॒नऽउ॑श॒तीर॑जीगः ॥ स्व१॒॑र्णवस्तो॑रु॒षसा॑मरोचिय॒ज्ञंत॑न्वा॒नाऽउ॒शिजो॒नमन्म॑ । अ॒ग्निर्जन्मा॑निदे॒वऽआविवि॒द्वान्द्र॒वद्दू॒तोदे॑व॒यावा॒वनि॑ष्ठः ॥ अच्छा॒गिरो॑म॒तयो॑दे॒वयंती॑र॒ग्निंयं॑ति॒द्रवि॑णं॒भिक्ष॑माणाः । सु॒सं॒दृशं॑सु॒प्रती॑कं॒स्वंचं॑हव्य॒वाह॑मर॒तिंमानु॑षाणां ॥ इंद्रं॑नोऽअग्ने॒वसु॑भिःस॒जोषा॑रु॒द्रंरु॒द्रेभि॒राव॑हाबृ॒हंतं॑ । आ॒दि॒त्येभि॒रदि॑तिंवि॒श्वज॑न्यां॒बृह॒स्पति॒मृक्व॑भिर्वि॒श्ववा॑रं ॥ मं॒द्रंहोता॑रमु॒शिजो॒यवि॑ष्ठम॒ग्निंविश॑ऽईळतेऽअध्व॒रेषु॑ । सहिक्षपा॑वाँ॒ऽअभ॑वद्र॒यीणा॒मतं॑द्रोदू॒तोय॒जथा॑यदे॒वान्+ ॥ १३ ॥ (७।१।११) म॒हाँऽअ॑स्यध्व॒रस्य॑प्रके॒तोनऽऋ॒तेत्वद॒मृता॑मादयंते । आविश्वे॑भिःस॒रथं॑याहिदे॒वैर्न्य॑ग्ने॒होता॑प्रथ॒मःस॑दे॒ह+ ॥ त्वामी॑ळतेऽअजि॒रंदू॒त्या॑यह॒विष्मं॑त॒ःसद॒मिन्मानु॑षासः । यस्य॑दे॒वैरास॑दोब॒र्हिर॒ग्नेहा॑न्यस्मैसु॒दिना॑भवंति ॥ त्रिश्चि॑द॒क्तोःप्रचि॑कितु॒र्वसू॑नि॒त्वेऽअं॒तर्दा॒शुषे॒मर्त्या॑य । म॒नु॒ष्वद॑ग्नऽइ॒हय॑क्षिदे॒वान्भवा॑नोदू॒तोऽअ॑भिशस्ति॒पावा॑ ॥ अ॒ग्निरी॑शेबृह॒तोऽअ॑ध्व॒रस्या॒ग्निर्विश्व॑स्यह॒विषः॑कृ॒तस्य॑ । क्रतुं॒ह्य॑स्य॒वस॑वोजु॒षंताथा॑दे॒वादधि॑रेहव्य॒वाहं॑ ॥ आग्ने॑वहहवि॒रद्या॑यदे॒वानिंद्र॑ज्येष्ठासऽइ॒हमा॑दयंतां । इ॒मंय॒ज्ञंदि॒विदे॒वेषु॑धेहियू॒यंपा॑तस्व॒स्तिभि॒ः

(७।१।१०) उषोनजारइतिपंचर्चस्यसूक्तस्यवसिष्ठोग्निस्त्रिष्टुप् । (७।१।११) महाँअसीतिपंचर्चस्यसूक्तस्यवसिष्ठोग्निस्त्रिष्टुप् ।

Digitization by eGangotri. Funding by MoE-IKS

सदा॑नः ॥ १४ ॥ (७।१।१२) अग॑न्मम॒हान॑म॑सा॒यवि॑ष्ठं॒योदी॒दाय॒समि॑द्धः॒स्वेदु॑रो॒णे । चि॒त्रभा॑नुं॒रोद॑सीऽअं॒तरु॒र्वी
स्वा॑हुतंवि॒श्वतः॑प्र॒त्यंचं॑ ॥ सम॒ह्नावि॒श्वा॑दुरि॒तानि॑सा॒ह्वान॒ग्निष्टं॑वे॒दम॒ऽआजा॒तवे॑दाः । सनो॑रक्षिषद्दुरि॒ताद॑व॒द्याद॒स्मा
न्गृ॑ण॒तऽउ॒तनो॑म॒घोनः॑ ॥ त्वंव॑रु॑णऽउ॒तमि॒त्रोऽअ॑ग्ने॒त्वांव॑र्धंतिम॒तिभि॒र्वसि॑ष्ठाः । त्वेवसु॑सुष॒णानि॑संतुयू॒यंपा॑तस्व॒स्ति
भि॒ःसदा॑नः ॥ १५ ॥ (७।१।१३) प्राग्नये॑वि॒श्वशु॑चे॑धियं॒धे॑सुर॒घ्नेमन्म॑धी॒तिंभ॑रध्वं । भरे॑ह॒विर्नब॒र्हिषि॑प्रीणा॒नोवै
श्वान॒राय॒यत॑येमती॒नां+ ॥ त्वम॑ग्ने॒शो॒चिषा॒शोशु॑चान॒ऽआरोद॑सीऽअपृणा॒जाय॑मानः । त्वंदे॒वाँऽअभि॑शस्तेरमुंचो॒वै
श्वा॑नरजातवेदोमहि॒त्वा ॥ जा॒तोयद॑ग्ने॒भुव॑ना॒व्यख्यः॑प॒शून्नगो॒पाऽइर्यः॒परि॑ज्मा । वैश्वा॑नर॒ब्रह्म॑णेविंदगा॒तुंयू॒यंपा॑तस्व॒
स्तिभि॒ःसदा॑नः ॥ १६ ॥ (७।१।१४) स॒मिधा॑जा॒तवे॑दसेदे॒वाय॑दे॒वहू॑तिभिः । ह॒विर्भिः॑शु॒क्रशो॑चिषेनम॒स्विनो॑व॒यंदा॑
शेमा॒ग्नये॑ ॥ व॒यंते॑ऽअग्नेस॒मिधा॑विधेमव॒यंदा॑शेमसुष्टु॒तीय॑जत्र । व॒यंघृ॒तेना॑ध्वरस्यहोतर्व॒यंदे॑वह॒विषा॑भद्रशोचे ॥ आ
नो॑दे॒वेभि॒रुप॑दे॒वहू॑ति॒मग्ने॑या॒हिवष॑ट्कृतिंजु॒षाणः॑ । तुभ्यं॑दे॒वाय॒दाश॑तःस्यामयू॒यंपा॑तस्व॒स्तिभि॒ःसदा॑नः॥१७॥(७।१।१५)
उ॒प॒स॒द्या॑यमी॒ळ्हुषे॑ऽआ॒स्ये॑जुहुताह॒विः । योनो॒नेदि॑ष्ठ॒माप्यं॑ ॥ यःपंच॑चर्ष॒णीर॒भिनि॑ष॒साद॒दमे॑दमे । क॒विर्गृ॒हप॑ति॒र्युवा॑ ॥

(७।१।१२) अगन्मेतितृचस्यसूक्तस्यवसिष्ठोग्निस्त्रिष्टुप् । (७।१।१३) प्राग्नयइतितृचस्यसूक्तस्यवसिष्ठोवैश्वानरोग्निस्त्रिष्टुप् । (७।१।१४) समिधेतितृचस्यसूक्तस्यवसिष्ठोग्निस्त्रिष्टुबाद्याबृहती। (७।१।१५) उपसद्यायेतिपंचदशर्चस्यसूक्तस्यवसिष्ठोग्निर्गायत्री ।

सनोवेदोऽअमात्यमग्नीरक्षतुविश्वतः । उतास्मान्पात्वंहसः ॥ नवंनुस्तोममग्नयेदिवःश्येनायजीजनं । वस्वःकुविद्वना
तिंनः ॥ स्पार्हायस्यश्रियोदृशेरयिर्वीरवतोयथा ॥ अग्रेयज्ञस्यशोचतः ॥ १८ ॥ सेमांवेतुवषट्कृतिमग्निर्जुषतनोगिरः।
यजिष्ठोहव्यवाहनः ॥ नित्वानक्ष्यविश्पतेद्युमंतंदेवधीमहि । सुवीरमग्नऽआहुत ॥ क्षपऽउस्रश्चदीदिहिस्वग्नयस्त्वया
वयं । सुवीरस्त्वमस्मयुः ॥ उपत्वासातयेनरोविप्रासोयंतिधीतिभिः । उपाक्षरासहस्रिणी ॥ अग्नीरक्षांसिसेधतिशु
क्रशोचिरमर्त्यः । शुचिःपावकऽईड्यः ॥ १९ ॥ सनोराधांस्याभरेशानःसहसोयहो । भगश्चदातुवार्यं ॥ त्वमग्नेवी
रवद्यशोदेवश्चसविताभगः । दितिश्चदातिवार्यं ॥ अग्नेरक्षाणोअंहसःप्रतिष्मदेवरीषतः । तपिष्ठैरजरोदह ॥ अधा
महीनऽआयस्यनाधृष्टोनृपीतये । पूर्भवाशतभुजिः ॥ त्वंनःपाह्यंहसोदोषावस्तरघायतः । दिवानक्तमदाभ्य ॥२०॥
(७।१।१६) एनावोऽअग्निंनमसोर्जोनपातमाहुवे । प्रियंचेतिष्ठमरतिंस्वध्वरंविश्वस्यदूतममृतं ॥ सयोजतेऽअरुषा
विश्वभोजसासदुद्रवत्स्वाहुतः । सुब्रह्मायज्ञःसुशमीवसूनांदेवंराधोजनानां ॥ उदस्यशोचिरस्थादाजुह्वानस्यमीढुषः।
उद्धूमासोऽअरुषासोदिविस्पृशःसमग्निमिंधतेनरः ॥ तंत्वादूतंकृण्महेयशस्तमंदेवाँऽआवीतयेवह । विश्वासूनोसह
सोमर्तभोजनारास्वतद्यत्त्वेमहे ॥ त्वमग्नेगृहपतिस्त्वंहोतानोऽअध्वरे । त्वंपोताविश्ववारप्रचेतायक्षिवेषिचवार्यं ॥ कृधि

(७।१।१६) एनावोअग्निमितिद्वादशर्चस्यसूक्तस्यवसिष्ठोऽग्निः प्रथमाद्ययुजोबृहत्यःद्वितीयादियुजःसतोबृहत्यः ।

Digitization by eGangotri. Funding MDF-Delhi

र॒त्नं॑यज॑मानायसुक्रतो॒त्वंहि॑र॑त्न॒धाऽअसि॑ । आन॑ऽऋ॒तेशि॑शीहि॒विश्व॑मृ॒त्विजं॑सु॒शंसो॒यश्च॒दक्ष॑ते ॥ २१ ॥ त्वेऽअ॑ग्नेस्वा
हु॒तप्रि॒या॑सःसंतु॒सू॒रयः॑ । य॒ंता॒रो॒येम॒घवा॑नो॒जना॑नामू॒र्वांदयं॑त॒गोनाँ॑ ॥ ये॒षामिळा॑घृ॒तह॑स्तादुरो॒णऽआँ॑ऽअपि॑प्रा॒ता॑नि॒
षीद॑ति । ताँस्त्रा॑यस्वसहस्यद्रु॒हो॒नि॒दो॒यच्छा॑नः॒शर्म॑दी॒र्घश्रुत्+ ॥ सम॒द्रया॑चजि॒ह्वया॒वह्नि॑रा॒साविदु॒ष्ट॑रः । अग्ने॑र॒यिंम॒
घव॑द्भ्योन॒ऽआव॑हह॒व्यदा॑तिंचसूदय ॥ येराधां॑सि॒दद॒त्यश्व्या॑म॒घाकामे॑न॒श्रव॑सोम॒हः । ताँऽअंह॑सःपिपृहिप॒र्तृभि॒ष्ट्वंश॒तं
पू॒र्भिर्य॑विष्ठ्य ॥ दे॒वोवो॑द्रविणो॒दाःपू॒र्णांवि॑वष्ट्या॒सिचं॑ । उद्वा॑सि॒ञ्चध्व॒मुप॑वापृणध्व॒मादिद्वो॑दे॒वऽओ॑हते ॥ तंहोता॑रम
ध्व॒रस्य॒प्रचे॑तसं॒वह्निं॑दे॒वाऽअ॑कृण्वत । दधा॑ति॒रत्नं॑विध॒तेसु॒वीर्य॑म॒ग्निर्जना॑यदा॒शुषे॑ ॥ २२ ॥ (७।१।१७) अग्ने॒भव॑सु
ष॒मिधा॒समि॑द्धऽउ॒तब॒र्हिरु॑र्वि॒यावि॑स्तृणीतां ॥ उ॒तद्वार॑ऽउश॒तीर्विश्र॑यंतामु॒तदे॒वाँऽउ॑श॒तऽआव॑हे॒ह+ ॥ अग्ने॒वीहि॑ह॒वि
षा॒यक्षि॑दे॒वान्त्स्व॑ध्व॒राकृ॑णुहिजातवेदः ॥ स्व॒ध्व॒राक॑रतिजा॒तवे॑दा॒यक्ष॑द्दे॒वाँऽअ॒मृता॑न्पि॒प्रय॑च्च ॥ वंस्व॒विश्वा॒वार्या॑णि
प्रचेतःस॒त्याभ॑वंत्वा॒शिषो॑नोऽअ॒द्य+ ॥ त्वामु॒तेद॑धिरेहव्य॒वाहं॑दे॒वासो॑ऽअग्नऽऊ॒र्जऽआन॑पातं ॥ तेते॑दे॒वाय॒दाश॑तःस्या
मम॒हो॒नो॒रत्ना॒विद॑धऽइया॒नः+ ॥ २३ ॥ (७।२।१) त्वेह॒यत्पि॒तर॑श्चिन्नऽइंद्र॒विश्वा॑वा॒माज॑रि॒तारो॒ऽअस॑न्वन् । त्वे

(७।१।१७) अग्नेभवेतिसप्तर्चस्यसूक्तस्यवसिष्ठोग्निर्द्विपदात्रिष्टुप् ॥ द्वितीयेनुवाकेषोडशसूक्तानि (७।२।१) त्वेहयदितिपंचविंशत्यृचस्यसूक्तस्यमैत्रावरुणिर्वसिष्ठइंद्रोंत्यानांचतसृणांसुदास्त्रिष्टुप् (सुदाइतिसांतः) ।

गावःसुदुघास्त्वेह्यश्वास्त्वंवसुदेवयुतेवनिष्ठः ॥ राजेवहिजनिभिःक्षेष्येवावद्युभिरभिविदुष्कविःसन् । पिशागिरोमघवन्गोभिरश्वैस्त्वायतःशिशीहिरायेऽअस्मान्+ ॥ इमाऽउत्वापस्पृधानासोऽअत्रमंद्रागिरोदेवयंतीरुपस्थुः । अर्वाचीतेपथ्यारायऽएतुस्यामतेसुमताविंद्रशर्मन् ॥ धेनुंनत्वासूयवसेदुदुक्षन्नुपब्रह्माणिससृजेवसिष्ठः । त्वामिन्मेगोपतिंविश्वऽआहानऽइंद्रःसुमतिंगंत्वच्छ ॥ अर्णांसिचित्पप्रथानासुदासऽइंद्रोगाधान्यकृणोत्सुपारा । शर्धंतंशिम्युमुचथस्यनव्यःशापंसिंधूनामकृणोदशस्तीः ॥ २४ ॥ पुरोळाऽइत्तुर्वशोयक्षुरासीद्रायेमत्स्यासोनिशिताऽअपीव । श्रुष्टिंचक्रुर्भृगवोद्रुह्यवश्चसखासखायमतरद्विषूचोः ॥ आपक्थासोभलानसोभनंतालिनासोविषाणिनःशिवासः । आयोनयत्सधमाऽआर्यस्यगव्यातृत्सुभ्योऽअजगन्युधानॄन्+ ॥ दुराध्यो३ अदितिंस्रेवयंतोचेतसोविजगृभ्रेपरुष्णीं । महाविव्यक्पृथिवींपत्यमानःपशुष्कविरशयच्चायमानः ॥ ईयुरर्थंनन्यर्थंपरुष्णीमाशुश्चनेदभिपित्वंजगाम । सुदासऽइंद्रःसुतुकाँऽअमित्रानरंधयन्मानुषेवध्रिवाचः ॥ ईयुर्गावोनयवसादगोपायथाकृतमभिमित्रंचितासः । पृश्निगावःपृश्निनिप्रेषितासःश्रुष्टिंचक्रुर्नियुतोरंतयश्च ॥ २५ ॥ एकंचयोविंशतिंचश्रवस्यावैकर्णयोर्जनान्राजान्यस्तः । दस्मोनसद्मन्निशिशातिबर्हिःशूरःसर्गमकृणोदिंद्रऽएषां ॥ अधश्रुतंकवषंवृद्धमप्स्वनुद्रुह्युंनिवृणक्वज्रबाहुः । वृणानाऽअत्रसख्यायसख्यंत्वायंतोयेऽअमदन्ननुत्वा ॥ विसद्योविश्वादृंहितान्येषामिंद्रःपुरःसहसासप्तदर्दः । व्यानवस्यतृत्सवेगयंभाग्जेष्म

पूरुंविदथेमृध्रवाचं ॥ निगव्यवोनवोद्रुह्यवश्चषष्टिःशतासुषुपुःषट्सहस्रा । षष्टिर्वीरासोऽअधिषड्दुवोयुविश्वेदिंद्रस्य वीर्याकृतानि ॥ इंद्रेणैतेतृत्सवोवेविषाणाऽआपोनसृष्टाऽअधवंतनीचीः । दुर्मित्रासःप्रकलविन्मिमानाजहुर्विश्वानि भोजनासुदासे ॥ २६ ॥ अर्धवीरस्यशृतपामनिंद्रंपराशर्धंतंनुनुदेऽअभिक्षां । इंद्रोमन्युंमन्युम्योमिमायभेजेपथोव र्तनिंपत्यमानः ॥ आध्रेणचित्तद्वेकंचकारसिंह्यंचित्पेत्वेनाजघान । अवस्रक्तीर्वेश्यावृश्चदिंद्रःप्रायच्छद्विश्वाभोजना सुदासे ॥ शश्वँतोहिशत्रवोरारधुष्टेभेदस्यचिच्छर्धतोविंदरंधि । मर्ताँऽएनःस्तुवतोयःकृणोतितिग्मंतस्मिन्निजहिवज्र मिंद्र ॥ आवदिंद्रंयमुनातृत्सवश्चप्रात्रभेदंसर्वतातामुषायत् । अजासश्चशिग्रवोयक्षवश्चबलिंशीर्षाणिजभ्रुरश्व्यानि ॥ नतऽइंद्रसुमतयोनरायःसंचक्षेपूर्वाऽउषसोननूत्नाः । देवकंचिन्मान्यमानंजघंथावत्मनाबृहतःशंबरंभेत् ॥ २७ ॥ प्रयेगृहादममदुस्त्वायापराशरःशतयातुर्वसिष्ठः । नतेभोजस्यसख्यंमृषंताधासूरिभ्यःसुदिनाव्युच्छान् ॥ द्वेनप्तुर्देव वतःशतेगोर्द्वारथावधूमंतासुदासः । अर्हन्नग्नेपैजवनस्यदानंहोतेवसद्मपर्येमिरेभन् ॥ चत्वारोमापैजवनस्यदानाःस्म दिष्टयःकृशनिनोनिरेके । ऋज्रासोमापृथिविष्ठाःसुदासस्तोकंतोकायश्रवसेवहंति ॥ यस्यश्रवोरोदसीऽअंतरुर्वीशी र्ष्णेशीर्ष्णेविबभाजाविभक्ता । सप्तेदिंद्रंनस्रवतोगृणंतिनियुध्यामधिमशिशादभीके ॥ इमंनरोमरुतःसश्चतानुदिवो

दा॒सं॑नपि॒तरं॑सु॒दासः॑ । अ॒वि॒ष्टना॑पैजव॒नस्य॒केतं॑दू॒णाशं॑क्ष॒त्रम॒जरं॑दु॒वो॒यु+ ॥ २८ ॥ (७।२।२) यस्ति॒ग्मशृं॑गोवृष॒भो
नभी॒मऽएकः॑कृ॒ष्टीश्च्या॒वय॑ति॒प्रविश्वाः॑ । यःशश्व॑तो॒ऽअदा॑शुषो॒गय॑स्यप्रयं॒तासि॒सुष्वि॑तराय॒वेदः॑ ॥ त्वंह॒त्यदिं॑द्र॒कुत्सं॑
माव॒ःशुश्रू॑षमाणस्त॒न्वा॑सम॒र्ये॑ । दासं॒यच्छुष्णं॒कुय॑वं॒न्य॑स्मा॒ऽअरं॑धयऽआर्जुने॒याय॒शिक्ष॑न् ॥ त्वंधृ॑ष्णोधृष॒तावी॒तह॑व्यं॒
प्राव॒ोविश्वा॑भिरू॒तिभिः॑सु॒दासं॑ । प्रपौरु॑कुत्सिं॑त्र॒सद॑स्युमाव॒ःक्षेत्र॑सातावृत्र॒हत्ये॑षुपू॒रुं+ ॥ त्वंनृभि॑र्नृमणोदे॒ववी॑तौ॒भूरी॑
णिवृ॒त्राह॑र्यश्वहं॑सि । त्वंनिदस्युं॒चुमु॑रिं॒धुनिं॒चास्वा॑पयोद॒भीत॑येसु॒हंतु॑ ॥ तव॑च्यौ॒त्नानि॑वज्रहस्त॒तानि॒नव॒यत्पुरो॑नव॒तिं
चं॑स॒द्यः । नि॒वेश॑नेशत॒तमावि॑वेषी॒रहं॑न्चवृ॒त्रंनमु॑चिमु॒ताहं॑न् ॥ २९ ॥ सना॒तात॑ऽइंद्र॒भोजं॑नानिरा॒तह॑व्यायदा॒शुषे॑सु
दासे॑ । वृष्णे॑ते॒हरी॒वृष॑णायुनज्मि॒व्यंतु॒ब्रह्मा॑णिपुरुशाक॒वाजं॑ ॥ मातेऽअ॒स्यांस॑हसाव॒न्परि॑ष्टाव॒घाय॑भूमहरिवःपरा॒दै ।
त्राय॑स्वनोवृ॒केभि॒र्वरू॑थै॒स्तव॑प्रि॒यासः॑सू॒रिषु॑स्याम ॥ प्रि॒यास॒ऽइत्ते॑मघवन्न॒भिष्टौ॒नरो॑मदेमश॒रणे॑सखा॑यः । नितु॒र्वशं॒नि
याद्वं॑शिशीह्यतिथि॒ग्वाय॒शंस्यं॑करि॒ष्यन्+ ॥ स॒द्यश्चि॒न्नुते॑मघवन्न॒भिष्टौ॒नरः॑शंसंत्युक्थ॒शास॑ऽउ॒क्था । येते॒हवे॑भि॒र्विप॒णीँ
ऽरदा॑न्न॒स्मान्वृ॑णीष्व॒युज्या॑य॒तस्मै॑ ॥ ए॒तेस्तोमा॑न॒रांनृ॑तम॒तुभ्य॑मस्म॒द्र्यं॑चो॒दद॑तोम॒घानि॑ । तेषा॑मिंद्रवृत्र॒हत्ये॑शि॒वोभू॒ःस

(७।२।२) यस्तिग्मशृंगइत्येकादशर्चस्यसूक्तस्यवसिष्ठइंद्रस्त्रिष्टुप् ।

खां॑च॒शूरों॑वि॒ताच॑नृ॒णां ॥ नूइं॑द्रशूर॒स्तव॑मानऽऊ॒तीब्रह्म॑जू॒तस्त॒न्वा॑वावृधस्व । उप॑नो॒वाजा॑न्मिमी॒ह्युप॒स्तीन्यू॒यंपा॑त०
॥ ३० ॥ ॥ इतिपंचमाष्टकेद्वितीयोऽध्यायः ॥ २ ॥ ॥ ॥ ॥ ॥

चतुस्त्रिंशाध्यायेवर्गाः ३० सूक्तानि १८ ऋचः १५६ ॥ त्यागः ॥ समिद्धायाग्नय. नराशंसाये. इळाये. बर्हिषइ. देवीभ्योद्वार्भ्यइ. उषासानक्ताभ्या. देवीभ्यांहोतृभ्या. सरस्वतीळाभारतीभ्य. त्वष्ट्र. वनस्पतय. स्वाहाकृतीभ्य. अग्नय. २० वैश्वानरायाग्नय. १६ अग्नय. ३३ वैश्वानरायाग्नय. ३ अग्नय. ३७ इंद्राये. २१ सुदासइ. ४ इंद्राये. २१ ॥ इतिपंचमेद्वितीयः ॥

उग्रोदशासविपिबनर्वं॑वैराजमृतें॑त्यामुदुर्ष॑ञ्ज्योनिरातेनसोमः॑पंचैं॑द्रंनरोब्रह्माणों॑यंसोमआनः॑प्रवोद्वादशगायत्रं॑
त्रिविराळंतं॑मोषुसप्ताधिकाप्रगाथं॑तृतीयाद्विपदां॑सौदासैरग्नौप्रक्षिप्यमाणाःशक्तिं॑रंत्यंप्रगाथमालेभें॑सोर्धर्च॑उक्ते
दह्यतंतंपुत्रोक्तं॑वसिष्ठः॑समापयतेतिशाट्यायनकं॑वसिष्ठस्यैवहतपुत्रस्यार्षमितितांडकं॑श्वित्यंचःषळूनासंस्तवोंव
सिष्ठस्यसपुत्रस्यें॑द्रेणवासंवादः॑प्रशुक्रपंचाधिकावैश्वदेवंहां॑द्याएकविंशतिर्द्विपदां॑अब्जामहेरर्धर्च॑उत्तरोहिर्बुध्न्या
यंशंनःपंचोनाशांतिः ॥ ३ ॥ ॥ ॥ ॥ ॥ ॥

॥ हरिःओम् ॥ (७।२।३) उ॒ग्रोजं॑ज्ञेवी॒र्यां॑यस्व॒धावा॒न्चक्रि॒रपो॒नर्यो॒यत्क॑रि॒ष्यन् । जग्मि॒र्युवा॑नृ॒षद॑न॒मवों॑भिस्त्रा॒ता ॥ १५ ॥

(७।२।३) उग्रोजज्ञइतिदशर्चस्यसूक्तस्यवसिष्ठइंद्रस्त्रिष्टुप् ।

न॒ऽइंद्र॒ऽएनं॑सोम॒हश्चि॑त् ॥ हंतां॑वृ॒त्रमिंद्र॒ःशूशुं॑वान॒ःप्रावी॒न्नुवी॒रोजं॑रि॒तारं॑मू॒ती । कर्ता॑सु॒दासे॒ऽअहु॒वाऽउं॑लो॒कंदाता॒वसु॒
मु॒हुरादा॒शुषे॑भूत् ॥ यु॒ध्मोऽअं॑न॒र्वा॑खं॒ज॒कृत्स॒मद्वा॒शूरं॑ःसत्रा॒षाट्ज॒नुषे॒मषा॑ह्ळः । व्या॑स॒ऽइंद्र॒ःपृतं॑ना॒ःस्वोजा॒ऽअधा॒विश्वँ
श॒त्रूयं॑तं॑जघान ॥ उ॒भेचिं॑दिंद्र॒रोदं॑सीमहि॒त्वाप॑प्राथ॒तवि॑षीभिस्तुविष्मः । निवज्र॒मिंद्रो॒हरिं॑वा॒न्मिमि॑क्ष॒न्त्समंधं॑सा॒म
दे॑षु॒वाऽउं॑वोच ॥ वृषा॑जजा॒नवृषं॑णं॒रणा॑य॒तमुं॑चि॒न्नारी॒नर्यं॑ससूव । प्रयःसेना॒नीर॒धनृ॒भ्यो॒ऽअस्ती॒नःसत्वा॑ग॒वेष॑ण॒ःसधृ॒
ष्णुः+ ॥ १ ॥ नूचि॒त्सभ्रे॒षते॒जनो॒नरे॒षन्मनो॒योऽअं॑स्यघो॒रमा॒विवा॑सात् । य॒ज्ञैर्यऽइंद्रे॒दधं॑ते॒दुवां॑सि॒क्षय॒त्सरा॒यऽऋं॑त॒पा
ऽऋं॑ते॒जाः+ ॥ यदिं॑द्र॒पूर्वो॒ऽअप॑राय॒शिक्ष॒न्नय॒ज्ज्याया॒न्कनी॑यसोदे॒ष्णं+ । अ॒मृत॒ऽइत्पर्या॑सीतदू॒रमाचिं॑त्र॒चित्र्यं॑भरा॒र॒
यिं॑नः ॥ यस्तं॑ऽइंद्रप्रि॒योजनो॒ददा॑श॒दसं॑न्निरे॒केऽअं॑द्रिव॒ःसखा॑ते । व॒यंतेऽअ॒स्यांसु॑म॒तौचनि॑ष्ठाःस्याम॒वरू॑थे॒ऽअघ्नं॑तो॒नृपीं॑
तौ ॥ ए॒षःस्तोमो॑ऽअचिक्रद॒द्वृषा॑तऽउ॒तस्ता॒मुर्मं॑घवन्नक्रपिष्ट । रा॒यस्कामो॑जरि॒तारं॑त॒ऽआग॒न्त्वमं॒गशं॑क्र॒वस्व॒ऽआशं॑को
नः ॥ सनं॑ऽइंद्र॒त्वयं॑तायाऽइ॒षेधा॒स्त्मना॑च॒येम॒घवा॑नोजु॒नंतिं॑ । वस्वी॒षुतेंजरि॒त्रेऽअं॑स्तुश॒क्तिर्यू॒यं० ॥ २ ॥ (७।२।४)
असा॑विदे॒वंगोऽऋं॑जीकु॒मंधो॒न्यं॑स्मि॒न्निंद्रो॑ज॒नुषें॑मुवोच । बोधा॑मसित्वाहर्यश्वय॒ज्ञैर्बोधा॑न॒ःस्तोम॒मंधं॑सो॒मदे॑षु ॥ प्रयं॑ति
य॒ज्ञंवि॒पयं॑तिब॒र्हिःसो॑म॒मादो॑वि॒दथे॑दु॒ध्रवा॑चः । न्यु॑भ्रियं॑तेय॒शसो॑गृ॒भादादू॒रऽउं॑पब्दो॒वृषं॑णोनृ॒षाचः ॥ त्वमिं॑द्र॒स्त्रावि॒त्

(७।२।४) असाविदेवमितिदशर्चस्यसूक्तस्यवसिष्ठइंद्रस्त्रिष्टुप् ।

वाऽअ॒पस्क॒ःपरि॑ष्ठिता॒ऽअहि॑नाशूरपू॒र्वीः । त्वद्वा॑वक्रे॒रथ्यो॒३॒नधेना॒रेजं॑ते॒विश्वा॑कृ॒त्रिमा॑णिभी॒षा+ ॥ भी॒मोवि॑वे॒षायु॑धे
भिरे॒षामपां॑सि॒विश्वा॒नर्या॑णिवि॒द्वान् । इंद्रः॒पुरो॒जर्हृ॑षाणो॒विदू॑धो॒द्विवज्र॑हस्तोमहि॒नाजं॑घान ॥ नया॒तवं॑ऽइंद्रजू॒जुवु॒र्नो
नवं॑दंनाशविष्ठवे॒द्याभिः॑ । सशर्ध॑द॒र्योविषु॑णस्यजं॒तोर्माशि॒श्नदे॑वा॒ऽअपि॑गुर्ऋ॒तंनः॑ ॥ ३ ॥ अ॒भिक्रत्वें॑द्रभू॒रध॒ज्मन्नतें॑वि
व्यश्नहि॒मानं॒रजां॑सि । स्वेना॒हिवृ॒त्रंशव॑साज॒घंथ॒नशत्रु॒रंतं॑विविदद्यु॒धाते॑ ॥ दे॒वाश्चि॑त्तेऽअसु॒र्या॑य॒पूर्वे॑नु॒क्ष॒त्राय॑ममिरे॒स
हांसि । इंद्रो॑म॒घानि॑दयतेवि॒षह्ये॑द्रं॒वाज॑स्यजोहुवंतसा॒तौ+ ॥ की॒रिश्चि॒द्धित्वाम॑वसे॒जु॒हावेशा॑नमिंद्र॒सौभ॑गस्य॒भूरेः॑ ।
अवो॑बभूथशतमूतेऽअ॒स्मेऽअ॑भिक्ष॒त्तुस्त्वाव॑तोवरू॒ता+ ॥ सखा॑यस्तऽइंद्रवि॒श्वह॑स्यामनमो॒वृधा॑सोमहि॒नात॑रुत्र । व॒न्वं
तु॑स्मा॒तेव॑सासमी॒के॒३॒भीतिम॒र्यो॑व॒नुषां॒शवां॑सि ॥ सनं॑ऽइंद्र॒त्वयं॑तायाऽइ॒षेधा॒स्त्मना॑च॒येम॒घवा॑नोजु॒नंति॑ । वस्वी॒षुतें॑ज
रि॒त्रेऽअं॑स्तुश॒क्तिर्यू॒यं०॥४॥(७।२।५)पिबा॒सोम॑मिंद्र॒मंद॑तुत्वा॒यंते॑सुषा॒वह॑र्य॒श्वाद्रिः॑ । सो॒तुर्बा॒हुभ्या॒सुय॑तो॒नार्वा॑ ॥ यस्ते॒
मदो॒युज्य॒श्चारु॒रस्ति॒येन॑वृ॒त्राणि॑हर्यश्व॒हंसि॑ । सत्वामि॑द्रप्रभूवसोममत्तु ॥ बोधा॒सुमे॑मघव॒न्वाच॒मेमांयांते॒वसि॑ष्ठो॒ऽअर्च॑
ति॒प्रश॑स्तिं । इ॒माब्रह्म॑सध॒मादे॑जुषस्व ॥ श्रुधीहवं॑विपिपा॒नस्याद्रे॒र्बोधा॒विप्र॒स्यार्च॑तोमनी॒षां । कृ॒ष्वादु॒वांस्यंत॑मा॒सचे॒
मा+ ॥ नते॒गिरो॒ऽअपि॑मृष्येतु॒रस्य॒नसु॑ष्टु॒तिम॑सु॒र्य॑स्यवि॒द्वान् । सदा॑ते॒नाम॑स्वयशोविवक्मि ॥ ५ ॥ भूरि॒हिते॒सव॑ना

(७।२।५) पिबासोममितिनवर्चस्यसूक्तस्यवसिष्ठइंद्रोविराळंत्यात्रिष्टुप् ।

मानु॑षेषु॒भूरि॑मनी॒षीह॑वते॒त्वामित् । मार॑ऽअ॒स्मन्म॑घव॒न्ज्योक॑ः ॥ तुभ्येदि॒मासव॑नाशूर॒विश्वा॒तुभ्यं॒ब्रह्मा॑णि॒वर्ध॑नाकृणोमि । त्वंनृभि॒र्हव्यो॑वि॒श्वधा॑सि ॥ नूचि॒न्नुते॒मन्य॑मानस्यद॒स्मोद॑श्नुवंतिमहि॒मान॑मुग्र । नवी॒र्य॑मिंद्रते॒नराध॑ः ॥ येच॒पूर्व॒ऽऋष॑यो॒येच॒नूत्ना॒ऽइंद्र॒ब्रह्मा॑णिज॒नयं॑त॒विप्रा॑ः । अ॒स्मेते॑संतुस॒ख्याशि॒वानि॑यू॒यं॰ ॥ ६ ॥ (७।२।६) उदु॒ब्रह्मा॑ण्यैरतश्रव॒स्येंद्रं॑सम॒र्ये॑महयावसिष्ठ । आयोविश्वा॑नि॒शव॑सात॒तानो॑पश्रो॒ताम॒ऽईव॑तो॒वचां॑सि ॥ अया॑मि॒घोष॑ऽइंद्रदे॒वजा॑मिरि॒ज्यंत॒यच्छु॒रुधो॒विवा॑चि । न॒हिस्वमायु॑श्चिकि॒तेजने॑षु॒तानीदंहां॒स्यति॑पर्ष्य॒स्मान्+ ॥ यु॒जेरथं॑ग॒वेष॑णं॒हरि॑भ्या॒मुप॒ब्रह्मा॑णिजुजु॒षाणम॑स्थुः । विबा॑धिष्ट॒स्यरोद॑सीमहि॒त्वेंद्रो॑वृ॒त्राण्य॑प्र॒तीज॑घ॒न्वान्+ ॥ आप॑श्चित्पिप्युस्त॒र्यो॒३॑नगावो॒नक्ष॑न्नृ॒तंज॑रि॒तार॑स्तऽइंद्र । या॒हिवा॒युर्ननि॒युतो॑नो॒ऽअच्छा॒त्वंहि॒धीभि॒र्दय॑से॒विवाजा॑न् ॥ तेत्वा॒मदा॑ऽइंद्रमादयंतुशु॒ष्मिणं॑तुवि॒राध॑संजरि॒त्रे । एको॑देव॒त्रादय॑से॒हिमर्ता॑न॒स्मिन्छू॑र॒सव॑नेमादयस्व ॥ ए॒वेदिंद्रं॒वृष॑णं॒वज्र॑बाहुंवसि॑ष्ठासोऽअ॒भ्य॑र्चंत्य॒र्कैः । सन॑ःस्तु॒तोवी॒रव॑द्धातु॒गोम॑द्यू॒यंपा॑तस्व॒स्तिभि॒ःसदा॑नः ॥ ७ ॥ (७।२।७) योनि॑ष्टऽइंद्र॒सद॑नेऽअकारि॒तमानृ॒भि॑ःपुरुहूत॒प्रया॑हि । असो॒यथा॑नोवि॒तावृ॒धेच॒ददो॒वसू॑निम॒मद॑श्च॒सोमै॑ः ॥ गृ॒भी॒तंते॒मन॑ऽइंद्रद्वि॒बर्हा॑ःसु॒तःसोम॒ःपरि॑षिक्ता॒मधू॑नि । विसृ॑ष्टधेनाभरतेसुवृ॒क्तिरि॒यमिंद्रं॒जोहु॑वतीमनी॒षा+ ॥ आनो॑दि॒वऽआपृ॑थि॒व्याऽऋ॑जीषिन्नि॒दंब॒

(७।२।६) उदुब्रह्माणीतिषळर्चस्यसूक्तस्यवसिष्ठइंद्रस्त्रिष्टुप् । (७।२।७) योनिष्टइतिषळर्चस्यसूक्तस्यवसिष्ठइंद्रस्त्रिष्टुप् ।

CC-0. Radi Acharya Kathmandu Collection

हिंःसोमपेयाययाहि । वहंतुत्वाहरयोमद्र्यंचमांगूषमच्छातवसंमदाय ॥ आनोविश्वाभिरूतिभिःसजोषाब्रह्मजुषाणो
हर्यश्वयाहि । वरीवृजत्स्थविरेभिःसुशिप्रास्मेदधद्वृषणंशुष्ममिंद्र ॥ एषःस्तोमोमहऽउग्रायवाहेधुरी३वात्योनवाजयन्न
धायि । इंद्रत्वायमर्कऽईट्टेवसूनांदिवीवद्यामधिनःश्रोमतंधाः ॥ एवानऽइंद्रवार्यस्यपूर्धिप्रतेमहींसुमतिंवेविदाम ।
इषंपिन्वमघवद्भ्यःसुवीरांयूयंपात० ॥ ८ ॥ (७।२।८) आतेमहऽइंद्रोत्युग्रसमन्यवोयत्समरंतसेनाः । पतातिदि
द्युन्नर्यस्यबाह्वोर्मातेमनोविष्वद्र्य१ग्विचारीत् ॥ निदुर्गऽइंद्रश्नथिह्यमित्रानभियेनोमर्तासोऽअमंति । आरेतंशंसंकृ
णुहिनिनित्सोरानोभरसंभरणंवसूनां ॥ शतंतेशिप्रिन्नूतयःसुदासेसहस्रंशंसाऽउतरातिरस्तु । जहिवधर्वनुषोमर्त्यस्या
स्मेद्युम्नमधिरत्नंचधेहि ॥ त्वावंतोहींद्रक्रत्वेऽअस्मित्वावंतोवितुःशूररातौ । विश्वेदहानितविषीवऽउग्रँऽओकःकृणु
ष्वहरिवोनमर्धीः ॥ कुत्साऽएतेहर्यश्वायशूषमिंद्रेसहोदेवजूतमियानाः । सत्राकृधिसुहनाशूरवृत्रावयंतरुत्राःसनुया
मवाजं ॥ एवानऽइंद्रवार्यस्यपूर्धिप्रतेमहींसुमतिंवेविदाम । इषंपिन्वमघवद्भ्यःसुवीरांयूयंपात० ॥ ९ ॥ (७।२।९)
नसोमऽइंद्रमसुतोममादनाब्रह्माणोमघवानंसुतासः । तस्माऽउक्थंजनयेयज्जुजोषन्नृवन्नवीयःशृणवद्यथानः ॥ उक्थ
ऽउक्थेसोमऽइंद्रंममादनीथेनीथेमघवानंसुतासः । यदींसबाधःपितरंनपुत्राःसमानदक्षाऽअवसेहवंते ॥ चकारताकृ ॥१७॥

(७।२।८) आतेमहइतिषळर्चस्यसूक्तस्यवसिष्ठइंद्रस्त्रिष्टुप् । (७।२।९) नसोमइतिपंचर्चस्यसूक्तस्यवसिष्ठइंद्रस्त्रिष्टुप् ।

णवंन्नूनमन्यायानिंन्नुवंतिंवेधसंःसुतेषुं । जनींरिवपतिरेकंःसमानोनिमांमृजेपुरऽइंद्रःसुसर्वाः ॥ एवातमांहुरुतशृंण्व
ऽइंद्रऽएकोंविभक्तातरणिंर्मघानां । मिथस्तुरंऽऊतयोयस्यंपूर्वीरस्मेभद्राणिंसश्चतप्रियाणिं ॥ एवावसिंष्ठऽइंद्रंमूतयेनॄ
न्कृंष्टीनांवृंषभंसुतेगृंणाति । सहस्रिणऽउपंनोमाहिवाजांन्यूयंपांत० ॥ १० ॥ (७।२।१०) इंद्रंनरोंनेमधिंताहवं
तेयत्पार्यायुनजंतेधियस्ताः । शूरोनृषांताशवंसश्चकानऽआगोमंतिव्रजेभंजात्वंनंः ॥ यऽइंद्रशुष्मोंमघवन्तेऽअस्तिशि
क्षासखिंभ्यःपुरुहूतनृभ्यंः । त्वंहिदृह्ळामंघवन्विचेंताऽअपांवृधिपरिंवृतंनराधंः ॥ इंद्रोराजाजगंतश्चर्षणीनामधिक्षमि
विषुरूपंयदस्तिं । ततोंददातिदाशुषेवसूंनिचोदद्राधऽउपंस्तुतश्चिदर्वाक्⁺ ॥ नूचिंन्नऽइंद्रोंमघवासहूंतीदानोवाजंनि
यंमतेनऽऊती । अनूंनायस्यदक्षिंणापीपायंवामंनृभ्योंऽअभिवींतासखिंभ्यः ॥ नूऽइंद्ररायेवरिंवस्कृधीनऽआतेमनों
ववृत्यामसघार्यं । गोमदश्वांवद्रथंवद्व्यंतोंयूयंपांत० ॥ ११ ॥ (७।२।११) ब्रह्मांणऽइंद्रोपंयाहिविद्वानर्वाचंस्तेहरं
यःसंतुयुक्ताः । विश्वेंचिद्धित्वांविहवंतमर्ताऽअस्माकमिच्छृंणुहिविश्वमिन्व ॥ हवंतऽइंद्रमहिमाव्यांनड्ब्रह्मयत्पासिं
शवसिन्नृषीणां । आयद्वज्रंदधिषेहस्तंऽउग्रघोरःसन्क्रत्वांजनिष्ठाऽअषांह्ळः ॥ तवप्रणींतींद्रजोहुंवानान्त्संयन्नॄन्नरोदं
सीनिनेथं । महेक्षत्रायशवंसेहिजज्ञेतूंतुजिंचित्तूतुंजिरशिश्नत् ॥ एभिर्नंऽइंद्राहंभिर्दशस्यदुर्मिंत्रासोहिक्षितयःपवंते ।

(७।२।१०) इंद्रंनरइतिपंचर्चस्यसूक्तस्यवसिष्ठइंद्रस्त्रिष्टुप् । (७।२।११) ब्रह्माणइतिपंचर्चस्यसूक्तस्यवसिष्ठइंद्रस्त्रिष्टुप् ।

प्रतियच्चष्टेऽअनृतमनेनाऽअवद्वितावरुणोमायीनःसात् ॥ वोचेमेदिंद्रंमघवानमेनंमहोरायोराधसोयद्ददन्नः । योऽ
अर्चतोब्रह्मकृतिमविष्ठोयूयंपात० ॥ १२ ॥ (७।२।१२) अयंसोमऽइंद्रतुभ्यंसुन्वऽआतुप्रयाहिहरिवस्तदोकाः ।
पिबात्वं१स्यसुषुतस्यचारोर्ददोमघानिमघवन्नियानः+ ॥ ब्रह्मन्वीरब्रह्मकृतिंजुषाणोर्वाचीनोहरिभिर्याहितूयं । अस्मि
न्नूषुसवनेमादयस्वोपब्रह्माणिशृणवऽइमानः ॥ कातेऽअस्त्यरंकृतिःसूक्तैःकदानूनंतेमघवन्दाशेम । विश्वामतीराततं
नेत्वायाधामऽइंद्रशृणवोहवेमा+ ॥ उतोघातेपुरुष्या३इदासन्येषांपूर्वेषामशृणोर्ऋषीणां । अधाहंत्वामघवन्जोहवीमि
त्वंनइंद्रासिप्रमतिःपितेव ॥ वोचेमेदिंद्रंमघवानमेनंमहोरायोराधसोयद्ददन्नः । योऽअर्चतोब्रह्मकृतिमविष्ठोयूयंपा
त० ॥ १३ ॥ (७।२।१३) आनोदेवशवसायाहिशुष्मिन्भवावृधऽइंद्ररायोऽअस्य । महेनृम्णायनृपतेसुवज्रमहिं
क्षत्रायपौंस्यायशूर ॥ हवंतऽउत्वाहव्यंविवाचितनूषुशूराःसूर्यस्यसातौ । त्वंविश्वेषुसेन्योजनेषुत्वंवृत्राणिरंधयासुहं
तु ॥ अहायदिंद्रसुदिनाव्युच्छान्दधोयत्केतुमुपमंसमत्सु । न्यं१ग्निःसीददसुरोनहोताहुवानोऽअत्रसुभगायदेवान्+ ॥
वयंतेतऽइंद्रयेचदेवस्तवंतशूरददतोमघानि । यच्छासूरिभ्यऽउपमंवरूथंस्वाभुवोजरणामश्नवंत ॥ वोचेमेदिंद्रंमघवा

(७।२।१२) अयंसोमइतिपंचर्चस्यसूक्तस्यवसिष्ठइंद्रस्त्रिष्टुप् । (७।२।१३) आनोदेवइतिपंचर्चस्यसूक्तस्यवसिष्ठइंद्रस्त्रिष्टुप् ।

नमेनंम॒होरा॒योराध॑सो॒यद्दद॑न्नः । योऽअर्च॑तो॒ब्रह्म॑कृति॒मवि॑ष्ठोयू॒यंपा॑त० ॥ १४ ॥ (७।२।१४) प्रव॒ऽइंद्रा॑य॒माद॑नं॒ हर्य॑श्वायगायत । सखा॑यःसोम॒पाव्ने॑ ॥ शंसे॑दु॒क्थंसु॒दान॑वऽउ॒तद्यु॒क्षंयथा॒नरः॑ । च॒कृ॒मास॒त्यरा॑धसे ॥ त्वंन॑ऽइंद्रवाज॒युस्त्वंग॒व्युःश॑तक्रतो । त्वंहि॑रण्य॒युर्व॑सो ॥ व॒यामिं॑द्रत्वा॒यवो॒भिप्रणो॑नुमोवृषन् । वि॒द्धीत्व१॒स्यनो॑वसो ॥ मानो॑नि॒दे च॒वक्त॑वे॒र्योरं॑धी॒ररा॑व्णे । त्वेऽअ॑पि॒क्रतु॒र्मम॑ ॥ त्वंवर्मा॑सिस॒प्रथः॑पुरोयो॒धश्च॑वृत्रहन् । त्वया॒प्रति॑ब्रुवेयु॒जा+ ॥ १५ ॥ म॒हाँऽउ॒तासि॒यस्य॒तेनु॑स्व॒धाव॑री॒सहः॑ । म॒म्नाते॑ऽइंद्र॒रोद॑सी ॥ तंत्वा॑म॒रुत्वं॑ती॒परि॒भुव॒द्वाणी॑स॒याव॑री । नक्ष॑माणास॒ह द्युभिः॑ ॥ ऊ॒र्ध्वास॒स्त्वान्विंद॑वो॒भुव॑न्द॒स्ममु॑प॒द्यवि॑ । संते॑नमंतकृ॒ष्टयः॑ ॥ प्रवो॑म॒हेम॑हि॒वृधे॑भरध्वं॒प्रचे॑तसे॒प्रसु॑म॒तिंकृ॑णुध्वं । विशः॑पू॒र्वीःप्रच॑राचर्षणि॒प्राः+ ॥ उ॒रु॒व्यच॑सेम॒हिने॑सुवृ॒क्तिमिंद्रा॑य॒ब्रह्म॑जनयंत॒विप्राः॑ । तस्य॑व्र॒तानि॒नमिं॑नंति॒धीराः॑ ॥ इंद्रं॒वाणी॒रनु॑त्तमन्यु॒मेवस॒त्राराजा॑नंदधि॒रेसह॑ध्यै । हर्य॑श्वायबर्हया॒सम॒पीन्+ ॥ १६ ॥ (७।२।१५) मोषु त्वा॑वा॒घत॑श्च॒नारेऽअ॒स्मन्निरी॑रमन् । आ॒रात्ता॑च्चि॒त्सध॒माद॑न॒ऽआग॑ही॒हवा॒सन्नुप॑श्रुधि ॥ इ॒मेहिते॑ब्रह्म॒कृतः॑सु॒तेस॒चाम

(७।२।१४) प्रवइंद्रायेतिद्वादशर्चस्यसूक्तस्यवसिष्ठइंद्रोगायत्र्यंत्यास्तिस्रोविराजः । (७।२।१५) मोषुत्वेतिसप्तविंशत्यृचस्यसूक्तस्यवसिष्ठइंद्रः प्रथमाचतुर्थीषष्ठ्यादियुगृचश्चबृहत्यःद्वितीयापंचम्याद्ययुगृचश्चसतोबृहत्यःरायस्कामइतितृतीयाद्विपदाविराद् (इंद्रक्रतुन्नइत्यर्धर्चो वासिष्ठःशक्तिऋषिरितिशाट्यायनब्राह्मणं, इंद्रक्रतुन्नइत्युत्तरद्वयात्मकस्यशक्तिऋषिरितितांडकब्राह्मणं) ।

धौ॒नम॒क्षऽआसं॑ते । इंद्रे॒कामं॑जरि॒तारो॑वसू॒यवो॒रथे॒नपाद॒माद॑धुः ॥ रा॒यस्का॑मो॒वज्र॑हस्तंसु॒दक्षि॑णंपु॒त्रोनपि॒तरं॑हुवे ॥
इ॒मऽइंद्रा॑यसुन्वि॒रे॒सोमा॑सो॒दध्या॑शिरः । ताँऽआमदा॑यवज्रहस्तपी॒तये॒हरि॑भ्यां॒या॒ह्योक॒ऽआ+ ॥ श्रव॒च्छुत्कर्ण॑ऽईयते॒व
सू॑ना॒ंनू॒चिं॑न्नो॒मधिं॑ष॒द्गिर॑ः । स॒द्यश्चि॒द्यःस॒हस्रा॑णिश॒तादद॒न्नकि॒र्दित्सं॑त॒मामिं॑नत् ॥ १७ ॥ सवी॒रोऽअप्रं॑तिष्कुत॒ऽइंद्रे॑
णशू॒शुवे॒नृभि॑ः । यस्तें॑गभी॒रासवं॑नानिवृत्रहन्त्सु॒नोत्या॒चधावं॑ति ॥ भवा॒वरू॑थंमघवन्म॒घोना॒ंयत्स॒मजा॑सि॒शर्धं॑तः । वि
त्वाहं॑तस्य॒वेदं॑नंभजेम॒ह्यादू॒णाशों॑भरा॒गयं॑ ॥ सुनोता॑सोम॒पाव्ने॒सोम॒मिंद्रा॑यव॒ज्रिणे॑ । पचं॑ताप॒क्तीरवं॑सेकृणु॒ध्वमित्पृ॒णन्नि
त्पृं॑ण॒तेमयं॑ः ॥ मास्मैं॑धतसोमिनो॒दक्षं॑ताम॒हेकृं॑णु॒ध्वंरा॒यऽआ॒तुजें॑ । त॒रणि॒रिज्जं॑यति॒क्षेति॒पुष्यं॑ति॒नदे॒वासं॑ःकव॒त्नवें॑ ॥
नकिं॑ःसुदा॒सो॒रथं॒पर्या॑स॒नरीं॑रमत् । इंद्रो॒यस्या॑वि॒तायस्यं॑म॒रुतो॒गम॒त्सगोमं॑तिव्र॒जे+ ॥ १८ ॥ गम॒द्वाजं॑वा॒जयं॑न्निंद्र॒म
र्त्यो॒यस्य॒त्वमं॑वि॒ताभुवं॑ः । अ॒स्माकं॑बोध्यवि॒तारथा॑नाम॒स्माकं॑शूरनृ॒णां+ ॥ उदिन्न्वं॑स्यरिच्य॒तेंशो॒धनं॒नजि॒ग्युषं॑ः । यऽ
इंद्रो॒हरि॑वा॒न्नदं॑भंति॒तंरि॒पोदक्षं॑दधातिसो॒मिनि॑ ॥ मंत्र॒मखर्वं॒सुधि॑तंसु॒पेशं॑स॒दधा॑तय॒ज्ञिये॒ष्वा । पू॒र्वीश्च॒नप्रसि॑तयस्तरंति॒
तंयऽइंद्रे॒कर्मं॑णा॒भुवं॑त् ॥ कस्तमिं॑द्र॒त्वाव॑सु॒मामर्त्यों॑दधर्षति । श्र॒द्धाऽइत्ते॑मघव॒न्पार्ये॑दि॒विवा॒जीवाजं॑सिषासति ॥ म॒
घोनं॑ःस्मवृत्र॒हत्ये॑षुचोदय॒येदद॑तिप्रि॒यावसु॑ । तव॒प्रणी॑तीहर्यश्वसू॒रिभि॒र्विश्वा॑तरेमदुरि॒ता+ ॥ १९ ॥ तवे॒दिं॑द्राव॒मंव
सु॒त्वंपु॑ष्यसिमध्य॒मं । स॒त्राविश्वं॑स्यपर॒मस्यं॑राजसि॒नकिं॑ष्ट्वा॒गोषु॑वृण्वते ॥ त्वंविश्वं॑स्यधन॒दाऽअं॑सिश्रु॒तोयऽईं॒भवं॑त्या॒ज

यः । तवायंविश्वःपुरुहूतपार्थिवोवस्युर्नामभिक्षते ॥ यदिंद्रयावतस्त्वमेतावदहमीशीय । स्तोतारमिद्दिधिषेयरदाव
सोनपापत्वायरासीय ॥ शिक्षेयमिन्महयतेदिवेदिवेरायऽआकुहचिद्विदे । नहित्वदन्यन्मघवन्नऽआप्यंवस्योऽअ
स्तिपिताचन + ॥ तरणिरित्सिषासतिवाजंपुरंध्यायुजा । आवऽइंद्रंपुरुहूतंनमेगिरानेमिंतष्टेवसुद्रुं ॥ २० ॥ नदुष्टु
तीमर्त्योविंदतेवसुनस्रेधंतंरयिर्नशत् । सुशक्तिरिन्मघवन्तुभ्यंमावतेदेष्णंयत्पार्येदिवि + ॥ अभित्वाशूरनोनुमोदु
ग्धाऽइवधेनवः । ईशानमस्यजगतःस्वर्दृशमीशानमिंद्रतस्थुषः ॥ नत्वावाँऽअन्योदिव्योनपार्थिवोनजातोनजनि
ष्यते । अश्वायंतोमघवन्निंद्रवाजिनोगव्यंतस्त्वाहवामहे ॥ अभीषतस्तदाभरेंद्रज्यायःकनीयसः । पुरूवसुर्हिमघव
न्त्सनादसिभरेभरेचहव्यः ॥ पराणुदस्वमघवन्नमित्रान्त्सुवेदानोवसूकृधि । अस्माकंबोध्यविताममहाधनेभवावृधःसखी
नां ॥ इंद्रक्रतुंनऽआभरपितापुत्रेभ्योयथा । शिक्षाणोऽअस्मिन्पुरुहूतयामनिजीवाज्योतिरशीमहि ॥ मानोऽअज्ञा
तावृजनादुराध्योमाशिवासोऽअवक्रमुः । त्वयावयंप्रवतःशश्वतीरपोतिशूरतरामसि ॥ २१ ॥ (७।२।१६) श्वि
त्यंचोमादक्षिणतस्कपर्दाधियंजिन्वासोऽअभिहिप्रमंदुः । उत्तिष्ठन्वोचेपरिबर्हिषोनृन्नमेदूरादवितवेवसिष्ठाः ॥ दूरा

(७।२।१६) श्वित्यंचइतिचतुर्दशर्चस्यसूक्तस्यवसिष्ठऋषिःआद्यानांपंचानांवसिष्ठपुत्राऋषयःआद्यानांनवानांवसिष्ठपुत्रादेवताःअंत्यानांपंचानांवसिष्ठोदेवतात्रिष्टुप् (आद्यानांनवानामिंद्रोदेवताअंत्यानांपंचानांवसिष्ठोदेवताव्यत्यासेनमिथऋषीतौवा) ।

दिंद्रंमनयन्नासुतेनतिरोवैशंतमतिपांतमुग्रं । पाशद्युम्नस्यवायतस्यसोमात्सुतादिंद्रोऽवृणीतावसिष्ठान् ॥ एवेन्नुकंसिं
धुंमेभिस्ततारेवेन्नुकंभेदमेभिर्जघान । एवेन्नुकंदाशराज्ञेसुदासंप्रावदिंद्रोब्रह्मणावोवसिष्ठाः ॥ जुष्टीनरोब्रह्मणावःपि
तृणामक्षमव्ययंनकिलारिषाथ । यच्छक्वरीषुबृहतारवेणेंद्रेशुष्ममदधातावसिष्ठाः ॥ उद्द्यामिवेत्तृष्णजोनाथितासो
दीधयुर्दाशराज्ञेवृतासः । वसिष्ठस्यस्तुवतऽइंद्रोऽअश्रोदुरुंतृत्सुभ्योऽअकृणोदुलोकं+ ॥ २२ ॥ दंडाऽइवेद्गोऽअज
नासऽआसन्परिच्छिन्नाभरताऽअर्भकासः । अभवच्चपुरऽएतावसिष्ठऽआदित्तृत्सूनांविशोऽअप्रथंत ॥ त्रयःकृण्वंति
भुवनेषुरेतस्तिस्रःप्रजाऽआर्याज्योतिरग्राः । त्रयोघर्मासऽउषसंसचंतेसर्वाँऽइत्ताँऽअनुविदुर्वसिष्ठाः ॥ सूर्यस्येववक्ष
थोज्योतिरेषांसमुद्रस्येवमहिमागभीरः । वातस्येवप्रजवोनान्येनस्तोमोवसिष्ठाऽअन्वेतवेवः ॥ तऽइन्निण्यंहृदयस्यप्र
केतैःसहस्रवल्शमभिसंचरंति । यमेनततंपरिधिंवयंतोऽप्सरसऽउपसेदुर्वसिष्ठाः ॥ विद्युतोज्योतिःपरिसंजिहानंमि
त्रावरुणायदपश्यतांत्वा । तत्तेजन्मोतैकंवसिष्ठागस्त्योयत्त्वाविशऽआजभार ॥ २३ ॥ उतासिमैत्रावरुणोवसिष्ठोर्व
श्यांब्रह्मन्मनसोधिजातः । द्रप्संस्कन्नंब्रह्मणादैव्येनविश्वेदेवाःपुष्करेत्वाददंत ॥ सप्रकेतऽउभयस्यप्रविद्वान्त्सहस्र ॥२०॥
दानऽउतवासदानः । यमेनततंपरिधिंवयिष्यन्नप्सरसःपरिजज्ञेवसिष्ठः ॥ सत्रेहजाताविषितानमोभिःकुंभेरेतःसि
षिचतुःसमानं । ततोहमानऽउदियायमध्यात्ततोजातमृषिमाहुर्वसिष्ठं ॥ उक्थभृतंसामभृतंबिभर्तिग्रावाणंबिभ्रत्प्र

व॑दा॒त्यग्रे॑ । उपै॑नमाध्वंसुमन॒स्यमा॑ना॒ऽआवो॑गच्छातिप्रतृदो॒वसि॑ष्ठः ॥ २४ ॥ (७।३।१) प्रशु॒क्रैतु॑दे॒वीम॑नी॒षाऽअ॒
स्मत्सुत॑ष्टो॒रथो॒नवा॒जी+ ॥ वि॒दुःपृ॑थि॒व्यादि॒वोज॒नित्रं॑शृ॒ण्वंत्यापो॒ऽअध॒क्षरं॑तीः ॥ आप॑श्चिदस्मै॒पिन्वं॑तपृ॒थ्वीर्वृ॒त्रेषु॒शूरा॒
मंसं॑तऽउ॒ग्राः+ ॥ आधू॒र्ष्वं॑स्मै॒दधा॒ताश्वा॒निंद्रो॒नव॒ज्रीहिर॑ण्यबाहुः ॥ अ॒भिप्रस्था॒ताहे॑वय॒ज्ञंयाते॑व॒पत्म॒न्त्मना॑हिनोत ॥
त्मना॑स॒मत्सु॑हि॒नोत॑य॒ज्ञंदधा॑तके॒तुंजना॑यवी॒रं॑+ ॥ उद॑स्य॒शुष्मा॑द्भा॒नुर्नार्त॒बिभ॑र्ति॑भा॒रंपृ॑थि॒वीनभूम॑ ॥ ह्वया॑मिदे॒वाँऽ
अया॑तुरग्ने॒साध॑न्नृतेन॒धियं॑दधामि ॥ अ॒भिवो॑दे॒वींधियं॑दधिध्वं॒प्रवो॑देव॒त्रावाचं॑कृणुध्वं ॥ आच॑ष्टऽआसां॒पाथो॑न॒दीनां॒
वरु॑णऽउ॒ग्रःस॒हस्र॑चक्षाः ॥ २५ ॥ राजा॑रा॒ष्ट्राणां॒पेशो॑न॒दीना॒मनु॑त्तमस्मैक्ष॒त्रंवि॒श्वायु॑ ॥ अवि॑ष्टोऽअ॒स्मान्विश्वा॑सुवि॒
क्ष्वद्युं॑कृणोत॒शंसं॑निनि॒त्सोः+ ॥ व्ये॑तुदि॒द्युद्द्वि॒षामशे॑वायु॒योत॒विष्व॒ग्रप॑स्त॒नूनां॑ ॥ अवी॑न्नोऽअ॒ग्निर्ह॒व्यान्नमो॑भि॒ःप्रेष्ठो॑ऽ
अस्माऽअधायि॒स्तोम॑ः ॥ स॒जूर्दे॒वेभि॑र॒पांनपा॑तं॒सखा॑यंकृध्वंशि॒वोनो॑ऽअस्तु ॥ अ॒ब्जामु॒क्थैरहिं॑गृणीषेबु॒ध्नेन॒दीनां॒रज॑ः
सु॒षीद॑न् ॥ मानोहि॑र्बु॒ध्न्यो॑रि॒षेधा॒न्माय॒ज्ञोऽअ॑स्यस्रिधदृता॒योः+ ॥ उ॒तन॑ऽए॒षुनृषु॒श्रवो॑धु॒ःप्ररा॒येयं॑तु॒शर्धं॑तोऽअ॒र्य॑ः+ ॥

तृतीयेनुवाकेद्वाविंशतिसूक्तानि (७।३।१) प्रशुक्रैत्वितिपंचविंशत्यृचस्यसूक्तस्यवसिष्ठोविश्वेदेवाद्विपदाविराट् अंत्याश्चतस्रस्त्रिष्टुभःअब्जामुक्थैरितिद्विपदायाअहिर्देवता मानोहिर्बुध्न्योरित्यस्याअहिर्बुध्न्यः (इतश्चत्वारिवैश्वदेवसूक्तानि। भेदपक्षे–देवाः १ आपः १ इंद्रः २ यज्ञः ३ देवाः २ वरुणः १ देवाः ३ अग्निः १ अपांनपात् १ अहिः १ अहिर्बुध्न्यः १ देवाः २ देवपत्नीत्वष्टारः १ त्वष्टा १ विश्वे. ४ एवं २५)

तपंतिशत्रुंस्व१र्णभूमामहासेनासोऽअमेभिरेषां ॥ आयन्नःपत्नीर्गमन्त्वच्छात्वष्टासुपाणिर्दधातुवीरान्+ ॥ २६ ॥
प्रतिनःस्तोमंत्वष्टाजुषेतस्यादस्मेऽअरमतिर्वसूयुः+ ॥ तानोरासन्रातिषाचोवसून्यारोदसीवरुणानीशृणोतु । वरूत्री
भिःसुशरणोनोऽअस्तुत्वष्टासुदत्रोविदधातुरायः ॥ तन्नोरायःपर्वतास्तन्नऽआपस्तद्रातिषाचऽओषधीरुतद्यौः । वन
स्पतिभिःपृथिवीसजोषाऽउभेरोदसीपरिपासतोनः ॥ अनुतदुर्वीरोदसीजिहातामनुद्युक्षोवरुणऽइंद्रसखा । अनुवि
श्वेमरुतोयेसहासोरायःस्यामधरुणंधियध्यै ॥ तन्नऽइंद्रोवरुणोमित्रोऽअग्निरापऽओषधीर्वनिनोजुषंत । शर्मन्त्स्याम
मरुतामुपस्थेयूयंपात० ॥ २७ ॥ (७।३।२) शंनऽइंद्राग्नीभवतामवोभिःशंनऽइंद्रावरुणारातहव्या । शमिंद्रासोमा
सुवितायशंयोःशंनऽइंद्रापूषणावाजसातौ ॥ शंनोभगःशमुनःशंसोऽअस्तुशंनःपुरंधिःशमुसंतुरायः । शंनःसत्यस्यसु
यमस्यशंसःशंनोऽअर्यमापुरुजातोऽअस्तु ॥ शंनोधाताशमुधर्तानोऽअस्तुशंनऽउरूचीभवतुस्वधाभिः । शंरोदसीबृ
हतीशंनोऽअद्रिःशंनोदेवानांसुहवानिसंतु ॥ शंनोऽअग्निर्ज्योतिरनीकोऽअस्तुशंनोमित्रावरुणावश्विनाशं । शंनःसु
कृतांसुकृतानिसंतुशंनऽइषिरोऽअभिवातुवातः ॥ शंनोद्यावापृथिवीपूर्वहूतौशमंतरिक्षंदृशयेनोऽअस्तु । शंनऽओष
धीर्वनिनोभवंतुशंनोरजसस्पतिरस्तुजिष्णुः+ ॥ २८ ॥ शंनऽइंद्रोवसुभिर्देवोऽअस्तुशमादित्येभिर्वरुणःसुशंसः । शं

॥२१॥

(७।३।२) शंनइंद्राग्नीइतिपंचदशर्चस्यसूक्तस्यवसिष्ठोविश्वेदेवास्त्रिष्टुप् (अत्रसूक्तेसर्वेपिविश्वेदेवाः)।

नोरुद्रोरुद्रेभिर्जलाषःशंनस्त्वष्टाग्नाभिरिहश्रृणोतु ॥ शंनःसोमोभवतुब्रह्मशंनःशंनोग्रावाणःशमुसंतुयज्ञाः । शंनःस्व
रूणांमितयोभवंतुशंनःप्रस्व १ःशम्वस्तुवेदिः ॥ शंनःसूर्यऽउरुचक्षाऽउदेतुशंनश्चतस्रःप्रदिशोभवंतु । शंनःपर्वताध्रुव
योभवंतुशंनःसिंधवःशमुसंत्वापः ॥ शंनोऽअदितिर्भवतुव्रतेभिःशंनोभवंतुमरुतःस्वर्काः । शंनोविष्णुःशमुपूषानोऽ
अस्तुशंनोभवित्रंशम्वस्तुवायुः+ ॥ शंनोदेवःसवितात्रायमाणःशंनोभवंतूषसोविभातीः । शंनःपर्जन्योभवतुप्रजाभ्यः
शंनःक्षेत्रस्यपतिरस्तुशंभुः+ ॥ २९ ॥ शंनोदेवाविश्वदेवाभवंतुशंसरस्वतीसहधीभिरस्तु । शमभिषाचःशमुरातिषा
चःशंनोदिव्याःपार्थिवाःशंनोऽअप्याः ॥ शंनःसत्यस्यपतयोभवंतुशंनोऽअर्वतःशमुसंतुगावः । शंनऽऋभवःसुकृतः
सुहस्ताःशंनोभवंतुपितरोहवेषु ॥ शंनोऽअजऽएकपाद्देवोऽअस्तुशंनोहिर्बुध्न्य १ःशंसमुद्रः । शंनोऽअपांनपात्पेरुरस्तु
शंनःपृश्निर्भवतुदेवगोपा ॥ आदित्यारुद्रावसवोजुषंतेदंब्रह्मक्रियमाणंनवीयः । शृण्वंतुनोदिव्याःपार्थिवासोगोजा
ताऽउतयेयज्ञियासः ॥ येदेवानांयज्ञियायज्ञियानांमनोर्यजत्राऽअमृताऽऋतज्ञाः। तेनोरासंतामुरुगायमद्ययूयंपात०
॥ ३० ॥ (अथपरिशिष्टं ॥ शंवतीःपारयंत्येतेतंपृच्छंतिवचोयुजा । अभ्यारंतंयमाकेतुंयऽएवेदमितिब्रवन् ॥ भा
साकेतुंपरिस्रुतंभारतीर्ब्रह्मवर्धनीः । संजानानामहीमातायऽएवेदमितिब्रवत् ॥ इंद्रस्तांकिंविभुंप्रभुंभानुनेयंसरस्वतीं ।
येनंसूर्यमरोचयद्येनेमेरोदसीऽउभे ॥ जुषस्वाग्नेऽअंगिरःकाण्वंमेध्यातिथिं । मात्वासोमस्यबर्बृहत्सुतस्यमधुमत्तमः ॥

त्वमग्नेऽअंगिरःशोचस्वदेववीतमः । आशंतमशंतमाभिरभिष्टिभिःशांतिःस्वस्तिमंकुर्वत ॥ शंनःकनिक्रदद्देवःपर्जन्योऽअभिवर्षतु । शंनोद्यावापृथिवीशंप्रजाभ्यःशंनएधिद्विपदेशंचतुष्पदे ॥ १ ॥) इतिपंचमाष्टकेतृतीयोऽध्यायः ॥ ३ ॥

पंचत्रिंशाध्यायेवर्गाः ३० सूक्तानि १६ ऋचः १६५ ॥ त्यागः ॥ इंद्रायेदं. १११ वसिष्ठपुत्रेभ्य. ९ वसिष्ठाये. ५ देवेभ्य. अब्भ्यइ. इंद्राये. २ यज्ञाये. ३ देवेभ्य. २ वरुणाये. देवेभ्य. ३ अग्नय. अपांनप्त्रेग्नय. अहयेग्नय. अहयेबुध्न्यायाग्नय. देवेभ्य. २ देवपत्नीत्वष्टृभ्य. विश्वेभ्योदेवेभ्य. १९ ॥ इतिपंचमेतृतीयः ॥

प्रब्रह्मनवावोष्टांवुदुष्यःसावित्रंमंत्येवाजिन्यौंभगमितिभागोवार्धर्चंऊर्ध्वःसप्तवैश्वदेवंत्वोश्रुष्टिःप्रातर्भागंजगत्याद्यालिंगोक्तदेवतांत्योषस्यांप्रब्रह्माणःषड्वैश्वदेवंतुप्रवःपंचदधिक्रांदाधिक्रंजगत्याद्यालिंगोक्तदेवतांदेवश्चतुष्कंसावित्रंमिमारौद्रंत्रिष्टुबंतंमापोयमापमृभुक्षणआर्भवंमंत्यावैश्वदेवीवांसमुद्रज्येष्ठाआपमांमांमैत्रावरुण्याग्नेयींवैश्वदेवीनदीस्तुतिर्जागतंमंत्यातिजगतीशक्वरीवांदित्यानांतृचमादित्यंत्वादित्यासःप्रद्यावाद्यावापृथिवीयंवास्तोर्वास्तोष्पत्यंममीवहाष्टौवास्तोष्पत्यांद्यागायत्रींशेषास्त्र्युपरिष्टाद्बृहत्यादयोनुष्टुभंःप्रस्वापिन्यउपनिषत्कईपंचाधिकामारुतंहांद्याएकादशद्विपदांमध्वःसप्तप्रसाकमुक्षेषंड्यंत्रायध्वेद्वादशत्रिप्रगाथादिंनवम्याद्यागायत्र्योंत्यानुष्टुंब्रौद्रीमृत्युविमोचनी ॥ ४ ॥ ॥ ॥ ॥ ॥

॥२२॥

॥ हरिःॐम् ॥ (७।३।३) प्रब्रह्मैतुसदनादृतस्यविरश्मिभिःससृजेसूर्योगाः । विसानुनापृथिवीसंस्त्रऽउर्वीपृथु
प्रतीकमध्येधेऽअग्निः+ ॥ इमांवांमित्रावरुणासुवृक्तिमिषंनकृण्वेऽअसुरानवीयः । इनोवामन्यःपदवीरदब्धोजनंच
मित्रोयततिब्रुवाणः+ ॥ आवातस्यध्रजतोरंतऽइत्याऽअपीपयंतधेनवोनसूदाः । महोदिवःसदनेजायमानोचिंक्रदद्वृष
भःसस्मिन्नूधन् ॥ गिरायऽएतायुनजद्धरीतऽइंद्रप्रियासुरथाशूरधायू । प्रयोमन्युंरिरिंक्षतोमिनात्यासुक्रतुमर्यमणंव
वृत्यां ॥ यजंतेऽअस्यसख्यंवयश्चनमस्विनःस्वऽऋतस्यधामन् । विपृक्षोबाबधेनृभिःस्तवानऽइदंनमोरुद्रायप्रेष्ठं ॥१॥
आयत्साकंयशसोवावशानाःसरस्वतीसप्तथीसिंधुमाता । याःसुष्वयंतसुदुघाःसुधाराऽअभिस्वेनपयसापीप्यानाः ॥
उतत्येनोमरुतोमंदसानाधियंतोकंचवाजिनोवंतु । मानःपरिख्यदक्षराचरंत्यवीवृधन्युज्यंतेरयिंनः ॥ प्रवोमहीमरमं
तिंकृणुध्वंप्रपूषणंविदथ्यं१नवीरं । भगंधियोवितारंनोऽअस्याःसातौवाजंरातिषाचंपुरंधिं ॥ अच्छायंवोमरुतःश्लो
कऽएत्वच्छाविष्णुंनिषिक्तपामवोभिः । उतप्रजायैगृणतेवयोधुर्यूयंपात० ॥ २ ॥ (७।३।४) आवोवाहिष्ठोवहतु

(७।३।३) प्रब्रह्मेतिनवर्चस्यसूक्तस्यवसिष्ठोविश्वेदेवास्त्रिष्टुप् (भेदपक्षे–विश्वेदेवाः ३ इंद्रार्यमणौ १ रुद्रः १ नद्यः १ मरुतः १ विश्वेदेवाः
१ विष्णुमरुतः १ एवं ९)। (७।३।४) आवोवाहिष्ठेत्यष्टर्चस्यसूक्तस्यवसिष्ठोविश्वेदेवास्त्रिष्टुप् (भेदपक्षे–ऋभवः २ इंद्रः ६ एवमष्टौ)।

स्तवध्यैरथोवाजाऽऋभुक्षणोऽअमृक्तः । अभित्रिपृष्ठैःसवनेषुसोमैर्मदेसुशिप्रामहभिःपृणध्वं ॥ यूयंहरत्नंमघवत्सुधत्थस्वर्दृशंऽऋभुक्षणोऽअमृक्तं । संयज्ञेषुस्वधावंतःपिबध्वंविनोराधांसिमतिभिर्दयध्वं ॥ उवोचिथहिमघवन्देष्णंमहोऽअर्भस्यवसुनोविभागे । उभातेपूर्णावसुनागभस्तीनसूनृतानियमतेवसव्या* ॥ त्वमिंद्रस्वयशाऽऋभुक्षावाजोनसाधुरस्तमेष्यृक्वा । वयंनुतेदाश्वांसःस्यामब्रह्मकृण्वंतोहरिवोवसिष्ठाः ॥ सनितासिप्रवतोदाशुषेचिद्याभिर्विवेषोहर्यश्वधीभिः । ववन्मानुतेयुज्याभिरूतीकदानऽइंद्ररायऽआदशस्येः ॥ ३ ॥ वासयसीववेधसस्त्वंनःकदानऽइंद्रवचसोबुबोधः । अस्तंतात्याधियारयिंसुवीरंपृक्षोनोऽअर्वान्युहीतवाजी+ ॥ अभियंदेवीनिर्ऋतिश्चिदीशेनक्षंतऽइंद्रंशरदःसुपृक्षः । उपत्रिबंधुर्जरदष्टिमेत्यस्ववेशंयंकृणवंतमर्ताः ॥ आनोराधांसिसवितःस्तवध्याऽआरायोयंतुपर्वतस्यरातौ । सदानोदिव्यःपायुःसिषक्तुयूयंपात० ॥ ४ ॥ (७।३।५) उदुष्यदेवःसविताययामहिरण्ययीममतिंयामशिश्रेत् । नूनंभगोहव्योमानुषेभिर्वियोरत्नापुरूवसुर्दधाति ॥ उदुतिष्ठसवितःश्रुध्य१स्यहिरण्यपाणेप्रभृतावृतस्य । व्यु१र्वीपृथ्वीममतिंसृजानऽआनृभ्योमर्तभोजनंसुवानः+ ॥ अपिष्टुतःसवितादेवोऽअस्तुयमाचिद्विश्वेवसवोगृणंति । सनःस्तोमान्नमस्य१श्चनोधाद्विश्वेभिःपातुपायुभिर्निसूरीन्+ ॥ अभियंदेव्यदितिर्गृणातिसवंदेवस्यसवितुर्जुषाणा । अभिसम्रा

(७।३।५) उदुष्यदेवइत्यष्टर्चस्यसूक्तस्यवसिष्ठःआद्यानांषण्णांसविताअंत्ययोर्द्वयोर्वाजिनस्त्रिष्टुप् । (भगमित्यर्धर्चस्यभगोवा) ।

जोवरुणोगृणंत्यभिमित्रासोऽअर्यमासजोषाः ॥ अभियमिथोवनुषःसपंतरातिंदिवोरातिषाचःपृथिव्याः । अहिर्बुध्न्यंऽउतनःशृणोतुवरूत्र्येकंधेनुभिर्निपातु ॥ अनुतन्नोजास्पतिर्मंसीष्टरत्नंदेवस्यसवितुरियानः । भर्गमुग्रोवसेजोहवीतिभगमनुग्रोऽअधयातिरत्नं ॥ शंनोभवंतुवाजिनोहवेषुदेवतातामितद्रवःस्वर्काः । जंभयंतोहिंवृकंरक्षांसिसनेम्यस्मद्युयवन्नमीवाः ॥ वाजेवाजेवतवाजिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः । अस्यमध्वःपिबतमादयध्वंतृप्तायातपथिभिर्देवयानैः ॥ ५ ॥ (७।३।६) ऊर्ध्वोऽअग्निःसुमतिंवस्वोऽअश्रेत्प्रतीचीजूर्णिर्देवतातिमेति । भेजातेऽअद्रीरथ्येवपंथामृतंहोतानऽइषितोयजाति ॥ प्रवांवृजेसुप्रयाबर्हिरेषामाविश्पतीवबीरिटऽइयाते । विशामक्तोरुषसःपूर्वहूतौवायुःपूषास्वस्तयेनियुत्वान् ॥ ज्मयाऽअत्रवसवोरंतदेवाऽउरावंतरिक्षेमर्जयंतशुभ्राः । अर्वाक्पथऽउरुज्रयःकृणुध्वंश्रोतादूतस्यजग्मुषोनोऽअस्य+ ॥ तेहियज्ञेषुयज्ञियासऽऊमाःसधस्थंविश्वेऽअभिसंतिदेवाः । ताँऽअध्वरऽउशतोयक्ष्यग्नेश्रुष्टीभगंनासत्यापुरंधिं ॥ आग्नेगिरोदिवऽआपृथिव्यामित्रंवहवरुणमिंद्रमग्निं । आर्यमणमदितिंविष्णुमेषांसरस्वतीमरुतोमादयंतां ॥ ररेहव्यंमतिभिर्यज्ञियानांनक्षत्कामंमर्त्यानामसिन्वन् । धातारयिमविदस्यंसदासांसक्षीमहियुज्येभिर्नुदेवैः ॥ नूरोदसीऽअभिष्टुतेवसिष्ठैर्ऋतावानोवरुणोमित्रोऽअग्निः । यच्छंतुचंद्राऽउपमंनोऽअर्कंयूयंपात०

(७।३।६) ऊर्ध्वोअग्निरितिसप्तर्चस्यसूक्तस्यवसिष्ठोविश्वेदेवास्त्रिष्टुप् (भेदपक्षे–विश्वेदेवाः १ वायुपूषणौ १ विश्वेदेवाः ५ एवं ७) ।

॥ ६ ॥ (७।३।७) ओश्रुष्टिर्विदथ्या३समेतुप्रतिस्तोमंदधीमहितुराणां । यदद्यदेवःसवितासुवातिस्यामास्यरत्निनोविभागे+ ॥ मित्रस्तन्नोवरुणोरोदसीचद्युभक्तमिंद्रोऽअर्यमाददातु । दिदेष्टुदेव्यदितीरेक्णोवायुश्चयन्नियुवैतेभगश्च ॥ सेदुग्रोऽअस्तुमरुतःसशुष्मीयंमर्त्यंपृषदश्वाऽअवाथ । उतेमग्निःसरस्वतीजुनंतिनतस्यरायःपर्येतास्ति ॥ अयंहिनेतावरुणऽऋतस्यमित्रोराजानोऽअर्यमापोधुः । सुहवादेव्यदितिरनर्वातेनोऽअंहोऽअतिपर्षन्नरिष्टान् ॥ अस्यदेवस्यमीळ्हुषोवयाविष्णोरेषस्यप्रभृथेहविर्भिः । विदेहिरुद्रोरुद्रियंमहित्वंयासिष्टंवर्तिरश्विनाविरावत् ॥ मात्रपूषन्नाघृणऽइरस्योवरूत्रीयद्रातिषाचश्चरासन् । मयोभुवोनोऽअर्वंतोनिपांतुवृष्टिंपरिज्मावातोददातु ॥ नूरोदसीऽअभिष्टुतेवसिष्ठैर्ऋतावानोवरुणोमित्रोऽअग्निः । यच्छंतुचंद्राऽउपमंनोऽअर्कंयूयंपात० ॥ ७ ॥ (७।३।८) प्रातरग्निंप्रातरिंद्रंहवामहेप्रातर्मित्रावरुणाप्रातरश्विना । प्रातर्भगंपूषणंब्रह्मणस्पतिंप्रातःसोममुतरुद्रंहुवेम ॥ प्रातर्जितंभगमुग्रंहुवेमवयंपुत्रमदितेर्योविधर्ता । आध्रश्चिद्यंमन्यमानस्तुरश्चिद्राजाचिद्यंभगंभक्षीत्याह ॥ भगप्रणेतर्भगसत्यराधोभगेमांधियमुदवाददन्नः । भगप्रणोजनयगोभिरश्वैर्भगप्रनृभिर्नृवंतःस्याम ॥ उतेदानींभगवंतःस्यामोतप्रपित्वऽउत

(७।३।७) ओश्रुष्टिरितिसप्तर्चस्यसूक्तस्यवसिष्ठोविश्वेदेवास्त्रिष्टुप् (अत्राखिलाविश्वेदेवाः) । (७।३।८) प्रातरग्निमितिसप्तर्चस्यसूक्तस्यवसिष्ठोभगः आद्यायाअग्नींद्रमित्रावरुणाश्विभगपूषब्रह्मणस्पतिरुद्रादेवताःअंत्यायाउषा आद्याजगतीशेषास्त्रिष्टुभः ।

मध्येऽअह्नाँ । उतोदितामघवन्त्सूर्यस्यवयंदेवानांसुमतौस्याम ॥ भगऽएवभगवाँऽअस्तुदेवास्तेनवयंभगवंतःस्याम ।
तंत्वाभगसर्वऽइज्जोहवीतिसनोभगपुरऽएताभवेह+ ॥ समध्वरायोषसोनमंतदधिक्रावेवशुचयेपदाय । अर्वाचीनंव
सुविदंभगंनोरथमिवाश्वावाजिनऽआवहंतु ॥ अश्वावतीर्गोमतीर्नऽउषासोवीरवतीःसदमुच्छंतुभद्राः । घृतंदुहाना
विश्वतःप्रपीतायूयंपात० ॥ ८ ॥ (७।३।९) प्रब्रह्माणोऽअंगिरसोनक्षंतप्रक्रंदनुर्नभन्यस्यवेतु । प्रधेनवऽउदप्रु
तोनवंतयुज्यातामद्रीऽअध्वरस्यपेशः ॥ सुगस्तेऽअग्नेसनवित्तोऽअध्वायुक्ष्वासुतेहरितोरोहितश्च । येवासद्मन्नरुषावी
रवाहोहुवेदेवानांजनिमानिसत्तः+ ॥ समुवोयज्ञंमहयन्नमोभिःप्रहोतामंद्रोरिरिचऽउपाके । यजस्वसुपुर्वणीकदेवा
नायज्ञियामरमतिंववृत्याः ॥ यदावीरस्यरेवतोदुरोणेस्योनशीरतिथिराचिकेतत् । सुप्रीतोऽअग्निःसुधितोदमऽआ
सविशेदातिवार्यमियत्यै ॥ इमंनोऽअग्नेऽअध्वरंजुषस्वमरुत्स्विंद्रेयशसंकृधीनः । आनक्ताबर्हिःसदतामुषासोशंतामि
त्रावरुणायजेह+ ॥ एवाग्निंसहस्यं१वसिष्ठोरायस्कामोविश्वप्स्न्यस्यस्तौत् । इषंरयिंपप्रथद्वाजमस्मेयूयंपात० ॥ ९ ॥
(७।३।१०) प्रवोयज्ञेषुदेवयंतोऽअर्चन्द्यावानमोभिःपृथिवीऽइषध्यै । येषांब्रह्माण्यसमानिविप्राविष्वग्वियंतिवनि

(७।३।९) प्रब्रह्माणइतिषळर्चस्यसूक्तस्यवसिष्ठोविश्वेदेवास्त्रिष्टुप् (भेदपक्षे–विश्वेदेवाः १ अग्निः १ देवाः १ अग्निः ३ एवं ६) ।
(७।३।१०) प्रवोयज्ञेष्वितिपंचर्चस्यसूक्तस्यवसिष्ठोविश्वेदेवास्त्रिष्टुप् (भेदपक्षे–विश्वेदेवाः १ यज्ञः १ विश्वेदेवाः २ अग्निः १ दधिक्रा-

नोनशाखाः ॥ प्रयज्ञऽएंतुहेत्वोनसप्तिरुद्यच्छध्वंसमनसोघृताचीः । स्तृणीतवर्हिरध्वरायसाधूर्ध्वाशोचींषिदेवयून्यं
स्थुः ॥ आपुत्रासोनमातरंविभृत्राःसानौदेवासोवर्हिषःसदंतु । आविश्वाचींविदथ्यामनक्त्वग्नेमानोदेवतातामृध
स्कः ॥ तेसीषपंतजोषमायजंत्राऽऋतस्यधाराःसुदुघादुहानाः । ज्येष्ठंवोऽअद्यमहऽआवसूनामागंतनसमनसोयति
ष्ठ+ ॥ एवानोऽअग्नेविक्ष्वादशस्यत्वयावयंसहसावन्नास्क्राः । रायायुजासधमादोऽअरिष्टायूयंपात० ॥ १० ॥
(७।३।११) दधिक्रांवःप्रथममश्विनोषसमग्निंसमिद्धंभगमूतयेहुवे । इंद्रंविष्णुंपूषणंब्रह्मणस्पतिमादित्यान्द्यावापृ
थिवीऽअपःस्वः* ॥ दधिक्रामुनमसाबोधयंतऽउदीराणायज्ञमुपप्रयंतः । इळांदेवींवर्हिषिसादयंतोश्विनाविप्रासुहवा
हुवेम ॥ दधिक्रावाणंबुबुधानोऽअग्निमुपब्रुवऽउषसंसूर्यंगां । ब्रध्नंमांश्चतोर्वरुणस्यबभ्रुंतेविश्वास्मद्दुरितायावयंतु ॥
दधिक्रावाप्रथमोवाज्यर्वाग्रेरथानांभवतिप्रजानन् । संविदानऽउषसासूर्येणादित्येभिर्वसुभिरंगिरोभिः ॥ आनोदधि
क्राःपथ्यामनक्त्वृतस्यपंथामन्वेतवाऽउ । शृणोतुनोदैव्यंशधोऽअग्निःशृण्वंतुविश्वेमहिषाऽअमूराः ॥ ११ ॥

श्व्युषोग्निभगेंद्रविष्णुपूषब्रह्मणस्पत्यादित्यद्यावापृथिव्यापः १ एवं ६) । (७।३।११) दधिक्रांवइतिपंचर्चस्यसूक्तस्यवसिष्ठोदधिक्रा आद्यायादधिक्राश्व्युषोग्निभगेंद्रविष्णुपूषब्रह्मणस्पत्यादित्यद्यावापृथिव्यापस्त्रिष्टुबाद्याजगती ।

(७।३।१२) आदे॒वोया॑तुसवि॒तासु॒रत्नौ॑तरि॒क्षप्रावह॑मानो॒ऽअश्वैः॑। हस्ते॒दधा॑नो॒नर्या॑पु॒रूणि॑निवे॒शय॑न्चप्रसु॒वन्चभूम॑ ॥ उद॑स्यबा॒हूशि॑थि॒राबृ॒हंता॑हिर॒ण्यया॑दि॒वोऽअंताँ॑ऽअनष्टां॑ । नू॒नंसो॑ऽअ॑स्यमहि॒मापं॑निष्ट॒सूर॑श्चि॒दस्मा॒ऽअनु॑दादप॒स्यां॑+ ॥ सघा॑नोदे॒वःस॑वि॒तास॒हावा॑सा॑विष॒द्वसु॑पति॒र्वसू॑नि । वि॒श्रय॑माणोऽअ॒मति॑मुरू॒चीं॑मर्त॒भोज॑न॒मध॑रासतेनः ॥ इ॒मागिरः॑ सवि॒तारं॑सुजि॒ह्वंपू॒र्णग॑भस्तिमीळतेसुपा॒णिं । चि॒त्रंवयो॑बृ॒हद॒स्मेद॑धातुयू॒यंपा॑त० ॥ १२ ॥ (७।३।१३) इ॒मारु॒द्राय॑ स्थि॒रध॑न्वने॒गिरः॑क्षि॒प्रेष॑वेदे॒वाय॑स्व॒धाव्ने॑ । अषा॑ळ्हाय॒सह॑मानायवे॒धसे॑ति॒ग्मायु॑धायभरताशृ॒णोतु॑नः ॥ सहि॒क्षये॑ण॒क्षम्य॑स्य॒जन्म॑न॒ःसाम्रा॑ज्येनदि॒व्यस्य॒चेत॑ति । अव॒न्नवं॑ती॒रुप॑नो॒दुर॑श्चरानमी॒वोरु॑द्र॒जासु॑नोभव ॥ याते॑दि॒द्युद॑वसृष्टादि॒वस्परि॑क्ष्म॒याचर॑ति॒परि॒सावृ॑णक्तुनः । स॒हस्रं॑तेस्वपिवातभेष॒जामान॑स्तो॒केषु॒तन॑येषुरीरिषः ॥ मानो॑वधीरुद्र॒मापरा॑द॒ा माते॑भूम॒प्रसि॑तौहीळि॒तस्य॑ । आनो॑भजब॒र्हिषि॑जीवशं॒सेयू॒यंपा॑त० ॥ १३ ॥ (७।३।१४) आपो॒यंवः॑प्रथ॒मंदे॑व॒यंत॑ऽ इंद्र॒पान॑मू॒र्मिम॑कृण्वते॒ळः । तंवो॑व॒यंशुचि॑मरि॒प्रम॒द्यघृ॑त॒प्रुषं॑मधु॑मंतंवनेम ॥ तमू॒र्मिमा॑पो॒मधु॑मत्तमंवो॒पांनपा॑दवत्वाशु॒हेमा॑ । यस्मि॒न्निंद्रो॒वसु॑भि॒र्मा॒दया॑ति॒तम॑श्यामदे॒व॒यंतो॑वोऽअ॒द्य+ ॥ श॒तप॑वित्राःस्व॒धया॒मदं॑तीदे॒वीर्दे॒वाना॒मपि॑यंति॒पा

(७।३।१२) आदेवइतिचतुर्ऋचस्यसूक्तस्यवसिष्ठःसवितात्रिष्टुप्। (७।३।१३) इमारुद्रायेतिचतुर्ऋचस्यसूक्तस्यवसिष्ठोरुद्रोजगत्यंत्यात्रिष्टुप्। (७।३।१४) आपोयंवइतिचतुर्ऋचस्यसूक्तस्यवसिष्ठआपस्त्रिष्टुप्।

थ॑ः । ताऽइंद्र॑स्य॒नमि॑नंतिव्र॒तानि॒सिंधु॑भ्योह॒व्यंघृ॒तव॑ज्जुहोत ॥ याःसूर्यो॑र॒श्मिभि॑रात॒तान॒याभ्य॒ऽइंद्रो॒ऽअर॑दद्गा॒तुमू॒
र्मिं । तेसिं॑धवो॒वरि॑वोधातनानोयू॒यंपा॑त० ॥ १४ ॥ (७।३।१५) ऋभु॑क्षणोवाजामा॒दय॑ध्वम॒स्मेन॑रोमघवानःसु॒तस्य॑ ।
आवो॒र्वाच॒ःक्रत॑वो॒नया॒तांविभ्वो॒रथं॒नर्यं॑वर्तयंतु ॥ ऋ॒भुर्ऋ॒भुभि॑र॒भिवः॑स्याम॒विभ्वो॑वि॒भुभि॒ःशव॑सा॒शवां॑सि । वाजो॑ऽअ॒
स्माँऽअ॑वतु॒वाज॑साता॒विंद्रे॑णयु॒जात॑रुषेमवृ॒त्रं+ ॥ तेचि॒द्धिपू॒र्वीर॒भिसंति॑शा॒साविश्वाँ॑ऽअ॒र्यऽउ॑प॒रता॑तिवन्वन् । इंद्रो॒
विभ्वाँऽऋभु॒क्षावाजो॑ऽअ॒र्यःशत्रो॑र्मिथ॒त्याकृ॑णव॒न्विनृ॒म्णं+॥ नूदे॑वासो॒वरि॑वःकर्तनानोभू॒तनो॒विश्वे॒व॑सेस॒जोषा॑ः । सम॒
स्मेऽइ॒षंव॑सवोददीरन्यू॒यंपा॑त० ॥ १५ ॥ (७।३।१६) स॒मु॒द्रज्ये॑ष्ठाःसलि॒लस्य॒मध्या॑त्पुना॒नायं॒त्यनि॑विशमानाः ।
इंद्रो॒याव॒ज्रीवृ॑ष॒भोर॒राद॒ताऽआपो॑दे॒वीरि॒हमाम॑वंतु ॥ याऽआपो॑दि॒व्याऽउ॒तवा॒स्रवं॑तिख॒नित्रि॑माऽउ॒तवा॒याःस्व॑यं॒जाः ।
स॒मु॒द्रार्था॒याःशुच॑यःपाव॒कास्ताऽआपो॑० ॥ यासां॒राजा॒वरु॑णो॒याति॒मध्ये॑सत्यानृ॒तेऽअ॑व॒पश्य॒न्जना॑नां । म॒धु॒श्चुत॒ःशुच॑
यो॒याःपा॑व॒कास्ताऽआपो॑० ॥ यासु॒राजा॒वरु॑णो॒यासु॒सोमो॒विश्वे॑दे॒वायासूर्ज॒मदं॑ति । वै॒श्वा॒न॒रोयाःस्व॒ग्निःप्रवि॑ष्ट॒स्ताऽ
आपो॑० ॥ १६ ॥ (७।३।१७) आमांमि॑त्रावरुणे॒हर॑क्षतंकुला॒यय॑द्वि॒श्वय॒न्मान॒ऽआग॑न् । अ॒ज॒का॒वंदु॒र्दृशी॑कंति॒रो ॥२६॥

(७।३।१५)ऋभुक्षणइतिचतुर्ऋचस्यसूक्तस्यवसिष्ठऋभवस्त्रिष्टुप्अंत्यायाविश्वेदेवावा । (७।३।१६)समुद्रज्येष्ठाइतिचतुर्ऋचस्यसूक्तस्यवसिष्ठआपस्त्रिष्टुप्।(७।३।१७)आमामितिचतुर्ऋचस्यसूक्तस्यवसिष्ठोमित्रावरुणावग्निर्विश्वेदेवानद्यइतिक्रमेणदेवताजगत्यंत्यातिजगतीशक्करीवा।

दधेमामांपद्येनरपसाविदत्त्सरुः ॥ यद्विजामन्परुषिवंदनंभुवदष्ठीवंतौपरिकुल्फौचदेहत् । अग्निष्टच्छोचन्नपबाधतामितोमामां० ॥ यच्छल्मलौभवतियन्नदीषुयदोषधीभ्यःपरिजायतेविषं । विश्वेदेवानिरितस्तत्सुवंतुमामां० ॥ याः प्रवतोनिवतऽउद्वतऽउदन्वतीरनुदकाश्चयाः । ताऽअस्मभ्यंपयसापिन्वमानाःशिवादेवीरशिपदाभवंतुसर्वानद्योऽअशिमिदाभवंतु ॥ १७ ॥ (७।३।१८) आदित्यानामवसानूतनेनसक्षीमहिशर्मणाशंतमेन । अनागास्त्वेऽअदितित्वेतुरासऽइमंयज्ञंदधतुश्रोषमाणाः ॥ आदित्यासोऽअदितिर्मादयंतांमित्रोऽअर्यमावरुणोरजिष्ठाः । अस्माकंसंतुभुवनस्यगोपाःपिबंतुसोममवसेनोऽअद्य+ ॥ आदित्याविश्वेमरुतश्चविश्वेदेवाश्चविश्वऽऋभवश्चविश्वे । इंद्रोऽअग्निरश्विनातुष्टुवानायूयंपात० ॥ १८ ॥ (७।३।१९) आदित्यासोऽअदितयःस्यामपूर्देवत्रावसवोमर्त्यत्रा । सनेममित्रावरुणासनंतोभवेमद्यावापृथिवीभवंतः ॥ मित्रस्तन्नोवरुणोमामहंतशर्मतोकायतनयायगोपाः । मावोभुजेमान्यजातमेनोमातत्कर्मवसवोयच्चयध्वे ॥ तुरण्यवोंगिरसोनक्षंतरत्नंदेवस्यसवितुरियानाः । पिताचतन्नोमहान्यजत्रोविश्वेदेवाःसमनसोजुषंत ॥ १९ ॥ (७।३।२०) प्रद्यावायज्ञैःपृथिवीनमोभिःसबाधऽईळेबृहतीयजत्रे । तेचिद्धिपूर्वेकव

(७।३।१८) आदित्यानामितितृचस्यसूक्तस्यवसिष्ठआदित्यास्त्रिष्टुप् । (७।३।१९) आदित्यासइतितृचस्यसूक्तस्यवसिष्ठआदित्यास्त्रिष्टुप् । (७।३।२०) प्रद्यावेतितृचस्यसूक्तस्यवसिष्ठोद्यावापृथिव्यौत्रिष्टुप् ।

CC-0. Raj Acharya Kathmandu Collection

Digitization by eGangotri. Funding: MoE-Delhi

योगृणंतःपुरोमहीदधिरेदेवपुत्रे ॥ प्रपूर्वजेपितरानव्यसीभिर्गीर्भिःकृणुध्वंसदनेऽऋतस्य । आनोद्यावापृथिवीदैव्येन
जनेनयातंमहिवांवरूथं । उतोहिवांरत्नधेयानिसंतिपुरूणिद्यावापृथिवीसुदासे । अस्मेधत्तंयदसदस्कृधोयुयूयंपात०
॥ २० ॥ (७।३।२१) वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोऽअनमीवोभवानः । यत्त्वेमहेप्रतितन्नोजुषस्वशंनोभ
वद्विपदेशंचतुष्पदे ॥ वास्तोष्पतेप्रतरणोनऽएधिगयस्फानोगोभिरश्वेभिरिंदो । अजरासस्तेसख्येस्यामपितेवपुत्रान्प्र
तिनोजुषस्व ॥ वास्तोष्पतेशग्मयासंसदातेसक्षीमहिरण्वयागातुमत्या । पाहिक्षेमऽउतयोगेवरंनोयूयंपात० ॥ २१ ॥
(७।३।२२) अमीवहावास्तोष्पतेविश्वारूपाण्याविशन् । सखासुशेवऽएधिनः ॥ यदर्जुनसारमेयदतःपिशंगयच्छ
से । वीवभ्राजंतऽऋष्टयऽउपस्रक्वेषुबप्सतोनिषुस्वप ॥ स्तेनंरायसारमेयतस्करंवापुनःसर । स्तोतॄनिंद्रस्यरायसिकि
मस्मान्दुच्छुनायसे० ॥ त्वंसूकरस्यदर्दृहितवदर्दर्तुसूकरः । स्तोतॄनिंद्रस्यरायसिकिमस्मा० ॥ सस्तुमातासस्तुपिता
सस्तुश्वासस्तुविश्पतिः । ससंतुसर्वेज्ञातयःसस्त्वयमभितोजनः ॥ यऽआस्तेयश्चचरतियश्चपश्यतिनोजनः । तेषांसं
हन्मोऽअक्षाणियथेदंहर्म्यंतथा ॥ सहस्रशृंगोवृषभोयःसमुद्रादुदाचरत् । तेनासहस्येनावयंनिजनान्त्स्वापयामसि ॥

(७।३।२१) वस्तोष्पतइतितृचस्यसूक्तस्यवसिष्ठोवास्तोष्पतिस्त्रिष्टुप् । (७।३।२२)अमीवहेत्यष्टर्चस्यसूक्तस्यवसिष्ठःआद्यायावास्तोष्पतिः द्वितीयादिसप्तानांप्रस्वापिनीआद्यागायत्रीततस्तिस्रउपरिष्टाद्बृहत्यःअंत्याश्चतस्रोनुष्टुभः ।

प्रोष्ठेशयावह्येशयानारीर्यास्तल्पशीवरीः । स्त्रियोयाःपुण्यगंधास्ताःसर्वाःस्वापयामसि ॥ २२ ॥ (॥ परिशिष्टं ॥ स्वप्नस्वप्नाधिकरणेसर्वंनिष्वापयाजनं । आसूर्यमन्यान्त्स्वापयव्यूं१ष्ठंजाग्रियादहं ॥ अजंगरोनामसर्पःसर्पिरंविषोमहान् । तस्मिन्हिसर्पःसुधितस्तेनत्वास्वापयामसि ॥ सर्पःसर्पोऽअजगरःसर्पिरंविषोमहान् । तस्यसर्पात्सिंधवस्तस्यगाधमशीमहि ॥ काळिकोनामसर्पोनवनागसहस्रबळः । यमुनह्रदेहसोजातो३योनारायणवाहनः ॥ यदिकाळिकदूतस्ययदिकाःकाळिकाद्भयात् । जन्मभूमिमतिक्रांतोनिर्विषोयातिकाळिकः ॥ आयाहींद्रपथिभिरीळितेभिर्यज्ञमिमंनोभागधेयंजुषस्व । तृप्तांजहुर्मातुळस्येवयोषाभागस्तेपैतृष्वसेयीवपामिव ॥ यशस्करंबलवंतंप्रभुत्वंतमेवराजाधिपतिर्बभूव । संकीर्णनागाश्वपतिर्नराणांसुमंगल्यंसततंदीर्घमायुः ॥ कर्कोटकोनामसर्पोयोदृष्टीविषऽउच्यते । तस्यसर्पस्यसर्पत्वंतस्मैसर्पनमोस्तुते ॥ १ ॥) (७।४।१) कईंव्यक्तानरःसनीळारुद्रस्यमर्याऽअधास्वश्वाः ॥ नकिर्ह्येषांजनूंषिवेदतेऽअंगविद्रेमिथोजनित्रं ॥ अभिस्वपूभिर्मिथोवपंतवातस्वनसःश्येनाऽअस्पृध्रन् ॥ एतानिधीरोनिण्याचिकेतपृश्निर्यदूधोमहीजभार ॥ साविट्सुवीरामरुद्भिरस्तुसनात्सहंतीपुष्यंतीनृम्णं+ ॥ यामंयेष्ठाःशुभाशोभिष्ठाःश्रिया

चतुर्थेनुवाकेपंचदशसूक्तानि (७।४।१) कईंव्यक्ताइतिपंचविंशत्यृचस्यसूक्तस्यवसिष्ठोमरुतस्त्रिष्टुप्आद्याएकादशद्विपदाविराजः । (अत्रांत्यायावैश्वदेवत्वंकश्चिन्मन्यतेतन्मानाभावादुपेक्ष्यं)।

सं॑मिश्ला॒ऽओजो॑भिरु॒ग्राः+ ॥ उ॒ग्रंव॒ऽओजः॑स्थि॒राशवां॒स्यधा॑म॒रुद्भि॑र्ग॒णस्तुवि॑ष्मान् ॥ शु॒भ्रोव॒ःशुष्म॒ःक्रुध्मी॒मनां॑सि॒
धुनि॒र्मुनि॑रिव॒शर्ध॑स्यधृ॒ष्णोः+ ॥ सने॑म्य॒स्मद्यु॒योत॑दि॒द्युंमावो॑दुर्म॒तिरि॒हप्रण॑ङ्ः ॥ प्रि॒यावो॒नाम॑हुवेतु॒राणा॒मायत्तृ॒पन्म॑
रुतोवावशा॒नाः+ ॥ २३ ॥ स्वा॒यु॒धास॑ऽइ॒ष्मिणः॑सुनि॒ष्काऽउ॒तस्व॒यंत॒न्व१॒ःशुंभ॑मानाः ॥ शुचीं॑वोह॒व्याम॑रुत॒ःशुची॑
नां॒शुचिं॑हिनोम्यध्व॒रंशुचि॑भ्यः । ऋ॒तेन॑स॒त्यमृ॑त॒सापः॑ऽआय॒ञ्छुचि॑जन्मान॒ःशुच॑यःपाव॒काः ॥ अंसे॒ष्वाम॑रुतःखा॒दयो॑
वो॒वक्षः॑सुरु॒क्माऽउप॑शिश्रिया॒णाः । विवि॒द्युतो॒नवृष्टि॑भीरुचा॒नाऽअनु॑स्व॒धामायु॑धै॒र्यच्छ॑मानाः ॥ प्रबु॒ध्न्या॑वऽईरते॒म
हांसि॒प्रनामा॑निप्रयज्यवस्तिरध्वं । स॒हस्रि॑यं॒दम्यं॑भा॒गमे॒तंगृ॑हमे॒धीयं॑मरुतोजुषध्वं ॥ यदि॑स्तुतस्य॑मरुतोऽअधी॒थेत्था
विप्र॑स्यवा॒जिनो॒हवी॑मन् । म॒क्षूरा॒यःसु॒वीर्य॑स्यदात॒नूचि॒द्यम॒न्यऽआ॒दभ॒दरा॑वा ॥२४॥ अत्या॑सो॒नयेम॒रुत॒ःस्वंचो॑यक्ष॒दृशो॒
नशु॒भयं॑त॒मर्याः॑ । तेह॑र्म्ये॒ष्ठाःशिश॑वो॒नशु॒भ्रावत्सासो॒नप्र॑क्री॒ळिनः॑पयो॒धाः+॥ द॒शस्यं॑तोनोम॒रुतो॑मृळंतुवरिव॒स्यंतो॒रोद॑सी
सुमेके॑ । आ॒रेगो॒हानृ॒हाव॒धोवो॑ऽअस्तुसु॒म्नेभि॑र॒स्मेव॑सवोनमध्वं ॥ आवो॒होता॑जोहवीतिस॒त्तःस॒त्राचीं॑रा॒तिं॑मरुतोगृणा॒
नः । यऽईव॑तोवृषणो॒ऽअस्ति॑गो॒पाःसोऽअद्व॑यावीहवतेवऽउ॒क्थैः+ ॥ इ॒मेतु॒रंम॒रुतो॑रामयंती॒मेसह॒ःसह॑स॒ऽआन॑मंति ।
इ॒मेशंसं॑वनुष्य॒तोनिपां॑तिगु॒रुद्वेषो॒ऽअर॑रुषेदधंति ॥ इ॒मेर॒ध्रंचि॑न्म॒रुतो॑जुनंति॒भृमिं॑चि॒द्यथा॒वस॑वोजु॒षंत॑ । अप॑बाधध्वं ॥२८॥
वृषण॒स्तमां॑सिध॒त्तविश्वं॒तन॑यंतो॒कम॒स्मे ॥ २५ ॥ मावो॑दा॒त्रान्म॑रुतो॒निर॑राममा॒पश्चा॑द्दध्मरथ्योविभा॒गे । आनः॑स्पा॒

हेभंजतनावसव्ये३ यदींसुजातंवृषणोवोऽअस्ति ॥ संयद्धनंतमन्युभिर्जनासःशूरायह्वीष्वोषधीषुविक्षु । अधस्मानोम
रुतोरुद्रियासस्त्रातारोभूतपृतनास्वर्यः+ ॥ भूरिंचक्रमरुतःपित्र्याण्युक्थानियावःशस्यंतेपुराचित् । मरुद्भिरुग्रःपृत
नासुसाह्वामरुद्भिरित्सनिंतावाजमर्वा ॥ अस्मेवीरोमरुतःशुष्म्यस्तुजनानांयोऽअसुरोविधर्ता । अपोयेनंसुक्षितयेतरे
माधस्वमोकोऽअभिवःस्याम ॥ तन्नऽइंद्रोवरुणोमित्रोऽअग्निरापऽओषधीर्वनिनोजुषंत । शर्मन्त्स्याममरुतामुपस्थेयू
यंपात०॥२६॥ (७।४।२) मध्वोवोनाममारुतंयजत्राःप्रयज्ञेषुशवसामदंति। येरेजयंतिरोदसीचिदुर्वीपिन्वंत्युत्संयदया
सुरुग्राः+ ॥ निचेतारोहिमरुतोगृणंतंप्रणेतारोयजमानस्यमन्म । अस्माकमद्यविदथेषुबर्हिंरावीतयेसदतपिप्रिया
णाः+ ॥ नैतावदन्येमरुतोयथेमेभ्राजंतेरुक्मैरायुधैस्तनूभिः । आरोदसीविश्वपिशःपिशानाःसमानमंज्यंजतेशुभे
कं+ ॥ ऋधक्सावोमरुतोदिद्युदस्तुयद्वऽआगःपुरुषताकराम । मावस्तस्यामपिंभूमायजत्राऽअस्मेवोऽअस्तुसुमतिश्च
निष्ठा ॥ कृतेचिदत्रमरुतोरणंतानवद्यासःशुचयःपावकाः । प्रणोवतसुमतिभिर्यजत्राःप्रवाजेभिस्तिरतपुष्यसेनः ॥
उतस्तुतासोमरुतोव्यंतुविश्वेभिर्नामभिर्नरोहवींषि । ददातनोऽअमृतस्यप्रजायैजिगृतरायःसूनृतामघानिं ॥
आस्तुतासोमरुतोविश्वऽऊतीऽअच्छासूरीन्त्सर्वताताजिगात । येनस्त्मनाशतिनोवर्धयंतियूयंपात० ॥ २७ ॥

(७।४।२) मध्वोवइतिसप्तर्चस्यसूक्तस्यवसिष्ठोमरुतस्त्रिष्टुप् ।

(७।४।३) प्रसाकमुक्षेऽअर्चतागणाययोदैव्यस्यधाम्नस्तुविष्मान् । उतक्षोदंतिरोदसीमहित्वानक्षंतेनाकंनिर्ऋतेरवं
शात् ॥ जनूश्चिद्वोमरुतस्त्वेष्येणभीमासस्तुविमन्यवोयासः । प्रयेमहोभिरोजसोतसंतिविश्वोवोयामन्भयतेस्वर्दृ
क् ॥ बृहद्वयोमघवद्भ्योदधातजुजोषन्निन्मरुतःसुष्टुतिंनः । गतोनाध्वाविर्तिरातिजंतुंप्रणःस्पार्हाभिरूतिभिस्तिरेत ॥
युष्मोतोविप्रोमरुतःशतस्वीयुष्मोतोऽअर्वासहुरिःसहस्री । युष्मोतःसम्राळुतहंतिवृत्रंप्रतद्वोऽअस्तुधूतयोदेष्णं ॥
ताँऽआरुद्रस्यमीळ्हुषोविवासेकुविन्नंसंतेमरुतःपुनर्नः । यत्सस्वर्ताजिहीळिरेयदाविरवतदेनऽईमहेतुराणां ॥ प्रसावा
चिसुष्टुतिर्मघोनामिदंसूक्तंमरुतोजुषंत । आराच्चिद्द्वेषोवृषणोयुयोतयूयंपात० ॥ २८ ॥ (७।४।४) यंत्रायध्वऽ
इदमिदंदेवासोयंचनयथ । तस्माऽअग्नेवरुणमित्रार्यमन्मरुतःशर्मयच्छत ॥ युष्माकंदेवाऽअवसाहनिप्रियऽईजान
स्तरतिद्विषः । प्रसक्षयंतिरतेविमहीरिषोयोवोवरायदाशति ॥ नहिवश्चरमंचनवसिष्ठःपरिमंसते । अस्माकमद्यमरु
तःसुतेसचाविश्वेपिबतकामिनः ॥ नहिवऽऊतिःपृतनासुमर्धतियस्माऽअराध्वंनरः । अभिवऽआवर्त्सुमतिर्नवीयसी
तूयंयातपिपीषवः ॥ ओषुघृष्विराधसोयातनांधांसिपीतये । इमावोहव्यामरुतोररेहिकंमोष्व१न्यत्रगंतन ॥ आच ॥२९॥

(७।४।३) प्रसाकमुक्षइतिषळर्चस्यसूक्तस्यवसिष्ठोमरुतस्त्रिष्टुप् । (७।४।४) यंत्रायध्वइतिद्वादशर्चस्यसूक्तस्यवसिष्ठोमरुतोत्याया
रुद्रः आद्यातृतीयापंचम्योबृहत्यःद्वितीयाचतुर्थीषष्ठ्यःसतोबृहत्यःसप्तम्यष्टम्यौत्रिष्टुभौनवम्याद्यास्तिस्रोगायत्र्योंत्यानुष्टुप् ।

नोब॒र्हिःसद॑तावि॒ताच॑नःस्पा॒र्हाणि॒दात॑वे॒वसु॑ । अस्रे॑धंतोमरुतःसो॒म्येमधौ॒स्वाहे॒हमा॑दयाध्वै ॥ २९ ॥ स॒स्वश्चि॒द्धित॒न्वं१॒ःशुंभ॑माना॒ऽआहं॒सासो॒नील॑पृष्ठाऽअपप्तन् । विश्वं॒शर्धो॑ऽअ॒भितो॑मा॒निषे॑द॒नरो॒नर॒ण्वाःसव॑ने॒मदं॑तः ॥ योनो॑मरुतोऽअ॒भिदु॑र्हृ॒णायु॒स्ति॒रश्चि॒त्तानि॑वसवो॒जिघां॑सति । द्रु॒हःपाशा॒न्प्रति॒समु॑चीष्ट॒तपि॑ष्ठेन॒हन्म॑नाहंतना॒तं॑ ॥ सांत॑पनाऽइ॒दंह॒विर्मरु॑त॒स्तज्जु॑जुष्टन । यु॒ष्माको॒तीरि॑शादसः ॥ गृह॑मेधास॒ऽआग॑त॒मरु॑तो॒माप॑भूतन । यु॒ष्माको॒तीसु॑दानवः ॥ इ॒हेह॑वःस्वतवसः॒कव॑यः॒सूर्य॑त्वचः । य॒ज्ञंम॑रुत॒ऽआवृ॑णे ॥ त्र्यं॑बकंयजामहेसु॒गंधिं॑पुष्टि॒वर्ध॑नं । उ॒र्वा॒रु॒कमि॑व॒बंध॑नान्मृ॒त्योर्मु॑क्षीय॒मामृता॑त् ॥ ३० ॥ इतिपंचमाष्टकेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ॥ ॥

षट्त्रिंशाध्यायेवर्गाः ३० सूक्तानि २४ ऋचः १५६ ॥ त्यागः ॥ विश्वेभ्योदेवेभ्यइ. ३ इंद्रार्यमभ्या. रुद्राये. नदीभ्य. मरुद्भ्य. विश्वेभ्योदेवेभ्य. विष्णुमरुद्भ्य. ऋभुभ्य. २ इंद्राये. ६ सवित्र. ६ वाजिभ्य. २ विश्वेभ्योदेवेभ्य. वायुपूषभ्या. विश्वेभ्योदेवेभ्य. १२ अग्नींद्रमित्रावरुणाश्विभगपूषब्रह्मणस्पतिसोमरुद्रेभ्य. भगाये. ९ उषसइ. विश्वेभ्योदेवेभ्य. अग्नय. देवेभ्य. अग्नय. ३ विश्वेभ्योदेवेभ्य. यज्ञाये. विश्वेभ्योदेवेभ्य. २ अग्नय. दधिक्राश्व्युषोग्निभगेंद्रविष्णुपूषब्रह्मणस्पत्यादित्यद्यावापृथिव्यब्भ्यइ. दधिक्राइ. ४ सवित्र. ४ रुद्राये. ४ अब्भ्य. ४ ऋभुभ्य. ३ विश्वेभ्योदेवेभ्य. अब्भ्य. ४ मित्रावरुणाभ्या. अग्नय. विश्वेभ्योदेवेभ्य. नदीभ्य. आदित्येभ्य. ६ द्यावापृथिवीभ्या. ३ वास्तोष्पतय. ४ प्रस्वापिन्या. ७ मरुद्भ्य. ४९ रुद्राये. ॥ इतिपंचमेचतुर्थः ॥

यदद्यमैत्रावरुणंतुवैसौर्याद्योद्वांसप्तौत्सूर्यःषळाद्यास्तिस्रःसौर्यउद्वेतीतिचाधपंचमादिविपंचप्रतिवांप्रमित्रयोरेकोनागायत्रींदशम्यादयस्त्रयःप्रगाथाःपुरउष्णिक्चतुर्थ्याद्यादशादित्यास्तिस्रःसौर्यःप्रतिवांदशाश्विनंतुतदाशुभ्रानवसप्ताद्याविराजंआवांरथोष्टावाविश्ववाराःसप्तापस्वसुःषळागोमतापंचातारिष्मेमाउवांषट्प्रागाथंव्युषाअष्टाउषस्यंतुवाउदुसप्तोपोरुरुचेषट्प्रतिपंचव्युषाःप्रतितृचं ॥ ५ ॥ ॥ ॥

॥ हरिःओम् ॥ (७।४।५) यद्॒द्यसू॑र्य॒ब्रवोना॑गाऽउ॒द्यन्मि॒त्राय॒वरु॑णायस॒त्यं । व॒यंदे॑व॒त्रादि॑तेस्याम॒तव॑प्रि॒यासो॑ऽअर्य॑मन्गृ॒णंतः॑ ॥ ए॒षःस्यमि॑त्रावरुणानृ॒चक्षा॑ऽउ॒भेऽउदे॑ति॒सूर्यो॑ऽअ॒भिज्मन् । विश्व॑स्यस्था॒तुर्जग॑तश्चगो॒पाऽऋ॒जुमर्ते॑षुवृजि॒नाच॒पश्य॑न् ॥ अयु॑क्तस॒प्तह॒रितः॑स॒धस्था॒द्याऽई॒वह॑ंति॒सूर्यं॑घृ॒ताचीः॑ । धामा॑निमित्रावरुणायु॒वाकुः॒संयोयू॒थेव॒जनि॑मानि॒चष्टे॑ ॥ उद्वां॑पृ॒क्षास॒ोमधु॑मंतोऽअस्थु॒रासूर्यो॑ऽअरुहच्छु॒क्रमर्णः॑ । यस्मा॑ऽआदि॒त्याऽअध्व॑नो॒रद॑ंतिमि॒त्रोऽअ॑र्य॒मावरु॑णःस॒जोषाः॑ ॥ इ॒मेचे॒तारो॒ऽअनृ॑तस्य॒भूरे॑र्मि॒त्रोऽअ॑र्य॒मावरु॑णो॒हिसंति॑ । इ॒मऽऋ॒तस्य॑वावृधुर्दु॒रोणे॑श॒ग्मासः॑पु॒त्राऽअदि॑ते॒रद॑ब्धाः ॥ इ॒मेमि॒त्रोवरु॑णोदू॒ळभा॑सोचे॒तसं॑चिच्चितयंति॒दक्षैः॑ । अपि॒क्रतुं॑सु॒चेत॑संव॒तंत॑स्ति॒रश्चि॒दंहः॑सु॒पथा॑नयंति ॥ १ ॥ इ॒मेदि॒वोऽअनि॑मिषापृथि॒व्याश्चि॑कि॒त्वांसो॑ऽअचे॒तसं॑नयंति । प्र॒ब्रा॒जेचि॒न्नद्यो॑गा॒धम॑स्तिपा॒रंनो॑ऽअ॒

(७।४।५) यदद्येतिद्वादशर्चस्यसूक्तस्यवसिष्ठोमित्रावरुणावाद्यायाःसूर्यस्त्रिष्टुप् ।

स्याविंष्पितस्यंपर्षन् ॥ यद्गोपावददितिःशर्मभद्रंमित्रोयच्छंतिवरुणःसुदासे । तस्मिन्नातोकंतनयंदधानामाकर्मदेवहेळनंतुरासः ॥ अववेदिंहोत्राभिर्यजेतरिपःकाश्चिद्वरुणध्रुतःसः । परिद्वेषोभिरर्यमावृणक्तूरुंसुदासेवृषणाऽउलोकं+ ॥ सस्वश्चिद्धिसमृतिस्त्वेष्येषामपीच्येनसहसासहंते । युष्मद्भियावृषणोरेजमानादक्षस्यचिन्महिनामृळतानः ॥ योब्रह्मणेसुमतिमायजातेवाजस्यसातौपरमस्यरायः । सीक्षंतमन्युंमघवानोऽअर्यऽउरुक्षयायचक्रिरेसुधातु ॥ इयंदेवपुरोहितिर्युवभ्यांयज्ञेषुमित्रावरुणावकारि । विश्वानिदुर्गापिपृतंतिरोनोयूयंपात० ॥ २ ॥ (७।४।६) उद्वांचक्षुर्वरुणसुप्रतीकंदेवयोरेतिसूर्यस्ततन्वान् । अभियोविश्वाभुवनानिचष्टेसमन्युंमर्त्येष्वाचिकेत ॥ प्रवांसमित्रावरुणावृतावाविप्रोमन्मानिदीर्घश्रुदियर्ति । यस्यब्रह्माणिसुक्रतूऽअवाथऽआयत्क्रत्वानशरदःपृणैथे ॥ प्रोरोर्मित्रावरुणापृथिव्याःप्रदिवऽऋष्वाद्बृहतःसुदानू । स्पशोदधाथेऽओषधीषुविक्ष्वृधग्यतोऽअनिमिषंरक्षमाणा ॥ शंसामित्रस्यवरुणस्यधामशुष्मोरोदसीबद्बधेमहित्वा । अयन्मासाऽअयज्वनामवीराःप्रयज्ञमन्मावृजनंतिराते ॥ अमूराविश्वावृषणाविमावांनयासुचित्रंददृशेनयक्षं । द्रुहःसचंतेऽअनृताजनानांनवांनिण्यान्यचितेऽअभूवन् ॥ समुवांयज्ञंमहयंनमोभिर्हुवेवां

(७।४।६) उद्वांचक्षुरितिसप्तर्चस्यसूक्तस्यवसिष्ठोमित्रावरुणौत्रिष्टुप् ।

मित्रावरुणासु॒बाध॑ः । प्र॒वांमन्मा॑न्यृ॒चसे॒नवा॑निकृ॒तानि॒ब्रह्म॑जुजुषन्नि॒मानि॑ ॥ इ॒यंदे॑वपु॒रोहि॑ति०॥ २ ॥ (७।४।७)
उत्सूर्यो॑बृ॒हद॒र्चीं॑ष्यं॑श्रेत्पु॒रुविश्वा॒जनि॑म॒मानु॑षाणां । स॒मोदि॒वाद॑दृशे॒रोच॑मानः॒कृत्वा॑कृ॒तःसुकृ॑तःक॒र्तृभि॑र्भूत् ॥ ससूर्य॒
प्रति॑पु॒रोन॒ऽउद्गा॑ऽए॒भिःस्तोमे॑भिरेत॒शेभि॒रेवैः॑ । प्रनो॑मि॒त्राय॒वरु॑णायवो॒चोना॑गसोऽअर्य॒म्णेऽअ॒ग्नये॑च ॥ विनः॑स॒हस्रं॑
शु॒रुधो॑रदं॑त्वृ॒तावा॑नो॒वरु॑णोमि॒त्रोऽअ॒ग्निः । यच्छं॑तुचं॒द्राऽउ॑प॒मंनो॑ऽअ॒र्कमान॒ःकामं॑पूपुरं॑तु॒स्तवा॑नाः ॥ द्यावा॑भूमीऽअ
दि॑ते॒त्रासी॑थांनो॒येवां॑ज॒ज्ञुःसु॒जनि॑मानऽऋष्वे । माहेळे॑भूम॒वरु॑णस्यवा॒योर्मा॑मि॒त्रस्य॑प्रि॒यत॑मस्यनृ॒णां+॥ प्रवा॒हवा॑सिसृ॒तंजी॒
वसे॑न॒ऽआनो॒गव्यू॑तिमुक्षतंघृ॒तेन॑ । आनो॒जने॑श्रवयतंयुवानाश्रु॒तंमे॑मित्रावरुणा॒हवे॒मा+ ॥ नूमि॒त्रोवरु॑णोऽअर्य॒मान॒स्त्मने॑
तो॒काय॒वरि॑वोदधंतु । सु॒गानो॒विश्वा॑सु॒पथा॑निसंतुयू॒यंपा॑त०॥४॥ (७।४।८) उद्वे॑तिसु॒भगो॑वि॒श्वच॑क्षाःसाधा॑रण॒ःसूर्यो॒मा
नु॑षाणां । चक्षु॑र्मि॒त्रस्य॒वरु॑णस्यदे॒वश्चर्मे॑व॒यःस॒मवि॑व्य॒क्तमां॑सि ॥ उद्वे॑तिप्रसवी॒ताजना॑नांम॒हान्के॒तुर॑र्ण॒वःसूर्य॑स्य । स॒मा॒नं
च॒क्रंप॑र्या॒विवृ॑त्स॒न्यदे॑त॒शोवह॑तिधू॒र्षुयु॒क्तः ॥ वि॒भ्राज॑मानऽउ॒षसा॑मु॒पस्था॑द्रे॒भैरुदे॑त्यनुम॒द्यमा॑नः । ए॒षमे॑दे॒वःस॑वि॒ताच॑
च्छंद॒यःस॑मा॒नंनप्र॑मि॒नाति॒धाम॑ ॥ दि॒वोरु॒क्मऽउ॑रु॒चक्षा॒ऽउदे॑तिदू॒रेऽअ॑र्थस्त॒रणि॒र्भ्राज॑मानः । नू॒नंजना॒ःसूर्ये॑ण॒प्रसू॑ता॒ऽ

(७।४।७) उत्सूर्यइतिषळर्चस्यसूक्तस्यवसिष्ठआद्यानांतिसृणांसूर्यस्ततस्तिसृणांमित्रावरुणौत्रिष्टुप् । (७।४।८) उद्वेतीतिषळर्चस्यसूक्तस्यवसिष्ठःआद्यानांसार्धचतसृणांसूर्यस्ततोमित्रावरुणौत्रिष्टुप ।

अय॒न्नर्थां॑निकृ॒णव॒न्नपां॑सि ॥ यत्रा॑च॒क्रुर॒मृता॑गा॒तुम॑स्मैश्ये॒नोनदीय॒न्नन्वे॑ति॒पाथः॑ । प्रति॑वां॒सूर॒ऽउदि॑तेविधेम॒नमो॑भिर्मि॑त्रावरुणो॒तह॒व्यैः+ ॥ नूमि॒त्रोवरु॑णो० ॥ ५ ॥ (७।४।९) दि॒विक्षयं॑ता॒रज॑सःपृथि॒व्यांप्रवां॑घृ॒तस्य॑नि॒र्णिजो॑ददीरन् । ह॒व्यंनो॑मि॒त्रोऽअ॑र्य॒मासुजा॑तो॒राजा॑सुक्ष॒त्रोवरु॑णोजुषंत ॥ आरा॑जानामहऽऋतस्यगोपा॒सिंधु॑पतीक्षत्रियायातम॒र्वाक् । इळां॑नोमित्रावरुणो॒तवृ॒ष्टिमव॑दि॒वऽइ॑न्वतंजीरदानू ॥ मि॒त्रस्त॒न्नोवरु॑णोदे॒वोऽअ॒र्यःप्रसाधि॑ष्ठेभिःप॒थिभि॑र्नयंतु । ब्रव॒द्यथा॑न॒ऽआद॒रिःसु॒दास॑ऽइ॒षाम॑देमस॒हदे॒वगो॑पाः ॥ योवां॒गर्त॒मन॑सा॒तक्ष॑दे॒तमू॒र्ध्वांधी॒ति॑कृ॒णव॑द्धा॒रय॑च्च । उ॒क्षेथां॑मित्रावरुणाघृ॒तेन॒तारा॑जानासुक्षि॒तीस्त॑र्पयेथां ॥ ए॒षःस्तोमो॑वरुणमित्र॒तुभ्यं॒सोम॑ःशु॒क्रोनवा॒यवे॑यामि । अ॒वि॒ष्टंधियो॑जिगृ॒तंपुरं॑धीर्यू॒यंपा॑त० ॥ ६ ॥ (७।४।१०) प्रति॑वां॒सूर॒ऽउदि॑तेसू॒क्तैर्मि॒त्रंहु॑वे॒वरु॑णंपू॒तद॑क्षं । ययो॑रसु॒र्य॑१॒मक्षि॑तं॒ज्येष्ठं॒विश्व॑स्य॒याम॑न्ना॒चिता॑जिग॒त्नु+ ॥ ताहिदे॒वाना॒मसु॑रा॒ताव॒र्या॑तान॑ःक्षि॒तीःक॑रतमू॒र्जयं॑तीः । अ॒श्याम॑मित्रावरुणाव॒यंवां॒द्यावा॑च॒यत्र॑पी॒पय॒न्नहा॑च ॥ ताभूरि॑पाशा॒वनृ॑तस्य॒सेतू॑दुर॒त्येतू॑रि॒पवे॒मर्त्या॑य । ऋ॒तस्य॑मित्रावरुणाप॒थावा॑म॒पोनना॒वादुरि॒तात॑रेम ॥ आनो॑मित्रारुणाह॒व्यजु॑ष्टिंघृ॒तैर्ग॑व्यू॑तिमुक्षत॒मिळा॑भिः । प्रति॑वा॒मत्र॒वर॒माजना॑यपृ॒णी॒तमु॒द्नोदि॒व्यस्य॒चारोः॑ ॥

(७।४।९) दिविक्षयंतेतिपंचर्चस्यसूक्तस्यवसिष्ठोमित्रावरुणौत्रिष्टुप् । (७।४।१०) प्रतिवामितिपंचर्चस्यसूक्तस्यवसिष्ठोमित्रावरुणौत्रिष्टुप् ।

एषःस्तोमो० ॥ ७ ॥ (७।४।११) प्रमित्रयोर्वरुणयोःस्तोमोनऽएतुशूष्यः । नमस्वान्तुविजातयोः ॥ याधारयन्तदेवाः
सुदक्षादक्षपितरा । असुर्यायप्रमहसा ॥ तानःस्तिपातनूपावरुणजरितॄणां । मित्रसाधयतंधियः ॥ यदुद्यसूरऽउदि
तेनागामित्रोऽअर्यमा । सुवातिसविताभगः ॥ सुप्रावीरस्तुसक्षयःप्रनुयामन्त्सुदानवः । येनोऽअंहोतिपिप्रति ॥८॥
उतस्वराजोऽअदितिरदब्धस्यव्रतस्यये । महोराजानऽईशते ॥ प्रतिवांसूरऽउदितेमित्रंगृणीषेवरुणं । अर्यमणंरिशा
दसं ॥ रायाहिरण्ययामतिरियमवृकायशवसे । इयंविप्रामेधसातये ॥ तेस्यामदेववरुणतेमित्रसूरिभिःसह । इषंस्व
श्चधीमहि ॥ बहवःसूरचक्षसोग्निजिह्वाऽऋतावृधः । त्रीणियेयेमुर्विदथानिधीतिभिर्विश्वानिपरिभूतिभिः ॥ ९ ॥
वियेदधुःशरदंमासमादहर्यज्ञमक्तुंचादृचं । अनाप्यंवरुणोमित्रोऽअर्यमाक्षत्रंराजानऽआशत ॥ तद्वोऽअद्यमनामहे
सूक्तैःसूरऽउदिते । यदोहतेवरुणोमित्रोऽअर्यमायूयमृतस्यरथ्यः ॥ ऋतावानऽऋतजाताऽऋतावृधोघोरासोऽअनृ
तद्विषः । तेषांवःसुम्नेसुच्छर्दिष्टमेनरःस्यामयेचसूरयः ॥ उदुत्यद्दर्शतंवपुर्दिवऽएतिप्रतिह्वरे । यदीमाशुर्वहतिदेवऽ
एतशोविश्वस्मैचक्षसेऽअरं ॥ शीर्ष्णःशीर्ष्णोजगतस्तस्थुषस्पतिंसमयाविश्वमारजः । सप्तस्वसारःसुवितायसूर्यंवहं ॥३२॥

(७।४।११) प्रमित्रयोरित्येकोनविंशत्यृचस्यसूक्तस्यवसिष्ठोमित्रावरुणौचतुर्थ्यादिदशानामादित्यःचतुर्दश्यादितिसृणांसूर्योगायत्री दशमीद्वादशीचतुर्दश्योबृहत्यःएकादशीत्रयोदशीपंचदश्यःसतोबृहत्यःषोडशीपुरउष्णिक् ।

तिहरितोरथे ॥ १० ॥ तच्चक्षुर्देवहितंशुक्रमुच्चरत् । पश्येमशरदःशतंजीवेमशरदःशतं+ ॥ काव्येभिरदाभ्याया
तंवरुणद्युमत् । मित्रश्चसोमपीतये ॥ दिवोधामभिर्वरुणमित्रश्चायातमद्रुहा । पिवतंसोममातुजी+ ॥ आयातंमि
त्रावरुणाजुषाणावाहुतिंनरा । पातंसोममृतावृधा ॥ ११ ॥ (७।४।१२) प्रतिवांरथंनृपतीजरध्यैहविष्मतामन
सायज्ञियेन । योवांदूतोनधिष्ण्यावजीगरच्छासूनुर्नपितराविवक्मि ॥ अशोच्यग्निःसमिधानोऽअस्मेऽउपोऽअदृश्र
न्तमसश्चिदंताः । अचेतिकेतुरुषसःपुरस्ताच्छ्रियेदिवोदुहितुर्जायमानः ॥ अभिवांनूनमश्विनासुहोतास्तोमैःसिषक्ति
नासत्याविवक्वान् । पूर्वीभिर्यातंपथ्याभिरर्वाक्स्वर्विदावसुमतारथेन ॥ अवोर्वांनूनमश्विनायुवाकुर्हुवेयद्वांसुतेमाध्वी
वसूयुः । आवांवहंतुस्थविरासोऽअश्वाःपिवाथोऽअस्मेसुषुतामधूनि ॥ प्राचीमुदेवाश्विनाधियंमेमृध्रांसातयेकृतंवसू
युं । विश्वाऽअविष्टंवाजऽआपुरंधीस्तानःशक्तंशचीपतीशचीभिः ॥ १२ ॥ अविष्टंधीष्वश्विनानऽआसुप्रजावद्रेतोऽ
अह्रयंनोऽअस्तु । आवांतोकेतनयेतूतुजानाःसुरत्नासोदेववीतिंगमेम ॥ एषस्यवांपूर्वगत्वेवसख्येनिधिर्हितोमाध्वी
रातोऽअस्मे । अहेळतामनसायातमर्वागश्नंताहव्यंमानुषीषुविक्षु+ ॥ एकस्मिन्योगेभुरणासमानेपरिवांसप्तस्रवतोर
थोगात् । नवायंतिसुभ्वोदेवयुक्तायेवांधूर्षुतरणयोवहंति ॥ असश्चतामघवद्भ्योहिभूतंयेरायामघदेयंजुनंति । प्रयेबं

(७।४।१२) प्रतिवामितिदशर्चस्यसूक्तस्यवसिष्ठोश्विनौत्रिष्टुप् ।

धुंसूनृताभिस्तिरंतेगव्यापृंचंतोऽअश्व्यामघानि ॥ नूमेहवमाशृणुतंयुवानायासिष्टंवर्तिरश्विनाविरावत् । धत्तंरत्नानि
जरतंचसूरीन्यूयंपात० ॥ १३ ॥ (७।४।१३) आशुभ्रायातमश्विनास्वश्वागिरोदस्राजुजुषाणायुवाकोः। हव्यानि
चप्रतिभृतावीतंनः ॥ प्रवामंधांसिमद्यान्यस्थुररंगंतहविषोवीतयेमे । तिरोऽअर्योहवनानिश्रुतंनः ॥ प्रवांरथोमनो
जवाऽइयर्तितिरोरजांस्यश्विनाशतोतिः । अस्मभ्यंसूर्यावसूऽइयानः+ ॥ अयंहयद्वांदेवयाऽउऽअद्रिरूर्ध्वोविवक्ति
सोमसुद्युवभ्यां । आवल्गूविप्रोववृतीतहव्यैः+ ॥ चित्रंहयद्वांभोजनंन्वस्तिन्यत्रयेमहिष्वंतंयुयोतं । योवामोमानंद
धंतेप्रियःसन्+ ॥ १४ ॥ उतत्यद्वांजुरतेऽअश्विनाभूच्च्यवानायप्रतीत्यंहविर्दे । अधियद्वर्पऽइतऽऊतिधत्थः+ ॥ उत
त्यंभुज्युमश्विनासखायोमध्येजहुर्दुरेवासःसमुद्रे । निरींपर्षदरावायोयुवाकुः ॥ वृकायचिज्जसमानायशक्तमुतश्रुतं
शयवेहूयमाना । यावघ्न्यामपिन्वतमपोनस्तर्यंचिच्छक्त्यश्विनाशचीभिः ॥ एषस्यकारुर्जरतेसूक्तैरग्रेबुधानऽउषसां
सुमन्मा । इषातंवर्धदघ्न्यापयोभिर्यूयंपात० ॥ १५ ॥ (७।४।१४) आवांरथोरोदसीवद्बधानोहिरण्ययोवृषभि
र्यात्वश्वैः । घृतवर्तनिःपविभीरुचानऽइषांवोढानृपतिर्वाजिनीवान् ॥ सपप्रथानोऽअभिपंचभूमात्रिवंधुरोमनसाया

(७।४।१३) आशुभ्रेतिनवर्चस्यसूक्तस्यवसिष्ठोश्विनौत्रिष्टुप्आद्याःसप्तविराजः । (७।४।१४) आवांरथइत्यष्टर्चस्यसूक्तस्यवसिष्ठोश्विनौत्रिष्टुप् ।

तुयुक्तः । विशोयेनगच्छंथोदेवयंतीःकुत्राचिद्याममश्विनादधाना ॥ स्वश्वायशसायातमर्वाग्दस्रानिधिंमधुमंतंपिबाथः । विवांरथोवध्वा३यादमानोंतान्दिवोबाधतेवर्तनिभ्यां ॥ युवोःश्रियंपरियोषावृणीतसूरोदुहितापरितक्म्यायां । यद्देवयंतमवथःशचीभिःपरिघ्रंसमोमनावांवयोगात् ॥ योहस्यवांरथिरावस्तऽउस्रारथोयुजानःपरियातिवर्तिः । तेनंनःशंयोरुषसोव्युष्टौन्यश्विनावहतंयज्ञेऽअस्मिन् ॥ नरागौरेवविद्युतंतृषाणास्माकमद्यसवनोपयातं । पुरुत्राहिवांमतिभिर्ववंतेमावामन्येनियमन्देवयंतः ॥ युवंभुज्युमवविद्धंसमुद्रऽउदूहथुरर्णसोऽअस्रिधानैः । पतत्रिभिरश्रमैरव्यथिभिर्दंसनाभिरश्विनापारयंता ॥ नूमेहवमाशृणुतंयुवानायासिष्टंवर्तिरश्विनाविरावत् । धत्तंरत्नानिजरतंचसूरीन्यूयंपात० ॥ १६ ॥ (७।४।१५) आविश्ववाराश्विनागतंनःप्रतत्स्थानमवाचिवांपृथिव्यां । अश्वोनवाजीशुनपृष्ठोऽअस्थादायत्सेदथुर्ध्रुवसेनयोनिं ॥ सिषक्तिसावांसुमतिश्चनिष्ठातापिघर्मोमनुषोदुरोणे । योवांसमुद्रान्त्सरितःपिपर्त्येतग्वाचिन्नसुयुजायुजानः+ ॥ यानिस्थानान्यश्विनादधाथेदिवोयह्वीष्वोषधीषुविक्षु । निपर्वतस्यमूर्धनिसदंतेषंजनायदाशुषेवहंता ॥ चनिष्टंदेवाऽओषधीष्वप्सुयद्योग्याऽअश्नवैथेऽऋषीणां । पुरूणिरत्नादधतौन्य१स्मेऽअनुपूर्वाणिचख्यथुर्युगानि ॥ शुश्रुवांसाचिदश्विनापुरूण्यभिब्रह्माणिचक्षाथेऽऋषीणां । प्रतिप्रयातंवरमाजनायास्मेवामस्तु

(७।४।१५) आविश्ववारेतिसप्तर्चस्यसूक्तस्यवसिष्ठोश्विनौत्रिष्टुप् ।

सुमतिश्चनिंष्ठा ॥ योवांयज्ञोनासत्याहविष्मान्कृतब्रह्मासमर्यो३ भवाति । उपप्रयातंवरमावासिंष्ठमिमाब्रह्माण्यृच्यंते
युवभ्यां ॥ इयंमनीषाऽइयमश्विनागीरिमांसुवृक्तिंवृषणाजुषेथां । इमाब्रह्माणियुवयून्यग्मन्यूयंपात० ॥ १७ ॥
(७।५।१) अपस्वसुरुषसोनग्जिहीतेरिणक्तिकृष्णीररुषायपंथां । अश्वामघागोमघावांहुवेमदिवानक्तंशरुमस्मद्युयोतं ॥
उपायातंदाशुषेमर्त्यायरथेनवाममश्विनावहंता । युयुतमस्मदनिराममीवांदिवानक्तंमाध्वीत्रासीथांनः ॥ आवांरथं
मवमस्यांव्युष्टौसुम्नायवोवृषणोवर्तयंतु । स्यूमगभस्तिमृतयुग्भिरश्वैराश्विनावसुमंतंवहेथां ॥ योवांरथोनृपतीऽअस्ति
वोह्लात्रिवंधुरोवसुमाँऽउस्रयामा । आनऽएनानासत्योपयातमभियद्वांविश्वप्स्न्योजिगाति ॥ युवंच्यवानंजरसोमुमुक्तं
निपेदवऽऊहथुराशुमश्वं । निरंहसस्तमसःस्पर्तमत्रिंनिजाहुषंशिथिरेधातमंतः ॥ इयंमनीषा० ॥ १८ ॥ (७।५।२)
आगोमतानासत्यारथेनाश्वावतापुरश्चंद्रेणयातं । अभिवांविश्वानियुतःसचंतेस्पार्हयाश्रियातन्वाशुभाना+ ॥ आनो
देवेभिरुपयातमर्वाक्सजोषसानासत्यारथेन । युवोर्हिनःसख्यापित्र्याणिसमानोबंधुरुततस्यवित्तं ॥ उदुस्तोमासोऽ
अश्विनोरबुध्रन्जामिब्रह्माण्युषसश्चदेवीः । आविवासन्रोदसीधिष्ण्येमेऽअच्छाविप्रोनासत्याविवक्ति ॥ विचेदुच्छंत्यश्वि
नाऽउषासःप्रवांब्रह्माणिकारवोभरंते । ऊर्ध्वंभानुंसवितादेवोऽअश्रेद्बृहदग्नयःसमिधाजरंते ॥ आपश्चातान्नासत्यापु ॥३४॥

(७।५।१) अपस्वसुरितिषळर्चस्यसूक्तस्यवसिष्ठोश्विनौत्रिष्टुप् । (७।५।२) आगोमतेतिपंचर्चस्यसूक्तस्यवसिष्ठोश्विनौत्रिष्टुप् ।

रस्तादाश्विनायातमधरादुदक्तात् । आविश्वतःपांचजन्येनरायायूयंपात० ॥ १९ ॥ (७।५।३) अतारिष्मतमसस
स्पारमस्यप्रतिस्तोमंदेवयंतोदधानाः । पुरुदंसापुरुतमापुराजामर्त्याहवतेऽश्विनागीः+ ॥ न्युप्रियोमनुषःसादिहो
तानासत्यायोयजतेवंदतेच । अश्नीतंमध्वोऽअश्विनाऽउपाकऽआवांवोचेविदथेषुप्रयस्वान् ॥ अहेमयज्ञंपथामुराणाऽ
इमांसुवृक्तिंवृषणाजुषेथां । श्रुष्टीवेवप्रेषितोवामबोधिप्रतिस्तोमैर्जरमाणोवसिष्ठः ॥ उपत्यावह्नीगमतोविशंनोरक्षोह
णासंभृतावीळुपाणी । समंधांस्यग्मतमत्सराणिमानोमर्धिष्टमागतंशिवेन ॥ आपश्चातान्नासत्या० ॥२०॥ (७।५।४)
इमाऽउवांदिविष्टयऽउस्राहवंतेऽअश्विना । अयंवामह्वेवसेशचीवसूविशंविशंहिगच्छथः ॥ युवंचित्रंददथुर्भोजनंनरा
चोदेथांसूनृतावते । अर्वाग्रथंसमनसानियच्छतंपिबतंसोम्यंमधु ॥ आयातमुपभूषतंमध्वःपिबतमश्विना । दुग्धंपयो
वृषणाजेन्यावसूमानोमर्धिष्टमागतं ॥ अश्वासोयेवामुपदाशुषोगृहंयुवांदीयंतिबिभ्रतः । मक्षूयुभिर्नराहयेभिरश्वि
नादेवायातमस्मयू ॥ अधाहयंतोऽअश्विनापृक्षःसचंतसूरयः । तायंसतोमघवद्भ्योध्रुवंयशश्छर्दिरस्मभ्यंनासत्या ॥
प्रयेययुरवृकासोरथाऽइवनृपातारोजनानां । उतस्वेनशवसाशूशुवुर्नरऽउतक्षियंतिसुक्षितिं ॥ २१ ॥ (७।५।५) व्यु१षा

(७।५।३) अतारिष्मेतिपंचर्चस्यसूक्तस्यवसिष्ठोश्विनौत्रिष्टुप् । (७।५।४) इमाउवामितिषळर्चस्यसूक्तस्यवसिष्ठोश्विनौबृहतीद्विती
याचतुर्थीषष्ठ्यःसतोबृहत्यः । (७।५।५) व्यु१षाआवइत्यष्टर्चस्यसूक्तस्यवसिष्ठउषास्त्रिष्टुप् ।

Digitization by eGangotri Funding: MoE-Delhi

ऽआ॑वोदि॒वि॒जाऽऋ॒तेना॑विष्कृ॒ण्वा॒नाम॑हि॒मान॒मागा॑त् । अप॒द्रुह॒स्तम॒आव॒रजु॑ष्ट॒मंगि॑रस्तमाप॒थ्या॑ऽअजीगः ॥ म॒हे
नो॑ऽअ॒द्यसु॑वि॒ताय॑बो॒ध्युषो॑म॒हेसौ॑भगाय॒प्रयं॑धि । चि॒त्रंर॒यिंय॒शसं॑धेह्य॒स्मेदे॑वि॒मर्ते॑षुमानुषिश्रव॒स्युं॑+ ॥ ए॒तेत्येभा॒न
वो॑दर्श॒ताया॑श्चि॒त्राऽउ॒षसो॑ऽअ॒मृता॑स॒ऽआगुः । ज॒नयं॑तो॒दैव्या॑निव्र॒तान्या॑पृ॒णंतो॑ऽअं॒तरि॑क्षा॒व्य॑स्थुः ॥ ए॒षास्यायु॑जा॒ना
प॑रा॒कात्पंच॑क्षि॒तीःपरि॑स॒द्योजि॑गाति । अ॒भि॒पश्यं॑तीव॒युना॒जना॑नांदि॒वोदु॑हि॒ताभुव॑नस्य॒पत्नी॑ ॥ वा॒जिनी॑वती॒सूर्य॑स्य॒यो
षा॑चि॒त्राम॑घारा॒यऽई॑शे॒वसू॑नां । ऋषि॑ष्टुताज॒रयं॑तीम॒घोन्युषाऽउ॑च्छति॒वह्नि॑भिर्गृ॒णाना॑+ ॥ प्रति॑द्युता॒नाम॑रु॒षासो॒ऽअ
श्वा॑श्चि॒त्राऽअ॑दृश्रन्नु॒षसं॒वहं॑तः । याति॑शु॒भ्रावि॒श्वपि॑शा॒रथे॑न॒दधा॑ति॒रत्नं॑विध॒तेजना॑य ॥ स॒त्यास॒त्येभि॑र्म॒हती॑म॒हद्भि॑र्दे॒
वीदे॒वेभि॑र्यज॒तायज॑त्रैः । रु॒जद्दृ॒ळ्हानि॒दद॑दु॒स्रिया॑णां॒प्रति॒गाव॑ऽउ॒षसं॑वावशंत ॥ नूनो॒गोम॑द्वी॒रव॑द्धेहि॒रत्न॒मुषो॒ऽअश्वा॑व
त्पु॒रु॒भोजो॑ऽअ॒स्मे । मानो॑ब॒र्हिःपु॑रु॒षता॑नि॒दे॑कर्यू॒यंपा॑त० ॥ २२ ॥ (७।५।६) उदु॒ज्योति॑र॒मृतं॑वि॒श्वजं॑न्यंवि॒श्वान॑रः
स॒वि॒तादे॒वोऽअ॑श्रेत् । ऋत्वा॑दे॒वाना॑मजनिष्ट॒चक्षु॑रा॒विर॑क॒र्भुव॑नं॒विश्व॑मु॒षाः+ ॥ प्रमे॒पंथा॑देव॒याना॑ऽअदृश्र॒न्नम॑र्धंतो॒वसु॑
भि॒रिष्कृ॑तासः । अभू॑दु॒के॒तुरु॒षसः॑पु॒रस्ता॑त्प्रती॒च्यागा॒दधि॑ह॒र्म्येभ्यः॑ ॥ तानीदहा॑निब॒हुला॒न्या॑स॒न्याप्रा॒चीन॒मुदि॑ता॒सू ॥३५॥
र्य॑स्य । यतः॒परि॑जा॒रऽइ॑वा॒चरं॑त्युषो॑ददृ॒क्षेनपुन॑र्य॒तीव॑ ॥ तऽइद्दे॒वानां॑सध॒माद॑ऽआसन्नृ॒तावा॑नःक॒वयः॑पू॒र्व्यासः॑ । गू॒ळ्हं

(७।५।६) उदुज्योतिरितिसप्तर्चस्यसूक्तस्यवसिष्ठउषास्त्रिष्टुप् ।

ज्योतिःपितरोऽअन्वविंदन्त्सत्यमंत्राऽअजनयन्नुषासं ॥ समानऽऊर्वेऽअधिसंगतासःसंजानतेनयंतंतेमिथस्ते । तेदेवा
नांनमिनंतिव्रतान्यमर्धंतोवसुभिर्यादमानाः ॥ प्रतित्वास्तोमैरीळतेवसिष्ठाऽउषर्बुधःसुभगेतुष्टुवांसः । गवांनेत्रीवाज
पत्नीनऽउच्छोषःसुजातेप्रथमाजरस्व ॥ एषानेत्रीराधसःसूनृतानामुषाऽउच्छंतीरिभ्यतेवसिष्ठैः । दीर्घश्रुतंरयिमस्मे
दधानायूयंपात० ॥ २३ ॥ (७५१७) उपोरुरुचेयुवतिर्नयोषाविश्वंजीवंप्रसुवंतीचरायै । अभूदग्निःसमिधेमानु
षाणामकर्ज्योतिर्बाधमानातमांसि ॥ विश्वंप्रतीचीसप्रथाऽउदस्थाद्रुशद्वासोबिभ्रतीशुक्रमश्वैत् । हिरण्यवर्णासुदृशी
कसंदृग्गवांमातानेत्र्यह्नामरोचि ॥ देवानांचक्षुःसुभगावहंतीश्वेतंनयंतीसुदृशीकमश्वं । उषाऽअदर्शिरश्मिभिर्व्यक्ता
चित्रामघाविश्वमनुप्रभूता ॥ अंतिवामादूरेऽअमित्रमुच्छोर्वींगव्यूतिमभयंकृधीनः । यावयद्वेषऽआभरावसूनिचोद
यराधोगृणतेमघोनि ॥ अस्मेश्रेष्ठेभिर्भानुभिर्विभाह्युषोदेविप्रतिरंतीनऽआयुः । इषंचनोदधतीविश्ववारेगोमदश्वाव
द्रथवच्चराधः ॥ यांत्वादिवोदुहितर्वर्धयंत्युषःसुजातेमतिभिर्वसिष्ठाः । सास्मासुधारयिमृष्वंबृहंतंयूयंपात० ॥ २४ ॥
(७५१८) प्रतिकेतवःप्रथमाऽअदृश्रन्नूर्ध्वाऽअस्याऽअंजयोविश्रयंते । उषोऽअर्वाचाबृहतारथेनज्योतिष्मतावाम
मस्मभ्यंवक्षि ॥ प्रतिषीमग्निर्जरतेसमिद्धःप्रतिविप्रासोमतिभिर्गृणंतः । उषायातिज्योतिषाबाधमानाविश्वातमांसिदु

(७५१७) उपोरुरुचइतिषळर्चस्यसूक्तस्यवसिष्ठउषास्त्रिष्टुप् । (७५१८) प्रतिकेतवइतिपंचर्चस्यसूक्तस्यवसिष्ठउषास्त्रिष्टुप् ।

Digitization by eGangotri. Funding MDF-Delhi

रितापदेवी+ ॥ एताऽउत्याःप्रत्यदृश्रन्पुरस्ताज्ज्योतिर्यच्छंतीरुषसोविभातीः । अजीजनन्त्सूर्यंयज्ञमग्निमपाचीनंतमो
ऽअगादजुष्टं ॥ अचैतिदिवोदुहितामघोनीविश्वैंपश्यंत्युषसंविभातीं । आस्थाद्रथंस्वधयायुज्यमानमायमश्वासःसुयु
जोवहंति ॥ प्रतित्वाद्यसुमनसोबुधंतास्माकासोमघवानोवयंच । तिल्विलायध्वमुषसोविभातीर्यूयंपात० ॥ २५ ॥
(७।५।९) व्यु१षाऽआवःपथ्या३जनानांपंचक्षितीर्मानुषीर्बोधयंती । सुसंदृग्भिरुक्षभिर्भानुमश्रेद्विसूर्योरोदसीचक्ष
सावः ॥ व्यंजतेदिवोऽअंतेष्वक्तून्विशोनयुक्ताऽउषसोयतंते । संतेगावस्तमऽआवर्तयंतिज्योतिर्यच्छंतिसवितेवबा
हू+ ॥ अभूदुषाऽइंद्रतमामघोन्यजीजनत्सुवितायश्रवांसि । विदिवोदेवीदुहितादधात्यंगिरस्तमासुकृतेवसूनि ॥ ता
वंदुषोराधोऽअस्मभ्यंरास्वयावत्स्तोतृभ्योऽअरदोगृणाना । यांत्वाजज्ञुर्वृषभस्यारवेणविदृह्लस्यदुरोऽअद्रेरौर्णोः ॥ देवं
देवंराधसेचोदयंत्यस्मद्र्यक्सूनृताऽईरयंती । व्युच्छंतीनःसनयेधियोधायूयंपात० ॥ २६ ॥ (७।५।१०) प्रतिस्तो
मेभिरुषसंवसिष्ठागीर्भिर्विप्रासःप्रथमाऽअबुध्रन् । विवर्तयंतीरजसीसमंतेऽआविष्कृण्वतीभुवनानिविश्वा ॥ एषास्या
नव्यमायुर्दधानागूढ्वीतमोज्योतिषोषाऽअबोधि । अग्रऽएतियुवतिरह्रयाणाप्राचिकितत्सूर्यंयज्ञमग्निं+ ॥ अश्वावती ॥३६॥

(७।५।९) व्युषाआवइतिपंचर्चस्यसूक्तस्यवसिष्ठउषास्त्रिष्टुप् । (७।५।१०) प्रतिस्तोमेभिरितितृचस्यसूक्तस्यवसिष्ठउषास्त्रिष्टुप् ।

गोम॑तीर्नऽउ॒षासो॑वी॒रव॑ती॒ःसद॑मुच्छंतुभ॒द्राः । घृ॒तंदुहा॑नावि॒श्वत॒ःप्रपी॑तायू॒यंपा॑त० ॥ २७ ॥ ॥ इतिपंचमाष्टके पंचमोऽध्यायः ॥ ५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सप्तत्रिंशाध्यायेवर्गाः २७ सूक्तानि २१ ऋचः १५० ॥ त्यागः ॥ सूर्याये. मित्रावरुणाभ्या. १८ सूर्याये. ३ मित्रावरुणाभ्या. ३ सूर्याये. ४ सूर्यमित्रावरुणेभ्य. मित्रावरुणाभ्या. १४ आदित्येभ्य. १० सूर्याये. ३ मित्रावरुणाभ्या. ३ अश्विभ्या. ५६ उषस. ३४ ॥ इतिपंचमेपंचमः ॥

प्रत्युषट्प्रागाथंमिंद्रावरुणादशैंद्रावरुणंहजागतंतुयुवांनरावांपंचपुनीषेधीराष्टौवारुणंहरदत्सप्तप्रशुंध्युवंमंत्या पाशविमोचनींमोषुपंचगायत्रंजगत्यंतंप्रवीरयासप्तवायव्यंह्यैंद्रश्चयाद्विवदुक्ताःकुविदंगावायोपंचशुचिंन्वष्टावैंद्राग्नंत्विंयंवांद्वादशगायत्रमंत्यानुष्टुप्प्रक्षोदसाषट्सारस्वतंतुतृतीयासरस्वतेबृहदुप्रगाथःप्रस्तारपंक्तिःपरास्तिस्रोगायत्र्यःसरस्वतेयज्ञेदशैंद्र्यादिंबार्हस्पत्यमंत्यैंद्रीचंतृतीयानवम्यावैंद्राब्राह्मणस्पत्येंअध्वर्यवःसप्तोक्तदेवतांत्यांपरोवैष्णवंतूरुंमित्यैंद्र्यश्चतिस्रोनूमर्तः ॥ ६ ॥ ॥ ॥ ॥ ॥

॥ हरिःओम् ॥ (७५।११) प्रत्यु॑ऽअदर्श्याय॒त्यु॑१च्छंतीं॑दुहि॒तादि॒वः । अपो॒महिं॑व्ययति॒चक्ष॑से॒तमो॒ज्योति॑ष्कृ

(७५।११) प्रत्युअदर्शीतिषळर्चस्यसूक्तस्य [illegible] सतोबृहत्यः ।

CC-0. Rabi Acharya Ratnaparkhi Collection

णोतिसूनरी ॥ उदुस्रियाःसृजतेसूर्यःसचाँऽउद्यन्नक्षत्रमर्चिवत् । तवेदुषोव्युषिसूर्यस्यचसंभक्तेनगमेमहि ॥ प्रतित्वा
दुहितर्दिवऽउषोजीराऽअभुत्स्महि । यावहसिपुरुस्पार्हंवनन्वतिरत्नंनदाशुषेमयः ॥ उच्छंतीयाकृणोषिमंहनामहिभ्र
ख्यैदेविस्वर्दृशे । तस्यास्तेरत्नभाजऽईमहेवयंस्याममातुर्नसूनवः ॥ तच्चित्रंराधऽआभरोषोयद्दीर्घश्रुत्तमं । यत्तेदिवो
दुहितर्मर्तभोजनंतद्रास्वभुनजामहै ॥ श्रवःसूरिभ्योऽअमृतंवसुत्वनंवाजाँऽअस्मभ्यंगोमतः । चोदयित्रीमघोनःसूनृ
तावत्युषाऽउच्छदपस्रिधः ॥ १ ॥ (७५।१२) इंद्रावरुणायुवमध्वरायनोविशेजनायमहिशर्मयच्छतं । दीर्घप्रय
ज्युमतियोवनुष्यतिवयंजयेमपृतनासुदूढ्यः* ॥ सम्राळन्यःस्वराळन्यऽउच्यतेवांमहांताविंद्रावरुणामहावसू । विश्वे
देवासःपरमेव्योमनिसंवामोजोवृषणासंबलंदधुः ॥ अन्वपांखान्यतृंतमोजसासूर्यमैरयतंदिविप्रभुं । इंद्रावरुणामदे
ऽअस्यमायिनोपिन्वतमपितःपिन्वतंधियः ॥ युवामिद्युत्सुपृतनासुवह्नयोयुवांक्षेमस्यप्रसवेमितज्ञवः । ईशानावस्वऽ
उभयस्यकारवऽइंद्रावरुणासुहवाहवामहे ॥ इंद्रावरुणायदिमानिचक्रथुर्विश्वाजातानिभुवनस्यमज्मना । क्षेमेणमि
त्रोवरुणंदुवस्यतिमरुद्भिरुग्रःशुभमन्यऽईयते ॥ २ ॥ महेशुल्कायवरुणस्यनुत्विषऽओजोमिमातेध्रुवमस्ययत्स्वं । अ
जामिमन्यःश्नथयंतमातिरद्दभ्रेभिरन्यःप्रवृणोतिभूयसः ॥ नतमंहोनदुरितानिमर्त्यमिंद्रावरुणानतपःकुतश्चन ।

(७५।१२) इंद्रावरुणेतिदशर्चस्यसूक्तस्यवसिष्ठइंद्रावरुणौजगती ।

यस्यंदेवागच्छंथोवीथोऽअध्वरंनतंमर्तस्यनशतेपारिह्वृतिः ॥ अर्वाङ्नरादैव्येनावसागंतंशृणुतंहवंयदिमेजुजोषथः । युवोर्हिसख्यमुतवायदाप्यंमार्डीकमिंद्रावरुणानियच्छतं ॥ अस्माकमिंद्रावरुणाभरेभरेपुरोयोधाभवतंकृष्ट्योजसा । यद्वाँहवंतऽउभयेऽअधस्पृधिनरस्तोकस्यतनयस्यसातिषु ॥ अस्मेऽइंद्रोवरुणोमित्रोऽअर्यमाद्युम्नंयच्छंतुमहिशर्मसप्रथः । अवध्रंज्योतिरदितेर्ऋतावृधोदेवस्यश्लोकंसवितुर्मनामहे ॥ ३ ॥ (७।५।१३) युवांनरापश्यमानासऽआप्यंप्राचागव्यंतःपृथुपर्शवोययुः । दासाचवृत्राहतमार्याणिचसुदासमिंद्रावरुणावसावतं ॥ यत्रानरःसमयंतेकृतध्वजोयस्मिन्नाजाभवतिकिंचनप्रियं । यत्राभयंतेभुवनास्वर्दृशस्तत्रानऽइंद्रावरुणाधिवोचतं ॥ संभूम्याऽअंताध्वसिराऽअदृक्षतेंद्रावरुणादिविघोषऽआरुहत् । अस्थुर्जनानामुपमामरातयोर्वागवसाहवनश्रुतागतं ॥ इंद्रावरुणावधनाभिरप्रतिभेदंवन्वंताप्रसुदासमावतं । ब्रह्माण्येषांशृणुतंहवीमनिसत्यातृत्सूनामभवत्पुरोहितिः ॥ इंद्रावरुणावभ्यातपंतिमाघान्ययोवनुषामरातयः । युवंहिवस्वऽउभयस्यराजथोधंस्मानोवतंपार्येदिवि+ ॥ ४ ॥ युवांहवंतऽउभयासऽआजिष्विंद्रंचवस्वोवरुणंचसातये । यत्रराजभिर्दशभिर्निबाधितंप्रसुदासमावतंतृत्सुभिःसह+ ॥ दशराजानःसमिताऽअयज्यवःसुदासमिंद्रावरुणानयुयुधुः । सत्यानृणामद्मसदामुपस्तुतिर्देवाऽएषामभवन्देवहूतिषु ॥ दाशराज्ञेपरियत्तायविश्वतः

(७।५।१३) युवांनरेतिदशर्चस्यसूक्तस्यवसिष्ठइंद्रावरुणौजगती ।

Digitization by eGangotri. Funding MoE-Delhi

सु॒दास॑ऽइंद्रावरुणावशिक्षतं । श्वि॒त्यंचो॒यत्र॒नम॑साकप॒र्दिनो॒धि॒याधीवं॑तो॒ऽअस॑पंत॒तृत्स॑वः ॥ वृ॒त्राण्य॒न्यःस॑मि॒थेषु॒जिघ्नंतेव्र॒तान्य॒न्योऽअ॒भिर॑क्षते॒सदा॑ । हवा॑महेवांवृषणासुवृ॒क्तिभि॑र॒स्मेइंद्रावरुणा॒शर्म॑यच्छतं ॥ अ॒स्मेऽइंद्रो॒वरु॑णोमि॒त्रोऽअ॑र्य॒माद्यु॒म्नंय॑च्छंतु॒महि॒शर्म॑स॒प्रथः॑ । अ॒व॒ध्रंज्योति॒रदि॑तेर्ऋता॒वृधो॑दे॒वस्य॒श्लोकं॑सवि॒तुर्म॑नामहे ॥ ५ ॥ (७।५।१४) आवां॑राजानावध्व॒रेव॑वृत्यांह॒व्येभि॑रिंद्रावरुणा॒नमो॑भिः । प्रवां॑घृ॒ताची॑बा॒ह्वोर्दधा॑ना॒परि॒त्मना॒विषु॑रूपाजिगाति ॥ युवो॑रा॒ष्ट्रंबृ॒हदि॑न्वति॒द्यौयौ॑से॒तृभि॑रर॒ज्जुभि॑ःसिनी॒थः । परि॑नो॒हेळो॒वरु॑णस्यवृज्याऽउ॒रुंन॒ऽइंद्रः॑कृणवदुलो॒कं+ ॥ कृ॒तंनो॑य॒ज्ञंवि॒दथे॑षु॒चारुं॑कृ॒तंब्रह्मा॑णिसू॒रिषु॑प्रश॒स्ता । उपो॑र॒यिर्दे॒वजू॑तोनऽएतुप्रणः॑स्पा॒र्हाभि॑रू॒तिभि॑स्तिरेतं ॥ अ॒स्मेऽइंद्रावरुणावि॒श्ववा॑रंर॒यिंध॑त्तं॒वसु॑मंतंपुरु॒क्षुं । प्रय॑ऽआ॑दि॒त्योऽअनृ॑ताम॒िनात्यमि॑ता॒शूरो॑दयते॒वसू॑नि ॥ इ॒यमिंद्रं॒वरु॑णमष्टमे॒गीःप्राव॑त्तो॒केतन॑ये॒तूतु॑जाना । सु॒रत्ना॑सोदे॒ववी॑तिंगमेमयू॒यंपा॑त० ॥ ६ ॥ (७।५।१५) पु॒नी॒षेवा॑मर॒क्षसं॑मनी॒षांसोम॒मिंद्रा॑य॒वरु॑णाय॒जुह्व॑त् । घृ॒तप्र॑तीकामु॒षसं॒नदे॒वींता॑नो॒याम॑न्नुरुष्यताम॒भीके॑ ॥ स्पर्ध॑ते॒वाऽउ॑दे॒वहू॒ये॒ऽअत्र॒येषु॑ध्व॒जेषु॑दि॒द्यव॒ःपतं॑ति । यु॒वंताँइँद्रावरुणाव॒मित्रा॑न्ह॒तंपरा॑च॒ःशर्वा॒विषू॑चः ॥ आप॑श्चि॒द्धिस्वय॑शस॒ःसद॑ःसुदे॒वीरिंद्रं॒वरु॑णंदे॒वता॒धुः । कृ॒ष्टीर॒न्योधा॒रय॑ति॒प्रवि॑क्तावृ॒त्राण्य॒न्योऽअ॑प्र॒तीनि॑हंति ॥ ससु॒क्रतु॑र्ऋत॒चिद॑स्तु॒होता॒यऽआ॑दित्य॒शव॑सावां॒नम॑स्वान् ।

(७।५।१४)आवांराजानावितिपंचर्चस्यसूक्तस्यवसिष्ठइंद्रावरुणौत्रिष्टुप्।(७।५।१५)पुनीषेवामितिपंचर्चस्यसूक्तस्यवसिष्ठइंद्रावरुणौत्रिष्टुप्।

आववर्तदवसेवांहविष्मानसदित्ससुवितायप्रयस्वान् ॥ इयमिंद्रंवरुणमष्टमेगीःप्रावत्तोकेतनयेतूतुजाना । सुरत्नासो
देववीतिंगमेमयूयंपात० ॥ ७ ॥ (७।५।१६) धीरात्वस्यमहिनाजनूंषिवियस्तस्तंभरोदसीचिदुर्वी । प्रनाकमृष्वंनु
नुदेबृहंतंद्विितानक्षत्रंपप्रथच्चभूम ॥ उतस्वयातन्वा३संवदेतत्कदान्वं१तर्वरुणेभुवानि । किंमेहव्यमहृणानोजुषेतक
दामृळीकंसुमनाऽअभिख्यं ॥ पृच्छेतदेनोवरुणदिदृक्षूपोऽएमिचिकितुषोविपृच्छं । समानमिन्मेकवयश्चिदाहुरयं
हतुभ्यंवरुणोहृणीते ॥ किमागऽआसवरुणज्येष्ठंयत्स्तोतारंजिघांससिसखायं । प्रतन्मेवोचोदूळभस्वधावोवत्वाने
नानमसातुरऽइयां ॥ अवद्रुग्धानिपित्र्यासृजानोवयावयंचकृमातनूभिः । अवराजन्पशुतृपंनतायुंसृजावत्संनदाम्नो
वसिष्ठं ॥ नसःस्वोदक्षोवरुणध्रुतिःसासुरामन्युर्विभीदकोऽअचित्तिः । अस्तिज्यायान्कनीयसऽउपारेस्वप्नश्चनेदनृ
तस्यप्रयोता+ ॥ अरंदासोनमीळ्हुषेकराण्यहंदेवायभूर्णयेनागाः । अचेतयदचितोदेवोऽअर्योगृत्संरायेकवितरोजुना
ति ॥ अयंसुतुभ्यंवरुणस्वधावोहृदिस्तोमऽउपश्रितश्चिदस्तु । शंनःक्षेमेशमुयोगेनोऽअस्तुयूयंपातस्वस्तिभिः० ॥ ८ ॥
(७।५।१७) रदत्पथोवरुणःसूर्यायप्रार्णांसिसमुद्रियानदीनां । सर्गोनसृष्टोऽअर्वतीर्ऋतायन्चकारमहीरवनीरहभ्यः ॥
आत्मातेवातोरजऽआनवीनोत्पशुर्नभूर्णिर्यवसेससवान् । अंतर्महीबृहतीरोदसीमेविश्वातेधामवरुणप्रियाणि ॥ परि

(७।५।१६) धीरात्वित्यष्टर्चस्यसूक्तस्यवसिष्ठोवरुणस्त्रिष्टुप् । (७।५।१७) रदत्पथइतिसप्तर्चस्यसूक्तस्यवसिष्ठोवरुणस्त्रिष्टुप् ।

स्पशोवरुणस्यस्मादिष्टाऽउभेपश्यंतिरोदसीसुमेके । ऋतावानःकवयोयज्ञधीराःप्रचेतसोयऽइषयंतमन्म ॥ उवाचमेववरुणोमेधिरायत्रिःसप्तनामाघ्न्याबिभर्ति । विद्वान्पदस्यगुह्यानवोचद्युगायविप्रऽउपरायशिक्षन् ॥ तिस्रोद्यावोनिहिताऽअंतरस्मिन्तिस्रोभूमीरुपराःषड्विधानाः । गृत्सोराजावरुणश्चक्रऽएतंदिविप्रेंखंहिरण्ययंशुभेकं+ ॥ अवसिंधुंवरुणोद्यौरिवस्थाद्द्रप्सोनश्वेतोमृगस्तुविष्मान् । गंभीरशंसोरजसोविमानःसुपारक्षत्रःसतोऽअस्यराजा ॥ योमृळयातिचक्रुषेचिदागोवयंस्यामवरुणेऽअनागाः । अनुव्रतान्यदितेर्ऋधंतोयूयंपात० ॥ ९ ॥ (७।५।१८) प्रशुंध्युवंवरुणायप्रेष्ठांमतिंवसिष्ठमीळ्हुषेभरस्व । यईमर्वांचंकरतेयजत्रंसहस्रामघंवृषणंबृहंतं ॥ अधान्वस्यसंदृशंजगन्वानग्नेरनीकंवरुणस्यमंसि । स्व१र्यदश्मन्नधिपाऽउऽअंधोभिमावपुर्दृशयेनिनीयात् ॥ आयद्रुहाववरुणश्चनावंप्रयत्समुद्रमीरयावमध्यं । अधियदपांस्नुभिश्चरावप्रप्रेंखऽईंखयावहैशुभेकं+ ॥ वसिष्ठंहवरुणोनाव्याधादृषिंचकारस्वपामहोभिः । स्तोतारंविप्रःसुदिनत्वेऽअह्नांयान्नुद्यावस्ततनन्यादुषासः ॥ क्व१त्यानिनौसख्याबभूवुःसचावहेयदवृकंपुराचित् । बृहंतंमानंवरुणस्वधावःसहस्रद्वारंजगमागृहंते ॥ यऽआपिर्नित्योवरुणप्रियःसन्त्वामागांसिकृणवत्सखाते । मातऽएनस्वंतोयक्षिन्भुजेमयंधिष्माविप्रःस्तुवतेवरूथं ॥ ध्रुवासुत्वासुक्षितिषुक्षियंतोव्य१स्मत्पाशंवरुणोमुमोचत् । अवोवन्वानाऽअदितेरु

(७।५।१८) प्रशुंध्युवमितिसप्तर्चस्यसूक्तस्यवसिष्ठोवरुणस्त्रिष्टुबंत्याजगती । (अंत्यापाशविमोचनीतिगुण:) ।

पस्थाद्यूयंपात० ॥ १० ॥ (७।५।१९) मोषुवरुणमृन्मयँगृहंराजन्नहंगमं । मृळासुक्षत्रमृळय ॥ यदेमिप्रस्फुरन्निव दृतिर्नध्मातोऽअद्रिवः । मृळा० ॥ क्रत्वःसमहदीनताप्रतीपंजगमाशुचे । मृळा० ॥ अपांमध्येतस्थिवांसंतृष्णाविदज्जरितारं । मृळा० ॥ यत्किंचेदंवरुणदैव्येजनेभिद्रोहंमनुष्या३श्चरामसि । अचित्तीयत्तवधर्मायुयोपिममानस्तस्मादेनंसोदेवरीरिषः ॥ ११ ॥ (७।६।१) प्रवीरयाशुचयोदद्रिरेवामध्वर्युभिर्मधुमंतःसुतासः । वहवायोनियुतोयाह्यच्छापिबासुतस्यांधसोमदाय ॥ ईशानायप्रहुतिंयस्तऽआनट्शुचिंसोमँशुचिपास्तुभ्यँवायो । कृणोषितंमर्त्येषुप्रशस्तंजातोजातोजायतेवाज्यस्य ॥ रायेनुयंजज्ञतूरोदसीमेरायेदेवीधिषणाधातिदेवं । अधवायुंनियुतःसश्चतस्वाऽउतश्वेतंवसुधितिंनिरेके+ ॥ उच्छन्नुषसःसुदिनाऽअरिप्राऽउरुज्योतिर्विविदुर्दीध्यानाः । गव्यंचिदूर्वमुशिजोविवव्रुस्तेषामनुप्रदिवःसस्रुरापः ॥ तेसत्येनमनसादीध्यानाःस्वेनयुक्तासःक्रतुनावहंति । इंद्रवायूवीरवाहंरथंवामीशानयोरभिपृक्षःसचंते ॥ ईशानासोयेदधतेस्वर्णोगोभिरश्वेभिर्वसुभिर्हिरण्यैः । इंद्रवायूसूरयोविश्वमायुरर्वद्भिर्वीरैःपृतनासुसह्युः ॥ अर्वतोनश्रवसोभिक्षमाणाऽइंद्रवायूसुष्टुतिभिर्वसिष्ठाः । वाजयंतःस्ववसेहुवेमयूयंपात० ॥ १२ ॥ (७।६।२) कुवि

(७।५।१९) मोषुवरुणेतिपंचर्चस्यसूक्तस्यवसिष्ठोवरुणोगायत्र्यंत्याजगती । (७।६।१) प्रवीरयेतिसप्तर्चस्यसूक्तस्यवसिष्ठः आद्यानां चतसृणांवायुरंत्यानांतिसृणामिंद्रवायूत्रिष्टुप् । (७।६।२) कुविदंगेतिसप्तर्चस्यसूक्तस्यवसिष्ठइंद्रवायूआद्यातृतीययोर्वायुस्त्रिष्टुप् ।

दं॒गन॑म॒सा॒येवृ॒धासः॑पु॒रादे॒वाऽअ॑नव॒द्यास॒ऽआस॑न् । ते॒वा॒य॒वे॒म॑नवे॒बा॒धि॒ता॒यावा॑सयन्नु॒षसं॒सूर्ये॑ण ॥ उ॒शंता॑दू॒तानद॑भा
यगो॒पामा॒सश्च॑पा॒थःश॒रद॑श्चपू॒र्वीः॑ । इंद्र॑वायूसु॒ष्टु॒तिर्वा॑मि॒याना॒मा॑र्डी॒कमी॑ट्टेसुवि॒तंच॒नव्यं॑ ॥ पीवो॑ऽअन्नाँ॑रयि॒वृधः॑सु॒मे
धाः॒श्वे॒तःसिं॑षक्तिनि॒युतां॑मभि॒श्रीः । ते॒वा॒यवे॒सम॑नसो॒वित॑स्थु॒र्विश्वे॑न्नरः॑स्वप॒त्यानि॑चक्रुः ॥ याव॒त्तर॑स्त॒न्वो॒३॒याव॒दोजो॒
याव॒न्नर॒श्चक्ष॑सा॒दीध्या॑नाः। शुचिं॒सोमं॑शुचिपापातम॒स्मेऽइंद्र॑वायूसद॑तंब॒र्हि॑रेदं ॥ नि॒यु॒वा॒नानि॒युत॑ःस्पा॒र्हवी॑रा॒ऽइंद्र॑वायू
स॒रथँ॑यातम॒र्वाक् । इ॒दंहि॒वांप्र॑भृ॒तं॒मध्वो॒ऽअग्र॒मध॑प्रीणा॒नाविमुं॑मुक्तम॒स्मे ॥ यावां॑श॒तंनि॒युतो॒याःस॒हस्र॒मिंद्र॑वायूवि॒श्व
वा॑रा॒ःसचैं॑ते । आभि॑र्यातंसुवि॒दत्रा॑भिर॒र्वाक्पा॒तंन॑रा॒प्रति॑भृतस्य॒मध्वः॑ ॥ अर्वैं॑तो॒नश्रव॑सो॒भिक्ष॑माणाऽइंद्र॒वायूसु॑ष्टुति
भि॒र्वसि॑ष्ठाः । वा॒ज॒यंत॒ःस्ववं॑सेहुवेमयू॒यंपा॑त० ॥ १३ ॥ (७।६।३) आवां॑योभूषशुचिपा॒ऽउप॑नःस॒हस्रं॑तेनि॒युतो॑वि
श्ववार । उपो॑ते॒ऽअंधो॒मद्य॑मयामि॒यस्य॑देवदधि॒षेपूर्व॒पेयं॑ ॥ प्रसोता॑जी॒रोऽअं॑ध्व॒रेष्वं॑स्था॒त्सोम॒मिंद्रा॑यवा॒यवे॒पिबं॑ध्यै ।
प्रयद्वां॒मध्वो॑ऽअग्रि॒यंभरं॑त्यध्व॒र्यवो॑देव॒यंत॒ःशची॑भिः ॥ प्रया॒भिर्यासिं॑दा॒श्वांस॒मच्छा॑नि॒युद्भि॒र्वा॑यवि॒ष्टयें॑दुरो॒णे । निनो॑
र॒यिंसुभोजं॑संयुवस्व॒निवी॒रंगव्य॒मश्व्यं॑च॒राधः॑ ॥ ये॒वा॒यव॑ऽइंद्र॒मादं॑ना॒स॒ऽआदे॑वासोनि॒तोश॑नासोऽअ॒र्यः । घ्नंतो॑वृ॒त्रा
णिंसू॒रिभिः॑ष्यामसास॒ह्वांसो॑यु॒धानृभि॑र॒मित्रा॑न् ॥ आनो॑नि॒युद्भि॑ःश॒तिनी॑भिरध्व॒रंस॑ह॒स्रिणी॑भि॒रुप॑याहियज्ञं । वायो॑

(७।६।३) आवायोइतिपंचर्चस्यसूक्तस्यवसिष्ठोवायुर्द्वितीयाचतुर्थ्योरिंद्रवायूत्रिष्टुप् ।

ऽअस्मिन्त्सवनेमादयस्वयूयंपात० ॥ १४ ॥ (७।६।४) शुचिंनुस्तोमंनवजातमद्येंद्राग्नीवृत्रहणाजुषेथां । उभाहि
वांसुहवाजोहवीमितावाजंसद्यऽउंशतेधेष्ठा ॥ तासानसीशंवसानाहिभूतंसाकंवृधाशवसाशूशुवांसा । क्षयंतौरायोय
वंसस्यभूरेःपृंक्तंवाजस्यस्थविरस्यघृष्वेः ॥ उपोहयद्विदथंवाजिनोगुर्धीभिर्विप्राःप्रमतिमिच्छमानाः । अर्वंतोनकाष्ठां
नक्षमाणाऽइंद्राग्नीजोहुवतोनरस्ते+ ॥ गीर्भिर्विप्रःप्रमतिमिच्छमानऽईट्टेरयिंयशसंपूर्वभाजं । इंद्राग्नीवृत्रहणासुवज्रा
प्रनोनव्येभिस्तिरतंदेष्णैः+ ॥ संयन्महीमिथतीस्पर्धमानेतनूरुचाशूरसातायतैते । अदेवयुंविदथेदेवयुभिःसत्राहतं
सोमसुताजनेन ॥ १५ ॥ इमामुषुसोमसुतिमुपनऽएंद्राग्नीसौमनसाययातं । नूचिद्धिपरिमम्नाथेऽअस्मानावांशश्व
द्भिर्ववृतीयवाजैः ॥ सोऽअग्नऽएनानमसासमिद्धोच्छामित्रंवरुणमिंद्रंवोचेः । यत्सीमागश्चकृमातत्सुमृळतदर्यमादि
तिःशिश्रथंतु ॥ एताऽअग्नऽआशुषाणासऽइष्टीर्युवोःसचाभ्यश्यामवाजान् । मेंद्रोनोविष्णुर्मरुतःपरिख्यन्यूयंपात०
॥ १६ ॥ (७।६।५) इयंवामस्यमन्मनऽइंद्राग्नीपूर्व्यस्तुतिः । अभ्राद्वृष्टिरिवाजनि ॥ शृणुतंजरितुर्हवमिंद्राग्नीव
नतंगिरः । ईशानापिप्यतंधियः ॥ मापापत्वायनोनरेंद्राग्नीमाभिशस्तये । मानोरीरधतंनिदे ॥ इंद्रेऽअग्नानमोबृह
त्सुवृक्तिमेरयामहे । धियाधेनाऽअवस्यवः ॥ ताहिशश्वंतऽईळतऽइत्थाविप्रासऽऊतये । सबाधोवाजसातये ॥ ता

(७।६।४) शुचिंन्वित्यष्टर्चस्यसूक्तस्यवसिष्ठइंद्राग्नीत्रिष्टुप् । (७।६।५) इयंवामितिद्वादशर्चस्यसूक्तस्यवसिष्ठइंद्राग्नीगायत्र्यंत्यानुष्टुप् ।

वांगीर्भिर्विपन्यवःप्रयस्वंतोहवामहे । मेधसातासनिष्यवः ॥ १७ ॥ इंद्राग्नीऽअवसागंतमस्मभ्यंचर्षणीसहा । मा
नोदुःशंसऽईशत ॥ माकस्यनोऽअररुषोधूर्तिःप्रणङ्मर्त्यस्य । इंद्राग्नीशर्मयच्छतं ॥ गोमद्धिरण्यवद्वसुयद्वामश्वावदी
महे । इंद्राग्नीतद्वनेमहि ॥ यत्सोमऽआसुतेनरऽइंद्राग्नीऽअजोहवुः । सप्तीवंतासपर्यवः ॥ उक्थेभिर्वृत्रहंतमायामं
दानाचिदागिरा । आंगूषैराविवासतः ॥ ताविद्दुःशंसंमर्त्यंदुर्विद्वांसंरक्षस्विनं । आभोगंहन्मनाहतमुदधिंहन्मनाह
तं ॥ १८ ॥ (७।६।६) प्रक्षोदसाधायसासस्रऽएषासरस्वतीधरुणमायसीपूः । प्रबाबधानारथ्येवयातिविश्वाऽअ
पोमहिनासिंधुरन्याः+ ॥ एकाचेतत्सरस्वतीनदीनांशुचिर्यतीगिरिभ्यऽआसमुद्रात् । रायश्चेतंतीभुवनस्यभूरेर्घृतंप
योदुदुहेनाहुषाय ॥ सवावृधेनर्योयोषणासुवृषाशिशुर्वृषभोयज्ञियासु । सवाजिनंमघवद्भ्योदधातिविसातयेतन्वंमा
मृजीत ॥ उतस्यानःसरस्वतीजुषाणोपश्रवत्सुभगायज्ञेऽअस्मिन् । मितज्ञुभिर्नमस्यैरियानारायायुजाचिदुत्तरासखि
भ्यः ॥ इमाजुह्वानायुष्मदानमोभिःप्रतिस्तोमंसरस्वतिजुषस्व । तवशर्मन्प्रियतमेदधानाऽउपस्थेयामशरणंनवृक्षं+ ॥
अयमुतेसरस्वतिवसिष्ठोद्वारावृतस्यसुभगेव्यावः । वर्धशुभ्रेस्तुवतेरासिवाजान्यूयंपात० ॥ १९ ॥ (७।६।७) बृहदु

(७।६।६) प्रक्षोदसेतिषळर्चस्यसूक्तस्यवसिष्ठःसरस्वतीतृतीयायाःसरस्वान्त्रिष्टुप् । (७।६।७) बृहदुगायिषइतिषळर्चस्यसूक्तस्य वसिष्ठःसरस्वतीअंत्यानांतिसृणांसरस्वान्आद्याबृहतीद्वितीयासतोबृहतीतृतीयाप्रस्तारपंक्तिःअंत्यास्तिस्रोगायत्र्यः ।

गायिषेवचोसुर्यानदीनां । सरस्वतीमिन्महयासुवृक्तिभिःस्तोमैर्वसिष्ठरोदसी ॥ उभेयत्तेमहिनाशुभ्रेऽअंधसीऽअ
धिक्षियंतिपूरवः । सानोबोध्यवित्रीमरुत्सखाचोदराधोमघोनां ॥ भद्रमिद्भद्राकृणवत्सरस्वत्यकवारीचेततिवाजिनी
वती । गृणानाजमदग्निवत्स्तुवानाचवसिष्ठवत्+ ॥ जनीयंतोन्वग्रवःपुत्रीयंतःसुदानवः । सरस्वंतंहवामहे ॥ येतेस
रस्वऽऊर्मयोमधुमंतोघृतश्चुतः । तेभिर्नोऽविताभव ॥ पीपिवांसंसरस्वतःस्तनंयोविश्वदर्शतः । भक्षीमहिप्रजामिषं
॥ २० ॥ (७।६।८) यज्ञेदिवोनृषदनेपृथिव्यानरोयत्रदेवयवोमदंति । इंद्राययत्रसवनानिसुन्वेगमन्मदायप्रथमंवय
श्च ॥ आदैव्यावृणीमहेवांसिबृहस्पतिर्नोमहऽआसखायः । यथाभवेममीढुषेऽअनागायोनोदातापरावतःपितेव ॥
तमुज्येष्ठंनमसाहविर्भिःसुशेवंब्रह्मणस्पतिंगृणीषे । इंद्रंश्लोकोमहिदैव्यःसिषक्तुयोब्रह्मणोदेवकृतस्यराजा ॥ सऽआ
नोयोनिंसदतुप्रेष्ठोबृहस्पतिर्विश्ववारोयोऽअस्ति । कामोरायःसुवीर्यस्यतंदात्पर्षन्नोऽअतिसश्चतोऽअरिष्टान् ॥ तमानो
ऽअर्कममृतायजुष्टमिमेधासुरमृतासःपुराजाः । शुचिक्रंदंयजतंपस्त्यानांबृहस्पतिमनर्वाणंहुवेम ॥ २१ ॥ तंशग्मा
सोऽअरुषासोऽअश्वाबृहस्पतिंसहवाहोवहंति । सहश्चिद्यस्यनीलवत्सधस्थंनभोनरूपमरुषंवसानाः ॥ सहिशुचिःशत
पत्रःसशुंध्युर्हिरण्यवाशीरिषिरःस्वर्षाः । बृहस्पतिःसस्वावेशऽऋष्वःपुरूसखिभ्यऽआसुतिंकरिष्ठः ॥ देवीदेवस्यरोद

(७।६।८) यज्ञेदिवइतिदशर्चस्यसूक्तस्यवसिष्ठोबृहस्पतिः आद्याययांतः तृतीय[illegible]योरिंद्राब्रह्मणस्पतीअंत्यायाइंद्राबृहस्पतीत्रिष्टुप् ।

सीजनित्रीबृहस्पतिंवावृधतुर्महित्वा । दुक्षाय्यायदक्षतासखायःकरुद्ब्रह्मणेसुतरासुगाधा⁺ ॥ इयंवांब्रह्मणस्पतेसुवृक्तिर्ब्रह्मेंद्रायवज्रिणेऽअकारि । अविष्टंधियोजिगृतंपुरंधीर्जजस्तमर्योवनुषामरातीः ॥ बृहस्पतेयुवमिंद्रश्चवस्वोदिव्यस्यैशाथेऽउतपार्थिवस्य । धत्तंरयिंस्तुवतेकीरयेचिद्यूयंपात० ॥ २२ ॥ (७।६।९) अध्वर्यवोरुणंदुग्धमंशुंजुहोतनवृषभायक्षितीनां । गौराद्वेदीयाँऽअवपानमिंद्रोविश्वाहेद्यातिसुतसोममिच्छन्⁺ ॥ यद्दधिषेप्रदिविचार्वन्नंदिवेदिवेपीतिमिदंस्यवक्षि । उतहृदोतमनसाजुषाणऽउशन्निंद्रप्रस्थितान्पाहिसोमान् ॥ जज्ञानःसोमंसहसेपपाथप्रतेमातामहिमानमुवाच । एंद्रपप्राथोर्वं१तरिक्षंयुधादेवेभ्योवरिवश्चकर्थ ॥ यद्योधयामहतोमन्यमानान्त्साक्षामतान्बाहुभिःशाशदानान् । यद्वानृभिर्वृतऽइंद्राभियुध्यास्तंत्वयाजिंसौश्रवसंजयेम ॥ प्रेंद्रस्यवोचंप्रथमाकृतानिप्रनूतनामघवायाचकार । यदेददेवीरसहिष्टमायाऽथाभवत्केवलःसोमोऽअस्य ॥ तवेदंविश्वमभितःपशव्यं१यत्पश्यसिचक्षसासूर्यस्य । गवामसिगोपतिरेकऽइंद्रभक्षीमहितेप्रयतस्यवस्वः ॥ बृहस्पतेयुवमिंद्रश्चवस्वोदिव्यस्यैशाथेऽउतपार्थिवस्य । धत्तंरयिंस्तुवतेकीरयेचिद्यूयंपात० ॥ २३ ॥ (७।६।१०) परोमात्रयातन्वावृधाननतेमहित्वमन्वश्नुवंति । उभेते

(७।६।९) अध्वर्यवइतिसप्तर्चस्यसूक्तस्यवसिष्ठइंद्रोंत्यायाइंद्राबृहस्पतीत्रिष्टुप् । (७।६।१०) परोमात्रयेतिसप्तर्चस्यसूक्तस्यवसिष्ठोविष्णुःउरुंयज्ञायेतितिसृणामिंद्राविष्णूत्रिष्टुप् ।

विद्मरजसीपृथिव्याविष्णोदेवत्वंपरमस्यवित्से ॥ नतेविष्णोजायमानोनजातोदेवमहिम्नःपरमंतमाप । उदस्तभ्नानाकमृष्वंबृहंतंदाधर्थप्राचींककुभंपृथिव्याः+ ॥ इरावतीधेनुमतीहिभूतंसूयवसिनीमनुषेदशस्या । व्यस्तभ्नारोदसीविष्णवेतेदाधर्थपृथिवीमभितोमयूखैः ॥ उरुंयज्ञायचक्रथुरुलोकंजनयंतासूर्यमुषासमग्निं । दासस्यचिद्वृषशिप्रस्यमायाजघ्नथुर्नरापृतनाज्येषु ॥ इंद्राविष्णूदृंहिताःशंबरस्यनवपुरोनवतिंचश्नथिष्टं । शतंवर्चिनःसहस्रंचसाकंहथोऽअप्रत्यसुरस्यवीरान्+ ॥ इयंमनीषाबृहतीबृहंतोरुक्रमातवसावर्धयंती । ररेवांस्तोमंविदथेषुविष्णोपिन्वतमिषोवृजनेष्विंद्र ॥ वषट्तेविष्णवासऽआकृणोमितन्मेजुषस्वशिपिविष्टहव्यं । वर्धंतुत्वासुष्टुतयोगिरोमेयूयंपात० ॥ २४ ॥ (७।६।११) नूमर्तोदयतेसनिष्यन्योविष्णवऽउरुगायायदाशत् । प्रयःसत्राचामनसायजातऽएतावंतंनर्यमाविवासात् ॥ त्वंविष्णोसुमतिंविश्वजन्यामप्रयुतामेवयावोमतिंदाः । पर्चोयथानःसुवितस्यभूरेरश्वावतःपुरुश्चंद्रस्यरायः+ ॥ त्रिर्देवःपृथिवीमेषऽएतांविचक्रमेशतर्चसंमहित्वा । प्रविष्णुरस्तुतवसस्तवीयान्त्वेषंह्यस्यस्थविरस्यनाम ॥ विचक्रमेपृथिवीमेषऽएतांक्षेत्रायविष्णुर्मनुषेदशस्यन् । ध्रुवासोऽअस्यकीरयोजनासऽउरुक्षितिंसुजनिमाचकार ॥ प्रतत्तेऽअद्यशिपिविष्टनामार्यःशंसामिवयुनानिविद्वान् । तंत्वागृणामितवसमतव्यान्क्षयंतमस्यरजसःपराके+ ॥ किमित्तेविष्णोपरिचक्ष्यं

(७।६।११). नूमर्तइतिसप्तर्चस्यसूक्तस्यवासिष्ठोविष्णुस्त्रिष्टुप् ।

Digitization by eGangotri. Funding:MoE-Delhi

भू॒त्प्रयद्व॑व॒क्षेशि॑पिवि॒ष्टोऽअ॑स्मि । मावर्पो॑ऽअस्म॒दप॑गूहए॒तद्यद॒न्यरू॑पःस॒मि॒थेब॒भूथ॑ ॥ वष॑ट्तेविष्णवा॒सऽआकृ॑णोमि॒तन्मे॑जुषस्वशिपिविष्टह॒व्यं । वर्धं॑तुत्वासुष्टु॒तयो॒गिरो॑मेयू॒यंपा॑त० ॥ २५ ॥ इतिपंचमाष्टकेषष्ठोऽध्यायः ॥ ६ ॥

अष्टत्रिंशाध्यायेवर्गाः २५ सूक्तानि २० ऋचः १४५ ॥ त्यगः ॥ उषस. ६ इंद्रावरुणाभ्या. ३० वरुणाये. २७ वायव. ४ इंद्रवायुभ्या. ३ वायव. इंद्रवायुभ्या. वायव. इंद्रवायुभ्या. ४ वायव. इंद्रवायुभ्या. वायव. इंद्रवायुभ्या. वायव. इंद्राग्निभ्या. २० सरस्वत्या. २ सरस्वत. सरस्वत्या. ६ सरस्वत. ३ इंद्राये. बृहस्पतय. इंद्राब्रह्मणस्पतिभ्या. बृहस्पतय. ५ इंद्राब्रह्मणस्पतिभ्या. इंद्राबृहस्पतिभ्या इंद्राये. ६ इंद्राबृहस्पतिभ्या. विष्णव. ३ इंद्राविष्णुभ्या. ३ विष्णव. ८ ॥ इतिपंचमेषष्ठः ॥

तिस्रःषट्पार्जन्यंतुपर्जन्यायतृचंगायत्रंद्वितीयापादनिचृंदेतेकुमारआग्नेयोपश्यंद्वसिष्ठएववावृष्टिकामःसंवत्सरंदशपर्जन्यस्तुतिःसंहृष्टान्मंडूकांस्तुष्टावाद्यानुष्टुविंद्रासोमापंचाधिकैंद्रासोमंराक्षोघ्नंशापाभिशापप्रायंषट्सप्तवाद्याजगत्यएकविंशीत्रयोविंश्यौचाष्टादशीमारुतीचंदशमीचतुर्दश्यावाग्नेय्यौदैव्यैकादश्यंत्यानुष्टुम्नवमीद्वादशीत्रयोदशीसौम्यःसप्तदशीग्राव्ण्यष्टमीषोळश्यावैंद्र्यौप्रवर्तयेतिचतस्रऐंद्र्योमानोरक्षइत्यृषेरात्मानआशीरुत्तरोर्धर्चःपृथिव्यंतरिक्षंद्यौरितिदैवतंःपरंगायत्रंप्राग्वत्सप्रेर्ऋषिश्चानुक्तगोत्रःप्राङ्मत्स्यात्काण्वोष्टमंमंडलंमाचिच्चतुस्त्रिंशन्मेधातिथिमेध्यातिथीऐंद्रंबार्हतंद्विप्रगाथादिद्वित्रिष्टुबंतमाद्यंद्वृचंप्रगाथोपश्यत्सघौरःसन्भ्रातुःकण्व

स्यपुत्रतामगात्प्लायोगिश्चासंगोर्यःस्त्रीभूत्वापुमानभूत्समेध्यातिथयेदानंदत्त्वास्तुहिस्तुहीतिचतसृभिरात्मानं तुष्टावपत्नीचास्यांगिरसीशश्वतीपुंस्त्वमुपलभ्यैनंप्रीतांत्ययातुष्टावेंदंवसोद्धिचत्वारिंशन्मेधातिथिरागिरसश्चप्रियमेधःस्वादवोनुष्टुबंत्याभ्यांमेधातिथिर्विभिंदोर्दानंतुष्टावपिवचतुर्विंशतिर्मेध्यातिथिःप्रागाथंत्वंनुष्टुब्गाय त्र्यौबृहतींचांत्याःकौरयाणस्यपाकस्थाम्नोदानस्तुतिर्यदिंद्रसैकादेवातिथिस्तृचोंत्यःपुरउष्णिगंतःकुरुंगस्यदानस्तुतिस्तत्पूर्वाश्चतस्रःपौष्ण्योवा ॥ ७ ॥ ॥ ॥ ॥ ॥

॥ हरिःॐम् ॥ (७।६।१२) तिस्रोवाचःप्रवदज्योतिरग्रायाऽएतद्दुह्रेमधुदोघमूधः । सवत्संकृण्वन्गर्भमोषधीनांसद्योजातोवृषभोरोरवीति ॥ योवर्धनऽओषधीनांयोऽअपांयोविश्वस्यजगतोदेवऽईशे । सत्रिधातुशरणंशर्मयंसत्रिवर्तुज्योतिःस्वभिष्ट्य१स्मे ॥ स्तरीरुत्वद्भवतिसूतऽउत्वद्यथावशंतन्वंचक्रऽएषः । पितुःपयःप्रतिगृभ्णातिमातातेनपितावर्धतेतेनपुत्रः+ ॥ यस्मिन्विश्वानिभुवनानितस्थुस्तिस्रोद्यावस्त्रेधासस्रुरापः । त्रयःकोशासऽउपसेचनासोमध्वःश्चोतंत्यभितोविरप्शं+ ॥ इदंवचःपर्जन्यायस्वराजेहृदोऽअस्त्वंतरंतज्जुजोषत् । मयोभुवोवृष्टयःसंत्वस्मेसुपिप्पलाऽओषधीर्देवगोपाः ॥ सरेतोधावृषभःशश्वतीनांतस्मिन्नात्माजगतस्तस्थुषश्च। तन्मऽऋतंपातुशतशारदाययूयंपात० ॥

(७।६।१२) तिस्रोवाचइतिषळर्चस्यसूक्तस्यआग्नेयःकुमारःपर्जन्यस्त्रिष्टुप। (तिस्रोवाचःपर्जन्यायेतिसूक्तयोर्वृष्टिकामोवसिष्ठःपाक्षिकः)

॥ १ ॥ (७।६।१३) पर्जन्यायप्रगायतदिवस्पुत्रायमीळ्हुषे । सनोयवसमिच्छतु ॥ योगर्भमोषधीनांगवांकृणोत्यर्वतां । पर्जन्यःपुरुषीणां ॥ तस्माऽइदास्येहविर्जुहोतामधुमत्तमं । इळांनःसंयतंकरत् ॥ २ ॥ (७।६।१४) संवत्सरंशशयानाब्राह्मणाव्रतचारिणः । वाचंपर्जन्यजिन्वितांप्रमंडूकाऽअवादिषुः ॥ दिव्याऽआपोऽअभियदेनमायन्दृतिंनशुष्कंसरसीशयानं । गवामहनमायुर्वत्सिनीनांमंडूकानांवग्नुरत्रासमेति ॥ यदीमेनाँऽउशतोऽअभ्यवर्षीत्तृष्यावतःप्रावृष्यागतायां । अक्खलीकृत्यापितरंनपुत्रोऽअन्योऽअन्यमुपवदंतमेति ॥ अन्योऽअन्यमनुगृभ्णात्येनोरपांप्रसर्गेयदमंदिषातां । मंडूकोयदभिवृष्टःकनिष्कन्पृश्निःसंपृंक्तेहरितेनवाचं ॥ यदेषामन्योऽअन्यस्यवाचंशाक्तस्येववदतिशिक्षमाणः । सर्वंतदेषांसमृधेवपर्वयत्सुवाचोवदथनाध्यप्सु+ ॥ ३ ॥ गोमायुरेकोऽअजमायुरेकःपृश्निरेकोहरितऽएकऽएषां । समानंनामबिभ्रतोविरूपाःपुरुत्रावाचंपिपिशुर्वदंतः ॥ ब्राह्मणासोऽअतिरात्रेनसोमेसरोनपूर्णमभितोवदंतः । संवत्सरस्यतदहःपरिष्ठयन्मंडूकाःप्रावृषीणंबभूव ॥ ब्राह्मणासःसोमिनोवाचमक्रतब्रह्मकृण्वंतःपरिवत्सरीणं । अध्वर्यवोघर्मिणःसिष्विदानाऽआविर्भवंतिगुह्यानकेचित् ॥ देवहितिंजुगुपुर्द्वादशस्यऽऋतुंनरोनप्रमिनंत्येते । संवत्सरेप्रावृ

(७।६।१३) पर्जन्यायेतितृचस्यसूक्तस्याग्नेयःकुमारःपर्जन्योगायत्री । (७।६।१४) संवत्सरमितिदशर्चस्यसूक्तस्यवसिष्ठःपर्जन्यस्तुतिहृष्टमंडूकास्त्रिष्टुबाद्यानुष्टुप् ।

ष्याग॑तायांत॒प्ताघ॒र्मा॑ऽअं॑श्नुवतेविस॒र्गं॑+ ॥ गोमा॑युरदाद्॒जमा॑युरदा॒त्पृश्नि॑रदा॒द्धरि॑तोनो॒वसू॑नि । गवां॑मं॒डूका॒दद॑तःश॒तानि॑सहस्रसा॒वेप्रति॑रंत॒ऽआयुः॑ ॥ ४ ॥ (परिशिष्टं ॥ उप॒प्लवं॑दमंडूकीव॒र्षमावं॑दतादुरि । मध्ये॑ह्र॒दस्यं॑प्लु॒वस्यं॑नि॒गृह्यं॑च॒तुरः॑प॒रः ॥) (७।६।१५) इंद्रा॑सोमा॒तप॑तं॒रक्ष॑ऽउ॒ब्जतं॒न्य॑र्पयतंवृषणातमो॒वृधः॑ । परा॑शृणीतम॒चितो॒न्यो॑षतंह॒तंनु॒देथां॒निशि॑शीतम॒त्रिणः॑ ॥ इंद्रा॑सोमा॒सम॒घशं॑सम॒भ्यं॑१॒घंतपु॑र्ययस्तुच॒रुर॑ग्नि॒वाँऽइ॑व । ब्र॒ह्म॒द्विषे॑क्र॒व्यादे॑घो॒रच॑क्षसे॒द्वेषो॑धत्तमनवा॒यंकि॑मी॒दिने॑ ॥ इंद्रा॑सोमादु॒ष्कृतो॑व॒व्रेऽअं॒तर॑नारंभ॒णेतम॑सि॒प्रवि॑ध्यतं । यथा॒नात॒ःपुन॒रेक॑श्च॒नोदय॒त्तद्वा॑मस्तु॒सह॑सेमन्यु॒मच्छवः॑ ॥ इंद्रा॑सोमाव॒र्तय॑तंदि॒वोव॒धंसंपृ॑थि॒व्याऽअ॒घशं॑साय॒तर्ह॑णं । उत्त॑क्षतंस्व॒र्यं॑१॒पर्व॑तेभ्यो॒येन॒रक्षो॑वावृ॒धानं॑नि॒जूर्व॑थः ॥ इंद्रा॑सोमाव॒र्तय॑तंदि॒वस्पर्य॑ग्नित॒प्तेभि॑र्यु॒वमश्म॑हन्मभिः । तपु॑र्वधेभिर॒जरे॑भिर॒त्रिणो॒निपर्शा॑नेविध्यत॒ंयंतु॑निस्व॒रं+ ॥ ५ ॥ इंद्रा॑सोमा॒परि॑वांभूतुवि॒श्वत॑ऽइ॒यंम॒तिःक॒क्ष्याश्वै॑ववा॒जिना॑ । यांवा॒ंहोत्रां॑परिहि॒नोमि॑मे॒धये॒माब्रह्मा॑णिनृ॒पती॑वजिन्वत॑ं ॥ प्रति॑स्मरेथांतु॒जय॑द्भि॒रेवैर्ह॒तंद्रु॒होर॒क्षसो॑भंगु॒राव॑तः । इंद्रा॑सोमादु॒ष्कृते॒मासु॒गंभू॒द्योनः॑

(७।६।१५) इंद्रासोमाइतिपंचविंशत्यृचस्यसूक्तस्यवसिष्ठइंद्रासोमौअष्टमीषोडशीएकोनविंशीविंश्येकविंशीद्वाविंशीचतुर्विंशीनामिंद्रःनवमीद्वादशीत्रयोदशीनांसोमःदशमीचतुर्दश्योरग्निःएकादश्याविश्वेदेवाःसप्तदश्याग्रावाणःअष्टादश्यामरुतःत्रयोविंश्याःवसिष्ठाशीःपृथिव्यंतरिक्षद्यावः आद्याःषडष्टादशीद्वाविंशीत्रयोविंश्योजगत्योंत्यानुष्टुप्शिष्टास्त्रिष्टुभः (अस्मिन्सूक्तेरक्षोघ्नत्वंगुणःसर्वासांदेवतानांवक्तव्यः)।

कदाचिदभिदासंतिद्रुहा+ ॥ योमापाकेनमनसाचरंतमभिचष्टेऽअनृतेभिर्वचोभिः । आपऽइवकाशिनासंगृभीताऽ
असन्नस्त्वासंतऽइंद्रवक्ता+ ॥ येपाकशंसंविहरंतऽएवैर्येवाभद्रंदूषयंतिस्वधाभिः । अहंयेवातान्प्रददातुसोमऽआवा
दधातुनिर्ऋतेरुपस्थे ॥ योनोरसंदिप्संतिपित्वोऽअग्नेयोऽअश्वानांयोगवांयस्तनूनां । रिपुःस्तेनःस्तेयकृद्दभ्रमेतुनिषही
यतांतन्वा३तनाच ॥ ६ ॥ परःसोऽअस्तुतन्वा३तनाचतिस्रःपृथिवीरधोऽअस्तुविश्वाः । प्रतिशुष्यतुयशोऽअस्यदे
वायोनोदिवादिप्संतियश्चनक्तं ॥ सुविज्ञानंचिकितुषेजनायसच्चासच्चवचसीपस्पृधाते । तयोर्यत्सत्यंयतरदृजीयस्तदि
त्सोमोवतिहंत्यासत् ॥ नवाऽउसोमोवृजिनंहिनोतिनक्षत्रियंमिथुयाधारयंतं । हंतिरक्षोहंत्यासद्वदंतमुभाविंद्रस्यप्रसि
तौशयाते ॥ यदिवाहमनृतदेवऽआसमोघंवादेवाँऽअप्यूहेऽअग्ने । किमस्मभ्यंजातवेदोहृणीषेद्रोघवाचस्तेनिर्ऋथंसच
तां ॥ अद्यामुरीययदियातुधानोऽअस्मियदिवायुस्ततपपूरुषस्य । अधासवीरैर्दशभिर्वियूयायोमामोघंयातुधानेत्याह
॥ ७ ॥ योमायातुंयातुधानेत्याहयोवारक्षाःशुचिरस्मीत्याह । इंद्रस्तंहंतुमहतावधेनविश्वस्यजंतोरधमस्पदीष्ट ॥ प्र
याजिगातिखर्गलेवनक्तमपद्रुहातन्वं१गूहमाना । वव्राँऽअनंताँऽअवसापदीष्टग्रावाणोघ्नंतुरक्षसऽउपब्दैः+ ॥ वि
तिष्ठध्वंमरुतोविक्ष्वि१च्छतगृभायतरक्षसःसंपिनष्टन । वयोयेभूत्वीपतयंतिनक्तभिर्येवारिपोदधिरेदेवेऽअध्वरे+ ॥
प्रवर्तयदिवोऽअश्मानमिंद्रसोमशितंमघवन्त्संशिशाधि । प्राक्तादपाक्तादधरादुदक्तादभिजहिरक्षसःपर्वतेन ॥ एत

ऽउत्येपतयंतिश्वयातवऽइंद्रंदिप्संतिदिप्सवोदाभ्यं । शिशीतेशक्रःपिशुनेभ्योवधंनूनंसृजदशनिंयातुमद्भ्यः ॥ ८ ॥
इंद्रोयातूनामभवत्पराशरोहविर्मथीनामभ्या३विवासतां । अभीदुशक्रःपरशुर्यथावनंपात्रेवभिंदन्त्सतऽएतिरक्षसः ॥
उलूकयातुंशुशुलूकयातुंजहिश्वयातुमुतकोकयातुं । सुपर्णयातुमुतगृध्रयातुंदृषदेवप्रमृणरक्षऽइंद्र ॥ मानोरक्षोऽअभि
नड्यातुमावतामपोच्छतुमिथुनायाकिमीदिना । पृथिवीनःपार्थिवात्पात्वंहसोंतरिक्षंदिव्यात्पात्वस्मान्+ ॥ इंद्रजहि
पुमांसंयातुधानमुतस्त्रियंमाययाशाशदानां । विग्रीवासोमूरदेवाऽऋदंतुमातेदृशन्त्सूर्यमुच्चरंतं ॥ प्रतिचक्ष्वविचक्ष्वें
द्रश्चसोमजागृतं । रक्षोभ्योवधमस्यतमशनिंयातुमद्भ्यः ॥ ९ ॥ (इतिवासिष्ठंसप्तमंमंडलंसमाप्तंअत्रसूक्तानि१००)
(८।१।१) माचिदन्यद्विशंसतसखायोमारिषण्यत । इंद्रमित्स्तोतावृषणंसचासुतेमुहुरुक्थाचशंसत ॥ अवक्रक्षि
णंवृषभंयथाजुरंगांनचर्षणीसहं । विद्वेषणंसंवननोभयंकरंमंहिष्ठमुभयाविनं ॥ यच्चिद्धित्वाजनाऽइमेनानाहवंतऽऊ

प्रागाथेष्टमेमंडलेदशानुवाकाःतत्रप्रथमेनुवाकेपंचसूक्तानि(८।१।१।) माचिदन्यदितिचतुस्त्रिंशदृचस्यसूक्तस्यआद्ययोर्द्वयोःकाण्वःप्रगाथऋषिःशिष्टानांकाण्वौमेधातिथिमेध्यातिथीऋषी स्तुहिस्तुहीत्यादिचतसृणांप्लायोगिरासंगऋषिःअंत्यायाआंगिरसीशश्वतीऋषिकाइंद्रोदेवता स्तुहिस्तुहीत्यादिपंचानामासंगोदेवताबृहती द्वितीयासतोबृहतीअंत्येद्वेत्रिष्टुभौ (काण्वःप्रगाथइत्यत्रत्यःप्रगाथोवस्तुतोघौरःसन्भ्रातुःकण्वस्य पुत्रतांगतइतीतिहासःश्रूयते) ।

तये । अस्माकंब्रह्मेदमिंद्रभूतुतेहाविश्वाचवर्धनं ॥ वितर्तूर्यंतेमघवन्विपश्चितोर्योविपोजनानां । उपक्रमस्वपुरुरूप
माभरवाजंनेदिष्ठमूतये ॥ महेचनत्वामद्रिवःपराशुल्कायदेयां । नसहस्रायनायुतायवज्रिवोनशतायशतामघ ॥१०॥
वस्याँऽइंद्रासिमेपितुरुतभ्रातुरभुंजतः । माताचमेछदयथःसमावसोवसुत्वनायराधसे ॥ क्वेयथक्वेदसिपुरुत्राचिद्धिते
मनः । अलर्षियुध्मखजकृत्पुरंदरप्रगायत्राऽअगासिषुः ॥ प्रास्मैगायत्रमर्चतवावातुर्यःपुरंदरः । याभिःकाण्वस्योपब
हिरासदयासद्वज्रीभिनत्पुरः ॥ येतेसंतिदशग्विनःशतिनोयेसहस्रिणः । अश्वासोयेतेवृषणोरघुद्रुवस्तेभिर्नःस्तूयमा
गहि ॥ आत्वं१द्यसबर्दुघांहुवेगायत्रवेपसं । इंद्रंधेनुंसुदुघामन्यामिषमुरुधारामरंकृतं ॥ ११ ॥ यत्तुदत्सूरऽएतशंवं
कूवातस्यपर्णिना । वहत्कुत्समार्जुनेयंशतक्रतुस्त्सरद्गंधर्वमस्तृतं ॥ यऽऋतेचिदभिश्रिषःपुराजत्रुभ्यऽआतृदः । सं
धातासंधिंमघवापुरूवसुरिष्कर्ताविह्रुतंपुनः ॥ माभूमनिष्ट्याऽइवेंद्रत्वदरणाऽइव । वनानिनप्रजहितान्यद्रिवोदुरोषा
सोऽअमन्महि ॥ अमन्महीदनाशवोनुग्रासश्चवृत्रहन् । सकृत्सुतेमहताशूरराधसानुस्तोमंमुदीमहि ॥ यदिस्तोमंमम
श्रवदस्माकमिंद्रमिंदवः । तिरःपवित्रंससृवांसऽआशवोमंदंतुतुग्र्यावृधः ॥ १२ ॥ आत्वं१द्यसधस्तुतिंवावातुःसख्यु ॥४६॥
रागहि । उपस्तुतिर्मघोनांप्रत्वावत्वधातेवश्मिसुष्टुतिं+ ॥ सोताहिसोममद्रिभिरेमेनमप्सुधावत । गव्यावस्त्रेववास
यंतऽइन्नरोनिर्धुक्षन्वक्षणाभ्यः ॥ अधज्मोऽअधवादिवोबृहतोरोचनादधि । अयावर्धस्वतन्वागिराममाजातासुक्र

तोपृण ॥ इंद्रायसुमदिंतमंसोमंसोतावरेण्यं । शक्रऽएणंपीपयद्विश्वयाधियाहिन्वानंनवाजयुं+ ॥ मात्वासोमस्यगल्दयासदायाचन्नहंगिरा । भूर्णिंमृगंनसवनेषुचुक्रुधंकऽईशानंनयाचिषत् ॥१३॥ मदेनेषितंमदमुग्रमुग्रेणशवसा । विश्वेषातरुतारंमदच्युतंमदेहिष्माददातिनः ॥ शेवारेवार्यापुरुदेवोमर्तायदाशुषे । ससुन्वतेचस्तुवतेचरासतेविश्वगूर्तोऽअरिष्टुतः+ ॥ एंद्रयाहिमत्स्वचित्रेणदेवराधसा । सरोनप्रास्युदरंसपीतिभिरासोमेभिरुरुस्फिरं+ ॥ आत्वासहस्रमाशतंयुक्तारथेहिरण्यये । ब्रह्मयुजोहरयऽइंद्रकेशिनोवहंतुसोमपीतये ॥ आत्वारथेहिरण्ययेहरीमयूरशेप्या । शितिपृष्ठावहतांमध्वोऽअंधसोविवक्षणस्यपीतये ॥ १४ ॥ पिबात्व१स्यगिर्वणःसुतस्यपूर्वपाऽइव । परिष्कृतस्यरसिनऽइयमासुतिश्चारुर्मदायपत्यते ॥ यऽएकोऽअस्तिदंसनामहाँऽउग्रोऽअभिव्रतैः । गमत्सशिप्रीनसयोषदागमद्धवन्नपरिवर्जति ॥ त्वंपुरंचरिष्णवंवधैःशुष्णस्यसंपिणक् । त्वंभाऽअनुचरोऽअधद्वितायदिंद्रहव्योभुवः ॥ ममत्वासूरऽउदितेममंमध्यंदिनेदिवः । ममप्रपित्वेऽअपिशर्वरेवसवास्तोमासोऽअवृत्सत ॥ स्तुहिस्तुहीदेतेघातेमंहिष्ठासोमघोनां । निंदिताश्वःप्रपथीपरमज्यामघस्यमेध्यातिथे ॥ १५ ॥ आयदश्वान्वनन्वतःश्रद्धयाहंरथेरुहं । उतवामस्यवसुनश्चिकेततियोऽअस्तियाद्वःपशुः+ ॥ यऽऋज्रामह्यंमामहेसहत्वचाहिरण्यया । एषविश्वान्यभ्यस्तुसौभगासंगस्यस्वनद्रथः ॥ अधप्लायोगिरतिंदासदन्यानासंगोऽअग्नेदशभिःसहस्रैः । अधोक्षणोदशमह्यंरुशंतोनळाऽइवसरसोनिरतिष्ठन् ॥ अन्वस्यस्थूरंद

दृशेपुरस्तादनस्थऽऊरुरवरंबमाणः । शश्वतीनार्यभिचक्ष्याहसुभद्रमर्यभोजनंबिभर्षि ॥ १६ ॥ (८।१।२) इदंव
सोसुतमंधःपिबासुपूर्णमुदरं । अनाभयिन्नररिमाते ॥ नृभिर्धूतःसुतोऽअश्नैरव्योवारैःपरिपूतः । अश्वोननिक्तोनदी
षु ॥ तंतेयवंयथागोभिःस्वादुमकर्मश्रीणंतः । इंद्रत्वास्मिन्त्सधमादे ॥ इंद्रऽइत्सोमपाऽएकऽइंद्रःसुतपाविश्वायुः ।
अंतर्देवान्मर्त्यांश्च ॥ नयंशुक्रोनदुराशीर्नतृप्राऽउरुव्यचसं । अपस्पृण्वतेसुहार्दं ॥ १७ ॥ गोभिर्यदीमन्येऽअस्मन्मृ
गंनव्रामृगयंते । अभित्सरंतिधेनुभिः ॥ त्रयऽइंद्रस्यसोमाःसुतासःसंतुदेवस्य । स्वेक्षयेसुतपाव्नः ॥ त्रयःकोशासः
श्चोतंतितिस्रश्चम्व१ःसुपूर्णाः । समानेऽअधिभार्मन् ॥ शुचिरसिपुरुनिःष्ठाःक्षीरैर्मध्यतऽआशीर्तः । दध्नामंदिष्ठःशूर
स्य ॥ इमेतऽइंद्रसोमास्तीव्राऽअस्मेसुतासः । शुक्राऽआशिरंयाचंते ॥ १८ ॥ ताँऽआशिरंपुरोळाशमिंद्रेमंसो
मंश्रीणीहि । रेवंतंहित्वाशृणोमि ॥ हृत्सुपीतासोयुध्यंतेदुर्मदासोनसुरायां । ऊधर्ननग्नाजरंते ॥ रेवाँऽइद्रेवतःस्तोता
स्यात्वावतोमघोनः । प्रेदुहरिवःश्रुतस्य ॥ उक्थंचनशस्यमानमगोररिराचिकेत । नगायत्रंगीयमानं ॥ मानऽइंद्र
पीयत्नवेमाशर्धतेपरादाः । शिक्षाशचीवःशचीभिः ॥ १९ ॥ वयमुत्वातदिदर्थाऽइंद्रत्वायंतःसखायः । कण्वाऽउ

(८।१।२) इदंवसोइतिद्विचत्वारिंशदृचस्यसूक्तस्यमेधातिथिरांगिरसःप्रियमेधश्चेत्युभावृषीअंत्ययोर्द्वयोर्मेधातिथिर्ऋषिरिंद्रःअंत्ययोर्विभिं
दुर्गायत्रीअष्टाविंश्यनुष्टुप् ।

क्थेभिर्जरंते ॥ नघेमन्यदापपनवज्रिन्नपसोनविष्टौ । तवेदुस्तोमंचिकेत ॥ इच्छंतिदेवाःसुन्वंतंनस्वप्नायस्पृहयंति ।
यंतिप्रमादमतंद्राः ॥ ओषुप्रयाहिवाजेभिर्माहृणीथाऽअभ्य१स्वान् । महाँऽइवयुवजानिः ॥ मोष्व१द्यदुर्हणावान्त्सा
यंकरदारेऽअस्मत् । अश्रीरऽइवजामाता ॥ २० ॥ विद्माह्यस्यवीरस्यभूरिदावरींसुमतिं । त्रिषुजातस्यमनांसि ॥
आतूषिंचकण्वमंतंनघाविद्मशवसानात् । यशस्तरंशतमूतेः॥ ज्येष्ठेनसोतरिंद्रायसोमंवीरायशक्राय । भरापिबन्नर्याय ॥
योवेदिष्ठोऽअव्यथिष्वश्वावंतंजरितृभ्यः। वाजंस्तोतृभ्योगोमंतं ॥ पन्यंपन्यमित्सोतारऽआधावतमद्याय । सोमंवीराय
शूराय ॥ २१ ॥ पातावृत्रहासुतमाघागमन्नारेऽअस्मत् । नियमतेशतमूतिः ॥ एहहरीब्रह्मयुजाशग्मावक्षतःसखा
यं । गीर्भिःश्रुतंगिर्वणसं ॥ स्वादवःसोमाऽआयाहिश्रीताःसोमाऽआयाहि । शिप्रिन्नृषीवःशचीवोनायमच्छासधमा
दं ॥ स्तुतंश्चयास्त्वावर्धंतिमहेराधसेनृम्णाय । इंद्रकारिणंवृधंतः ॥ गिरंश्चयास्तेगिर्वाहऽउक्थाचतुभ्यंतानि । सत्रा
दधिरेशवांसि ॥ २२ ॥ एवेदेषतुविकूर्मिर्वाजाँऽएकोवज्रहस्तः । सनादमृक्तोदयते ॥ हंतावृत्रंदक्षिणेनेंद्रःपुरूपुरुहूतः ।
महान्महीभिःशचीभिः ॥ यस्मिन्विश्वाश्चर्षणयऽउतच्यौत्नाज्रयांसिच । अनुघेन्मंदीमघोनः ॥ एषऽएतानिचकारें
द्रोविश्वायोतिशृण्वे । वाजदावामघोनां ॥ प्रभर्तारथंगव्यंतमपाकाच्चिद्यमवति । इनोवसुसहिवोह्ळा ॥ २३ ॥
सनिताविप्रोऽअर्वद्भिर्हंतावृत्रंनृभिःशूरः । सत्योविताविधंतं ॥ यजध्वैनंप्रियमेधाऽइंद्रंसत्राचामनसा । योभूत्सोमैः

Digitization by eGangotri. Funding IKS-Delhi

सत्यमंद्धा ॥ गाथश्रवसंसत्पतिंश्रवस्कामंपुरुत्मानं । कण्वांसोगातवाजिनं ॥ यऽऋतेचिद्गास्पदेभ्योदात्सखानृभ्यःश
चीवान् । येऽअस्मिन्काममश्रियन् ॥ इत्थाधीवंतमद्रिवःकाण्वंमेध्यातिथिं । मेषोभूतो३भियन्नयः ॥ शिक्षाविभिं
दोऽअस्मैचत्वार्ययुतादददंत् । अष्टापरःसहस्रा ॥ उतसुत्येपयोवृधामाकीरणस्यनप्त्या । जनित्वनायमामहे ॥ २४ ॥
(८।१।३) पिबासुतस्यरसिनोमत्स्वानऽइंद्रगोमतः । आपिर्नोबोधिसधमाद्योवृधे३स्माँऽअवंतुतेधियः ॥ भूयाम
तेसुमतौवाजिनोवयंमानःस्तरभिमातये । अस्मान्चित्राभिरवतादभिष्टिभिरानःसुम्नेषुयामय ॥ इमाऽउत्वापुरूवसो
गिरोवर्धंतुयाममं । पावकवर्णाःशुचयोविपश्चितोभिस्तोमैरनूषत ॥ अयंसहस्रमृषिभिःसहस्कृतःसमुद्रऽइवपप्रथे ।
सत्यःसोऽअस्यमहिमागृणेशवोयज्ञेषुविप्रराज्ये ॥ इंद्रमिद्देवतातयऽइंद्रंप्रयत्यध्वरे । इंद्रंसमीकेवनिनोहवामहऽइंद्रं
धनस्यसातये ॥ २५ ॥ इंद्रोमह्नारोदसीपप्रथच्छवऽइंद्रःसूर्यमरोचयत् । इंद्रेहविश्वाभुवनानियेमिरऽइंद्रेसुवानास
ऽइंदवः ॥ अभित्वापूर्वपीतयऽइंद्रस्तोमेभिरायवः । समीचीनासऽऋभवःसमस्वरन्रुद्रागृणंतपूर्व्यं ॥ अस्येदिंद्रोवावृ
धेवृष्ण्यंशवोमदेसुतस्यविष्णवि । अद्यातमस्यमहिमानमायवोनुष्टुवंतिपूर्वथा ॥ तत्त्वायामिसुवीर्यंतद्ब्रह्मपूर्वचित्तये ।

(८।१।३) पिबासुतस्येतिचतुर्विंशत्यृचस्यसूक्तस्यमेध्यातिथिरिंद्रःअंत्यचतसृणांपाकस्थामादेवता प्रथमाद्येकोनविंश्यंताविषमाबृहत्यः
द्वितीयादिविंश्यंताःसमाःसतोबृहत्यःअंत्याश्चतस्रःक्रमेणानुष्टुब्गायत्र्यौबृहतीच ।

येना॒यति॑भ्यो॒भृग॑वे॒धने॑हि॒तेयेन॒प्रस्क॑ण्व॒मावि॑थ ॥ येनासमु॒द्रमसृ॑जोम॒हीर॒पस्तदिं॑द्र॒वृष्णि॑ते॒शव॑ः । स॒द्यःसोऽअ॑स्यमहि॒मानसं॒नशे॒यंक्षो॒णीरं॑नुचक्र॒दे ॥ २६ ॥ श॒ग्धीनं॑ऽइंद्र॒यत्त्वां॑रा॒यिंयां॑मिसु॒वीर्यं॑ । श॒ग्धिवाजां॑यप्रथ॒मंसिषां॑सतेश॒ग्धिस्तोमां॑यपूर्व्यं ॥ श॒ग्धीनोंऽअ॒स्ययद्धं॑पौ॒रमावि॑थ॒धियं॑ऽइंद्र॒सिषां॑सतः । श॒ग्धियथा॒रुशं॑मं॒श्यावं॑कं॒कृप॒मिं॑द्र॒प्राव॒ःस्वं॑र्णरं ॥ कन्नव्योंऽअत॒सीनांतु॒रोगृ॑णीत॒मर्त्यंः । न॒हीन्वं॑स्यमहि॒मानं॑मिंद्रि॒यंस्वं॑र्गृ॒णंतं॑ऽआन॒शुः ॥ कदु॒स्तुवं॑तं॑ऽऋतयंतदे॒वत॒ऽऋषि॒ःकोविप्रं॑ऽओहते । क॒दाहवं॑मघवन्निंद्रसुन्व॒तःकदुं॑स्तुव॒तऽआगं॑मः ॥ उदु॒त्येमधुं॑मत्तमा॒गिर॒ःस्तोमां॑सऽईरते । स॒त्रा॒जितों॑धन॒साऽअक्षिं॑तोतयोवाज॒यंतो॒रथां॑ऽइव ॥ २७ ॥ कण्वां॑ऽइव॒भृगं॑व॒ःसूर्यां॑ऽइव॒विश्व॒मिद्धीतमां॑नशुः । इंद्रं॒स्तोमे॑भिर्म॒हयं॑तऽआ॒यवः॑प्रि॒यमे॑धासोऽअस्वरन् ॥ यु॒क्ष्वाहिवृं॑त्रहन्तम॒हरीं॑ऽइंद्रपरा॒वतः॑ । अ॒र्वा॒ची॒नोमं॑घव॒न्त्सोमं॑पीतयऽउ॒ग्रऽऋ॒ष्वेभि॒रागं॑हि ॥ इ॒मेहितें॑का॒रवोंवाव॒शुर्धि॒याविप्रां॑सोमे॒धसां॑तये । सत्वंनोंमघवन्निंद्रगिर्वणोवे॒नोनशृं॑णु॒धीहवं॑ ॥ निरिं॑द्रबृह॒तीभ्यों॑वृ॒त्रंधनुं॑भ्योऽअस्फुरः । निरर्बुं॑दस्य॒मृगं॑यस्यमा॒यिनो॒निःपर्वं॑तस्य॒गाऽआं॑जः ॥ निर॒ग्नयों॑रुरुचु॒र्निरु॒सूर्यो॒निःसोमं॑ऽइंद्रि॒योरसं॑ः । निर॒ंतरिं॑क्षादधमोम॒हामहिं॑कृ॒षेतदिं॑द्र॒पौंस्यं॑ ॥ २८ ॥ यंमे॒दुरिं॑द्रोंम॒रुत॒ःपाकं॑स्थामा॒कौरं॑याणः । विश्वै॑षां॒त्मना॒शोभिं॑ष्ठ॒मुपैं॑वदि॒विधावं॑मानं ॥ रोहिं॑तंमे॒पाकं॑स्थामासु॒धुरं॑कक्ष्य॒प्रां । अदां॑द्रा॒योवि॒बोधं॑नं ॥ यस्मां॑ऽअ॒न्येदश॒प्रति॒धुरं॒वहं॑ति॒वह्नं॑यः । अस्तं॒वयो॒नतुग्र्यं॑ ॥ आ॒त्मापि॒तुस्त॒नूर्वासं॑ऽओजो॒दाऽअ॒भ्यंजं॑नं । तुरीय॒मिद्रो

हिंतस्यपाकंस्थामानंभोजंदातारमब्रवं ॥ २९ ॥ (८।१।४) यदिंद्रप्रागपागुदङ्न्यग्वाहूयसेनृभिः । सिमापुरूनृषूतोऽअस्यानवेसिप्रशर्धतुर्वशे ॥ यद्वारुमेरुशमेश्यावकेकृपऽइंद्रमादयसेसचा । कण्वासस्त्वाब्रह्मभिःस्तोमवाहसऽइंद्रायच्छंत्यागहि ॥ यथागौरोऽअपाकृतंतृष्यन्नेत्यवेरिणं । आपित्वेनःप्रपित्वेतूयमागहिकण्वेषुसुसचापिब ॥ मंदंतुत्वामघवन्निंद्रेंदवोराधोदेयायसुन्वते । आमुष्यासोममपिबश्चमूसुतंज्येष्ठंतद्दधिषेसहः ॥ प्रचक्रेसहसासहोबभंजमन्युमोजसा । विश्वेतऽइंद्रपृतनायवोयह्वोनिवृक्षाऽइवयेमिरे ॥ ३० ॥ सहस्रेणेवसचतेयवीयुधायस्तऽआनळुपस्तुतिं । पुत्रंप्रावर्गंकृणुतेसुवीर्येदाश्नोतिनमऽउक्तिभिः ॥ माभेममाश्रमिष्मोग्रस्यसख्येतव । महत्तेवृष्णोऽअभिचक्ष्यंकृतंपश्येमतुर्वशंयदुं ॥ सव्यामनुस्फिग्यंवावसेवृषानदानोऽअस्यरोषति । मध्वासंपृक्ताःसारघेणधेनवस्तूयमेहिद्रवापिब ॥ अश्वीरथीसुरूपऽइद्गोमाँऽइदिंद्रतेसखा । श्वात्रभाजावयसासचतेसदाचंद्रोयातिसभामुप ॥ ऋश्योनतृष्यन्नवपानमागहिपिबासोमंवशाँऽअनु । निमेघमानोमघवन्दिवेदिवऽओजिष्ठंदधिषेसहः ॥ ३१ ॥ अध्वर्योद्रावयात्वंसोममिंद्रःपिपासति । उपनूनंयुयुजेवृषणाहरीऽआचजगामवृत्रहा+ ॥ स्वयंचित्समन्यतेदाशुरिर्जनोयत्रासोमस्यतृंपसि । इदंतेऽअ

(८।१।४) यदिंद्रेत्येकाविंशत्यृचस्यसूक्तस्यकाण्वोदेवातिथिरिंद्रःअंत्यतिसृणांकुरुंगः विषमाबृहत्यःसमाःसतोबृहत्यःअंत्यापुरउष्णिक् (प्रपूषणमित्यादिचतसृणांपूषादेवतावा) ।

न्नंयुज्यंसमुक्षितंतस्येहिप्रद्रवापिब॥ रथेष्ठायाध्वर्यवःसोममिंद्रायसोतन। आधिब्रध्नस्याद्रयोविचक्षतेसुन्वंतोदाश्वंध्वरं॥
उपब्रध्नंवावातावृषणाहरीऽइंद्रमपसुवक्षतः। अर्वांचंत्वासप्तयोध्वरश्रियोवहंतुसवनेदुप॥ प्रपूषणंवृणीमहेयुज्यायपुरू
वसुं। सशक्रशिक्षपुरुहूतनोधियातुजेरायेविमोचन॥ ३२॥ संनःशिशीहिभुरिजोरिवक्षुरंरास्वरायोविमोचन। त्वेत
न्नःसुवेदमुस्रियंवसुयंत्वंहिनोषिमर्त्यं॥ वेमित्वापूषन्नृंजसेवेमिस्तोतवऽआघृणे। नतस्यवेम्यरणंहितद्वसोस्तुषेपज्रायसा
म्ने॥ परागावोयवसंकच्चिदाघृणेनित्यंरेकणोऽअमर्त्य। अस्माकंपूषन्नविताशिवोभवमंहिष्ठोवाजसातये॥ स्थूरंराधः
शताश्वंकुरुंगस्यदिविष्टिषु। राज्ञस्त्वेषस्यसुभगस्यरातिषुतुर्वशेष्वमन्महि॥ धीभिःसातानिकाण्वस्यवाजिनःप्रियमेधै
रभिद्युभिः। षष्टिंसहस्रानुनिर्मजामजेनिर्यूथानिगवामृषिः॥ वृक्षाश्चिन्मेऽअभिपित्वेऽअरारणुः। गांभजंतमेहनाश्वं
भजंतमेहना॥ ३३॥ इतिपंचमाष्टकेसप्तमोऽध्यायः॥ ७॥ ॥ ॥ ॥

एकोनचत्वारिंशाध्यायेवर्गाः ३३ सूक्तानि ८ ऋचः १६५॥ त्यागः॥ पर्जन्याये. ९ मंडूकेभ्य. १० इंद्रासोमाभ्या. ७. इंद्राये. सोमाये. अग्नय. विश्वेभ्योदेवेभ्य. सोमाये. २ अग्नय. इंद्रासोमाभ्यामि. इंद्राये. ग्राव्णइ. मरुभ्य. इंद्राये. ४ वसिष्ठाशीःपृथिव्यंतरिक्षेभ्य. इंद्रासोमाभ्या. २ इंद्राये. २९ आसंगाये. ५ इंद्राये. ४० विभिंदव. २ इंद्राये. २० पाकस्थाम्न. ४ इंद्राये. १८ कुरुंगाये. ३॥ इति पंचमेसप्तमः॥

दूरादेकान्नचत्वारिंशद्ब्रह्मातिथिराश्विनौत्रिष्टुबंत्यानुष्टुबंतंसंत्यःपंचार्धर्चाश्चैद्यस्यकशोर्दानस्तुतिर्महाँइंद्रोष्टाचत्वारिंशद्वत्सस्तृचोंत्यास्तिरिंदिरस्यपार्शव्यस्यदानस्तुतिःप्रयद्वःषट्त्रिंशत्पुनर्वत्सोमारुतंमानस्त्र्यधिकासध्वंसआश्विनंह्यानुष्टुभंत्वांनूनंसैकाशशकर्णौत्येगायत्र्याउपाद्येचाद्याचतुर्थीषष्ठीचतुर्दश्याद्येचबृहत्यःपंचमीककुब्दशम्याद्यास्त्रिष्टुब्विराड्जगत्यौयत्स्थःषट्प्रगाथोपश्यंद्बृहतीमध्येज्योतिरनुष्टुबास्तारपंक्तिःप्रगाथस्त्वंमग्नेदशवत्सआग्नेयेगायत्र्यंत्यादैवीत्रिष्टुबाद्याप्रतिष्ठोपाद्यावर्धमाना ॥ ८ ॥ ॥ ॥ ॥

॥ हरिःओम् ॥ (८।१।५) दू॒रादि॒हेव॒यत्स॒त्यं॑रु॒णप्सु॒रशि॑श्वितत् । वि॒भा॒नुंवि॒श्वधा॑तनत् ॥ नृ॒वद्द॑स्रामनो॒युजा॒रथे॑नपृथु॒पाज॑सा । सचे॑थेऽअश्विनो॒षस॑ं ॥ यु॒वाभ्यां॑वाजिनीवसू॒प्रति॒स्तोमा॑ऽअदृक्षत । वाचं॑दू॒तोयथो॑हिषे ॥ पु॒रु॒प्रि॒याणं॑ऽऊ॒तये॑पुरुम॒न्द्रापु॑रू॒वसू॑ । स्तु॒षेकण्वा॑सोऽअ॒श्विना॑ ॥ मंहि॑ष्ठावाज॒सात॑मे॒षयं॑ताशु॒भस्पती॑ । गंता॑रादा॒शुषो॑गृ॒हं+ ॥ १ ॥ तासु॑दे॒वाय॑दा॒शुषे॑सु॒मे॒धामवि॑तारिणीं । घृ॒तैर्गव्यू॑तिमुक्षतं ॥ आन॒ःस्तोम॒मुप॑द्र॒वत्तू॒यं॑श्ये॒नेभि॑रा॒शुभि॑ः । या॒तमश्वे॑भिरश्विना ॥ येभि॒स्तिस्र॒ःप॑रा॒वतो॑दि॒वोविश्वा॑निरोच॒ना । त्रीँ॑ऽर॒क्तून्प॑रि॒दीय॑थः ॥ उ॒तनो॒गोम॑ती॒रिषं॑ऽउ॒तसा॒ती

(८।१।५) दूरादिहेवेत्येकोनचत्वारिंशदृचस्यसूक्तस्यकाण्वोब्रह्मातिथिरश्विनौ यथाचिच्चैद्यःकशुरित्यादिसार्धद्वयोःकशुर्गायत्रीअंत्यास्तिस्रःक्रमेणबृहत्यावनुष्टुप् ।

र॑हविं॑दा ॥ विप॒थःसा॒तये॑सितं ॥ आ॒नो॒गोमं॑तमश्विनासु॒वीरं॑सु॒रथं॑र॒यिं । वो॒ह्ळमश्वा॑वती॒रिषः॑ ॥२॥ वा॒वृ॒धा॒नाशुं॑भस्प
ती॒दस्रा॒हिरं॑ण्यवर्तनी । पिबं॑तंसो॒म्यंमधुं॑ ॥ अ॒स्मभ्यं॑वाजिनीवसूम॒घवं॑द्भ्यश्चस॒प्रथः॑ । छ॒र्दिर्यं॑त॒मदा॑भ्यं ॥ निषुब्रह्म॒ज
ना॑ना॒ंया॒विष्टं॑तूय॒मागं॑तं । मोष्व॑१॒न्याँऽउपा॑रतं ॥ अ॒स्यपिं॑बतमश्विनायु॒वंमदं॑स्य॒चारुं॑णः । मध्वौ॑रा॒तस्यं॑धिष्ण्या ॥
अ॒स्मेऽआवं॑हतंर॒यिंश॒तवं॑तंसह॒स्रिणं॑ । पु॒रु॒क्षुंवि॒श्वधा॑यसं ॥ ३ ॥ पु॒रु॒त्राचि॒द्धिवां॑नरावि॒ह्वयं॑तेमनी॒षिणः॑ । वा॒घद्भि॑र
श्वि॒नाग॑तं ॥ जना॑सोवृ॒क्तब॑र्हिषोह॒विष्मं॑तोऽअरं॒कृतः॑। यु॒वांहं॑वंतेऽअश्विना ॥ अ॒स्माकं॑म॒द्यवा॑म॒यंस्तोमो॒वाहिं॑ष्ठो॒ऽअंतं॑
मः । यु॒वाभ्यां॑भूत्वश्विना ॥ योहं॑वा॒ंमधुं॑नो॒दृति॒राहि॑तोरथ॒चर्षं॑णे । ततः॑पिवतमश्विना ॥ तेनं॑नोवाजिनीवसूपश्वें॑तो॒
का॒य॒शंगवें॑ । वहं॑तं॒पीवं॑री॒रिषः॑ ॥ ४ ॥ उ॒तनो॑दि॒व्याऽइषं॑ऽउ॒तसिंधूँ॑ऽरहविं॑दा । अप॒द्वारें॑ववर्षथः ॥ क॒दावां॑तौ॒ग्र्यो
विं॑धत्समु॒द्रेजहि॒तोनं॑रा । यद्वां॒रथो॒विभि॒ष्पता॑त् ॥ यु॒वंकण्वा॑यनास॒त्यापि॑रिप्तायह॒र्म्ये॑ । शश्वं॑दू॒तीर्दं॑शस्यथः ॥ ताभि॒
राया॑तमू॒तिभि॒र्नव्यं॑सीभिःसुश॒स्तिभिः॑ । यद्वाँ॑वृषण्वसूहु॒वे+ ॥ यथा॑चि॒त्कण्व॒मावं॑तंप्रि॒यमें॑धमुपस्तु॒तं । अत्रिं॑शि॒ंजारं॑
मश्विना ॥ ५ ॥ यथो॒तकृत्व्ये॒धने॒ंशुंगोष्व॒गस्त्यं॑ । यथा॒वाजे॑षु॒सोभं॑रिं ॥ ए॒तावं॑द्वांवृषण्वसू॒ऽअतो॑वा॒भूयो॑ऽअश्विना ।
गृ॒णंतः॑सु॒म्नमीं॑महे ॥ रथं॒हिरं॑ण्यवंधुरं॒हिरं॑ण्याभीशुमश्विना । आहिस्था॑थोदिवि॒स्पृशं॑ ॥ हि॒र॒ण्ययीं॑वां॒रभिं॑री॒षाऽअक्षो॑
हि॒र॒ण्ययः॑ । उ॒भाच॒क्राहिं॑र॒ण्यया॑ ॥ तेनं॑नोवाजिनीवसूपरा॒वतं॑श्चि॒दाग॑तं । उपे॒मांसु॑ष्टुतिं॑म॒मं ॥ ६ ॥ आवं॑हेथेपरा॒का

त्पूर्वीरश्वंतावश्विना । इषोदासीरमर्त्याः ॥ आनोद्युम्नैराश्रवोभिरारायायातमश्विना । पुरुश्चंद्रानासत्या ॥ एहवांप्रु
षितप्सवोवयोवहंतुपर्णिनः । अच्छास्वध्वरंजनं ॥ रथंवामनुगायसंयऽइषावर्ततेसह । नचक्रमभिवाधते ॥ हिरण्य
येनरथेनद्रवत्पाणिभिरश्वैः । धीजवनानासत्या ॥ ७ ॥ युवंमृगंजागृवांसंस्वदथोवावृषण्वसू । तानःपृंक्तमिषार
यिं+ ॥ तामेऽअश्विनासनीनांविद्यातंनवानां । यथाचिच्चैद्यःकशुःशतमुष्ट्रानांददत्सहस्रादशगोनां ॥ योमेहिरण्यसं
दृशोदशराज्ञोऽअमंहत । अधस्पदाऽइच्चैद्यस्यकृष्टयश्चर्मम्नाऽअभितोजनाः ॥ माकिरेनापथागाद्येनेमेयंतिचेदयः ।
अन्योनेत्सूरिरोहतेभूरिदावत्तरोजनः ॥ ८ ॥ (८।२।१) महाँऽइंद्रोयऽओजसापर्जन्योवृष्टिमाँऽइव । स्तोमैर्वत्स
स्यवावृधे ॥ प्रजामृतस्यपिप्रतःप्रयद्भरंतवह्नयः । विप्राऽऋतस्यवाहसा ॥ कण्वाऽइंद्रंयदक्रतस्तोमैर्यज्ञस्यसाधनं ।
जामिब्रुवतऽआयुधं ॥ समस्यमन्यवेविशोविश्वानमंतकृष्टयः । समुद्रायेवसिंधवः ॥ ओजस्तदस्यतित्विषऽउभेयत्स
मवर्तयत् । इंद्रश्चर्मेवरोदसी ॥ ९ ॥ विचिद्वृत्रस्यदोधतोवज्रेणशतपर्वणा । शिरोविभेदवृष्णिना ॥ इमाऽअभिप्र
णोनुमोविपामग्रेषुधीतयः । अग्नेःशोचिर्नदिद्युतः ॥ गुहासतीरुपत्मनाप्रयच्छोचंतधीतयः । कण्वाऽऋतस्यधारया ॥
प्रतमिंद्रनशीमहिरयिंगोमंतमश्विनं । प्रब्रह्मपूर्वचित्तये ॥ अहमिद्धिपितुष्परिमेधामृतस्यजग्रभ । अहंसूर्यइवाज

(८।२।१) महाँइंद्रइत्यष्टाचत्वारिंशदृचस्यसूक्तस्यकाण्वोवत्सइंद्रोंत्यतिसृणांतिरिंदिरोगायत्री ।

नि ॥ १० ॥ अहंप्रत्नेनमन्मनागिरःशुंभामिकण्ववत् । येनेंद्रःशुष्ममिद्दधे+ ॥ येत्वामिंद्रनतुष्टुवुर्ऋषयोयेचतुष्टुवुः ।
ममेद्वर्धस्वसुष्टुतः ॥ यदस्यमन्युरध्वनीद्विवृत्रंपर्वशोरुजन् । अपःसमुद्रमैरयत् ॥ निशुष्णऽइंद्रधर्णसिंवज्रंजघंथदस्य
वि । वृषाह्युग्रश्रृण्विषे+ ॥ नद्यावऽइंद्रमोजसानांतरिक्षाणिवज्रिणं । नविव्यचंतभूमयः ॥ ११ ॥ यस्तऽइंद्रमहीर
पःस्तभूयमानऽआशयत् । नितंपद्यासुशिश्नथः ॥ यऽइमेरोदसीमहीसमीचीसमजग्रभीत् । तमोभिरिंद्रतंगुहः ॥
यऽइंद्रयतयस्त्वाभृगवोयेचतुष्टुवुः । ममेदुग्रश्रुधीहवं ॥ इमास्तऽइंद्रपृश्नयोघृतंदुहतऽआशिरं । एनामृतस्यपिप्यु
षीः ॥ याऽइंद्रप्रस्वस्त्वासागर्भमचक्रिरन् । परिधर्मेवसूर्यं ॥ १२ ॥ त्वामिच्छवसस्पतेकण्वाऽउक्थेनवावृधुः । त्वांसु
तासऽइंदवः ॥ तवेदिंद्रप्रणीतिषूतप्रशस्तिरद्रिवः । यज्ञोवितंतसाय्यः ॥ आनऽइंद्रमहीमिषंपुरंनदर्षिगोमतीं । उत
प्रजांसुवीर्यं ॥ उतत्यदाश्वश्व्यंयदिंद्रनाहुषीष्वा । अग्रेविक्षुप्रदीदयत् ॥ अभिव्रजंनतत्निषेसूरऽउपाकचक्षसं । यदिंद्र
मृळयासिनः ॥ १३ ॥ यदंगतविषीयसऽइंद्रप्रराजसिक्षितीः । महाँऽअपारऽओजसा ॥ तंत्वाहविष्मतीर्विशऽउप
ब्रुवतऽऊतये । उरुज्रयसमिंदुभिः ॥ उपह्वरेगिरीणांसंगथेचनदीनां । धियाविप्रोऽअजायत ॥ अतःसमुद्रमुद्वतश्चि
कित्वाँऽअवपश्यति । यतोविपानऽएजति ॥ आदित्प्रत्नस्यरेतसोज्योतिष्पश्यंतिवासरं । परोयदिध्यतेदिवा+
॥ १४ ॥ कण्वासऽइंद्रतेमतिंविश्वेवर्धंतिपौंस्यं । उतोशविष्ठवृष्ण्यं ॥ इमांमऽइंद्रसुष्टुतिंजुषस्वप्रसुमामव ।

उतप्रवर्धयामतिं+ ॥ उतब्रह्मण्यावयंतुभ्यंप्रवृद्धवज्रिवः । विप्राऽअतक्ष्मजीवसे ॥ अभिकण्वाऽअनूषतापोनप्रवता
यतीः । इंद्रंवनन्वतीमतिः+ ॥ इंद्रमुक्थानिवावृधुःसमुद्रमिवसिंधवः । अनुत्तमन्युमजरँ ॥ १५ ॥ आनोया
हिपरावतोहरिभ्यांहर्यताभ्याँ । इममिंद्रसुतंपिब ॥ त्वामिद्वृत्रहंतमजनासोवृक्तबर्हिषः । हवंतेवाजसातये ॥
अनुत्वारोदसीऽउभेचक्रंनवर्त्येतशं । अनुसुवानासऽइंदवः ॥ मंदस्वासुस्वर्णरऽउतेंद्रशर्यणावति । मत्स्वाविवस्वतो
मती+ ॥ वावृधानऽउपद्यविवृषावज्र्यरोरवीत् । वृत्रहासोमपातमः ॥ १६ ॥ ऋषिर्हिपूर्वजाऽअस्येकऽईशानऽओ
जसा । इंद्रचोष्कूयसेवसु ॥ अस्माकंत्वासुताँऽउपवीतपृष्ठाऽअभिप्रयः । शतंवहंतुहरयः ॥ इमांसुपूर्व्यांधियंमधोर्घृत
स्यपिप्युषीँ । कण्वाऽउक्थेनवावृधुः ॥ इंद्रमिद्धिमहीनांमेधेवृणीतमर्त्यः । इंद्रंसनिष्युरूतये ॥ अर्वांचंत्वापुरुष्टुतप्रि
यमेधस्तुताहरी । सोमपेयायवक्षतः ॥ शतमहंतिरिंदिरेसहस्रंपर्शावाददे । राधांसियाद्वानां ॥ त्रीणिशतान्यर्वतां
सहस्रादशगोनां । ददुष्पज्रायसाम्ने ॥ उदानट्ककुहोदिवमुष्ट्रांन्चतुर्युजोददत् । श्रवसायाद्वंजनं ॥१७॥ (८।२।२)
प्रयद्वस्त्रिष्टुभमिषंमरुतोविप्रोऽअक्षरत् । विपर्वतेषुराजथ ॥ यदंगतविषीयवोयामंशुभ्राऽअचिध्वं । निपर्वताऽअहा
सत ॥ उदीरयंतवायुभिर्वाश्रासःपृश्निमातरः । धुक्षंतपिप्युषीमिषं ॥ वपंतिमरुतोमिहंप्रवेपयंतिपर्वतान् । यद्यामं

(८।२।२) प्रयद्वइतिषट्त्रिंशदृचस्यसूक्तस्यकाण्वःपुनर्वत्सोमरुतोगायत्री ।

यांतिंवायुभिः ॥ नियद्यामायवोगिरिर्निसिंधवोविधर्मणे । महेशुष्माययेमिरे+ ॥ १८ ॥ युष्माँऽउनक्तमूतयेयुष्मा
न्दिवाहवामहे । युष्मान्प्रयत्यध्वरे+ ॥ उदुत्येऽअरुणप्सवश्चित्रायामेभिरीरते । वाश्राऽअधिष्णुनादिवः+ ॥ सृजं
तिरश्मिमोजसापंथांसूर्याययातवे । तेभानुभिर्वितस्थिरे ॥ इमांमेमरुतोगिरमिमंस्तोममृभुक्षणः । इमंमेवनताहवं ॥
त्रीणिसरांसिपृश्नयोदुदुह्रेवज्रिणेमधु । उत्संकवंधमुद्रिणं ॥ १९ ॥ मरुतोयद्धवोदिवःसुम्नायंतोहवामहे । आतूनऽ
उपगंतन ॥ यूयंहिष्ठासुदानवोरुद्राऽऋभुक्षणोदमे । उतप्रचेतसोमदे ॥ आनोरयिंमदच्युतंपुरुक्षुंविश्वधायसं । इय
र्तामरुतोदिवः+ ॥ अधीवयद्गिरीणांयामंशुभ्राऽअचिध्वं । सुवानैर्मंदध्वऽइंदुभिः ॥ एतावतश्चिदेषांसुम्नंभिक्षेतम
र्त्यः । अदाभ्यस्यमन्मभिः ॥ २० ॥ येद्रप्साऽइवरोदसीधमंत्यनुवृष्टिभिः । उत्संदुहंतोऽअक्षितं ॥ उदुस्वानेभिरी
रतऽउद्रथैरुदुवायुभिः । उत्स्तोमैःपृश्निमातरः ॥ येनावतुर्वशंयदुंयेनकण्वंधनस्पृतं । रायेसुतस्यधीमहि ॥ इमाऽउ
वःसुदानवोघृतंनपिप्युषीरिषः । वर्धान्काण्वस्यमन्मभिः ॥ क्वनूनंसुदानवोमदथावृक्तबर्हिषः । ब्रह्माकोवःसपर्यति
॥ २१ ॥ नहिष्मयद्धवःपुरास्तोमेभिर्वृक्तबर्हिषः । शर्धाँऽऋतस्यजिन्वथ ॥ समुत्येमहतीरपःसंक्षोणीसमुसूर्यं । संव
ज्रंपर्वशोदधुः ॥ विवृत्रंपर्वशोययुर्विपर्वताँऽअराजिनः । चक्राणावृष्णिपौंस्यं ॥ अनुत्रितस्ययुध्यतःशुष्ममावन्नुतक्र
तुं । अन्विंद्रंवृत्रतूर्ये ॥ विद्युद्धस्ताऽअभिद्यवःशिप्राःशीर्षन्हिरण्ययीः । शुभ्राव्यंजतश्रिये+ ॥ २२ ॥ उशनायत्प

रा॒वत॑ऽउ॒क्षणो॒रंध्र॒मया॑तन । द्यौर्न॑च॒क्रद॒द्भ्रि॒या॑+ ॥ आनो॑म॒खस्य॑दा॒वनेश्वै॒र्हिर॑ण्यपाणिभिः । देवा॑स॒ऽउप॑गंतन ॥ यदे॑
षां॒पृष॑ती॒रथे॒प्रष्टि॒र्वह॑ति॒रोहि॑तः । यांति॑शु॒भ्रारि॒णन्न॒पः+ ॥ सु॒षोमे॑शर्य॒णाव॑त्यार्जी॒केप॒स्त्याव॑ति । य॒युर्निच॑क्रया॒नरः॑ ॥
क॒दाग॑च्छाथमरुतऽइ॒त्थाविप्रं॒हव॑मानं । मा॒र्डी॒केभि॒र्नाध॑मानं ॥ २३ ॥ कद्ध॑नूनंक॑धप्रियो॒यदिंद्र॒मज॑हातन । कोवः॑
सखि॒त्वऽओ॑हते ॥ स॒होषुणो॒वज्र॑हस्तैः कण्वा॑सोऽअ॒ग्निंम॒रुद्भिः॑ । स्तु॒षेहिर॑ण्यवाशीभिः ॥ ओषुवृष्णः॒प्रय॑ज्यू॒नान॑व्यं
सेसुवि॒ताय॑ । व॒वृ॒त्यांचि॒त्रवा॑जान् ॥ गि॒रय॑श्चि॒न्निजि॑हते॒पर्शा॑नासो॒मन्य॑मानाः । पर्व॑ताश्चि॒न्निये॑मिरे ॥ आक्ष्ण॒यावा॑
नोव॑हंत्य॒ंतरि॑क्षेण॒पत॑तः । धाता॑रःस्तुव॒तेवयः॑ ॥ अ॒ग्निर्हिजानि॑पू॒र्व्यश्छंदो॒नसूरो॑ऽअ॒र्चिषा॑ । तेभा॒नुभि॒र्वित॑स्थिरे
॥ २४ ॥ (८।२।३) आनो॒विश्वा॑भिरू॒तिभि॒रश्वि॑ना॒गच्छ॑तंयु॒वं । दस्रा॒हिर॑ण्यवर्तनी॒पिब॑तंसो॒म्यंमधु॑ ॥ आनू॒नंया॑
तमश्विना॒रथे॒नसूर्य॑त्वचा । भुजी॒हिर॑ण्यपेशसा॒कवी॒गंभी॑रचेतसा ॥ आया॑तं॒नहु॒षस्पर्यांतरि॑क्षात्सुवृ॒क्तिभिः॑ । पिबा॑
थोऽअश्विना॒मधु॑कण्वा॑ना॒ंसव॑नेसु॒तं+ ॥ आनो॑यातंदि॒वस्पर्यांतरि॑क्षादधप्रिया । पु॒त्रःकण्व॑स्यवामि॒हसु॒षाव॑सो॒म्यंम
धु॑ ॥ आनो॑यात॒मुप॑श्रु॒त्यश्वि॑ना॒सोम॑पीतये । स्वाहा॒स्तोम॑स्यवर्धना॒प्रक॑वीधी॒तिभि॑र्नरा ॥ २५ ॥ यच्चि॒द्धिवां॑पु॒रऽऋष॑
योजु॒हूरे॒व॑सेनरा । आया॑तमश्वि॒नाग॑त॒मुपे॒मांसु॑ष्टुतिंमम॑ ॥ दि॒वाश्चिं॑द्रोच॒नादध्यानो॑गंतंस्वर्विदा । धी॒भिर्व॑त्सप्रचेतसा॒

(८।२।३) आनोविश्वाभिरितित्रयोविंशत्यृचस्यसूक्तस्यकाण्वःसध्वंसोश्विनावनुष्टुप् ।

स्तोमेभिर्हवनश्रुता ॥ किमन्येपर्यासतेस्मत्स्तोमेभिरश्विना । पुत्रःकण्वस्यवामृषिर्गीर्भिर्वत्सोऽअवीवृधत् ॥ आवांविप्रऽ
इहावसेह्वत्स्तोमेभिरश्विना । अरिप्रावृत्रहंतमातानोभूतंमयोभुवा ॥ आयद्वांयोषणारथमतिष्ठद्वाजिनीवसू । विश्वान्य
श्विनायुवंप्रधीतान्यगच्छतं ॥ २६ ॥ अतःसहस्रनिर्णिजारथेनायातमश्विना । वत्सोवांमधुमद्वचोशंसीत्काव्यःक
विः ॥ पुरुमंद्रापुरूवसूमनोतरारयीणां । स्तोमंमेऽअश्विनाविममभिवह्नीऽअनूषातां ॥ आनोविश्वान्यश्विनाधत्तंरा
धांस्यह्रया । कृतंनऽऋत्वियावतोमानोरीरधतंनिदे ॥ यन्नासत्यापरावतियद्वास्थोऽअध्यंबरे । अतःसहस्रनिर्णिजा
रथेनायातमश्विना ॥ योवांन्नासत्यावृषिर्गीर्भिर्वत्सोऽअवीवृधत् । तस्मैसहस्रनिर्णिजमिषंधत्तंघृतश्चुतं ॥ २७ ॥ प्रा
स्माऽऊर्जंघृतश्चुतमश्विनायच्छतंयुवं । योवांसुम्नायतुष्टवद्वसूयाद्दानुनस्पती ॥ आनोगंतंरिशादसेमंस्तोमंपुरुभुजा ।
कृतंनःसुश्रियोनरेमादातमभिष्टये ॥ आवांविश्वाभिरूतिभिःप्रियमेधाऽअहूषत । राजंतावध्वराणामश्विनायामहू
तिषु ॥ आनोगंतंमयोभुवाश्विनाशंभुवायुवं । योवांविपन्यूधीतिभिर्गीर्भिर्वत्सोऽअवीवृधत् ॥ याभिःकण्वंमेधाति
थिंयाभिर्वशंदशव्रजं । याभिर्गोशर्यमावतंताभिर्नोवतंनरा ॥ २८ ॥ याभिर्नरात्रसदस्युमावतंकृत्व्येधने । ताभिः
ष्व१स्माँऽअश्विनाप्रावतंवाजसातये ॥ प्रवांस्तोमाःसुवृक्तयोगिरोवर्धंत्वश्विना । पुरुत्रावृत्रहंतमातानोभूतंपुरुस्पृ

हा ॥ त्रीणिपदान्यश्विनोराविःसांतिगुहापरः । कवीऽऋतस्यपत्मभिरर्वाग्जीवेभ्यस्परि ॥ २९ ॥ (८।२।४) आ
नूनमश्विनायुवंवत्सस्यगंतमवसे । प्रास्मैयच्छतमवृकंपृथुच्छर्दिर्युयुतंयाऽअरातयः ॥ यदंतरिक्षेयद्दिवियत्पंचमानुषाँ
ऽअनु । नृम्णंतद्धत्तमश्विना ॥ येवांदंसांस्यश्विनाविप्रासःपरिमामृशुः । एवेत्काण्वस्यबोधतं ॥ अयंवांघर्मोऽअश्वि
नास्तोमेनपरिषिच्यते । अयंसोमोमधुमान्वाजिनीवसूयेनवृत्रंचिकेतथः ॥ यदप्सुयद्वनस्पतौयदोषधीषुपुरुदंससाकृ
तं । तेनमाविष्टमश्विना ॥ ३० ॥ यन्नासत्याभुरण्यथोयद्वादेवभिषज्यथः । अयंवांवत्सोमतिभिर्नविंधतेहविष्मंतं
हिगच्छथः ॥ आनूनमश्विनोर्ऋषिःस्तोमंचिकेतवामया । आसोमंमधुमत्तमंघर्मंसिंचादथर्वणि ॥ आनूनंरघुवर्तनिंर
थंतिष्ठाथोऽअश्विना । आवांस्तोमाऽइमेममनभोनचुच्यवीरत ॥ यदद्यवांनासत्योक्थैराचुच्युवीमहि । यद्वावाणी
भिरश्विनेवेत्काण्वस्यबोधतं ॥ यद्वांकक्षीवाँऽउतयद्व्यश्वऽऋषिर्यद्वांदीर्घतमाजुहाव । पृथीयद्वांवैन्यःसादनेष्वेवेदतो
ऽअश्विनाचेतयेथां ॥ ३१ ॥ यातंछर्दिष्पाऽउतनःपरस्पाभूतंजगत्पाऽउतनस्तनूपा ॥ वर्तिस्तोकायतनयाययातं ॥
यदिंद्रेणसरथंयाथोऽअश्विनायद्वावायुनाभवथःसमोकसा । यदादित्येभिर्ऋभुभिःसजोषसायद्वाविष्णोर्विक्रमणेषुति

(८।२।४) आनूनमित्येकविंशत्यृचस्यसूक्तस्यकाण्वःशशकर्णोश्विनावनुष्टुप् आद्याचतुर्थीषष्ठीचतुर्दशीपंचदश्योबृहत्यःद्वितीयातृतीया विंश्येकविंश्योगायत्र्यःपंचमीककुप्दशमीत्रिष्टुबेकादशीविराट्द्वादशीजगती ।

ष्ठ॑थः ॥ यद्॒द्याश्विना॑व॒हंहु॒वेय॒वाज॑सातये । यत्पृ॒त्सुतु॒र्वणे॒सह॒स्तच्छ्रेष्ठ॑म॒श्विनो॒रवः॑ ॥ आनू॒नंया॑तमश्विने॒माह॒व्यानि॑वांहि॒ता । इ॒मेसोमा॑सो॒ऽअधि॑तु॒र्वशे॒यदा॑वि॒मेकण्वे॑षुवा॒मथ॑ ॥ यन्ना॑सत्यापरा॒केऽअ॑र्वा॒केऽअस्ति॑भेष॒जं । तेनं॑नू॒नंवि॑म॒दाय॑प्रचेतसाछ॒र्दिर्व॒त्साय॑यच्छतं ॥ ३२ ॥ अभु॑त्स्यु॒प्रदे॒व्यासा॒कंवा॒चाहम॒श्विनोः॑ । व्या॑वर्दे॒व्याम॒तिंविरा॒तिंमर्त्ये॑भ्यः ॥ प्रबो॑धयोषोऽअ॒श्विना॒प्रदे॑विसूनृतेमहि । प्रयं॑ज्ञहोतरानु॒षक्प्रमदा॑य॒श्रवो॑बृ॒हत्+ ॥ यदु॑षो॒यासि॑भा॒नुना॒संसूर्ये॑णरोचसे । आहा॒यम॒श्विनो॒रथो॑व॒र्तिर्याति॑नृ॒पाय्यं॑ ॥ यदापी॑तासो॒ऽअंशवो॒गावो॒नदु॒ह्रऽऊधं॑भिः । यद्वा॒वाणी॒रनू॑षत॒प्रदे॑व॒यंतोऽअ॒श्विना॑ ॥ प्रद्यु॒म्नाय॒प्रश॑वसे॒प्रनृ॒षाह्या॑य॒शर्म॑णे । प्रदक्षा॑यप्रचेतसा ॥ यन्नू॒नंधी॒भिर॑श्विनापि॒तुर्योना॑नि॒षीद॑थः । यद्वा॑सु॒म्नेभि॑रुक्थ्या ॥ ३३ ॥ (८।२।५) यत्स्थो॒दीर्घप्र॑सद्मनि॒यद्वा॒दोरो॑च॒नेदि॒वः । यद्वा॑स॒मुद्रेऽअध्याकृ॑तेगृ॒हेत॒ऽआया॑तमश्विना ॥ यद्वा॑य॒ज्ञंमन॑वेसंमिमि॒क्षथु॑रे॒वेत्का॒ण्वस्य॑बोधतं । बृह॒स्पतिं॒विश्वा॑न्दे॒वाँऽअ॒हंहु॑व॒ऽइंद्रा॒विष्णू॑ऽअ॒श्विना॑वाशु॒हेष॑सा ॥ त्यान्व॑१॒श्विना॑हुवेसु॒दंस॑सागृ॒भेकृ॒ता । ययो॒रस्ति॒प्रणः॑स॒ख्यंदे॒वेष्वध्याप्यं॑ ॥ य॒योरधि॒प्रय॒ज्ञाऽअ॑सू॒रेसंति॑सू॒रयः॑ । ताय॒ज्ञस्या॑ध्व॒रस्य॒प्रचे॑तसास्व॒धाभि॒र्यापिब॑तःसो॒म्यंमधु॑ ॥ यद्॒द्याश्वि॑ना॒वपा॒ग्यत्प्राक्स्थोवा॑जिनीवसू । यद्द्रु॒ह्यव्यन॑वितु॒र्वशे॒यदौ॑हु॒वेवा॒मथ॒मागतं॑ ॥ यदं॒तरि॑क्षे॒पत॑थःपुरुभुजा॒यद्वे॒मेरोद॑सी॒ऽअनु॑ । यद्वा॑

(८।२।५) यत्स्थइतिषळर्चस्यसूक्तस्यकाण्वःप्रगाथोऋषिरश्विनौदेवताबृहतीमध्येज्योतिरनुष्टुबास्तारपंक्तिर्बृहतीसतोबृहती ।

CC-0. Rab Acharya Kathmandu Collection

स्वधाभिरधितिष्ठथोरथमतऽआयातमश्विना ॥ ३४ ॥ (८।२।६) त्वमग्नेव्रतपाऽअसिदेवऽआमर्त्येष्वा । त्वंयज्ञेष्वीड्यः ॥ त्वमसिप्रशस्योविदथेषुसहंत्य । अग्नेरथीरध्वराणां ॥ सत्वमस्मदपद्विषोयुयोधिजातवेदः । अदेवीरग्नेऽअरातीः ॥ अंतिचित्संतमहयज्ञंमर्तस्यरिपोः । नोपवेषिजातवेदः ॥ मर्ताऽअमर्त्यस्यतेभूरिनाममनामहे । विप्रासोजातवेदसः ॥ ३५ ॥ विप्रंविप्रासोवसेदेवंमर्तासऽऊतये । अग्निंगीर्भिर्हवामहे ॥ आतेवत्सोमनोयमत्परमाच्चित्सधस्थात् । अग्नेत्वांकामयागिरा+ ॥ पुरुत्राहिसदृङ्ङसिविशोविश्वाऽअनुप्रभुः । समत्सुत्वाहवामहे ॥ समत्स्वग्निमवसेवाजयंतोहवामहे । वाजेषुचित्रराधसं ॥ प्रत्नोहिकमीड्योऽअध्वरेषुसनाच्चहोतानव्यश्चसत्सि । स्वांचाग्नेतन्वंपिप्रयस्वास्मभ्यंचसौभगमायजस्व ॥ ३६ ॥ इतिपंचमाष्टकेऽष्टमोध्यायः ॥ ८ ॥ इतिपंचमोष्टकः ॥ ५ ॥ ॥

चत्वारिंशाध्यायेवर्गाः ३६ सूक्तानि ७ ऋचः १८३ ॥ त्यागः ॥ अश्विभ्या. ३६ अश्विकशुभ्य. कशव. २ इंद्राये. ४५ तिरिंदिराये. ३ मरुद्भ्य. ३६ अश्विभ्या. ५० अग्नय. १० ॥ इतिपंचमेऽष्टमः ॥

(८।२।६) त्वमग्नइतिदशर्चस्यसूक्तस्यकाण्वोवत्सोग्निर्गायत्रीप्रथमाप्रतिष्ठाद्वितीयावर्धमानांत्यात्रिष्टुप् ।

॥ इतिपंचमाष्टकःसमाप्तः ॥

॥ अथषष्ठाष्टकप्रारंभः ॥

ॐ यइंद्रत्रयस्त्रिंशत्पर्वतऔष्णिहंत्विंद्रःसुतेषुनारदौयदिंद्रपंचोनांगोषूक्त्यश्वसूक्तिनौकाण्वायनौतम्वभिसप्तो नौष्णिहंप्रसम्राजंद्वादशेरिंबिठिंरायाहिपंचोनाप्रगाथांतंमिदंहद्व्यधिकादित्यमौष्णिहंमष्टम्याश्विभ्यांपराग्निसूर्यानिळानां (देवेभिरित्यदितेरदितिर्नइतिचद्वे) तंगूर्धयासप्तात्रिंशत्सोभरिराग्नेयंकाकुभंप्रागाथंहपितुर्नद्विपदां त्येककुप्पंक्तींत्रसदस्योर्दानस्तुतिस्तत्पूर्वेउष्णिक्कुसतोबृहत्यावादित्येभ्यंआगंतषाड्विंशतिर्मारुतं ॥ १ ॥

श्रीगणेशायनमः ॥ हरिःओम् ॥ (८।२।७) यऽइं॑द्रसोम॒पात॑मो॒मद॑ःशविष्ठ॒चेत॑ति । येना॒हं॑सि॒न्य१॒त्रिणं॒तमी॑महे ॥ येना॒दश॑ग्व॒मध्रि॑गुंवे॒पयं॑तं॒स्वर्ण॑रं । येना॑समु॒द्रमावि॑था॒तमी॑महे ॥ येन॒सिंधुं॑म॒हीर॒पोरथाँ॑ऽइवप्र॒चोद॑यः । पंथा॑मृ॒तस्य॒यात॑वे॒तमी॑महे ॥ इ॒मंस्तोम॑म॒भिष्ट॑ये॒घृतंनपू॒तम॑द्रिवः । येना॒नुस॒द्यऽओज॑साव॒वक्षि॑थ ॥ इ॒मंजु॑षस्वगिर्वणःसमु॒द्रई॑वपिन्वते । इंद्र॒विश्वा॑भिरू॒तिभि॑र्व॒वक्षि॑थ ॥ १ ॥ योनो॑दे॒वःप॑रा॒वतः॑सखित्व॒नाय॑माम॒हे । दि॒वोनवृ॒ष्टिंप्र॒थय॑न्व॒वक्षि॑थ ॥ व॒वक्षु॑र॑स्यके॒तवऽउ॒तवज्रो॒गभ॑स्त्योः । यत्सूर्यो॒नरोद॑सी॒ऽअव॑र्धयत् ॥ यदि॑प्रवृद्धसत्पतेस॒हस्रं॑महि॒षाँऽअघः॑ । आदित्त॑ऽइंद्रि॒यंम॒हि॒प्रवा॑वृधे ॥ इं॒द्रः॒सूर्य॑स्यर॒श्मिभि॒र्न्य॑र्शसा॒नमो॑षति । अ॒ग्निर्वने॑वसास॒हिःप्रवा॑वृधे ॥ इ॒यंत॑ऽऋ॒त्वियाव॑तीधी॒तिरे॑ति॒नवी॑यसी । स॒प॒र्यंती॑पुरुप्रि॒यामिमी॑त॒ऽइत्+ ॥ २ ॥ गर्भो॑य॒ज्ञस्य॑दे॒व॒युःक्रतुं॑पुनीतऽआनु॒षक् । स्तो

(८।२।७) यइंद्रइतित्रयस्त्रिंशदृचस्यसूक्तस्यकाण्वःपर्वतइंद्रउष्णिक् ।

मैरिंद्रस्यवावृधेमिमीतऽइत् ॥ सनिर्मित्रस्यपप्रथऽइंद्रःसोमस्यपीतये । प्राचीवाशीवसुन्वतेमिमीतऽइत् ॥ यंविप्राऽउक्थवाहसोभिप्रमंदुरायवः । घृतंनपिप्यऽआसन्यृतस्ययत्+ ॥ उतस्वराजेऽअदितिःस्तोममिंद्रायजीजनत् । पुरुप्रशस्तमूतयऽऋतस्ययत् ॥ अभिवह्नयऽऊतयेनूषतप्रशस्तये । नदेवविव्रताहरीऽऋतस्ययत् ॥३॥ यत्सोममिंद्रविष्णवियद्वाघत्रितऽआप्त्ये । यद्वामरुत्सुमंदसेसमिंदुभिः ॥ यद्वाशक्रपरावतिसमुद्रेऽअधिमंदसे । अस्माकमित्सुतेरणासमिंदुभिः ॥ यद्वासिसुन्वतोवृधोयजमानस्यसत्पते । उक्थेवायस्यरण्यसिसमिंदुभिः ॥ देवंदेवंवोवसऽइंद्रमिंद्रंगृणीषणि । अधायज्ञायतुर्वणेव्यानशुः ॥ यज्ञेभिर्यज्ञवाहसंसोमेभिःसोमपातमं । होत्राभिरिंद्रंवावृधुर्व्यानशुः ॥ ४ ॥ महीरस्यप्रणीतयःपूर्वीरुतप्रशस्तयः । विश्वावसूनिदाशुषेव्यानशुः ॥ इंद्रंवृत्रायहंतवेदेवासोदधिरेपुरः । इंद्रंवाणीरनूषतासमोजसे ॥ महांतंमहिनावयंस्तोमेभिर्हवनश्रुतं । अर्कैरभिप्रणोनुमःसमोजसे ॥ नयंविविक्तोरोदसीनांतरिक्षाणिवज्रिणं । अमादिदस्यतित्विषेसमोजसः ॥ यदिंद्रपृतनाज्येदेवास्त्वादधिरेपुरः । आदित्तेहर्यताहरीववक्षतुः ॥ ५ ॥ यदावृत्रंनदीवृतंशवसावज्रिन्नवधीः । आदित्ते० ॥ यदातेविष्णुरोजसात्रीणिपदाविचक्रमे । आदित्ते० ॥ यदातेहर्यताहरीवावृधातेदिवेदिवे । आदित्तेविश्वाभुवनानियेमिरे ॥ यदातेमारुतीर्विशस्तुभ्यमिंद्रनियेमिरे । आदित्ते० ॥ यदासूर्यममुंदिविशुक्रंज्योतिरधारयः । आदित्ते० ॥ इमांतऽइंद्रसुष्टुतिंविप्रऽइयर्तिधीतिभिः । जामिंपदेवपिप्रतींप्रा

ध्वरे ॥ यदस्यधामनिप्रियेसमीचीनासोऽअस्वरन् । नाभायज्ञस्यदोहनाप्राध्वरे+ ॥ सुवीर्यँस्वश्व्यँसुगव्यमिंद्रदद्धिनः । होतेवपूर्वचित्तयेप्राध्वरे ॥ ६ ॥ (८।३।१) इंद्रःसुतेषुसोमेषुक्रतुँपुनीतऽउक्थ्यँ । विदेवृधस्यदक्षसोमहान्हिषः+ ॥ सप्रथमेव्योमनिदेवानांसदनेवृधः । सुपारःसुश्रवस्तमःसमप्सुजित्+ ॥ तमह्वेवाजसातयऽइंद्रंभरायशुष्मिणँ । भवा नःसुम्नेऽअंतमःसखावृधे+ ॥ इयंतऽइंद्रगिर्वणोरातिःक्षरतिसुन्वतः । मंदानोऽअस्यबर्हिषोविराजसि ॥ नूनंतदिंद्र दद्धिनोयत्त्वासुन्वंतऽईमहे । रयिंनश्चित्रमाभरास्वर्विदँ ॥ ७ ॥ स्तोतायत्तेविचर्षणिरतिप्रशर्धयद्गिरः । वयाऽइवानु रोहतेजुषंतयत्+ ॥ प्रत्नवज्जनयागिरःशृणुधीजरितुर्हवँ । मदेमदेववक्षिथासुकृत्वने ॥ क्रीळंत्यस्यसूनृताऽआपोनप्र वतायतीः । अयाधियायऽउच्यतेपतिर्दिवः+ ॥ उतोपतिर्यऽउच्यतेकृष्टीनामेकऽइद्वशी । नमोवृधैरवस्युभिःसुतेरं ण ॥ स्तुहिश्रुतंविपश्चितंहरीयस्यप्रसक्षिणा । गंताराद्राशुषोगृहंनमस्विनः ॥ ८ ॥ तूतुजानोमहेमतेश्वेभिःप्रुषितप्सु भिः । आयाहियज्ञमाशुभिःशमिद्धिते ॥ इंद्रंशविष्ठसत्पतेरयिंगृणत्सुधारय । श्रवःसूरिभ्योऽअमृतंवसुत्वनं+ ॥ हवे त्वासूरऽउदितेहवेमध्यंदिनेदिवः । जुषाणऽइंद्रसप्तिभिर्नऽआगहि ॥ आतूगहिप्रतुद्रवमत्स्वासुतस्यगोमतः । तंतुंतनुष्व पूर्व्यंयथाविदे+ ॥ यच्छक्रासिपरावतियदर्वावतिवृत्रहन् । यद्वासमुद्रेऽअंधसोवितेदसि ॥ ९ ॥ इंद्रंवर्धंतुनोगिरऽइंद्रँ

तृतीयेनुवाकेष्टसूक्तानि (८।३।१) इंद्रःसुतेष्विति [illegible] इंद्र उष्णिक् ।

सुतासऽइंदवः । इंद्रेहविष्मतीर्विशोऽअराणिषुः ॥ तमिद्विप्राऽअवस्यवःप्रवत्वतीभिरूतिभिः । इंद्रंक्षोणीरवर्धयन्वयाऽ
इव ॥ त्रिकद्रुकेषुचेतनंदेवासोयज्ञमत्नत । तमिद्वर्धंतुनोगिरःसदावृधं ॥ स्तोतायत्तेऽअनुव्रतऽउक्थान्यृतुथादधे ।
शुचिःपावकऽउच्यतेसोऽअद्भुतः ॥ तदिद्रुद्रस्यचेततियह्वंप्रत्नेषुधामसु । मनोयत्रावितद्दधुर्विचेतसः ॥ १० ॥ यदि
मेसख्यमावरऽइमस्यपाह्यंधसः । येनविश्वाऽअतिद्विषोऽअतारिम ॥ कदातऽइंद्रगिर्वणःस्तोताभवातिशंतमः ।
कदानोगव्येऽअश्व्येवसौदधः ॥ उततेसुष्टुताहरीवृषणावहतोरथं । अजुर्यस्यमदिंतमंयमीमहे ॥ तमीमहेपुरुष्टुतंयह्वं
प्रत्नाभिरूतिभिः । निबर्हिषिप्रियेसददधद्विता+ ॥ वर्धस्वासुपुरुष्टुतऽऋषिष्टुताभिरूतिभिः । धुक्षस्वपिप्युषीमिषम
वाचनः ॥ ११ ॥ इंद्रत्वमवितेदसीत्थास्तुवतोऽअद्रिवः । ऋतादियर्मितेधियंमनोयुजं ॥ इहत्यासधमाद्यायुजानः
सोमपीतये । हरीऽइंद्रप्रतद्वसूऽअभिस्वर ॥ अभिस्वरंतुयेतवरुद्रासःसक्षतश्रियं । उतोमरुत्वतीर्विशोऽअभिप्रयः ॥
इमाऽअस्यप्रतूर्तयःपदंजुषंतयद्दिवि । नाभायज्ञस्यसंदधुर्यथाविदे+ ॥ अयंदीर्घायचक्षसेप्राचिप्रयत्यध्वरे । मिमीते
यज्ञमानुषग्विचक्ष्य ॥ १२ ॥ वृषायमिंद्रतेरथऽउतोतेवृषणाहरी । वृषात्वंशतक्रतोवृषाहवः ॥ वृषाग्रावावृषामदोवृ ॥ ३ ॥
षासोमोऽअयंसुतः । वृषायज्ञोयमिन्वसिवृषाहवः ॥ वृषात्वावृषणंहुवेवज्रिन्चित्राभिरूतिभिः । वावंथहिप्रतिष्टुतिं

वृ॒षाह॑वः ॥ १३ ॥ (८।३।२) य॑दिं॑द्रा॒हं॑यथा॒त्वमीशी॑य॒वस्व॒ऽएक॒ऽइत् । स्तो॒ताम॒गोष॑खास्यात् ॥ शिक्षे॑यमस्मै॒दित्से॑ यं॒शची॑पतेमनी॒षिणे॑ । यद॒हंगोप॑ति॒ःस्यां+ ॥ धे॒नुष्ट॑ऽइंद्रसू॒नृता॒यज॑मानायसुन्व॒ते । गामश्वं॑पि॒प्युषी॑दुहे ॥ नते॑व॒र्ता स्ति॒राध॑स॒ऽइंद्रं॑दे॒वोनमर्त्यः॑ । यद्दि॒त्स॑सिस्तु॒तोम॒घं+ ॥ य॒ज्ञऽइंद्र॑मवर्धय॒द्यद्भूमिं॒व्यव॑र्तयत् । च॒क्रा॒णऽओ॑प॒शंदि॒वि+ ॥ १४ ॥ वा॒वृ॒धा॒नस्य॑तेव॒यंविश्वा॒धना॑निजि॒ग्युषः॑ । ऊ॒तिमिं॒द्रावृ॑णीमहे ॥ व्यं॑१॒तरिं॑क्षमति॒रन्मदे॒सोम॑स्यरोच॒ना । इं॒द्रोयद॑भि॒नद्व॒लं+ ॥ उद्गाऽआ॑ज॒दंगि॑रो॒भ्यऽआ॒विष्कृ॒ण्वन्गुहा॑स॒तीः । अ॒र्वाञ्चं॑नुनुदेव॒लं ॥ इंद्रे॑णरोच॒नादि॒वोदृ॒ह्ळा निं॑दृंहि॒तानिं॑च । स्थि॒राणि॒नप॑रा॒णुदे॑ ॥ अ॒पामू॒र्मिर्मद॑न्नि॒वस्तोम॑ऽइंद्राजिरायते । वि॒तेमदा॑ऽअराजिषुः ॥ १५ ॥ त्वंहि॒स्तोम॒वर्ध॑न॒ऽइंद्रास्युक्थ॒वर्ध॑नः । स्तो॒तॄ॒णामु॒तभ॑द्र॒कृत्+ ॥ इंद्र॒मित्के॒शिना॒हरी॑सोम॒पेया॑यवक्षतः । उप॑य॒ज्ञंसु॒रा ध॑सं ॥ अ॒पांफेने॑न॒नमु॑चे॒ःशिर॑ऽइ॒न्द्रोद॑वर्तयः । विश्वा॒यदज॑य॒ःस्पृधः॑ ॥ मा॒याभि॑रु॒त्सिसृ॑प्सत॒ऽइंद्र॒द्यामा॒रुरु॑क्षतः । अव॒दस्यूँ॑ऽरधूनुथाः ॥ अ॒सु॒न्वामिं॑द्रसं॒सदं॒विषू॒चीं॑व्य॑नाशयः । सो॒म॒पाऽउत्त॑रो॒भव॑न् ॥ १६ ॥ (८।३।३) तम्व॒भि प्रगा॑यतपुरुहू॒तंपु॑रुष्टु॒तं । इंद्रं॑गी॒र्भिस्त॑वि॒षमावि॑वासत ॥ यस्य॑द्वि॒बर्ह॑सोबृ॒हत्सहो॑दा॒धार॒रोद॑सी । गि॒रीँरज्राँऽअ॒पःस्व॑

(८।३।२) यदिंद्राहमितिपंचदशर्चस्यसूक्तस्यकाण्व्यायनोगोषूक्त्यश्वसूक्तिनाविंद्रोगायत्री । (८।३।३) तम्वभीतित्रयोदशर्चस्यसूक्तस्यगोषूक्त्यश्वसूक्तिनाविंद्रउष्णिक् ।

वृषत्वना+ ॥ सराजसिपुरुष्टुतँऽएकोवृत्राणिजिघ्नसे । इंद्रजैत्राश्रवस्याचयतवे ॥ तंतेमदंगृणीमसिवृषणंपृत्सुसास
हिं । उलोककृत्नुमद्रिवोहरिश्रियँ ॥ येनज्योतींष्यायवेमनवेचविवेदिथ । मंदानोऽअस्यबर्हिषोविराजसि ॥ १७ ॥
तदद्याचित्तऽउक्थिनोनुष्टुवंतिपूर्वथा । वृषपत्नीरपोजयादिवेदिवे ॥ तवत्यदिंद्रियंबृहत्तवशुष्ममुतक्रतुं । वज्रंशिशा
तिधिषणावरेण्यं ॥ तवद्यौरिंद्रपौंस्यंपृथिवीवर्धतिश्रवः । त्वामापःपर्वतासश्चहिन्विरे ॥ त्वांविष्णुर्बृहन्क्षयोमित्रोगृ
णातिवरुणः । त्वांशर्धोमदत्यनुमारुतं ॥ त्वंवृषाजनानांमंहिष्ठऽइंद्रजज्ञिषे । सत्राविश्वास्वपत्यानिंदधिषे ॥ १८ ॥
सत्रात्वंपुरुष्टुतँऽएकोवृत्राणितोशसे । नान्यऽइंद्रात्करणंभूयऽइन्वति ॥ यदिंद्रमन्मशस्त्वानानाहवंतऽऊतये । अ
स्माकेभिर्नृभिरत्रास्वर्जय ॥ अरंक्षयायनोमहेविश्वारूपाण्याविशन् । इंद्रंजैत्रायहर्षयाशचीपतिं ॥ १९ ॥ (८।३।४)
प्रसम्राजंचर्षणीनामिंद्रंस्तोतानव्यंगीर्भिः । नरंनृषाहंमंहिष्ठं ॥ यस्मिन्नुक्थानिरण्यंतिविश्वानिचश्रवस्या । अपामवो
नसमुद्रे+ ॥ तंसुष्टुत्याविवासेज्येष्ठराजंभरेकृत्नुं । महोवाजिनंसनिभ्यः ॥ यस्यानूनागभीरामदाऽउरवस्तरुत्राः ।
हर्षुमंतःशूरसातौ ॥ तमिद्धनेषुहितेष्वधिवाकायहवंते । येषामिंद्रस्तेजयंति ॥ तमिच्च्यौत्नैरार्यंतितंकृतेभिश्चर्षणयः ।
एषऽइंद्रोवरिवस्कृत्+ ॥ २० ॥ इंद्रोब्रह्मेंद्रऽऋषिरिंद्रःपुरूपुरुहूतः । महान्महीभिःशचीभिः ॥ सःस्तोम्यःसहव्यः

(८।३।४) प्रसम्राजमितिद्वादशर्चस्यसूक्तस्यकाण्वइरिंबिठिरिंद्रोगायत्री ।

सत्यःसत्वातुविकूर्मिः । एकश्चित्सन्नभिभूतिः ॥ तमर्केभिस्तंसामभिस्तंगायत्रैश्चर्षणयः । इंद्रंवर्धतिक्षितयः ॥ प्रणेतारंवस्योऽअच्छाकर्तारंज्योतिःसमत्सु । सासह्वांसंयुधामित्रान् ॥ सनःपप्रिःपारयातिस्वस्तिनावापुरुहूतः । इंद्रोविश्वाअतिद्विषः ॥ सत्वंनंऽइंद्रवाजेभिर्दशस्याचंगातुयाचं । अच्छाचनःसुम्नंनेषि ॥ २१ ॥ (८।३।५) आयाहिसुषुमाहितऽइंद्रसोमंपिबाऽइमं । एदंबर्हिःसंदोमम ॥ आत्वाब्रह्मयुजाहरीवहतामिंद्रकेशिना । उपब्रह्माणिनःशृणु ॥ ब्रह्माणस्त्वावयंयुजासोमपामिंद्रसोमिनः । सुतावंतोहवामहे ॥ आनोयाहिसुतावतोस्माकंसुष्टुतीरुप । पिबासुशिप्रिन्नंधसः ॥ आतेसिंचामिकुक्ष्योरनुगात्राविधावतु । गृभायजिह्वयामधु ॥ २२ ॥ स्वादुष्टेऽअस्तुसंसुदेमधुमान्तन्वे३तव । सोमःशमस्तुतेहृदे+ ॥ अयमुत्वाविचर्षणेजनीरिवाभिसंवृतः । प्रसोमऽइंद्रसर्पतु ॥ तुविग्रीवोवपोदरःसुबाहुरंधसोमदे । इंद्रोवृत्राणिजिघ्नते ॥ इंद्रप्रेहिपुरस्त्वंविश्वस्येशानऽओजसा । वृत्राणिवृत्रहन्जहि ॥ दीर्घस्तेऽअस्त्वंकुशोयेनावसुप्रयच्छसि । यजमानायसुन्वते+ ॥ २३ ॥ अयंतऽइंद्रसोमोनिपूतोऽअधिबर्हिषि । एहीमस्यद्रवापिब ॥ शाचिगोशाचिपूजनायंरणायतेसुतः । आखंडलप्रहूयसे ॥ यस्तेशृंगवृषोनपात्प्रणपात्कुंडपाय्यः । न्यस्मिन्दध्रऽआ

(८।३।५) आयाहीतिपंचदशर्चस्यसूक्तस्यइरिंबिठिरिंद्रोगायत्रीअंत्येद्वेबृहतीसतोबृहत्यौ । (वास्तोष्पतइत्यस्यावास्तोष्पतिर्देवतेतिशौनकः । उपोत्तमायाअर्धर्चेदेवोवास्तोष्पतिःस्तुतइतिहितद्वाक्यम्) ।

मन॑ः ॥ वास्तो॑ष्पतेध्रु॒वास्थूणांस॑त्रं॑सो॒म्यानां॑ । द्र॒प्सोभि॒त्तापु॒रांशश्व॑ती॒नामिंद्रो॒मुनी॑नां॒सखा॑ ॥ पृदा॑कुसानुर्य॑ज॒तोग॒वे
षण॒ऽएक॒ःसन्न॒भिभूय॑सः । भूर्णि॒मश्वं॑नयत्तु॒जापु॒रोगृ॒भेंद्रं॒सोम॑स्यपी॒तये॑ ॥ २४ ॥ (८।३।६) इ॒दंह॒नूनमे॑षांसु॒म्नंभि॑क्षे
॥ ५ ॥ त॒मर्त्य॑ः । आ॒दि॒त्याना॒मपूर्व्यं॒सवी॑मनि ॥ अ॒न॒र्वाणो॒ह्ये॑षां॒पंथा॑ऽआदि॒त्यानां॑ । अद॑ब्धाः॒संति॑पा॒यव॑ःसु॒गे॒वृध॑ः ॥ तत्सु
न॑ःसवि॒ताभगो॒वरु॑णोमि॒त्रोऽअर्य॒मा । शर्म॑यच्छंतुस॒प्रथो॒यदीम॑हे ॥ दे॒वेभि॑र्देव्यदि॒तेरि॑ष्टभर्म॒न्नाग॑हि । स्मत्सू॒रिभि॑ःपु
रुप्रियेसु॒शर्म॑भिः ॥ तेहिपु॒त्रासो॒ऽअदि॑तेर्वि॒दुर्द्वेषां॑सि॒योत॑वे । अं॒होश्चि॑दुरु॒चक्र॑योने॒हस॑ः ॥ २५ ॥ अदि॑तिर्नो॒दिवा॑प॒
शु॒मदि॑ति॒र्नक्त॒मद्व॑याः । अदि॑तिःपा॒त्वंह॑सःस॒दावृ॑धा ॥ उ॒तस्यानो॒दिवा॑म॒तिरदि॑तिरू॒त्याग॑मत् । साशंता॑ति॒मय॑स्कर॒
दप॒स्रिध॑ः ॥ उ॒तत्यादैव्या॑भि॒षजा॒शंन॑ःकरतोऽअ॒श्विनां॑ । यु॒यु॒याता॑मि॒तोर॒पो॒ऽअप॒स्रिध॑ः ॥ शम॒ग्निर॒ग्निभि॑ःकर॒च्छंन॑
स्तपतु॒सूर्य॑ः । शंवातो॑वात्वर॒पाऽअप॒स्रिध॑ः ॥ अपामी॑वा॒मप॒स्रिध॒मप॑सेधतदु॒र्मतिं॑ । आदि॑त्यासोयु॒योत॑नानो॒ऽअंह॑सः
॥ २६ ॥ युयोता॒शरु॑म॒स्मदाँ॒ऽआदि॑त्यासऽउ॒तामतिं॑ । ऋध॒ग्द्वेष॑ःकृणुतविश्ववेदसः ॥ तत्सुन॒ःशर्म॑यच्छ॒तादि॑त्या॒य
न्मुमो॑चति । एन॑स्वंतंचि॒देन॑सःसुदानवः ॥ योन॒ःकश्चि॒द्रिरि॑क्षतिरक्ष॒स्त्वेन॒मर्त्य॑ः । स्वैःषऽएवैरि॑रिषीष्ट॒युर्जन॑ः ॥ स ॥ ५ ॥
मित्तम॒घमं॑श्नवद्दुःशंस॒मर्त्यं॑रि॒पुं । योऽअ॒स्मत्रा॑दु॒र्हणा॑वाँ॒ऽउप॑द्वयुः+ ॥ पा॒क॒त्रा॑स्थनदेवा॒हृत्सुजा॑नीथ॒मर्त्यं॑ । उप॑द्व॒युंचा

(८।३।६)इदंहेतिद्वाविंशत्यृचस्यसूक्तस्यइरिंबिठिरादित्याःचतुर्थीषष्ठीसप्तमीनामदितिःअष्टम्याअश्विनौनवम्याअग्निसूर्यानिलाउष्णिक् ।

द्वयुंचवसवः ॥ २७ ॥ आशर्मपर्वतानामोतापांवृणीमहे । द्यावांक्षामारेऽअस्मद्रपस्कृतं ॥ तेनोभद्रेणशर्मणायुष्माकंनावावसवः । अतिविश्वानिदुरितापिपर्तन ॥ तुचेतनायतत्सुनोद्राघीयऽआयुर्जीवसे । आदित्यासःसुमहसःकृणोतन ॥ यज्ञोहीळोवोऽअंतरऽआदित्याऽअस्तिमृळत । युष्मेऽइद्वोऽअपिष्मसिसजात्ये* ॥ बृहद्वरूथंमरुतांदेवंत्रातारमश्विना । मित्रमीमहेवरुणंस्वस्तये ॥ अनेहोमित्रार्यमन्नृवद्वरुणशंस्यं । त्रिवरूथंमरुतोयंतनश्छर्दिः+ ॥ येचिद्धिमृत्युबंधवऽआदित्यामनवःस्मसि । प्रसूनऽआयुर्जीवसेतिरेतन ॥ २८ ॥ (८।३।७) तंगूर्धयास्वर्णरंदेवासोदेवमरतिंदधन्विरे । देवत्राहव्यमोहिरे ॥ विभूतरातिंविप्रचित्रशोचिषमग्निमीळिष्वयंतुरं । अस्यमेधस्यसोम्यस्यसोभरेप्रेमध्वरायपूर्व्यं ॥ यजिष्ठंत्वाववृमहेदेवंदेवत्राहोतारममर्त्यं । अस्ययज्ञस्यसुक्रतुं ॥ ऊर्जोनपातंसुभगंसुदीदितिमग्निंश्रेष्ठशोचिषं । सनोमित्रस्यवरुणस्यसोऽअपामासुम्नंयक्षतेदिवि+ ॥ यःसमिधायऽआहुतीयोवेदेनददाशमर्तोऽअग्नये । योनमसास्वध्वरः+ ॥ २९ ॥ तस्येदर्वतोरंहयंतऽआशवस्तस्यद्युम्नितमंयशः । नतमंहोदेवकृतंकुतश्चननमर्त्यकृ

(८।३।७) तंगूर्धयेतिसप्तत्रिंशदृचस्यसूक्तस्यकाण्वःसोभरिरग्निः चतुस्त्रिंशीपंचत्रिंश्योरादित्याअंत्ययोर्द्वयोस्त्रसदस्युःप्रथमादिपंचविंश्यंताविषमाःकाकुभःद्वितीयादिषड्विंश्यंताःसमाःसतोबृहत्यःपितुर्नेतिसप्तविंशीद्विपदाअष्टाविंशीत्रिंशीद्वात्रिंशीषट्त्रिंश्यःककुभःएकोनत्रिंश्येकत्रिंशीत्रयस्त्रिंशीपंचत्रिंश्यःसतोबृहत्यःचतुस्त्रिंश्युष्णिक्सप्तविंशीपंक्तिः ।

CC-0. Rapi Acharya Kathmandu Collection

तंनशत् ॥ स्व॒ग्नयो॑वोऽअ॒ग्निभि॒ःस्याम॑सूनोसहसऽऊर्जांपते । सु॒वीर॒स्त्वम॑स्म॒युः+ ॥ प्र॒शंस॑मानो॒ऽअति॑थि॒र्नमि॒त्रियो॒
ग्नीर॒थोनवेद्य॑ः । त्वेक्षेमा॑सो॒ऽअपि॑संतिसा॒धव॒स्त्वंराजा॑र॒यीणां+ ॥ सोऽअ॒द्धादा॒श्व॑ध्व॒रोग्ने॒मर्त॑ःसुभग॒सप्र॒शंस्य॑ः । सधी॒
भिर॑स्तुसनि॑ता ॥ यस्य॒त्वमू॒र्ध्वोऽअ॑ध्व॒राय॒तिष्ठ॑सिक्ष॒यद्वी॑र॒ःससा॑धते । सोऽअर्व॑द्भि॒ःसनि॑ता॒सावि॑प॒न्युभि॒ःसशूरै॒ःसनि॑
ताकृ॒तं+ ॥ ३० ॥ यस्या॒ग्निर्वपु॑र्गृ॒हेस्तोमं॒चनो॒दधी॑तवि॒श्ववा॑र्यः । ह॒व्यावा॒वेवि॑ष॒द्धिष॑ः ॥ विप्र॑स्यवास्तुव॒तःसं॑हसोय
होम॒क्षूतं॑मस्यरा॒तिषु॑ । अ॒वोदे॑वमु॒परि॑मर्त्यंकृधि॒वसो॑विवि॒दुषो॒वच॑ः ॥ योऽअ॒ग्निंह॒व्यदा॑तिभि॒र्नमो॑भिर्वा॑सु॒दक्ष॑मा॒विवा॑
सति । गि॒रावा॑जि॒रशो॑चिषं ॥ स॒मिधा॒योनिशि॑ती॒दाश॒ददि॑ति॒ंधाम॑भिरस्य॒मर्त्य॑ः । विश्वेत्सधी॒भिःसुभगो॒जना॒ँऽअति॑
द्युम्नैरु॒द्रऽइ॑वतारिषत् ॥ तद॑ग्नेद्यु॒म्नमाभ॑र॒यत्सा॒सह॒त्सद॑ने॒कंचि॑द॒त्रिणं॑ । म॒न्युंजन॑स्यदू॒ढ्य॑ः* ॥ ३१ ॥ येन॒चष्टे॒वरु॑
णोमि॒त्रोऽअ॑र्य॒मायेन॒नास॑त्या॒भग॑ः । व॒यंतत्ते॒शव॑सागातु॒वित्त॑मा॒ऽइंद्र॑त्वोताविधेमहि ॥ तेघेद॑ग्नेस्वा॒ध्यो॒३येत्वा॑विप्रनि॑
दधि॒रेनृ॒चक्ष॑सं । विप्रा॑सोदेवसु॒क्रतुं॑ ॥ तऽइद्वेदिं॑सुभग॒तऽआहु॑तिं॒तेसोतुं॑चक्रिरेदि॒वि । तऽइद्वाजे॑भिर्जि॒ग्युर्म॒हद्धनं॒ये
त्वेकाम॑न्येरि॒रे+ ॥ भ॒द्रोनो॑ऽअ॒ग्निराहु॑तोभ॒द्रारा॒तिःसु॑भगभ॒द्रोऽअ॑ध्व॒रः । भ॒द्राऽउ॒तप्रश॑स्तयः ॥ भ॒द्रंमन॑ःकृणुष्ववृ
त्र॒तूर्ये॒येना॑स॒मत्सु॑सा॒सह॑ः । अव॑स्थि॒रात॑नुहि॒भूरि॒शर्ध॑तांव॒नेमा॑तेऽअ॒भिष्टि॑भिः ॥ ३२ ॥ ईळे॑गि॒रामनु॑र्हितं॒यंदे॒वादू॒त
म॑र॒तिंन्यैरि॒रे । यजि॑ष्ठंह॒व्यवा॑हनं ॥ ति॒ग्मजं॑भायतरु॑णाय॒राज॑ते॒प्रयो॑गायस्य॒ग्नये॑ । यःपिं॒शते॑सू॒नृता॑भिःसु॒वीर्य॑म॒ग्निर्घृ॒ते

॥ ६ ॥

भि॒राहु॑तः ॥ यदीं॑घृ॒तेभि॒राहु॑तो॒वाशी॑म॒ग्निर्भर॑त॒ऽउच्चाव॑च । असु॑रऽइवनि॒र्णिजं॑ ॥ योह॒व्यान्यैर॑यता॒मनु॑र्हितोदे॒वऽ
आ॒सासु॒गं॑धिना॑ । विवा॑सते॒वार्या॑णिस्वध्व॒रोहोता॑दे॒वोऽअम॑र्त्यः ॥ यद॑ग्ने॒मर्त्य॒स्त्वंस्या॒महं॑मित्रमहो॒ऽअम॑र्त्यः । सह॑सः
सूनवाहुत ॥ ३३ ॥ नत्वा॑रासीया॒भिश॑स्तयेवसो॒नपा॑प॒त्वायं॑संत्य । नमे॑स्तो॒ताम॑ती॒वानदु॑र्हि॒तःस्याद॑ग्ने॒नपा॒पया॑ ॥
पि॒तुर्नपु॒त्रःसुभृ॑तोदुरो॒णऽआदे॒वाँऽए॑तु॒प्रणो॑ह॒विः+ ॥ तवा॒हम॑ग्नऽऊ॒तिभि॒र्नेदि॑ष्ठाभिःसचेय॒जोष॒माव॑सो । सदा॑दे॒वस्य॒
मर्त्यः॑ ॥ तव॒क्रत्वा॑सनेयं॒तव॑रा॒तिभि॒रग्ने॒तव॒प्रश॑स्तिभिः । त्वामिदा॑हुःप्रम॑तिंवसो॒ममाग्ने॒हर्ष॑स्व॒दात॑वे ॥ प्रसोऽअ॑ग्ने॒तवो॒
तिभिः॑सु॒वीरा॑भिस्तिरते॒वाज॑भर्मभिः । यस्य॒त्वंस॒ख्यमा॒वरः॑ ॥ ३४ ॥ तव॑द्र॒प्सोनील॑वान्वा॒शऽऋ॒त्विय॒ऽइंधा॑नःसिष्ण॒
वाद॑दे । त्वंम॑ही॒नामु॒षसा॑मसिप्रि॒यःक्ष॒पोवस्तु॑षुराजसि ॥ तमाग॑न्म॒सोभ॑रयःस॒हस्र॑मुष्कंस्वभि॒ष्टिमव॑से । स॒म्राजं॒त्रास॑
दस्यवं ॥ यस्य॑तेऽअग्ने॒ऽअ॒न्येऽअ॒ग्नय॑ऽउप॒क्षितो॑व॒याऽइ॑व । वि॒पोनद्यु॒म्नानियु॑वे॒जना॑नां॒तव॑क्ष॒त्राणि॑व॒र्धय॑न् ॥ यमा॑दि
त्यासो॒ऽअद्रु॑हःपा॒रंन॑यथ॒मर्त्यं॑ । म॒घोनां॒विश्वे॑षांसुदानवः ॥ यू॒यंरा॑जानः॒कंचि॑च्चर्षणीसहः॒क्षय॑न्तं॒मानु॑षा॒ँऽअनु॑ । व॒यंते
वो॒वरु॑ण॒मित्रार्य॑म॒न्त्स्यामे॑दृ॒तस्य॑र॒थ्यः॑* ॥ अदा॑न्मेपौरुकु॒त्स्यःपं॑चा॒शतं॑त्र॒सद॑स्युर्व॒धूनां॑ । मंहि॑ष्ठोऽअ॒र्यःसत्प॑तिः ॥ उ॒त
मे॑प्र॒यियो॑र्व॒यियोः॑सु॒वास्त्वा॒ऽअधि॒तुग्व॑नि । ति॒सॄ॒णांस॑प्त॒तीनां॑श्या॒वःप्र॒णेता॑भुव॒द्वसु॒र्दिया॑नां॒पतिः॑ ॥३५॥ (८।३।८) आगं॑

(८।३।८) आगंतेतिषड्विंशत्यृचस्यसूक्तस्यसोभरिर्ऋषिः विषमाःककुभःसमाःसतोबृहत्यः ।

ऋक्सं. तामारिषण्यतप्रस्थावानोमापस्थातासमन्यवः । स्थिराचिन्नमयिष्णवः ॥ वीळुपविभिर्मरुतऽऋभुक्षणऽआरुद्रासःसु मंडलं८
अ.६अ.१ दीतिभिः । इषानोऽअद्यागतापुरुस्पृहोयज्ञमासोभरीयवः ॥ विद्माहिरुद्रियाणांशुष्ममुग्रंमरुतांशिमीवतां । विष्णोरे अनु.३
षस्यमीळ्हुषां ॥ विद्वीपानिपापतंतिष्ठद्दुच्छुनोभेयुजंतरोदसी । प्रधन्वान्यैरतशुभ्रखादयोयदेजथस्वभानवः ॥ अच्यु
॥७॥ ताचिद्वोऽअज्मन्नानानदतिपर्वतासोवनस्पतिः । भूमिर्यामेषुरेजते ॥२६॥ अमायवोमरुतोयातवेद्यौर्जिहीतऽउत्तराबृ
हत् । यत्रानरोदेदिशतेतनूष्वात्वक्षाँसिबाह्वोजसः ॥ स्वधामनुश्रियंनरोमहित्वेषाऽअमवंतोवृषप्सवः । वहंतेऽअह्रुत
प्सवः ॥ गोभिर्वाणोऽअज्यतेसोभरीणांरथेकोशेहिरण्यये । गोबंधवःसुजातासऽइषेभुजेमहांतोनःस्परसेनु ॥ प्रति
वोवृषदंजयोवृष्णेशर्धायमारुतायभरध्वं । हव्यावृषप्रयाव्णे ॥ वृषणश्वेनमरुतोवृषप्सुनारथेनवृषनाभिना । आश्ये
नासोनपक्षिणोवृथानरोहव्यानोवीतयेगत ॥ ३७ ॥ समानमंज्येषांविभ्राजंतेरुक्मासोऽअधिबाहुषु । दविद्युत
त्यृष्टयः ॥ तऽउग्रासोवृषणऽउग्रबाहवोनकिष्टनूषुयेतिरे । स्थिराधन्वान्यायुधारथेषुवोनीकेष्वधिश्रियः ॥ ये
षामर्णोनसप्रथोनामत्वेषंशश्वतामेकमिद्भुजे । वयोनपित्र्यंसहः ॥ तान्वंदस्वमरुतस्ताँऽउपस्तुहितेषांहिधुनीनां । ॥७॥
अराणांनचरमस्तदेषांदानामह्नातदेषां ॥ सुभगःसवऽऊतिष्वासपूर्वासुमरुतोव्युष्टिषु । योवानूनमुतासति ॥ ३८ ॥
यस्यवायूयंप्रतिवाजिनोनरऽआहव्यावीतयेगथ । अभिषद्युम्नैरुतवाजसातिभिःसुम्नावोधूतयोनशत् ॥ यथारुद्रस्य

सूनवोदिवोवशंत्यसुरस्यवेधसः । युवानस्तथेदसत् ॥ येचार्हंतिमरुतःसुदानवःस्मन्मीह्ळुषश्चरंतिये । अतश्चिदानऽ
उपवस्यसाहृदायुवानऽआववृध्वं ॥ यूनऽऊषुनविष्ठयावृष्णःपावकाँऽअभिसोभरेगिरा । गायगाऽइवचर्कृषत् ॥
साहायेसंतिमुष्टिहेवहव्योविश्वासुपृत्सुहोतृषु । वृष्णश्चंद्रान्नसुश्रवस्तमान्गिरावंदस्वमरुतोऽअह ॥ ३९ ॥ गावश्चि
द्घासमन्यवःसजात्येनमरुतःसबंधवः । रिहतेककुभोमिथः+ ॥ मर्तश्चिद्वोनृतवोरुक्मवक्षसऽउपभ्रातृत्वमायति ।
अधिनोगातमरुतःसदाहिवऽआपित्वमस्तिनिध्रुवि ॥ मरुतोमारुतस्यनऽआभेषजस्यवहतासुदानवः । यूयंसखायः
सप्तयः ॥ याभिःसिंधुमवथयाभिस्तूर्वथयाभिर्दशस्यथाक्रिविं । मयोनोभूतोतिभिर्मयोभुवःशिवाभिरसचद्विषः ॥
यत्सिंधौयदसिक्न्यांयत्समुद्रेषुमरुतःसुबर्हिषः । यत्पर्वतेषुभेषजं+ ॥ विश्वंपश्यंतोबिभृथातनूष्वातेनानोऽअधिवो
चत । क्षमारपोमरुतऽआतुरस्यनऽइष्कर्ताविह्रुतंपुनः ॥ ४० ॥ इतिषष्ठाष्टकेप्रथमोऽध्यायः ॥ १ ॥ ॥

षष्ठाष्टकेसूक्तानि १२४ ऋचः १६५०

एकचत्वारिंशाध्यायेवर्गाः ४० सूक्तानि ९ ऋचः २०६ ॥ त्यागः ॥ इंद्राये. ११९ वास्तोष्पतींद्राभ्यामि. इंद्राये. आदित्येभ्य. ५
अदित्याइ. २ अश्विभ्या. अग्निसूर्यानिलेभ्य. आदित्येभ्य. १३ अग्नय. ३३ आदित्येभ्य. २ त्रसदस्यव. २ मरुद्भ्य. २६ ॥ इतिषष्ठेप्रथमः ॥

वयमुद्यूनांत्येद्वृचेचित्रस्यदानस्तुतिरंत्यमाश्विनंत्रिप्रगाथादिबृहत्यनुष्टुबेकादश्याद्यैककुम्मध्येज्योतिषींईळि ष्वत्रिंशद्विश्वमनावैयश्वंआग्नेयमौष्णिहंहंसखायस्तृचोंत्यःसौषाम्णस्यवरोर्दानस्तुतिरंत्यानुष्टुप्तावांचतुर्विंशति मैत्रावरुणंदशम्याद्यास्तिस्रोवैश्वदेव्यंउपांत्योष्णिग्गर्भायुवोःपंचाधिकाव्यश्वोवांगिरसआश्विनंविंश्याद्यावाय व्यास्तत्पूर्वाश्चतस्रोगायत्र्योंत्यैकविंश्यौचविंश्यनुष्टुबंग्निरुक्थेद्व्यधिकामनुर्वैवस्वतोवैश्वदेवंहप्रगाथंयेत्रिंशतिपं चोपांत्यापुरउष्णिग्बभ्रुर्दशकश्यपोवामारीचोद्वैपदंनहिवश्चतुष्कंपुरउष्णिग्बृहत्यनुष्टुबंतंयोयजातिद्व्यूनात्रेज्या स्तवोयजमानप्रशंसार्चयेत्यादिपंचदंपत्योःशिष्टास्तदाशिषोनुष्टुप्चतुष्पंक्त्यंतंनवम्यनुष्टुब्दशमीपादनिचृत्॥२॥

॥ हरिःओम् ॥ (८।४।१) वयमुत्वामपूर्व्यस्थूरंनकच्चिद्भरंतोवस्यवः । वाजेचित्रंहवामहे ॥ उपत्वाकर्मन्नूतये सनोयुवोग्रश्चक्रामयोधृषत् । त्वामिद्ध्यवितारंववृमहेसखायऽइंद्रसानसिं+ ॥ आयाहीमऽइंदवोश्वपतेगोपतऽउर्व रापते । सोमंसोमपतेपिब ॥ वयंहित्वाबंधुमंतमबंधवोविप्रासऽइंद्रयेमिम । यातेधामानिवृषभतेभिरागहिविश्वेभिः सोमपीतये ॥ सीदंतस्तेवयोयथागोश्रीतेमधौमदिरेविवक्षणे । अभित्वामिंद्रनोनुमः ॥ १ ॥ अच्छाचत्वैनानमसाव दामसिकिंमुहुश्चिद्विदीधयः । संतिकामासोहरिवोददिष्ट्वंस्मोवयंसंतिनोधियः ॥ नूत्नाऽइदिंद्रतेवयमूतीऽअभूमनहि

चतुर्थेनुवाकेदशसूक्तानि (८।४।१) वयमुत्वेत्यष्टादशर्चस्यसूक्तस्यकाण्वःसोभरिरिंद्रोंत्ययोर्द्वयोश्चित्रःविषमाःकुकुभःसमाःसतोबृहत्यः।

नूतं॑ऽअद्रिवः । वि॒द्मापु॒रापरी॑णसः ॥ वि॒द्मास॑खि॒त्वमु॒तशू॑रभो॒ज्य॑१॒माते॒ताव॑ज्रिन्नीमहे । उ॒तोस॑मस्मि॒न्नाशि॑शीहिनो
वसो॒वाजे॑सुशिप्र॒गोम॑ति ॥ योनं॑ऽइ॒दमि॑दंपु॒राप्रव॑स्यं॑ऽआनि॒नाय॒तमु॑वःस्तुषे । सखा॑य॒ऽइंद्रं॑मू॒तये॑ ॥ हर्य॑श्वं॒सत्प॑तिंचर्ष
णी॒सहं॒सहि॒ष्मा॒योऽअमं॑दत । आतु॒नःसव॑यति॒गव्य॒मश्व्यं॑स्तो॒तृभ्यो॑म॒घवा॑श॒तं+ ॥ २ ॥ त्वया॑हस्विद्यु॒जाव॒यंप्रति॑श्व॒
संतं॑वृषभब्रुवीमहि । सं॒स्थेज॑नस्य॒गोम॑तः ॥ जये॑मका॒रेपु॑रुहूतका॒रिणो॒भितिं॑ष्ठेमदू॒ढ्यः॑ । नृभि॑र्वृ॒त्रंह॒न्याम॑शूशु॒याम॒चा
वेरिं॑द्र॒प्रणो॒धियः॑ । अ॒भ्रा॒तृ॒व्योऽअ॒नात्वमना॑पिरिंद्रज॒नुषा॑स॒नाद॑सि । यु॒धेदा॑पि॒त्वमि॑च्छसे ॥ नकी॑रे॒वंतं॑स॒ख्याय॑
विंदसे॒पीयं॑तितेसु॒रा॒श्वः॑ । य॒दाकृ॒णोषिं॑नद॒नुंसमू॑ह॒स्यादित्पि॒तेव॑हूयसे ॥ मातं॑ऽअमा॒जुरो॑यथामू॒रासं॑ऽइंद्रस॒ख्येत्वाव॑
तः । निषं॑दाम॒सचा॑सु॒ते+ ॥ ३ ॥ मातें॑गोदत्र॒निर॑राम॒राधं॑स॒ऽइंद्र॒मातें॑गृहामहि । दृ॒ळ्हाचि॑द॒र्यःप्रमृं॑शा॒भ्याभ॑र॒नतें॑दा॒
मानं॑ऽआ॒दभें॑ ॥ इंद्रो॑वा॒घेदि॒यन्म॒घंसर॑स्वतीवासु॒भगा॑द॒दिर्वसु॑ । त्वंवा॑चित्रदा॒शुषें॑ ॥ चित्र॒ऽइद्राजा॑राज॒काऽइदं॑न्य॒
केय॒केसर॑स्वती॒मनु॑ । प॒र्जन्यं॑ऽइवत॒तन॒द्धिवृ॒ष्ट्यास॒हस्रं॑म॒युता॒दद॑त् ॥ ४ ॥ (८।४।२) ओत्यमं॑ह्व॒ऽआरथं॑म॒द्यादं॑सि
ष्ठमू॒तयें॑ । यम॑श्विनासुहवारुद्रवर्तनी॒ऽआसू॒र्या॑यैं॑त॒स्थथुः॑ ॥ पू॒र्वा॒युषं॑सुहवंपु॒रुस्पृहं॑भु॒ज्युंवाजे॑षु॒पूर्व्यं॑ । स॒च॒नावं॑तंसुम॒

(८।४।२) ओत्यमह्वइत्यष्टादशर्चस्यसूक्तस्यसोभरिरश्विनौ प्रथमातृतीयापंचमीसप्तमीबृहत्यःद्वितीयाचतुर्थीषष्ठ्यःसतोबृहत्यःअष्टम्यनुष्टुप् नवमीत्रयोदशीपंचदशीसप्तदश्यःककुभःदशमीचतुर्[illegible]दशीद्वादश्यौककुम्मध्येज्योतिषी ।

॥ ९ ॥

तिभिःसोभरेविद्वेषसमनेहसं ॥ इहत्यापुरुभूतमादेवानमोभिरश्विना । अर्वाचीनास्ववसेकरामहेगंतारादाशुषो
गृहं+ ॥ युवोरथस्यपरिचक्रमीयतऽईर्मान्यद्वामिषण्यति । अस्माँऽअच्छासुमतिर्वांशुभस्पतीऽआधेनुरिवधावतु ॥
रथोयोवांत्रिवंधुरोहिरण्याभीशुरश्विना । परिद्यावापृथिवीभूषतिश्रुतस्तेननासत्यागतं ॥ ५ ॥ दशस्यंतामनवेपूर्व्यं
दिवियवंवृकेणकर्षथः । तावामद्यसुमतिभिःशुभस्पतीऽअश्विनाप्रस्तुवीमहि ॥ उपनोवाजिनीवसूयातमृतस्यपथि
भिः । येभिस्तृक्षिंवृषणात्रासदस्यवंमहेक्षत्रायजिन्वथः ॥ अयंवामद्रिभिःसुतःसोमोनरावृषण्वसू । आयातंसोमपी
तयेपिबतंदाशुषोगृहे+ ॥ आहिरुहतमश्विनारथेकोशेहिरण्ययेवृषण्वसू । युंजाथांपीवरीरिषः ॥ याभिःपक्थमव
थोयाभिरध्रिगुंयाभिर्बभ्रुंविजोषसं । ताभिर्नोमक्षूतूयमश्विनागतंभिषज्यतंयदातुरं ॥ ६ ॥ यदध्रिगावोऽअध्रिगूऽ
इदाचिदह्नोऽअश्विनाहवामहे । वयंगीर्भिर्विपन्यवः ॥ ताभिरायातंवृषणोपमेहवंविश्वप्सुंविश्ववार्यं । इषामंहिष्ठा
पुरुभूतमानरायाभिःक्रिविंवावृधुस्ताभिरागतं ॥ ताविदाचिदहानांतावश्विनावंदमानऽउपब्रुवे । ताऽऊनमोभिरीम
हे ॥ ताविद्दोषाताऽउषसिशुभस्पतीतायामन्रुद्रवर्तनी । मानोमर्तायरिपवेवाजिनीवसूपरोरुद्रावतिख्यतं ॥ आसु ॥ ९ ॥
ग्म्यायसुग्म्यंप्रातारथेनाश्विनावासक्षणी । हुवेपितेवसोभरी ॥ ७ ॥ मनोजवसावृषणामदच्युतामक्षुंगमाभिरूति
भिः । आरात्ताच्चिद्भूतमस्मेऽअवसेपूर्वीभिःपुरुभोजसा ॥ आनोऽअश्वावदश्विनावर्तिर्यासिष्टंमधुपातमानरा । गो

मंद्रस्त्राहिरण्यवत् ॥ सुप्रावर्गंसुवीर्यंसुष्टुवार्यमनाधृष्टंरक्षस्विना । अस्मिन्नावांमायानेंवाजिनीवसूविश्वांवामानिधीम
हि ॥ ८ ॥ (८।४।३) ईळिष्वाहिप्रतीव्यं१यजंस्वजातवेदसं । चरिष्णुधूममगृभीतशोचिषं ॥ दामानंविश्वचर्ष
णेग्निंविश्वमनोगिरा । उतस्तुषेविष्पर्धसोरथानां ॥ येषामाबाधऽऋग्मियऽइषःपृक्षश्चनिग्रभे । उपविदावह्निंविंदते
वसु ॥ उदस्यशोचिरस्थाद्दीदियुषोव्य१जरं । तपुर्जंभस्यसुद्युतोगणश्रियः ॥ उदुतिष्ठस्वध्वरस्तवानोदेव्याकृपा ।
अभिख्याभासाबृहताशुशुक्वनिः ॥ ९ ॥ अग्नेयाहिसुशस्तिभिर्हव्याजुह्वानऽआनुषक् । यथादूतोबभूथहव्यवाहनः ॥
अग्निंवःपूर्व्यंहुवेहोतारंचर्षणीनां । तमयावाचागृणेतमुवःस्तुषे ॥ यज्ञेभिरद्भुतक्रतुंयंकृपासूदयंतऽइत् । मित्रंनजने
सुधितमृतावनि ॥ ऋतावानमृतायवोयज्ञस्यसाधनंगिरा । उपोऽएनंजुजुषुर्नमसस्पदे+ ॥ अच्छानोऽअंगिरस्तमंय
ज्ञासोयंतुसंयतः । होतायोऽअस्तिविक्ष्वायशस्तमः ॥ १० ॥ अग्नेतवत्येऽअजरेंधानासोबृहद्भाः । अश्वाऽइववृषण
स्तविषीयवः ॥ सत्वंनऽऊर्जांपतेरयिंरास्वसुवीर्यं । प्रावनस्तोकेतनयेसमत्स्वा+ ॥ यद्वाऽउविश्पतिःशितःसुप्रीतोम
नुषोविशि । विश्वेदग्निःप्रतिरक्षांसिसेधति ॥ श्रुष्ट्यग्नेनवस्यमेस्तोमस्यवीरविश्पते । निमायिनस्तपुषारक्षसोदह ॥
नतस्यमाययाचनरिपुरीशीतमर्त्यः । योऽअग्नयेददाशहव्यदातिभिः ॥ ११ ॥ व्यश्वस्त्वावसुविदमुक्षण्युरप्रीणादृ

(८।४।३) ईळिष्वेतित्रिंशदृचस्यसूक्तस्यवैयश्वोविश्वमनाअग्निरुष्णिक् ।

षिः । महोरायेतमुत्वासमिधीमहि ॥ उशनाकाव्यस्त्वानिहोतारमसादयत् । आयजिंत्वामनवेजातवेदसं ॥ विश्वेहि
त्वासजोषसोदेवासोदूतमक्रत । श्रुष्टीदेवप्रथमोयज्ञियोभुवः ॥ इमंघावीरोऽअमृतंदूतंकृण्वीतमर्त्यः । पावकंकृष्ण
वर्तनिंविहायसं ॥ तंहुवेमयतस्रुचःसुभासंशुक्रशोचिषं । विशामग्निमजरंप्रत्नमीड्यं ॥ १२ ॥ योऽअस्मैहव्यदाति
भिराहुतिंमर्तोविधत् । भूरिपोषंसधत्तेवीरवद्यशः ॥ प्रथमंजातवेदसमग्निंयज्ञेषुपूर्व्यं । प्रतिस्रुगेतिनमसाहविष्मती ॥
आभिर्विधेमाग्नयेज्येष्ठाभिर्व्यश्ववत् । मंहिष्ठाभिर्मतिभिःशुक्रशोचिषे ॥ नूनमर्चविहायसेस्तोमेभिःस्थूरयूपवत् ।
ऋषेवैयश्वदम्यायाग्नये ॥ अतिथिंमानुषाणांसूनुंवनस्पतीनां । विप्राऽअग्निमवसेप्रत्नमीळते ॥ १३ ॥ महोविश्वाँऽअ
भिषतो३भिहव्यानिमानुषा । अग्नेनिषत्सिनमसाधिबर्हिषि ॥ वंस्वानोवार्यापुरुवंस्वरायःपुरुस्पृहः । सुवीर्यस्यप्रजा
वतोयशस्वतः ॥ त्वंवरोसुषाम्णेग्नेजनायचोदय । सदावसोरातिंयविष्ठशश्वते ॥ त्वंहिसुप्रतूरसित्वंनोगोमतीरिषः ।
महोरायःसातिमग्नेऽअपावृधि ॥ अग्नेत्वंयशाऽअस्यामित्रावरुणावह । ऋतावानासम्राजापूतदक्षसा ॥ १४ ॥
(८।४।४) सखायऽआशिषामहिब्रह्मेंद्रायवज्रिणे । स्तुषऽऊषुवोनृतमायधृष्णवे ॥ शवसाह्यसिश्रुतोवृत्रहत्येनवृत्र
हा । मघैर्मघोनोऽअतिशूरदाशसि ॥ सनःस्तवानऽआभररयिंचित्रश्रवस्तमं । निरेकेचिद्योहरिवोवसुर्ददिः+ ॥

(८।४।४) सखायइतित्रिंशदृचस्यसूक्तस्यवि[illegible]नुष्टुप् (वरुःसौषाम्णोयंराजा) ।

आनि॑रे॒कमुतप्रि॒यमिंद्र॒दर्षिं॒जना॑नां । धृ॒ष॒ताधृ॑ष्णो॒स्तव॑मान॒ऽआभ॑र ॥ नतें॑स॒व्यंनदक्षि॑णं॒हस्तं॑वरं॑तऽआ॒मुरः॑ । नप॑रि॒बाधो॑हरि॒वोगवि॑ष्टिषु ॥ १५ ॥ आत्वा॒गोभि॑रिवव्र॒जंगी॒र्भिर्ऋ॑णोम्यद्रिवः । आस्मा॒कामं॑जरि॒तुरामनः॑पृण ॥ विश्वा॑नि वि॒श्वम॑नसोधि॒यानो॑वृत्रहंतम । उग्रप्र॑णेत॒रधि॒षूव॑सोगहि ॥ व॒यंतेऽअ॒स्यवृ॑त्रहन्वि॒द्यामं॑शूर॒नव्य॑सः । वसोः॑स्पा॒र्हस्य॑ पुरुहू॒तराध॑सः ॥ इंद्र॒यथा॒ह्यस्ति॒तेप॑रीतंनृ॒तोशवः॑ । अमृ॑क्तारा॒तिःपु॑रुहूतदा॒शुषे॑ ॥ आवृ॑षस्वमहामहम॒हेनृ॑तम॒राध॑से । दृ॒ळ्हश्चि॑द्दृह्यमघवन्म॒घत्त॑ये ॥ १६ ॥ नूऽअ॒न्यत्रा॑चिदद्रि॒वस्त्वंनो॑जग्मुरा॒शसः॑ । मघ॑वन्छ॒ग्धितव॒तन्न॑ऽऊ॒तिभिः॑ ॥ न॒ह्यं१॒गनृ॑तो॒त्वद॒न्यंवि॒दामि॒राध॑से । रा॒येद्यु॒म्नाय॒शव॑सेचगिर्व॑णः ॥ एंदु॒मिंद्रा॑यसिंचत॒पिबा॑तिसो॒म्यंमधु॑ । प्रराध॑सा चोदयातेमहित्व॒ना+ ॥ उप॒ोहरी॑णां॒पति॒ंदक्षं॑पृ॒ञ्चंत॑मब्रवं । नू॒नंश्रु॑धिस्तुव॒तोऽअ॒श्व्यस्य॑ ॥ न॒ह्यं१॒गपु॒राच॒नज॒ज्ञेवी॒रत॑र॒स्त्वत् । नकी॑रा॒यानैवथा॒नभं॒दना॑ ॥ १७ ॥ एदु॒मध्वो॑म॒दिन्त॑रंसिं॒चवा॑ध्वर्यो॒ऽअंध॑सः । ए॒वाहि॒वीरः॑स्तव॑तेस॒दावृ॑धः ॥ इंद्रं॑स्थातर्हरी॒णांनकि॑ष्टेपू॒र्व्यस्तु॑तिं । उदा॑नंश॒शव॑सा॒नभं॒दना॑ ॥ तंवो॒वाजा॑ना॒ंपति॒महू॑महिश्रव॒स्यवः॑ । अप्रा॑युभिर्य॒ज्ञेभि॑र्वावृ॒धेन्यं॑ ॥ एतो॒न्विंद्रं॒स्तवा॑म॒सखा॑य॒ःस्तोम्यं॒नरं॑ । कृ॒ष्टीर्यो॑विश्वा॑ऽअ॒भ्यस्त्येक॒ऽइत्+ ॥ अगो॑रुधाय॒गवि॑षेद्यु॒क्षाय॒दस्म्यं॒वचः॑ । घृ॒तात्स्वादी॑यो॒मधु॑नश्चवोचत ॥ १८ ॥ यस्यामि॑तानिवी॒र्या॒३॒नराधः॒पर्ये॑तवे । ज्योति॒र्नविश्व॑म॒भ्यस्ति॒दक्षि॑णा ॥ स्तुहींद्रं॑व्यश्व॒वदनू॑र्मिंवा॒जिनं॒यमं॑ । अ॒र्योगयं॒मंह॑मानं॒विदा॒शुषे॑ ॥ ए॒वानू॒नमुप॑स्तुहि॒वैय॑श्वदश॒मं

Digitized by eGangotri. Funding MIDF-Delhi

नवं । सुविद्वांसंचर्कृत्यंचरणीनां ॥ वेत्थाहिनिर्ऋतीनांवज्रहस्तपरिवृजं । अहरहःशुंध्युःपरिपदामिव ॥ तदिंद्राव
आभरयेनादंसिष्ठकृत्वने । द्विताकुत्सायशिश्नथोनिचोदय ॥ १९ ॥ तमुत्वानूनमीमहेनव्यंदंसिष्ठसन्यसे । सत्वंनो
विश्वाऽअभिमातीःसक्षणिः ॥ यऽऋक्षादंहसोमुचद्योवार्यात्सप्तसिंधुषु । वधर्दासस्यतुविनृम्णनीनमः ॥ यथावरो
सुषाम्णेसनिभ्यऽआवहोरयिं । व्यश्वेभ्यःसुभगेवाजिनीवति ॥ आनार्यस्यदक्षिणाव्यश्वाँऽएतुसोमिनः । स्थूरंचरा
धःशतवत्सहस्रवत् ॥ यत्त्वापृच्छादीजानःकुहयाकुहयाकृते । एषोऽअपश्रितोवलोगोमतीमवतिष्ठति ॥ २० ॥
(८।४।५) तावांविश्वस्यगोपादेवादेवेषुयज्ञिया । ऋतावानायजसेपूतदक्षसा ॥ मित्रातनानरथ्या३वरुणोयश्चसु
क्रतुः । सनात्सुजातातनयाधृतव्रता ॥ तामाताविश्ववेदसासुर्यायप्रमहसा । महीजजानादितिर्ऋतावरी ॥ महांता
मित्रावरुणासम्राजादेवावसुरा । ऋतावानावृतमाघोषतोबृहत्+ ॥ नपाताशवसोमहःसूनूदक्षस्यसुक्रतू । सृप्रदानूऽ
इषोवास्त्वधिक्षितः ॥ २१ ॥ संयादानूनियेमथुर्दिव्याःपार्थिवीरिषः । नभस्वतीरावांचरंतुवृष्टयः ॥ अधियाबृहतो
दिवो३भियूथेवपश्यतः । ऋतावानासम्राजानमसेहिता+ ॥ ऋतावानानिषेदतुःसाम्राज्यायसुक्रतू । धृतव्रताक्षत्रिया ॥११॥
क्षत्रमाशतुः ॥ अक्षणश्चिद्गातुवित्तरानुल्बणेनचक्षसा । निचिन्मिषंतानिचिरानिचिक्यतुः ॥ उतनोदेव्यदितिरुरुष्य

(८।४।५) तावांविश्वस्येतिचतुर्विंशत्यृचस्यसूक्तस्यविश्वमनामित्रावरुणौदशम्यादितिसृणांविश्वेदेवाउष्णिक्उपांत्योष्णिग्गर्भा ।

ता॒ंनास॑त्या । उ॒रु॒ष्यंतु॑म॒रुतो॑वृ॒द्धश॑वसः ॥ २२ ॥ तेनो॑ना॒वमु॑रुष्यत॒दि॒वानक्तं॑सुदानवः । आरि॑ष्यंतो॒निपा॒युभिः॑सचे
महि ॥ अघ्नं॑ते॒विष्ण॑वेव॒यमरि॑ष्यंतःसु॒दान॑वे । श्रु॒धिस्व॑यावन्त्सि॑धोपू॒र्व॑चि॑त्तये ॥ तद्वार्यँ॑वृणीमहे॒वरि॑ष्ठंगोप॒यत्यँ॑ ।
मि॒त्रोयत्पा॑न्ति॒वरु॑णो॒यद॑र्य॒मा+ ॥ उ॒तन॒ःसिंधु॑र॒पां॑तन्म॒रुत॒स्तद॒श्विना॑ । इंद्रो॒विष्णु॑र्मी॒ढ्वांस॑ःस॒जोष॑सः ॥ तेहिष्मा॑व॒नु
षो॒नरो॒भिमा॑ति॒ंकय॑स्यचित् । ति॒ग्मंनक्षोद॑ःप्रति॒घ्नंति॒भूर्ण॑यः ॥ २३ ॥ अ॒यमेक॑ऽइ॒त्थापु॒रूरु॒चष्टे॒विवि॒श्पति॑ः । तस्य॑
व्र॒तान्यनु॑वश्चरामसि ॥ अ॒नु॒पूर्वा॑ण्यो॒क्या॑साम्रा॒ज्यस्य॑सश्चिम । मि॒त्रस्य॑व्र॒तावरु॑णस्यदी॒र्घश्रुत्+ ॥ परि॒योर॒श्मिना॑दि॒
वो॑तान्स॒मेपृ॑थि॒व्याः । उ॒भेऽआप॑प्रौ॒रोद॑सीमहि॒त्वा+ ॥ उ॒दु॒ष्यश॑र॒णेदि॒वोज्योति॑रयंस्त॒सूर्य॑ः । अ॒ग्निर्न॑शु॒क्रःस॑मिधा॒न
ऽआहु॑तः ॥ वचो॑दी॒र्घप्र॑सद्म॒नीशे॒वाज॑स्य॒गोम॑तः । ईशे॒हिपि॒त्वो॑वि॒षस्य॑दा॒वनेँ॑ ॥ २४ ॥ तत्सूर्यँ॒रोद॑सीऽउ॒भेदो॒षाव
स्तो॒रुप॑ब्रुवे । भो॒जेष्व॒स्माँऽअ॒भ्युच्च॑रा॒सदा॑ ॥ ऋ॒ज्रमु॑क्ष॒ण्याय॑नेरज॒तंहर॑याणे । रथँ॑यु॒क्तम॑सनामसु॒षाम॑णि ॥ ताम॒ेऽअ
श्व्यां॑ना॒हरी॑णांनि॒तोश॑ना । उ॒तोनुकृ॒त्व्या॑नांनृ॒वाह॑सा ॥ स्मद॑भीशू॒कशा॑वंता॒विप्रा॒नवि॑ष्ठयाम॒ती । म॒होवा॒जिना॒वर्वँ॑
ता॒सचा॑सनं ॥ २५ ॥ (८।४।६) यु॒वोरु॒षूरथँ॑हुवेस॒धस्तु॑त्यायसू॒रिषु॑ । अतू॑र्तदक्षावृषणावृषण्वसू ॥ यु॒वंव॑रोसु॒षा

(८।४।६) युवोरुष्वितिपंचविंशत्यृचस्यसूक्तस्यांगिरसोव्यश्वोश्विनावंत्यषण्णांवायुरुष्णिक् वाहिष्ठोवामित्यादिचतस्रोगायत्र्यःविंश्येक विंश्यंत्याअनुष्टुभः (व्यश्वोवेतिसर्वानुक्रमोक्तावपिशौनकेनव्यश्वस्यैवमुख्यत्वद्योतनादत्रव्यश्वेमुख्यत्वमादृतंतेनपाक्षिकोविश्वमनाः) ।

म्णेमहेतनेनासत्या । अवोभिर्याथोवृषणावृषण्वसू ॥ तावामद्यहवामहेहव्येभिर्वाजिनीवसू । पूर्वीरिषऽइषयंताव
तिक्षपः+ ॥ आवांवाहिष्ठोऽअश्विनारथोयातुश्रुतोनरा । उपस्तोमान्तुरस्यदर्शथःश्रिये+ ॥ जुहुराणाचिदश्विनाम
न्येथांवृषण्वसू । युवंहिरुद्रापर्षथोऽअतिद्विषः ॥ २६ ॥ दस्राहिविश्वमानुषङ्मक्षूभिःपरिदीयथः । धियंजिन्वाम
धुवर्णंशुभस्पती ॥ उपनोयातमश्विनारायाविश्वपुषासह । मघवानासुवीरावनपच्युता ॥ आमेऽअस्यप्रतीव्य१मिं
द्रंनासत्यागतं । देवादेवेभिरद्यसचनस्तमा ॥ वयंहिवांहवामहऽउक्षण्यंतोव्यश्ववत् । सुमतिभिरुपविप्राविहागतं ॥
अश्विनास्वृषेस्तुहिकुवित्तेश्रवतोहवं । नेदीयसःकूळयातःपणीँऽरुत+ ॥ २७ ॥ वैयश्वस्यश्रुतंनरोतोमेऽअस्यवेदथः ।
सजोषसावरुणोमित्रोऽअर्यमा+ ॥ युवादत्तस्यधिष्ण्यायुवानीतस्यसूरिभिः । अहरहर्वृषणामह्यंशिक्षतं ॥ योवांय
ज्ञेभिरावृतोधिवस्त्रावधूरिव । सपर्यंताशुभेचक्रातेऽअश्विना ॥ योवामुरुव्यचस्तमंचिकेततिनृपाय्यं । वर्तिरश्विनापरि
यातमस्मयू+॥अस्मभ्यंसुवृषण्वसूयातंवर्तिर्नृपाय्यं । विषुद्रुहेवयज्ञमूहथुर्गिरा+ ॥२८॥ वाहिष्ठोवांहवानांस्तोमोदूतोहुव
न्नरा । युवाभ्यांभूत्वश्विना ॥ यद्दोदिवोऽअर्णवऽइषोवामदथोगृहे । श्रुतमिन्मेऽअमर्त्या ॥ उतस्याश्वेतयावरीवाहिष्ठा
वांनदीनां । सिंधुर्हिरण्यवर्तनिः ॥ स्मदेतयासुकीर्त्याश्विनाश्वेतयाधिया । वहेथेशुभ्रयावाना ॥ युक्ष्वाहित्वंरथासहायु
वस्वपोष्यावसो । आन्नोवायोमधुपिबास्माकंसवनागहि ॥२९॥ तववायवृतस्पतेत्वष्टुर्जामातरद्भुत । अवांस्यावृणीमहे ॥

त्वष्टुर्जामातरंवयमीशानंरायऽईमहे । सुतावंतोवायुंद्युम्नाजनासः ॥ वायोयाहिशिवादिवोवहस्वासुस्वश्व्यँ । वहस्वमहःपृथुपक्षसारथे ॥ त्वांहिसुप्सरस्तमंनृषदनेषुहूमहे । ग्रावाणंनाश्वपृष्ठंमंहना ॥ सत्वंनोदेवमनसावायोमंदानोऽअग्रियः । कृधिवाजाँऽअपोधियः ॥३०॥ (८।४।७) अग्निरुक्थेपुरोहितोग्रावाणोबर्हिरध्वरे । ऋचायामिमरुतोब्रह्मणस्पतिंदेवाँऽअवोवरेण्यं ॥ आपशुंगासिपृथिवींवनस्पतीनुषासानक्तमोषधीः । विश्वेचनोवसवोविश्ववेदसोधीनांभूतप्रावितारः ॥ प्रसूनंऽएत्वध्वरो३ग्नादेवेषुपूर्व्यः । आदित्येषुप्रवरुणेधृतव्रतेमरुत्सुविश्वभानुषु ॥ विश्वेहिष्मामनवेविश्ववेदसोभुवन्वृधेरिशादसः । अरिष्टेभिःपायुभिर्विश्ववेदसोयंतानोवृकंच्छर्दिः+ ॥ आनोऽअद्यसमनसोगंताविश्वेसजोषसः । ऋचागिरामरुतोदेव्यदितेसदनेपस्त्येमहि ॥३१॥ अभिप्रियामरुतोयावोऽअश्व्याहव्यामित्रप्रयाथन । आबर्हिरिंद्रोवरुणस्तुरानरऽआदित्यासःसदंतुनः ॥ वयंवोवृक्तबर्हिषोहितप्रयसऽआनुषक् । सुतसोमासोवरुणहवामहेमनुष्वदिद्धाग्नयः ॥ आप्रयातमरुतोविष्णोऽअश्विनापूषन्माकीनयाधिया । इंद्रऽआयातुप्रथमःसनिष्युभिर्वृषायोवृत्रहागृणे+ ॥ विनोदेवासोऽअद्रुहोच्छिद्रंशर्मयच्छत । नयद्दूराद्वसवोनूचिदंतितोवरूथमादधर्षति ॥ अस्तिहिवःसजात्यँरिशादसोदेवासोऽ

(८।४।७) अग्निरुक्थइतिद्वाविंशत्यृचस्यसूक्तस्यवैवस्वतोमनुर्विश्वेदेवाः विषमाबृहत्यःसमाःसतोबृहत्यः (अग्निरुक्थइत्यादिवैश्वदेवेषु चतुःसूक्तेषुआद्ययोरंत्येचसर्वेविश्वेदेवाएवनात्रभेदः) ।

अस्त्याप्यं।प्रणःपूर्वस्मैसुवितायवोचतमक्षूसुम्नायनव्यसे॥३२॥इदाहिवऽउपस्तुतिमिदावामस्यभक्तये।उपवोविश्ववेद
सोनमस्युराँऽअसृक्ष्यन्यामिव॥उदुष्यवःसवितासुप्रणीतयोस्थादूर्ध्वोवरेण्यः।निद्विपादश्चतुष्पादोऽअर्थिनोविश्रन्पत
यिष्णवः॥देवंदेवंवोवसेदेवंदेवमभिष्टये।देवंदेवंहुवेमवाजसातयेगृणंतोदेव्याधिया+॥देवासोहिष्मामनवेसमन्य
वोविश्वेसाकंसरातयः।तेनोऽअद्यतेऽअपरंतुचेतुनोभवंतुवरिवोविदः॥प्रवःशंसाम्यद्रुहःसंस्थऽउपस्तुतीनां।नतं
धूर्तिर्वरुणमित्रमर्त्यंयोवोधामभ्योविधत्॥प्रसक्षयंतिरतेविमहीरिषोयोवोवरायदाशति।प्रप्रजाभिर्जायतेधर्मणस्प
र्यरिष्टःसर्वऽएधते॥३३॥ऋतेसविंदतेयुधःसुगेभिर्यात्यध्वनः।अर्यमामित्रोवरुणःसरातयोयंत्रायंतेसजोषसः॥
अज्रेचिदस्मैकृणुथान्यंचनंदुर्गेचिदासुसरणं।एषाचिदस्मादशनिःपरोनुसास्रेधंतीविनश्यतु॥यदद्यसूर्यऽउद्यतिप्रि
यक्षत्राऽऋतंदध।यन्निम्रुचिप्रबुधिविश्ववेदसोयद्वामध्यंदिनेदिवः+॥यद्वाभिपित्वेऽअसुराऽऋतंयतेछर्दिर्येमविदा
शुषे।वयंतद्वोवसवोविश्ववेदसऽउपस्थेयाममध्यऽआ+॥यदद्यसूरऽउदितेयन्मध्यंदिनऽआतुचि।वामंधत्थमनं
वेविश्ववेदसोजुह्वानायप्रचेतसे॥वयंतद्वःसम्राजऽआवृणीमहेपुत्रोनबहुपाय्यं।अश्यामतदादित्याजुह्वतोहविर्येन ॥१३॥
वस्योनशामहै॥३४॥(८।४।८)येत्रिंशतित्रयस्परोदेवासोबर्हिरासदन्।विदन्नहद्वितासनन्॥वरुणोमित्रोऽ

(८।४।८) येत्रिंशतीतिपंचर्चस्यसूक्तस्यमनुर्विश्वेदेवागायत्रीचतुर्थीपुरउष्णिक्।

अर्यमास्मद्रातिषाचोऽअग्नयः । पत्नीवंतोवषट्कृताः ॥ तेनोगोपाऽअपाच्यास्तऽउदक्तऽइत्थान्यक् । पुरस्तात्सर्वयाविशा+ ॥ यथावशंतिदेवास्तथेदसत्तदेषांनकिरामिनत् । अरावाचनमर्त्यः ॥ सप्तानांसप्तऽऋष्टयःसप्तद्युम्नान्येषां । सप्तोऽअधिश्रियोधिरे ॥ ३५ ॥ (८।४।९) बभ्रुरेकोविषुणःसूनरोयुवांज्यंक्तेहिरण्ययं ॥ योनिमेकऽआससाद्द्योतनोंतर्देवेषुमेधिरः ॥ वाशीमेकोबिभर्तिहस्तऽआयसीमंतर्देवेषुनिध्रुविः ॥ वज्रमेकोबिभर्तिहस्तऽआहितंतेनवृत्राणिजिघ्नते ॥ तिग्ममेकोबिभर्तिहस्तऽआयुधंशुचिरुग्रोजलाषभेषजः ॥ पथऽएकःपीपायतस्करोयथाँऽएषवेदनिधीनां+ ॥ त्रीण्येकऽउरुगायोविचक्रमेयत्रदेवासोमदंति ॥ विभिर्द्वाचरतऽएकयासहप्रप्रवासेववसतः ॥ सदोद्वाचक्रातेऽउपमादिविसम्राजासर्पिरासुती ॥ अर्चंतऽएकेमहिसामंमन्वततेनसूर्यमरोचयन् ॥ ३६ ॥ (८।४।१०) नहिवोऽअस्त्यर्भकोदेवासोनकुमारकः । विश्वेसतोमहांतऽइत्+ ॥ इतिस्तुतासोऽअसथारिशादसोयेस्थत्रयश्चत्रिंशच्च । मनोर्देवायज्ञियासः ॥ तेनस्त्राध्वंतेवततऽउनोऽअधिवोचत । मानःपथःपित्र्यान्मानवादधिदूरंनैष्टपरावतः ॥ येदेवा

(८।४।९) बभ्रुरेकइतिदशर्चस्यसूक्तस्यवैवस्वतोमनुर्विश्वेदेवाद्विपदाविराट् (भेदपक्षे–सोमः १ अग्निः १ त्वष्टा १ इंद्रः १ रुद्रः १ पूषा १ विष्णुः १ अश्विनौ १ मित्रावरुणौ १ अश्विनौ १ एवंदश । अस्मिन्मारीचःकश्यपर्षिःपाक्षिकः) । (८।४।१०) नहिवइतिचतुर्ऋचस्यसूक्तस्यमनुर्विश्वेदेवागायत्रीपुरउष्णिग्बृहत्यनुष्टुभः ।

सऽइहस्थनविश्वेवैश्वानराऽउत । अस्मभ्यंशर्मसप्रथोगवेश्वाययच्छत ॥ ३७ ॥ (८।५।१) योयजातियजातऽइ
त्सुनवच्चपचातिच । ब्रह्मेदिंद्रस्यचाकनत् ॥ पुरोळाशंयोऽअस्मैसोमंररतऽआशिरं । पादित्तंशक्रोऽअंहसः ॥ तस्य
द्युमाँऽअसद्रथोदेवजूतःसशूशुवत् । विश्वावन्वन्नमित्रिया ॥ अस्यप्रजावतीगृहेसश्चंतीदिवेदिवे । इळाधेनुमतीदु
हे ॥ यादंपतीसमनसासुनुतऽआचधावतः । देवासोनित्ययाशिरा ॥ ३८ ॥ प्रतिप्राशव्याँऽइतःसम्यंचाबर्हिराशाते ।
नतावाजेषुवायतः ॥ नदेवानामपिह्नुतःसुमतिंनजुगुक्षतः । श्रवोबृहद्विवासतः ॥ पुत्रिणाताकुमारिणाविश्वमायुर्व्य
श्नुतः । उभाहिरण्यपेशसा ॥ वीतिहोत्राकृतद्वसूदशस्यंतामृतायकं । समूधोरोमशंहतोदेवेषुकृणुतोदुवः ॥ आशर्म
पर्वतानांवृणीमहेनदीनां । आविष्णोःसचाभुवः ॥ ३९ ॥ ऐतुपूषारयिर्भगःस्वस्तिसर्वधातमः । उरुरध्वास्वस्तये ॥
अरमतिरनर्वणोविश्वोदेवस्यमनसा । आदित्यानामनेहऽइत् ॥ यथानोमित्रोऽअर्यमावरुणःसंतिगोपाः । सुगाऽऋ
तस्यपंथाः ॥ अग्निंवःपूर्व्यंगिरादेवमीळेवसूनां । सपर्यंतःपुरुप्रियंमित्रंनक्षेत्रसाधसं ॥ मक्षूदेववतोरथःशूरोवापृत्सु

पंचमेनुवाकेद्वादशसूक्तानि (८।५।१)योयजातीत्यष्टादशर्चस्यसूक्तस्यवैवस्वतोमनुः यज्ञोदेवतातृतीयादिद्वयोर्यजमानःपंचम्यादीनांदंपती दशम्यादिनवानांदंपत्याशिषोगायत्रीनवमीचतुर्दश्यावनुष्टुभौदशमीपादनिचृदंत्याश्चतस्रःपंक्तयः (प्रथमयोर्द्वयोरिंद्रोदेवतेतिकेचित् दशम्या यजमानपत्न्याशीःततोद्वयोःपूषाततएकस्यामित्रार्यमवरुणाःततएकस्याअग्निःअंत्यचतसृणांयजमानइतिशौनकाद्यभिप्रायेणकेचिदाहुः) ।

कासु॑चित् ॥ दे॒वाना॒ंय॒ऽइन्मनो॒यज॑माना॒ऽइय॑क्षत्य॒भीदय॑ज्वनो॒भुवत् ॥ नय॑जमानरिष्यसि॒नसु॑न्वाना॒नदे॑वयो । दे॒वा
ना॒ंय० ॥ नकि॒ष्टंकर्म॑णानश॒न्नप्रयो॑ष॒न्नयो॑षति । दे॒वाना॒ंय० ॥ अस॒दत्र॑सु॒वीर्य॑मु॒तत्यदा॒श्वश्व्यँ॑ । दे॒वाना॒ंय० ॥ ४० ॥
इतिषष्ठाष्टकेद्वितीयोऽध्यायः ॥ २ ॥ ॥ ॥ ॥ ॥

द्विचत्वारिंशाध्यायेवर्गाः ४० सूक्तानि ११ ऋचः २०४ ॥ त्यागः ॥ इंद्राये. १६ चित्राये. २ अश्विभ्या. १८ अग्नय. ३० इंद्राये. २७ वरव. ३ मित्रावरुणाभ्या. ९ विश्वेभ्योदेवेभ्य. ३ मित्रावरुणाभ्या. १२ अश्विभ्या. १९ वायव. ६ विश्वेभ्योदेवेभ्य. २७ सोमाये. अग्नय. त्वष्ट्र. इंद्राये. रुद्राय. पूष्ण. विष्णव. अश्विभ्या. मित्रावरुणाभ्या. अश्विभ्य. विश्वेभ्योदेवेभ्य. ४ यज्ञाय. २ इंद्राय. २ दंपतीभ्या. ५ दंपत्याशीर्भ्य. ९ (शौ० पक्षेतु—इंद्राये. २ यजमानाये. २ दंपतीभ्या. ५ यजमानपत्न्याशीर्भ्य. पूष्णइ. २ मित्रार्यमवरुणेभ्य. अग्नय. यजमानाये. ४) ॥ इतिषष्ठेद्वितीयः ॥

प्रकृतानित्रिंशन्मेधातिथि॑र्वयं॑घैकोनामेध्यातिथि॑र्वाहि॑तंत्रिगायत्र्यनुष्टुबं॑तमैं॑द्रयाहि॑व्यूनांनीपातिथिरानुष्टुभंतृ
चोंत्योगायत्रंस्त्वंसहस्त्रंवसुरोचिषोंगिरसोपश्यंन्नग्निनाचतुर्विंशतिःश्यावाश्वआश्विनमुंपरिष्टाज्ज्योतिषंपंक्तिमहा
बृहतीपंक्त्यंतमंवितासिसप्तशाक्करंमहापंक्त्यंतंप्रेदंमहापांक्तमाद्यातिजगतींयज्ञस्यदशैंद्राग्नमंग्निमस्तोषिनाभा
कंआग्नेयंमहापांक्तंहींद्राग्नीद्वादशैंद्राग्नमंत्यात्रिष्टुप्द्वितीयाशक्वर्यंस्माऊषुदशवारुणंत्वंस्तभ्नात्षळर्चंनानावात्रैष्टु

भमंत्यंवातृचमाश्विनंमानुष्टुभमपश्यदिमंत्रयस्त्रिंशद्विरूपआंगिरसआग्नेयंतुसमिधाग्निंत्रिंशदाघद्विचत्वारिंश
त्रिशोकआद्याग्नेंद्री ॥ ३ ॥ ॥ ॥ ॥ ॥ ॥

॥ हरिः ओम् ॥ (८।५।२) प्रकृतान्यृंजीषिणःकण्वाऽइंद्रस्यगाथया ॥ मदेसोमस्यवोचत ॥ यःसृबिंदुमनर्श
निंपिप्रुंदासमहीशुवं । वधीदुग्रोरिणन्नपः+ ॥ न्यर्बुदस्यविष्टपंवर्ष्माणंबृहतस्तिर । कृषेतदिंद्रपौंस्यं ॥ प्रतिश्रुताय
वोधृषत्तूर्णाशंनगिरेरधि । हुवेसुशिप्रमूतये ॥ सगोरश्वस्यविव्रजंमंदानःसोम्येभ्यः । पुरंनशूरदर्षसि ॥ १ ॥ यदिमे
रारणःसुतऽउक्थेवादधसेचनः । आरादुपस्वधागहि ॥ वयंघातेऽअपिष्मसिस्तोतारऽइंद्रगिर्वणः । त्वंनोजिन्वसोम
पाः+ ॥ उतनःपितुमाभरसंरराणोऽअविक्षितं । मघवन्भूरितेवसु ॥ उतनोगोमतस्कृधिहिरण्यवतोऽअश्विनः ।
इळाभिःसंरभेमहि ॥ बृबदुक्थंहवामहेसृप्रकरस्नमूतये ॥ साधुकृण्वंतमवसे ॥ २ ॥ यःसंस्थेचिच्छतक्रतुरादीकृणो
तिवृत्रहा । जरितृभ्यःपुरूवसुः ॥ सनःशक्रश्चिदाशकद्दानवाँऽअंतराभरः । इंद्रोविश्वाभिरूतिभिः ॥ योरायो३वनिर्म
हान्त्सुपारःसुन्वतःसखा । तमिंद्रमभिगायत ॥ आयंतारंमहिस्थिरंपृतनासुश्रवोजितं । भूरेरीशानमोजसा ॥ नकि
रस्यशचीनांनियंतासूनृतानां । नकिर्वक्तानदादिति ॥ ३ ॥ ननूनंब्रह्मणामृणंप्राशूनामस्तिसुन्वतां । नसोमोऽअप्र

(८।५।२) प्रकृतानीतित्रिंशदृचस्यसूक्तस्यमेधातिथिरिंद्रोगायत्री ।

तापंपे ॥ पन्यऽइदुपंगायतपन्यंऽउक्थानिशंसत । ब्रह्माकृणोतपन्यऽइत्+ ॥ पन्यऽआदर्दिरच्छतासहस्रावाज्यवृंतः । इंद्रोयोयज्वनोवृधः+ ॥ विषूचरस्वधाऽअनुकृष्टीनामन्वाहुवः । इंद्रपिबसुतानां ॥ पिबस्वधैनवानामुतयस्तुग्र्येसचा । उतायमिंद्रयस्तव ॥ ४ ॥ अतीहिमन्युषाविणंसुषुवांसमुपारणे । इमंरातंसुतंपिब ॥ इहितिस्रःपरावतऽइहिपंचजनाँऽअति । धेनाऽइंद्रावचाकशत् ॥ सूर्योरश्मिंयथासृजात्वायच्छंतुमेगिरः । निम्नमापोनसध्र्यक्+ ॥ अध्वर्यवातुहिषिंचसोमंवीरायशिप्रिणे । भरासुतस्यपीतये ॥ यऽउद्नःफलिगंभिनन्न्यं१क्सिंधूँऽरवासृजत् । योगोषुपक्वंधारयत् ॥ ५ ॥ अहन्वृत्रमृचीषमऽऔर्णवाभमहीशुवं । हिमेनाविध्यदर्बुदं ॥ प्रवऽउग्रायनिष्टुरेषाळ्हायप्रसक्षिणे । देवत्तंब्रह्मगायत ॥ योविश्वान्यभिव्रतासोमस्यमदेऽअंधसः । इंद्रोदेवेषुचेतति ॥ इहत्यासधमाद्याहरीहिरण्यकेश्या । वोळ्हामभिप्रयोहितं+ ॥ अर्वाचंत्वापुरुष्टुतप्रियमेधस्तुताहरी । सोमपेयायवक्षतः ॥ ६ ॥ (८।५।३)
वयंघत्वासुतावंतऽआपोनवृक्तबर्हिषः । पवित्रस्यप्रस्रवणेषुवृत्रहन्परिस्तोतारऽआसते ॥ स्वरंतित्वासुतेनरोवसोनिरेकऽउक्थिनः । कदासुतंतृषाणऽओकऽआगमऽइंद्रस्वब्दीववंसगः ॥ कण्वेभिर्धृष्णवाधृषद्वाजंदर्षिसहस्रिणं । पिशंगरूपंमघवन्विचर्षणेमक्षूगोमंतमीमहे ॥ पाहिगायांधसोमदऽइंद्रायमेध्यातिथे । यःसंमिश्लोहर्योर्यःसुतेसचा

(८।५।३) वयंघेत्येकोनविंशत्यृचस्यसूक्तस्यमेध्यातिथिरिंद्रोबृहतीषोडश्याद्यास्तिस्रोगायत्र्योंत्यानुष्टुप् ।

वज्रीरथोहिरण्ययः ॥ यःसुषव्यःसुदक्षिणऽइनोयःसुक्रतुर्गृणे । यऽआकरःसहस्रायःशतामघऽइंद्रोयःपूर्भिदारितः+
॥ ७ ॥ योधृषितोयोवृतोयोऽअस्तिश्मश्रुषुश्रितः । विभूतद्युम्नश्च्यवनःपुरुष्टुतःक्रत्वागौरिवशाकिनः+ ॥
॥१६॥ कईवेदसुतेसचापिबंतंकद्वयोदधे । अयंयःपुरोविभिनत्त्योजसामंदानःशिप्र्यंधसः ॥ दानामृगोनवारणःपुरुत्राचरथं
दधे । नकिष्ट्वानियमदासुतेगमोमहाँश्चरस्योजसा ॥ यऽउग्रःसन्ननिःष्टृतःस्थिरोरणायसंस्कृतः । यदिस्तोतुर्मघवाशृ
णवद्धवंनेंद्रोयोषत्यागमत् ॥ सत्यमित्थावृषेदसिवृषजूतिर्नोवृतः । वृषाह्युग्रशृण्विषेपरावतिवृषोऽअर्वावतिश्रुतः
॥ ८ ॥ वृषणस्तेऽअभीशवोवृषाकशाहिरण्ययी । वृषारथोमघवन्वृषणाहरीवृषात्वंशतक्रतो ॥ वृषासोतासुनोतुते
वृषन्नृजीपिन्नाभर । वृषादधन्वेवृषणंनदीष्वातुभ्यंस्थातर्हरीणां ॥ एंद्रयाहिपीतयेमधुशविष्ठसोम्यं । नायमच्छा
मघवाशृणवद्गिरोब्रह्मोक्थाचसुक्रतुः ॥ वहंतुत्वारथेष्ठामाहरयोरथयुजः । तिरश्चिदर्यसवनानिवृत्रहन्नन्येषांयाशतक्र
तो ॥ अस्माकमद्यांतमंस्तोमंधिष्वमहामह । अस्माकंतेसवनासंतुशंतमामदायद्युक्षसोमपाः ॥ ९ ॥ नहिषस्तवनोम ॥१६॥
मशास्त्रेऽअन्यस्यरण्यति । योऽअस्मान्वीरऽआनयत् ॥ इंद्रश्चिद्घातदब्रवीत्स्त्रियाऽअशास्यंमनः । उतोऽअहक्रतुंर
घुं+ ॥ सप्तीचिद्घामदच्युतामिथुनावहतोरथं । एवेद्धूर्वृष्णऽउत्तरा ॥ अधःपश्यस्वमोपरिसंतरांपादकौहर । मातेक

शप्लकौदृशन्त्स्त्रीहिब्रह्माबभूविथ ॥ १० ॥ (८।५।४) एंद्रंयाहिहरिंभिरुपकण्वंस्यसुष्टुतिं । दिवोऽअमुष्यशासंतो
दिवँययदिँवावसो ॥ आत्वाग्रावावदन्निहसोमीघोषेँणयच्छतु । दिवो० ॥ अत्राविनेमिरेँषामुरांनधूनुतेवृकः ।
दिवो० ॥ आत्वाकण्वाऽइहावसेहवँतेवाजसातये । दिवो० ॥ दधामितेसुतानांवृष्णेनपूर्वपाय्यँ । दिवो० ॥ ११ ॥
स्मत्पुरंधिर्नऽआगहिविश्वतोधीर्नऽऊतयेँ । दिवो० ॥ आनोयाहिमहेमतेसहस्रोतेशतामघ । दिवो० ॥ आत्वाहो
तामनुर्हितोदेवत्रावक्षदीड्यः । दिवो० ॥ आत्वामद्च्युताहरींश्येनंपक्षेववक्षतः । दिवो० ॥ आयाह्यर्यऽआपरिस्वा
हासोमंस्यपीतयेँ । दिवो० ॥ १२ ॥ आनोयाह्युपश्रुत्युक्थेषुरणयाऽइह । दिवो० ॥ सरूपैरासुनोगहिसंभृतैःसंभृ
ताश्वः । दिवो० ॥ आयाहिपर्वतेभ्यःसमुद्रस्याधिविष्टपः । दिवो० ॥ आनोगव्यान्यश्व्यासहस्राशूरदर्दृहि । दि
वो० ॥ आनःसहस्रशोभरायुतानिशतानिच । दिवो० ॥ आयदिंद्रश्चदद्वहेसहस्रंवसुरोचिषः । ओजिष्ठमश्व्यंपशुं+॥
यऽऋज्रावातरंहसोरुषासोरघुष्यदः । भ्राजंतेसूर्याऽइव ॥ पारावतस्यरातिषुद्रवच्चक्रेष्वाशुषु । तिष्ठंवनस्यमध्यऽ
आ+ ॥ १३ ॥ (८।५।५) अग्निनेंद्रेणवरुणेनविष्णुनादित्यैरुद्रैर्वसुभिःसचाभुवा । सजोषसाऽउषसासूर्येणचसोमँ

(८।५।४)एंद्रयाहीत्यष्टादशर्चस्यसूक्तस्यनीपातिथिरिंद्रःआयदिंद्रइत्यादितिसृणामांगिरसाःसहस्रवसुरोचिषऋषयइंद्रोऽनुष्टुप्‌अंत्यास्तिस्रोगायत्र्यः।(८।५।५)अग्निनेंद्रेणेतिचतुर्विंशत्यृचस्यसूक्तस्यात्रेयःश्यावाश्वोश्विनावुपरिष्टाज्ज्योतिरंत्यास्तिस्रःक्रमेणपंक्तिमहाबृहतीपंक्तयः।

पिबतमश्विना ॥ विश्वा॑भिर्धी॒भिर्भुव॑नेनवाजिनादि॒वापृ॑थि॒व्याद्रि॑भिःसचा॒भुवा॑ । स॒जोष॑सा० ॥ विश्वै॑र्दे॒वैस्त्रि॒भिरे॑
काद॒शैरि॒हाद्भिर्म॒रुद्भि॒र्भृगु॑भिःसचा॒भुवा॑ । स॒जोष॑सा० ॥ जु॒षेथां॑य॒ज्ञंबोध॑तं॒हव॑स्यमे॒विश्वे॒हदे॑वौ॒सव॒नाव॑गच्छतं । स॒
जोष॑साऽउ॒षसा॒सूर्ये॑ण॒चेषं॑नोवोळ्हमश्विना ॥ स्तोमं॑जुषेथांयुव॒शेव॑क॒न्यनां॒विश्वे॒हदे॑वौ॒सव॒नाव॑गच्छतं । स॒जोष॑सा० ॥
गिरो॑जुषेथामध्व॒रंजु॑षेथां॒विश्वे॒हदे॑वौ॒सव॒नाव॑गच्छतं । स॒जोष॑सा० ॥ १४ ॥ हा॒रि॒द्र॒वेव॑पतथो॒वनेदुप॒सोमं॑सु॒तंम॑हि॒षे
वाव॑गच्छथः । स॒जोष॑साऽउ॒षसा॒सूर्ये॑णच॒त्रिर्व॒र्तिर्या॑तमश्विना ॥ हं॒सावि॑वपतथोऽअध्व॒गावि॑व॒सोमं॑सु॒तंम॑हि॒षेवाव॑ग
च्छथः । स॒जोष॑सा० ॥ श्ये॒नावि॑वपतथोह॒व्यदा॑तये॒सोमं॑सु॒तंम॑हि॒षेवाव॑गच्छथः । स॒जोष॑सा० ॥ पिब॑तंचतृष्णु॒तंचा
चं॑गच्छतंप्र॒जांचं॑ध॒त्तंद्रवि॑णंचधत्तं । स॒जोष॑साऽउ॒षसा॒सूर्ये॑ण॒चोर्जं॑नोधत्तमश्विना ॥ जय॑तंच॒प्रस्तु॑तंच॒प्रचा॑वतंप्र॒जांचं॑ध॒
त्तंद्रवि॑णंचधत्तं । स॒जोष॑सा० ॥ ह॒तंच॒शत्रू॒न्यत॑तंचमि॒त्रिणः॑प्र॒जांचं॑ध॒त्तंद्रवि॑णंचधत्तं ॥ स॒जोष॑सा० ॥ १५ ॥ मि॒
त्रावरु॑णवंताऽउ॒तधर्म॑वंताम॒रुत्वं॑ताजरि॒तुर्ग॑च्छथो॒हवं॑ । स॒जोष॑साऽउ॒षसा॒सूर्ये॑णचादि॒त्यैर्या॑तमश्विना ॥ अंगि॑रस्वंता
ऽउ॒तविष्णु॑वंताम॒रुत्वं॑ताजरि॒तुर्ग॑च्छथो॒हवं॑ । स॒जोष॑सा० ॥ ऋ॒भु॒मंता॑वृषणा॒वाज॑वंताम॒रुत्वं॑ताजरि॒तुर्ग॑च्छथो॒हवं॑ । ॥१७॥
स॒जोष॑सा० ॥ ब्रह्म॑जिन्वतमु॒तजि॑न्वतं॒धियो॑ह॒तंरक्षां॑सि॒सेध॑त॒ममी॑वाः । स॒जोष॑साऽउ॒षसा॒सूर्ये॑णच॒सोमं॑सुन्व॒तोऽअ॑
श्विना ॥ क्ष॒त्रंजि॑न्वतमु॒तजि॑न्वतं॒न्नॄन्ह॒तंरक्षां॑सि॒सेध॑त॒ममी॑वाः । स॒जोष॑सा० ॥ धे॒नूर्जि॑न्वतमु॒तजि॑न्वतं॒विशो॑ह॒तंरक्षां॑

सिसेधतममीवाः । सजोषसा० ॥ १६ ॥ अत्रेरिवशृणुतंपूर्व्यस्तुतिंश्यावाश्वस्यसुन्वतोमदच्युता । सजोषसाऽउषसासूर्येणचाश्विनातिरोऽअह्न्यं ॥ सर्गाँऽइवसृजतंसुष्टुतीरुपश्यावाश्वस्यसुन्वतोमदच्युता । सजोषसा० ॥ रश्मीँऽरिवयच्छतमध्वराँऽउपश्यावाश्वस्यसुन्वतोमदच्युता ॥ सजोषसा० ॥ अर्वाग्रथंनियच्छतंपिबतंसोम्यंमधु । आयातमश्विनागतमवस्युर्वामहंहुवेधत्तंरत्नानिदाशुषे ॥ नमोवाकेप्रस्थितेऽअध्वरेनराविवक्षणस्यपीतये । आयात० ॥ स्वाहाकृतस्यतृंपतंसुतस्यदेवावंधसः । आयात० ॥ १७ ॥ (८।५।६) अवितासिसुन्वतोवृक्तबर्हिषःपिबासोमंमदायकंशतक्रतो । यंतेभागमधारयन्विश्वाःसेहानःपृतनाऽउरुज्रयःसमप्सुजिन्मरुत्वाँऽइंद्रसत्पते ॥ प्रावस्तोतारंमघवन्नवत्वांपिबासोमंमदायकंशतक्रतो । यंतेभाग० ॥ ऊर्जादेवाँऽअवस्योजसात्वांपिबासोमंमदायकंशतक्रतो । यंतेभाग० ॥ जनितादिवोजनितापृथिव्याःपिबासोमंमदायकंशतक्रतो । यंतेभाग० ॥ जनिताश्वानांजनितागवामसिपिबासोमंमदायकंशतक्रतो । यंतेभाग० ॥ अत्रीणांस्तोममद्रिवोमहस्कृधिपिबासोमंमदायकंशतक्रतो । यंतेभाग० ॥ श्यावाश्वस्यसुन्वतस्तथाशृणुयथाशृणोरत्रेःकर्माणिकृण्वतः । प्रत्रसदस्युमाविथत्वमेकऽइन्नृषाह्यऽइंद्रब्रह्माणिवर्धयन् ॥ १८ ॥ (८।५।७) प्रेदंब्रह्मवृत्रतूर्येष्वाविथप्रसुन्वतःशचीपतऽइंद्रविश्वाभिरूतिभिः । माध्यंदिनस्यसवन

(८।५।६) अवितासीतिसप्तर्चस्यसूक्तस्यश्यावाश्वइंद्रःशक्वर्याद्यामहापंक्तिः । (८।५।७) प्रेदमितिसप्तर्चस्यसूक्तस्यश्यावाश्वइंद्रोमहापंक्तिराद्या

स्यवृत्रहन्ननेद्य॒पिबा॒सोमं॑स्यवज्रिवः ॥ से॒हा॒नऽउग्र॒पृत॑नाऽअ॒भिद्रुह॑ःशचीपत॒ऽइंद्र॒विश्वा॑भिरू॒तिभि॑ः । माध्यँ॑दिनस्य॒०॥
ए॒क॒राळ॒स्यभुव॑नस्यराजसिशचीपत॒ऽइंद्र॒विश्वा॑भिरू॒तिभि॑ः । माध्यँ॑दिनस्य॒० ॥ स॒स्थावा॑नायवयसि॒त्वमेक॒ऽइच्छ॑चीप
त॒ऽइंद्र॒विश्वा॑भिरू॒तिभि॑ः । माध्यँ॑दिनस्य॒० ॥ क्षेमं॑स्यचप्र॒युजं॑श्च॒त्वमी॑शिषेशचीपत॒ऽइंद्र॒विश्वा॑भिरू॒तिभि॑ः । माध्यँ॑दि
नस्य॒० ॥ क्ष॒त्राय॑त्व॒मवं॑सि॒नत्वं॑माविथशचीपत॒ऽइंद्र॒विश्वा॑भिरू॒तिभि॑ः । माध्यँ॑दिनस्य॒० ॥ श्या॒वाश्वं॑स्य॒रेभं॑त॒स्तथा॑शृ
णु॒यथाशृं॑णो॒रत्रे॒ःकर्मा॑णिकृण्व॒तः । प्रत्र॒सदं॑स्युमावि॒थत्वमेक॒ऽइन्नृ॒षाह्य॒ऽइंद्रं॑क्षत्रा॑णिव॒र्धयं॑न् ॥ १९ ॥ (८।५।८)
य॒ज्ञस्य॒हिस्थऽऋ॒त्विजा॒सस्नी॒वाजे॑षु॒कर्मं॑सु । इंद्रा॑ग्नी॒तस्यं॑बोधतं॥ तो॒शासा॑रथ॒यावा॑नावृत्र॒हणाप॑राजिता । इंद्रा॑ग्नी॒० ॥
इ॒दंवां॑मदि॒रंमध्वधु॑क्ष॒न्नद्रि॑भि॒र्नर॑ः । इंद्रा॑ग्नी॒० ॥ जु॒षेथां॑य॒ज्ञमि॒ष्टये॑सु॒तंसोमं॑सधस्तुती । इंद्रा॑ग्नी॒ऽआग॑तंनरा ॥ इ॒मा
जुषे॑था॒ंसवं॑ना॒येभि॑र्ह॒व्यान्यूहथु॑ः । इंद्रा॑ग्नी॒० ॥ इ॒मांगा॑य॒त्रवं॑र्तनिंजु॒षेथां॑सुष्टु॒तिंमम॑ । इंद्रा॑ग्नी॒० ॥ २० ॥ प्रा॒त॒र्याव॑
भि॒राग॑तंदे॒वेभि॑र्जेन्यावसू । इंद्रा॑ग्नी॒सोमं॑पीतये ॥ श्या॒वाश्वं॑स्यसुन्व॒तोत्री॑णांशृणुतं॒हवं॑ । इंद्रा॑ग्नी॒० ॥ ए॒वावा॑मह्वऽऊ॒
तये॒यथाहु॑वंत॒मेधि॑राः । इंद्रा॑ग्नी॒० ॥ आहंसरं॑स्वतीवतोरिं॑द्रा॒ग्न्योरवो॑वृणे । याभ्यां॑गाय॒त्रमृ॒च्यते॑ ॥ २१ ॥ (८।५।९)
अ॒ग्निमं॑स्तोष्यृ॒ग्मिय॑म॒ग्निमी॒ळाय॒जध्यै॑ । अ॒ग्निर्दे॒वाँऽअं॑नक्तुनऽउ॒भेहिवि॒दथे॑क॒विर॒ंतश्चरं॑तिदू॒त्यं॑१॒नभं॑तामन्य॒केसं॑मे ॥

तिजगती। (८।५।८) यज्ञस्येतिदशर्चस्यसूक्तस्यश्यावाश्वइंद्राग्नीगायत्री। (८।५।९) अग्निमितिदशर्चस्यसूक्तस्यकाण्वोनाभाकोग्निर्महापंक्तिः।

न्यंग्नेनव्यंसावचंस्तनूषुशंसंमेषां । न्यरातीररांव्णांविश्वांऽअर्योंऽअरातीरितोयुंच्छंत्वामुरोनभँता० ॥ अग्नेमन्मानि तुभ्यंकंघृतंनजुंह्वऽआसानिं । सदेवेषुप्राचिंकिद्धित्वंह्यसिंपूर्व्यः शिवोदूतोविवस्वंतोनभँता० ॥ तत्तंदग्निर्वयोंदधेयथाय थाकृपण्यतिं । ऊर्जाहुतिर्वसूनांशंचयोश्चमयोंदधेविश्वंस्यैदेवहूंत्यैनभँता० ॥ सचिंकेतसहींयसाग्निश्चित्रेणकर्मँणा । सहोताशश्वंतीनांदक्षिणाभिरभीवृंतऽइनोतिंचप्रतीव्यं १नभँता० ॥ २२ ॥ अग्निर्जातादेवानामग्निर्वेंदमर्ताँनामपी च्यँ । अग्निःसद्रंविणोदाऽअग्निर्द्वाराव्यूंर्णुतेस्वाहुतोनवींयसानभँता० ॥ अग्निर्देवेषुसंवंसुःसविक्षुयज्ञियास्वा । समु दाकाव्यापुरुविश्वंभूमेंवपुष्यतिदेवोदेवेषुंयज्ञियोनभँता० ॥ योऽअग्निःसप्तमानुषःश्रितोविश्वेंषुसिंधुंषु । तमागंन्मत्रि पस्त्यंमँधातुर्दंस्युहंतंमग्निंयज्ञेषुंपूर्व्यँनभँता० ॥ अग्निस्त्रीणिंत्रिधातून्याक्षेंतिविदथाकविः । सत्रीँऽरेंकादशाँऽइहय क्षंच्चपिप्रयंच्चनोविप्रोंदूतःपरिंष्कृतोनभँता० ॥ त्वंनोंऽअग्नऽआयुषुत्वंदेवेषुंपूर्व्यंवस्वऽएकंऽइरज्यसि । त्वामापंःपरिस्रु तःपरिंयंतिस्वसेंतवोनभँता॥२३॥(८।५।१०) इंद्राग्नीयुवंसुनःसहंतादासंथोरयिं । येनंदृढासमत्स्वावीळुचिंत्साहिषीम ह्यग्निर्वनेंववातऽइन्नभँता०॥नहिवांवव्रयामहेथेंद्रमिद्यंजामहेशविंष्ठंनृणांनरं । सनःकदाचिदर्वंतागमदावाजंसातयेगम दामेधसातयेनभँता०॥ताहिमध्यंभराणामिंद्राग्नीऽअधिक्षितः। ताऽउंकवित्वनाकवीपृच्छ्यमानासखीयतेसंधीतमंश्नुतं

(८।५।१०) इंद्राग्नीइतिद्वादशर्चस्यसूक्तस्य [illegible] त्रिष्टुप् ।

नरानभँता०॥अभ्यर्चनभाकवदिंद्राग्नीयजसागिरा।ययोर्विश्वमिदंजगदियंद्यौःपृथिवीमह्यु१पस्थेबिभृतोवसुनभँता०॥ प्रब्रह्माणिनभाकवदिंद्राग्निभ्यामिरज्यत । यासप्तबुध्नमर्णवंजिह्मबारमपोर्णुतऽइंद्रऽईशानऽओजसानभँता० ॥ अपिं वृश्चपुराणवद्व्रततेरिवगुष्पितमोजोदासस्यदंभय । वयंतदस्यसंभृतंवस्विंद्रेणविभजेमहिनभँता० ॥२४॥ यदिंद्राग्नीजनाऽइमेविह्वयंतेतनागिरा । अस्माकेभिर्नृभिर्वयंसासह्यामपृतन्यतोवनुयामवनुष्यतोनभँता० ॥ यानुश्वेताववोदिवऽउच्चरातऽउपद्युभिः । इंद्राग्न्योरनुव्रतमुहानायंतिसिंधवोयान्त्सींबंधादमुंचतांनभँता० ॥ पूर्वीष्टऽइंद्रोपमातयः पूर्वीरुतप्रशस्तयःसूनोहिन्वस्यहरिवः । वस्वोवीरस्यापृचोयानुसाधंतनोधियोनभँता० ॥ तंशिशीतासुवृक्तिभिस्त्वेषंसत्वानमृग्मियं । उतोनुचिद्यऽओजसाशुष्णस्यांडानिभेदतिजेषत्स्वर्वतीरपोनभँता० ॥ तंशिशीतास्वध्वरंसत्यंसत्वानमृत्वियं । उतोनुचिद्यऽओहतऽआंडाशुष्णस्यभेदत्यजैःस्वर्वतीरपोनभँता० ॥ एवेंद्राग्निभ्यांपितृवन्नवीयोमंधातृवदंगिरस्वदवाचि।त्रिधातुनाशर्मणापातमस्मान्वयंस्यामपतयोरयीणां॥२५॥(८।५।११)अस्माऽऊषुप्रभूतयेवरुणायमरुद्भ्योर्चाविदुष्टरेभ्यः। योधीतामानुषाणांपश्वोगाऽइवरक्षतिनभँता०॥ तमूषुसमनागिरापितृणांचमन्मभिः । नाभाकस्यप्रशस्तिभिर्यःसिंधूनामुपोदयेसप्तस्वसासमध्यमोनभँता० ॥ सक्षपःपरिषस्वजेन्यु१स्रोमाययादधेसविश्वंपरिदर्श

(८।५।११) अस्माऊष्विवितिदशर्चस्यसूक्तस्यनाभाकोवरुणोमहापंक्तिः ।

तः । तस्यवेनीरनुंव्रतमुषस्तिस्रोऽअंवर्धयन्नभँता० ॥ यःककुभोंनिधारयःपृथिव्यामधिंदर्शतः । समातांपूर्व्यंपदंतद्वरुंणस्यसख्यंसहिगोपाऽइवेर्योनभँता० ॥ योधर्ताभुवनानांयऽउस्राणामपीच्या३वेदनामानिगुह्या । सकविःकाव्यापुरुरूपंद्यौरिंवपुष्यतिनभँता० ॥ २६ ॥ यस्मिन्विश्वानिकाव्याचक्रेनाभिंरिवश्रिता । त्रितंजूतीसंपर्यतव्रजेगावोनसंयुजेयुजेऽअश्वाँऽअयुक्षतनभँता० ॥ यऽआस्वत्कंऽआशयेविश्वाजातान्येषां । परिधामानिमर्मृशद्वरुंणस्यपुरोगयेविश्वेंदेवाऽअनुंव्रतंनभँता० ॥ ससंमुद्रोऽअंपीच्यंस्तुरोद्यामिंवरोहतिनियदांसुयजुर्दधे । समायाऽअर्चिनापदास्तृणान्नाकमारुंहन्नभँता० ॥ यस्यंश्वेताविंचक्षणातिस्रोभूमीरधिक्षितः । त्रिरुत्तंराणिपप्रतुर्वरुंणस्यध्रुवंसदःससंप्तानामिंरज्यतिनभँता० ॥ यःश्वेताँऽअधिंनिर्णिजश्चक्रेकृष्णाँऽअनुंव्रता । सधामंपूर्व्यंममेयःस्कंभेनविरोदंसीऽअजोनद्यामधारयन्नभँता० ॥ २७ ॥ (८।५।१२) अस्तंभ्नाद्द्यामसुंरोविश्ववेंदाऽअमिंमीतवरिमाणंपृथिव्याः । आसींदद्विश्वाभुवंनानिसम्राड्विश्वेत्तानिवरुंणस्यव्रतानिं ॥ एवावंदस्ववरुंणंबृहंतंनमस्याधीरंममृतंस्यगोपां । सनःशर्मंत्रिवरूंथंवियंसत्पातंनोद्यावापृथिवीऽउपस्थें ॥ इमांधियंशिक्षंमाणस्यदेवक्रतुंदक्षंवरुणसंशिंशाधि । ययातिविश्वांदुरितातरेंमसुतर्माणमधिनावंरुहेम ॥ आवांग्रावाणोऽअश्विनाधीभिर्विप्राऽअचुच्यवुः । नासंत्यासोमंपीतयेनभँता० ॥ यथावाम

(८।५।१२) अस्तभ्नादितिषळर्चस्यसूक्तस्यनाभाकऋषिरंत्यानांतिसृणामात्रेयार्चनानाऋषिराद्यानांतिसृणांवरुणोंऽत्यानांतिसृणामश्विनौआद्यास्तिस्रस्त्रिष्टुभोंत्यास्तिस्रोनुष्टुभः ।

ऋक्सं. त्रिरश्विनागीर्भिर्विप्रोऽअजोहवीत् । नासत्यासोमपीतयेनभंता० ॥ एवावामह्वऽऊतयेयथाहुवंतमेधिराः । नासत्या मंडलं ८
अ.६अ.३ सोमपीतयेनभंता० ॥ २८ ॥ (८।६।१) इमेविप्रस्यवेधसोग्नेरस्तृतयज्वनः । गिरःस्तोमासऽईरते ॥ अस्मैतेप्रतिह अनु. ६
र्यतेजातवेदोविचर्षणे । अग्नेजनामिसुष्टुतिं+ ॥ आरोकाऽइवघेदहतिग्माऽअग्नेतवत्विषः । दद्भिर्वनानिबप्सति ॥
॥२०॥ हरयोधूमकेतवोवातजूताऽउपद्यवि । यतंतेवृथगग्नयः ॥ एतेत्येवृथगग्नयऽइद्धासःसमदृक्षत । उषसामिवकेत
वः ॥ २९ ॥ कृष्णारजांसिपत्सुतःप्रयाणेजातवेदसः । अग्निर्यद्रोधतिक्षमि ॥ धासिंकृण्वानऽओषधीर्बप्सदग्निर्नवा
यति । पुनर्यंतरुणीरपि ॥ जिह्वाभिरहनंनमदर्चिषाजंजणाभवन् । अग्निर्वनेषुरोचते ॥ अप्स्वग्नेसधिष्टवसौषधीरनु
रुध्यसे । गर्भेसंजायसेपुनः ॥ उदग्नेतवतद्घृतादर्चीरोचतऽआहुतं । निंसानंजुह्वो३मुखे ॥३०॥ उक्षान्नायवशान्नाय
सोमपृष्ठायवेधसे । स्तोमैर्विधेमाग्नये ॥ उतत्वानमसावयंहोतर्वरेण्यक्रतो । अग्नेसमिद्भिरीमहे ॥ उतत्वाभृगुवच्छु
चेमनुष्वदग्नऽआहुत । अंगिरस्वद्धवामहे ॥ त्वंह्यग्नेऽअग्निनाविप्रोविप्रेणसन्त्सता । सखासख्यासमिध्यसे ॥ सत्वं
विप्रायदाशुषेरयिंदेहिसहस्रिणं । अग्नेवीरवतीमिषं ॥ ३१ ॥ अग्नेभ्रातःसहस्कृतरोहिदश्वशुचिव्रत । इमंस्तोमंजुष ॥२०॥
स्वमे ॥ उतत्वाग्नेममस्तुतोवाश्रायप्रतिहर्यते । गोष्ठंगावऽइवाशत ॥ तुभ्यंताऽअंगिरस्तमविश्वाःसुक्षितयःपृथक् ।

षष्ठेनुवाकेषट्सूक्तानि (८।६।१) इमेविप्रस्येतित्रयस्त्रिंशदृचस्यसूक्तस्यांगिरसोविरूपोग्निर्गायत्री ।

अग्नेकामाययेमिरे ॥ अग्निंधीभिर्मनीषिणोमेधिरासोविपश्चितः । अद्मसद्यायहिन्विरे ॥ तंत्वामज्मेषुवाजिनंतन्वानाऽ
अग्नेऽअध्वरं । वह्निंहोतारमीळते ॥३२॥ पुरुत्राहिसदृङ्ङसिविशोविश्वाऽअनुप्रभुः । समत्सुत्वाहवामहे ॥ तमीळिष्व
यऽआहुतोग्निर्विभ्राजतेघृतैः । इमंनःशृणवद्धवं ॥ तंत्वावयंहवामहेशृण्वंतंजातवेदसं । अग्नेघ्नंतमपद्विषः ॥ विशांराजा
नमद्भुतमध्यक्षंधर्मणामिमं । अग्निमीळेसऽउश्रवत् ॥ अग्निंविश्वायुवेपसंमर्यंनवाजिनंहितं । सप्तिंनवाजयामसि ॥३३॥
घ्नन्मृध्राण्यपद्विषोदहन्रक्षांसिविश्वहा । अग्नेतिग्मेनदीदिहि ॥ यंत्वाजनासऽइंधतेमनुष्वदंगिरस्तम । अग्नेसबोधिमे
वचः ॥ यदग्नेदिविजाऽअस्यप्सुजावासहस्कृत । तंत्वागीर्भिर्हवामहे ॥ तुभ्यंघेत्तेजनाऽइमेविश्वाःसुक्षितयःपृथक् ।
धासिंहिन्वंत्यत्तवे ॥ तेघेदग्नेस्वाध्योहाविश्वानृचक्षसः । तरंतःस्यामदुर्गहा ॥ ३४ ॥ अग्निंमंद्रंपुरुप्रियंशीरंपावकशो
चिषं । हृद्भिर्मंद्रेभिरीमहे ॥ सत्वमग्नेविभावसुःसृजन्त्सूर्योनरश्मिभिः । शर्धन्तमांसिजिघ्नसे ॥ तत्तेसहस्वऽईमहे
दात्रंयन्नोपदस्यति । त्वदग्नेवार्यंवसु ॥ ३५ ॥ (८।६।२) समिधाग्निंदुवस्यतघृतैर्बोधयतातिथिं । आस्मिन्हव्या
जुहोतन ॥ अग्नेस्तोमंजुषस्वमेवर्धस्वानेनमन्मना । प्रतिसूक्तानिहर्यनः ॥ अग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवे । देवाँऽ
आसादयादिह+ ॥ उत्तेबृहंतोऽअर्चयःसमिधानस्यदीदिवः । अग्नेशुक्रासऽईरते ॥ उपत्वाजुह्वो३ममघृताचीर्यंतुहर्य

(८।६।२) समिधाग्निमितित्रिंशदृचस्यसूक्त[illegible]र्गायत्री ।

त । अग्नेहव्याजुषस्वनः ॥ ३६ ॥ मंद्रंहोतारमृत्विजंचित्रभानुंविभावसुं । अग्निमीळेसऽउश्रवत् ॥ प्रत्नंहोतारमी
ड्यंजुष्टमग्निंकविक्रतुं । अध्वराणामभिश्रियँ ॥ जुषाणोऽअँगिरस्तमेमाहव्यान्यानुषक् । अग्नेयज्ञंनयऽऋतुथा+ ॥
समिधानऽउसंत्यशुक्रशोचऽइहावह । चिकित्वान्दैव्यंजनँ ॥ विप्रंहोतारमद्रुहंधूमकेतुंविभावसुं । यज्ञानांकेतुमीम
हे ॥ ३७ ॥ अग्नेनिपाहिनस्त्वंप्रतिष्मदेवरीषतः । भिंधिद्वेषःसहस्कृत ॥ अग्निःप्रत्नेनमन्मनाशुंभानस्तन्वं१स्वां । क
विर्विप्रेणवावृधे ॥ ऊर्जोनपातमाहुवेग्निंपावकशोचिषं । अस्मिन्यज्ञेस्वध्वरे+ ॥ सनोमित्रमहस्त्वमग्नेशुक्रेणशोचि
षा । देवैरासत्सिबर्हिषि ॥ योऽअग्निंतन्वो३दमेदेवंमर्तःसपर्यति । तस्माऽइद्दीदयद्वसु ॥३८॥ अग्निर्मूर्धादिवःककु
त्पतिःपृथिव्याऽअयं । अपांरेतांसिजिन्वति ॥ उदग्नेशुचयस्तवशुक्राभ्राजंतऽईरते । तवज्योतींष्यर्चयः ॥ ईशिषेवा
र्यस्यहिदात्रस्याग्नेस्वःपतिः । स्तोतास्यांतवशर्मणि ॥ त्वामग्नेमनीषिणस्त्वांहिन्वंतिचित्तिभिः । त्वांवर्धंतुनोगिरः ॥
अदब्धस्यस्वधावतोदूतस्यरेभतःसदा । अग्नेःसख्यंवृणीमहे ॥ ३९ ॥ अग्निःशुचिव्रततमःशुचिर्विप्रःशुचिःकविः ।
शुचीरोचतऽआहुतः ॥ उतत्वाधीतयोममगिरोवर्धंतुविश्वहा । अग्नेसख्यस्यबोधिनः ॥ यदग्नेस्यामहंत्वंत्वंवाघास्या
ऽअहं । स्युष्टेसत्याऽइहाशिषः ॥ वसुर्वसुपतिर्हिकमस्यग्नेविभावसुः । स्यामतेसुमतावपि ॥ अग्नेधृतव्रतायतेसमुद्राये
वसिंधवः । गिरोवाश्रासऽईरते ॥ ४० ॥ युवानंविश्पतिंकविंविश्वादंपुरुवेपसं । अग्निंशुंभामिमन्मभिः ॥ यज्ञानां

रथ्येवयंतिग्मजंभायवीळवे । स्तोमैरिषेमाग्नये ॥ अयमग्नेत्वेऽअपिजरिताभूतुसंत्य । तस्मैपावकमृळय ॥ धीरोह्यस्यद्मसद्विप्रोनजागृविःसदा । अग्नेदीदयसिद्यवि ॥ पुराग्नेदुरितेभ्यःपुरामृध्रेभ्यःकवे । प्रणऽआयुर्वसोतिर ॥ ४१ ॥

(८।६।३) आघायेऽअग्निमिंधतेस्तृणंतिबर्हिरानुषक् । येषामिंद्रोयुवासखा ॥ बृहन्निदिध्मऽएषांभूरिशस्तंपृथुःस्वरुः । येषामिंद्रोयुवासखा ॥ अयुद्धऽइद्युधावृतंशूरऽआजतिसत्वभिः । येषामिंद्रोयुवासखा ॥ आबुंदंवृत्रहाददेजातःपृच्छद्विमातरं । कऽउग्राःकेहशृण्विरे ॥ प्रतित्वाशवसीवदद्गिरावप्सोनयोधिषत् । यस्तेशत्रुत्वमाचके+ ॥ ४२ ॥

उतत्वंमघवन्छृणुयस्तेवष्टिववक्षितत् । यद्वीळयासिवीळुतत्+ ॥ यदाजिंयात्याजिकृदिंद्रःस्वश्वयुरुप । रथीतमोरथीनां ॥ विषुविश्वाऽअभियुजोवज्रिन्विष्वग्यथावृह । भवानःसुश्रवस्तमः ॥ अस्माकंसुरथंपुरऽइंद्रःकृणोतुसातये । नयंधूर्वंतिधूर्तयः ॥ वृज्यामतेपरिद्विषोरंतेशक्रदावने । गमेमेदिंद्रगोमतः ॥ ४३ ॥

शनैश्चिद्यंतोऽअद्रिवोश्वावंतःशतग्विनः । विवक्षणाऽअनेहसः ॥ ऊर्ध्वाहितेदिवेदिवेसहस्रासूनृताशता । जरितृभ्योविमंहते ॥ विद्माहित्वाधनंजयमिंद्रदृळ्हाचिदारुजं । आदारिणंयथागयं ॥ ककुहंचित्त्वाकवेमंदंतुधृष्णविंदवः । आत्वापणिंयदीमहे ॥ यस्तेरेवाँऽअदाशुरिःप्रममर्षमघत्तये । तस्यनोवेदऽआभर ॥ ४४ ॥

इमऽउत्वाविचक्षतेसखायऽइंद्रसोमिनः । पुष्टावंतोय

(८।६।३) आघायइतिद्विचत्वारिंशदृचस्यसूक्तस्यकाण्वस्त्रिशोकइंद्रआद्यायाअग्नींद्रागायत्री ।

थापशुं+ ॥ उतत्वाबधिरंवयंश्रुत्कर्णंसंतमूतये । दूरादिहहवामहे ॥ यच्छुश्रूयाऽइमंहवंदुर्मर्षंचक्रियाऽउत । भवे
रापिर्नोऽअंतमः ॥ यच्चिद्धितेऽअपिव्यथिर्जगन्वांसोऽअमन्महि । गोदाऽइदिंद्रबोधिनः ॥ आत्वारंभंनजिव्रयोरर
भ्माशवसस्पते । उश्मसित्वासधस्थऽआ+ ॥ ४५ ॥ स्तोत्रमिंद्रायगायतपुरुनृम्णायसत्वने । नकिर्यंवृण्वतेयुधि+ ॥
अभित्वावृषभासुतेसुतंसृजामिपीतये । तृंपाव्यश्नुहीमदं ॥ मात्वामूराऽअविष्यवोमोपहस्वानऽआदभन् । माकींब्र
ह्मद्विषोवनः ॥ इहत्वागोपरीणसामहेमंदंतुराधसे । सरोगौरोयथापिब ॥ यावृत्रहापरावतिसनानवाचचुच्युवे ।
तासंसत्सुप्रवोचत ॥ ४६ ॥ अपिबत्कद्रुवःसुतमिंद्रःसहस्रबाह्वे । अत्रादेदिष्टपौंस्यं ॥ सत्यंतत्तुर्वशेयदौविदानोऽ
अह्नवाय्यं । व्यानट्तुर्वणेशमि ॥ तरणिंवोजनानांत्रदंवाजस्यगोमतः । समानमुप्रशंसिषं ॥ ऋभुक्षणंनवर्तवऽउक्थे
षुतुग्र्यावृधं । इंद्रंसोमेसचासुते+ ॥ यःकृंतदिद्वियोन्यंत्रिशोकायगिरिंपृथुं । गोभ्योगातुंनिरेतवे ॥ ४७ ॥ यद्दधि
षेमनस्यसिमंदानःप्रेदियक्षसि । मातत्करिंद्रमृळय ॥ दभ्रंचिद्धित्वावतःकृतंशृण्वेऽअधिक्षमि । जिगात्विंद्रतेमनः ॥
तवेदुताःसुकीर्तयोसन्नुतप्रशस्तयः । यदिंद्रमृळयासिनः ॥ मानऽएकस्मिन्नागसिमाद्वयोरुतत्रिषु । वधीर्माशूरभूरि ॥२२॥
षु ॥ बिभयाहित्वावतऽउग्रादभिप्रभंगिणः । दस्मादहमृतीषहः ॥ ४८ ॥ मासख्युःशूनमाविदेमापुत्रस्यप्रभूवसो ।
आवृत्वद्भूतुतेमनः ॥ कोनुमर्याऽअमिथितःसखासखायमब्रवीत् । जहाकोऽअस्मदीषते ॥ एवारेवृषभासुतेसिन्व

न्भूर्यो वयः । श्वघ्नीवंनिवताचरंन् ॥ आतंऽएतावंचोयुजाहरींगृभ्णेसुमद्रंथा । यदींब्रह्मभ्यऽइद्ददंः ॥ भिंधिविश्वाऽअपाद्विषःपरिबाधोंजहीमृधंः । वसुंस्पार्हंतदाभंर ॥ यद्वीळाविंद्रयत्स्थिरेयत्पर्शानेपरांभृतं । वसुं० ॥ यस्यंतेविश्वमांनुषोभूरेर्दत्तस्यवेदंति । वसुं० ॥ ४९ ॥ इतिषष्ठाष्टकेतृतीयोऽध्यायः ॥ ३ ॥ ॥ ॥

त्रिचत्वारिंशाध्यायेवर्गाः ४९ सूक्तानि १४ ऋचः २९८॥ त्यागः ॥ इंद्राये. ६७ अश्विभ्या. २४ इंद्राये. १४ इंद्राग्निभ्यां.१० अग्नय. १० इंद्राग्निभ्यां. १२ वरुणाये. १३ अश्विभ्या. ३ अग्नय. ६३ अग्नींद्राभ्या. इंद्राये. ४१ ॥ इतिषष्ठेतृतीयः ॥

त्वावतस्त्रयस्त्रिंशद्वशोऽश्व्यंआसआदिकानीतस्यंपृथुश्रवसोदानस्तुतिंराद्यापादनिचृंत्पंचम्यादिककुब्गायत्रीं बृहत्यनुष्टुप्सतोबृहतीगायत्रींविपरीतोत्तराप्रगाथौद्विपदाचतुर्विंशिकांबृहतीपिपीलिकमध्यांककुम्न्यंकुशिराविराड्ंजगत्युपरिष्टाद्बृहतीबृहत्योंविषमपदोत्तरापंक्तिःसंस्तारपंक्तिर्गायत्रींपंक्तिःप्रगाथौवायव्यौचंगायत्रीद्विपदोष्णिक्पंक्तिर्वायव्यागायत्रींमहिवोष्वूनांत्रितआप्त्यआदित्येभ्योंत्यादुःस्वप्नघ्नंयःपंचोषसेपिमहापांक्तंस्वादोःपंचोनाप्रगार्थःसौम्यंत्रैष्टुभंपंचमीजगत्यंभिप्रदशप्रस्कण्वःप्रागाथंतंत्प्रसुश्रुतंपुष्टिर्गुर्यथामनौश्रुष्टिर्गुर्यथामनावायुंरुपमंत्वाष्टौमेध्यंएतत्तेमातरिश्वानोंविश्वइतिवैश्वदेवःप्रगाथोभूरीत्पंचकृशंःप्रस्कण्वस्यदानस्तुतिर्गायत्रंतुंतृतीयांत्येअनुष्टुभौप्रतितेपृषध्रोंत्याग्निसौरीपंक्तिर्युवंदेवाचतुष्कंमेध्यांआश्विनंत्रैष्टुभंयमृत्विजस्तृचंवैश्वदेवं

माद्यऋत्विक्स्तुतिर्वैमानिवांसप्तसुपर्णऐंद्रावरुणंजागतमंग्नआविंशतिर्भर्गःप्रागाथंआग्नेयंप्रागाथंतूभयंव्यूनां प्रोअस्मैद्वादशप्रगाथःपांक्तंसप्तम्याद्यास्तिस्रोबृहत्यःसपूर्व्योगायत्रंमाद्याचतुर्थ्यादिद्वेसप्तमीचानुष्टुभौगायत्रं त्यादैवीत्रिष्टुबुत्त्वायदिंद्रतरोभिःपंचोनांकलिःप्रागाथःप्रागाथंमंत्यानुष्टुप्त्यांनुसैकामत्स्यःसांमदोमैत्रावरुणि र्मान्योवांबहवोवामत्स्याजालनद्धाआदित्यान्नस्तुवन्दंशम्याद्यास्तिस्रोप्यदितेः ॥ ४ ॥ ॥ ॥

॥ हरिःओम् ॥ (८।६।४) त्वावंतःपुरूवसोवयमिंद्रप्रणेतः । स्मसिंस्थातर्हरीणां ॥ त्वांहिसत्यमद्रिवोविद्मदातारमिषां । विद्मदातारंरयीणां⁺ ॥ आयस्यंतेमहिमानंशतंमूतेशतंक्रतो । गीर्भिर्गृणंतिकारवः ॥ सुनीथोघासमर्त्यो यंमरुतोयमर्यमा । मित्रःपांत्यद्रुहः ॥ दधानोगोमदश्ववत्सुवीर्यमादित्यजूतऽएधते । सदारायापुरुस्पृहा ॥ १ ॥ तमिंद्रंदानमीमहेशवसानमभीर्वं । ईशानंरायऽईमहे ॥ तस्मिन्हिसंत्यूतयोविश्वाऽअभीरवःसचा । तमावंहंतुस

(८।६।४।) त्वावतइतित्रयस्त्रिंशदृचस्यसूक्तस्याश्व्योवशऋषिःपृथुश्रवादेवता आद्यानांविंशत्यृचामिंद्रोदेवताआनोवायवित्यादिचतसृणांशतंदासइत्यस्याश्ववायुर्देवताआद्यापादनिचृत्द्वितीयादितिस्रोगायत्र्यःपंचम्याद्याःक्रमेणककुब्गायत्रीबृहत्यनुष्टुप्सतोबृहतीगायत्रीबृहतीविपरीताद्विपदागायत्रीबृहतीपिपीलिकमध्याककुप्न्यंकुशिराविराड्जगत्युपरिष्टद्बृहतीबृहतीविषमपदाबृहतीपंक्तिसंस्तारपंक्तिगायत्रीपंक्तिबृहतीसतोबृहतीबृहतीसतोबृहतीगायत्रीद्विपदाविराडुष्णिक्पंक्तिर्गायत्र्यः । (पृथुश्रवाःकानीतोराजा) ।

सं॑यःपुरू॒वसुं॒मदा॑य॒हर॑यःसु॒तं+ ॥ यस्ते॒मदो॒वरैं॑ण्यो॒यऽइँद्र॑वृत्र॒हंत॑मः । यऽआ॑द॒दिःस्वं॑१॒र्नृभि॒र्यःपृत॑नासुदु॒ष्टरः॑ ॥ योदु॒ष्टरौं॑विश्ववार॒श्रवाय्यो॒वाजे॒ष्वस्ति॑तरु॒ता । सनः॑शविष्ठ॒सव॒नाव॑सोगहि॒गमे॒मगोम॑तिव्र॒जे+ ॥ ग॒व्योषु॒णोयथा॑पुरा श्व॒योतरं॑थ॒या । व॒रि॒व॒स्यम॑हामह ॥ २ ॥ न॒हितें॑शूर॒राध॒सोंतं॑वि॒दामिं॑स॒त्रा । द॒श॒स्यानौं॑मघव॒न्नूचि॑दद्रि॒वोधि यो॒वाजें॑भिराविथ ॥ यऽऋ॒ष्वःश्रा॑व॒यत्स॑खा॒विश्वे॒त्सवें॑द॒जनि॑मापुरुष्टु॒तः । तंविश्वे॒मानु॑षायु॒गेंद्रं॑हवंतेतवि॒षंय॒तस्रु॑चः ॥ सनो॒वाजें॑ष्ववि॒तापुं॑रू॒वसुःपुरस्था॒ताम॒घवा॑वृत्र॒हाभुं॑वत् ॥ अ॒भिवौं॑वी॒रमंध॒सोमदें॑षुगायगि॒राम॒हाविचें॑तसं । इंद्रं॒नाम॒ श्रुत्यं॑शा॒किनं॒वचो॒यथा॑ ॥ द॒दीरेक्णं॑स्त॒न्वें॑द॒दिर्वसुं॑द॒दिर्वाजें॑षुपुरुहूत॒वा॒जिनं॑ । नू॒नमथं॑ ॥ ३ ॥ विश्वेषा॑मिर॒ज्यंत॒ंवसूं॑ नांसास॒ह्वांसं॑चिद॒स्यवर्पं॑सः । कृ॒प॒य॒तोनू॒नमत्यथं॑ ॥ म॒हःसुवो॒ऽअरं॑मिषे॒स्तवा॑महेमी॒ह्लुषें॑ऽअरं॑ग॒माय॒जग्मं॑ये । य॒ज्ञेभि॑ गी॒र्भिर्वि॒श्वम॑नुषांम॒रुतां॑मियक्षसि॒गायें॑त्वा॒नमं॑सागि॒रा+ ॥ येंपा॒तयं॑ते॒ऽअज्मं॑भिर्गिरी॒णांस्नुभिं॑रेषां । य॒ज्ञंमं॑हि॒ष्वणी॑नांसु॒म्नंतुं॑वि॒ष्वणी॑ना॒ंप्रा॑ध्व॒रे+ ॥ प्र॒भं॒गंदु॑र्म॒तीनामिंद्रं॑शवि॒ष्ठाभ॑र । र॒यिम॒स्मभ्यं॒युज्यं॑चोदयन्मते॒ज्येष्ठं॑चोदयन्मते ॥ सनिं॑त॒ःसुसं॑नित॒रुग्र॒चित्र॒चेतिं॑ष्ठ॒सूनृं॑त । प्रा॒सहा॑सम्रा॒ट्सहुं॑रि॒ंसहं॑तंभु॒ज्युंवाजें॑षु॒पूर्व्यं॑ ॥ ४ ॥ आसऽएं॑तु॒यऽईव॒दाँऽअ दें॑वःपू॒र्तमा॑द॒दे । यथा॑चि॒द्वशों॑ऽअ॒श्व्यःपृं॑थु॒श्रवं॑सिका॒नी॒ते॒३स्या॒व्युष्या॑द॒दे+ ॥ ष॒ष्टिंस॒हस्राश्व्यं॑स्या॒युता॑सन॒मुष्ट्रा॑नां विं॑श॒तिंश॒ता । दश॒श्यावी॑नांश॒तादश॒त्र्यं॑रुषीणांद॒शग॒वांस॒हस्रा॑ ॥ दशं॑श्या॒वाऽऋ॒धद्रं॑योवी॒तवा॑रासऽआ॒शवः॑ ।

मथ्रानेमिंनिवांवृतुः ॥ दानांसःपृथुश्रवसःकानीतस्यसुराधसः । रथंहिरण्ययंददन्मंहिष्ठःसूरिरंभूद्वर्षिष्ठमकृतश्र
वः ॥ आनोंवायोमहेतनेंयाहिमखायपाजंसे । वयंहितेंचकृमाभूरिंदावनेंसद्यश्चिन्महिंदावनें॥५॥ योऽअश्वेंभिर्वहंतेव
स्तंऽउस्त्रास्त्रिःसप्तसप्ततीनां । एभिःसोमेंभिःसोमसुद्भिःसोमपादानायंशुक्रपूतपाः ॥ योमंऽइमंचिदुत्मनामंदच्चित्रंदाव
नें। अरट्वेऽअक्षेनहुंषेसुकृत्वंनिसुकृत्तंरायसुक्रतुः ॥ उचथ्ये३वपुंषियःस्वराळुतवायोघृतस्नाः । अश्वेंषितंरजेंषितंशुनेंषितं
प्राज्मतदिदन्नुतत्+॥अधप्रियमिंषिरायंषष्टिंसहस्रासनं। अश्वानामिन्नवृष्णां ॥ गावोनयूथमुपयंतिवध्रंयऽउपमायंति
वध्रंयः ॥ अधयच्चारंथेगणेशतमुष्ट्राँऽअचिंक्रदत् । अधश्वित्नेंषुविंशतिंशता+॥शतंदासेबल्बूथेविप्रस्तरुक्षऽआदंदे । तेतें
वायविमेजनामदंतींद्रगोपामदंतिदेवगोंपाः॥अधस्यायोषंणामहीप्रंतीचीवशंमश्व्यं। अधिंरुक्माविनींयते॥६॥(८।६।५)
महिंवोमहतामवोवरुंणमित्रदाशुषें । यमांदित्याऽअभिद्रुहोरक्षंथानेमघंनंशदनेहसोंवऽऊतयंःसुऽऊतयोंवऽऊतयंः ॥
विदादेंवाऽअघानामादिंत्यासोऽअपाकृंतिं । पक्षावयोयथोपरिव्यं१स्मेशर्मंयच्छतानेहसों० ॥ व्यं१स्मेऽअधिशर्मत
त्पक्षावयोनयंतन । विश्वानिविश्ववेदसोवरूथ्यांमनामहेनेहसों० ॥ यस्माऽअरांसतक्षयंजीवातुंचप्रचेतसः । मनो
र्विश्वंस्यघेदिमऽआदित्याराथऽईशतेनेहसों० ॥ परिंणोवृणजन्नघादुर्गाणिंरथ्योंयथा । स्यामेदिंद्रंस्यशर्मण्यादित्या

(८।६।५) महिवइत्यष्टादशर्चस्यसूक्तस्याप्त्यस्त्रितआदित्याअंत्यपंचानामादित्योषसोमहापंक्तिः । (अंत्याःपंचदुःस्वप्नघ्न्यः) ।

ना॑मु॒ताव॑स्यने॒हसो॑० ॥ ७ ॥ प॒रि॒ह्वृ॒तेद॒नाजनो॑यु॒ष्माद॑त्तस्यवायति । दे॒वा॒ऽअद॑भ्रमाशवो॒यमा॑दित्या॒ऽअहे॑तनाने॒हसो॑० ॥ नतं॑ति॒ग्मं॑च॒नत्यजो॒नद्रा॑सद॒भितं॑गुरु । यस्मा॑ऽउ॒शर्म॑स॒प्रथ॒ऽआदि॑त्यासो॒ऽअरा॑ध्वमने॒हसो॑० ॥ यु॒ष्मेदे॑वा॒ऽअपि॑ष्मसि॒युध्यं॑तऽइव॒वर्म॑सु । यू॒यंम॒होन॒ऽएनं॑सोयू॒यमर्भा॑दुरुष्यताने॒हसो॑० ॥ अदि॑तिर्नऽउरुष्य॒त्वदि॑ति॒ःशर्म॑यच्छतु । मा॒तामि॒त्रस्य॑रे॒वतो॑र्य॒म्णोवरु॑णस्यचाने॒हसो॑० ॥ यद्दे॑वा॒ःशर्म॑शर॒णंयद्भ॒द्रंयद॑नातु॒रं । त्रि॒धातु॒यद्व॑रू॒थ्यं॑१तद॒स्मासु॒वियं॑तनाने॒हसो॑० ॥ ८ ॥ आदि॑त्या॒ऽअव॒हिख्य॑ताधि॒कूला॑दिव॒स्पशः॑ । सु॒ती॒र्थमर्व॑तोय॒थानु॑नोनेषथासु॒गमं॑ने॒हसो॑० ॥ नेहभ॒द्रंर॑क्ष॒स्विने॒नाव॒यैनोप॒याऽउ॒त । गवे॑चभ॒द्रंधे॒नवे॑वी॒राय॑चश्रवस्य॒ते॑ने॒हसो॑० ॥ यद॒ाविर्यद॑पी॒च्यं॑१देवा॑सो॒ऽअस्ति॑दुष्कृ॒तं । त्रि॒तेतद्विश्वं॑मा॒प्त्यऽआ॒रेऽअ॒स्मद्द॑धातनाने॒हसो॑० ॥ यच्च॒गोषु॑दु॒ःष्वप्न्यं॒यच्चा॒स्मेदु॑हितर्दि॑वः । त्रि॒ताय॒तद्वि॑भावर्या॒प्त्याय॒परा॑वहाने॒हसो॑० ॥ नि॒ष्कंवा॑घाकृ॒णव॑ते॒स्रजं॑वादुहितर्दि॑वः । त्रि॒तेदु॒ःष्वप्न्यं॒सर्वं॑मा॒प्त्येपरि॑दद्मस्यने॒हसो॑० ॥ ९ ॥ तद॑न्नाय॒तद॑पसे॒तंभा॒गमु॑पसे॒दुषे॑ । त्रि॒ताय॑चद्वि॒ताय॒चोषो॑दु॒ःष्वप्न्यं॑वहाने॒हसो॑० ॥ यथा॑कु॒लंयथा॑श॒फंयथ॑ऽऋ॒णंसं॒नया॑मसि । ए॒वादु॒ःष्वप्न्यं॒सर्वं॑मा॒प्त्येसंनं॑यामस्यने॒हसो॑० ॥ अजै॑ष्मा॒द्यास॑नाम॒चाभू॒मानाग॑सोव॒यं । उ॒षो॒यस्मा॑दु॒ःष्वप्न्या॒दभै॒ष्माप॒तदु॑च्छत्वने॒हसो॑० ॥ १० ॥ (८।६।६) स्वा॒दोर॑भक्षि॒वय॑सःसुमे॒धाःस्वा॒ध्यो॑वरिवो॒वित्त॑रस्य ।

(८।६।६) स्वादोरितिपंचदशर्चस्यसूक्तस्यकाण्वःप्रगाथःसोमस्त्रिष्टुप् (पंचमीजगती ।)

विश्वेयंदेवाऽउतमर्त्यासोमधुंब्रुवंतोऽअभिसंचरंति ॥ अंतश्चप्रागाऽअदितिर्भवास्यवयाताहरसोदैव्यस्य । इंदविंद्र
स्यसख्यंजुषाणःश्रौष्टीवधुरमनुरायऽऋध्याः ॥ अपामसोमममृताऽअभूमागन्मज्योतिरविंदामदेवान् । किंनूनम
स्मान्कृणवदरातिःकिमुधूर्तिरमृतमर्त्यस्य ॥ शंनोभवहृदऽआपीतऽइंदोपितेवसोमसूनवेसुशेवः । सखेवसख्यऽउरुशं
सधीरःप्रणऽआयुर्जीवसेसोमतारीः ॥ इमेमापीतायशसऽउरुष्यवोरथंनगावःसमनाहपर्वसु । तेमारक्षंतुविस्रसश्चरि
त्रादुतमास्रामाद्यवयंत्विंदवः ॥ ११ ॥ अग्निंनमामथितंसंदिदीपःप्रचक्षयकृणुहिवस्यसोनः । अथाहितेमदऽआसो
ममन्येरेवाँऽइवप्रचरापुष्टिमच्छ ॥ इषिरेणतेमनसासुतस्यभक्षीमहिपित्र्यस्येवरायः । सोमराजन्प्रणऽआयूंषितारीर
हानीवसूर्योवासराणि ॥ सोमराजन्मृळयानःस्वस्तितवस्मसिव्रत्या३स्तस्यविद्धि । अलर्तिदक्षऽउतमन्युरिंदोमानोऽ
अर्योऽअनुकामंपरादाः ॥ त्वंहिनस्तन्वःसोमगोपागात्रेगात्रेनिषसत्थानृचक्षाः । यत्तेवयंप्रमिनामव्रतानिसनोमृळसु
षखादेववस्यः ॥ ऋदूदरेणसख्यासचेययोमानरिष्येद्धर्यश्वपीतः । अयंयःसोमोन्यधाय्यस्मेतस्माऽइंद्रंप्रतिरमेम्यायुः
॥ १२ ॥ अपत्याऽअस्थुरनिराऽअमीवानिरत्रसन्तमिषीचीरभैषुः । आसोमोऽअस्माँऽअरुहद्विहायाऽअगन्मयत्रप्र ॥२५॥
तिरंतऽआयुः ॥ योनऽइंदुःपितरोहृत्सुपीतोमर्त्यामर्त्याँऽआविवेश । तस्मैसोमायहविषाविधेममृळीकेऽअस्यसुमतौ
स्याम ॥ त्वंसोमपितृभिःसंविदानोनुद्यावापृथिवीऽआततंथ । तस्मैतऽइंदोहविषाविधेमवयंस्यामपतयोरयीणां+ ॥

त्राता॑रोदेवा॒ऽअधि॑वोचतानो॒मानो॑नि॒द्राऽई॑शत॒मोतजल्पि॑ः । व॒यंसोम॑स्यवि॒श्वह॑प्रि॒यास॑ःसु॒वीरा॑सोवि॒दथ॒माव॑देम ॥
त्वंन॑ःसोमवि॒श्वतो॑वयो॒धास्त्वंस्व॒र्विदा॑विशा॒नृचक्षा॑ः । त्वंन॑ऽइंदऽऊ॒तिभि॑ःस॒जोषा॑ःपा॒हिप॒श्चाता॑दु॒तवा॑पु॒रस्ता॑त् ॥ १३ ॥
([1]अथवालखिल्यानि ॥ (१) अ॒भिप्रव॑ःसु॒राध॑स॒मिंद्र॑मर्च॒यथा॑वि॒दे । योज॑रि॒तृभ्यो॑म॒घवा॑पुरू॒वसु॑ःस॒हस्रे॑णेव॒शिक्ष॑ति ॥ श॒तानी॑केव॒प्रजि॑गातिधृष्णु॒याहंति॑वृ॒त्राणि॑दा॒शुषे॑ । गि॒रेरि॑व॒प्ररसा॑ऽअस्यपिन्विरे॒दत्रा॑णिपुरु॒भोज॑सः ॥ आत्वा॑
सु॒तास॒ऽइंद॑वो॒मदा॒यऽइं॑द्रगिर्वणः । आपो॒नुव॑ज्रि॒न्नन्वो॒क्यं१॒सर॑ःपृ॒णंति॑शूर॒राध॑से ॥ अ॒ने॒हसं॑प्र॒तर॑णंवि॒वक्ष॑णं॒मध्व॒ः
स्वादि॑ष्ठमींपिब । आयथा॑मंदसा॒नःकि॒रासि॑न॒ःप्रक्षु॒द्रेव॒त्मना॑धृ॒षत् ॥ आन॒ःस्तोम॒मुप॑द्र॒वद्धि॒यानो॑ऽअश्वो॒नसोतृ॑भिः ।
यंते॑स्वधावन्त्स्व॒दयं॑तिधे॒नव॒ऽइंद्र॒कण्वे॑षुरा॒तय॑ः ॥ १४ ॥ उ॒ग्रंनवी॒रंनम॒सोप॑सेदिम॒विभू॑ति॒मक्षि॑तावसुं । उ॒द्रीव॑वज्रि

---

[1] (अथैकादशसूक्तात्मकंवालखिल्याख्यंभागंपाठकाअस्मिन्नध्यायेपठंति तत्तुवेदपारायणादौनेष्यतेखिलत्वात्।(केचित्तुवालखिल्यान्यपिपठनीयानि–'सूक्तसहस्रं ससप्तदशकमृग्वेदेपारायणपाठेशाकल्ये'इतिवचनात्वालखिल्यान्वितायाएवशाकलशाखायाःसूक्तसहस्रमित्याद्युक्तसंख्याप्रतीतेरित्याहुः ।) सर्वानुक्रमकारेणापितस्यानुक्रमणीनोदाहृता वालखिल्यानांखिलत्वात् । अतश्चप्रतिज्ञातंहिअथऋग्वेदाम्नायेशाकलकइति । सत्यप्येवंपाठकानांपठनेप्यृष्यादिज्ञानेननिःश्रेयसावाप्तिरित्यभिप्रेत्यकेनचिदनुक्रमण्युदाहृतास्तितदभिप्रायेणसूक्तप्रतीकाद्यंलिख्यते । अनुक्रान्तस्यमूलंतुमृग्यम् ।)

(१) अभिप्रेतिदशर्चस्यसूक्तस्यकाण्वःप्रस्कण्वइंद्रःअयुजोबृहत्यःयुजःसतोबृहत्यः ।

न्नव॒तोनसिँच॒तेक्षर॑ँतींद्र॒धी॒तय॑ः ॥ यद्ध॑नू॒नंयद्वा॑य॒ज्ञेयद्वा॑पृथि॒व्यामधि॑ । अतो॑नोय॒ज्ञमा॒शुभि॑र्महेमतऽउ॒ग्रऽउ॒ग्रेभि॒राग॑हि ॥ अ॒जि॒रासो॒हर॑यो॒येत॑ऽआ॒शवो॒वाता॑ऽइवप्रस॒क्षिण॑ः । येभि॒रप॑त्यं॒मनु॑षःप॒रीय॑से॒येभि॒र्विश्वं॒स्व॑र्दृ॒शे ॥ ए॒ताव॑तस्तऽईमह॒ऽइंद्र॑सु॒म्नस्य॒गोम॑तः । यथा॒प्रावो॑मघव॒न्मेध्या॑तिथिं॒यथा॒नीपा॑तिथिं॒धने॑ ॥ यथा॒कण्वे॑मघव॒न्त्रसद॑स्यवि॒यथा॑प॒क्थेदश॑व्रजे । यथा॒गोश॑र्ये॒ऽअस॑नोर्ऋ॒जिश्व॒नींद्र॒गोम॒द्धिर॑ण्यवत् ॥ १५ ॥ (२) प्रसु॒श्रु॒तंसु॒राध॑स॒मर्चा॑श॒क्रम॒भिष्ट॑ये । यःसु॑न्व॒तेस्तु॑व॒तेकाम्यं॒वसु॑स॒हस्रे॑णेव॒मंह॑ते ॥ श॒तानी॑काहे॒तयो॑ऽअस्यदु॒ष्टरा॒ऽइंद्र॑स्यस॒मिषो॑म॒हीः । गि॒रिर्न॑भु॒ज्माम॒घव॑त्सुपिन्वते॒यदीँसु॒ताऽअमँदिषुः ॥ यदीँसु॒तास॒ऽइंद॑वो॒भिप्रि॒यमम॑ँदिषुः । आपो॒नधा॑यि॒सव॑नंम॒ऽआव॑सो॒दुघा॑ऽइ॒वोप॑दा॒शुषे॑ ॥ अ॒ने॒हसं॑वो॒हव॑मानमू॒तये॒मध्वः॑क्षरं॑तिधी॒तय॑ः । आत्वा॑वसो॒हव॑माना॒सऽइंद॑व॒ऽउप॑स्तो॒त्रेषु॑दधिरे ॥ आन॒ःसोमे॑स्वध्व॒रऽईय॒ानोऽअत्यो॒नतो॑शते । यंते॑स्वदाव॒न्त्स्वद॑ंतिगू॒र्तयः॑पौ॒रेछँदय॑से॒हवँ ॥ १६ ॥ प्रवी॒रमु॒ग्रंविवि॑चिंधन॒स्पृतं॒विभू॑तिं॒राध॑सोम॒हः । उ॒द्रीव॑वज्रिन्नव॒तोव॑सुत्व॒नासदा॑पीपेथदा॒शुषे॑ ॥ यद्ध॑नू॒नंप॑रा॒वति॒यद्वा॑पृथि॒व्यांदि॒वि । यु॒जा॒नऽइंद्र॒हरि॑भिर्महेमतऽऋ॒ष्वऽऋ॒ष्वेभि॒राग॑हि ॥ र॒थि॒रासो॒हर॑यो॒येते॑ऽअ॒स्रिध॒ऽओजो॒वात॑स्य॒पिप्र॑ति । येभि॒र्निद॑स्युं॒मनु॑षोनि॒घोष॑यो॒येभिः॒स्वः॑प॒रीय॑से ॥ ए॒ताव॑तस्तेवसोवि॒द्याम॑शूर॒नव्य॑सः । यथा॒प्राव॒ऽएत॑शं॒कृत्व्ये॒धने॒यथा॒वशं॒दश॑व्रजे ॥

---

(२) प्रसुश्रुतमितिदशर्चस्यसूक्तस्यपुष्टिगुरिंद्रःअयुजोबृहत्यःयुजःसतोबृहत्यः ।

यथा॒कण्वे॑मघव॒न्मेधे॑ऽअध्व॒रेदी॒र्घनी॑थे॒दमू॑नसि । यथा॒गोश॑र्ये॒ऽअसि॑षासोऽअद्रिवो॒मयि॑गो॒त्रंह॑रि॒श्रियं॑ ॥ १७ ॥ (३)
यथा॒मनौ॒सांव॑रणौ॒सोमं॑मिं॒द्रापि॑बःसु॒तं । नीपा॑तिथौमघव॒न्मेध्या॑तिथौ॒पुष्टि॑गौ॒श्रुष्टि॑गौ॒सचा॑ ॥ पा॒र्ष॒द्वा॒णःप्रस्क॑ण्वं॒सम॑
सादय॒च्छया॑नं॒जिव्रि॒मुद्धि॑तं । स॒हस्रा॑ण्यसिषास॒द्गवा॒मृषि॒स्त्वोतो॒दस्य॑वे॒वृकः॑ ॥ यऽउ॒क्थेभि॒र्नवि॒ंध॑तेचि॒किद्यऽऋ॑षि॒चो
द॑नः । इं॒द्रंतमच्छा॑वद॒नव्य॑स्याम॒त्यवि॑ष्यंतं॒नभोज॑से ॥ यस्मा॑ऽअ॒र्कंस॒प्तशी॑र्षाणमानृ॒चुस्त्रि॒धातु॑मुत्त॒मेप॒दे । सत्वि॑१॒मा
विश्वा॒भुव॑नानिचिक्रद॒दादिज्ज॑निष्ट॒पौंस्यं॑ ॥ योनो॑दा॒तावसू॑ना॒मिंद्रं॒तंहू॑महेव॒यं । वि॒द्माह्य॑स्यसुम॒तिंनवी॑यसींग॒मेम॒गोम॑ति
व्र॒जे ॥ १८ ॥ यस्मै॒त्वंव॑सोदा॒नाय॒शिक्ष॑सि॒सरा॒यस्पोष॑मश्नुते । तंत्वा॑व॒यंम॑घवन्निंद्रगिर्वणःसु॒ताव॑ंतोहवामहे ॥ कु॒दा
च॒नस्त॒रीर॑सि॒नेंद्र॑सश्चसिदा॒शुषे॑ । उपो॒पेन्नुम॑घव॒न्भूय॒ऽइन्नुते॒दानं॑दे॒वस्य॑पृच्यते ॥ प्रयो॒न॑न॒क्षेऽअ॒भ्योज॑सा॒क्रिविं॑व॒धैः
शुष्णं॑निघो॒षयं॑न् । य॒देदस्तं॑भीत्प्र॒थयं॑न्न॒मूंदि॒वमादिज्ज॑निष्ट॒पार्थि॑वः ॥ यस्या॒यंविश्व॒ऽआर्यो॒दासः॑शेवधि॒पाऽअ॒रिः ।
ति॒रश्चि॒द॒र्ये॑रुश॑मे॒पवी॑रवि॒तुभ्येत्सोऽअ॑ज्यते॒र॒यिः ॥ तु॒र॒ण्यवो॒मधु॑मंतंघृत॒श्चुतं॒विप्रा॑सोऽअ॒र्कमा॑नृचुः । अ॒स्मेर॒यिःप॑प्रथे॒
वृष्ण्यं॒शवो॒स्मेसु॑वा॒नास॒ऽइंद॑वः ॥ १९ ॥ (४) यथा॒मनौ॒विव॑स्वति॒सोमं॑श॒क्रापि॑बःसु॒तं । यथा॑त्रि॒तेछंद॑ऽइंद्र॒जुजो॑

---

(३) यथामनावितिदशर्चस्यसूक्तस्यश्रुष्टिगुरिंद्रोऽयुजोबृहत्यःयुजःसतोबृहत्यः । (४) यथामनावितिदशर्चस्यसूक्तस्यायुरिंद्रोऽयुजो बृहत्यःयुजःसतोबृहत्यः ।

षस्यायौमादयसेसचा ॥ पृषध्रेमेध्येमातरिश्वनींद्रंसुवानेऽअमंदथाः । यथासोमंदशशिप्रेदशोण्येस्यूमरश्मावृजूनसि ॥
यऽउक्थाकेवलादधेयःसोमंधृषितापिबत् । यस्मैविष्णुस्त्रीणिपदाविचक्रमऽउपमित्रस्यधर्मभिः ॥ यस्यत्वमिंद्रस्तोमे
षुचाकनोवाजेवाजिञ्छतक्रतो । तंत्वावयंसुदुघामिवगोदुहोजुहूमसिश्रवस्यवः ॥ योनोदातासनःपितामहाँऽउग्रऽई
शानकृत् । अयामन्नुग्रोमघवापुरूवसुर्गोरश्वस्यप्रदातुनः ॥ २० ॥ यस्मैत्वंवसोदानायमंहसेसरायस्पोषमिन्वति ।
वसूयवोवसुपतिंशतक्रतुंस्तोमैरिंद्रंहवामहे ॥ कदाचनप्रयुच्छस्युभेनिपासिजन्मनी । तुरीयादित्यहवनंतऽइंद्रियमात
स्थावमृतंदिवि ॥ यस्मैत्वंमघवन्निंद्रगिर्वणःशिक्षोशिक्षसिदाशुषे । अस्माकंगिरऽउतसुष्टुतिंवसोकण्ववच्छृणुधीहवं ॥
अस्ताविमन्मपूर्व्यंब्रह्मेंद्रायवोचत । पूर्वीरृतस्यबृहतीरनूषतस्तोतुर्मेधाऽअसृक्षत ॥ समिंद्रोरायोबृहतीरधूनुतसंक्षो
णीसमुसूर्यं । संशुक्रासःशुचयःसंगवाशिरःसोमाऽइंद्रममंदिषुः ॥ २१ ॥ (५) उपमंत्वामघोनांज्येष्ठंचवृषभाणां ।
पूर्भित्तमंमघवन्निंद्रगोविदमीशानंरायऽईमहे ॥ यऽआयुंकुत्समतिथिग्वमर्दयोवावृधानोदिवेदिवे । तंत्वावयंहर्यश्वं
शतक्रतुंवाजयंतोहवामहे ॥ आनोविश्वेषांरसंमध्वःसिंचंत्वद्रयः । येपरावतिसुन्विरेजनेष्वायेऽअर्वावतींदवः ॥ वि
श्वाद्वेषांसिजहिचावचाकृधिविश्वेसन्वंत्वावसु । शीष्टेषुचित्तेमदिरासोऽअंशवोयत्रासोमस्यतृंपसि ॥ २२ ॥ इंद्रने

---

(५) उपमंत्वेत्यष्टर्चस्यसूक्तस्यमेध्यइंद्रः अयुजोबृहत्यो युजःसतोबृहत्यः ।

दींयऽएदिंहिमितमैंधाभिरूतिभिंः । आशंतमशंतंमाभिरभिष्टिंभिरास्वांपेस्वापिभिंः ॥ आजितुरंसत्पतिंविश्वचंर्षणिं
कृधिप्रजास्वाभंगं । प्रसूतिंराशचींभिर्येंतंऽउक्थिनःक्रतुंपुनतऽआंनुषक् ॥ यस्तेसाधिष्ठोवंसेतेस्यांमभरेंषुते । वयंहो
त्रांभिरुतदेवहूंतिभिःससवांसोंमनामहे ॥ अहंहितेंहरिवोब्रह्मंवाजयुराजिंयामिसदोतिभिंः । त्वामिदेवतमसेसमं
श्वयुर्गव्युरग्रेंमथीनां ॥ २३ ॥ (६) एतत्तंऽइंद्रवीर्यंगीर्भिर्गृणंतिंकारवंः । तेस्तोभंतऽऊर्जंमावन्घृतश्चुतंपौरासोंन
क्षन्धीतिभिंः ॥ नक्षंतऽइंद्रमवंसेसुकृत्ययायेषांसुतेषुमंदंसे । यथांसंवर्तेंऽअमंदोयथांकृशऽएवास्मेऽइंद्रमत्स्व ॥ आ
नोविश्वैंसजोषंसोदेवांसोगंतनोपंनः । वसंवोरुद्राऽअवंसेनऽआगंमन्छृण्वंतुंमरुतोहवं ॥ पूषाविष्णुर्हवंनंमेसरंस्वत्यवं
तुसप्तसिंधंवः । आपोवातःपर्वतासोवनस्पतिंःशृणोतुंपृथिवीहवं ॥ २४ ॥ यदिंद्रराधोऽअस्तिंतेमाघोंनंमघवत्तम ।
तेनंनोबोधिसधमाद्योंवृधेभगोंदानायंवृत्रहन् ॥ आजिंपतेनृपतेत्वमिद्धिनोवाजऽआवंक्षिसुक्रतो । वीतीहोत्रांभिरुतदे
ववींतिभिःससवांसोविशृंण्विरे ॥ संतिह्यं१र्यऽआशिषऽइंद्रऽआयुर्जनांनां । अस्मान्नंक्षस्वमघवन्नुपावंसेधुक्षस्वंपिप्यु
षीमिषं ॥ वयंतंऽइंद्रस्तोमेंभिर्विधेमत्वमस्माकंंशतक्रतो । माहिंस्थूरंशंशयंराधोऽअह्रंयंप्रस्कंण्वायनितोंशय ॥ २५ ॥

---

(६) एतत्तइत्यष्टर्चस्यसूक्तस्यमातरिश्वानइंद्रस्तृतीयाचतुर्थ्योर्विश्वेदेवाः अयुजोबृहत्योयुजःसतोबृहत्यः ।

(७) भूरीदिंद्रस्यवीर्यं१व्यख्यंमभ्यायंति । राधस्तेदस्यवेवृक ॥ शतंश्वेतासऽउक्षणोदिवितारोनरोचंते । मह्नादि
वंनतंस्तभुः ॥ शतंवेणून्छतंशुनःशतंचर्माणिम्लातानि । शतंमेबल्बजस्तुकाऽअरुषीणांचतुःशतं ॥ सुदेवाःस्थका
ण्वायनावयोवयोविचरंतः । अश्वासोनचंक्रमत ॥ आदित्साप्तस्यचर्किरन्नानूनस्यमहिश्रवः । श्यावीरतिध्वसन्पथ
श्चक्षुषाचनसंनशे ॥ २६ ॥ (८) प्रतितेदस्यवेवृकराधोऽअदर्श्यह्वयं । द्यौर्नप्रथिनाशवः ॥ दशमह्यंपौतक्रतःसह
स्रादस्यवेवृकः । नित्याद्रायोऽअमंहत ॥ शतंमेगर्दभानांशतमूर्णावतीनां । शतंदासाँऽअतिस्रजः ॥ तत्रोऽअपिप्रा
णीयतपूतक्रतायैव्यक्ता । अश्वानामिन्नयूथ्यां* ॥ अचैत्यग्निश्चिकितुर्हव्यवाट्ससुमद्रथः । अग्निःशुक्रेणशोचिषाबृह
त्सूरोऽअरोचतदिविसूर्योऽअरोचत ॥ २७ ॥ (९) युवंदेवाक्रतुनापूर्व्येणयुक्तारथेनतविषंयजत्रा । आगच्छतं
नासत्याशचीभिरिदंतृतीयंसवनंपिबाथः ॥ युवांदेवास्त्रयऽएकादशासःसत्याःसत्यस्यददृशेपुरस्तात् । अस्माकंयज्ञंस
वनंजुषाणापातंसोममश्विनादीद्यग्नी ॥ पनाय्यंतदश्विनाकृतंवांवृषभोदिवोरजसःपृथिव्याः । सहस्रंशंसाऽउतयेगवि
ष्टौसर्वाँऽइत्ताँऽउपयातापिबध्यै ॥ अयंवांभागोनिहितोयजत्रेमागिरोनासत्योपयातं । पिबतंसोमंमधुमंतमस्मेप्रदा

---

(७) भूरीदितिपंचर्चस्यसूक्तस्यकृशइंद्रोगायत्रीतृतीयापंचम्यावनुष्टुभौ । (८) प्रतितइतिपंचर्चस्यसूक्तस्यपृषध्रइंद्रोंत्यायाअग्नि
सूर्यौगायत्रीअंत्यापंक्तिः । (९) युवंदेवेतिचतुर्ऋचस्यसूक्तस्यमेध्योश्विनौत्रिष्टुप् ।

श्वांसमवतंशचीभिः ॥ २८ ॥ (१०) यमृत्विजोबहुधाकल्पयंतःसचेतसोयज्ञमिमंवहंति । योऽअनूचानोब्राह्मणो
युक्तऽआसीत्कास्वित्तत्रयजमानस्यसंवित् ॥ एकऽएवाग्निर्बहुधासमिद्धऽएकःसूर्योविश्वमनुप्रभूतः । एकैवोषाःसर्व
मिदंविभात्येकंवाऽइदंविबभूवसर्वं ॥ ज्योतिष्मंतंकेतुमंतंत्रिचक्रंसुखंरथंसुषदंभूरिवारं । चित्रामघायस्ययोगेधिजज्ञे
तंवांहुवेऽअतिरिक्तंपिबध्यै ॥ २९ ॥ (११) इमानिवांभागधेयानिसिस्रतऽइंद्रावरुणाप्रमहेसुतेषुवां । यज्ञेयज्ञेहस
वनाभुरण्यथोयत्सुन्वतेयजमानायशिक्षथः ॥ निःषिध्वरीरोषधीरापऽआस्तामिंद्रावरुणामहिमानमाशत । यासिस्र
तूरजसःपारेऽअध्वनोययोःशत्रुर्नकिरादेवऽओहते ॥ सत्यंतदिंद्रावरुणाकृशस्यवांमध्वऽऊर्मिंदुहतेसप्तवाणीः । ता
भिर्दाश्वांसमवतंशुभस्पतीयोवामदब्धोऽअभिपातिचित्तिभिः ॥ घृतप्रुषःसौम्याजीरदानवःसप्तस्वसारःसदनऽऋत
स्य । याहंवामिंद्रावरुणाघृतश्चुतस्ताभिर्धत्तंयजमानायशिक्षतं ॥ ३० ॥ अवोचाममहतेसौभगायसत्यंत्वेषाभ्यांमहि
मानमिंद्रियं । अस्मान्त्स्विंद्रावरुणाघृतश्चुतस्त्रिभिःसाप्तेभिरवतंशुभस्पती ॥ इंद्रावरुणायदृषिभ्योमनीषांवाचोमतिं
श्रुतमदत्तमग्रे । यानिस्थानान्यसृजंतधीरायज्ञंतन्वानास्तपसाभ्यपश्यं ॥ इंद्रावरुणासौमनसमदृप्तंरायस्पोषंयजमा

---

(१०) यमृत्विजइतितृचस्यसूक्तस्यमेध्योश्विनौत्रिष्टुप् (आद्यायाऋत्विजोदेवतावा)। (११) इमानिवामितिसप्तर्चस्यसूक्तस्यसुपर्णइंद्रावरुणौजगती ।

॥२९॥ नेषुधत्तं । प्रजापुष्टिंभूतिमस्मासुंधत्तंदीर्घायुत्वायप्रतिरतंनऽआयुः ॥ ३१ ॥ इतिवालखिल्यानि ॥) (८।७।१)
अग्नऽआयाह्यग्निभिर्होतारंत्वावृणीमहे । आत्वामनक्तुप्रयताहविष्मतीयजिष्ठंबर्हिरासदे ॥ अच्छाहित्वासहसःसूनो
ऽअंगिरःस्रुचश्चरंत्यध्वरे । ऊर्जोनपातंघृतकेशमीमहेग्निंयज्ञेषुपूर्व्यं+ ॥ अग्नेकविर्वेधाऽअसिहोतापावकयक्ष्यः । मं
द्रोयजिष्ठोऽअध्वरेष्वीड्योविप्रेभिःशुक्रमन्मभिः ॥ अद्रोघमावहोशतोयविष्ठ्यदेवाँऽअजस्रवीतये । अभिप्रयाँसिसु
धितावसोगहिमंदस्वधीतिभिर्हितः+ ॥ त्वमित्सप्रथाऽअस्यग्नेत्रातर्ऋतस्कविः । त्वांविप्रासःसमिधानदीदिवऽआवि
वासंतिवेधसः ॥ ३२ ॥ शोचाशोचिष्ठदीदिहिविशेमयोरास्वस्तोत्रेमहाँऽअसि । देवानांशर्मन्ममसंतुसूरयःशत्रूषाहः
स्वग्नयः ॥ यथाचिद्वृद्धमतसमग्नेसंजूर्वसिक्षमि । एवादहमित्रमहोयोऽअस्मध्रुग्दुर्मन्माकश्चवेनति ॥ मानोमर्तायरि
पवेरक्षस्विनेमाघशंसायरीरधः । अस्रेधद्भिस्तरणिभिर्यविष्ठ्यशिवेभिःपाहिपायुभिः ॥ पाहिनोऽअग्नऽएकयापाह्यु१
तद्वितीयया । पाहिगीर्भिस्तिसृभिरूर्जांपतेपाहिचतसृभिर्वसो ॥ पाहिविश्वस्माद्रक्षसोऽअराव्णःप्रस्मवाजेषुनोव ।
त्वामिद्धिनेदिष्ठंदेवतातयऽआपिंनक्षामहेवृधे+ ॥ ३३ ॥ आनोऽअग्नेवयोवृधंरयिंपावकशंस्यं । रास्वाचनऽउपमा ॥२९॥
तेपुरुस्पृहंसुनीतीस्वयशस्तरं ॥ येनवंसामपृतनासुशर्धतस्तरंतोऽअर्यऽआदिशः । सत्वंनोवर्धप्रयसाशचीवसोजिन्वा

सप्तमेनुवाकेदशसूक्तानि (८।७।१) अग्नआयाहीतिविंशत्यृचस्यसूक्तस्यप्रागाथोभर्गोग्निर्युजोबृहत्यो युजःसतोबृहत्यः ।

धियो॑वसु॒वि॑दः ॥ शिशा॑नोवृष॒भोय॑था॒ग्निःशृंगे॒द॑विध्वत् । ति॒ग्माऽअ॑स्य॒हन॑वो॒नप्र॑ति॒धृषे॑सु॒जंभ॒ःसह॑सोय॒हुः+ ॥ न॒हि
तेऽअ॑ग्नेवृषभप्रति॒धृषे॒जंभा॑सो॒यद्वि॒तिष्ठ॑से । सत्वंनो॑होत॒ःसुहु॒तंह॒विष्कृ॑धि॒वंस्वा॑नो॒वार्या॑पु॒रु+ ॥ शेषे॒वनेषु॑मा॒त्रोःसंत्वा॒
मर्ता॑सइंधते । अत॑न्द्रोह॒व्यावह॑सिहवि॒ष्कृत॒ऽआदिद्दे॒वेषु॑राजसि ॥ ३४ ॥ स॒प्तहोता॑र॒स्तमिदी॑ळते॒त्वाग्ने॑सु॒त्यज॒मह्र॑यं ।
भि॒नत्स्यद्रिं॑तप॑सा॒विशो॒चिषा॒प्राग्ने॑तिष्ठ॒जना॒ँऽअ॑ति ॥ अ॒ग्निम॑ग्निंवो॒ऽअध्रि॑गुंहुवेम॑वृ॒क्तब॑र्हिषः । अ॒ग्निंहि॒तप्र॑यसःशश्व॒ती
ष्वाहोता॑रंचर्षणी॒नां ॥ केते॑न॒शर्म॑न्त्सचतेसु॒षाम॒ण्यग्ने॒तुभ्यं॑चिकि॒त्वना॑ । इ॒ष॒ण्यया॑नःपुरु॒रूप॒माभ॑र॒वाज॒ंनेदि॑ष्ठमू॒तये॑ ॥
अग्ने॒जरि॑तर्वि॒श्पति॑स्तेपा॒नोदे॑वर॒क्षसः॑ । अप्रो॑षिवान्गृ॒हप॑तिर्म॒हाँऽअ॑सिदि॒वस्पा॒युर्दु॑रोण॒युः+ ॥ मानो॒रक्ष॒ऽआवे॑शीदा
घृणीवसो॒माया॒तुर्या॑तु॒माव॑तां । प॒रो॒ग॒व्यू॒त्यनि॑रा॒मप॒क्षु॒ध॒मग्ने॒सेध॑रक्ष॒स्विनः॑ ॥ ३५ ॥ (८।७।२) उ॒भयं॑शृ॒णव॑च्चन॒ऽइं
द्रोऽअ॒र्वागि॒दंवचः॑ । स॒त्राच्या॑म॒घवा॒सोम॑पीतये॒धि॒याशवि॑ष्ठ॒ऽआग॑मत् ॥ तंहिस्व॒राजं॑वृष॒भंतमोज॑से॒धि॒षणे॑निष्टत॒क्ष
तुः॑ । उ॒तोप॒मानां॑प्रथ॒मोनिषी॑दसि॒सोम॑कामं॒हिते॒मनः॑ ॥ आवृ॑षस्वपुरूवसोसुतस्ये॒न्द्रान्ध॑सः । वि॒द्माहित्वा॑हरिवःपृ॒त्सुसा॑
स॒हिम॒धृष्टं॑चिद्धृ॒ष्वणिं॑ ॥ अप्रा॑मिसत्यमघव॒न्तथेद॑स॒दिंद्र॒क्रत्वा॒यथा॒वशः॑ । स॒नेम॒वाज॒ंतव॑शिप्रि॒न्नव॑सा॒मक्षू॑चि॒द्यंतो॑ऽ
अद्रिवः ॥ श॒ग्ध्यू॒३॒षुश॑चीपत॒ऽइंद्र॒विश्वा॑भिरू॒तिभिः॑ । भग॒ंनहित्वा॑य॒शसं॑वसु॒विद॒मनु॑शूर॒चरा॑मसि ॥ ३६ ॥ पौ॒रोऽ

(८।७।२) उभयमित्यष्टादशर्चस्यसूक्तस्यभर्ग [illegible] युजःसतोबृहत्यः ।

अश्वस्यपुरुकृद्गवामस्युत्सोदेवहिरण्ययः । नकिर्हिदानंपरिमर्धिषत्वेयद्यद्यामितदाभर ॥ त्वंह्येहिचेरवेविदाभगंवसु
त्तये । उद्वावृषस्वमघवन्गविष्टयऽउदिंद्राश्वमिष्टये ॥ त्वंपुरूसहस्राणिशतानिचयूथादानायमंहसे । आपुरंदरंचकृ
मविप्रंवचसऽइंद्रंगायंतोवसे ॥ अविप्रोवायदविधद्विप्रोवेंद्रतेवचः । सप्रममंदत्त्वायाशतक्रतोप्राचामन्योऽअहंसन ॥
॥३०॥ उग्रबाहुर्म्रक्षकृत्वापुरंदरोयदिमेशृणवद्धवं । वसूयवोवसुपतिंशतक्रतुंस्तोमैरिंद्रंहवामहे ॥ ३७ ॥ नपापासोमनामहे
नारायासोनजल्हवः । यदिन्न्विंद्रंवृषणंसचासुतेसखायंकृणवामहै ॥ उग्रंयुयुज्मपृतनासुसासहिमृणकातिमदाभ्यं ।
वेदाभृमंचित्सनितारथीतमोवाजिनंयमिदूनशत् ॥ यतऽइंद्रभयामहेततोनोऽअभयंकृधि । मघवन्छग्धितवतन्नऽ
ऊतिभिर्विद्विषोविमृधोजहि ॥ त्वंहिराधस्पतेराधसोमहःक्षयस्यासिविधतः । तंत्वावयंमघवन्निंद्रगिर्वणःसुतावंतोह
वामहे ॥ इंद्रःस्पळुतवृत्रहापरस्पानोवरेण्यः । सनोरक्षिषच्चरमंसमध्यमंसपश्चात्पातुनःपुरः+ ॥ ३८ ॥ त्वंनःपश्चा
दधरादुत्तरात्पुरऽइंद्रनिपाहिविश्वतः । आरेऽअस्मत्कृणुहिदैव्यंभयमारेहेतीरदेवीः ॥ अद्याद्याश्वश्वऽइंद्रत्रास्वपरे
चनः । विश्वाचनोजरितृन्त्सत्पतेऽअहादिवानक्तंचरक्षिषः ॥ प्रभंगीशूरोमघवातुवीमघःसंमिश्लोवीर्यायकं । उभाते
बाहूवृषणाशतक्रतोनियावज्रंमिमिक्षतुः ॥ ३९ ॥ (८।७।३) प्रोऽअस्माऽउपस्तुतिंभरतायज्जुजोषति । उक्थैरिंद्रं ॥३०॥

(८।७।३) प्रोअस्माइतिद्वादशर्चस्यसूक्तस्यप्रगाथइंद्रःपंक्तिःसप्तम्याद्यास्तिस्रोबृहत्यः ।

स्य॒माहिं॑न॒ंवयो॑वर्ध॑ति॒सो॒मिनो॑भ॒द्राऽइंद्र॑स्यरा॒तयः॑ ॥ अ॒यु॒जोऽअस॑मो॒नृभि॒रेक॑ःकृ॒ष्टीर॒यास्य॑ः । पू॒र्वीरति॒प्रवा॑वृधे॒विश्वा॑
जा॒तान्योज॑साभ॒द्रा० ॥ अहि॑तेनचि॒दर्व॑ताजी॒रदा॑नुःसिषासति । प्र॒वाच्य॑मिंद्र॒तत्तव॑वी॒र्या॑णिकरि॒ष्यतो॑भ॒द्रा० ॥
आया॑हिकृ॒णवा॑मत॒ऽइंद्र॒ब्रह्मा॑णि॒वर्ध॑ना । येभि॑ःशविष्ठचा॒कनो॑भ॒द्रमि॒हश्र॑वस्य॒तेभ॒द्रा० ॥ धृ॒ष॒ताश्चि॑द्धृ॒षन्मन॑ःकृ॒णोषी॑
द्र॒यत्त्वं॑ । ती॒व्रैःसोमै॑ःसपर्य॒तोनमो॑भिःप्रति॒भूष॑तोभ॒द्रा० ॥ अव॑चष्ट॒ऽऋची॑षमोव॒ताँऽइ॑व॒मानु॑षः । जु॒ष्ट्वीदक्ष॑स्यसो॒मि
न॒ःसखा॑यंकृणु॒तेयुजं॑भ॒द्रा० ॥ ४० ॥ विश्वे॑तऽइंद्रवी॒र्यं॑दे॒वाऽअनु॒क्रतुं॑ददुः । भुवो॒विश्व॑स्य॒गोप॑तिःपुरुष्टुतभ॒द्रा० ॥
गृ॒णेतादिं॑द्र॒ते॒शव॑ऽउप॒मंदे॒वता॑तये । यद्धंसि॑वृ॒त्रमोज॑साशचीपतेभ॒द्रा० ॥ सम॑नेववपुष्य॒तःकृ॒णव॒न्मानु॑षायु॒गा । वि॒दे
तादि॑ंद्र॒श्चेत॑न॒मध॑श्रु॒तोभ॒द्रा० ॥ उज्जा॒तमिं॑द्रते॒शव॒ऽउत्त्वामुत्तव॒क्रतुं॑ । भूरिं॑गो॒भूरिं॑वावृधु॒र्मघ॑वन्तव॒शर्म॑णिभ॒द्रा० ॥
अ॒हंच॒त्वंच॑वृत्रह॒न्त्संयु॑ज्यावस॒निभ्य॒ऽआ । अ॒रा॒ती॒वाचि॑दद्रि॒वोनु॑नौशूरमंसतेभ॒द्रा० ॥ स॒त्यमि॒द्वाऽउ॒तंव॒यमिंद्रं॑स्तवा
म॒नानृ॑तं । म॒हाँऽअसु॑न्वतोव॒धोभूरि॒ज्योतीं॑षिसुन्व॒तोभ॒द्रा० ॥ ४१ ॥ (८।७४) सपू॒र्व्यो॑म॒हाना॑ंवे॒नःक्रतु॑भिरान
जे । यस्य॒द्वारा॒मनु॑ष्पि॒तादे॒वेषु॒धिय॑ऽआन॒जे+ ॥ दि॒वोमान॒ंनोत्सद॒न्त्सोम॑पृष्ठासो॒ऽअद्र॑यः । उ॒क्थाब्रह्म॑च॒शंस्या॑ ॥
सवि॒द्वाँऽअंगिं॑रोभ्य॒ऽइंद्रो॒गाऽअं॑वृ॒णोदप॑ । स्तु॒षेतद॑स्य॒पौंस्य॑ं ॥ सप्र॒त्नथा॑कविवृ॒धऽइंद्रो॑वा॒कस्य॑व॒क्षणिः॑ । शि॒वोऽअ॒र्क

(८।७४) सपूर्व्यइतिद्वादशर्चस्यसूक्तस्यक [illegible] र्थीपंचमीसप्तम्योनुष्टुभःअंत्यात्रिष्टुप् ।

स्यहोमंन्यसत्रागंत्ववंसे ॥ आदूनुतेऽअनुक्रतुंस्वाहावरंस्ययज्यंवः । श्वात्रमर्काऽअंनूषतेंद्रंगोत्रस्यंदावनें ॥ इंद्रेविश्वांनिवीर्याकृतानिकर्त्वानिच । यमर्काऽअंध्वरंविदुः+ ॥ ४२ ॥ यत्पांचंजन्ययाविशेंद्रेघोषाऽअसृंक्षत । अस्तृंणाद्बर्हणाविपो३र्योमानंस्यसक्षयंः ॥ इयमुंतेऽअनुंष्टुतिश्चकृषेतानिपौंस्यां । प्रावंश्चक्रस्यंवर्तनिं+ ॥ अस्यवृष्णोव्योदंनऽउरुक्रमिष्टजीवसें । यवंनपश्वऽआदंदे ॥ तद्दधांनाऽअवस्यवोयुष्माभिर्दक्षंपितरः । स्याममरुत्वंतोवृधे+ ॥ बळृत्वियांयधाम्नऽऋक्वंभिःशूरनोनुमः । जेषांमेंद्रत्वयांयुजा+ ॥ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरंहूतौसजोषाः । यःशंसंतेस्तुवतेधायिपज्रऽइंद्रंज्येष्ठाऽअस्माँऽअंवंतुदेवाः+ ॥ ४३ ॥ (८।७।५) उत्त्वामंदंतुस्तोमाःकृणुष्वराधोऽअद्रिवः । अवब्रह्मद्विषोजहि ॥ पदापणीँऽरंराधसोनिबांधस्वमहाँऽअंसि । नहित्वाकश्चनप्रतिं ॥ त्वमीशिषेसुतानामिंद्रत्वमसुंतानां । त्वंराजाजनानां ॥ एहिप्रेहिक्षयोदिव्या३घोषन्चर्षणीनां । ओभेपृणासिरोदंसी ॥ त्यंचित्पर्वतंगिरिंशतवंतंसहस्रिणं । विस्तोतृभ्योरुरोजिथ ॥ वयमुत्वादिवासुतेवयंनक्तंहवामहे । अस्माकंकाममापृंण ॥ ४४ ॥ क्व१स्यवृषभोयुवातुविग्रीवोऽअनानतः । ब्रह्माकस्तंसंपर्यति ॥ कस्यंस्वित्सवंनंवृषाजुजुष्वाँऽअवंगच्छति । इंद्रंकऽउंस्विदाचंके ॥ कंतेंदानाऽअंसक्षतवृत्रंहन्कंसुवीर्या । उक्थेकऽउंस्विदंतमः ॥ अयंतेमानुंषेजनेसोमंःपूरुषुंसूयते । तस्येहिप्रद्रवापि

(८।७।५) उत्त्वामंदंत्वितिद्वादशर्चस्यसूक्तस्यप्रगाथइंद्रोगायत्री ।

वं ॥ अयंतेशर्यणावतिसुषोमायामधिप्रियः । आर्जीकीयेमदिन्तमः ॥ तमद्यराधसेमहेचारुंमदायघृष्वये । एहीमिंद्रद्रवापिब ॥ ४५ ॥ (८।७।६) यदिंद्रप्रागपागुदङ्न्यग्वाहूयसेनृभिः । आयाहितूयमाशुभिः ॥ यद्वाप्रस्रवणेदिवोमादयासेस्वर्णरे । यद्वासमुद्रेऽअंधसः ॥ आत्वागीर्भिर्महामुरुंहुवेगामिवभोजसे । इंद्रसोमस्यपीतये ॥ आतंऽइंद्रमहिमानंहरयोदेवतेमहः । रथेवहंतुबिभ्रतः ॥ इंद्रंगृणीषऽउस्तुषेमहाँऽउग्रऽईशानकृत् । एहिनःसुतंपिब ॥ सुतावंतस्त्वावयंप्रयस्वंतोहवामहे । इदंनोबर्हिरासदे ॥ ४६ ॥ यच्चिद्धिशश्वतामसींद्रसाधारणस्त्वम् । तंत्वावयंहवामहे ॥ इदंतेसोम्यंमध्वधुक्षन्नद्रिभिर्नरः । जुषाणऽइंद्रतत्पिब ॥ विश्वाँऽअर्योविपश्चितोतिख्यस्तूयमागहि । अस्मेधेहिश्रवोबृहत्+ ॥ दातामेपृषतीनाँराजाहिरण्यवीनां । मादेवामघवारिषत् ॥ सहस्रेपृषतीनामधिश्चंद्रंबृहत्पृथु । शुक्रंहिरण्यमाददे ॥ नपातोदुर्गहस्यमेसहस्रेणसुराधसः । श्रवोदेवेष्वक्रत ॥ ४७ ॥ (८।७।७) तरोभिर्वोविदद्वसुमिंद्रंसबाधऽऊतये । बृहद्गायंतःसुतसोमेऽअध्वरेहुवेभरंनकारिणं ॥ नयंदुध्रावरंतेनस्थिरामुरोमदेसुशिप्रमंधसः । यऽआदृत्याशशमानायसुन्वतेदाताजरित्रऽउक्थ्यं* ॥ यःशक्रोमृक्षोऽअश्व्योयोवाकीजोहिरण्ययः । सऽऊर्वस्यरेज

(८।७।६) यदिंद्रेतिद्वादशर्चस्यसूक्तस्यप्रगाथइंद्रोगायत्री । (८।७।७)तरोभिरितिपंचदशर्चस्यसूक्तस्यप्रागाथःकलिरिंद्रः प्रथमादित्रयोदश्यंताअयुजोबृहत्यःद्वितीयादियुजःसतोबृहत्यःअंत्यानुष्टुप् ।

ऋक्सं. यत्यपांवृतिमिंद्रोगव्यंस्यवृत्रहा+ ॥ निखातंचिद्यःपुरुसंभृतंवसूदिदृपतिदाशुषे । वज्रीसुशिप्रोहर्यश्वऽइत्करदिंद्रःक्र मंडलं ८
त्वायथावशत् ॥ यद्वावंथपुरुष्टुतपुराचिच्छूरनृणां । वयंतत्तऽइंद्रसंभरामसियज्ञमुक्थंतुरंवचः ॥ ४८ ॥ सचासोमे
अ.६अ.४ षुपुरुहूतवज्रिवोमदायद्युक्षसोमपाः । त्वमिद्धिब्रह्मकृतेकाम्यंवसुदेष्ठःसुन्वतेभुवः ॥ वयमेनमिदाह्योपीपेमेहवज्रिणं । अनु. ७
॥२२॥ तस्माऽउअद्यसमनासुतंभरानूनंभूषतश्रुते+ ॥ वृकश्चिदस्यवारणऽउरामथिरावयुनेषुभूषति । सेमंनःस्तोमंजुजुषाणऽ
आगहींद्रप्रचित्रयाधिया+ ॥ कदूनव१स्याकृतमिंद्रस्यास्तिपौंस्यं । केनोनुकंश्रोमतेननशुश्रुवेजनुषःपरिवृत्रहा+ ॥
कदूमहीरधृष्टाऽअस्यतविषीःकदुवृत्रघ्नोऽअस्तृतं । इंद्रोविश्वान्बेकनाटाँऽअहर्दृशऽउतक्रत्वापणीँऽरभि+ ॥ ४९ ॥
वयंघातेऽअपूर्व्येंद्रब्रह्माणिवृत्रहन् । पुरूतमासःपुरुहूतवज्रिवोभृतिंनप्रभरामसि ॥ पूर्वीश्चिद्धित्वेतुविकूर्मिन्नाशसोह
वंतऽइंद्रोतयः । तिरश्चिदर्यःसवनावसोगहिशविष्ठश्रुधिमेहवं ॥ वयंघातेत्वेऽइद्धिंद्रविप्राऽअपिष्मसि । नहित्वद
न्यःपुरुहूतकश्चनमघवन्नस्तिमर्डिता+ ॥ त्वंनोऽअस्याऽअमतेरुतक्षुधो३भिशस्तेरवस्पृधि । त्वंनऽऊतीतवचित्रयाधि
याशिक्षाशचिष्ठगातुवित्+ ॥ सोमऽइद्वःसुतोऽअस्तुकलयोमाबिभीतन । अपेदेषध्वस्मायतिस्वयंघैषोऽअपायति ॥२२॥
॥ ५० ॥ (८।७।८) त्यान्नुक्षत्रियाँऽअवऽआदित्यान्याचिषामहे । सुमृळीकाँऽअभिष्टये ॥ मित्रोनोऽअत्यंहतिंवरु

(८।७।८)त्यान्नित्येकविंशत्यृ.सू.सांमदोमत्स्यआ[illegible]तिसृणामदितिर्गायत्री(मैत्रावरुणिर्मान्योबहवोवामत्स्याजालनद्धाऋष.)।

णःपर्षदर्यमा । आदित्यासोयथाविदुः ॥ तेषांहिचित्रमुक्थ्यं१वरूथमस्तिदाशुषे । आदित्यानामरंकृते ॥ महिवो
महतामवोवरुणमित्रार्यमन् । अवांस्यावृणीमहे ॥ जीवान्नोऽअभिधेतनादित्यासःपुराहथात् । कद्धस्थहवनश्रुतः
॥ ५१ ॥ यद्वःश्रांतायसुन्वतेवरूथमस्तियच्छर्दिः । तेनानोऽअधिवोचत ॥ अस्तिदेवाऽअंहोरुर्वस्तिरत्नमनागसः ।
आदित्याऽअद्भुतैनसः ॥ मानःसेतुःसिषेदयंमहेवृणक्तुनस्परि । इंद्रऽइद्धिश्रुतोवशी ॥ मानोमृचारिपूणांवृजिना
नामविष्यवः । देवाऽअभिप्रमृक्षत ॥ उतत्वामदितेमह्यहंदेव्युपब्रुवे । सुमृळीकामभिष्टये ॥ ५२ ॥ पर्षिदीनेगभीर
ऽआँऽउग्रपुत्रेजिघांसतः । माकिस्तोकस्यनोरिषत् ॥ अनेहोनऽउरुव्रजऽउरूचिविप्रसर्तवे । कृधितोकायजीवसे ॥
येमूर्धानःक्षितीनामदब्धासःस्वयशसः । व्रतारक्षंतेऽअद्रुहः ॥ तेनऽआस्नोवृकाणामादित्यासोमुमोचत । स्तेनंबद्ध
मिवादिते ॥ अपोषुणऽइयंशरुरादित्याऽअपदुर्मतिः । अस्मदेत्वजघ्नुषी ॥ ५३ ॥ शश्वद्धिवःसुदानवऽआदित्याऽ
ऊतिभिर्वयं । पुरानूनंबुभुज्महे ॥ शश्वंतंहिप्रचेतसःप्रतियंतंचिदेनसः । देवाःकृणुथजीवसे ॥ तत्सुनोनव्यंसन्यसऽ
आदित्यायन्मुमोचति । बंधाद्बद्धमिवादिते ॥ नास्माकमस्तितत्तरऽआदित्यासोऽअतिष्कदे । यूयमस्मभ्यंमृळत ॥
मानोहेतिर्विवस्वतऽआदित्याःकृत्रिमाशरुः । पुरानुजरसोवधीत् ॥ विषुद्वेषोव्यंहुतिमादित्यासोविसंहितं । विष्व
ग्विवृहतारपः ॥ ५४ ॥ ॥ इतिषष्ठाष्टकेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ॥ ॥

चतुश्चत्वारिंशाध्यायेवर्गाः ५४ सूक्तानि १९ ऋचः १८८ ॥ त्यागः ॥ इंद्राये. २० पृथुश्रवस. ४ वायव. ४ इंद्राये. ३ वायव. इंद्राये. आदित्येभ्य. १३ आदित्योषोभ्य. ५ सोमाये. १५ अग्नय. २० इंद्राये. ४१ देवेभ्य. इंद्राये. ३९ आदित्येभ्य. ९ अदित्या. ३ आदित्येभ्य. ९ ॥ इतिषष्ठेचतुर्थः ॥

आत्वैकोनाप्रियमेधआदावनुष्टुम्मुखास्तृचाश्चत्वारोंत्याःषळृक्षाश्वमेधयोर्दानस्तुतिःप्रप्रव्यूनानुष्टुभंद्विबृहत्यंतं द्वितीयोष्णिक्चतुर्थ्याद्यास्तिस्रोगायत्र्यःषोळश्येकादश्यौपंक्तीअपाद्वैश्वदेवोर्धर्चस्त्रयोवारुणायोराजापंचोना पुरुहुन्माबार्हतंत्रिप्रगाथाद्युष्णिगनुष्टुप्पुरउष्णिगंतंत्वंनःसुदीतिपुरुमीह्लौतयोर्वान्यतरआग्नेयंतुत्रिप्रगाथांतंह विर्व्यूनाहर्यतःप्रागाथोंहविषांस्तुतिर्वोदीराथांगोपवनआत्रेयःसप्तवध्रिर्वाश्विनंविशोविशोवःपंचोनाग्नेयंत्वनुष्टुम्मुखास्तृचाश्चत्वारोंत्यास्तिस्रोनुष्टुभआर्क्षस्यश्रुतर्वणोदानस्तुतिर्युक्ष्वाहिषोळशविरूपइमंनुद्वादशकुरुसुतिःकाण्वोजज्ञानएकादशप्रगाथांतंपुरोळाशंदशबृहत्यंतमयंकृत्नुर्नवकृत्नुर्भार्गवःसौम्यमंत्यानुष्टुम्नह्यन्यंदशैकद्यूनौध सोगायत्रंत्यादैवीत्रिष्टुबातूनोनवकुसीदीकाण्वः ॥ ५ ॥

॥ हरिःओम् ॥ (८।७।९) आत्वा॒रथं॒यथो॒तये॑सु॒म्नाय॑वर्तयामसि । तु॒वि॒कू॒र्मिमृ॑ती॒षह॒मिंद्र॒शवि॑ष्ठ॒सत्प॑ते ॥ तु

(८।७।९)आत्वेत्येकोनविंशत्यृचस्यसूक्तस्यांगिरसःप्रियमेधइंद्रश्चतुर्दश्यादिषण्णामृक्षाश्वमेधौगायत्रीआद्याचतुर्थीसप्तमीदशम्योनुष्टुभः ।

विंशुष्मतुविंक्रतोशचींवोविश्वंयामते । आपंप्राथमहित्वना+ ॥ यस्यंतेमहिनामहःपरिंज्मायंतंमीयतुः । हस्तावज्रंहि
रण्ययं ॥ विश्वानंरस्यवस्पतिमनांनतस्यशवंसः । एवैश्चचर्षणीनामूतीहुंवेरथानाम् ॥ अभिष्टंयेसदावृंधंस्वंर्मीह्ळेषुयंन
रंः । नानाहवंतऽऊतयें ॥ १ ॥ परोमांत्रमृचींषमामिंद्रंमुग्रंसुराधंसं । ईशांनंचिद्वसूंनां ॥ तंतमिद्राधंसेमहऽइंद्रंचो
दामिपीतयें । यःपूर्व्यामनुंष्टुतिमीशेंकृष्टीनांनृतुः+ ॥ नयस्यंतेशवसानसख्यमानंशमर्त्यंः । नकिःशवांसितेनशत् ॥
त्वोतांसस्त्वायुजाप्सुसूर्येंमहद्धनं । जयेंमपृत्सुवंज्रिवः ॥ तंत्वांयज्ञेभिरीमहेतंगीर्भिर्गिर्वणस्तम । इंद्रयथांचिदाविंथ
वाजेंषुपुरुमाय्यं ॥ २ ॥ यस्यंतेस्वादुसख्यंस्वाद्वीप्रणींतिरद्रिवः । यज्ञोविंतंतसाय्यंः ॥ उरुणंस्तन्वे३तनंऽउरुक्षयांयन
स्कृधि । उरुणोयंधिजीवसें ॥ उरुंनृभ्यंऽउरुंगवंऽउरुंरथांयपंथां । देववींतिंमनामहे ॥ उपंमाषड्द्वाद्वानरःसोमंस्यह
र्ष्यां । तिष्ठंतिस्वादुरातयंः ॥ ऋज्राविंद्रोतऽआदंदेहरीऽऋक्षंस्यसूनवि । आश्वमेधस्यरोहिंता ॥ ३ ॥ सुरथाँऽआ
तिथिग्वेस्वंभीशूँरार्क्षें । आश्वमेधेसुपेशंसः ॥ षळश्वाँऽआतिथिग्वऽइंद्रोतेवधूमंतः । सचांपूतक्रतौसनं ॥ ऐषुंचेतद्वृ
षंण्वत्यंतर्ऋज्रेष्वरुंषी । स्वभीशुःकशांवती ॥ नयुष्मेवांजबंधवोनिनित्सुश्चनमर्त्यंः । अवद्यमधिंदीधरत् ॥ ४ ॥
(८।७।१०) प्रप्रंवस्त्रिष्टुभमिषंमंदद्वींरायेंदंवे । धियावोंमेधसांतयेपुरंध्याविंवासति ॥ नदंवऽओदंतीनांनदंयो

(८।७।१०) प्रप्रवइत्यष्टादशर्चस्यसूक्तस्यप्रियमेधइंद्रःअपादिंद्रइत्यस्यविश्वेदेववरुणादेवताःसुदेवइत्यस्यवरुणोनुष्टुप्द्वितीयोष्णिक्

Digitization by eGangotri Funding MHRD Delhi

युवतीनां । पातिंवोऽअघ्न्यानांधेनूनामिषुध्यसि ॥ ताऽअस्यसूददोहसःसोमंश्रीणंतिपृश्नयः । जन्मन्देवानांविशस्त्रिष्वारोचनेदिवः ॥ अभिप्रगोपतिंगिरेंद्रमर्चयथाविदे । सूनुंसत्यस्यसत्पतिं ॥ आहरयःससृज्रिरेरुषीरधिवर्हिषि । यत्राभिसंनवामहे ॥ ५ ॥ इंद्रायगावऽआशिरंदुदुह्रेवज्रिणेमधु । यत्सीमुपह्वरेविदत्+ ॥ उद्यद्ब्रध्नस्यविष्टपंगृहमिंद्रश्वगन्वहि । मध्वःपीत्वासचेवहित्रिःसप्तसख्युःपदे+ ॥ अर्चंतप्रार्चंतप्रियमेधासोऽअर्चंत । अर्चंतुपुत्रकाऽउतपुरंनधृष्णवर्चत ॥ अवस्वरातिगर्गरोगोधापरिसनिष्वणत् । पिंगापरिचनिष्कददिंद्रायब्रह्मोद्यतं ॥ आयत्पतंत्येन्यःसुदुघाऽअनपस्फुरः । अपस्फुरंगृभायतसोममिंद्रायपातवे ॥ ६ ॥ अपादिंद्रोऽअपादग्निर्विश्वेदेवाऽअमत्सत । वरुणऽइदिहक्षयत्तमापोऽअभ्यनूषतवत्संसंशिश्वरीरिव ॥ सुदेवोऽअसिवरुणयस्यतेसप्तसिंधवः । अनुक्षरंतिकाकुदंसूर्म्यंसुषिरामिव ॥ योव्यतीँऽरफाणयत्सुयुक्ताँऽउपदाशुषे । तक्वोनेतातदिद्वपुरुपमायोऽअमुच्यत ॥ अतीदुशक्रऽओहतऽइंद्रोविश्वाऽअतिद्विषः । भिनत्कनीनऽओदनंपच्यमानंपरोगिरा+ ॥ अर्भकोनकुमारकोधितिष्ठन्नवंरथं । सपक्षन्महिषंमृगंपित्रेमात्रेविभुक्रतुं ॥ आतूसुशिप्रदंपतेरथंतिष्ठाहिरण्ययं । अधद्युक्षंसचेवहिसहस्रपादमरुषंस्वस्तिगामनेहसं ॥ तंघेमित्थानमस्विनऽउपस्वराजमासते । अर्थंचिदस्यसुधितंयदेतवऽआवर्तयंतिदावने ॥ अनुप्रत्नस्यौकसःप्रि

चतुर्थ्याद्यास्तिस्रोगायत्र्यःएकादशीषोळश्यौपंक्तीअंत्येद्वेबृहत्यौ ।

यमेधासऽएषां । पूर्वामनुप्रयतिंवृक्तबर्हिषोहितप्रयसऽआशत ॥ ७ ॥ (८।८।१) योराजाचर्षणीनांयातारथेभिरध्रिगुः । विश्वासांतरुतापृतनानांज्येष्ठोयोवृत्रहागृणे ॥ इंद्रंतंशुंभपुरुहन्मन्नवसेयस्यद्विताविधर्तरि । हस्तायवज्रःप्रतिधायिदर्शतोमहोदिवेनसूर्यः ॥ नकिष्टंकर्मणानशद्यश्चकारसदावृधं । इंद्रंनयज्ञैर्विश्वगूर्तमृभ्वसमधृष्टंधृष्णवोजसं ॥ अषाह्ळमुग्रंपृतनासुसासहिंयस्मिन्महीरुरुज्रयः । संधेनवोजायमानेऽअनोनवुर्द्यावःक्षामोऽअनोनवुः ॥ यद्द्यावऽइंद्रतेशतंशतंभूमीरुतस्युः । नत्वावज्रिन्त्सहस्रंसूर्याऽअनुनजातमष्टरोदसी ॥ ८ ॥ आपप्राथमहिनावृष्ण्यावृषन्विश्वाशविष्ठशवसा । अस्माँऽअवमघवन्गोमतिव्रजेवज्रिन्चित्राभिरूतिभिः ॥ नसीमदेवऽआपदिषंदीर्घायोमर्त्यः । एतग्वाचिद्यऽएतशायुयोजतेहरीऽइंद्रोयुयोजते ॥ तंवोमहोमहाय्यमिंद्रंदानायसक्षणिं । योगाधेषुयऽआरणेषुहव्योवाजेष्वस्तिहव्यः ॥ उदूषुणोवसोमहेमृशस्वशूरराधसे । उदूषुमह्यैमघवन्मघत्तयऽउदिंद्रश्रवसेमहे ॥ त्वंनऽइंद्रऽऋतयुस्त्वानिदोनितृंपसि । मध्यैवसिष्वतुविनृम्णोर्वोर्निदासंशिश्नथोहथैः ॥ ९ ॥ अन्यव्रतममानुषमयज्वानमदेवयुं । अवस्वःसखादुधुवीतपर्वतःसुघ्नायदस्युंपर्वतः ॥ त्वंनऽइंद्रासांहस्तेशविष्ठदावने । धानानांनसंगृभायास्मयुर्द्विःसंगृभाया

अष्टमेनुवाकेएकादशसूक्तानि (८।८।१) योराजेतिपंचदशर्चस्यसूक्तस्यांगिरसःपुरुहन्मेंद्रोबृहती द्वितीयाचतुर्थीषष्ठ्यःसतोबृहत्यः त्रयोदश्युष्णिक् चतुर्दश्यनुष्टुबंत्यापुरउष्णिक् ।

स्यु॒ः+ ॥ सखा॑य॒ःक्रतु॑मिच्छतक॒थारा॑धामश॒रस्य॑ । उप॑स्तुतिंभो॒जःसू॒रिर्योऽअह्र॑यः ॥ भूरि॑भिःसमह॒ऽऋषि॑भिर्ब॒र्हि
ष्मं॑द्भिःस्तविष्यसे । यदि॒त्थमेकं॑मेक॒मिच्छ॒र्वत्सान्पं॑रा॒दद॑ः ॥ क॒र्ण॒गृह्या॑म॒घवा॑शौरदे॒व्यो॑व॒त्सं॑नस्त्रि॒भ्यऽआन॑यत् । अ॒जां
सू॒रिर्नधात॑वे ॥ १० ॥ (८।८।२) त्वंनो॑ऽअग्ने॒महो॑भिःपा॒हिविश्व॑स्या॒ऽअरा॑तेः । उ॒तद्वि॒षोमर्त्य॑स्य ॥ न॒हिम॒न्युः
पौरु॑षेय॒ऽईशे॒हिवः॑प्रियजात । त्वमिद॑सि॒क्षपा॑वान् ॥ सनो॒विश्वे॑भिर्दे॒वेभि॒रूर्जो॑नपा॒द्भद्र॑शोचे । र॒यिंदे॑हिवि॒श्ववा॑रं ॥
नतमं॑ग्ने॒ऽअरा॑तयो॒मर्त॑युवंतरा॒यः । यंत्राय॑सेदा॒श्वांस॑ ॥ यंत्वंवि॑प्रमे॒धसा॑ता॒वग्ने॑हि॒नोषि॒धना॑य । सतवो॒तीगोषु॒गंता॑
॥ ११ ॥ त्वंर॒यिंपु॑रु॒वीर॒मग्ने॑दा॒शुषे॒मर्ता॑य । प्रणो॑नय॒वस्यो॒ऽअच्छ॑ ॥ उ॒रु॒ष्याणो॒मापरा॑दाऽअघाय॒तेजा॑तवेदः । दु॒रा
ध्ये॒३॒मर्ता॑य ॥ अग्ने॒माकि॑ष्टेदे॒वस्य॑रा॒तिमदे॑वोयुयोत । त्वमी॑शिषे॒वसू॑नां ॥ सनो॒वस्व॒ऽउप॑मा॒स्यूर्जो॑नपा॒न्माहि॑नस्य ।
सखे॑वसोजरि॒तृभ्य॑ः ॥ अच्छा॑नःशी॒रशो॑चिषं॒गिरो॑यंतुदर्श॒तम् । अच्छा॑य॒ज्ञासो॒नम॑सापुरू॒वसुं॑पुरुप्रश॒स्तमू॒तये॑ ॥ १२ ॥
अ॒ग्निंसू॒नुंसह॑सोजा॒तवे॑दसंदा॒नाय॒वार्या॑णां । द्वि॒तायोभू॑द॒मृतो॒मर्त्ये॒ष्वाहोता॒मंद्रत॑मोवि॒शि+ ॥ अ॒ग्निंवो॑देवय॒ज्यया॒
ग्निंप्र॑य॒त्य॑ध्व॒रे । अ॒ग्निंधी॒षुप्र॑थ॒मम॒ग्निमर्व॑त्य॒ग्निंक्षैत्रा॑य॒साध॑से ॥ अ॒ग्निरि॒षांस॒ख्येद॑दातु॒नऽईशे॒योवार्या॑णां । अ॒ग्निंतो॒के

(८।८।२) त्वंनोअग्नइतिपंचदशर्चस्यसूक्तस्यसुदीतिपुरुमीह्ळावाग्निर्गायत्री दशमीद्वादशीचतुर्दश्योबृहत्यः एकादशीत्रयोदशीपंचदश्यःसतोबृहत्यः । (अत्रसुदीतिपुरुमीह्ळयोरन्यतरोवाऋषिः) ।

तन॑ये॒शश्व॑दीमहे॒वसुं॒संतं॑तनू॒पां+ ॥ अ॒ग्निमी॑ळि॒ष्वाव॑से॒गाथा॑भिःशी॒रशो॑चिषं । अ॒ग्निंरा॒येपु॑रुमीळ्हश्रु॒तंनरो॒ग्निंसु॑दी॒तये॑
च्छ॒र्दिः+ ॥ अ॒ग्निंद्वेषो॒योत॒वैनो॑गृणीमस्य॒ग्निंशंयो॒श्च॒दात॑वे । विश्वा॑सुवि॒क्ष्व॑वि॒ते॒वह॒व्यो॒भुव॒द्वस्तु॑र्ऋ॒षू॒णां+ ॥ १३ ॥
(८।८।३) ह॒विष्कृ॑णुध्व॒माग॑मदध्व॒र्युर्व॑नते॒पुनः॑ । वि॒द्वाँऽअ॑स्यप्र॒शास॑नं ॥ नि॒ति॒ग्मम॒भ्यं॑१॒शुंसी॑द॒द्धोता॑म॒नावधि॑ ।
जु॒षा॒णोऽअ॑स्यस॒ख्यं+ ॥ अं॒तरि॑च्छंति॒तंजने॑रु॒द्रंप॒रोम॑नी॒षया॑ । गृ॒भ्णंति॑जि॒ह्वया॑स॒सं+ ॥ जा॒म्यंतीत॒पे॒धनु॒र्व॑यो॒धाऽअं
रु॒ह॒द्वनं॑ । दृ॒षदं॑जि॒ह्वया॒व॑धीत् ॥ चर॑न्व॒त्सोरु॒शन्नि॒हनि॑दा॒तारं॒ना॑विंदते । वेति॒स्तोत॑वऽअ॒म्ब्यं॑* ॥ १४ ॥ उ॒तोन्व॑स्य॒य
न्म॒हदश्वा॑व॒द्योज॑नंबृ॒हत् । दा॒मार॑थस्य॒दद्द॑शे ॥ दु॒हंति॑स॒प्तैका॒मुप॒द्वापंच॑सृजतः । ती॒र्थेसिं॑धो॒रधि॑स्व॒रे+ ॥ आद॒शभि॑
र्वि॒वस्व॑त॒ऽइंद्र॒ःकोश॑मचुच्यवीत् । खेद॑यात्रि॒वृता॑दि॒वः+ ॥ परि॑त्रि॒धातु॑रध्व॒रंजू॒र्णिरे॑ति॒नवी॑यसी । मध्वा॒होता॑रोऽअं
जते ॥ सिं॒चंति॒नम॑सा॒व॒तमु॒च्चाच॑क्रं॒परि॑ज्मानं । नी॒चीन॑बा॒र॒मक्षि॑तं ॥ १५ ॥ अ॒भ्यार॒मिदद्र॑यो॒निषि॑क्तं॒पुष्क॑रे॒मधु॑ ।
अ॒व॒तस्य॑वि॒सर्ज॑ने ॥ गाव॒ऽउपा॑वताव॒तंम॒हीय॒ज्ञस्य॑र॒प्सुदा॑ । उ॒भाकर्णा॑हिर॒ण्यया॑ ॥ आसु॒तेषिं॑चत॒श्रियं॒रोद॑स्योरभि॒
श्रियं॑ । र॒सादधी॑तवृष॒भं+ ॥ तेजा॑नत॒स्वमो॒क्यं॑१॒संव॒त्सासो॒नमा॒तृभिः॑ । मि॒थोन॑संत॒जा॒मिभिः॑ ॥ उप॒स्रक्वे॑षु॒बप्स॑तः
कृ॒ण्व॒तेध॒रुणं॑दि॒वि । इंद्रे॑ऽअ॒ग्नानम॒ःस्वः॑* ॥ १६ ॥ अधु॑क्षत्पि॒प्युषी॒मिष॒मूर्जं॑स॒प्तप॑दीम॒रिः । सूर्य॑स्यस॒प्तर॒श्मिभिः॑ ॥

(८।८।३) हविरित्यष्टादशर्चस्यसूक्तस्यप्रागाथोहर्यतोग्निर्गायत्री ।

Digitization by eGangotri. Funding MoE-Delhi

सोमस्यमित्रावरुणोदितासूरऽआददे । तदातुंरस्यभेषजं ॥ उतोन्वंस्ययत्पदंहर्यतस्यनिधान्यं । परिद्यांजिह्वयातनत् ॥ १७ ॥ (८।८।४) उदीराथामृतायतेयुंजाथामश्विनारथं । अंतिषद्भूतुवामवंः ॥ निमिषश्चिज्जवीयसारथेना यातमश्विना । अंति० ॥ उपस्तृणीतमत्रंयेहिमेनंघर्ममंश्विना । अंति० ॥ कुहस्थःकुहजग्मथुःकुहश्येनेवपेतथुः । अंति० ॥ यदद्यकर्हिकर्हिचिच्छुश्रूयातमिमंहवं । अंति० ॥ १८ ॥ अश्विनायामहूतमानेदिष्ठंयाम्याप्यं । अंति० ॥ अवंतमत्रंयेगृहंकृणुतंयुवमंश्विना । अंति० ॥ वरेथेऽअग्निमातपोवदंतेवल्गवत्रंये । अंति० ॥ प्रसप्तवंध्रिराशसाधारांमग्नेरशायत । अंति० ॥ इहागंतंवृषण्वसूशृणुतंमंऽइमंहवं । अंति० ॥ १९ ॥ किमिदंवांपुराणवज्जरंतोरिवशस्यते । अंति० ॥ समानंवांसजात्यंसमानोबंधुरश्विना । अंति० ॥ योवांरजांस्यश्विनारथोवियातिरोदंसी । अंति० ॥ आनोगव्येभिरश्व्यैःसहस्रैरुपंगच्छतं । अंति० ॥ मानोगव्येभिरश्व्यैःसहस्रेभिरतिख्यतं । अंति० ॥ अरुणप्सुरुषाऽअंभूदकर्ज्योतिर्ऋतावंरी । अंति० ॥ अश्विनासुविचाकंशद्वृक्षंपरशुमाँऽइव । अंति० ॥ पुरंनधृष्णवारुंजकृष्णयाबाधितोविशा । अंति० ॥ २० ॥ (८।८।५) विशोविंशोवोऽअतिथिंवाजयंतःपुरुप्रियं । अग्निंवोदुर्यंवचःस्तुषेशूष

(८।८।४) उदीराथामित्यष्टादशर्चस्यसूक्तस्यात्रेयोगोपवनोश्विनौगायत्री । (सप्तवध्रिर्वाऋषिः) (८।८।५) विशोविशइतिपंचदशर्चस्यसूक्तस्य गोपवनोग्निरंत्यतिसृणांश्रुतर्वागायत्री आद्याचतुर्थीसप्तमीदशम्यस्त्रयोदश्यादितिस्रश्चानुष्टुभः ।

स्य॒मन्म॑भिः ॥ यंजना॑सोह॒विष्मं॑तोमि॒त्रंनस॒र्पिरा॑सुतिं । प्र॒शंसं॑ति॒प्रश॑स्तिभिः ॥ पन्यां॑संजा॒तवे॑दसं॒योदे॒वता॒त्युद्यं॑ता ।
ह॒व्यान्यैर॑यद्दि॒वि+ ॥ आग॑न्मवृत्र॒हंत॑मं॒ज्येष्ठ॑म॒ग्निमान॑वं । यस्य॑श्रु॒तर्वा॑बृ॒हन्ना॒र्क्षोऽअनी॑क॒ऽएध॑ते ॥ अ॒मृतं॑जा॒तवे॑दसं
ति॒रस्तमां॑सिदर्श॒तं । घृ॒ताह॑वन॒मीड्यं॑ ॥ २१ ॥ स॒बाधो॒यंजना॑ऽइ॒मे॒३॒ग्निंह॒व्येभि॒रीळ॑ते । जुह्वा॑नासोय॒तस्रु॑चः ॥
इ॒यंते॒नव्यं॑सीम॒तिरग्ने॒ऽअधा॑य्य॒स्मदा । मंद्र॒सुजा॑त॒सुक्र॑तो॒मूर॒दस्माति॑थे ॥ सातें॑ऽअग्ने॒शंत॑मा॒चनि॑ष्ठाभवतुप्रि॒या ।
तया॑वर्धस्व॒सुष्टु॑तः ॥ साद्यु॒म्नैर्द्यु॒म्निनी॑बृ॒हदुपो॑प॒श्रव॑सि॒श्रवः॑ । दधी॑तवृत्र॒तूर्ये॑ ॥ अश्व॒मिद्गांर॑थ॒प्रांत्वे॒षमिंद्रं॒नसत्प॑तिं ।
यस्य॒श्रवां॑सि॒तूर्व॑थ॒पन्यं॑पन्यंचकृ॒ष्टयः॑ ॥ २२ ॥ यंत्वा॒गोप॑वनोगि॒राचनि॑ष्ठदग्नेऽअंगिरः । सपा॑वकश्रुधी॒हवं॑ ॥ यंत्वा॒
जना॑स॒ऽईळ॑तेस॒बाधो॒वाज॑सातये । सबो॑धिवृत्र॒तूर्ये॑ ॥ अ॒हंहु॑वा॒नऽआ॒र्क्षेश्रु॒तर्व॑णिमद॒च्युति॑ । शर्धां॑सीवस्तुका॒विनां॑मृ॒
क्षाशी॒र्षाच॑तु॒र्णां+ ॥ मांच॒त्वार॑ऽआ॒शवः॒शवि॑ष्ठस्यद्रवि॒त्नवः॑ । सु॒रथा॑सोऽअ॒भिप्रयो॒वक्ष॒न्वयो॒नतु॒ग्र्यं॑ ॥ स॒त्यमि॒त्त्वाम॑
हेनदि॒परु॒ष्ण्यव॑देदिशं । नेमा॑पोऽअश्व॒दात॑रः॒शवि॑ष्ठादस्ति॒मर्त्यः॑ ॥ २३ ॥ (८।८।६) यु॒क्ष्वाहिदे॑व॒हूत॑माँ॒ऽअश्वाँ॑ऽ
अग्ने॑र॒थीरि॑व । निहोता॑पू॒र्व्यःस॑दः ॥ उ॒तनो॑देवदे॒वाँऽअच्छा॑वोचोवि॒दुष्ट॑रः । श्रद्विश्वा॒वार्या॑कृधि ॥ त्वंह॒यद्य॑विष्ठ्य॒
सह॑सःसूनवाहुत । ऋ॒तावा॑य॒ज्ञियो॒भुवः॑ ॥ अ॒यम॒ग्निःस॑ह॒स्रिणो॒वाज॑स्यश॒तिन॒स्पतिः॑ । मू॒र्धाक॒वीर॑यी॒णां+ ॥ तंने॒मि

(८।८।६) युक्ष्वाहीतिषोळशर्चस्यसूक्तस्यांगिरसोविरूपोऽग्निर्गायत्री ।

मृ॒भवो॑य॒थानं॑मस्व॒सहू॑तिभिः । नेदी॑योय॒ज्ञमं॑गिरः ॥ २४ ॥ तस्मै॑नू॒नम॒भिद्य॑वेवा॒चावि॑रूप॒नित्य॑या । वृष्णे॑चोदस्वसु

ष्टु॒तिं+ ॥ कमु॑ष्विदस्यसेन॑या॒ग्नेरपा॑कचक्षसः । प॒णिंगोषु॑स्तरामहे ॥ मानो॑दे॒वाना॒ंविशः॑प्रस्ना॒तीरि॑वो॒स्राः । कृ॒शंनहा॑

सु॒रघ्न्याः ॥ मानः॑समस्यदू॒ढ्यं१॒ःपरि॑द्वेषसोऽअंहु॒तिः । ऊ॒र्मिर्नना॒व॒मावं॑धीत् ॥ नम॑स्तेऽअग्न॒ऽओज॑सेगृ॒णंति॑देवकृ॒ष्ट

यः । अ॒मैर॒मित्रं॑मर्दय ॥ २५ ॥ कु॒वित्सु॒नोगवि॑ष्टये॒ग्नेसं॒वेषि॑षोर॒यिं । उ॒रु॑कृदु॒रुणं॑स्कृधि ॥ मानो॑ऽअ॒स्मिन्म॑हाध॒नेप

रा॑वग्भा॑र॒भृद्य॑था । सं॒व॒र्गंसं॒र॒यिंज॑य ॥ अ॒न्यम॒स्मद्भि॒याऽइ॒यमग्ने॒सिष॑क्तुदु॒च्छुना॑ । वर्धा॑नो॒ऽअम॑व॒च्छवः॑ ॥ यस्या॒जु॑

षन्न॒मस्वि॒नः॒शमी॒मदु॑र्मखस्यवा । तंघेद॒ग्निर्वृ॒धाव॑ति ॥ पर॑स्या॒ऽअधि॑सं॒वतो॒व॑राँऽअ॒भ्यात॑र । यत्रा॒हमस्मि॒ताँऽअ॑व ॥

वि॒द्माहिते॑पु॒राव॒यमग्ने॑पि॒तुर्यथाव॑सः । अधा॑तेसु॒म्नमी॑महे ॥ २६ ॥ (८।८।७) इ॒मंनु॒मा॒यिनं॑हुव॒ऽइंद्र॒मीशा॑न॒मोज॑

सा । म॒रुत्वं॑तं॒नवृ॒ंजसे॑ ॥ अ॒यमिंद्रो॑म॒रुत्स॑खा॒विवृ॒त्रस्या॑भिन॒च्छिरः॑ । वज्रे॑णश॒तप॑र्वणा ॥ वा॒वृ॒धा॒नोम॒रुत्स॒खेंद्रो॒विवृ॒

त्रमै॑रयत् । सृ॒जन्त्स॑मु॒द्रिया॑ऽअ॒पः+ ॥ अ॒यंह॒येन॒वाऽइ॒दंस्व॑र्म॒रुत्व॑ताजि॒तं । इंद्रे॑ण॒सोम॑पीतये ॥ म॒रुत्वं॑तमृजी॒षिण॒

मोज॑स्वंतंविर॒प्शिनं॑ । इंद्रं॑गी॒र्भिर्ह॑वामहे ॥ इंद्रं॑प्र॒त्नेन॒मन्म॑नाम॒रुत्वं॑तंहवामहे । अ॒स्यसोम॑स्यपी॒तये॑ ॥ २७ ॥ म॒रुत्वाँ॑

ऽइंद्रमीढ्वः॒पिबा॒सोमं॑शतक्रतो । अ॒स्मिन्य॒ज्ञेपु॑रुष्टुत ॥ तुभ्येदि॑ंद्रम॒रुत्व॑तेसु॒ताःसोमा॑सोऽअद्रिवः । हृ॒दाहू॒यंत॒ऽउ॒क्थि

(८।८।७) इमंन्विवतिद्वादशर्चस्यसूक्तस्यकाण्वःकुरुसुतिरिंद्रोगायत्री ।

नः ॥ पिबेदिंद्रमरुत्सखासुतंसोमंदिविष्टिषु । वज्रंशिशानऽओजसा ॥ उत्तिष्ठन्नोजसासहपीत्वीशिप्रेऽअवेपयः । सोममिंद्रचमूसुतं+ ॥ अनुत्वारोदसीऽउभेक्रक्षमाणमकृपेतां । इंद्रयद्दस्युहाभवः ॥ वाचमष्टापदीमहंनवस्रक्तिमृतस्पृशं । इंद्रात्परितन्वंममे ॥ २८ ॥ (८।८।८) जज्ञानोनुशतक्रतुर्विपृच्छदितिमातरं । कऽउग्राःकेहंश्रृण्विरे ॥ आदींशवस्यब्रवीदौर्णवाभमहीशुवम् । तेपुत्रसंतुनिष्टुरः ॥ समित्तान्वृत्रहाखिदत्खेऽअराँऽइवखेदया । प्रवृद्धोदस्युहाभवत् ॥ एकयाप्रतिधापिबत्साकंसरांसित्रिंशतं । इंद्रःसोमस्यकाणुका+ ॥ अभिगंधर्वमतृणदबुध्नेषुरजःस्वा । इंद्रोब्रह्मभ्यऽइद्वृधे+ ॥ २९ ॥ निराविध्यद्गिरिभ्यऽआधारयत्पक्वमोदनं । इंद्रोबुंदंस्वाततं ॥ शतब्रध्नऽइषुस्तवसहस्रपर्णऽएकऽइत् । यमिंद्रचकृषेयुजं ॥ तेनस्तोतृभ्यऽआभरनृभ्योनारिभ्योऽअत्तवे । सद्योजातऽऋभुष्ठिर ॥ एताच्यौत्नानितेकृताविर्षिष्ठानिपरीणसा । हृदावीड्वधारयः ॥ विश्वेत्ताविष्णुराभरदुरुक्रमस्त्वेषितः । शतंमहिषान्क्षीरपाकमोदनंवराहमिंद्रऽएमुषं+ ॥ तुविक्षंतेसुकृतंसूमयंधनुःसाधुर्बुंदोहिरण्ययः । उभातेबाहूरण्यासुसंस्कृतऽऋदूपेचिदृदूवृधा ॥ ३० ॥ (८।८।९) पुरोळाशंनोऽअंधसऽइंद्रसहस्रमाभर । शताचशूरगोनां ॥ आनोभरव्यंजनंगामश्वं

(८।८।८) जज्ञानइत्येकादशर्चस्यसूक्तस्यकुरुसुतिरिंद्रोगायत्रीअंत्येद्वेबृहतीसतोबृहत्यौ । (८।८।९) पुरोळाशमितिदशर्चस्यसूक्तस्यकुरुसुतिरिंद्रोगायत्र्यंत्याबृहती ।

मभ्यंजनं । सचामनाहिरण्यया ॥ उतनःकर्णशोभनापुरूणिधृष्णवाभर । त्वंहिशृण्विषेवसो ॥ नकींवृधीकऽइंद्रते
नसुषानसुदाऽउत । नान्यस्त्वच्छूरवाघतः ॥ नकीमिंद्रोनिकर्तवेनशक्रःपरिशक्तवे । विश्वंशृणोतिपश्यति ॥ ३१ ॥
समन्युंमर्त्यानामदब्धोनिचिकीषते । पुरानिदश्चिकीषते ॥ क्रत्वऽइत्पूर्णमुदरंतुरस्यास्तिविधतः । वृत्रघ्नःसोमपाव्नः ॥
त्वेवसूनिसंगताविश्वाचसोमसौभगा । सुदात्वपरिह्वृता ॥ त्वामिद्यवयुर्ममकामोगव्युर्हिरण्ययुः । त्वामश्वयुरेषते ॥
तवेदिंद्राहमाशसाहस्तेदात्रंचनाददे । दिनस्यवामघवन्त्संभृतस्यवापूर्धियवस्यकाशिना ॥ ३२ ॥ (८।८।१०)
अयंकृत्नुरगृभीतोविश्वजिदुद्भिदित्सोमः । ऋषिर्विप्रःकाव्येन ॥ अभ्यूर्णोतियन्नग्नंभिषक्तिविश्वंयत्तुरं । प्रेमंधःख्य
न्निःश्रोणोभूत् ॥ त्वंसोमतनूकृद्भ्योद्वेषोभ्योन्यकृतेभ्यः । उरुयंतासिवरूथं ॥ त्वंचित्तीतवदक्षैर्दिवऽआपृथिव्याऽ
ऋजीषिन् । यावीरघस्यचिद्द्वेषः ॥ अर्थिनोयंतिचेदर्थंगच्छानिद्ददुषोरातिं । ववृज्युस्तृष्यतःकामं ॥ ३३ ॥ विदद्य
त्पूर्व्यंनष्टमुदीमृतायुमीरयत् । प्रेमायुस्तारीदतीर्णं ॥ सुशेवोनोमृळयाकुरदृप्तक्रतुरवातः । भवानःसोमशंहृदे+ ॥ ॥३८॥
मानःसोमसंवीविजोमाविबीभिषथाराजन् । मानोहार्दित्विषावधीः ॥ अवयत्स्वेसधस्थेदेवानांदुर्मतीरीक्षे । राजन्न

(८।८।१०) अयंकृत्नुरितिनवर्चस्यसूक्तस्यभार्गवःसोमोगायत्र्यंत्यानुष्टुप् ।

प॒द्विषः॑सेध॒मीढ्वो॒ऽअप॒स्निधः॑सेध ॥ ३४ ॥ (८।८।११) न॒ह्यं॑१॒न्यंब॒ळाक॑रंम॒र्डि॒तारँ॑शतक्रतो । त्वंन॑ऽइंद्रमृळय ॥
योन॒ःशश्व॑त्पुरावि॒थामृ॑ध्रो॒वाज॑सातये । सत्वंन॑ऽइंद्रमृळय ॥ किमं॒गर॑ध्र॒चोद॑नःसुन्वा॒नस्या॑वि॒तेद॑सि । कु॒वित्स्विँ॑द्र॒णः
शकः॑ ॥ इंद्र॒प्रण॒ोरथ॑मवप॒श्चाच्चि॒त्संत॑मद्रिवः । पु॒रस्ता॑देनंमेकृधि ॥ हंतो॒नुकिमा॑ससेप्रथ॒मंनो॒रथँ॑कृधि । उप॒मंवा॑ज॒यु
श्रवः॑ ॥ ३५ ॥ अवा॑नोवाज॒युंरथँ॑सु॒करँ॑ते॒किमित्परि॑ । अ॒स्मान्त्सुजि॒ग्युषँ॑स्कृधि ॥ इंद्र॒द्दह्य॑स्व॒पूर॑सिभ॒द्रात॑ऽएतिनि
ष्कृ॒तं । इ॒यंधीर्ऋ॒त्विया॑वती ॥ मासी॑मव॒द्यऽआभा॑गु॒र्वीँकाष्ठा॑हि॒तंधनँ॑ । अ॒पावृ॑क्ताऽअर॒त्नयः॑ ॥ तु॒रीयं॒नाम॑य॒ज्ञियँ॑य॒
दाकर॒स्तदु॑श्मसि । आदि॒त्पति॑र्नऽओहसे ॥ अवी॑वृधद्वो॒ऽअमृ॒ताऽअमँ॑दीदेक॒द्यूर्दे॑वाऽउ॒तयाश्च॑देवीः । तस्मा॑ऽउ॒रा
धः॑कृणुतप्रश॒स्तंप्रा॒तर्म॒क्षूधि॒याव॑सुर्जगम्यात् ॥ ३६ ॥ (८।९।१) आतू॑नऽइंद्रक्षु॒मंतँ॑चि॒त्रंग्रा॒भंसंगृ॑भाय । म॒हा॒ह॒
स्तीदक्षि॑णेन ॥ वि॒द्माहि॒त्वा॑तुविकू॒र्मिँ॑तु॒विदे॑ष्णंतु॒वीम॑घं । तु॒वि॒मा॒त्रमवो॑भिः ॥ न॒हित्वा॑शूरदे॒वानम॒र्ता॑सो॒दित्संतं॑ ।
भी॒मंनगां॑वा॒रयँ॑ते ॥ एतो॒न्विंद्रं॒स्तवा॒मेशा॑नं॒वस्वः॑स्व॒राजँ॑ । नराधं॑सामर्धि॑षन्नः ॥ प्रस्तो॑ष॒दुपं॑गासिष॒च्छ्रव॒त्सामं॑गी॒यमा॑
नं । अ॒भिराध॑साजुगुरत् ॥ ३७ ॥ आनो॑भर॒दक्षि॑णेना॒भिस॒व्येन॒प्रमृ॑श । इंद्र॒मानो॒वसो॒र्निर्भा॑क् ॥ उप॑क्रम॒स्वाभ॑र

(८।८।११) नह्यन्यमितिदशर्चस्यसूक्तस्यनौधसएकद्यूरिंद्रोंत्यायादेवागायत्र्यंत्यात्रिष्टुप् ॥ नवमेनुवाकेत्रयोदशसूक्तानि (८।९।१)
आतूनइतिनवर्चस्यसूक्तस्यकाण्वःकुसीदींद्रोगायत्री ।

Digitization by eGangotri Funding:MoE-Delhi धृष॒ताधृ॑ष्णो॒जना॑नाम् । अदा॑शूष्टरस्य॒वेदः॑ ॥ इंद्र॒यऽउ॒नुते॒ऽअस्ति॒वाजो॒विप्रे॑भिः॒सनि॑त्वः । अ॒स्माभि॒ःसुतंस॑नुहि ॥

स॒द्यो॒जुव॑स्ते॒वाजा॑ऽअ॒स्मभ्यं॑वि॒श्वश्चं॑द्राः । वशै॑श्च॒मक्षू॒जरं॑ते ॥ ३८ ॥ इतिषष्ठाष्टकेपंचमोऽध्यायः ॥ ५ ॥ ॥

॥३९॥ पंचचत्वारिंशाध्यायेवर्गाः ३८ सूक्तानि १४ ऋचः १९५ ॥ त्यागः ॥ इंद्राये. १३ ऋक्षाश्वमेधाभ्या. ६ इंद्राये. १० विश्वेभ्योदेवेभ्य. वरुणाये. इंद्राये. २१ अग्नय. ३३ अश्विभ्या. १८ अग्नय. १२ श्रुतर्वणाये. ३ अग्नय. १६ इंद्राये. ३३ सोमाये. ९ इंद्राये. ९ देवेभ्य. इंद्राये. ९ ॥ इतिषष्ठेपंचमः ॥

आप्रदेवानां॑वैश्वदेवंप्रेष्ठं॑मुशनाकाव्यआग्नेयंमामेकृष्णआश्विनंद्युं॑भाहिपंचविश्वकोवा॑कार्ष्णिर्जागतंद्युम्नीषड्वा
सिष्ठोवा॑द्युम्नीकःप्रियमेधोवाप्रागाथंहं॑तंवोदस्मंनोधा॑बृहदिंद्रायसं॑नृमेधपुरुमेधौ॑व्यनुष्टुब्बृहत्यंतं॑मानोविश्वा
सुषट्कन्यावा॑ःसप्तात्रेय्यपालेतिहासऐंद्रं॑आनुष्टुभंद्विपंक्त्यादिंपां॑तंत्रयस्त्रिंशच्छ्रुं॑तकक्षःसुकक्षोवाद्यानुष्टुबुद्धच
तुस्त्रिंशत्सुकक्षों॑त्यैंद्रार्भवीं॑गौर्धयतिद्वादशबिंदुः॑पूतदक्षोवामारुतं॑मात्वानवतिरश्चीं॑रांगिरसआनुष्टुभं॑मस्सैसैका ॥३९॥
द्युतानोवा॑मारुतस्त्रैष्टुभं॑चतुर्थीं॑विरा॑ळिष्यामितिमारुतःपादः॑पैंद्राबार्हस्पत्या॑याइंद्रपंचोनारेभः॑काश्यपोबार्ह
तमतिजगत्यु॑परिष्टाद्बृहत्यावतिजगतीं॑त्रिष्टुब्जगतीत्यंततः ॥ ६ ॥ ॥ ॥

॥ हरिःओम् ॥ (८।९।२) आप्रद्रवपरावतोर्वावतश्चवृत्रहन् । मध्वःप्रतिप्रभर्मणि ॥ तीव्राःसोमासऽआगहि सुतासोमादयिष्णवः । पिबादधृग्यथोचिषे+ ॥ इषामंदस्वादुतेरंवरायमन्यवे । भुवत्तइंद्रशंहृदे+ ॥ आत्वशत्रवागहिन्यु१क्थानिचहूयसे । उपमेरोचनेदिवः+ ॥ तुभ्यायमद्रिभिःसुतोगोभिःश्रीतोमदायकं । प्रसोमऽइंद्रहूयते ॥ १ ॥ इंद्रश्रुधिसुमेहवमस्मेसुतस्यगोमतः । विपीतिंतृप्तिमश्नुहि ॥ यऽइंद्रचमसेष्वासोमश्चमूषुतेसुतः । पिबेदस्यत्वमीशिषे ॥ योऽअप्सुचंद्रमाऽइवसोमश्चमूषुददृशे । पिबे० ॥ यंतेश्येनःपदाभरत्तिरोरजांस्यस्पृतं । पिबे० ॥ २ ॥ (८।९।३) देवानामिदवोमहत्तदावृणीमहेवयं । वृष्णामस्मभ्यमूतये ॥ तेनःसंतुयुजःसदावरुणोमित्रोऽअर्यमा । वृधासश्चप्रचेतसः ॥ अतिनोविष्पितापुरुनौभिरपोनपर्षथ । यूयमृतस्यरथ्यः ॥ वामंनोऽअस्त्वर्यमन्वामंवरुणशंस्यं । वामंह्यावृणीमहे ॥ वामस्यहिप्रचेतसऽईशानासोरिशादसः । नेमादित्याऽअघस्ययत्+ ॥ ३ ॥ वयमिद्वःसुदानवःक्षियंतोयांतोऽअध्वन्ना । देवावृधायहूमहे ॥ अधिनऽइंद्रैषांविष्णोसजात्यानां । इतामरुतोऽअश्विना ॥ प्रभ्रातृत्वंसुदानवोधद्वितासमान्या । मातुर्गर्भेभरामहे ॥ यूयंहिष्ठासुदानवऽइंद्रज्येष्ठाऽअभिद्यवः । अधाचिद्वऽउतब्रुवे

(८।९।२) आप्रद्रवइतिनवर्चस्यसूक्तस्यकुसीदींद्रोगायत्री । (८।९।३) देवानामितिनवर्चस्यसूक्तस्यकुसीदीविश्वेदेवागायत्री । (भेद पक्षे–विश्वेदवाः ३ अर्यमवरुणौ १ विश्वेदेवाः ५ एवं ९)

Digitization by eGangotri. Funding MDF-Delhi

॥ ४ ॥ (८।९।४) प्रेष्ठंवोऽअतिथिंस्तुषेमित्रमिवप्रियं । अग्निंरथंनवेद्यं ॥ कविमिवप्रचेतसंयंदेवासोऽअधद्विता ।
निमर्त्येष्वादधुः+ ॥ त्वंयविष्ठदाशुषोनॄंःपाहिशृणुधीगिरः । रक्षातोकमुतत्मना ॥ कयातेऽअग्नेऽअंगिरऽऊर्जोनपा
दुपस्तुतिं । वरायदेवमन्यवे ॥ दाशेमकस्यमनसायज्ञस्यसहसोयहो । कदुवोचऽइदंनमः ॥ ५ ॥ अधात्वंहिनस्करो
विश्वाऽअस्मभ्यंसुक्षितीः । वाजद्रविणसोगिरः ॥ कस्यनूनंपरीणसोधियोजिन्वसिदंपते । गोषातायस्यतेगिरः ॥ तं
मर्जयंतसुक्रतुंपुरोयावानमाजिषु । स्वेषुक्षयेषुवाजिनं ॥ क्षेतिक्षेमेभिःसाधुभिर्नकिर्यंघ्नंतिहंतियः । अग्नेसुवीरऽएध
ते ॥ ६ ॥ (८।९।५) आमेहवंनासत्याश्विनागच्छतंयुवं । मध्वःसोमस्यपीतये ॥ इमंमेस्तोममश्विनेमंमेशृणुतंह
वं । मध्वःसो० ॥ अयंवांकृष्णोऽअश्विनाहवतेवाजिनीवसू । मध्वःसो० ॥ शृणुतंजरितुर्हवंकृष्णस्यस्तुवतोनरा । म
ध्वःसो० ॥ छर्दिर्यंतमदाभ्यंविप्रायस्तुवतेनरा । मध्वःसो० ॥ ७ ॥ गच्छतंदाशुषोगृहमित्थास्तुवतोऽअश्विना ।
मध्वःसो०॥ युंजाथांरासभंरथेवीड्वंगेवृषण्वसू । मध्वःसो० ॥ त्रिवंधुरेणत्रिवृतारथेनायातमश्विना । मध्वःसो०॥ नूमे
गिरोनासत्याश्विनाप्रावतंयुवं । मध्वःसो० ॥ ८ ॥ (८।९।६) उभाहिदस्राभिषजामयोभुवोभादक्षस्यवचसोबभूव

(८।९।४) प्रेष्ठंवइतिनवर्चस्यसूक्तस्यकाव्यउशनाअग्निर्गायत्री । (८।९।५) आमेहवमितिनवर्चस्यसूक्तस्यांगिरसःकृष्णोश्विनौगायत्री । (८।९।६) उभाहीतिपंचर्चस्यसूक्तस्यांगिरसःकृष्णोश्विनौजगती । (अत्रकार्ष्णिर्विश्वकऋषिःपाक्षिकः) ।

थुंः । तावांविश्वंकोहवतेतनूकृथेमानोवियौष्टसख्यामुमोचतं ॥ कथानूनंवांविमनाऽउपस्तवद्युवंधियंददथुर्वस्यंऽइष्टये । तावांविश्वंकोहवतेतनूकृथेमानो० ॥ युवंहिष्मापुरुभुजेममेधतुंविष्णाप्वेददथुर्वस्यंऽइष्टये । तावांविश्वंकोहवतेतनूकृथेमानो० ॥ उतत्यंवीरंधनसामृजीषिणंदूरेचित्संतमवसेहवामहे । यस्यस्वादिष्ठासुमतिःपितुर्यथामानो० ॥ ऋतेनदेवःसविताशमायतऽऋतस्यशृंगमुर्वियाविपप्रथे । ऋतंसासाहमहिचित्पृतन्यतोमानो० ॥ ९ ॥ (८।९।७) द्युम्नीवांस्तोमोऽअश्विनाक्रिविर्नसेकऽआगतं । मध्वःसुतस्यसदिविप्रियोनरापातंगौराविवेरिणे ॥ पिबतंघर्मंमधुमंतमश्विनाबर्हिःसीदतंनरा । तामंदसानामनुषोदुरोणऽआनिपातंवेदसावयः ॥ आवांविश्वाभिरूतिभिःप्रियमेधाऽअहूषत । तावर्तिर्यातमुपवृक्तबर्हिषोजुष्टंयज्ञंदिविष्टिषु ॥ पिबतंसोमंमधुमंतमश्विनाबर्हिःसीदतंसुमत् । तावांवृधानाऽउपसुष्टुतिंदिवोगंतंगौराविवेरिणं ॥ आनूनंयातमश्विनाश्वेभिःप्रुषितप्सुभिः । दस्राहिरण्यवर्तनीशुभस्पतीपातंसोममृतावृधा ॥ वयंहिवांहवामहेविपन्यवोविप्रासोवाजसातये । तावल्गूदस्रापुरुदंससाधियाश्विनाश्रुष्ट्यागतं ॥१०॥ (८।९।८) तंवोदस्ममृतीषहंवसोर्मंदानमंधसः । अभिवत्संनस्वसरेषुधेनवऽइंद्रंगीर्भिर्नवामहे ॥ द्युक्षंसुदानुंतवि

(८।९।७) द्युम्नीवामितिषळर्चस्यसूक्तस्यांगिरसःकृष्णोश्विनौअयुजोबृहत्योयुजःसतोबृहत्यः । (अत्रवासिष्ठोद्युम्नीकआंगिरसःप्रियमेधश्चेत्युभावृषीवैकल्पिकौ) । (८।९।८) तंवोदस्ममितिषळर्चस्यसूक्तस्यगौतमोनोधाइंद्रःअयुजोबृहत्योयुजःसतोबृहत्यः ।

Digitization by eGangotri. Funding MLM-Delhi

षीभिरावृतंगिरिंनपुरुभोजसं । क्षुमंतंवाजंशतिनंसहस्रिणंमक्षूगोमंतमीमहे ॥ नत्वाबृहंतोऽअद्रयोवरंतऽइंद्रवीळवः । यद्दित्ससिस्तुवतेमावतेवसुनकिष्टदामिनातिते ॥ योद्धासिक्रत्वाशवसोतदंसनाविश्वाजाताभिमज्मना । आत्वायमर्कऽऊतयेववर्ततियंगोतमाऽअजीजनन् ॥ प्रहिरिरिक्षऽओजसादिवोऽअंतेभ्यस्परि । नत्वाविव्याचरजऽइंद्रपार्थिवमनुस्वधांववक्षिथ ॥ नकिःपरिष्टिर्मघवन्मघस्यतेयद्दाशुषेदशस्यसि । अस्माकंबोध्युचथस्यचोदितामंहिष्ठोवाजसातये ॥ ११ ॥ (८।९।९) बृहदिंद्रायगायतमरुतोवृत्रहंतमं । येनज्योतिरजनयन्नृतावृधोदेवंदेवायजागृवि ॥ अपाधमदभिशस्तीरशस्तिहाथेंद्रोद्युम्न्याभवत् । देवास्तऽइंद्रसख्याययेमिरेबृहद्भानोमरुद्गण ॥ प्रवऽइंद्रायबृहतेमरुतोब्रह्मार्चत । वृत्रंहनतिवृत्रहाशतक्रतुर्वज्रेणशतपर्वणा ॥ अभिप्रभरधृषताधृषन्मनःश्रवश्चित्तेऽअसद्बृहत् । अर्षंत्वापोजवसाविमातरोहनोवृत्रंजयास्वः* ॥ यज्जायथाऽअपूर्व्यमघवन्वृत्रहत्याय । तत्पृथिवीमप्रथयस्तदस्तभ्नाऽउतद्यां+ ॥ तत्तेयज्ञोऽअजायततदर्कऽउतहस्कृतिः । तद्विश्वमभिभूरसियज्जातंयच्चजंत्वं ॥ आमासुपक्वमैरयऽआसूर्यंरोहयोदिवि । घर्मंनसामन्तपतासुवृक्तिभिर्जुष्टंगिर्वणसेबृहत्+ ॥ १२ ॥ (८।९।१०) आनोविश्वासुहव्यऽइंद्रःस

(८।९।९) बृहदिंद्रायेतिसप्तर्चस्यसूक्तस्यांगिरसोनृमेधपुरुमेधाविंद्रोबृहतीद्वितीयाचतुर्थ्यौसतोबृहत्यौपंचमीषष्ठ्यावनुष्टुभौ ।
(८।९।१०) आनोविश्वास्वितिषळर्चस्यसूक्तस्यनृमेधपुरुमेधाविंद्रःअयुजोबृहत्यःयुजःसतोबृहत्यः ।

मत्सुभूषतु । उपब्रह्माणिसवनानिवृत्रहापरमज्याऽऋचीषमः ॥ त्वंदाताप्रथमोराधसामस्यसिसत्यऽईशानकृत् ।
तुविद्युम्नस्ययुज्यावृणीमहेपुत्रस्यशवसोमहः + ॥ ब्रह्मांतऽइंद्रगिर्वणःक्रियंतेऽअनतिद्भुता । इमाजुषस्वहर्यश्वयोजनें
द्रयातेऽअमन्महि ॥ त्वंहिसत्योमघवन्ननानतोवृत्राभूरिन्यृंजसे । सत्वंशविष्ठवज्रहस्तदाशुषेवांचंरयिमाकृधि ॥ त्व
मिंद्रयशाऽअस्यृजीषीशवसस्पते । त्वंवृत्राणिहंस्यप्रतीन्येकऽइदनुत्ताचर्षणीधृता ॥ तमुत्वानूनमसुरप्रचेतसंराधोभा
गमिवेमहे । महीवकृतिःशरणातऽइंद्रप्रतेसुम्नानोऽअश्नवन् ॥ १३ ॥ (८।९।११) कन्या३वारवायतीसोममपिस्रुता
विदत् । अस्तंभरंत्यब्रवीदिंद्रायसुनवैत्वाशक्रायसुनवैत्वा ॥ असौयऽएषिवीरकोगृहंगृहंविचाकशत् । इमंजंभसुतं
पिबधानावंतंकरंभिणमपूपवंतमुक्थिनं ॥ आचनत्वाचिकित्सामोधिचनत्वानेमसि । शनैरिवशनकैरिवेंद्रायेंदोपरि
स्रव ॥ कुविच्छकत्कुवित्करत्कुविन्नोवस्यसस्करत् । कुवित्पतिद्विषोयतीरिंद्रेणसंगमामहै ॥ इमानित्रीणिविष्टपातानीं
द्रविरोहय । शिरस्ततस्योर्वरामादिदंमऽउपोदरे ॥ असौचयानऽउर्वरादिमांतन्वं१मम । अथोततस्ययच्छिरःसर्वाता
रोमशाकृधि ॥ खेरथस्यखेनसःखेयुगस्यशतक्रतो । अपालामिंद्रत्रिष्पूत्व्यकृणोःसूर्यत्वचं ॥ १४ ॥ (८।९।१२) पांत

(८।९।११) कन्यावाइतिसप्तर्चस्यसूक्तस्यात्रेय्यपालेंद्रोनुष्टुबाद्येद्वेपंक्ती । (८।९।१२) पांतमितित्रयस्त्रिंशदृचस्यसूक्तस्यआंगिरसः
श्रुतकक्षइंद्रोगायत्र्याद्यानुष्टुप् (सुकक्षोवाऋषिः)।

मा॒वो॑ऽअंध॑स॒ऽइंद्रं॑म॒भिप्रगा॑यत । वि॒श्वा॒सा॒हं॑श॒तक्र॑तुं॒मंहि॑ष्ठंचर्षणी॒नां ॥ पु॒रु॒हू॒तंपु॑रुष्टु॒तंगा॑था॒न्यं१॒सनं॑श्रुतं । इंद्र॒ऽइ
तिं॑ब्रवीतन ॥ इंद्र॒ऽइन्नो॑म॒हानां॑दा॒तावाजा॑नांनृ॒तुः । म॒हाँऽअ॑भि॒ज्ञ्वाय॑मत् ॥ अपा॑दुशि॒प्रयं॑धस॑ःसु॒दक्ष॑स्यप्रहो॒षिणः॑ ।
इंदो॒रिंद्रो॒यवा॑शिरः ॥ तम्व॒भिप्रार्च॒तेंद्रं॒सोम॑स्यपी॒तये॑ । तदि॒द्ध्य॑स्य॒वर्धनं॑ ॥१५॥ अ॒स्यपी॒त्वामदा॑नांदे॒वोदे॒वस्यौज॑सा । वि
श्वा॒भिभुव॑नाभुवत् ॥ त्यमु॑वः सत्रा॒साहं॒विश्वा॑सुगी॒र्ष्वाय॑तं । आच्या॑वयस्यू॒तये॑ ॥ यु॒ध्मंसंत॑मन॒र्वाणं॑सोम॒पामन॑पच्युतं ।
नर॑मवा॒र्यक्र॑तुं ॥ शिक्षा॑णऽइंद्रर॒ायऽआपु॑रुवि॒द्वाँऽऋ॑चीषम । अवा॑नः॒पार्ये॒धने॑ ॥ अत॑श्चिदिंद्र॒णऽउपाया॑हिश॒तवा॑जया ।
इ॒षास॒हस्र॑वाजया ॥ १६ ॥ अया॑म॒धीव॑तो॒धियो॑र्वद्भिः शक्रगोदरे । जये॑मपृ॒त्सुव॑ज्रिवः ॥ व॒यमु॑त्वाशतक्रतो॒गावो॒नय
व॑से॒ष्वा । उ॒क्थेषु॑रणयामसि ॥ विश्वा॒हिम॑र्त्य॒त्व॒नानु॑का॒माश॑तक्रतो । अग॑न्मवज्रिन्ना॒शसः॑ ॥ त्वेसु॑पुत्रशव॒सोवृ॑त्र
न्काम॑कातयः । नत्वामिं॒द्राति॑रिच्यते ॥ सनो॑वृष॒न्त्सनिं॑ष्ठया॒संघो॒रया॑द्रवि॒त्वा । धि॒यावि॑ड्ढिपुरं॑ध्या ॥ १७ ॥ यस्ते॑
नू॒नंश॑तक्रत॒विंद्र॑द्यु॒म्नित॑मो॒मदः॑ । तेन॑नू॒नंमदे॑मदेः ॥ यस्ते॑चि॒त्रश्र॑वस्तमो॒यऽइंद्रवृ॒त्रहन्त॑मः । यऽओजो॒दात॑मो॒मदः॑ ॥
वि॒द्माहिय॑स्तेऽअद्रिव॒स्त्वाद॑त्तःसत्यसोमपाः । विश्वा॑सुदस्मकृ॒ष्टिषु॑ ॥ इंद्रा॑य॒मद्व॑नेसु॒तंपरि॑ष्टोभंतुनो॒गिरः॑ । अ॒र्कम॑
र्चंतुका॒रवः॑ ॥ यस्मि॒न्विश्वा॒ऽअधि॒श्रियो॒रण॑तिस॒प्तसं॒सदः॑ । इंद्रं॑सु॒तेह॑वामहे ॥ १८ ॥ त्रिक॑द्रुकेषु॒चेत॑नंदे॒वासो॑य॒ज्ञम॑
त्नत । तमिद्व॑र्धंतुनो॒गिरः॑ ॥ आत्वा॑विशं॒त्विंद॑वःसमु॒द्रमि॑व॒सिंध॑वः । नत्वामिं॒द्राति॑रिच्यते ॥ वि॒व्यक्थ॑महि॒नावृ॑ष

न्भक्षंसोमस्यजागृवे । यऽइंद्रजठरेषुते ॥ अरंतऽइंद्रकुक्षयेसोमोभवतुवृत्रहन् । अरंधामभ्यऽइंदवः ॥ अरमश्वाय
गायतिश्रुतकक्षोऽअरंगवे । अरमिंद्रस्यधाम्ने ॥ अरंहिष्मासुतेषुणःसोमेष्विंद्रभूषसि । अरंतेशक्रदावने ॥ १९ ॥
पराकात्तांचिदद्रिवस्त्वांनक्षंतनोगिरः । अरंगमामतेवयं+ ॥ एवाह्यसिवीरयुरेवाशूरऽउतस्थिरः । एवातेराध्यंमनः ॥
एवारातिस्तुवीमघविश्वेभिर्धायिधातृभिः । अधाचिदिंद्रमेसचा ॥ मोषुब्रह्मेवतंद्रयुर्भुवोवाजानांपते । मत्स्वासुत
स्यगोमतः ॥ मानऽइंद्राभ्या३दिशःसूरोऽअक्तुष्वायमन् । त्वायुजावनेमतत्+ ॥ त्वयेदिंद्रयुजावयंप्रतिब्रुवीमहि
स्पृधः । त्वमस्माकंतवस्मसि ॥ त्वामिद्धित्वायवोनुनोनुवतश्चरान् । सखायऽइंद्रकारवः ॥ २० ॥ (८।९।१३)
उद्धेदभिश्रुतामघंवृषभंनर्यापसं । अस्तारमेषिसूर्य ॥ नवयोनवतिंपुरोबिभेदबाह्वोजसा । अहिंचवृत्रहावधीत् ॥
सनऽइंद्रःशिवःसखाश्वावद्गोमद्यवमत् । उरुधारेवदोहते ॥ यदद्यकच्चवृत्रहन्नुदगाऽअभिसूर्य । सर्वंतदिंद्रतेवशे ॥
यद्वाप्रवृद्धसत्पतेनमराऽइतिमन्यसे । उतोतत्सत्यमित्तव ॥ २१ ॥ येसोमासःपरावतियेऽअर्वावतिसुन्विरे । सर्वाँ
स्ताँऽइंद्रगच्छसि ॥ तमिंद्रंवाजयामसिमहेवृत्रायहंतवे । सवृषावृषभोभुवत् ॥ इंद्रःसदामनेकृतऽओजिष्ठःसमदेहि
तः । द्युम्नीश्लोकीससोम्यः+ ॥ गिरावज्रोनसंभृतःसबलोऽअनपच्युतः । ववक्षऽऋष्वोऽअस्तृतः ॥ दुर्गेचिन्नःसुगं

(८।९।१३) उद्धेदभीतिचतुस्त्रिंशदृचस्यसूक्त[illegible]यत्री ।

Digitization by eGangotri. Funding MoE-Delhi

कृ॑धिगृ॒णा॒नऽइं॑द्रगिर्वणः त्वंचं॑मघव॒न्वशः॑ ॥ २२ ॥ यस्य॑ते॒नूचि॑दा॒दिशं॒नमि॒नंति॒स्व॒राज्यं॑ । नदे॒वोनाध्रिं॑गु॒र्जनः॑ ॥
अधा॑ते॒ऽअप्र॑तिष्कुतं॑दे॒वीशुष्मं॑सपर्यतः । उ॒भेसु॑शिप्र॒रोद॑सी ॥ त्वमे॒तद॑धारयःकृ॒ष्णासु॒रोहि॑णीषुच । परु॑ष्णीषु॒रुश॒त्प
र्यः ॥ वियदहे॒रध॑त्वि॒षोविश्वे॑दे॒वासो॒ऽअक्र॑मुः । वि॒दन्मृ॒गस्य॒ताँऽअमः॑ ॥ आदु॑मेनिव॒रोभु॑वद्वृत्र॒हादि॑ष्ट॒पौंस्यं॑ । अजा॑
तशत्रु॒रस्तृ॑तः ॥ २३ ॥ श्रुतंवो॑वृत्र॒हन्त॑मं॒प्रशर्धं॑चर्षणी॒नां । आशुं॑षे॒राध॑सेम॒हे+ ॥ अ॒याधि॒याचं॑गव्य॒यापुरु॑णाम॒न्पुरु॑
ष्टुत । यत्सोमे॑सोम॒ऽआभ॑वः ॥ बो॒धिन्मन॑ना॒ऽइद॑स्तुनोवृत्र॒हाभूर्या॑सुतिः । शृ॒णोतुं॑श॒क्रऽआ॒शिषं॑ ॥ कया॒त्वंन॑ऽऊ॒त्या
भिप्रमं॑दसेवृषन् । कया॑स्तो॒तृभ्य॒ऽआभ॑र ॥ कस्य॒वृषा॑सुतेसचा॑नि॒युत्वा॑न्वृष॒भोर॑णत् । वृ॒त्र॒हासोम॑पीतये ॥ २४ ॥
अ॒भीषु॒णस्त्वंर॒यिंमं॑दसा॒नःसं॑ह॒स्रिणं॑ । प्र॒यं॑तावो॑धिदा॒शुषे॑ ॥ पत्नी॑वंतःसु॒ताऽइ॒मऽउ॒शंतो॑यंतिवी॒तये॑ । अ॒पांजग्मि॑र्नि
चुंपु॒णः+ ॥ इ॒ष्टाहोत्रा॑ऽअसृक्ष॒तेंद्रं॑वृ॒धासो॑ऽअध्व॒रे । अच्छा॑वभृ॒थमोज॑सा ॥ इ॒हत्यास॑ध॒माद्या॒हरी॒हिर॑ण्यकेश्या । वो॒
ह्लाम॒भिप्रयो॑हि॒तं+ ॥ तुभ्यं॒सोमाः॑सु॒ताऽइ॒मेस्ती॒र्णंब॒र्हिर्वि॑भावसो । स्तो॒तृभ्य॒ऽइंद्र॒माव॑ह ॥ २५ ॥ आते॒दक्षं॒विरो॑च॒
नादध॒द्रत्ना॒विदा॒शुषे॑ । स्तो॒तृभ्य॒ऽइंद्रं॑मर्चत ॥ आते॑दधामीं॒द्रियमु॒क्थाविश्वा॑शतक्रतो । स्तो॒तृभ्य॑ऽइंद्रमृळय ॥
भ॒द्रंभ॑द्रंन॒ऽआभ॒रेष॒मूर्जं॑शतक्रतो । यदिं॑द्रमृ॒ळया॑सिनः ॥ सनो॒विश्वा॒न्याभ॑रसुवि॒तानि॑शतक्रतो । यदिं॑द्र०
नः ॥ त्वामि॑द्वृ॒त्रहन्तमसु॒तावं॑तोहवामहे । यदिं॑द्र० ॥ २६ ॥ उप॑नो॒हरि॑भिःसु॒तंया॒हिमं॑दानांपते । उप॑

नोहरिभिःसुतं+ ॥ द्वितायोवृत्रहन्तमोविदऽइंद्रःशतक्रतुः । उप० ॥ त्वंहिवृत्रहन्नेषांपातासोमानामसि । उप० ॥ इंद्रऽइषेदऽदातुनऽऋभुक्षणमृभुंरयिं । वाजीददातुवाजिनं ॥ २७ ॥ (८।१०।१) गौर्धयतिमरुतांश्रवस्युर्मातामघोनां । युक्तावह्नीरथानां ॥ यस्यादेवाऽउपस्थेव्रताविश्वेधारयंते । सूर्यामासादृशेकं+ ॥ तत्सुनोविश्वेऽअर्यऽआसदागृणंतिकारवः । मरुतःसोमपीतये ॥ अस्तिसोमोऽअयंसुतःपिबंत्यस्यमरुतः । उतस्वराजोऽअश्विना ॥ पिबंतिमित्रोऽअर्यमातनापूतस्यवरुणः । त्रिषधस्थस्यजावतः ॥ उतोन्वस्यजोषमाँऽइंद्रःसुतस्यगोमतः । प्रातर्होतेवमत्सति ॥ २८ ॥ कदत्विषंतसूरयस्तिरऽआपऽइवस्रिधः । अर्षंतिपूतदक्षसः ॥ कद्वोऽअद्यमहानांदेवानामवोवृणे । त्मनाचदस्मवर्चसां ॥ आयेविश्वापार्थिवानिपप्रथन्रोचनादिवः । मरुतःसोमपीतये ॥ त्यान्नुपूतदक्षसोदिवोवोमरुतोहुवे । अस्यसोमस्यपीतये ॥ त्यान्नुयेविरोदसीतस्तभुर्मरुतोहुवे । अस्य० ॥ त्यंनुमारुतंगणंगिरिष्ठांवृषणंहुवे । अस्य० ॥ २९ ॥ (८।१०।२) आत्वागिरोरथीरिवास्थुःसुतेषुगिर्वणः । अभित्वासमनूषतेंद्रवत्संनमातरः ॥ आत्वाशुक्राऽअचुच्यवुःसुतासऽइंद्रगिर्वणः । पिबात्व१स्यांधसऽइंद्रविश्वासुतेहितं+ ॥ पिबासोमंमदायकमिंद्रश्येनाभृतंसु

दशमेनुवाकेदशसूक्तानि (८।१०।१) गौर्धयतीतिद्वादशर्चस्यसूक्तस्यांगिरसोबिंदुर्मरुतोगायत्री (पूतदक्षोवाऋषिः) । (८।१०।२) आत्वागिरइतिनवर्चस्यसूक्तस्यांगिरसस्तिरश्चीरिंद्रोनुष्टुप् ।

तं । त्वंहिशश्वंतीनांपतीराजाविशामसि ॥ श्रुधीहवंतिरश्च्याऽइंद्रयस्त्वासपर्यति । सुवीर्यस्यगोमतोरायस्पूर्धिमहाँ
ऽअसि ॥ इंद्रयस्तेनवीयसींगिरंमंद्रामजीजनत् । चिकित्विन्मनसंधियंप्रत्नामृतस्यपिप्युषीं ॥ ३० ॥ तमुष्टवामयं
गिरऽइंद्रमुक्थानिवावृधुः । पुरूण्यस्यपौंस्यासिषासंतोवनामहे ॥ एतोन्विंद्रंस्तवामशुद्धंशुद्धेनसाम्ना । शुद्धैरुक्थै
र्वावृध्वांसंशुद्धऽआशीर्वान्ममत्तु ॥ इंद्रशुद्धोनऽआगहिशुद्धःशुद्धाभिरूतिभिः । शुद्धोरयिंनिधारयशुद्धोममद्धिसो
म्यः+ ॥ इंद्रशुद्धोहिनोरयिंशुद्धोरत्नानिदाशुषे । शुद्धोवृत्राणिजिघ्नसेशुद्धोवाजंसिषाससि ॥ ३१ ॥ (८।१०।३)
अस्माऽउषासऽआतिरंतयाममिंद्रायनक्तमूर्म्याःसुवाचः । अस्माऽआपोमातरःसप्ततस्थुर्नृभ्यस्तरायसिंधवःसुपाराः+॥
अतिविद्धाविथुरेणाचिदस्त्रात्रिःसप्तसानुसंहितागिरीणां । नतद्देवोनमर्त्यस्तुतुर्याद्यानिप्रवृद्धोवृषभश्चकार ॥ इंद्रस्य
वज्रऽआयसोनिमिश्लऽइंद्रस्यबाह्वोर्भूयिष्ठमोजः । शीर्षन्निंद्रस्यक्रतवोनिरेकऽआसन्नेषंतश्रुत्याऽउपाके+ ॥ मन्ये
त्वायज्ञियंयज्ञियानांमन्येत्वाच्यवनमच्युतानां । मन्येत्वासत्वनामिंद्रकेतुंमन्येत्वावृषभंचर्षणीनां+ ॥ आयद्वज्रंबा
ह्वोरिंद्रधत्सेमदच्युतमहयेहंतवाऽउं । प्रपर्वताऽअनवंतप्रगावःप्रब्रह्माणोऽअभिनक्षंतऽइंद्रं ॥ ३२ ॥ तमुष्टवामयऽ
इमाजजानविश्वाजातान्यवराण्यस्मात् । इंद्रेणमित्रंदिधिषेमगीर्भिरुपोनमोभिर्वृषभंविशेम ॥ वृत्रस्यत्वाश्वसथादी

(८।१०।३) अस्माइत्येकविंशत्यृचस्यसूक्तस्यतिरश्चीरिंद्रश्चतुर्दश्याइंद्रामरुतःपंचदश्याइंद्रावृहस्पतीत्रिष्टुप्चतुर्थीविराट् ।

षमाणाविश्वेदेवाऽअजहुर्येसखायः । मरुद्भिरिंद्रसख्यंतेऽअस्त्वथेमाविश्वाःपृतनाजयासि ॥ त्रिःषष्टिस्त्वामरुतोवावृधानाऽउस्राऽइवराशयोयज्ञियासः । उपत्वेमःकृधिनोभागधेयंशुष्मंतऽएनाहविषाविधेम ॥ तिग्ममायुधंमरुतामनीकंकस्तऽइंद्रप्रतिवज्रंदधर्ष । अनायुधासोऽअसुराऽअदेवाश्चक्रेणताँऽअपवपऽऋजीषिन् ॥ महऽउग्रायतवसेसुवृक्तिंप्रेरयशिवतमायपश्वः । गिर्वाहसेगिरऽइंद्रायपूर्वीर्धेहितन्वेकुविदंगवेदत् ॥ २३ ॥ उक्थवाहसेविभ्वेमनीषांद्रुणानपारमीरयानदीनां । निस्पृशधियातन्विश्रुतस्यजुष्टतरस्यकुवि० ॥ तद्विविड्ढियत्तऽइंद्रोजुजोषत्स्तुहिसुष्टुतिंनमसाविवास । उपभूषजरितर्मारुवण्यःश्रावयावाचंकुवि० ॥ अवद्रप्सोऽअंशुमतीमतिष्ठदियानःकृष्णोदशभिःसहस्रैः । आवत्तमिंद्रःशच्याधमंतमपस्नेहितीर्नृमणाऽअधत्त ॥ द्रप्समपश्यंविषुणेचरंतमुपह्वरेनद्योऽअंशुमत्याः । नभोनकृष्णमवतस्थिवांसमिष्यामिवोवृषणोयुध्यताजौ+ ॥ अधद्रप्सोऽअंशुमत्याऽउपस्थेधारयत्तन्वंतित्विषाणः । विशोऽअदेवीरभ्या३चरंतीर्बृहस्पतिनायुजेंद्रःससाहे ॥ ३४ ॥ त्वंहत्यत्सप्तभ्योजायमानोशत्रुभ्योऽअभवःशत्रुरिंद्र । गूह्ळेद्यावापृथिवीऽअन्वविंदोविभुमद्भ्योभुवनेभ्योरणंधाः ॥ त्वंहत्यदप्रतिमानमोजोवज्रेणवज्रिन्धृषितोजघंथ । त्वंशुष्णस्यावातिरोवधत्रैस्त्वंगाऽइंद्रशच्येदविंदः ॥ त्वंहत्यद्वृषभचर्षणीनांघनोवृत्राणांतविषोबभूथ । त्वंसिंधूँऽरसृजस्तस्तभानान्त्वमपोऽअजयोदासपत्नीः ॥ ससुक्रतूरणितायःसुतेष्वनुत्तमन्युर्योऽअहेवरेवान् । यऽएकऽइन्नर्यपांसिकर्तास

वृत्रहाप्रतीदन्यमाहुः ॥ सवृत्रहेंद्रश्चर्षणीधृत्तंसुष्टुत्याहव्यंहुवेम । सप्राविताम‍घवानोधिवक्तासवाजस्यश्रवस्यस्यदा
ता+ ॥ सवृत्रहेंद्रऽऋभुक्षाःसद्योजज्ञानोहव्योबभूव । कृण्वन्नपांसिनर्यापुरूणिसोमोनपीतोहव्यःसखिभ्यः ॥ ३५ ॥
(८।१०।४) याऽइंद्रभुजऽआभरःस्वर्वाँऽअसुरेभ्यः । स्तोतारमिन्मघवन्नस्यवर्धययेचत्वेवृक्तबर्हिषः ॥ यमिंद्रद
धिषेत्वमश्वंगांभागमव्ययं । यजमानेसुन्वतिदक्षिणावतितस्मिन्तंधेहिमापणौ+ ॥ यऽइंद्रसस्त्यव्रतोनुष्वापमदेवयुः ।
स्वैःषऽएवैर्मुमुरत्पोष्यंरयिंसनुतर्धेहितंततः ॥ यच्छक्रासिपरावतियदर्वावतिवृत्रहन् । अतस्त्वागीर्भिर्द्युगदिंद्रकेशि
भिःसुतावाँऽआविवासति ॥ यद्वासिरोचनेदिवःसमुद्रस्याधिविष्टपि । यत्पार्थिवेसदनेवृत्रहन्तमयदंतरिक्षऽआग
हि ॥ ३६ ॥ सनःसोमेषुसोमपाःसुतेषुशवसस्पते । मादयस्वराधसासूनृतावतेंद्ररायापरीणसा ॥ मानऽइंद्रपरावृ
णग्भवानःसधमाद्यः । त्वंनऽऊतीत्वमिन्नऽआप्यंमानऽइंद्रपरावृणक् ॥ अस्मेऽइंद्रसचासुतेनिषदापीतयेमधु । कृ
धीजरित्रेमघवन्नवोमहदस्मेऽइंद्रसचासुते+ ॥ नत्वादेवासऽआशतनमर्त्यासोऽअद्रिवः । विश्वाजातानिशवसाभिभू
रसिनत्वादेवासऽआशत ॥ विश्वाःपृतनाऽअभिभूतरंनरंसजूस्ततक्षुरिंद्रंजजनुश्चराजसे । क्रत्वावरिष्ठंवरऽआमुरिमु
तोग्रमोजिष्ठंतवसंतरस्विनं ॥ ३७ ॥ समीरेभासोऽअस्वरन्निंद्रंसोमस्यपीतये । स्वर्पतिंयदीवृधेधृतव्रतोह्योजसासमू

(८।१०।४) याइंद्रेतिपंचदशर्चस्यसूक्तस्यकाश्यपोरेभइंद्रोबृहतीदशम्याद्याःक्रमेणातिजगत्युपरिष्टाद्बृहत्यतिजगतीत्रिष्टुप्जगत्यः ।

तिभिः॑ ॥ ने॒मिंन॑मंति॒चक्ष॑सामे॒षंविप्रा॑ऽअभि॒स्वरा॑ । सु॒दी॒तयो॑वोऽअ॒द्रुहो॑पि॒कर्णे॑तर॒स्विनः॒समृक्व॑भिः ॥ तमिंद्रं॑जोहवीमि॒मघवा॑नमु॒ग्रंस॒त्रादधा॑न॒मप्र॑तिष्कुतं॒शवां॑सि । मंहि॑ष्ठोगी॒र्भिरा॑चय॒ज्ञियो॑व॒वर्त॑द्रा॒येनो॒विश्वा॑सु॒पथा॑कृणोतुव॒ज्री॑ ॥ त्वंपुर॑ऽइंद्रचि॒किदे॑ना॒व्योज॑साशविष्ठशक्रनाश॒यध्यै॑ । त्वद्विश्वा॑नि॒भुव॑नानिवज्रि॒न्द्यावा॑रेजेतेपृथि॒वीच॑भी॒षा॑ ॥ तन्म॑ऽऋ॒तमिं॑द्रशूरचित्रपात्व॒पोनव॑ज्रिन्दुरि॒ताति॑पर्षि॒भूरि॑ । क॒दान॑ऽइंद्र॒राय॑ऽआद॑शस्येर्वि॒श्वप्स्न्य॑स्यस्पृह॒याय्य॑स्यराजन् ॥ ३८ ॥ इतिषष्ठाष्टकेषष्ठोध्यायः ॥ ६ ॥ ॥ ॥ ॥ ॥

षट्चत्वारिंशाध्यायेवर्गाः ३८ सूक्तानि १६ ऋचः १९७ ॥ त्यागः ॥ इंद्राये. ९ विश्वेभ्योदेवेभ्य. ३ अर्यमवरुणाभ्यामि. विश्वेभ्योदेवेभ्य. ५ अग्नय. ९ अश्विभ्यामि. २० इंद्राये. ९२ इंद्रऋभुभ्य. मरुद्भ्य. १२ इंद्राये. २२ इंद्रामरुद्भ्य. इंद्राबृहस्पतिभ्या. इंद्रायेदं. २१ ॥ इतिषष्ठेषष्ठः ॥

इंद्रायद्वादशनृमेधऔष्णिहंसप्तम्युपांत्येचककुभौंत्यानवम्यौपुरउष्णिहौंत्वामिदाष्टौप्रागाथंमयंतेद्वादशंनेमोभार्गवस्त्रैष्टुभंषष्ठीजगतींपरास्तिस्रोनुष्टुभोयमितिद्वृचेनेंद्रआत्मानमस्तौदुपांत्येवाच्यावृधक्षोळशंजमदग्निर्भार्गवोमैत्रावरुणंप्रागाथंत्रित्रिष्टुबंतंतृतीयादिगायत्रींपरासतोबृहतींस्तोत्रंराजस्वृक्सपादांदित्याश्विन्यौवायव्यंसौयौंबृहत्युषस्यांसूर्यप्रभास्तुतिर्वापावमानीगव्यैत्वमग्नेव्यधिकांभार्गवःप्रयोगौबार्हस्पत्योवाग्निःपावकःसहस

Digitization by eGangotri. Funding by [illegible]

स्तुतयोर्वान्ययोर्गृहपतिर्यविष्ठयोर्वान्यतरआग्नेयं[illegible]पंचमीविराड्रूपासप्तम्याद्ययुजः
सतोबृहत्योष्टम्यादिंयुजःककुब्भ्रसीयसीककुबनुष्टुबंत्याग्निमारुतींनवमंमंडलंपावमानंसौम्यंस्वादिष्ठयादशम
धुच्छंदाःपवस्वमेधातिथिरेषशुनःशेपःसनहिरण्यस्तूपःसमिद्धएकादशंकाश्यपोसितोदेवलोवाविंशतिःसूक्ता
न्याद्यमाप्रियंश्चतुरनुष्टुबंतंमंद्रयानवासृग्रमेतेसोमाःपरिप्रियाप्रस्वानासंउपास्मैसोमाअसृग्रं ॥ ७ ॥ ॥
हरिःओम् ॥ (८।१०।५) इंद्रायसामगायतविप्रायबृहतेबृहत् । धर्मकृतेविपश्चितेपनस्यवे ॥ त्वमिंद्राभिभूर
सित्वंसूर्यमरोचयः । विश्वकर्माविश्वदेवोमहाँऽअसि ॥ विभ्राजन्ज्योतिषास्वं१रगच्छोरोचनंदिवः । देवास्तंऽइंद्रस
ख्यायंयेमिरे ॥ एंद्रंनोगधिप्रियःसत्राजिदगोह्यः । गिरिर्नविश्वतस्पृथुःपतिर्दिवः ॥ अभिहिसत्यसोमपाऽउभेबभू
थरोदसी । इंद्रासिसुन्वतोवृधःपति० ॥ त्वंहिशश्वतीनामिंद्रदर्तापुरामसि । हंतादस्योर्मनोर्वृधःपति० ॥ १ ॥ अ
धाहींद्रगिर्वणऽउपत्वाकामान्महःससृज्महे । उदेवयंतऽउदभिः ॥ वार्णत्वायव्याभिर्वर्धतिशूरब्रह्माणि । वावृध्वांसं
चिदद्रिवोदिवेदिवे ॥ युंजंतिहरीऽइषिरस्यगाथयोरौरथंऽउरुयुगे । इंद्रवाहावचोयुजा ॥ त्वंनऽइंद्राभरँऽओजोनृम्णंशत
क्रतोविचर्षणे । आवीरंपृतनाषहं ॥ त्वंहिनःपितावसोत्वंमाताशतक्रतोबभूविथ । अधातेसुम्नमीमहे ॥ त्वांशुष्मिन्पुरु

(८।१०।५) इंद्रायसामेतिद्वादशर्चस्यसूक्तस्यांगिरसोनृमेधइंद्रउष्णिक्सप्तमीदशम्येकादश्यौककुभोनवम्यंत्येपुरउष्णिहौ ।

हृतवाजयंतमुपब्रुवेशतक्रतो । सनोरास्वसुवीर्ये ॥ २ ॥ (८।१०।६) त्वामिदाह्योनरोपीप्यन्वज्रिन्भूर्णयः । सऽइंद्रस्तोमवाहसामिहश्रुध्युपस्वसरमागहि ॥ मत्स्वासुशिप्रहरिवस्तदीमहेत्वेऽआभूषंतिवेधसः । तवश्रवांस्युपमान्युक्थ्यासुतेष्विंद्रगिर्वणः ॥ श्रायंतऽइवसूर्यंविश्वेदिंद्रस्यभक्षत । वसूनिजातेजनमानऽओजसाप्रतिभागंनदीधिम ॥ अनर्शरातिंवसुदामुपस्तुहिभद्राइंद्रस्यरातयः । सोऽअस्यकामंविधतोनरोषतिमनोदानायचोदयन् ॥ त्वामिंद्रप्रतूर्तिष्वभिविश्वाऽअसिस्पृधः । अशस्तिहाजनिताविश्वतूरसित्वंतूर्यतरुष्यतः+ ॥ अनुतेशुष्मंतुरयंतमीयतुःक्षोणीशिशुंनमातरं । विश्वास्तेस्पृधःश्नथयंतमन्यवेवृत्रंयदिंद्रतूर्वसि ॥ इतऽऊतीवोऽअजरंप्रहेतारमप्रहितं । आशुंजेतारंहेतारंरथीतममतूर्तंतुग्र्यावृधं ॥ इष्कर्तारमनिष्कृतंसहस्कृतंशतमूतिंशतक्रतुं । समानमिंद्रमवसेहवामहेवसवानंवसूजुवं ॥ ३ ॥ (८।१०।७) अयंतऽएमितन्वापुरस्ताद्विश्वेदेवाऽअभिमायंतिपश्चात् । यदामह्यंदीधरोभागमिंद्रादिन्मयाकृणवोवीर्याणि ॥ दधामितेमधुनोभक्षमग्रेहितस्तेभागःसुतोऽअस्तुसोमः । असश्चत्वंदक्षिणतःसखामेधावृत्राणिजंघनाव

(८।१०।६) त्वामिदेत्यष्टर्चस्यसूक्तस्यनृमेधइंद्रःअयुजोबृहत्योयुजःसतोबृहत्यः । (८।१०।७) अयंतइतिद्वादशर्चस्यसूक्तस्यभार्गवोनेमऋषिःअयंतइतिद्वयोरिंद्रऋषिःइंद्रोदेवतामनोजवाइत्यस्याःसुपर्णोदेवतासमुद्रेइत्यस्यावज्रंयद्वाग्वदंतीतिद्वयोर्वाग्देवतात्रिष्टुप्षष्ठीजगतीसप्तम्याद्यास्तिस्रोनुष्टुभः ।

Digitization by eGangotri. Funding: MoE-IKS-Delhi

भूरिं ॥ प्रसुस्तोमंभरतवाजयंतऽइंद्रायसत्यंयदिसत्यमस्ति । नेंद्रोऽअस्तीतिनेमऽउत्वऽआहकईंददर्शकमभिष्टवाम ॥
अयमस्मिजरितःपश्यमेहविश्वाजातान्यभ्यस्मिमह्ना । ऋतस्यमाप्रदिशोवर्धयंत्यादर्दिरोभुवनादर्दरीमि ॥ आयन्मा
वेनाऽअरुहन्नृतस्यँऽएकमासीनंहर्यतस्यपृष्ठे । मनश्चिन्मेहृदऽआप्रत्यवोचदचिंक्रदन्छिशुमंतःसखायः ॥ विश्वेत्ताते
सवनेषुप्रवाच्यायाचकर्थंमघवन्निंद्रसुन्वते । पारावतंयत्पुरुसंभृतंवस्वपावृणोःशरभायऽऋषिबंधवे ॥ ४ ॥ प्रनूनंधा
वतापृथङ्नेहयोवोऽअवावरीत् । निषींवृत्रस्यमर्मणिवज्रमिंद्रोऽअपीपतत् ॥ मनोजवाऽअयमानऽआयसीमतरत्पुरं ।
दिवंसुपर्णोगत्वायसोमंवज्रिणऽआभरत् ॥ समुद्रेऽअंतःशयतऽउद्नावज्रोऽअभीवृतः । भरंत्यस्मैसंयतःपुरःप्रस्रवणा
बलिं+ ॥ यद्वाग्वदंत्यविचेतनानिराष्ट्रीदेवानांनिषसादमंद्रा । चतस्रऽऊर्जंदुदुहेपयांसिक्वस्विदस्याःपरमंजगाम ॥
देवींवाचमजनयंतदेवास्तांविश्वरूपाःपशवोवदंति । सानोमंद्रेषमूर्जंदुहानाधेनुर्वागस्मानुपसुष्टुतैतु ॥ सखेविष्णोवि
तरंविक्रमस्वद्यौर्देहिलोकंवज्रायविष्कभे । हनाववृत्रंरिणचावसिंधूनिंद्रस्ययंतुप्रसवेविसृष्टाः ॥ ५ ॥ (८।१०।८) ऋध

(८।१०।८) ऋधगित्थेतिषोळशर्चस्यसूक्तस्यभार्गवोजमदग्निर्ऋषिर्मित्रावरुणौदेवते पंचम्यामित्रावरुणादित्यादेवताःषष्ठ्याआदित्याः सप्तम्यष्टम्योरश्विनौनवमीदशम्योर्वायुरेकादशीद्वादश्योःसूर्यस्त्रयोदश्याउषाश्चतुर्दश्याःपवमानस्ततोद्वयोर्गौःबृहतीद्वितीयाचतुर्थीषष्ठ्यष्ट म्यःसतोबृहत्यःतृतीयागायत्रीअंत्यास्तिस्रस्त्रिष्टुभः ।

गित्थासमर्त्यैःशशमेदेवतातये । योनूनंमित्रावरुणावभिष्टयऽआचक्रेहव्यदातये ॥ वर्षिष्ठक्षत्राऽउरुचक्षसानरा
राजानादीर्घश्रुत्तमा । ताबाहुतानदंसनारथर्यतःसाकंसूर्यँस्यरश्मिभिः ॥ प्रयोवाँमित्रावरुणाजिरोदूतोऽअद्रवत् ।
अयंःशीर्षामदेरघुः ॥ नयःसंपृच्छेनपुनर्हवीतवेनसंवादायरमते । तस्मान्नोऽअद्यसमृतेरुरुष्यतंबाहुभ्यांनऽउरुष्यतं॥
प्रमित्रायप्रार्यम्णेसचथ्यंमृतावसो । वरूथ्यं१वरुणेछंद्यंवचःस्तोत्रंराजसुगायत ॥ ६ ॥ तेहिन्विरेऽअरुणंजेन्यंवस्वे
कंपुत्रंतिसृणां । तेधामान्यमृतामर्त्यानामदब्धाऽअभिचक्षते ॥ आमेवचांस्युद्यंताद्युमत्तमानिकर्त्वा । उभायातंना
सत्यासजोषसाप्रतिहव्यानिवीतये ॥ रातिंयद्वामरक्षसंहवामहेयुवाभ्यांवाजिनीवसू । प्राचींहोत्रांप्रतिरंतावितंनरा
गृणानाजमदग्निना ॥ आनोयज्ञंदिविस्पृशंवायोयाहिसुमन्मभिः । अंतःपवित्रऽउपरिश्रीणानो३यंशुक्रोऽअयामि
ते ॥ वेत्यध्वर्युःपथिभीरजिष्ठैःप्रतिहव्यानिवीतये । अधानियुत्वऽउभयस्यनःपिबशुचिंसोमंगवाशिरं ॥ ७ ॥ बण्म
हाँऽअसिसूर्यबळादित्यमहाँऽअसि । महस्तेसतोमहिमापनस्यतेद्धादेवमहाँऽअसि ॥ बट्सूर्यश्रवसामहाँऽअसिसत्रा
देवमहाँऽअसि । मह्नादेवानामसुर्यःपुरोहितोविभुज्योतिरदाभ्यं ॥ इयंयानीच्यर्किणीरूपारोहिण्याकृता । चित्रेव
प्रत्यदर्श्यायत्यं१तर्दशसुबाहुषु ॥ प्रजाहतिस्रोऽअत्यायमीयुर्न्यं१न्याऽअर्कमभितोविविश्रे । बृहद्धतस्थौभुवनेष्वंतः
पवमानोहरितऽआविवेश ॥ मातारुद्राणांदुहितावसूनांस्वसादित्यानाममृतस्यनाभिः । प्रनुवोचंचिकितुषेजनाय

मागामनागामदितिंवधिष्ट ॥ वचोविदंवाचमुदीरयंतींविश्वाभिर्धीभिरुपतिष्ठमानां । देवींऽदेवेभ्यःपर्येयुषींगामा
मांवृक्तमर्त्योदभ्रचेताः ॥ ८ ॥ (८।१०।९) त्वमग्नेबृहद्वयोदधासिदेवदाशुषे । कविर्गृहपतिर्युवा ॥ सनऽईळान
यासहदेवाँऽअग्नेदुवस्युवा । चिकिद्विभानवावह ॥ त्वयाहस्विद्युजावयंचोदिष्ठेनयविष्ठ्य । अभिष्मोवाजसातये ॥
और्वभृगुवच्छुचिमप्नवानवदाहुवे । अग्निंसमुद्रवाससं ॥ हुवेवातस्वनंकविंपर्जन्यक्रंद्यंसहः । अग्निं० ॥ ९ ॥ आस
वंसवितुर्यथाभगस्येवभुजिंहुवे । अग्निं० ॥ अग्निंवोवृधंतमध्वराणांपुरूतमं । अच्छानप्त्रेसहस्वते ॥ अयंयथानऽआ
भुवत्त्वष्टारूपेवतक्ष्या । अस्यक्रत्वायशस्वतः ॥ अयंविश्वाऽअभिश्रियोग्निर्देवेषुपत्यते । आवाजैरुपनोगमत् ॥ वि
श्वेषामिहस्तुहिहोतॄणांयशस्तमं । अग्निंयज्ञेषुपूर्व्यं+ ॥ १० ॥ शीरंपावकशोचिषंज्येष्ठोयोदमेष्वा । दीदायदीर्घश्रुत्त
मः ॥ तमर्वंतंनसानसिंगृणीहिविप्रशुष्मिणं । मित्रंनयातयज्जनं ॥ उपत्वाजामयोगिरोदेदिशतीर्हविष्कृतः । वायोर
नीकेऽअस्थिरन् ॥ यस्यत्रिधात्ववृतंबर्हिस्तस्थावसंदिनं । आपश्चिन्निदधापदं+ ॥ पदंदेवस्यमीळ्हुषोनाधृष्टाभिरूति
भिः । भद्रासूर्यऽइवोपदृक्+ ॥ ११ ॥ अग्नेघृतस्यधीतिभिस्तेपानोदेवशोचिषा । आदेवान्वक्षियक्षिच ॥ तंत्वाजनं

(८।१०।९) त्वमग्नइतिद्वाविंशत्यृचस्यसूक्तस्यभार्गवःप्रयोगोग्निर्गायत्री (अस्मिन्सूक्तेएतऋषयोविकल्प्यंते–बार्हस्पत्योग्निःपावकः यद्वासहसःपुत्रौगृहपतियविष्ठौअनयोरन्यतरोवा) ।

तमातरःकविंदेवासोऽअंगिरः । हव्यवाहममर्त्यं ॥ प्रचेतसंत्वाकवेग्नेदूतंवरेण्यं । हव्यवाहंनिषेदिरे ॥ नहिमेऽअ
स्त्यघ्न्यानस्वधितिर्वनंन्वति । अथैतादृग्भरामिते ॥ यदग्नेकानिकानिचिदातेदारूणिदध्मसि । ताजुषस्वयविष्ठ्य ॥
यदत्युपजिह्विकायद्वम्रोऽअतिसर्पति । सर्वंतदस्तुतेघृतं+ ॥ अग्निमिंधानोमनसाधियंसचेतमर्त्यः । अग्निमींधेवि
वस्वभिः ॥ १२ ॥ (८।१०।१०) अदर्शिगातुवित्तमोयस्मिन्व्रतान्यादधुः । उपोषुजातमार्यस्यवर्धनमग्निंनक्षंतनो
गिरः ॥ प्रदैवोदासोऽअग्निर्देवाँऽअच्छानमज्मना । अनुमातरंपृथिवींविवावृतेतस्थौनाकस्यसानवि ॥ यस्माद्रेजंतकृ
ष्टयश्चर्कृत्यानिकृण्वतः । सहस्रसांमेधसाताविवत्मनाग्निंधीभिःसंपर्यत ॥ प्रयंरायेनिनीषसिमर्तोयस्तेवसोदाशत् ।
सवीरंधत्तेऽअग्नऽउक्थशंसिनंत्मनासहस्रपोषिणं ॥ सदृह्ळेचिदभितृणत्तिवाजमर्वतासधत्तेऽअक्षितिश्रवः । त्वेदेवत्रा
सदापुरूवसोविश्वावामानिधीमहि ॥ १३ ॥ योविश्वादयतेवसुहोतामंद्रोजनानां । मधोर्नपात्राप्रथमान्यस्मैप्रस्तोमा
यंत्यग्नये ॥ अश्वंनगीर्भीरथ्यंसुदानवोमर्मृज्यंतेदेवयवः । उभेतोकेतनयेदस्मविश्पतेपर्षिराधोमघोनां ॥ प्रमंहिष्ठाय
गायतऽऋताव्नेबृहतेशुक्रशोचिषे । उपस्तुतासोऽअग्नये ॥ आवंसतेमघवावीरवद्यशःसमिद्धोद्युम्न्याहुतः । कुविन्नोऽ

(८।१०।१०) अदर्शीतिचतुर्दशर्चस्यसूक्तस्यकाण्वःसोभरिरग्निरंत्यायाअग्नामरुतोबृहतीपंचमीविराड्रूपासप्तम्याद्ययुजःसतोबृहत्योष्ट
म्यादियुजःक्रमेणककुब्ह्रसीयसीककुबनुष्टुभः ।

Digitization by eGangotri Funding NMF-Delhi

अस्यसुमतिर्नवींयस्यच्छावाजैंभिरागमंत् ॥ प्रेष्ठंमुप्रियाणांस्तुह्यासावातिथिं । अग्निंरथांनांयमं ॥ १४ ॥ उदिंतायो
निदिंतावेदिंतावस्वायज्ञियोंववर्तंति । दुष्टरायस्यंप्रवणेनोर्मयोंधियावाजंसिषांसतः ॥ मानोंहृणीतामतिंथिर्वसुरग्निः
पुंरुप्रशस्तऽएषः । यःसुहोतांस्वध्वरः+ ॥ मोतेरिंषन्येऽअच्छोंक्तिभिर्वसोग्नेकेभिंश्चिदेवैः । कीरिश्चिद्धित्वामीट्टेंदूत्यां
यरातहंव्यःस्वध्वरः+ ॥ आग्नेंयाहिमरुत्संखारुद्रेभिःसोमंपीतये । सोभंर्याऽउपंसुष्टुतिंमादयंस्वस्वंर्णरे ॥ १५ ॥ ॥
(इतिप्रागाथमष्टमंमंडलंअत्रसूक्तानि ९२) ॥ (९।१।१) स्वादिंष्ठयामदिंष्ठयापवंस्वसोमधारंया । इंद्रांयपातंवेसु
तः+ ॥ रक्षोहाविश्वचंर्षणिरभियोनिमयोंहतं । द्रुणांसधस्थमासंदत् ॥ वरिवोधातंमोभवमंहिंष्ठोवृत्रहन्तंमः । पर्षि
राधोंमघोनांम् ॥ अभ्यंर्षमहानांदेवानांवीतिमंधंसा । अभिवाजंमुतश्रवंः ॥ त्वामच्छांचरामसितदिदर्थंदिवेदिंवे ।
इंदोत्वेनंऽआशसंः ॥ १६ ॥ पुनातिंतेपरिस्रुतंसोमंसूर्यंस्यदुहिता । वारेंणशश्वंतातनां ॥ तमीमण्वींःसमर्यऽआगृ
भ्णंतियोषंणोदश । स्वसांरःपार्येंदिवि+ ॥ तमींहिन्वंत्यग्रुवोधमंतिबाकुरंदृतिं । त्रिधातुंवारणंमधुं ॥ अभीऽ३ममं
घ्न्यांऽउतश्रीणंतिंधेनवःशिशुं । सोममिंद्रांयपातंवे ॥ अस्येदिंद्रोमदेष्वाविश्वांवृत्राणिंजिघ्नते । शूरोंमघाचंमंह ॥४९॥

पावमानेनवमेमंडलेसप्तानुवाकाःतत्रप्रथमेनुवाकेचतुर्विंशतिसूक्तानि (९।१।१) स्वादिष्ठयेतिदशर्चस्यसूक्तस्यवैश्वामित्रोमधुच्छंदाःपव
मानसोमोगायत्री ।

ते ॥ १७ ॥ (९।१।२) पव॑स्वदेव॒वीरति॑प॒वित्रं॑सोम॒रंह्या॑ । इंद्र॑मिंदो॒वृषावि॑श ॥ आव॑च्यस्व॒महि॒प्सरो॒वृषें॑दोद्यु॒म्नव॑
त्तमः । आयोनिं॑धर्ण॒सिःस॑दः ॥ अधु॑क्षतप्रि॒यंमधु॒धारा॑सु॒तस्य॑वे॒धस॑ः । अ॒पोव॑सिष्टसु॒क्रतु॑ः ॥ म॒हांतं॑त्वाम॒हीरन्वापो॑
ऽअर्षंति॒सिंध॑वः । यद्गोभि॑र्वासयि॒ष्यसे॑ ॥ स॒मु॒द्रोऽअ॒प्सुमा॑मृजेविष्टं॒भोध॒रुणो॑दि॒वः । सोम॑ःप॒वित्रे॑ऽअस्म॒युः+ ॥ १८ ॥
अचि॑क्रद॒द्वृषा॒हरि॑र्म॒हान्मि॒त्रोनद॑र्श॒तः । संसूर्ये॑णरोचते ॥ गिर॑स्तऽइंद॒ऽओज॑सामर्मृज्यंते॑ऽअप॒स्युव॑ः । याभि॒र्मदा॑य॒
शुंभ॑से ॥ तंत्वा॒मदा॑य॒घृष्व॑यऽउलोककृ॒त्नुमी॑महे । तव॒प्रश॑स्तयोम॒हीः+ ॥ अ॒स्मभ्य॑मिंदवि॑न्द्र॒युर्म॑ध्वःपवस्व॒धार॑या ।
प॒र्जन्यो॑वृष्टि॒माँऽइव ॥ गो॒षाऽइं॑दोनृ॒षाऽअ॑स्यश्व॒सावा॑ज॒साऽउ॒त । आ॒त्माय॒ज्ञस्य॑पू॒र्व्य॑ः+ ॥ १९ ॥ (९।१।३) ए॒ष
दे॒वोऽअम॑र्त्यःपर्ण॒वीरि॑वदीयति । अ॒भिद्रोणा॑न्या॒सदँ ॥ ए॒षदे॒वोवि॒पाकृ॒तोति॒ह्वराँसिधावति । पव॑माने॒ाऽअदा॑भ्यः ॥
ए॒षदे॒वोवि॑प॒न्युभि॒ःपव॑मानऽऋता॒युभि॑ः । हरि॒र्वाजा॑यमृज्यते ॥ ए॒षविश्वा॑नि॒वार्या॒शूरो॒यन्नि॑व॒सत्व॑भिः । पव॑मानःसि
षासति ॥ ए॒षदे॒वोर॑थर्यति॒पव॑मानोदशस्यति । आ॒विष्कृ॑णोतिवग्व॒नुं॑+ ॥ २० ॥ ए॒षविप्रै॑र॒भिष्टु॑तो॒पोदे॒वोविगा॑हते ।
दध॒द्रत्ना॑निदा॒शुषे॑ ॥ ए॒षदिवं॒विधा॑वतिति॒रोरजाँसि॒धार॑या । पव॑मान॒ःकनि॑क्रदत् ॥ ए॒षदिवं॒व्यास॑रत्ति॒रोरजा॒ंस्यस्पृ॑

(९।१।२) पवस्वेतिदशर्चस्यसूक्तस्यकाण्वोमेधातिथिःपवमानसोमोगायत्री । (९।१।३) एषदेवइतिदशर्चस्यसूक्तस्याजीगर्तिःशुनःशेपःसकृत्रिमोवैश्वामित्रोदेवरातःपवमानसोमोगायत्री ।

Digitization by eGangotri. Funding by MoE-IKS

तः । पवमानःस्वध्वरः+ ॥ एषप्रत्नेनजन्मनादेवोदेवेभ्यःसुतः । हरिःपवित्रेऽअर्षति ॥ एषऽउस्यपुरुव्रतोजज्ञानोजनयन्निषः । धारयापवतेसुतः+ ॥ २१ ॥ (९।१।४) सनाचसोमजेषिचपवमानमहिश्रवः । अथानोवस्यसस्कृधि ॥ सनाज्योतिःसनास्व१र्विश्वाचसोमसौभगा । अथा० ॥ सनादक्षमुतक्रतुमपसोममृधोजहि । अथा० ॥ पवीतारःपुनीतनसोममिंद्रायपातवे । अथा० ॥ त्वंसूर्येनऽआभजतवक्रत्वातवोतिभिः । अथा० ॥ २२ ॥ तवक्रत्वातवोतिभिर्ज्योक्पश्येमसूर्यं । अथा० ॥ अभ्यर्षस्वायुधसोमद्विबर्हसंरयिं । अथा० ॥ अभ्य१र्षानपच्युतोरयिंसमत्सुसासहिः । अथा० ॥ त्वांयज्ञैरवीवृधन्पवमानविधर्मणि । अथा० ॥ रयिंनश्चित्रमश्विनमिंदोविश्वायुमाभर । अथा० ॥ २३ ॥ (९।१।५) समिद्धोविश्वतस्पतिःपवमानोविराजति । प्रीणन्वृषाकनिक्रदत् ॥ तनूनपात्पवमानःशृंगेशिशानोऽअर्षति । अंतरिक्षेणरारजत् ॥ ईळेन्यःपवमानोरयिर्विराजतिद्युमान् । मधोर्धाराभिरोजसा ॥ बर्हिःप्राचीनमोजसापवमानस्तृणन्हरिः । देवेषुदेवऽईयते ॥ उदातैर्जिहतेबृहद्द्वारोदेवीर्हिरण्ययीः । पवमानेनसुष्टु

(९।१।४) सनाचेतिदशर्चस्यसूक्तस्यहिरण्यस्तूपःपवमानसोमोगायत्री । (९।१।५) समिद्धइत्येकादशर्चस्यसूक्तस्यकाश्यपोसितः क्रमेणेध्मस्तनूनपादिळोबर्हिर्देवीर्द्वारउषासानक्तादैव्यौहोतारौतिस्रोदेव्यःसरस्वतीळाभारत्यस्त्वष्टावनस्पतिःस्वाहाकृतयोगायत्रीअंत्याश्चतस्रोनुष्टुभः । (इतआरभ्यविंशतिसूक्तेषुकाश्यपोदेवलोऽसितेनसहविकल्पते) ।

ताः ॥ २४ ॥ सुशिल्पेबृंहतीमहीपवंमानोवृषण्यति । नक्तोषासानदंर्शते+ ॥ उभादेवानृचक्षंसाहोतांरादैव्यांहुवे । पवं
मानऽइंद्रोवृषां ॥ भारंतीपवंमानस्युसरंस्वतीळांमही । इमंनोंयज्ञमागंमन्तिस्रोदेवीःसुपेशंसः ॥ त्वष्टांरमग्रजांगोपा
पुंरोयाव्वांनमाहुंवे । इंदुरिंद्रोवृषाहरिःपवंमानःप्रजापंतिः ॥ वनस्पतिंपवमानमध्वासमंङ्धिधारंया । सहस्रंवल्शंहरिं
तंभ्राजंमानंहिरण्ययं ॥ विश्वेंदेवाःस्वाहांकृतिंपवंमानस्यागंत । वायुर्बृहस्पतिःसूर्योंग्निरिंद्रंःसजोषंसः ॥ २५ ॥
(९।१।६) मंद्रयांसोमधारंयावृषांपवस्वदेवयुः । अव्योवारेंष्वस्मयुः+ ॥ अभित्यंमद्यंमदामिंदविंद्रऽइतिंक्षर । अ
भिवाजिनोऽअर्वंतः ॥ अभित्यंपूर्व्यंमदंसुवानोऽअंर्षपवित्रऽआ । अभिवाजंमुतश्रवंः ॥ अनुंद्रप्सासऽइंदंवऽआपो
नप्रवतांसरन् । पुनानाऽइंद्रंमाशत ॥ यमत्यंमिववाजिनंमृजंतियोषंणोदशं । वनेक्रीळंतमत्यांविं ॥ २६ ॥ तंगोभि
र्वृषंणंरसंमदांयदेववींतये । सुतंभरांयसंसृंज ॥ देवोदेवायधारयेंद्रांयपवतेसुतः । पयोयदंस्यपीपयंत् ॥ आत्मायज्ञ
स्यरंह्यांसुष्वाणःपंवतेसुतः । प्रत्नंनिपांतिकाव्यं ॥ एवापुंनानऽइंद्रयुर्मदंमदिष्ठवीतयें । गुहांचिद्दधिषेगिरंः ॥ २७ ॥
(९।१।७) असृंग्रमिंदंवःपथाधर्मंन्नृतस्यंसुश्रियंः । विदानाऽअंस्ययोजंनं ॥ प्रधारामध्वोंऽअग्रियोमहीरपोविगांह

(९।१।६) मंद्रयेतिनवर्चस्यसूक्तस्यकाश्यपोसितःपवमानसोमोगायत्री । (९।१।७) असृग्रमितिनवर्चस्यसूक्तस्यासितःपवमान
सोमोगायत्री ।

ते । हविर्हविष्षुवंद्यः ॥ प्रयुजोवाचोऽअग्रियोवृषावचक्रदद्वने । सद्माभिसत्योऽअध्वरः+ ॥ परियत्काव्याकविर्नृम्णावसानोऽअर्षति । स्वर्वाजीसिषासति ॥ पवमानोऽअभिस्पृधोविशोराजेवसीदति । यदीमृण्वंतिवेधसः ॥२८॥ अव्योवारेपरिप्रियोहरिर्वनेषुसीदति । रेभोवनुष्यतेमती+ ॥ सवायुमिंद्रमश्विनासाकंमदेनगच्छति । रणायोऽअस्यधर्मभिः ॥ आमित्रावरुणाभगंमध्वःपवंतऽऊर्मयः । विदानाऽअस्यशक्मभिः ॥ अस्मभ्यंरोदसीरयिंमध्वोवाजस्यसातये । श्रवोवसूनिसंजितं ॥ २९ ॥ (९।१।८) एतेसोमाऽअभिप्रियमिंद्रस्यकाममक्षरन् । वर्धंतोऽअस्यवीर्यं* ॥ पुनानासश्चमूषदोगच्छंतोवायुमश्विना । तेनोधांतुसुवीर्यं ॥ इंद्रस्यसोमराधसेपुनानोहार्दिचोदय । ऋतस्ययोनिमासदं ॥ मृजंतित्वादशक्षिपोहिन्वंतिसप्तधीतयः । अनुविप्राऽअमादिषुः ॥ देवेभ्यस्त्वामदायकंसृजानमतिमेष्यः । संगोभिर्वासयामसि ॥ ३० ॥ पुनानःकलशेष्वावस्त्राण्यरुषोहरिः । परिगव्यान्यव्यत ॥ मघोनऽआपवस्वनोजहिविश्वाऽअपद्विषः । इंदोसखायमाविश ॥ वृष्टिंदिवःपरिस्रवद्युम्नंपृथिव्याऽअधि । सहोनःसोमपृत्सुधाः ॥ नृचक्षसंत्वावयमिंद्रपीतंस्वर्विदं । भक्षीमहिप्रजामिषं ॥ ३१ ॥ (९।१।९) परिप्रियादिवःकविर्वयांसिनप्त्योर्हितः । सुवानोयातिकविक्रतुः ॥ प्रप्रक्षयायपन्यसेजनायजुष्टोऽअद्रुहे । वीत्यर्षचनिष्ठया ॥ ससूनुर्मातराशुचिर्जातो

(९।१।८)एतेसोमाइतिनवर्चस्यसूक्तस्यासितःपवमानसोमोगायत्री ।(९।१।९)परिप्रियेतिनवर्चस्यसूक्तस्यासितःपवमानसोमोगायत्री ।

जा॒ते॑ऽअ॑रोचयत् । म॒हान्म॒हीऽऋ॑ता॒वृधा॑ ॥ सस॒प्तधी॒ति॑भि॑र्हि॒तो॑न॒द्यो॑ऽअजिन्वद॒द्रुहः॑ । याऽएक॒मक्षि॑वावृ॒धुः+ ॥
ताऽअ॒भिसं॑त॒मस्तृ॑तंम॒हेयुवा॑न॒माद॑धुः । इंदु॑मिंद्र॒तव॑व्र॒ते+ ॥ ३२ ॥ अ॒भिवह्नि॒रम॑र्त्यःस॒प्तप॑श्यति॒वाव॑हिः । क्रिवि॑र्दे॒
वी॑रत॑र्पयत् ॥ अवा॒कल्पे॑षुनःपु॒मस्तमाँ॑सिसोम॒योध्या॑ । तानिं॑पुनानजंघनः ॥ नूनव्यं॑से॒नवीं॑यसेसू॒क्ताय॑साधयाप॒थः ।
प्र॒त्न॒वद्रो॑चया॒रुचः॑ ॥ पव॑मान॒महि॒श्रवो॒गाम॑श्वं॑रासिवी॒रव॑त् । सना॑मे॒धांसना॒स्वः॑* ॥ ३३ ॥ (९।१।१०) प्रस्वा॒
नासो॒रथा॑ऽइ॒वावी॑तो॒नश्र॑व॒स्यवः॑ । सोमा॑सोरा॒ये॑ऽअ॑क्रमुः ॥ हि॒न्वा॒नासो॒रथा॑ऽइवदधन्वि॒रे॑गभ॑स्त्योः । भरा॑सःका॒रि
णा॑मिव ॥ राजा॑नो॒नप्रश॑स्तिभि॒ःसोमा॑सो॒गोभि॑रंजते । य॒ज्ञोनस॒प्तधा॒तृभिः॑ ॥ परि॑सुवा॒नास॒ऽइंद॑वो॒मदा॑यब॒र्हणा॑गि॒
रा । सुताऽअ॑र्षति॒धार॑या ॥ आ॒पा॒नासो॑वि॒वस्व॑तो॒जन॑तऽउ॒षसो॒भग॑ँ । सूरा॒ऽअण्वं॑वित॑न्वते ॥ ३४ ॥ अप॒द्वारा॑मति॒
नां॑प्र॒त्नाऽऋ॑ण्वंतिका॒रवः॑ । वृष्णो॒हर॑सऽआ॒यवः॑ ॥ स॒मी॒ची॒नास॑ऽआसते॒होता॑रःस॒प्तजा॑मयः । प॒दमेक॑स्य॒पिप्र॑तः ॥ ना
भा॒नाभि॑न॒ऽआद॑दे॒चक्षु॑श्चि॒त्सूर्ये॒सचा॑ । क॒वेरप॑त्य॒मादु॑हे ॥ अ॒भिप्रि॒यादि॒वस्प॒दम॑ध्व॒र्युभि॒र्गुहा॑हि॒तं । सूरः॑पश्यति॒चक्ष॑सा
॥ ३५ ॥ (९।१।११) उपा॑स्मैगायतानर॒ःपव॑माना॒येंद॑वे । अ॒भिदे॒वाँऽइय॑क्षते ॥ अ॒भिते॒मधु॑ना॒पयोथ॑र्वाणोऽअशि

(९।१।१०) प्रस्वानासइतिनवर्चस्यसूक्तस्यासितःपवमानसोमोगायत्री । (९।१।११) उपास्माइतिनवर्चस्यसूक्तस्यासितःपवमान
सोमोगायत्री ।

श्रयुः । देवंदेवायदेवयु+ ॥ सनःपवस्वशंगवेशंजनायशमर्वते । शंराजन्नोषधीभ्यः ॥ बभ्रवेनुस्वतवसेरुणायदिवि
स्पृशे । सोमायगाथमर्चत ॥ हस्तच्युतेभिरद्रिभिःसुतंसोमंपुनीतन । मधावाधावतामधु ॥ ३६ ॥ नमसेदुपसीदत
दध्नेदभिश्रीणीतन । इंदुमिंद्रेदधातन ॥ अमित्रहाविचर्षणिःपवस्वसोमशंगवे । देवेभ्योऽअनुकामकृत्+ ॥ इंद्राय
सोमपातवेमदायपरिषिच्यसे । मनश्चिन्मनसस्पतिः ॥ पवमानसुवीर्यंरयिंसोमरिरीहिनः । इंदविंद्रेणनोयुजा+
॥ ३७ ॥ (९।१।१२) सोमाऽअसृग्रमिंदवःसुताऽऋतस्यसादने । इंद्रायमधुमत्तमाः ॥ अभिविप्राऽअनूषतगावो
वत्संनमातरः । इंद्रंसोमस्यपीतये ॥ मदच्युत्क्षेतिसादनेसिंधोरूर्माविपश्चित् । सोमोगौरीऽअधिश्रितः+ ॥ दिवो
नाभाविचक्षणोव्योवारेमहीयते । सोमोयःसुक्रतुःकविः+ ॥ यःसोमःकलशेष्वाँऽअंतःपवित्रऽआहितः । तमिंदुः
परिषस्वजे ॥ ३८ ॥ प्रवाचमिंदुरिष्यतिसमुद्रस्याधिविष्टपि । जिन्वन्कोशंमधुश्चुतं ॥ नित्यस्तोत्रोवनस्पतिर्धीना
मंतःसबर्दुघः । हिन्वानोमानुषायुगा+ ॥ अभिप्रियादिवस्पदासोमोहिन्वानोऽअर्षति । विप्रस्यधारयाकविः+ ॥
आपवमानधारयरयिंसहस्रवर्चसं । अस्मेऽइंदोस्वाभुवं ॥ ३९ ॥ इतिषष्ठाष्टकेसप्तमोऽध्यायः ॥ ७ ॥ ॥

(९।१।१२) सोमाअसृग्रमितिनवर्चस्यसूक्तस्यासितःपवमानसोमोगायत्री ।

सप्तचत्वारिंशाध्यायेवर्गाः ३९ सूक्तानि १८ ऋचः १९८ ॥ त्यागः ॥ इद्राये. २९ वाग्देव्या. २ इंद्राये. मित्रावरुणाभ्या. ४ मित्रावरुणादित्येभ्य. आदित्येभ्य. अश्विभ्या. २ वायव. २ सूर्याये. २ उषस. पवमानाये. गवइ. २ अग्नय. ३५ अग्नामरुद्भ्य. पवमानायसोमाये. ४० समिद्धायाग्नय. तनूनपात. इळाये. बर्हिषइ. देवीभ्योद्वार्भ्य. उषासानक्ताभ्या. देविभ्यांहोतृभ्यांप्रचेतोभ्या. सरस्वतीळाभारतीभ्य. त्वष्टू. वनस्पतय. स्वाहाकृतीभ्य. पवमानायसोमाये. ६३ ॥ इतिषष्ठेसप्तमः ॥

सोमःपरिप्राष्टावेषधिया॑प्रतेप्रनिम्नेनेव॑परिसुवानःसप्त॑यत्सोमप्रकवि॑रेतेधावन्त्येतेसोमास॑ःसोमाअसृग्र॑प्रसोमास॑ःपवस्वषट्ट्दृह्लच्युत॑आगस्त्यस्तममृक्ष॑तेंध्मवाहोदार्ढच्युत॑एषकविर्नृमेध॑एषवाजीप्रियमेध॑ःप्रास्यन्नृमेध॑ःप्रधाराबिंदु॑ःप्रसोमासोगोतमःप्रसोमासःश्यावाश्व॑ःप्रसोमासस्त्रित॑ःप्रसुवानआनःप॑वस्वप्रभूवसु॑रसाजिंससुतोरहूगण॑एषउस्यआशुरर्षबृहन्मतिःपुनानःप्रयेगावोमेध्यातिथिर्जनयन्योअत्यइव ॥ ८ ॥ ॥ ॥

॥ हरिःओम् ॥ (९।१।१३) सोम॑ःपु॒नानो॒ऽअ॑र्षतिस॒हस्र॑धारो॒ऽअत्य॑विः । वा॒योरिंद्र॑स्यनिष्कृ॒तं+ ॥ पव॑मानमवस्यवो॒विप्र॑म॒भिप्रगा॑यत । सु॒ष्वा॒णंदे॒ववी॑तये ॥ पवँ॑ते॒वाज॑सातये॒सोमा॑ःस॒हस्र॑पाजसः । गृ॒णा॒नादे॒ववी॑तये ॥ उ॒तनो॒वाज॑सातये॒पव॑स्वबृह॒तीरिष॑ः । द्यु॒मदिं॑दोसु॒वीर्यँ॑ ॥ तेन॑ःसह॒स्रिणँ॑र॒यिंपवँ॑ता॒मासु॒वीर्यँ॑ । सु॒वा॒नादे॒वास॒ऽइंद॑वः ॥

(९।१।१३) सोमःपुनानइतिनवर्चस्यसूक्तस्यकाश्यपोऽसितःपवमानसोमोगायत्री ।

॥ १ ॥ अत्याहियानानहेतृभिरसृग्रंवाजसातये । विवारमव्यमाशवः ॥ वाश्राऽअर्षतींदवोभिवत्संनधेनवः । दुध
न्विरेगभस्त्योः ॥ जुष्टऽइंद्रायमत्सरःपवमानकनिक्रदत् । विश्वाऽअपद्विषोजहि ॥ अपघ्नंतोऽअराव्णःपवमानाः
स्वर्दृशः । योनावृतस्यसीदत ॥ २ ॥ (९।१।१४) परिप्रासिष्यदत्कविःसिंधोरूर्मावधिश्रितः । कारंबिभ्रत्पुरुस्पृ
हँ ॥ गिरायदीसबंधवःपंचव्राताऽअपस्यवः । परिष्कृण्वंतिधर्णसिं+ ॥ आदस्यशुष्मिणोरसेविश्वेदेवाऽअमत्सत ।
यदीगोभिर्वसायते ॥ निरिणानोविधावतिजहच्छर्याणितान्वा । अत्रासंजिघ्रतेयुजा+ ॥ नप्तीभिर्योविवस्वतःशुभ्रो
नमामृजेयुवा । गाःकृण्वानोननिर्णिजं ॥ ३ ॥ अतिश्रितीतिरश्चतागव्याजिगात्यण्व्या । वग्नुमियर्तियंविदे+ ॥ अ
भिक्षिपःसमग्मतमर्जयँतीरिषस्पतिं । पृष्ठागृभ्णतवाजिनः ॥ परिदिव्यानिमर्मृशद्विश्वानिसोमपार्थिवा । वसूनि
याह्यस्मयुः+ ॥ ४ ॥ (९।१।१५) एषधियायात्यण्व्याशूरोरथेभिराशुभिः । गच्छन्निंद्रस्यनिष्कृतं+ ॥ एषपुरूधि
यायतेबृहतेदेवतातये । यत्रामृतासऽआसते ॥ एषहितोविनीयतेंतःशुभ्रावतापथा । यदीतुंजंतिभूर्णयः ॥ एषशृं
गाणिदोधुवच्छिशीतेयूथ्यो३वृषा । नृम्णादधानऽओजसा ॥ एषरुक्मिभिरीयतेवाजीशुभ्रेभिरंशुभिः । पतिःसिंधू
नांभवन् ॥ एषवसूनिपिब्दनापरुषाययिवाँऽअति । अवशादेषुगच्छति ॥ एतंमृजंतिमर्ज्यमुपद्रोणेष्वायवः । प्रच

(९।१।१४) परिप्रेत्यष्टर्चस्यसूक्तस्यासितःपवमानसोमोगायत्री । (९।१।१५)एषधियेत्यष्टर्चस्यसूक्तस्यासितःपवमानसोमोगायत्री ।

क्राणंमहीरिषः ॥ एतमुत्यंदशक्षिपोमृजंतिसप्तधीतयः । स्वायुधंमदिंतमं ॥ ५ ॥ (९।१।१६) प्रतेसोतारऽओण्यो३ रसंमदायघृष्वये । सर्गोनतक्त्येतशः ॥ क्रत्वादक्षस्यरथ्यमपोवसानमंधसा । गोषामण्वेषुसश्चिम ॥ अनप्तमप्सुदुष्टरंसोमंपवित्रऽआसृज । पुनीहींद्रायपातवे ॥ प्रपुनानस्यचेतसासोमःपवित्रेऽअर्षति । क्रत्वासधस्थमासदत्+ ॥ प्रत्वानमोभिरिंदवऽइंद्रसोमाऽअसृक्षत । महेभरायकारिणः ॥ पुनानोरूपेऽअव्ययेविश्वाऽअर्षन्नभिश्रियः । शूरोनगोषुतिष्ठति ॥ दिवोनसानुपिप्युषीधारासुतस्यवेधसः । वृथापवित्रेऽअर्षति ॥ त्वंसोमविपश्चितंतनापुनानऽआयुषु । अव्योवारंविधावसि ॥ ६ ॥ (९।१।१७) प्रनिम्नेनेवसिंधवोघ्नंतोवृत्राणिभूर्णयः । सोमाऽअसृग्रमाशवः ॥ अभिसुवानासऽइंदवोवृष्टयःपृथिवीमिव । इंद्रंसोमासोऽअक्षरन् ॥ अत्यूर्मिर्मत्सरोमदःसोमःपवित्रेऽअर्षति । विघ्नन्रक्षांसिदेवयुः+ ॥ आकलशेषुधावतिपवित्रेपरिषिच्यते । उक्थैर्यज्ञेषुवर्धते ॥ अतित्रीसोमरोचनारोहन्नभ्राजसेदिवं । इष्णन्त्सूर्यंनचोदयः ॥ अभिविप्राऽअनूषतमूर्धन्यज्ञस्यकारवः । दधानाश्चक्षसिप्रियं+ ॥ तमुत्वावाजिनंनरोधीभिर्विप्राऽअवस्यवः । मृजंतिदेवतातये ॥ मधोर्धारामनुक्षरतीव्रःसधस्थमासदः । चारुर्ऋतायपीतये ॥ ७ ॥

(९।१।१६) प्रतेसोतारइत्यष्टर्चस्यसूक्तस्यासितःपवमानसोमोगायत्री । (९।१।१७) प्रनिम्नेनेवेत्यष्टर्चस्यसूक्तस्यासितःपवमानसोमोगायत्री ।

Digitization by eGangotri Funding MDF-Delhi

(९।१।१८) परि॑सुवा॒नोगि॑रि॒ष्ठाःप॒वित्रे॒सोमो॑ऽअक्षाः । मदे॑षुसर्व॒धाऽअ॑सि ॥ त्वंविप्र॒स्त्वंक॒विर्मधु॒प्रजा॒तमंध॑सः । मदे॑षु० ॥ तव॒विश्वे॑स॒जोष॑सोदे॒वासः॑पी॒तिमा॑शत । मदे॑षु० ॥ आयोविश्वा॑नि॒वार्या॒वसू॑नि॒हस्त॑योर्द॒धे । मदे॑षु० ॥ यऽइ॒मेरोद॑सीम॒हीसंमा॒तरे॑व॒दोह॑ते । मदे॑षु० ॥ परि॒योरोद॑सीऽउ॒भेस॒द्योवाजे॑भि॒रर्ष॑ति । मदे॑षु० ॥ सशु॒ष्मीक॒लशे॒ष्वापु॑ना॒नोऽअ॑चिक्रदत् । मदे॑षु० ॥ ८ ॥ (९।१।१९) यत्सो॑मचि॒त्रमु॒क्थ्यं॑दि॒व्यंपार्थि॑वं॒वसु॑ । तन्नः॑पुना॒नऽआभ॑र ॥ यु॒वंहिस्थः॒स्व॑र्पती॒ऽइंद्र॑श्चसोम॒गोप॑ती । ई॒शा॒नापि॑प्यतं॒धियः॑ ॥ वृषा॑पुना॒नऽआ॒युषु॑स्त॒नय॒न्नधि॑ब॒र्हिषि॑ । हरिः॒ सन्योनि॒मास॑दत् ॥ अवा॑वशंतधी॒तयो॑वृष॒भस्याधि॒रेत॑सि । सू॒नोर्व॒त्सस्य॑मा॒तरः॑ ॥ कु॒विद्वृ॑ष॒ण्यंती॑भ्यःपुना॒नोगर्भ॑मा॒दधं॑त् । याःशु॒क्रंदु॑हु॒तेपयः॑ ॥ उप॑शिक्षापत॒स्थुषो॑भि॒यस॒माधे॑हि॒शत्रु॑षु । पव॑मानवि॒दार॒यिं+ ॥ निशं॑त्रोः॑सोम॒वृष्ण्यं॒ निशुष्मं॒निव॑यस्तिर । दू॒रेवा॑स॒तोऽअंति॑वा ॥ ९ ॥ (९।१।२०) प्रक॒विर्दे॒ववी॑त॒येऽव्यो॒वारे॑भिरर्षति । सा॒ह्वान्विश्वा॑ऽअ॒भिस्पृधः॑ ॥ सहि॒ष्मांज॑रि॒तृभ्य॒ऽआवाजं॒गोमं॑त॒मिन्व॑ति । पव॑मानःसह॒स्रिणं॑ ॥ परि॒विश्वा॑नि॒चेत॑सामृ॒शसे॒पव॑सेम॒ती । सनः॑सोम॒श्रवो॑विदः ॥ अ॒भ्य॑र्षबृ॒हद्यशो॑म॒घव॑द्भ्योध्रु॒वंर॒यिं । इषं॑स्तो॒तृभ्य॒आभ॑र ॥ त्वंराजे॑वसुव्र॒तोगिरः॑सो॒मा

(९।१।१८) परिसुवानइतिसप्तर्चस्यसूक्तस्यासितःपवमानसोमोगायत्री । (९।१।१९) यत्सोमेतिसप्तर्चस्यसूक्तस्यासितःपवमानसोमोगायत्री । (९।१।२०) प्रकविरितिसप्तर्चस्यसूक्तस्यासितःपवमानसोमोगायत्री ।

विवेशिथ । पुनानोवह्नेऽअद्भुत ॥ सवह्निरप्सुदुष्टरोमृज्यमानोगभस्त्योः । सोमश्चमूषुसीदति ॥ क्रीलुर्मखोनमंहयुःप
वित्रंसोमगच्छसि । दधत्स्तोत्रेसुवीर्यं ॥ १० ॥ (९।१।२१) एतेधावंतींदवःसोमाऽइंद्रायघृष्वयः । मत्सरासः
स्वर्विदः ॥ प्रवृण्वंतोऽअभियुजःसुष्वयेवरिवोविदः । स्वयंस्तोत्रेवयस्कृतः ॥ वृथाक्रीळंतऽइंदवःसधस्थमभ्येकमित् ।
सिंधोरूर्मान्व्यक्षरन् ॥ एतेविश्वानिवार्यापवमानासऽआशत । हितानसप्तयोरथे ॥ आस्मिन्पिशंगमिंदवोदधातावे
नमादिशे । योऽअस्मभ्यमरावा ॥ ऋभुर्नरथ्यंनवंदधाताकेतमादिशे । शुक्राःपवध्वमर्णसा ॥ एतऽउत्येऽअवीवश
न्काष्ठांवाजिनोऽअक्रत । सतःप्रासाविषुर्मतिं+ ॥ ११ ॥ (९।१।२२) एतेसोमासऽआशवोरथाऽइवप्रवाजिनः ।
सर्गाःसृष्टाऽअहेषत ॥ एतेवाताऽइवोरवःपर्जन्यस्येववृष्टयः । अग्नेरिवभ्रमावृथा ॥ एतेपूताविपश्चितःसोमासोद
ध्याशिरः । विपाव्यानशुर्धियः ॥ एतेमृष्टाऽअमर्त्याःससृवांसोनशश्रमुः । इयक्षंतःपथोरजः ॥ एतेपृष्ठानिरोदसोर्वि
प्रयंतोव्यानशुः । उतेदमुत्तमंरजः ॥ तंतुंतन्वानमुत्तममनुप्रवतऽआशत । उतेदमुत्तमाय्यं ॥ त्वंसोमपणिभ्यऽआ
वसुगव्यानिधारयः । ततंतंतुमचिक्रदः ॥ १२ ॥ (९।१।२३) सोमाऽअसृग्रमाशवोमधोर्मदस्यधारया । अभिवि

(९।१।२१) एतेधावंतीतिसप्तर्चस्यसूक्तस्यासितःपवमानसोमोगायत्री । (९।१।२२) एतेसोमासइतिसप्तर्चस्यसूक्तस्यासितःपव
मानसोमोगायत्री । (९।१।२३) सोमाअसृग्रमितिसप्तर्चस्यसूक्तस्यासितःपवमानसोमोगायत्री ।

श्वा॑नि॒काव्या॑ ॥ अनु॑प्र॒त्नास॑ऽआ॒यवः॑प॒दंनवी॑योऽअक्रमुः । रु॒चेज॑नंत॒सूर्यँ॑ ॥ आप॑वमाननोभरा॒र्योँऽअदा॑शुषो॒गयँ॑ । कृ॒धिप्र॒जाव॑ती॒रिषँः ॥ अ॒भिसोमा॑सऽआ॒यव॒ःपवँ॑ते॒मद्यँ॒मदँ । अ॒भिकोशँ॑मधु॒श्चुतँ ॥ सोमोँऽअर्षँतिधर्ण॒सिर्दधा॑नऽइंद्रि॒यँरसँ । सु॒वीरोँऽअभिशस्ति॒पाः+ ॥ इंद्रा॑यसोमपवसेदे॒वेभ्यः॑सध॒माद्यः॑ । इंदो॒वाजँ॑सिषाससि ॥ अ॒स्यपी॒त्वामदा॑ना॒मिंद्रोँवृ॒त्राण्यँ॑प्र॒ति । ज॒घान॑ज॒घनँ॑च्च॒नु+ ॥ १३ ॥ (९।१।२४) प्रसोमा॑सोऽअधन्वि॒षुःपव॑मानास॒ऽइंद॑वः । श्री॒णा॒नाऽअ॒प्सुमृँ॑जत ॥ अ॒भिगावोँऽअधन्वि॒षुरा॒पोनप्र॒वता॑य॒तीः । पु॒ना॒नाऽइंद्र॑माशत ॥ प्रप॑वमानधन्वसि॒सोमेँद्रा॑य॒पात॑वे । नृ॒भिर्य॒तोविनी॑यसे ॥ त्वंसोँ॑मनृ॒माद॑न॒ःपव॑स्वचर्षणी॒सहेँ । सस्नि॒र्योँऽअ॑नु॒माद्यः॑ ॥ इंदो॒यदद्रिँ॑भिःसु॒तःप॒वित्रँ॑परि॒धाव॑सि । अर॒मिंद्र॑स्य॒धाम्नेँ ॥ पव॑स्ववृत्रहन्तमो॒क्थेभि॑रनु॒माद्यः॑ । शुचिँ॑ःपाव॒कोऽअद्भु॑तः ॥ शुचिँ॑ःपाव॒कऽउ॑च्यते॒सोम॑ःसु॒तस्य॒मध्व॑ः । दे॒वा॒वीर॑घशंस॒हा+ ॥ १४ ॥ (९।२।१) पव॑स्वदक्ष॒साध॑नोदे॒वेभ्य॑ःपी॒तयेँहरे । म॒रुद्भ्योँवा॒यवे॒मद॑ः ॥ पव॑मानधि॒याहि॒तो॒३भियोनिँ॒कनिँक्रदत् । धर्मँ॑णावा॒युमाविँ॑श ॥ संदे॒वैःशोँ॑भते॒वृषा॑क॒विर्योँना॒वधिँप्रि॒यः । वृ॒त्र॒हादेँव॒वीत॑मः ॥ विश्वा॑रू॒पाण्या॑वि॒शन्पु॑ना॒नोया॑तिह॒र्य॑तः । यत्र॒ामृता॑स॒ऽआस॑ते ॥ अ॒रु॒षोज॒नय॒न्गिर॒ःसोम॑ःपव

(९।१।२४) प्रसोमासइतिसप्तर्चस्यसूक्तस्यासितःपवमानसोमोगायत्री ॥ द्वितीयेनुवाकेषट्त्रिंशत्सूक्तानि (९।२।१) पवस्वेतिषळर्चस्यसूक्तस्यागस्त्योदृळ्हच्युतःपवमानसोमोगायत्री ।

तऽआयुषक् । इंद्रंगच्छंन्कविक्रंतुः ॥ आपंवस्वमदिन्तमपवित्रंधारयाकवे । अर्कस्ययोनिंमासदं ॥ १५ ॥(९।२।२)
तमंमृक्षंतवाजिनंमुपस्थेऽअदिंतेरधिं । विप्रांसोऽअण्व्यांधिया+ ॥ तंगावोंऽअभ्यंनूषतसहस्रंधारमाक्षिंतं । इंदुंधर्ता
रमादिवः+ ॥ तंवेधांमेधयांह्यन्पवंमानमधिद्यविं । धर्णसिंभूरिंधायसं ॥ तमंह्यन्भुरिजोंर्धियासंवसांनंविवस्वंतः ।
पतिंवाचोऽअदांभ्यं ॥ तंसानावधिंजामयोहरिंहिन्वंत्यद्रिंभिः । हर्यतंभूरिंचक्षसं ॥ तंत्वांहिन्वंतिवेधसःपवंमानगि
रावृधं । इंदाविंद्रांयमत्सरं+ ॥ १६ ॥ (९।२।३) एषकविरभिष्टुंतःपवित्रेऽआधिंतोशते । पुनानोघ्नन्नपस्त्रिधंः ॥
एषऽइंद्रांयवायवेंस्वर्जिंतपरिंषिच्यते । पवित्रेंदक्षसाधंनः ॥ एषनृभिर्विंनीयतेदिवोमूर्धावृषांसुतः । सोमोवनेंषुविश्व
वित्+ ॥ एषगव्युरंचिक्रदत्पवंमानोहिरण्ययुः । इंदुंःसत्राजिदस्तृंतः ॥ एषसूर्येंणहासतेपवंमानोऽअधिद्यविं ।
पवित्रेंमत्सरोमदंः ॥ एषशुष्म्यंसिष्यददंतरिंक्षेवृषाहरिंः । पुनानऽइंदुरिंद्रमा+ ॥ १७ ॥ (९।२।४) एषवाजीहि
तोनृभिंर्विश्वविन्मनंसस्पतिंः । अव्योवारंविधांवति ॥ एषपवित्रेंऽअक्षरत्सोमोंदेवेभ्यंःसुतः । विश्वाधामांन्याविश
न्+ ॥ एषदेवःशुंभायतेधियोनावमंर्त्यः । वृत्रहादेंववीतंमः ॥ एषवृषाकनिंक्रदद्दशभिंर्जामिभिंर्यतः । अभिद्रोणां

(९।२।२) तममृक्षंतेतिषळर्चस्यसूक्तस्यदार्ढच्युतइध्मवाहःपवमानसोमोगायत्री । (९।२।३)एषकविरितिषळर्चस्यसूक्तस्यांगिरसो नृमेधःपवमानसोमोगायत्री । (९।२।४) एषवाजीतिषळर्चस्यसूक्तस्यांगिरसःप्रियमेधःपवमानसोमोगायत्री ।

Digitization by eGangotri. Funding MoE-Delhi

निधावति ॥ एषसूर्यमरोचयत्पवमानोविचर्षणिः । विश्वाधामानिविश्ववित्+ ॥ एषशुष्म्यदाभ्यःसोमःपुनानोऽअ
र्षति । देवावीरघशंसहा+ ॥ १८ ॥ (९।२।५) प्रास्यधाराऽअक्षरन्वृष्णःसुतस्यौजसा । देवाँऽअनुप्रभूषतः ॥
सप्तिंमृजंतिवेधसोगृणंतःकारवोगिरा । ज्योतिर्जज्ञानमुक्थ्यं* ॥ सुषहासोमतानितेपुनानायप्रभूवसो । वर्धासमुद्र
मुक्थ्यं* ॥ विश्वावसूनिसंजयन्पवस्वसोमधारया । इनुद्वेषाँसिसध्र्यक् ॥ रक्षासुनोऽअररुषःस्वनात्समस्यकस्यचि
त् । निदोयत्रमुमुच्महे ॥ एंदोपार्थिवंरयिंदिव्यंपवस्वधारया । द्युमंतंशुष्ममाभर ॥ १९ ॥ (९।२।६) प्रधाराऽ
अस्यशुष्मिणोवृथापवित्रेऽअक्षरन् । पुनानोवाचमिष्यति+ ॥ इंदुर्हियानःसोतृभिर्मृज्यमानःकनिक्रदत् । इयर्तिव
ग्नुमिंद्रियं+ ॥ आनःशुष्मँनृषाह्यँवीरवँतंपुरुस्पृहँ । पवस्वसोमधारया ॥ प्रसोमोऽअतिधारयापवमानोऽअसिष्यद
त् । अभिद्रोणान्यासदँ ॥ अप्सुत्वामधुमत्तमंहरिंहिन्वंत्यद्रिभिः । इंदविंद्रायपीतये ॥ सुनोतामधुमत्तमंसोममिंद्रा
यवज्रिणे । चारुंशर्धायमत्सरं+ ॥ २० ॥ (९।२।७) प्रसोमासःस्वाध्य१ःपवमानासोऽअक्रमुः । रयिंकृण्वंतिचेत
नं ॥ दिवस्पृथिव्याऽअधिभवेंदोद्युम्नवर्धनः । भवावाजानांपतिः ॥ तुभ्यंवाताऽअभिप्रियस्तुभ्यमर्षंतिसिंधवः । ॥५६॥

(९।२।५) प्रास्यधाराइतिषळर्चस्यसूक्तस्यांगिरसोनृमेधःपवमानसोमोगायत्री । (९।२।६) प्रधाराइतिषळर्चस्यसूक्तस्यांगिरसोबिंदुः पवमानसोमोगायत्री । (९।२।७) प्रसोमासइतिषळर्चस्यसूक्तस्यराहूगणोगोतमःपवमानसोमोगायत्री ।

सोम॒वर्धी॑तिते॒मह॑ः ॥ आप्या॑यस्व॒समे॑तुतेवि॒श्वत॑ःसोम॒वृष्ण्य॑ं । भवा॒वाज॑स्यसंग॒थे+ ॥ तुभ्य॒ंगावो॑घृतं॑पयो॒बभ्रो॑दुदु॒ह्रे ऽअक्षि॑तं । वर्षि॑ष्ठे॒ऽअधि॒सान॑वि ॥ स्वा॒युधस्य॑तेस॒तोभुव॑नस्यपतेव॒यं । इंदो॑सखि॒त्वमु॑श्मसि ॥ २१ ॥ (९।२।८) प्रसोमा॑सोमद॒च्युत॒ःश्रव॑सेनोम॒घोन॑ः । सु॒तावि॒दथे॑ऽअक्रमुः ॥ आदीं॑त्रि॒तस्य॒योष॑णो॒हरि॑ंहिन्व॒ंत्यद्रि॑भिः । इंदु॒मिंद्रा॑यपी॒तये॑ ॥ आदीं॑हं॒सोयथा॑ग॒णंविश्व॑स्यावीवशन्म॒तिं । अत्यो॒नगोभि॑रज्यते ॥ उ॒भेसोमा॑व॒चाक॑शन्मृ॒गोनत॒क्तोऽअ॑र्षसि । सीद॑न्नृ॒तस्य॒योनि॒मा+ ॥ अ॒भिगावो॑ऽअनूषत॒योषा॑जा॒रमि॑वप्रि॒यं । अग॑न्ना॒जिंयथा॑हि॒तं+ ॥ अ॒स्मेधे॑हिद्यु॒मद्यशो॑म॒घव॑द्भ्यश्च॒मह्यं॑च । स॒निंमे॒धामु॒तश्रव॑ः ॥ २२ ॥ (९।२।९) प्रसोमा॑सोविप॒श्चितो॒पांनय॑ंत्यू॒र्मय॑ः । वना॑निमहि॒षाऽइ॒व ॥ अ॒भिद्रोणा॑निब॒भ्रव॑ःशु॒क्राऽऋ॒तस्य॒धार॑या । वा॒जंगोम॑ंतमक्षरन् ॥ सु॒ताऽइंद्रा॑यवा॒यवे॒वरु॑णायम॒रुद्भ्य॑ः । सोमा॑ऽअर्षति॒विष्ण॑वे ॥ ति॒स्रोवाच॒ऽउदी॑रते॒गावो॑मिमंतिधे॒नव॑ः । हरि॑रेति॒कनि॑क्रदत् ॥ अ॒भिब्रह्मी॑रनूषतय॒ह्वीर्ऋ॒तस्य॑मा॒तर॑ः । म॒र्मृज्यंते॑दि॒वःशिशु॑ं ॥ रा॒यःस॑मु॒द्रांश्च॒तु॒रो॒स्मभ्य॑ंसोमवि॒श्वत॑ः । आप॑वस्वसह॒स्रिण॑ः ॥ २३ ॥(९।२।१०) प्रसु॑वा॒नोधार॑या॒तने॑दुर्हि॑न्वा॒नोऽअ॑र्षति । रु॒जदृ॒ळ्हाव्योज॑सा ॥ सु॒तऽइंद्रा॑यवा॒यवे॒वरु॑णायम॒रुद्भ्य॑ः । सोमो॑ऽअर्षति॒

(९।२।८) प्रसोमासइतिषळर्चस्यसूक्तस्यात्रेयःश्यावाश्वःपवमानसोमोगायत्री । (९।२।९) प्रसोमासइतिषळर्चस्यसूक्तस्याप्त्यस्त्रितःपवमानसोमोगायत्री । (९।२।१०) प्रसुवानइतिषळर्चस्यसूक्तस्याप्त्यस्त्रितःपवमानसोमोगायत्री ।

विष्ण॑वे ॥ वृषा॑णं॒वृष॑भि॒र्यतं॑सु॒न्वंति॒सोम॒मद्रि॑भिः । दु॒हंति॒शक्म॑ना॒पयः॑ ॥ भुव॑त्त्रि॒तस्य॒मर्ज्यो॒भुव॒दिंद्रा॑यमत्स॒रः । सं
रू॒पैर॑ज्यते॒हरिः॑ ॥ अ॒भीमृ॒तस्य॑वि॒ष्टपं॑दुह॒तेपृश्नि॑मातरः । चारु॑प्रि॒यत॑मंह॒विः+ ॥ समे॑न॒मह्रु॑ताऽइ॒मागिरो॑ऽअर्षंतिस॒
स्रुतः॑ । धे॒नूर्वा॒श्रोऽअ॑वीवशत् ॥ २४ ॥ (९।२।११) आनः॑पवस्व॒धार॑या॒पव॑मानर॒यिंपृ॒थुं । यया॒ज्योति॑र्वि॒दा
सि॑नः ॥ इंद्रो॑समुद्रमीं॑खय॒पव॑स्वविश्वमेजय । रा॒योध॒र्ता न॒ऽओज॑सा ॥ त्वया॑वी॒रेण॑वीरवो॒भिष्या॑मपृतन्य॒तः । क्षरा॑
णोऽअ॒भिवार्यं॑ ॥ प्रवाज॒मिंदु॑रिष्यति॒सिषा॑सन्वाज॒साऽऋषिः॑ । व्र॒तावि॑दा॒नऽआयु॑धा ॥ तंगी॒र्भिर्वा॑चमीं॒खयं॑पुना॒नं
वा॑सयामसि । सोम॒ंजन॑स्य॒गोप॑तिं ॥ विश्वो॒यस्य॑व्र॒तेजनो॑दा॒धार॒धर्म॑ण॒स्पतेः॑ । पु॒नानस्य॑प्र॒भूव॑सोः ॥२५॥(९।२।१२)
अस॑र्जि॒रथ्यो॑यथाप॒वित्रे॑च॒म्वोः॑सु॒तः । कार्ष्म॑न्वा॒जीन्य॑क्रमीत् ॥ सव॒ह्निः॑सोम॒जागृ॑वि॒ःपव॑स्वदेव॒वीरति॑ । अ॒भिकोशं॑
मधु॒श्चुतं॑ ॥ सनो॒ज्योतीं॑ऽषिपूर्व्य॒पव॑मान॒विरो॑चय । क्रत्वे॒दक्षा॑यनोहिनु ॥ शुं॒भमा॑नऽऋ॒तायु॒भिर्मृ॒ज्यमा॑नो॒गभ॑स्त्योः ।
पव॑ते॒वारे॑ऽअ॒व्यये॑ ॥ सविश्वा॑दा॒शुषे॒वसु॒सोमो॑दि॒व्यानि॒पार्थि॑वा । पव॑ता॒मांतरि॑क्ष्या ॥ आदि॒वस्पृ॒ष्ठम॑श्व॒युर्ग॑व्य॒युः
सोम॑रोहसि । वी॒र॒युःश॑वसस्पते ॥ २६ ॥ (९।२।१३) ससु॒तःपी॒तये॑वृ॒षा॒सोमः॑प॒वित्रे॑ऽअर्षति । वि॒घ्नन्रक्षां॑सिदेव॒युः+ ॥ ॥५७॥

(९।२।११) आनःपवस्वेतिषळर्चस्यसूक्तस्यांगिरसःप्रभूवसुःपवमानसोमोगायत्री । (९।२।१२) असर्जीतिषळर्चस्यसूक्तस्यांगिरसः प्रभूवसुःपवमानसोमोगायत्री । (९।२।१३) ससुतइतिषळर्चस्यसूक्तस्यांगिरसोरहूगणःपवमानसोमोगायत्री ।

सप॒वित्रे॑विचक्ष॒णोहरि॑रर्षतिधर्ण॒सिः। अ॒भियोनि॒ंकनि॑क्रदत् ॥ सवा॒जीरो॑च॒नादि॒वःपव॑माना॒ेविधा॑वति ।र॒क्षो॒हावार॑म॒व्ययँ॑ ॥ सत्रि॒तस्याधि॒सान॑वि॒पव॑मानोऽअरोचयत्। जा॒मिभि॒ःसूर्यँ॑स॒ह+ ॥ सवृ॑त्र॒हावृषा॑सु॒तोव॑रिवो॒विदद॑भ्यः । सोमो॒वाज॑मिवासरत् ॥ सदे॒वःक॒विने॑षि॒तो॒३भिद्रोणा॑निधावति । इंदु॒रिंद्रा॑यमं॒हना॑ ॥ २७॥ (९।२।१४) ए॒षऽउ॒स्यवृषा॒रथो॒व्यो॒वारे॑भिरर्षति । गच्छ॒न्वाजं॑सह॒स्रिणं॑ ॥ ए॒तंत्रि॒तस्य॒योष॑णो॒हरि॑ंहिन्व॒ंत्यद्रि॑भिः । इंदु॒मिंद्रा॑यपी॒तये॑ ॥ ए॒तंत्यंह॒रितो॒दश॑मर्मृ॒ज्यंते॑ऽअप॒स्युव॑ः । याभि॒र्मदा॑य॒शुंभ॑ते ॥ ए॒षस्यमानु॑षी॒ष्वाश्ये॒नोनवि॒क्षुसी॑दति । गच्छं॒ञ्जा॒रोनयो॒षितं॑ ॥ ए॒षस्यमद्यो॒रसोव॑चष्टेदि॒वःशिशु॑ः । यऽइंदु॒र्वार॒मावि॑शत् ॥ ए॒षस्यपी॒तये॑सु॒तोहरि॑रर्षतिधर्ण॒सिः । क्रंद॒न्योनिं॑म॒भिप्रि॒यं+ ॥ २८ ॥ (९।२।१५) आ॒शुर॑र्षबृहन्मते॒परि॑प्रि॒येण॒धाम्ना॑ । यत्र॑दे॒वाऽइति॒ब्रव॑न् ॥ प॒रि॒ष्कृ॒ण्वन्ननि॑ष्कृ॒तंजना॑ययातय॒न्निष॑ः । वृ॒ष्टिंदि॒वःपरि॑स्रव ॥ सु॒तऽए॑ंतिप॒वित्र॒ऽआत्विषिं॒दधा॑न॒ऽओज॑सा । वि॒चक्षा॑णोविरो॒चय॑न् ॥ अ॒यंसयोदि॒वस्परि॑रघु॒यामा॑प॒वित्र॒ऽआ । सिंधो॑रू॒र्मा व्यक्ष॑रत् ॥ आ॒विवा॑सन्परा॒वतो॒ऽअथो॑ऽअर्वा॒वत॑ःसु॒तः । इंद्रा॑यसिच्यते॒मधु॑ ॥ स॒मी॒ची॒नाऽअ॑नूषत॒हरि॑ंहिन्व॒ंत्यद्रि॑भिः । योना॑वृ॒तस्य॑सीदत ॥ २९ ॥ (९।२।१६) पु॒ना॒नो

(९।२।१४) एषउस्येतिषळर्चस्यसूक्तस्यांगिरसोरहूगणःपवमानसोमोगायत्री । (९।२।१५) आशुरर्षेतिषळर्चस्यसूक्तस्यांगिरसोबृहन्मतिःपवमानसोमोगायत्री । (९।२।१६) पुनानइतिषळर्चस्यसूक्तस्यांगिरसोबृहन्मतिःपवमानसोमोगायत्री ।

ऽअक्रमीदभिविश्वामृधोविचर्षणिः । शुंभंतिविप्रंधीतिभिः ॥ आयोनिमरुणोरुहद्गमदिंद्रंवृषासुतः । ध्रुवेसदसिसीदति ॥ नूनोरयिंमहामिंदोस्मभ्यंसोमविश्वतः । आपवस्वसहस्रिणं ॥ विश्वासोमपवमानद्युम्नानींदवाभर । विदाःसहस्रिणीरिषः ॥ सनःपुनानऽआभररयिंस्तोत्रेसुवीर्यं । जरितुर्वर्धयागिरः ॥ पुनानऽइंदवाभरसोमद्विबर्हसंरयिं । वृषन्निंदोनऽउक्थ्यं* ॥ ३० ॥ (९।२।१७) प्रयेगावोनभूर्णयस्त्वेषाऽअयासोऽअक्रमुः । घ्नंतःकृष्णामपत्वचं ॥ सुवितस्यमनामहेतिसेतुंदुराव्यं । साह्वांसोदस्युमव्रतं+ ॥ शृण्वेवृष्टेरिवस्वनःपवमानस्यशुष्मिणः । चरंतिविद्युतोदिवि+ ॥ आपवस्वमहीमिषंगोमदिंदोहिरण्यवत् । अश्वावद्वाजवत्सुतः+ ॥ सपवस्वविचर्षणऽआमहीरोदसीपृण । उषाःसूर्योनरश्मिभिः ॥ परिणःशर्मयंत्याधारयासोमविश्वतः । सरारसेवविष्टपं ॥ ३१ ॥ (९।२।१८) जनयन्रोचनादिवोजनयन्नप्सुसूर्यं । वसानोगाऽअपोहरिः ॥ एषप्रत्नेनमन्मनादेवोदेवेभ्यस्परि । धारयापवतेसुतः+ ॥ वावृधानायतूर्वयेपवंतेवाजसातये । सोमाःसहस्रपाजसः ॥ दुहानःप्रत्नमित्पयःपवित्रेपरिषिच्यते । क्रंदन्देवाँऽअजीजनत् ॥ अभिविश्वानिवार्याभिदेवाँऽऋतावृधः । सोमःपुनानोऽअर्षति ॥ गोमन्नःसोमवीरवदश्वावद्वाजवत्सुतः ।

(९।२।१७) प्रयेगावइतिषळर्चस्यसूक्तस्यकाण्वोमेध्यातिथिःपवमानसोमोगायत्री । (९।२।१८) जनयन्नितिषळर्चस्यसूक्तस्यमेध्यातिथिःपवमानसोमोगायत्री ।

पव॑स्वबृह॒तीरिषः॑ ॥ ३२ ॥ (९।२।१९) यो॑ऽअत्यं॑ऽइवमृ॒ज्यते॒गोभि॒र्मदा॑यह॒र्य॑तः । तंगी॒र्भिर्वा॑सयामसि ॥ तंनो॒
विश्वा॑ऽअव॒स्यु॒वो॒गिरः॑शुंभंतिपू॒र्वथा॑ । इंदु॒मिंद्रा॑यपी॒तये॑ ॥ पु॒ना॒नोया॑तिह॒र्य॑तःसोमो॑गी॒र्भिः॑परि॑ष्कृतः । विप्र॑स्य॒मेध्या॑
तिथेः ॥ पव॑मानवि॒दा॒र॒यिम॒स्मभ्यं॑सोमसु॒श्रियं॑ । इंदो॑स॒हस्र॑वर्चसं ॥ इंदु॒रत्यो॒नवा॑ज॒सृत्कनि॑क्रंतिप॒वित्र॒ऽआ । यद
क्षा॒रति॑देव॒युः+ ॥ पव॑स्व॒वाजं॑सातये॒विप्र॑स्यगृण॒तोवृ॒धे । सोम॒रास्वं॑सु॒वीर्यं॑ ॥३३॥ इतिषष्ठाष्टकेऽष्टमोऽध्यायः ॥८॥

अष्टचत्वारिंशाध्यायेवर्गाः ३३ सूक्तानि ३१ ऋचः २०४ ॥ त्यागः ॥ पवमानायसोमायेदं. २०४ ॥ इतिषष्ठेऽष्टमः ॥

(९।२।१९) योअत्यइवेतिषळर्चस्यसूक्तस्यमेध्यातिथिःपवमानसोमोगायत्री ।

Digitization by eGangotri. Funding MoE-Delhi

॥ इतिषष्ठाष्टकःसमाप्तः ॥

॥ अथसप्तमाष्टकप्रारंभः ॥

सं. ५८

ॐ प्रणोयास्यःसपवस्वांसृग्रन्नयासोर्मःपंचकविभागवस्तंत्वापवस्वौत्तिशुष्मासउचथ्योंध्वयोंपरिद्युक्षंउत्तेचतुष्कमवत्सारोंस्यप्रत्वांयवंयवँपरिसोमःप्रतेधारांस्तरत्सपवस्वप्रगायत्रेणोंपांत्यापुरउष्णिगयावीतीत्रिंशदमहींयुरेतेऽअसृग्रंजमदग्निरापवस्वनिध्रुविःकाश्यपोंवृषासोमकश्यपः ॥ १ ॥

॥ हरिःओम् ॥ (९।२।२०) प्रणंऽइंदोमहेतनंऽऊर्मिनबिभ्रंदर्षसि । अभिदेवाँऽअयास्यः ॥ मतीजुष्टोधियाहितःसोमोंहिन्वेपरावर्ति । विप्रंस्यधारंयाकविः⁺ ॥ अयंदेवेषुजागृंविःसुतऽएंतिपवित्रऽआ । सोमोंयातिविर्चर्षणिः ॥ सनंःपवस्ववाजयुश्चंक्राणश्चारुंमध्वरं । बर्हिंष्माँऽआविंवासति ॥ सनोभगांयवायवेविप्रंवीरःसदावृंधः । सोमोंदेवेष्वायंमत् ॥ सनोंऽअद्यवसुंत्तयेक्रतुविद्गांतुवित्तंमः । वाजंजेषिश्रवोंबृहत्⁺ ॥१॥ (९।२।२१) सपंवस्वमदांयकंनृचक्षांदेववींतये । इंदविंद्रांयपीतयें ॥ सनोंऽअर्षाभिदूत्यं१त्वमिंद्रांयतोशसे । देवान्त्सखिंभ्यऽआवरं ॥ उतत्वामरुणंवयंगोभिरंञ्ज्मोमदांयकं । विनोंरायेदुरोंवृधि ॥ अत्यूंपवित्रंमक्रमीद्वाजीधुरंनयामंनि । इंदुंर्देवेषुंपत्यते ॥ समीसखांयोऽअस्वरन्वनेक्रीळंतमत्यंविं । इंदुंनावाऽअंनूषत ॥ तयांपवस्वधारंयाययांपीतोविचक्षसे । इंदोस्तोत्रेसु

(९।२।२०) प्रणइंदवितिषळर्चस्यसूक्तस्यांगिरसोयास्यःपवमानसोमोगायत्री । (९।२।२१) सपवस्वेतिषळर्चस्यसूक्तस्यायास्यःपवमानसोमोगायत्री ।

वीर्यं ॥ २ ॥ (९।२।२२) असृग्रंदेववीतयेत्यासःकृत्व्याऽइव । क्षरंतःपर्वतावृधः ॥ परिष्कृतासऽइंदवोयोषेवपि
त्र्यावती । वायुंसोमाऽअसृक्षत ॥ एतेसोमासऽइंदवःप्रयस्वंतश्चमूसुताः । इंद्रंवर्धंतिकर्मभिः ॥ आधावतासुह
स्त्यःशुक्रागृभ्णीतमंथिना । गोभिःश्रीणीतमत्सरं$^{+}$ ॥ सपवस्वधनंजयप्रयंताराधसोमहः । अस्मभ्यंसोमगातुवि
त्$^{+}$ ॥ एतंमृजंतिमर्ज्यंपवमानंदशक्षिपः । इंद्रायमत्सरंमदं ॥ ३ ॥ (९।२।२३) अयासोमःसुकृत्ययामहश्चि
दभ्यवर्धत । मंदानऽउद्वृषायते ॥ कृतानीदस्यकर्त्वाचेतंतेदस्युतर्हणा । ऋणाचधृष्णुश्चयते ॥ आत्सोमऽइंद्रियोर
सोवज्रःसहस्रसाभुवत् । उक्थंयदस्यजायते ॥ स्वयंकविर्विधर्तरिविप्रायरत्नमिच्छति । यदीमर्मृज्यतेधियः ॥ सि
षासतूरयीणांवाजेष्ववतामिव । भरेषुजिग्युषामसि ॥ ४ ॥ (९।२।२४) तंत्वानृम्णानिविभ्रतंसधस्थेषुमहोदि
वः । चारुंसुकृत्ययेमहे ॥ संवृक्तधृष्णुमुक्थ्यंमहामहिव्रतंमदं । शतंपुरोरुरुक्षणिं ॥ अतस्त्वारयिमभिराजानंसुक्रतो
दिवः । सुपर्णोऽअव्यथिर्भरत् ॥ विश्वस्माऽइत्स्वर्दृशेसाधारणंरजस्तुरं । गोपामृतस्यविर्भरत् ॥ अधाहिन्वानऽइं
द्रियंज्यायोमहित्वमानशे । अभिष्टिकृद्विचर्षणिः ॥ ५ ॥ (९।२।२५) पवस्ववृष्टिमासुनोपामूर्मिंदिवस्परि । अ

(९।२।२२) असृग्रमितिषळर्चस्यसूक्तस्ययास्यःपवमानसोमोगायत्री।(९।२।२३) अयासोमइतिपंचर्चस्यसूक्तस्यभार्गवःकविःपवमानसोमोगायत्री। (९।२।२४) तंत्वेतिपंचर्चस्यसूक्तस्यकविःपवमानसोमोगायत्री। (९।२।२५) पवस्वेतिपंचर्चस्यसूक्तस्यकविःपवमानसोमोगायत्री।

य॒क्ष्माबृ॑ह॒तीरिषः॑॥ तया॑पवस्व॒धार॑या॒यया॒गाव॑ऽइ॒हाग॒मन् । जन्या॑स॒ऽउप॑नोगृ॒हं+॥ घृ॒तंप॑वस्व॒धार॑याय॒ज्ञेषु॑दे॒ववी॑तमः। अ॒स्मभ्यं॑वृ॒ष्टिमाप॑व ॥ सनं॑ऽऊ॒र्जेव्य॑१॒व्ययं॑प॒वित्रं॑धाव॒धार॑या । दे॒वास॑ःशृ॒णव॒न्हिकं॑ ॥ पव॑मानोऽअसिष्यद॒द्रक्षां॑स्यप॒जंघ॑नत् । प्र॒त्न॒वद्रो॒चय॒न्नुच॑ः ॥६॥ (९।२।२६) उत्ते॒शुष्मा॑सऽईरते॒सिंधो॑रू॒र्मेरि॑वस्व॒नः । वा॒णस्य॑चोदयाप॒वि॑+ ॥ प्र॒स॒वे॑त॒ऽउदी॑रतेति॒स्रोवाचो॑मख॒स्युव॑ः । यदव्य॒ऽएषि॒सान॑वि ॥ अव्यो॒वारे॒परि॑प्रि॒यंहरि॑हिन्वं॒त्यद्रि॑भिः । पव॑मानंमधु॒श्चुतं॑ ॥ आप॑वस्वमदिं॑तमप॒वित्र॒ंधार॑याकवे । अ॒र्कस्य॒योनिं॑मा॒सदं॑ ॥ सप॑वस्वमदिं॑तम॒गोभि॑रंजा॒नोऽअ॒क्तुभि॑ः । इंदा॒विंद्रा॑यपी॒तये॑ ॥ ७॥ (९।२।२७) अध्व॑र्यो॒ऽअद्रि॑भिःसु॒तंसोमं॑प॒वित्र॒ऽआसृ॑ज । पु॒नी॒हींद्रा॑य॒पात॑वे ॥ दि॒वःपी॒यूष॑मुत्त॒मंसो॑म॒मिंद्रा॑यव॒ज्रिणे॑ । सुनो॒तामधु॑मत्तमं ॥ तव॒त्यऽइं॑दो॒ऽअंध॑सोदे॒वामधो॒व्य॑श्नते । पव॑मानस्यम॒रुत॑ः ॥ त्वंहिसो॑मव॒र्धय॑न्त्सुतोमदा॑य॒भूर्ण॑ये । वृष॑न्त्स्तो॒तार॑मू॒तये॑ ॥ अ॒भ्य॑र्षविचक्षणप॒वित्र॒ंधार॑यासुतः । अ॒भिवाजं॑मु॒तश्रव॑ः ॥ ८ ॥ (९।२।२८) परि॑द्यु॒क्षःस॒नद्र॑यि॒र्भर॒द्वाजं॑नो॒ऽअंध॑सा । सु॒वा॒नोऽअ॑र्षप॒वित्र॒ऽआ+ ॥ तव॑प्र॒त्नेभि॒रध्व॑भि॒रव्यो॒वारे॒परि॑प्रि॒यः । स॒हस्र॑धारो॒यात्त॑ना ॥ च॒रुर्नयस्तमीं॑ख॒यें॒दो॒नदान॑मीं॑खय । व॒धैर्व॑धस्नवीं॑खय ॥ निशुष्मा॑मिंदवे॒षांपु॑रुहू॒त

(९।२।२६) उत्तेशुष्मासइतिपंचर्चस्यसूक्तस्यआंगिरसउचथ्यःपवमानसोमोगायत्री । (९।२।२७) अध्वर्योइतिपंचर्चस्यसूक्तस्योचथ्यः पवमानसोमोगायत्री । (९।२।२८) परिद्युक्षइतिपंचर्चस्यसूक्तस्योचथ्यःपवमानसोमोगायत्री ।

जनानां । योऽअस्माँऽआदिदेशति ॥ शतंनऽइंदऽऊतिभिःसहस्रंवाशुचीनां । पवस्वमंहयद्रयिः ॥ ९ ॥ (९।२।२९)
उत्तेशुष्मासोऽअस्थूरक्षोभिंदंतोऽअद्रिवः । नुदस्वयाःपरिस्पृधः ॥ अयानिजघ्निरोजसारथसंगेधनेहिते । स्तवाऽअ
बिभ्युषाहृदा+ ॥ अस्यव्रतानिनाधृषेपवमानस्यदूढ्या । रुजयस्त्वापृतन्यति ॥ तंहिन्वंतिमदच्युतंहरिंनदीषुवाजिनं ।
इंदुमिंद्रायमत्सरं+ ॥१०॥(९।२।३०) अस्यप्रत्नामनुद्युतंशुक्रंदुदुह्रेऽअह्रयः । पयःसहस्रसामृषिं ॥ अयंसूर्यऽइवोपदृगयं
सरांसिधावति । सप्तप्रवतऽआदिवं ॥ अयंविश्वानितिष्ठतिपुनानोभुवनोपरि । सोमोदेवोनसूर्यः ॥ परिणोदेववीतये
वाजाँऽअर्षसिगोमतः । पुनानऽइंदविंद्रयुः+ ॥ ११ ॥ (९।२।३१) यवंयवंनोऽअंधसापुष्टंपुष्टंपरिस्रव । सोमवि
श्वाचसौभंगा ॥ इंदोयथातवस्तवोयथातेजातमंधसः । निबर्हिषिप्रियेसदः ॥ उतनोगोविदश्ववित्पवस्वसोमांध
सा । मक्षूतमेभिरहंभिः ॥ योजिनातिनजीयतेहंतिशत्रुमभीत्य । सपवस्वसहस्रजित् ॥ १२ ॥ (९।२।३२) परि
सोमऽऋतंबृहदाशुःपवित्रेऽअर्षति । विघ्नन्रक्षांसिदेवयुः+ ॥ यत्सोमोवाजमर्षतिशतंधाराऽअपस्युवः । इंद्रस्यसख्य ॥ ३ ॥

(९।२।२९) उत्तेशुष्मासइतिचतुर्ऋचस्यसूक्तस्यकाश्यपोवत्सारःपवमानसोमोगायत्री । (९।२।३०) अस्यप्रत्नामितिचतुर्ऋचस्य सूक्तस्यावत्सारःपवमानसोमोगायत्री । (९।२।३१) यवंयवमितिचतुर्ऋचस्यसूक्तस्यावत्सारःपवमानसोमोगायत्री । (९।२।३२) परिसोम इतिचतुर्ऋचस्यसूक्तस्यावत्सारःपवमानसोमोगायत्री ।

मा॑वि॒शन्॑ ॥ अ॒भित्वा॒योषं॑णो॒दशं॑जा॒रंनक॒न्या॑नूषत । मृ॒ज्यसैंसोमसा॒तयैं ॥ त्वमिंद्रा॑य॒विष्णं॑वेस्वा॒दुरिं॑द॒ोपरिं॑स्रव । नृ॒न्तस्तो॒तृन्पा॒ह्यंहं॑सः ॥ १३ ॥ (९।२।३३) प्रते॒धारा॑ऽअस॒श्चतौ॑दि॒वोनयँ॑तिवृ॒ष्टयः॑ । अच्छा॒वाजं॑सह॒स्रिणं॑ ॥ अ॒भिप्रि॒याणि॒काव्या॒विश्वा॒चक्षा॑णोऽअर्षति । हरिं॑स्तुंजा॒नऽआयुं॑धा ॥ सम॑र्मृजा॒नऽआ॒युभि॒रिभो॒राजें॑वसुव्र॒तः । श्ये॒नोनवं॑सुषीदति ॥ सनो॒विश्वा॑दि॒वोवसू॒तोपृं॑थि॒व्याऽअधिं॑ । पु॒नानऽइंद॒वाभं॑र ॥ १४ ॥ (९।२।३४) तर॒त्सम॒ंदीधा॑वति॒धारा॑सु॒तस्यांध॑सः । तर॒त्सम॒ंदीधा॑वति ॥ उ॒स्रावे॑द॒वसू॒नां॑मर्तस्यदे॒व्यव॑सः । तर॒त्स० ॥ ध्व॒स्रयोः॑पुरु॒षंत्यो॒रास॒हस्रा॑णिदद्महे । तर॒त्स० ॥ आययो॑स्त्रिं॒शतं॒तना॑स॒हस्रा॑णि॒चदद्महे । तर॒त्स० ॥ १५ ॥ (९।२।३५) पव॑स्वगो॒जिद॑श्व॒जिद्विंश्व॒जित्सो॑मरण्य॒जित् । प्र॒जाव॒द्रत्न॒माभ॑र ॥ पव॑स्वा॒द्भ्योऽअदा॑भ्य॒ःपव॒स्वौष॑धीभ्यः । पव॑स्वधि॒षणा॑भ्यः ॥ त्वंसो॑म॒पव॑मानो॒विश्वा॑निदु॒रिताति॑र । क॒विःसी॑द॒निब॒र्हिषि॑ ॥ पव॑मान॒ःस्व॑र्विदो॒जाय॑मानोभवोम॒हान् । इंदो॒विश्वाँ॑ऽअ॒भीद॑सि ॥ १६ ॥ (९।२।३६) प्रगा॑य॒त्रेण॑गायत॒पव॑मान॒ंविच॑र्षणिं । इंदुं॑स॒हस्र॑चक्षसं ॥ तंत्वा॑स॒हस्र॑चक्ष

(९।२।३३) प्रतेधाराइतिचतुर्ऋचस्यसूक्तस्यावत्सारःपवमानसोमोगायत्री । (९।२।३४) तरत्समंदीतिचतुर्ऋचस्यसूक्तस्यावत्सारः पवमानसोमोगायत्री । (९।२।३५) पवस्वेतिचतुर्ऋचस्यसूक्तस्यावत्सारःपवमानसोमोगायत्री । (९।२।३६) प्रगायत्रेणेतिचतुर्ऋचस्य सूक्तस्यावत्सारःपवमानसोमोगायत्रीतृतीयापुरउष्णिक् ।

समथौसहस्त्रंभर्णसं । अतिवारमपाविषुः ॥ अतिवारान्पवमानोऽअसिष्यदत्कलशाँऽअभिधावति । इंद्रस्यहार्द्या
विशन्+ ॥ इंद्रस्यसोमराधसेशंपवस्वविचर्षणे । प्रजावद्रेतआभर ॥ १७ ॥ (९।३।१) अयावीतीपरिस्रवय
स्तंऽइंदोमदेष्वा । अवाहन्नवतीर्नव ॥ पुरःसद्यऽइत्थाधियेदिवोदासायशंबरं । अधत्यंतुर्वशंयदुं ॥ परिणोऽअ
॥ ४ ॥ श्वमश्वविद्गोमदिंदोहिरण्यवत् । क्षरासहस्रिणीरिषः ॥ पवमानस्यतेवयंपवित्रमभ्युंदतः । सखित्वमावृणीमहे ॥
येतेपवित्रमूर्मयोभिक्षरंतिधारया । तेभिर्नःसोममृळय ॥ १८ ॥ सनःपुनानऽआभररयिंवीरवतीमिषं । ईशानःसो
मविश्वतः ॥ एतमुत्यंदशक्षिपोमृजंतिसिंधुमातरं । समादित्येभिरख्यत ॥ समिंद्रेणोतवायुनासुतऽएतिपवित्रऽआ ।
संसूर्यस्यरश्मिभिः ॥ सनोभगायवायवेपूष्णेपवस्वमधुमान् । चारुर्मित्रेवरुणेच ॥ उच्चातेजातमंधसोदिविषद्भूम्या
ददे । उग्रंशर्ममहिश्रवः ॥ १९ ॥ एनाविश्वान्यर्यऽआद्युम्नानिमानुषाणां । सिषासंतोवनामहे ॥ सनऽइंद्राययज्य
वेवरुणायमरुद्भ्यः । वरिवोवित्परिस्रव ॥ उपोषुजातमप्तुरंगोभिर्भंगंपरिष्कृतं । इंदुंदेवाऽअयासिषुः ॥ तमिद्वर्धंतु
नोगिरोवत्संसंशिश्वरीरिव । यऽइंद्रस्यहृदंसनिः ॥ अर्षाणःसोमशंगवेधुक्षस्वपिप्युषीमिषं । वर्धासमुद्रमुक्थ्यं* ॥ ४ ॥
॥ २० ॥ पवमानोऽअजीजनद्दिवश्चित्रंनतन्यतुं । ज्योतिर्वैश्वानरंबृहत्+ ॥ पवमानस्यतेरसोमदोराजन्नदुच्छुनः ।

तृतीयेनुवाकेसप्तसूक्तानि (९।३।१) अयावीतीति [illegible] पवमानसोमोगायत्री ।

CC-0. [illegible] Acharya [illegible] Collection

विवारमव्यमर्षति ॥ पवमानरसस्तवदक्षोविराजतिद्युमान् । ज्योतिर्विश्वंस्वर्दृशे+ ॥ यस्तेमदोवरेण्यस्तेनापवस्वांध
सा । देवावीरघशंसहा+ ॥ जघ्निर्वृत्रममित्रियंसस्निर्वाजंदिवेदिवे । गोषाऽउंऽअश्वसाऽअसि ॥२१॥ संमिश्लोऽअ
रुषोभवसूपस्थाभिर्नधेनुभिः । सीदन्छ्येनोनयोनिमा+ ॥ सपवस्वयऽआविथेंद्रंवृत्रायहंतवे । वव्रिवांसंमहीरपः+ ॥
सुवीरासोवयंधनाजयेमसोममीढ्वः । पुनानोवर्धनोगिरः ॥ त्वोतासस्तवावसास्यामवन्वंतऽआमुरः । सोमव्रतेषुजा
गृहि ॥ अपघ्नन्पवतेमृधोपसोमोऽअराव्णः । गच्छन्निंद्रस्यनिष्कृतं+ ॥ २२ ॥ महोनोरायऽआभरपवमानजहीमृ
धः । रास्वेंदोवीरवद्यशः ॥ नत्वाशतंचनह्रुतोराधोदित्संतमामिनन् । यत्पुनानोमखस्यसे ॥ पवस्वेंदोवृषासुतःकृधी
नोयशसोजने । विश्वाऽअपद्विषोजहि ॥ अस्यंतेसख्येवयंतवेंदोद्युम्नऽउत्तमे । सासह्यामपृतन्यतः+ ॥ यातेभीमा
न्यायुधातिग्मानिसंतिधूर्वणे । रक्षासमस्यनोनिदः+ ॥ २३ ॥ (९।३।२) एतेऽअसृग्रमिंदवस्तिरःपवित्रमाशवः ।
विश्वान्यभिसौभगा ॥ विघ्नंतोदुरितापुरुसुगातोकायवाजिनः । तनाकृण्वंतोऽअर्वते ॥ कृण्वंतोवरिवोगवेभ्यर्षतिसु
ष्टुतिं । इळामस्मभ्यंसंयतं ॥ असाव्यंशुर्मदायाप्सुदक्षोगिरिष्ठाः । श्येनोनयोनिमासदत् ॥ शुभ्रमंधोदेववातमप्सु
धूतोनृभिःसुतः । स्वदंतिगावःपयोभिः ॥ २४ ॥ आदीमश्वंनहेतारोशूशुभन्नमृताय । मध्वोरसंसधमादे ॥ यास्ते

(९।३।२) एतेअसृग्रमितित्रिंशदृचस्यसूक्तस्यभार्गवोजमदग्निःपवमानसोमोगायत्री।

ऋक्सं.

अ.७अ.१

॥ ५ ॥

मंडलं ९

अनु. ३

धारामधुश्चुतोसृग्रमिंदऽऊतयै । ताभिःपवित्रमासदः ॥ सोऽअर्षेंद्रायपीतयेतिरोरोमाण्यव्यया । सीदन्योनावने

ष्वा+ ॥ त्वमिंदोपरिस्रवस्वादिष्ठोऽअंगिरोभ्यः । वरिवोविद्घृतंपयः ॥ अयंविचर्षणिर्हितःपवमानःसचेतति ।
हिन्वानऽआप्यंबृहत्+ ॥ २५ ॥ एषवृषावृषव्रतःपवमानोऽअशस्तिहा । करद्वसूनिदाशुषे ॥ आपवस्वसहस्रिणंर
यिंगोमंतमश्विनं । पुरुश्चंद्रंपुरुस्पृहं ॥ एषस्यपरिषिच्यतेमर्मृज्यमानऽआयुभिः । उरुगायःकविक्रतुः ॥ सहस्रोतिः
शतामघोविमानोरजसःकविः । इंद्रायपवतेमदः ॥ गिराजातऽइहस्तुतऽइंदुरिंद्रायधीयते । विर्योनावसताविव
॥ २६ ॥ पवमानःसुतोनृभिःसोमोवाजमिवासरत् । चमूषुशक्मनासदं ॥ तंत्रिपृष्ठेत्रिवंधुरेरथेयुंजंतियातवे । ऋषी
णांसप्तधीतिभिः ॥ तंसोतारोधनस्पृतमाशुंवाजाययातवे । हरिंहिनोतवाजिनं ॥ आविशन्कलशंसुतोविश्वाऽअर्षन्न
भिश्रियः । शूरोनगोषुतिष्ठति ॥ आतऽइंदोमदायकंपयोदुहंत्यायवः । देवादेवेभ्योमधु ॥ २७ ॥ आनःसोमंपवि
त्रऽआसृजतामधुमत्तमं । देवेभ्योदेवश्रुत्तमं ॥ एतेसोमाऽअसृक्षतगृणानाःश्रवसेमहे । मदिन्तमस्यधारया ॥ अभि
गव्यानिवीतयेनृम्णापुनानोऽअर्षसि । सनद्वाजःपरिस्रव ॥ उतनोगोमतीरिषोविश्वाऽअर्षपरिष्टुभः । गृणानोजमद ॥ ५ ॥
ग्निना ॥ पवस्ववाचोऽअग्रियःसोमचित्राभिरूतिभिः । अभिविश्वानिकाव्या ॥२८॥ त्वंसमुद्रियाऽअपोग्रियोवाच
ऽईरयन् । पवस्वविश्वमेजय ॥ तुभ्येमाभुवनाकवेमहिम्नेसोमतस्थिरे । तुभ्यमर्षंतिसिंधवः ॥ प्रतेदिवोनवृष्टयोधा

रा॑यं॑त्यस॒श्चत॑ः । अ॒भिशु॒क्रामु॑प॒स्तिर॑ं ॥ इंद्रा॒ये॑दुं॑पुनीतनो॒ग्रं॑दक्षा॑य॒साध॑नं । ई॒शा॒नं॑वी॒तिरा॑धसं ॥ पव॑मानऽऋ॒तःक॒विः
सोम॑ःप॒वित्र॒मास॑दत् । दध॑त्स्तो॒त्रेसु॒वीर्य॑ं ॥ २९ ॥ (९।३।३) आप॑वस्वसह॒स्रिण॑ंर॒यिंसोम॑सु॒वीर्य॑ं । अ॒स्मेश्रवा॑ंसि
धारय ॥ इष॒मूर्जं॑चपिन्वस॒ऽइंद्रा॑यमत्स॒रिन्त॑मः । च॒मूष्वानिषी॑दसि ॥ सुत॒ऽइंद्रा॑य॒विष्ण॑वे॒सोम॑ःक॒लशे॑ऽअक्षरत् ।
मधु॑माँऽअस्तुवा॒यवे॑ ॥ ए॒तेऽअ॑सृग्रमा॒शवो॑ति॒ह्वरा॑ंसिब॒भ्रव॑ः । सोमा॑ऽऋ॒तस्य॒धार॑या ॥ इंद्र॒ंवर्धं॑तोऽअ॒प्तुर॑ःकृ॒ण्वंतो॒वि
श्व॒मार्य॑ं । अ॒प॒घ्नंतो॒ऽअरा॑व्णः ॥ ३० ॥ सु॒ताऽअ॒नुस्वमार॒जोभ्य॑र्षतिब॒भ्रव॑ः । इंद्र॒ंगच्छं॑त॒ऽइंद॑वः ॥ अ॒यापव॑स्व॒धार॑
या॒यया॒सूर्य॒मरो॑चयः । हि॒न्वा॒नोमानु॑षीर॒पः+ ॥ अयु॑क्त॒सूर॒ऽएत॑ंश॒ंपव॑मानोम॒नावधि॑ । अ॒ंतरि॑क्षेण॒यात॑वे ॥ उ॒तत्या
ह॒रितो॒दश॒सूरो॑ऽअयु॒क्तयात॑वे । इंदु॒रिंद्र॒ऽइति॑ब्रु॒वन्+ ॥ परी॒तोवा॒यवे॑सु॒तंगिर॒ऽइंद्रा॑यमत्स॒रं । अव्यो॒वारे॑षुसिंचत
॥ ३१ ॥ पव॑मानवि॒दार॒यिम॒स्मभ्य॑ंसोमदु॒ष्टर॑ं । योदू॒णाशो॑वनु॒ष्यता+ ॥ अ॒भ्य॑र्षसह॒स्रिण॑ंर॒यिंगोम॑ंतम॒श्विन॑ं । अ॒भि
वाज॑मु॒तश्रव॑ः ॥ सोमो॑दे॒वोनसूर्यो॑द्रि॑भिःपवतेसु॒तः । दधा॑नःक॒लशे॒रस॑ं ॥ ए॒तेधाम॒ान्यार्या॑शु॒क्राऽऋ॒तस्य॒धार॑या ।
वाज॒ंगोम॑ंतमक्षरन् ॥ सु॒ताऽइंद्रा॑यव॒ज्रिणे॒सोमा॑सो॒दध्या॑शिरः । प॒वित्र॒मत्य॑क्षरन् ॥ ३२ ॥ प्रसोम॑म॒धुमत्तमो॒रा॒येऽ
अ॑र्षप॒वित्र॒ऽआ । मदो॒योदे॑व॒वीत॑मः ॥ तमी॑मृजंत्या॒यवो॒हरि॑ंन॒दीषु॑वा॒जिन॑ं । इंदु॒मिंद्रा॑यमत्स॒रं+ ॥ आप॑वस्व॒हिर॑ण्य

(९।३।३) आपवस्वेतित्रिंशदृचस्यसूक्तस्य [illegible] गायत्री ।

व॒दश्वा॑वत्सोमवी॒रव॑त् । वाजं॒गोमं॑त॒माभ॑र ॥ परि॒वाजे॑नवा॑जयु॒मव्यो॒वारे॑षु॒सिं॑चत । इंद्रा॑य॒मधु॑मत्तमं ॥ क॒विंमृ॑जंति॒
मर्ज्यं॑धी॒भिर्विप्रा॑ऽअव॒स्यव॑ः । वृषा॒कनि॑क्रदर्षति ॥ २३ ॥ वृष॑णंधी॒भिर॒प्तुरं॒सोम॑मृ॒तस्य॒धार॑या । म॒तीविप्रा॒ःसम॑स्वर
न् ॥ पव॑स्वदेवायु॒षगिंद्रं॑गच्छतुते॒मद॑ः । वा॒युमारो॑ह॒धर्म॑णा ॥ पव॑मान॒नितो॑शसेर॒यिंसो॑मश्र॒वाय्यं॑ । प्रि॒यःस॑मु॒द्रमा
वि॑श ॥ अ॒प॒घ्नन्प॑वसे॒मृध॑ःक्रतु॒वित्सो॑ममत्स॒रः । नु॒दस्वादे॑वयुं॒जनं॑ ॥ पव॑मानाऽअसृक्षत॒सोमा॑ःशु॒क्रास॒ऽइंद॑वः । अ॒भि
विश्वा॑नि॒काव्या॑ ॥ २४ ॥ पव॑मानासऽआ॒शव॑ःशु॒भ्राऽअ॑सृग्र॒मिंद॑वः । घ्नंतो॒विश्वा॒ऽअप॒द्विष॑ः ॥ पव॑मानादि॒वस्पर्यं॒
त॑रिक्षादसृक्षत । पृ॒थि॒व्याऽअधि॒सान॑वि ॥ पु॒ना॒नःसो॑म॒धार॒येंदो॒विश्वा॒ऽअप॒स्रिध॑ः । ज॒हिरक्षां॑सिसुक्रतो ॥ अ॒प॒घ्न
न्त्सो॑मर॒क्षसो॒भ्य॑र्ष॒कनि॑क्रदत् । द्यु॒मंतं॒शुष्म॑मुत्त॒मं+ ॥ अ॒स्मेवसू॑निधारय॒सोम॑दि॒व्यानि॒पार्थि॑वा । इंदो॒विश्वा॑नि॒वार्या॑
॥ २५ ॥ (९।३।४) वृषा॑सोमद्यु॒माँऽअ॑सि॒वृषा॑देव॒वृष॑व्रतः । वृषा॒धर्मा॑णिदधिषे ॥ वृष्ण॑स्ते॒वृष्ण्यं॒शवो॒वृषा॒वनं॒वृषा॒
मद॑ः । स॒त्यंवृ॑ष॒न्वृषेद॑सि ॥ अश्वो॒नचं॑क्रदो॒वृषा॒संगा॑ऽइंदो॒सम॑र्वतः । विनो॑रा॒येदुरो॑वृधि ॥ असृ॑क्षत॒प्रवा॒जिनो॑ग॒व्या
सोमा॑सोऽअश्व॒या । शु॒क्रासो॑वीर॒याश॑वः ॥ शुं॒भमा॑नाऽऋता॒युभि॑र्मृ॒ज्यमा॑ना॒गभ॑स्त्योः । पवं॑ते॒वारे॑ऽअ॒व्यये॑ ॥ २६ ॥ ॥ ६ ॥
तेविश्वा॑दा॒शुषे॒वसु॒सोमा॑दि॒व्यानि॒पार्थि॑वा । पवं॑ता॒मांतरि॑क्ष्या ॥ पव॑मानस्यविश्ववि॒त्प्रते॒सर्गा॑ऽअसृक्षत । सूर्य॑स्येव॒न

(९।३।४) वृषासोमेतित्रिंशदृचस्यसूक्तस्यमारीचःकश्यपःपवमानसोमोगायत्री ।

र॒श्मय॑ः ॥ के॒तुंकृ॒ण्वन्दि॒वस्परि॒विश्वा॑रू॒पाभ्य॑र्षसि । स॒मु॒द्रःसो॑मपिन्वसे ॥ हि॒न्वा॒नोवाच॑मिष्यसि॒पव॑मान॒विध॑र्मणि । अक्रा॑न्दे॒वोनसूर्य॑ः ॥ इंदु॑ःपवि॒ष्टचे॑तनःप्रि॒यःक॑वी॒नांम॒ती । सृ॒जदश्वं॑र॒थीरि॑व ॥ ३७ ॥ ऊ॒र्मिर्यस्ते॑प॒वित्र॒ऽआदे॑वा॒वीःप॒र्यक्ष॑रत् । सीद॑न्नृ॒तस्य॒योनि॒मा+ ॥ सनो॑ऽअर्ष॒पवि॒त्र॒ऽआम॒दोयोदे॑व॒वीत॑मः । इंद॒विंद्रा॑यपी॒तये॑ ॥ इ॒षेप॑वस्व॒धार॑यामृ॒ज्यमा॑नोमनी॒षिभि॑ः । इंदो॑रु॒चाभिगाऽइहि ॥ पु॒ना॒नोवरि॑वस्कृ॒ध्यूर्जं॒जना॑यगिर्वणः । हरे॑सृजा॒नऽआ॒शिर॑ं ॥ पु॒ना॒नोदे॒ववी॑तय॒ऽइंद्र॑स्ययाहिनिष्कृ॒तं । द्यु॒ता॒नोवा॒जिभि॑र्य॒तः+ ॥ ३८ ॥ प्रहि॑न्वा॒नास॒ऽइंद॒वोच्छा॑समु॒द्रमा॒शव॑ः । धि॒याजू॒ताऽअ॑सृक्षत ॥ म॒र्मृ॒जा॒नास॑ऽआ॒यवो॒वृथा॑समु॒द्रमिंद॑वः । अग्म॑न्नृ॒तस्य॒योनि॒मा+ ॥ परि॑णोयाह्यस्म॒युर्विश्वा॒वसू॒न्योज॑सा । पा॒हिनः॒शर्म॑वी॒रव॑त् ॥ मिमा॑ति॒वह्नि॒रेत॑शःप॒दंयु॑जा॒नऽऋक्व॑भिः । प्रयत्स॑मु॒द्रऽआहि॑तः ॥ आयद्योनिं॑हि॒रण्यय॑मा॒शुर्ऋ॒तस्य॒सीद॑ति । जहा॒त्यप्र॑चेतसः ॥ ३९ ॥ अ॒भिवे॒नाऽअ॑नूष॒तेय॑क्षंति॒प्रचे॑तसः । मज्जं॒त्यवि॑चेतसः ॥ इंद्रा॑येंदो॒मरु॑त्वते॒पव॑स्व॒मधु॑मत्तमः । ऋ॒तस्य॒योनि॑मा॒सद॑ं ॥ तंत्वा॒विप्रा॑वचो॒विद॒ःपरि॑ष्कृण्वंतिवे॒धस॑ः । संत्वा॑मृजंत्या॒यव॑ः ॥ रसं॑तेमि॒त्रोऽअ॑र्य॒मापिबं॑ति॒वरु॑णःकवे । पव॑मानस्यम॒रुत॑ः ॥ त्वंसो॑मविप॒श्चितं॑पु॒ना॒नोवाच॑मिष्यसि । इंदो॑स॒हस्र॑भर्णसं ॥ ४० ॥ उ॒तोस॒हस्र॑भर्णसं॒वाचं॑सोममख॒स्युवं॑ । पु॒ना॒नऽइं॑द॒वाभ॑र ॥ पु॒ना॒नऽइं॑दवे॒षांपुरु॑हू॒तजना॑नां । प्रि॒यःस॑मु॒द्रमावि॑श ॥ दवि॑द्युतत्यारु॒चाप॑रि॒ष्टोभ॑न्त्याकृ॒पा । सोमा॑ःशु॒क्रागवा॑शिरः ॥ हि॒न्वा॒नोहे॒तृभि॑र्य॒तऽआवाजं॑

वा॒ज्यं॑क्रमीत् । सीदं॑तोव॒नुषो॑यथा ॥ ऋ॒धक्सो॑मस्व॒स्तये॑संजग्मा॒नोदि॒वःक॒विः । पव॑स्व॒सूर्यो॑दृ॒शे+ ॥ ४१ ॥ इतिसप्तमाष्टकेप्रथमोऽध्यायः ॥ १ ॥ ॥ ॥ ॥ ॥ ॥

सप्तमाष्टकेसूक्तानि ११६ ऋचः १२६३

एकोनपंचाशाध्यायेवर्गाः ४१ सूक्तानि २१ ऋचः २०० ॥ त्यागः ॥ पवमानायसोमायेदं २०० ॥ इतिसप्तमेप्रथमः ॥

हिन्वंतिभृगुर्वारुणिर्जमदग्निर्वापवस्वंशतंवैखानसाअष्टादश्यनुष्टुंप्परास्तिस्रआग्नेय्यंस्त्वंसोमासिद्वात्रिंशद्भर
द्वाजःकश्यपोंगोतमोत्रिर्विश्वामित्रोंजमदग्निर्वसिष्ठइतींहतृचाःसप्तऋषयंःशेषेपवित्रोवसिष्ठोवोभौवांपवस्वसो
मतिस्रोंनित्यद्विपदागायत्र्योंऽवितानस्तिस्रःपौष्णयोवांयत्तेपवित्रंपंचाग्नेय्यंःसावित्र्यग्निसावित्रीवैश्वदेवीवांसा
मंत्यास्त्रिशीपुरउष्णिक्संप्तविंश्यनुष्टुंबंत्येचतेपावमान्यध्येतृस्तुतींजागतमूर्ध्वंप्रागुशनसंःप्रदेवंदशवत्सप्रिंर्भा
लंदनस्त्रिष्टुबंतंहेषुर्नहिरण्यस्तूपौंत्येत्रिष्टुभौंत्रिरस्मैरेणुंरादक्षिणानवऋषभंस्तौवैश्वामित्रौहरिंहरिमंतंःस्रक्केपवि
त्रःशिशुर्नकक्षीवांस्त्रिष्टुंबष्टम्याभिप्रियाणिपंचकविः ॥ २ ॥ ॥ ॥ ॥ ॥ ७ ॥

॥ हरिःओम् ॥ (९।३।५) हि॒न्वंति॒सूर॒मुस्रं॑य॒ःस्वसा॑रोजा॒मय॒स्पतिँ॑ । म॒हामिंदुं॑मही॒युवः॑ ॥ पवं॑मानरु॒चारु॑चा

(९।३।५) हिन्वंतीतित्रिंशदृचस्यसूक्तस्यवारुणिर्भृगुःपवमानसोमोगायत्री । (अत्रभार्गवोजमदग्निःपाक्षिकः) ।

दे॒वोदे॒वेभ्य॒स्परिँ । विश्वा॒वसू॒न्याविँश ॥ आप॑वमानसुष्टु॒तिंवृ॒ष्टिंदे॒वेभ्यो॒दुव॑ः । इ॒षेप॑वस्वसं॒यतँ ॥ वृषा॒ह्यसिँभा॒नुना॑
द्यु॒मंतँ॑त्वाहवामहे । पव॑मानःस्वा॒ध्य॑ः* ॥ आप॑वस्वसु॒वीर्यं॒मंद॑मानःस्वायुध । इ॒होष्विँद॒वाग॑हि ॥ १ ॥ यद॒द्भिःप॑
रिषि॒च्यसेँमृ॒ज्यमा॑नो॒गभ॑स्त्योः । द्रुणा॑स॒धस्थ॑मश्नुषे ॥ प्रसोमा॑यव्यश्व॒वत्पव॑मानायगायत । म॒हेस॒हस्र॑चक्षसे ॥ य
स्य॒वर्णँमधु॒श्चुतं॒हरिँहि॒न्वंत्यद्रिँभिः । इंदु॒मिंद्रा॑यपी॒तये॑ ॥ तस्यं॑तेवा॒जिनो॑व॒यंविश्वा॒धना॑निजि॒ग्युष॑ः । स॒खि॒त्वमा॑वृणी
महे ॥ वृषा॑पवस्व॒धार॑याम॒रुत्वँ॑तेचमत्स॒रः । विश्वा॒दधा॑न॒ऽओज॑सा ॥ २ ॥ तंत्वा॑ध॒र्तार॑मो॒ण्यो॒३ःपव॑मानस्व॒र्दृशँ ।
हि॒न्वेवाजेँषुवा॒जिनँ ॥ अ॒याचि॒त्तोवि॒पान॒याहरिँःपवस्व॒धार॑या । यु॒जंवाजेँषुचोदय ॥ आनँ॑ऽइंदोम॒हीमि॒षंपव॑स्ववि॒श्वद॑
र्शतः । अ॒स्मभ्यँसोमगा॒तुवित्+ ॥ आक॒लशा॑ऽअनूष॒तेंदो॒धारा॑भि॒रोज॑सा । एंद्र॑स्यपी॒तयेँविश ॥ यस्यँ॑ते॒मद्यं॒रसँती॒व्रं
दु॒हंत्यद्रिँभिः । सप॑वस्वाभिमाति॒हा+ ॥ ३ ॥ राजा॑मे॒धाभिँरीयते॒पव॑मानोम॒नावधिँ । अ॒ंतरिँक्षेण॒याता॑वे ॥ आनँ॑ऽ
इंदोशत॒ग्विनं॒गवां॑पोषं॒स्वश्व्यँ । वहा॒भग॑त्तिमू॒तयेँ ॥ आनं॑ःसोम॒सहो॒जुवो॑रू॒पंनवर्चँसेभर । सुष्वा॒णोदे॒ववी॑तये ॥ अ
र्षीँसोमद्यु॒मत्त॑मो॒भिद्रोणा॑नि॒रोरु॑वत् । सीद॑न्छ्ये॒नोनयोनि॒मा+ ॥ अ॒प्साऽइंद्रा॑यवा॒यवे॒वरु॑णायम॒रुद्भ्य॑ः । सोमोँ॑ऽअ
र्षति॒विष्ण॑वे ॥ ४ ॥ इषँतो॒काय॑नो॒दध॑द॒स्मभ्यँसोमवि॒श्वत॑ः । आप॑वस्वसह॒स्रिणँ ॥ येसोमा॑सःप॒राव॒ति॒येऽअ॑र्वा॒वतिँ
सुन्वि॒रे । येवा॒दःश॑र्य॒णाव॑ति ॥ यऽआ॒र्जीके॑षुकृ॒त्वसु॒येमध्ये॑पस्त्या॑नां । येवा॒जनेँषुपं॒चसु ॥ तेनो॑वृ॒ष्टिंदि॒वस्परि॒पवँ॑ता

मासुवीर्यं । सुवानादेवासइंदवः ॥ पवतेहर्यतोहरिर्गृणानोजमदग्निना । हिन्वानोगोरधित्वचि+ ॥ ५ ॥ प्रशुक्रा
सोवयोजुवोहिन्वानासोनसप्तयः । श्रीणानाऽअप्सुमृंजत ॥ तंत्वासुतेष्वाभुवोहिन्विरेदेवतातये । सपवस्वानयारु
चा+ ॥ आतेदक्षंमयोभुवंवह्निमद्यावृणीमहे । पांतमापुरुस्पृहं ॥ आमंद्रमावरेण्यमाविप्रमामनीषिणं । पांतमा० ॥
आरयिमासुचेतुनमासुक्रतोतनूष्वा । पांतमा० ॥ ६ ॥ (९।३।६) पवस्वविश्वचर्षणेभिविश्वानिकाव्या । सखासखि
भ्यऽईड्यः ॥ ताभ्यांविश्वस्यराजसियेपवमानधामनी । प्रतीचीसोमतस्थतुः ॥ परिधामानियानितेत्वंसोमासिविश्व
तः । पवमानऽऋतुभिःकवे ॥ पवस्वजनयन्निषोभिविश्वानिवार्या । सखासखिभ्यऽऊतये ॥ तवशुक्रासोऽअर्चयो
दिवस्पृष्ठेवितन्वते । पवित्रंसोमधामभिः ॥ ७ ॥ तवेमेसप्तसिंधवःप्रशिषंसोमसिस्रते । तुभ्यंधावंतिधेनवः ॥ प्रसो
मयाहिधारयासुतइंद्रायमत्सरः । दधानोऽआक्षितिश्रवः ॥ समुत्वाधीभिरस्वरन्हिन्वतीःसप्तजामयः । विप्रमाजा
विवस्वतः ॥ मृजंतित्वासमग्रुवोव्येजीरावधिष्वणि । रेभोयदज्यसेवने ॥ पवमानस्यतेकवेवाजिन्त्सर्गाऽअसृक्षत ।
अर्वंतोनश्रवस्यवः ॥ ८ ॥ अच्छाकोशंमधुश्चुतमसृग्रंवारेऽअव्यये । अवावशंतधीतयः ॥ अच्छासमुद्रमिंदवोस्तंगावोन ॥ ८ ॥

(९।३।६) पवस्वेतित्रिंशदृचस्यसूक्तस्यशतंवैखानसाःपवमानसोमएकोनविंश्यादितिसृणामग्निःपवमानोगायत्र्यष्टादश्यनुष्टुप् (शतं
वैखानसाएतेस्वायंभुवाअतएषांगोत्रंनास्तिएवमग्रेपिनारायणादयऊह्याः) ।

धेनवः। अग्मन्नृतस्ययोनिमा+ ॥ प्रणऽइंदोमहेरणआपोऽअर्षंतिसिंधवः । यद्गोभिर्वासयिष्यसे ॥ अस्यतेसख्येवयमि
यक्षंतस्त्वोतयः । इंदोसखित्वमुश्मसि ॥ आपवस्वगविष्टयेमहेसोमनृचक्षसे । एंद्रस्यजठरेविश ॥ ९ ॥ महाँऽअसिसो
मज्येष्ठऽउग्राणामिंदऽओजिष्ठः । युध्वासन्छश्वज्जिगेथ ॥ यऽउग्रेभ्यश्चिदोजीयान्च्छूरेभ्यश्चिच्छूरतरः । भूरिदाभ्य
श्चिन्मंहीयान् ॥ त्वंसोमसूरऽएषस्तोकस्यसातातनूनां । वृणीमहेसख्यायवृणीमहेयुज्याय ॥ अग्नऽआयूँषिपवसऽ
आसुवोर्जमिषंचनः । आरेबाधस्वदुच्छुनां ॥ अग्निर्ऋषिःपवमानःपांचजन्यःपुरोहितः । तमीमहेमहागयं+ ॥ १० ॥
अग्नेपवस्वस्वपाऽअस्मेवर्चःसुवीर्यं । दधद्रयिंमयिपोषं ॥ पवमानोऽअतिस्रिधोभ्यर्षतिसुष्टुतिं । सूरोनविश्वदर्शतः ॥
समर्मृजानऽआयुभिःप्रयस्वान्प्रयसेहितः । इंदुरत्योविचक्षणः+ ॥ पवमानऽऋतंबृहच्छुक्रंज्योतिरजीजनत् । कृष्णा
तमांसिजंघनत् ॥ पवमानस्यजंघ्नतोहरेश्चंद्राऽअसृक्षत । जीराऽअजिरशोचिषः ॥ ११ ॥ पवमानोरथीतमःशुभ्रे
भिःशुभ्रशस्तमः । हरिश्चंद्रोमरुद्गणः ॥ पवमानोव्यश्नवद्रश्मिभिर्वाजसातमः । दधत्स्तोत्रेसुवीर्यं ॥ प्रसुवानऽइंदु
रक्षाःपवित्रमत्यव्ययं । पुनानऽइंदुरिंद्रमा ॥ एषसोमोऽअधित्वचिगवांक्रीळत्यद्रिभिः । इंद्रंमदायजोहुवत् ॥ यस्य
तेद्युम्नवत्पयःपवमानाभृतंदिवः । तेननोमृळजीवसे ॥ १२ ॥ (९।३।७) त्वंसोमासिधारयुर्मंद्रऽओजिष्ठोऽअध्व

(९।३।७) त्वंसोमासीतिद्वात्रिंशदृचेसूक्तेआद्यानांसप्तानांतृचानांभरद्वाजकश्यपगोतमात्रिविश्वामित्रजमदग्निवसिष्ठाऋषयःशिष्टाना

ऋक्सं. रे । पवस्वमंहयद्रयिः ॥ त्वंसुतोनृमादनोदधन्वान्मत्सरिन्तमः । इंद्रायसूरिरंधसा ॥ त्वंसुष्वाणोऽअद्रिभिरभ्य मंडलं ९

अ.७अ.२ र्षकनिक्रदत् । द्युमंतंशुष्ममुत्तमं ॥ इंदुर्हिन्वानोऽअर्षतितिरोवाराण्यव्यया । हरिर्वाजमचिक्रदत् ॥ इंदोव्यव्यम अनु. ३
॥९॥ र्षसिविश्रवांसिविसौभगा । विवाजान्त्सोमगोमतः ॥ १३ ॥ आनऽइंदोशतग्विनंरयिंगोमंतमश्विनं । भरासोमस
हस्रिणं ॥ पवमानासऽइंदवस्तिरःपवित्रमाशवः । इंद्रंयामेभिराशत ॥ ककुहःसोम्योरसऽइंदुरिंद्रायपूर्व्यः । आ
युःपवतऽआयवे ॥ हिन्वंतिसूरमुस्रयःपवमानंमधुश्चुतं । अभिगिरासमस्वरन् ॥ अवितानोऽअजाश्वःपूषायामनिया
मनि । आभक्षत्कन्यासुनः ॥ १४ ॥ अयंसोमःकपर्दिनेघृतंनपवतेमधु । आभ० ॥ अयंतऽआघृणेसुतोघृतंनपव
तेशुचि । आभ० ॥ वाचोजंतुःकवीनांपवस्वसोमधारया । देवेषुरत्नधाऽअसि ॥ आकलशेषुधावतिश्येनोवर्मविगा
हते । अभिद्रोणाकनिक्रदत् ॥ परिप्रसोमतेरसोसर्जिकलशेसुतः । श्येनोनतक्तोऽअर्षति ॥ १५ ॥ पवस्वसोममंदय
न्निंद्रायमधुमत्तमः । असृग्रन्देववीतयेवाजयंतोरथाऽइव ॥ तेसुतासोमदिन्तमाःशुक्रावायुमसृक्षत ॥ ग्राव्णातुन्नोऽ

मांगिरसःपवित्रऋषिः (अत्रवसिष्ठोवापवित्रवसिष्ठौवेतिविपक्षौ) पवमानसोमोदेवतादशम्यादितिसृणांपूषावा यत्तेपवित्रमित्यादिपंचा ॥९॥
नामग्निःअंत्ययोर्द्वयोःपावमान्यध्येतागायत्री षोडश्याद्यास्तिस्रोद्विपदागायत्र्यःत्रिंशीपुरउष्णिक्सप्तविंश्येकत्रिंशीद्वात्रिंश्योनुष्टुभः । (पंचविं
श्यादितिसृणांक्रमात्सविताग्निसवितारौविश्वेदेवाइतिदेवताअग्निनासहविकल्पंते) ।

अ॒भिष्टु॑तःप॒वित्रं᳚सोमगच्छसि। दध॑त्स्तो॒त्रं॑सु॒वीर्यं᳚ ॥ ए॒षतु॒न्नोऽअ॒भिष्टु॑तःप॒वि॒त्रमति॑गाहते। र॒क्षो॒हावार॑म॒व्ययं᳚ ॥१६॥ यदं॑ति॒यच्चं॑दू॒र॒केभ॒यं॑वि॒ंदति॒मामि॒ह। पवं॑मान॒वितज्जं॑हि ॥ पवं॑मानः॒सोऽअ॒द्यनः॑प॒वित्रे᳚ण॒विचं॑र्षणिः। यःपो॒तासं॑पुनातु नः॥ यत्तें॑प॒वित्रं॑म॒र्चिंष्यग्ने॒वितं॑तम॒ंतरा। ब्रह्म॒तेनं॑पुनीहिनः॥ यत्तें॑प॒वित्रं॑म॒र्चिंवद॒ग्ने॒तेनं॑पुनीहिनः। ब्र॒ह्म॒स॒वैः॑पुंनीहिनः॥ उ॒भाभ्यां᳚देवसवितःप॒वित्रे᳚णस॒वेनं॑च। मांपुं॑नीहिवि॒श्वतः॑ ॥ १७॥ त्रि॒भिष्ट्वं᳚देवसवित॒र्वर्षि᳚ष्ठैःसोम॒धाम॑भिः। अग्ने॒दक्षैः᳚पुनीहिनः ॥ पु॒नंतु॒मांदे᳚वज॒नाःपु॒नंतु॒वसं॑वोधि॒या। विश्वे᳚देवाःपु॒नी॒तमा॒जातं॑वेदःपु॒नी॒हिमां॑ ॥ प्रप्यां॑यस्व॒प्रस्यं᳚दस्व॒सोम॒विश्वे᳚भिरं॒शुभिः॑। दे॒वेभ्यं॑ऽउत्त॒मंह॒विः+ ॥ उपं॑प्रि॒यंपानिं॑प्नतं॒युवा॑नमाहु॒ती॒वृधं᳚। अग॑न्म॒बिभ्र॑तो॒नमः॑ ॥ अ॒लाय्यं॑स्यपर॒शुर्नं᳚नाश॒तमापं॑वस्वदेवसोम। आ॒खुंचि॑दे॒वदे᳚वसोम॥ यःपा॑वमा॒नीर॒ध्येत्यृषि॑भि॒ःसंभृ॑तं॒रसं᳚। सर्व॒ंसपूतमं॑श्नातिस्वदि॒तंमा॑त॒रिश्वं॑ना॥ पा॒व॒मा॒नीर्यो᳚ऽअ॒ध्येत्यृषि॑भि॒ःसंभृ॑तं॒रसं᳚। तस्मै॒सरं॑स्वतीदुहेक्षी॒रंस॒र्पिर्म॑धूद॒कं+ ॥१८॥ (परिशिष्टं॥ पा॒व॒मा॒नीःस्व॒स्त्यय॑नीःसु॒दु॒घाहिघृ॑त॒श्चुतः॑। ऋषि॑भि॒ःसंभृ॑तो॒रसो᳚ब्राह्म॒णेष्व॒मृतं᳚हि॒तं॥ पा॒व॒मा॒नीर्दि᳚शंतुनऽइ॒मंलो॒कमथो᳚ऽअ॒मुं। कामा॒न्त्सम॑र्धयंतुनोदे॒वीर्दे॒वैःस॒माहि॑ताः॥ येनं॑दे॒वाःप॒वित्रे᳚णा॒त्मानं॑पु॒नते॒सदा॑। तेनं॑स॒हस्रं॑धारेणपावमा॒न्यःपुं॑नंतुमां॥ प्रा॒जा॒प॒त्यंप॒वित्रं᳚श॒तोद्या॑मंहिर॒ण्मयं᳚। तेनं॑ब्रह्म॒विदो᳚व॒यंपूतंब्रह्मं॑पुनीमहे ॥ इंद्रः॑पु॒नीतीस॒हमां॑पुनातु॒सोमः॑स्व॒स्त्यावरुं॑णःस॒मीच्यां᳚। य॒मोराजां॑प्रमृ॒णाभिः॑पुनातु॒माजात॑वेदामू॒र्जयं᳚त्यापुनातु ॥ ऋ॒ष॒य॒स्तुतप॑स्ते॒पुःस॒र्वेस्व॑र्गजि॒गीषं॑वः। त॒प॒

सस्तपसोग्र्यंतुपावमानीर्ऋचोब्रवीत् ॥ १ ॥ यन्मेगर्भेवसतःपापमुग्रंयज्जायमानस्यचकिंचिदन्यत् । जातस्यचयच्चापिच्चवर्धतोमेतत्पावमानीभिरहंपुंनामि ॥ मातापित्रोर्यन्नकृतंवचोमेयत्स्थावरंजंगममावभूव । विश्वस्यतत्प्रहृषितंवचोमेतत्पावमानीभिरहंपुंनामि ॥ गोघ्नात्तस्करत्वात्स्त्रीवधाद्यच्चकिल्बिषं । पापकंचचरणेभ्यस्तत्पावमानीभिरहंपुंनामि ॥ ब्रह्मवधात्सुरापानात्स्वर्णस्तेयाद्वृषलिगमनमैथुनसंगमात् । गुरोर्दाराधिगमनाच्चतत्पावमानीभिरहंपुंनामि॥ बालघ्नान्मातृपितृवधाद्भूमितस्करात्सर्ववर्णगमनमैथुनसंगमात् । पापेभ्यश्चप्रतिग्रहात्सद्यःप्रहरतिसर्वदुष्कृतंतत्पावमानीभिरहंपुंनामि ॥ क्रयविक्रयाद्योनिदोषाद्भक्षाद्भोज्यात्प्रतिग्रहात् । असंभोजनाच्चापिनृशंसंतत्पावमानीभिरहंपुंनामि ॥ २ ॥ दुर्यष्टंदुरधीतंपापंयच्चाज्ञानतोकृतं । अयाजिताश्चासंयाज्यास्तत्पावमानीभिरहंपुंनामि ॥ अमंत्रमन्नंयत्किंचिद्धूयतेचहुताशने । संवत्सरकृतंपापंतत्पावमानीभिरहंपुंनामि ॥ ऋतस्ययोनयोमृतस्यधामविश्वादेवेभ्यःपुण्यगंधाः । तानऽआपःप्रवहंतुपापंशुद्धागच्छामिसुकृतामुलोकंतत्पावमानीभिरहंपुंनामि ॥ पावमानीःस्वस्त्ययनीर्याभिर्गच्छतिनांदनं । पुण्यांश्चभक्षान्भक्षयत्यमृतत्वंचगच्छति ॥ पावमानींपितृन्देवान्ध्यायेद्यश्चसरस्वतीं । पितृँस्तस्योपवर्तेतत्क्षीरंसर्पिर्मधूदकं ॥ पावमानंपरंब्रह्मशुक्रंज्योतिःसनातनं । ऋषीँस्तस्योपतिष्ठेतत्क्षीरंसर्पिर्मधूदकं ॥ पावमानंपरंब्रह्मयेपठँतिमनीषिणः । सप्तंजन्मभवेद्विप्रोधनाढ्योवेदपारगः ॥ दशोत्तराण्यृचांश्चैवपावमानीःशतानिषट् ।

ए॒त॒ज्जु॒ह्व॒न्ज॒पे॒न्मंत्रं॑घो॒रमृ॑त्युभ॒यंह॑रेत् ॥ २ ॥ इतिपरि०) (९।४।१) प्रदे॒वमच्छा॒मधु॑मंत॒ऽइंद॒वोसि॑ष्यदंत॒गाव॒ऽआ
नधे॒नवः॑ । ब॒र्हि॒षदो॑वच॒नाव॑त॒ऽऊध॑भिःपरि॒स्रुत॑मु॒स्रिया॑नि॒र्णिजं॑धिरे ॥ सरो॑रुवद॒भिपूर्वा॑ऽअचिक्रददु॒पा॑रुहः॑श्र॒थयं
न्त्स्वादते॒हरिः॑ । ति॒रःप॒पित्रं॑परि॒यन्नु॒रुज्र॒यो॒निशर्या॑णिदधते॒दे॒वऽआव॑रं ॥ वियो॒म॒मेय॒म्या॑संय॒तीमदः॑साकं॒वृ॒धाप॑यं
सापिन्व॒दक्षि॑ता । म॒हीऽअं॑पा॒रेरजं॑सीवि॒वेवि॑ददभि॒व्रज॒न्नक्षि॑तं॒पाज॒ऽआद॑दे ॥ समा॒तरा॑वि॒चर॑न्वा॒जय॑न्न॒पःप्रमे॑धिरः
स्व॒धया॑पिन्वतेप॒दं । अं॒शुर्यवे॑नपिपिशेय॒तोनृभि॒ःसंजा॒मिभि॒र्नसं॑ते॒रक्ष॑ते॒शिरः॑ ॥ संदक्षे॑ण॒मन॑साजायतेक॒विर्ऋ॒तस्य॒ग
र्भो॒निहि॑तोय॒माप॒रः । यूना॑ह॒संता॑प्रथ॒मंविज॑ज्ञतु॒र्गुहा॑हि॒तंजनि॑म॒नेम॒मुद्य॑तं ॥ १९ ॥ मं॒द्रस्य॑रू॒पंवि॑विदुर्मनी॒षिणः॑
श्ये॒नोयदंधो॒ऽअभ॑रत्परा॒वतः॑ । तंम॑र्जयंतसु॒वृधं॑न॒दीष्वाँ॒ऽउ॒शंतमं॒शुंप॑रि॒यंतमृ॒ग्मियं॑ ॥ त्वांमृ॑जंति॒दश॒योष॑णःसु॒तंसोम॒
ऽऋषि॑भिर्म॒तिभि॑र्धी॒तिभि॑र्हि॒तं । अव्यो॒वारे॑भिरु॒तदे॒वहू॑तिभि॒र्नभि॑र्य॒तोवाज॒मादर्षि॑सा॒तये॑ ॥ प॒रि॒प्र॒यंतं॑व॒य्यं॑सु॒षंसदं॒
सोमं॑मनी॒षाऽअ॒भ्य॑नूषत॒स्तुभः॑ । योधार॑या॒मधु॑माँऽऊ॒र्मिणा॑दि॒वऽइय॑र्ति॒वाचं॑रयि॒षाळम॑र्त्यः ॥ अ॒यंदि॒वऽइ॑यर्ति॒विश्व॒
मारज॒ःसोम॑ःपुना॒नःक॒लशे॑षुसीदति । अ॒द्भिर्गोभि॑र्मृज्यते॒ऽआद्रिं॑भिःसु॒तःपुं॑ना॒नऽइंदु॒र्वरि॑वोविदत्प्रि॒यं+ ॥ ए॒वानः॑सो

चतुर्थेनुवाकेऽष्टादशसूक्तानि (९।४।१) प्रदेवमितिदशर्चस्यसूक्तस्य[illegible]ऋषिः पवमानसोमोजगत्यंत्यात्रिष्टुप् ।

मपरिषिच्यमानोवयोदधच्चित्रतमंपवस्व । अद्वेषेद्यावापृथिवीहुवेमदेवाधत्तरयिमस्मेसुवीरं ॥ २० ॥(९।४।२)इषुर्न
धन्वन्प्रतिधीयतेमतिर्वत्सोनमातुरुपसर्ज्यूधनि । उरुधारेवदुहेऽअग्रऽआयत्यस्यव्रतेष्वपिसोमऽइष्यते ॥ उपो
॥११॥ मतिःपृच्यतेसिच्यतेमधुमंद्राजनीचोदतेऽअंतरासनि । पवमानःसंतनिःप्रघ्नतामिवमधुमान्द्रप्सःपरिवारमर्षति ॥
अव्येवधूयुःपवतेपरित्वचिश्रथ्नीतेनप्तीरदितेर्ऋतंयते । हरिरक्रान्यजतःसंयतोमदोनृम्णाशिशानोमहिषोनशोभते ॥
उक्षामिमातिप्रतियंतिधेनवोदेवस्यदेवीरुपयंतिनिष्कृतं । अत्यक्रमीदर्जुनंवारमव्ययमत्कंननिक्तंपरिसोमोऽअव्यत ॥
अमृक्तेनरुशतावाससाहरिरमर्त्योनिर्णिजानःपरिव्यत । दिवस्पृष्ठंवर्हणानिर्णिजेकृतोपस्तरणंचम्वोर्नभस्मयं ॥ २१ ॥
सूर्यस्येवरश्मयोद्रावयित्नवोमत्सरासःप्रसुपःसाकमीरते । तंतुंततंपरिसर्गासऽआशवोनेंद्रादृतेपवतेधामकिंचन+ ॥
सिंधोरिवप्रवणेनिम्नऽआशवोवृषच्युतामदासोगातुमाशत । शंनोनिवेशेद्विपदेचतुष्पदेस्मेवाजाःसोमतिष्ठंतुकृष्टयः ॥
आनःपवस्ववसुमद्धिरण्यवदश्वावद्गोमद्यवमत्सुवीर्यं । यूयंहिसोमपितरोममस्थनदिवोमूर्धानःप्रस्थितावयस्कृतः ॥ ॥११॥
एतेसोमाःपवमानासऽइंद्रंरथाऽइवप्रययुःसातिमच्छ । सुताःपवित्रमतियंत्यव्यंहित्वीवव्रिंहरितोवृष्टिमच्छ ॥ इंदाविं

(९।४।२) इषुर्नेतिदशर्चस्यसूक्तस्यांगिरसोहिरण्यस्तूपःपवमानसोमोजगत्यंत्येद्वेत्रिष्टुभौ ।

द्रा॑यबृह॒तेप॑वस्वसुमृळी॒कोऽअ॑नव॒द्योरि॒शादाः॑। भरा॑चं॒द्राणि॑गृण॒तेवसू॑निदे॒वैर्द्या॑वापृथिवी॒प्राव॑तंनः ॥२२॥ (९।४।३) त्रिर॑स्मैस॒प्तधे॒नवो॑दुदुह्रे॒स॒त्यामा॒शिरं॑पू॒र्व्ये॑व्यो॑मनि । च॒त्वार्य॒न्याभुव॑नानिनि॒र्णिजे॒चारू॑णिचक्रे॒यदृ॒तैरव॑र्धत ॥ सभिक्ष॑माणोऽअ॒मृत॑स्य॒चारु॑णऽउ॒भेद्यावा॒काव्ये॑ना॒विश॑श्रथे । तेजि॑ष्ठाऽअ॒पोमं॒हना॒परि॑व्यत॒यदी॑दे॒वस्य॒श्रव॑सा॒सदो॑वि॒दुः+॥ तेऽअ॑स्यसंतुके॒तवो॒मृ॑त्य॒वोदा॑भ्यासोज॒नुषी॑ऽउ॒भेऽअनु॑। येभि॑र्नृ॒म्णाचं॑दे॒व्या॑चपुन॒तऽआदिद्राजा॑नंम॒नना॑ऽअगृभ्णत ॥ स॒मृज्यमा॑नोद॒शभिः॑सुकर्म॑भि॒ःप्रम॑ध्य॒मासु॑मा॒तृषु॑प्र॒मेसचा॑ । व्र॒तानि॑पा॒नोऽअ॒मृत॑स्य॒चारु॑णऽउ॒भेनृ॒चक्षा॒ऽअनु॑पश्यते॒विशौ॑ ॥ सम॑मृजा॒नऽइंद्रि॒याय॒धाय॑स॒ऽओभेऽअं॒तारोद॑सीहर्ष॑तेहि॒तः । वृषा॒शुष्मे॑णबाधते॒विदु॑र्म॒तीरा॒देदि॑शानःशर्य॒हेव॑शु॒रुधः॑ ॥ २३ ॥ स॒मा॒तरा॒नद॑दृशा॒नऽउ॒स्रियो॒नान॑ददेतिम॒रुता॑मिवस्व॒नः । जा॒नन्नृ॒तंप्र॑थ॒मंयत्स्व॑र्णरं॒प्रश॑स्तये॒कर्म॑वृणीतसुक्रतुः॑ ॥ रु॒वति॑भी॒मोवृ॑ष॒भस्त॑वि॒ष्यया॒शृंगे॒शिशा॑नो॒हरि॑णीविचक्ष॒णः । आयोनिं॒सोम॒ःसु॒कृतं॒निषी॑दतिग॒व्ययी॒त्वग्भ॑वतिनि॒र्णिग॒व्ययी॑ ॥ शुचि॑ःपुना॒नस्त॒न्व॑मरे॒पस॒मव्ये॒हरि॒र्न्य॑धाविष्ट॒सान॑वि । जुष्टो॑मि॒त्राय॒वरु॑णाय॒वा॒यवे॑त्रि॒धातु॒मधु॑क्रियतेसुकर्म॑भिः ॥ पव॑स्वसोमदे॒ववी॑तये॒वृषेंद्र॑स्य॒हार्दि॑सोम॒धान॒मावि॑श । पु॒रानो॑बा॒धाद्दु॑रि॒ताति॑पारयक्षेत्र॒विद्धिदिश॒ऽआहा॑विपृच्छ॒ते ॥ हि॒तोनसप्ति॑र॒भिवाज॑म॒र्षेंद्र॑स्येंदो॒जठ॒र॒माप॑वस्व । ना॒वानसिंधु॒मति॑पर्षिवि॒द्वान्छूरो॒नयु॒ध्यन्न

(९।४।३) त्रिरस्माइतिदशर्चस्यसूक्तस्यवैश्वामित्रोरेणुःपवमानसोमोजगत्यंत्यात्रिष्टुप् ।

व॑नोनि॒दस्य॑ः ॥ २४ ॥ (९।४।४) आद॒क्षि॑णासृज्यतेशु॒ष्म्या३सदं॑वेति॑द्रु॒हो॑रक्षस॑ःपाति॒जागृ॑विः । हरि॑रोप॒शंकृ॑णु
ते॒नभ॒स्पय॑ऽउप॒स्तिरे॑च॒म्वो॒३र्ब्रह्म॑नि॒र्णिजे॑ ॥ प्रकृ॒ष्टि॒हेव॑शू॒षऽए॑ति॒रोरु॑वदसु॒र्यं॑१॒वर्ण॒निरि॑णीतेऽअस्य॒तं । जहा॑तिव॒व्रिंपि॒
तुरे॑तिनिष्कृ॒तमु॑प॒प्रुतं॑कृणुतेनि॒र्णिजं॒तना॑ ॥ आद्रि॑भिःसु॒तःप॑वते॒गभ॑स्त्योर्वृ॒षाय॑ते॒नभ॑सा॒वेप॑तेम॒ती । समो॑दते॒नस॑ते॒सा
ध॑तेगि॒राने॑नि॒क्तेऽअ॒प्सुयज॑ते॒परी॑मणि ॥ परि॑द्यु॒क्षंसह॑सःपर्व॒तावृ॒धंमध्व॑ःसिंच॑तिह॒र्म्यस्य॑स॒क्षणि॑ । आय॑स्मि॒न्गाव॑ःसुहु॒
ता॒दऽऊध॑निमू॒र्धन्छ्री॒णंत्य॑ग्रि॒यंवरी॑मभिः ॥ स॒मीर॒थंनभु॒रिजो॑रहेष॒तद॒श॒स्वसा॑रो॒ऽअदि॑तेरु॒पस्थ॒ऽआ । जिगा॒दुप॑ज्रय
ति॒गोर॑पी॒च्यं॑प॒दंयद॑स्यम॒तुथा॒ऽअजी॑जनन् ॥ २५ ॥ श्ये॒नोनयो॒निंसद॑नंधि॒याकृ॒तंहि॑र॒ण्यय॑मा॒सदं॑दे॒वऽएष॑ति । एरि॑
णंतिब॒र्हिषि॑प्रि॒यंगि॒राश्वो॒नदे॒वाँऽअप्ये॑तिय॒ज्ञियः॑ ॥ प॒राव्य॑क्तोऽअरु॒षोदि॒वःक॒विर्वृषा॑त्रिपृ॒ष्ठोऽअ॑नविष्ट॒गाऽअ॒भि ।
स॒हस्र॑णीति॒र्यति॑ःप॒राय॑तीरे॒भोनपू॒र्वीरु॒षसो॒विरा॑जति ॥ त्वे॒षंरू॒पंकृ॑णुते॒वर्णो॑ऽअस्य॒सयत्राश॑य॒त्समृ॑ता॒सेध॑तिस्रि॒धः ।
अ॒प्सायाति॑स्व॒धया॒दैव्यं॒जन॒ंसंसु॑ष्टु॒तीनस॑ते॒संगो॑ऽअग्रया ॥ उ॒क्षेव॑यू॒थाप॑रि॒यन्न॑रावी॒दधि॒त्विषी॑रधित॒सूर्य॑स्य । दि॒व्यः
सु॑प॒र्णोव॑चक्षत॒क्षांसोम॒ःपरि॒क्रतु॑नापश्यते॒जाः+ ॥ २६ ॥ (९।४।५) हरि॑मृजंत्यरु॒षोनयु॑ज्यते॒संधे॒नुभि॑ःक॒लशे॒सोमो॑

(९।४।४) आदक्षिणेतिनवर्चस्यसूक्तस्यवैश्वामित्रऋषभःपवमानसोमोजगत्यंत्यात्रिष्टुप् । (९।४।५) हरिंमृजंतीतिनवर्चस्यसूक्तस्यांगिरसोहरिमंतःपवमानसोमोजगती ।

ऽअज्यते । उद्वाचं॑मी॒रयं॑तिहि॒न्वते॑म॒तीपुं॑रुष्टुतस्य॒कतिं॑चित्परि॒प्रियः॑ ॥ सा॒कंव॑दंतिब॒हवो॑मनी॒षिण॒ऽइंद्र॑स्य॒सोमं॑ज॒ठरे॒य दा॑दु॒हुः । यदी॑मृ॒जंति॒सुग॑भस्तयो॒नरः॒सनी॑ळाभिर्द॒शभिः॒काम्यं॒मधु॑ ॥ अरं॑ममाणो॒ऽअत्ये॑ति॒गाऽअ॒भिसूर्यं॑स्यप्रि॒यंदु॑हि॒तुस्ति॒रोर॑वं । अन्वं॑स्मै॒जोषं॑मभरद्विनंगृ॒सःसंद्व॒यीभिः॒स्वसृ॑भिःक्षेति॒जामि॑भिः ॥ नृधू॑तो॒ऽअद्रि॑षुतो॒बर्हिषि॑प्रि॒यःपति॒र्गवां॑प्र॒दिव॒ऽइंदु॑र्ऋ॒त्वियः॑ । पुरं॑धिवा॒न्मनुं॑षोयज्ञ॒साध॑नः॒शुचि॑र्धि॒यापं॑वते॒सोमं॑ऽइंद्रते ॥ नृबा॒हुभ्यां॑चोदि॒तोधारं॑यासु॒तोनुष्व॒धंपं॑वते॒सोमं॑ऽइंद्रते । आप्रा॒ःऋतू॒न्त्समं॑जैरध्व॒रेम॒तीर्वेर्नद्रु॒षच्च॒म्वो॒३रास॑दद्धरिः ॥ २७ ॥ अं॒शुंदु॑हंतिस्त॒नयं॑तमक्षि॑तंक॒विंक॒वयो॒पसो॑मनी॒षिणः॑ । सम॒ीगावो॑म॒तयो॑यंति॒संयतं॑ऽऋ॒तस्य॒योना॒सद॑नेपुन॒र्भुवः॑ ॥ नाभा॑पृथि॒व्याध॒रुणो॑म॒होदि॒वो॒३पामू॒र्मौ॑सिंधु॑ष्व॒न्तरु॑क्षि॒तः । इंद्र॑स्य॒वज्रो॑वृष॒भोवि॒भूव॑सुः॒सोमो॑हृ॒देपं॑वते॒चारु॑मत्स॒रः+ ॥ सतूपं॑वस्व॒परि॒पार्थि॑वं॒रजं॑स्तो॒त्रेशिक्ष॑न्नाधून्व॒तेचं॑सुक्रतो । मानो॒निर्भा॒गवसु॑नःसादन॒स्पृशो॑र॒यिंपि॒शंगं॑बहु॒लंव॑सीमहि ॥ आतूनं॑ऽइंदोश॒तदा॒त्वश्व्यं॑स॒हस्रं॑दातुप॒शुमद्धिरं॑ण्यवत् । उपं॑मास्वबृह॒तीरे॒वती॒रिषो॑धिस्तो॒त्रस्यं॑पवमाननोगहि ॥ २८ ॥ (९।४।६) स्रक्वे द्र॒प्सस्य॒धमं॑तः॒सम॑स्वरन्नृतस्य॒योना॒सम॑रंत॒नाभ॑यः । त्रीन्त्समू॒र्ध्नो॑ऽअसु॑रश्चक्रऽआ॒रभे॑स॒त्यस्य॒नावः॑सु॒कृत॑मपीपरन् ॥ स॒म्यक्स॒म्यंचो॑महि॒षाऽअ॑हेषत॒सिंधो॑रू॒र्मावधि॑वे॒नाऽअवी॑विपन् । मधो॒र्धारा॑भिर्ज॒नयं॑तोऽअ॒र्कमित्प्रि॒यामिंद्र॑स्यत॒न्वं॑

(९।४।६) स्रक्वेद्रप्सस्येतिनवर्चस्यसूक्तस्यांगिरसःपवित्रःपवमानसोमोजगती ।

मवीवृधन् ॥ पवित्रवंतःपरिवाचमासतेपितैषांप्रत्नोऽअभिरक्षतिव्रतं । महःसमुद्रंवरुणस्तिरोदधेधीराऽइच्छेकुर्धरुणे
ष्वारभं ॥ सहस्रधारेवतेसमस्वरन्दिवोनाकेमधुजिह्वाऽअसश्चतः । अस्यस्पशोननिमिषंतिभूर्णयःपदेपदेपाशिनःसं
तिसेतवः ॥ पितुर्मातुरध्यायेसमस्वरन्नृचाशोचंतःसंदहंतोऽअव्रतान् । इंद्रद्विष्टामपधमंतिमाययात्वचमसिक्नींभूम
नोदिवस्परि ॥ २९ ॥ प्रत्नान्मानादध्यायेसमस्वरन्छ्लोकयंत्रासोरभसस्यमंतवः । अपानक्षासोबधिराऽअहासतऽऋ
तस्यपंथांनतरंतिदुष्कृतः ॥ सहस्रधारेवितंतेपवित्रऽआवाचंपुनंतिकवयोमनीषिणः । रुद्रासऽएषामिषिरासोऽअद्रु
हःस्पशःस्वंचःसुदृशोनृचक्षसः ॥ ऋतस्यगोपानदभायसुक्रतुस्त्रीषपवित्राहृद्यं१तरादधे । विद्वान्त्सविश्वाभुवनाभि
पश्यत्यवाजुष्टान्विध्यतिकर्तेऽअव्रतान्⁺ ॥ ऋतस्यतंतुर्विततःपवित्रऽआजिह्वायाऽअग्रेवरुणस्यमायया । धीराश्चित्त
त्समिनक्षंतऽआशतात्राकर्तमवपदात्यप्रभुः ॥ ३० ॥ (९।४।७) शिशुर्नजातोवचक्रदद्वनेस्व१र्यद्वाज्यरुषःसिषा
सति । दिवोरेतसासचतेपयोवृधातमीमहेसुमतीशर्मसप्रथः ॥ दिवोयस्कंभोधरुणःस्वाततऽआपूर्णोऽअंशुःपर्येतिवि
श्वतः । सेमेमहीरोदसीयक्षदावृतासमीचीनेदाधारसमिषःकविः⁺ ॥ महिप्सरःसुकृतंसोम्यंमधूर्वीगव्यूतिरदितेर्ऋ
तंयते । ईशेयोवृष्टेरितऽउस्रियोवृषापांनेतायऽइतऽऊतिर्ऋग्मियः ॥ आत्मन्वन्नभोदुह्यतेघृतंपयऽऋतस्यनाभिरमृतं

(९।४।७) शिशुर्नेतिनवर्चस्यसूक्तस्यदैर्घतमसःकक्षीवान्पवमानसोमोजगत्यष्टमीत्रिष्टुप् ।

विजा॑यते । स॒मी॒ची॒नाःसु॒दान॑वःप्रीणं॑ति॒तंनरो॑हि॒तमव॑मेहं॑ति॒पेर॑वः॥ अरा॑वीदं॒शुःसच॑मानऽऊ॒र्मिणा॑देवा॒व्यं॑१॒मनु॑षेपि न्वति॒त्वचं॑ । दधा॑ति॒गर्भ॒मदि॑तेरु॒पस्थ॒ऽआयेनं॑तो॒कं॑च॒तनं॑यंच॒धाम॑हे ॥ ३१ ॥ स॒हस्र॑धा॒रेव॒ताऽअ॑स॒श्चत॑स्तृ॒तीये॑संतु॒र जं॑सिप्र॒जावं॑तीः । चतं॑स्रो॒नाभो॒निहिं॑ताऽअ॒वोदि॒वोह॒विर्भ॑रंत्य॒मृतं॑घृत॒श्चुतः॑॥ श्वे॒तंरू॒पंकृ॑णु॒ते॒यत्सिषा॑सति॒सोमो॑मी॒ढ्वाँऽ असु॑रोवेद॒भूम॑नः । धि॒याशमीं॑सचते॒सेम॒भिप्र॒वद्दि॒वस्कबं॑ध॒मवं॑दर्ष॑दु॒द्रिणं॑ ॥ अधं॑श्वे॒तंक॒लशं॒गोभिं॑र॒क्तंकार्ष्म॒न्नावा॒ज्यं॑ क्रमीत्सस॒वान् । आहिं॑न्विरे॒मनं॑सादेव॒यंतः॑क॒क्षीवं॑तेश॒तहिं॑मायु॒गोनां॑ ॥ अ॒द्भिःसों॑मपपृचा॒नस्यं॑ते॒रसोव्यो॒वारं॒विपं॑व मानधावति । समृ॒ज्यमां॑नःक॒विभि॑र्मदिन्तम॒स्वद॒स्वें॑द्रां॑यपवमानपी॒तये॑ ॥ ३२ ॥ (९।४।८) अ॒भिप्रि॒याणिं॑पवते॒च नों॑हितो॒नामां॑निय॒ह्वोऽअधि॒येषु॒वर्धं॑ते । आसूर्यं॑स्यबृह॒तोबृ॒हन्नधि॒रथं॒विष्वं॑चमरुहद्विच॒क्षणः+ ॥ ऋ॒तस्यं॑जि॒ह्वापं॑वते॒म धुं॑प्रि॒यंव॒क्तापति॑र्धि॒योऽअ॒स्याऽअदा॑भ्यः । दधा॑तिपु॒त्रःपि॒त्रोर॑पी॒च्यं॑१॒नाम॑तृ॒तीय॒मधि॑रोच॒नेदि॒वः+ ॥ अवं॑द्युता॒नःक॒ लशाँ॑ऽअचिक्रद॒न्नृभि॑र्येमा॒नःकोश॒ऽआहिं॑र॒ण्यये॑ । अ॒भीमृ॒तस्यं॑दो॒हनां॑ऽअनूष॒ताधि॑त्रिपृ॒ष्ठऽउ॒षसो॒विरां॑जति ॥ अद्रिं॑ भिःसु॒तोम॒तिभि॒श्चनों॑हितःप्ररो॒चय॒न्रोदं॑सीमा॒तरा॒शुचिः॑ । रोमा॒ण्यव्यां॑स॒मया॒विधां॑वति॒मधो॒र्धारा॒पिन्वं॑मानादि॒वेदिं॑

(९।४।८) अभिप्रियाणीतिपंचर्चस्यसूक्तस्यभार्गवःकविःपवमानःसोमोजगती ।

वे ॥ परि॑सोम॒प्रध॑न्वास्व॒स्तये॒नृभिः॑पुना॒नोऽअभि॑वा॑सया॒शिरँ॑ । येते॒मदा॑ऽआह॒नसो॒विहा॑यस॒स्तेभि॒रिंद्रं॑चोदय॒दात॑वे म॒घं+ ॥ ३३ ॥ इतिसप्तमाष्टकेद्वितीयोऽध्यायः ॥ २ ॥ ॥ ॥ ॥

पंचाशाध्यायेवर्गाः ३३ सूक्तानि ११ ऋचः १६३ ॥ त्यागः ॥ पवमानायसोमाये. ४८ अग्नयेपवमानाये. ३ पवमानायसोमाये. १८ पूष्णेपवमानायसोमाये. ३ पवमानायसोमाये. १० अग्नयेपवमानाये. २ सवित्र. अग्निसवितृभ्या. विश्वेभ्योदेवेभ्य.पवमानायसोमाये. ३ पावमान्यध्येतृभ्यइ. २ पवमानायसोमाये. ७१ ॥ इतिसप्तमेद्वितीयः ॥

धर्तैषप्रराजाचोदसःसोमस्यवसुर्भारद्वाजःप्रसोमस्यासावितित्रिष्टुबंतैंपवित्रंतेपवित्रःपवस्ववाच्यःप्रजापतिरिंद्रायद्वादशवेनोभार्गवोद्वित्रिष्टुबंतैंप्रतेष्टाचत्वारिंशदृषिगणादशर्चाअकृष्टामाषाःप्रथमेसिकतानिवावरीद्वितीयेपृश्नियोजास्तृतीयेत्रयश्चतुर्थेत्रेःपंचांत्यागृत्समदःप्रतुनवोशनायंसोमोष्टौप्रोस्यसप्तप्रहिन्वानःषड्वसिष्ठः॥३॥

॥ हरिःओम् ॥ (९।४।९) ध॒र्तादि॒वः॑पव॑ते॒कृत्व्यो॒रसो॒दक्षो॑दे॒वाना॑मनु॒माद्यो॒नृभिः॑ । हरिः॑सृजा॒नोऽअत्यो॒नसत्व॑भि॒र्वृथा॒पाजां॑सिकृणुते॒न॒दीष्वा+ ॥ शूरो॒नधत्त॒ऽआयु॑धा॒गभ॑स्त्यो॒ःस्वः॒ःसिषा॑सन्रथि॒रोगवि॑ष्टिषु । इंद्र॑स्य॒शुष्म॑मी॒रय॑न्नप॒स्युभि॒रिंदु॒र्हिन्वा॒नोऽअ॑ज्यतेमनी॒षिभिः॑ ॥ इंद्र॑स्यसोम॒पव॑मानऽऊ॒र्मिणा॑तवि॒ष्यमा॑णोज॒ठरे॒ष्वावि॑श । प्रणः॑पि

(९।४।९) धर्तेतिपंचर्चस्यसूक्तस्यभार्गवःकविःपवमानसोमोजगती ।

न्व॒वि॒द्युद॒भ्रेव॒रोद॑सीधि॒यानवा॒जाँऽउप॑मासि॒शश्व॑तः ॥ विश्व॑स्य॒राजा॑पवतेस्व॒र्दृश॑ऽऋ॒तस्य॑धी॒तिमृ॑षि॒षाळ॑वीवशत् । यःसूर्य॒स्यासि॑रेणमृ॒ज्यते॑पि॒ताम॑ती॒नामस॑मष्टकाव्यः ॥ वृषे॑वयू॒थापरि॒कोश॑मर्ष॒स्यपा॒मु॒पस्थे॑वृष॒भःकनि॑क्रदत् । सइंद्रा॑यपवसेमत्स॒रिन्त॑मो॒यथा॒जेषा॑मसमि॒थेत्वोत॑यः ॥१॥ (९।४।१०) ए॒षप्रकोशे॒मधु॑माँऽअचिक्रद॒दिंद्र॑स्य॒वज्रो॒वपु॑षो॒वपु॑ष्टरः । अ॒भीमृ॒तस्य॑सु॒दुघा॑घृ॒तश्चुतो॑वा॒श्राऽअ॑र्षंति॒पय॑सेवधे॒नवः॑ ॥ सपू॒र्व्यःप॑वते॒यंदि॒वस्परि॑श्ये॒नोम॑था॒यदि॑षि॒तस्ति॒रोरजः॑ । सम॑ध्व॒ऽआयु॑वते॒वेवि॑जान॒ऽइत्कृ॒शानो॒रस्तु॒र्मन॒साहं॑बि॒भ्युषा॑ ॥ तेन॒ःपूर्वा॑स॒ऽउप॑रास॒ऽइंद॑वोम॒हेवाजा॑यधन्वं॒तुगोमं॑ते । ई॒क्षे॒ण्या॑सो॒ऽअ॒ह्यो॒३॒नचार॑वो॒ब्रह्म॑ब्रह्म॒येजु॑जु॒षुर्ह॒विर्ह॑विः ॥ अ॒यंनो॑वि॒द्वान्व॑नवद्वनुष्य॒तऽइंदुः॑स॒त्राचा॒मन॑सापुरुष्टु॒तः । इ॒नस्य॒यःसद॑ने॒गर्भ॑मा॒दधे॒गवा॑मुरु॒ब्जम॒भ्यर्षति॑व्र॒जं+ ॥ चक्रि॑र्दि॒वःप॑वते॒कृत्व्यो॒रसो॑म॒हाँऽअद॑ब्धो॒वरु॑णो॒हु॒रुग्य॒ते । असा॑वि॒मि॒त्रोवृ॒जने॑षुय॒ज्ञियोत्यो॒नयू॒थेवृ॑ष॒युःकनि॑क्रदत् ॥ २ ॥ (९।४।११) प्रराजा॒वाचं॑ज॒नय॑न्नसिष्यदद॒पोवसा॑नोऽअ॒भिगाऽई॑यक्षति । गृ॒भ्णाति॑रि॒प्रमवि॑रस्य॒तान्वा॑शु॒द्धोदे॒वाना॒मुप॑यातिनिष्कृ॒तं+ ॥ इंद्रा॑यसोम॒परि॑षिच्यसे॒नृभि॑र्नृ॒चक्षा॑ऽऊ॒र्मिःक॒विर॑ज्यसे॒वने॑ । पू॒र्वीर्हि॑तेस्रु॒तयः॒संति॒यात॑वेस॒हस्र॒मश्वा॒हर॑यश्चमू॒षदः॑ ॥ स॒मु॒द्रिया॑ऽअप्स॒रसो॑मनी॒षिण॒मासी॑नाऽअं॒तर॒भिसोम॑मक्षरन् । ताऽईं॑हिन्वंतिह॒र्म्यस्य॑स॒क्षणिं॒याचं॑तेसु॒म्नंपव॑मान॒मक्षि॑तं ॥ गो॒जिन्न॒ःसोमो॑र

(९।४।१०) एषइतिपंचर्चस्यसूक्तस्यकविःपवमानसोमोजगती । (९।४।११) प्रराजेतिपंचर्चस्यसूक्तस्यकविःपवमानसोमोजगती ।

CC-0. Radi-Acharya Kathmandu Collection

थजिद्धिरण्यजित्स्वर्जिदब्जित्पवतेसहस्रजित् । यंदेवासश्चक्रिरेपीतयेमदंस्वादिष्ठंद्रप्समरुणंमयोभुवं ॥ एतानिसोमपवमानोऽअस्मयुःसत्यानिकृण्वन्द्रविणान्यर्षसि । जहिशत्रुमंतिकेदूरकेचयऽउर्वींगव्यूतिमभयंचनस्कृधि ॥ ३ ॥ (९।४।१२) अचोदसोनोधन्वंत्विंदवःप्रसुवानासोबृहद्दिवेषुहरयः । विचनशन्नऽइषोऽअरातयोर्योनशंतसनिषंतनोधियः ॥ प्रणोधन्वंत्विंदवोमदच्युतोधनावायेभिरर्वतोजुनीमसि । तिरोमर्तस्यकस्यचित्परिह्वृतिंवयंधनानिविश्वधाभरेमहि ॥ उतस्वस्याऽअरात्याऽअरिर्हिषऽउतान्यस्याऽअरात्यावृकोहिषः । धन्वन्नतृष्णासमरीततांँऽअभिसोमजहिपवमानदुराध्यः* ॥ दिवितेनाभापरमोयऽआददेपृथिव्यास्तेरुरुहुःसानविक्षिपः । अद्रयस्त्वावप्सतिगोरधित्वच्य१प्सुत्वाहस्तैर्दुदुहुर्मनीषिणः ॥ एवातऽइंदोसुभ्वंसुपेशसंरसंतुंजंतिप्रथमाऽअभिश्रियः । निदंनिदंपवमाननितारिषऽआविस्तेशुष्मोभवतुप्रियोमदः ॥ ४ ॥ (९।४।१३) सोमस्यधारापवतेनृचक्षसऽऋतेनदेवान्हवतेदिवस्परि । बृहस्पतेरवथेनाविदिद्युतेसमुद्रासोनसवनानिविव्यचुः ॥ यंत्वावाजिन्नघ्न्याऽअभ्यनूषतायोहतंयोनिमारोहसिद्युमान् । मघोनामायुःप्रतिरन्महिश्रवऽइंद्रायसोमपवसेवृषामदः ॥ ऐंद्रस्यकुक्षापवतेमदिन्तमऽऊर्जंवसानःश्रवसेसुमंग

(९।४।१२) अचोदसइतिपंचर्चस्यसूक्तस्यकविःपवमानसोमोजगती । (९।४।१३) सोमस्येतिपंचर्चस्यसूक्तस्यभारद्वाजोवसुःपवमानसोमोजगती ।

लः । प्रत्यङ्सविश्वाभुवनाभिपप्रथेक्रीळन्हरिरत्यःस्यंदतेवृषा ॥ तंत्वादेवेभ्योमधुमत्तमंनरःसहस्रधारंदुहतेदशक्षि
पः । नृभिःसोमप्रच्युतोग्रावभिःसुतोविश्वान्देवाँऽआपवस्वासहस्रजित् ॥ तंत्वाहस्तिनोमधुमंतमद्रिभिर्दुहंत्यप्सुवृ
षभंदशक्षिपः । इंद्रंसोममादयन्दैव्यंजनंसिंधोरिवोर्मिःपवमानोऽअर्षसि ॥ ५ ॥ (९।४।१४) प्रसोमस्यपवमानस्यो
र्मयऽइंद्रस्ययंतिजठरंसुपेशसः । दध्नायदीमुन्नीतायशसागवांदानायशूरमुदमंदिषुःसुताः+ ॥ अच्छाहिसोमःकलशाँ
ऽअसिष्यददत्योनवोह्ळारघुवर्तनिर्वृषा । अथादेवानामुभयस्यजन्मनोविद्वाँऽअश्नोत्यमुतऽइतश्चयत्+ ॥ आनःसोमप
वमानःकिरावस्विदोभवमघवाराधसोमहः । शिक्षावयोधोवसवेसुचेतुनामानोगयमारेऽअस्मत्परासिचः ॥ आनःपू
षापवमानःसुरातयोमित्रोगच्छंतुवरुणःसजोषसः । बृहस्पतिर्मरुतोवायुरश्विनात्वष्टासवितासुयमासरस्वती ॥ उ
भेद्यावापृथिवीविश्वमिन्वेऽअर्यमादेवोऽअदितिर्विधाता । भगोनृशंसऽउर्वं१तरिक्षंविश्वेदेवाःपवमानंजुषंत ॥ ६ ॥
(९।४।१५) असाविसोमोऽअरुषोवृषाहरीराजेवदस्मोऽअभिगाऽअचिक्रदत् । पुनानोवारंपर्येत्यव्ययंश्येनोनयो
निंघृतवंतमासदं ॥ कविर्वेधस्यापर्येषिमाहिनमत्योनमृष्टोऽअभिवाजमर्षसि । अपसेधन्दुरितासोममृळयघृतंवसानः

(९।४।१४) प्रसोमस्येतिपंचर्चस्यसूक्तस्यवसुःपवमानसोमोजगत्यंत्यात्रिष्टुप् । (९।४।१५) असावीतिपंचर्चस्यसूक्तस्यवसुःपवमानसोमोजगत्यंत्यात्रिष्टुप् ।

परियासिनिर्णिजं ॥ पर्जन्यःपितामहिषस्यपर्णिनोनाभापृथिव्यागिरिषुक्षयंदधे । स्वसारऽआपोऽअभिगाऽउतासर
न्त्संग्रावभिर्नसतेवीतेऽअध्वरे+ ॥ जायेवपत्यावधिशेवमंहसेपज्रायागर्भशृणुहिब्रवीमिते । अंतर्वाणीषुप्रचरासुजी
वसेनिंद्योवृजनेसोमजागृहि ॥ यथापूर्वेभ्यःशतसाऽअमृध्रःसहस्रसाःपर्ययावाजमिंदो । एवापवस्वसुवितायनव्यसेत
वव्रतमन्वापःसचंते ॥ ७ ॥ (९।४।१६) पवित्रंतेविततंब्रह्मणस्पतेप्रभुर्गात्राणिपर्येषिविश्वतः । अतप्ततनूर्नतदा
मोऽअश्नुतेशृतासऽइद्वहंतस्तत्समाशत ॥ तपोष्पवित्रंविततंदिवस्पदेशोचंतोऽअस्यतंतवोव्यस्थिरन् । अवंत्यस्यपवी
तारमाशवोदिवस्पृष्ठमधितिष्ठंतिचेतसा ॥ अरूरुचदुषसःपृश्निरग्रियऽउक्षाबिभर्तिभुवनानिवाजयुः । मायाविनोममिरे
ऽअस्यमाययानृचक्षसःपितरोगर्भमादधुः ॥ गंधर्वऽइत्थापदमस्यरक्षतिपातिदेवानांजनिमान्यद्भुतः । गृभ्णातिरिपुं
निधयानिधापतिःसुकृत्तमामधुनोभक्षमाशत ॥ हविर्हविष्मोमहिसद्मदैव्यंनभोवसानःपरियास्यध्वरं । राजापवित्रर
थोवाजमारुहःसहस्रभृष्टिर्जयसिश्रवोबृहत्+ ॥ ८ ॥ (९।४।१७) पवस्वदेवमादनोविचर्षणिरप्साऽइंद्रायवरुणाय
वायवे । कृधीनोऽअद्यवरिवःस्वस्तिमदुरुक्षितौगृणीहिदैव्यंजनं ॥ आयस्तस्थौभुवनान्यमर्त्योविश्वानिसोमःप ॥१६॥

(९।४।१६) पवित्रंतइतिपंचर्चस्यसूक्तस्यांगिरसःपवित्रःपवमानसोमोजगती । (९।४।१७) पवस्वेतिपंचर्चस्यसूक्तस्यवाच्यःप्रजापतिः पवमानसोमोजगती ।

रितान्यर्षति । कृण्वन्त्संचृतँविचृतमभिष्टयऽइंदुःसिषक्त्युषसंनसूर्यः ॥ आयोगोभिःसृज्यतऽओषधीष्वादेवानांसु
म्नऽइषयन्नुपावसुः । आविद्युतापवतेधारयासुतऽइंद्रसोमोमादयन्दैव्यंजनँ ॥ एषस्यसोमःपवतेसहस्रजिद्धिन्वानो
वाचमिषिरामुषर्बुधँ । इंदुःसमुद्रमुदियर्तिवायुभिरेंद्रस्यहार्दिकलशेषुसीदति ॥ अभित्यंगावःपयसापयोवृधंसोमंश्री
णंतिमतिभिःस्वर्विदँ । धनंजयःपवतेकृत्व्योरसोविप्रःकविःकाव्येनास्वर्चनाः ॥ ९ ॥ (९।४।१८) इंद्रायसोमसु
षुतःपरिस्रवापामीवाभवतुरक्षसासह । मातेरसस्यमत्सतद्वयाविनोद्रविणस्वंतऽइहसंत्विंदवः ॥ अस्मान्त्समर्येपवमा
नचोदयदक्षोदेवानामसिहिप्रियोमदः । जहिशत्रूँऽरभ्याभंदनायतःपिबेंद्रसोममवनोमृधोजहि ॥ अदब्धऽइंदोपव
सेमदिन्तमऽआत्मेंद्रस्यभवसिधासिरुत्तमः । अभिस्वरंतिबहवोमनीषिणोराजानमस्यभुवनस्यनिंसते ॥ सहस्रणीथः
शतधारोऽअद्भुतऽइंद्रायेंदुःपवतेकाम्यंमधु । जयन्क्षेत्रमभ्यर्षाजयन्नपऽउरुंनोगातुंकृणुसोममीढ्वः ॥ कनिक्रदत्कल
शेगोभिरज्यसेव्य१व्ययंसमयावारमर्षसि । मर्मृज्यमानोऽअत्योनसानसिरिंद्रस्यसोमजठरेसमक्षरः ॥ स्वादुःपवस्व
दिव्यायजन्मनेस्वादुरिंद्रायसुहवीतुनाम्ने । स्वादुर्मित्रायवरुणायवायवेबृहस्पतयेमधुमाँऽअदाभ्यः ॥ १० ॥ अ
त्यंमृजंतिकलशेदशक्षिपःप्रविप्राणांमतयोवाचऽईरते । पवमानाऽअभ्यर्षंतिसुष्टुतिमेंद्रंविशंतिमदिरासऽइंदवः ॥

(९।४।१८) इंद्रायेतिद्वादशर्चस्यसूक्तस्यभार्गवोवेनःपवमानसोमोजगत्यंत्येद्वेत्रिष्टुभौ ।

पव॑मानोऽअ॒भ्य॑र्षासु॒वीर्य॑मु॒र्वींगव्यू॑ति॒ंम॒हि॒शर्म॑स॒प्रथः॑ । मा॒कि॑र्नो॑ऽअ॒स्यपरि॑षूतिरीश॒ते॑दो॒जयै॑म॒त्वया॒धनं॑धनं ॥ अधि॒
द्याम॑स्थाद्वृष॒भोवि॑चक्ष॒णोरू॑रुच॒द्विदि॒वोरो॑च॒नाक॒विः । राजा॑प॒वित्र॒मत्यै॑ति॒रोरु॑वद्दि॒वःपी॒यूषं॑दुहतेनृ॒चक्ष॑सः ॥ दि॒वो
नाके॒मधु॑जिह्वाऽअस॒श्चतो॑वे॒नादु॑हन्त्यु॒क्षणं॑गिरि॒ष्ठां । अ॒प्सुद्र॒प्सं॑वावृधा॒नंस॑मु॒द्रऽआसिंधो॑रू॒र्मामधु॑मंतंप॒वित्र॒ऽआ+ ॥
नाके॑सुप॒र्णमु॑पपप्ति॒वांसं॒गिरो॑वे॒नाना॑मकृपंतपू॒र्वीः । शिशुं॑रिहंतिम॒तयः॒पनि॑प्नतंहिर॒ण्ययं॑शकु॒नंक्षाम॑णि॒स्थां+ ॥ ऊ॒र्ध्वो
गंध॒र्वो॑ऽअधि॒नाके॑ऽअस्था॒द्विश्वा॑रू॒पाप्र॑ति॒चक्षा॑णोऽअस्य । भा॒नुःशु॒क्रेण॑शो॒चिषा॒व्य॑द्यौ॒त्प्रारू॑रुच॒द्रोद॑सीमा॒तरा॒शुचिः॑
॥ ११ ॥ (९।५।१) प्रत॑ऽआ॒शवः॑पवमानधी॒जवो॒मदा॑ऽअर्ष॑तिरघु॒जाऽइ॑व॒त्मना॑ । दि॒व्याःसु॑प॒र्णामधु॑मंत॒ऽइंद॑वो
म॒दिन्त॑मासः॒परि॒कोश॑मासते ॥ प्रते॒मदा॑सोमदि॒रास॑ऽआ॒शवोसृ॑क्षत॒रथ्या॑सो॒यथा॒पृथ॑क् । धे॒नुर्नव॒त्संपय॑सा॒भिव॒ज्रि
ण॒मिंद्र॒मिंद॑वो॒मधु॑मंतऽऊ॒र्मयः॑ ॥ अत्यो॒नहि॑या॒नोऽअ॒भिवाज॑मर्षस्व॒र्वि॑त्कोश॑ंदि॒वोऽअद्रि॑मातरं । वृषा॑प॒वित्रे॒ऽअधि॒
सानो॑ऽअ॒व्यये॒सोमः॑पुना॒नऽइंद्रि॒याय॒धाय॑से ॥ प्रत॒ऽआश्वि॑नीःपवमानधी॒जुवो॑दि॒व्याऽअ॑सृग्र॒न्पय॑सा॒धरी॑मणि । प्रा॑

॥१७॥

पंचमेनुवाकेएकादशसूक्तानि (९।५।१) प्रतआशवइत्यष्टाचत्वारिंशदृचेसूक्तेआद्यानांदशानामकृष्टामाषाऋषयःएकादश्यादिदशानां सिकतानिवावरीएकविंश्यादिदशानांपृश्नियोजाःएकात्रिंश्यादिदशानामत्रयःएकचत्वारिंश्यादिपंचानांभौमोत्रिःअंत्यानांतिसृणांशौनको गृत्समदःपवमानसोमोजगती ।

तर्क्ष्य॒ःस्था॑वि॑रीरसृक्षत॒येत्वां॑मृ॒जंत्यृ॑षिषाणवे॒धस॑ः ॥ विश्वा॒धामा॑निविश्वचक्ष॒ऽऋभ्व॑सःप्र॒भोस्ते॑स॒तःपरि॑यंतिके॒तव॑ः ।
व्या॑न॒शिःप॑वसेसोम॒धर्म॑भि॒ःपति॒र्विश्व॑स्य॒भुव॑नस्यराजसि ॥ १२ ॥ उ॒भ॒यत॒ःपव॑मानस्यर॒श्मयो॑ध्रु॒वस्य॑स॒तःपरि॑यंतिके॒
तव॑ः । यदी॑प॒वित्रे॒ऽअधि॑मृ॒ज्यते॒हरि॒ःसत्ता॒नियोना॑कु॒लशे॑षुसीदति ॥ य॒ज्ञस्य॑के॒तुःप॑वतेस्वध्व॒रःसोमो॑दे॒वाना॒मुप॑याति
निष्कृ॒तं । स॒हस्र॑धार॒ःपरि॒कोश॑मर्षति॒वृषा॑प॒वित्र॒मत्ये॑ति॒रोरु॑वत् ॥ राजा॑समु॒द्रंन॒द्यो॒३॑ विगा॑हते॒पामू॒र्मिंस॑चते॒सिंधु॑षुश्रि॒
तः । अध्य॑स्था॒त्सानु॒पव॑मानोऽअ॒व्ययं॒नाभा॑पृथि॒व्याध॒रुणो॑म॒होदि॒वः+ ॥ दि॒वोनसानु॑स्त॒नय॑न्नचिक्रद॒द्द्यौश्च॒यस्य॑पृ
थि॒वीच॒धर्म॑भिः । इंद्र॑स्यस॒ख्यंप॑वतेवि॒वेवि॑द॒त्सोम॑ःपु॒नानःक॒लशे॑षुसीदति ॥ ज्योति॑र्य॒ज्ञस्य॑पवते॒मधु॑प्रि॒यंपि॒तादे॒वा
नां॑जनि॒ताविभू॒व॑सुः । दधा॑ति॒रत्नं॑स्व॒धयो॑रपी॒च्यं॑म॒दिन्त॑मोमत्स॒रऽइं॑द्रि॒योरस॑ः ॥ १३ ॥ अ॒भि॒क्रंद॑न्क॒लशं॑वा॒ज्य॑र्ष
ति॒पति॑र्दि॒वःश॒तधा॑रोविचक्ष॒णः । हरि॑र्मि॒त्रस्य॒सद॑नेषुसीदतिमर्मृजा॒नोवि॑भि॒ःसिंधु॑भि॒र्वृषा॑ ॥ अग्रे॒सिंधू॒नां॑पव॑मानोऽ
अर्ष॒त्यग्रे॑वा॒चोऽअ॑ग्रि॒योगोषु॑गच्छति । अग्रे॒वाज॑स्यभजतेमहाध॒नंस्वा॑यु॒धःसो॒तृभि॑ःपूयते॒वृषा॑ ॥ अ॒यंम॒तवा॑न्छकु॒नोय
था॑हि॒तोव्ये॑ससार॒पव॑मानऽऊ॒र्मिणा॑ । तव॒क्रत्वा॒रोद॑सीऽअंत॒राक॑वे॒शुचि॑र्धि॒यापव॑ते॒सोम॑ऽइंद्रते ॥ द्रा॒पिंव॑सा॒नोयज॒
तोदि॑वि॒स्पृशं॑मंतरिक्ष॒प्राभुव॑ने॒ष्वर्पि॑तः । स्व॑र्जज्ञा॒नोनभ॑सा॒भ्य॑क्रमीत्प्र॒त्नम॑स्यपि॒तर॒माविवा॑सति ॥ सोऽअ॑स्यवि॒शेमहि॒
शर्म॑यच्छति॒योऽअ॑स्य॒धाम॑प्रथ॒मंव्या॑न॒शे । प॒दंयद॑स्यप॒र॒मेव्यो॑म॒न्यतो॒विश्वा॑ऽअ॒भिसंया॑तिसं॒यत॑ः ॥ १४ ॥ प्रोऽअ॑

CC-0. Ram Acharya Kathmandu Collection

॥१८॥ यासीदिंदुरिंद्रंस्यनिष्कृतंसखासख्युर्नप्रमिनातिसंगिरैः । मर्यैऽइवयुवतिभिःसमंर्षतिसोमंःकलशैंशतयांम्नापथा+ ॥
प्रवोधियोंमंद्रयुवोंविपन्युवंःपनस्युवंःसंवसंनष्वक्रमुः । सोमंमनीषाऽअभ्यंनूषतस्तुभोभिधेनवःपयंसेमशिश्रयुः ॥
आनंःसोमसंयतंपिप्युषीमिषमिंदोपवंस्वपवंमानोऽअस्त्रिधं । यानोदोहंतेत्रिरहन्नसंश्चुषीक्षुमद्वाजंवन्मधुंमत्सुवीर्यं ॥
वृषांमतीनांपंवतेविचक्षणःसोमोऽअह्नंःप्रतरीतोषसौंदिवः । क्राणासिंधूंनांकलशाँऽअवीवशदिंद्रंस्यहार्द्यांविशन्मंनी
षिभिंः ॥ मनीषिभिंःपवतेपूर्व्यःकविर्नृभिंर्यतःपरिकोशाँऽअचिक्रदत् । त्रितस्यनामंजनयन्मधुंक्षरदिंद्रंस्यवायोःस
ख्यायकर्तंवे ॥ १५ ॥ अयंपुंनानऽउषसोविरोंचयदयंसिंधुंभ्योऽअभवदुलोककृत् । अयंत्रिःसप्तदुंदुहानऽआशिरं
सोमोंहृदेपंवतेचारुंमत्सरः+ ॥ पवंस्वसोमदिव्येषुधामंसुसृजानऽइंदोकलशेंपवित्रऽआ । सीदन्निंद्रंस्यजठरेकानिंक्रद
न्नृभिंर्यतःसूर्यमारोंहयोदिवि+ ॥ अद्रिंभिःसुतःपंवसेपवित्रऽआँऽइंदविंद्रंस्यजठरेष्वाविशन् । त्वंनृचक्षांऽअभवोवि
चक्षणसोमंगोत्रमंगिंरोभ्योवृणोरपं ॥ त्वांसोमपवंमानंस्वाध्योनुविप्रांसोऽअमदन्नवस्यवंः । त्वांसुपर्णऽआभंरद्दिव
स्परींदोविश्वांभिर्मतिभिःपरिंष्कृतं ॥ अव्यैंपुनानंपरिवारंऽऊर्मिणाहरिंनवंतेऽअभिसप्तधेनवंः । अपामुपस्थेऽअध्या ॥१८॥
यवंःकविमृतस्ययोनांमहिषाऽअंहेषत ॥ १६ ॥ इंदुंःपुनानोऽअतिंगाहतेमृधोविश्वांनिकृण्वन्त्सुपथांनियज्यंवे ।
गाःकृंण्वानोनिर्णिजंहर्यतःकविरत्योनक्रीळन्परिवारंमर्षति ॥ असश्चतंःशतधांराऽअभिश्रियोहरिंनवंतेवताऽउंद

न्युवः । क्षिपोमृजंतिपरिगोभिरावृतंतृतीयेपृष्ठेऽअधिरोचनेदिवः+ ॥ तवेमाःप्रजादिव्यस्यरेतसस्त्वंविश्वस्यभुवन
स्यराजसि । अथेदंविश्वंपवमानतेवशेत्वमिंदोप्रथमोधामधाऽअसि ॥ त्वंसमुद्रोऽअसिविश्ववित्कवेतवेमाःपंचप्रदि
शोविधर्मणि । त्वंद्यांचपृथिवींचातिजभ्रिषेतवज्योतींषिपवमानसूर्यः ॥ त्वंपवित्रेरजसोविधर्मणिदेवेभ्यःसोमपव
मानपूयसे । त्वामुशिजःप्रथमाऽअगृभ्णततुभ्येमाविश्वाभुवनानियेमिरे ॥ १७ ॥ प्ररेभऽएत्यतिवारमव्ययंवृषाव
नेष्ववचक्रदद्धरिः । संधीतयोवावशानाऽअनूषतशिशुंरिहंतिमतयःपनिप्नतं ॥ ससूर्यस्यरश्मिभिःपरिव्यततंतुंत
न्वानस्त्रिवृतंयथाविदे । नयन्नृतस्यप्रशिषोनवीयसीःपतिर्जनीनामुपयातिनिष्कृतं+ ॥ राजासिंधूनांपवतेपतिर्दिवऽ
ऋतस्ययातिपथिभिःकनिक्रदत् । सहस्रधारःपरिषिच्यतेहरिःपुनानोवाचंजनयन्नुपावसुः ॥ पवमानमह्यर्णोविधावसि
सूरोनचित्रोऽअव्ययानिपव्यया । गभस्तिपूतोनृभिरद्रिभिःसुतोमहेवाजायधन्यायधन्वसि ॥ इषमूर्जंपवमानाभ्यर्ष
सिश्येनोनवंसुकलशेषुसीदसि । इंद्रायमद्वामद्योमदःसुतोदिवोविष्टंभऽउपमोविचक्षणः+ ॥१८॥ सप्तस्वसारोऽअभि
मातरःशिशुंनवंजज्ञानंजेन्यंविपश्चितं । अपांगंधर्वंदिव्यंनृचक्षसंसोमंविश्वस्यभुवनस्यराजसे ॥ ईशानऽइमाभुवना
निवीयसेयुजानऽइंदोहरितःसुपर्ण्यः । तास्तेक्षरंतुमधुमद्घृतंपयस्तवव्रतेसोमतिष्ठंतुकृष्टयः ॥ त्वंनृचक्षाऽअसिसोमवि
श्वतःपवमानवृषभताविधावसि । सनःपवस्ववसुमद्धिरण्यवद्वयंस्यामभुवनेषुजीवसे ॥ गोवित्पवस्ववसुविद्धिरण्य

विद्रंतोधाऽइंदोभुवनेष्वर्पितः । त्वंसुवीरोऽअसिसोमविश्ववित्तंत्वाविप्राऽउपगिरेमऽआसते ॥ उन्मध्वऽऊर्मिर्वनना
ऽअतिष्ठिपदपोवसानोमहिषोविगाहते । राजापवित्ररथोवाजमारुहत्सहस्रभृष्टिर्जयतिश्रवोबृहत्+ ॥ १९ ॥ सभं
॥१९॥ दनाऽउदियर्तिप्रजावतीर्विश्वायुर्विश्वाःसुभराऽअहर्दिवि । ब्रह्मप्रजावद्रयिमश्वपस्त्यंपीतऽइंदविंद्रमस्मभ्यंयाचता
त् ॥ सोऽअग्रेऽअह्नांहरिर्हर्यतोमदःप्रचेतसाचेतयतेऽअनुद्युभिः । द्वाजनायातयन्नंतरीयतेनराचशंसंदैव्यंचधर्त
रि ॥ अंजतेव्यंजतेसमंजतेक्रतुंरिहंतिमधुनाभ्यंजते । सिंधोरुच्छ्वासेपतयंतमुक्षणंहिरण्यपावाःपशुमासुगृभ्णते ॥
विपश्चितेपवमानायगायतमहीनधारात्यन्धोऽअर्षति । अहिर्नजूर्णामतिसर्पतित्वचमत्योनक्रीळन्नसरद्वृषाहरिः ॥
अग्रेगोराजाप्यस्तविष्यतेविमानोऽअह्नांभुवनेष्वर्पितः । हरिर्घृतस्नुःसुदृशीकोऽअर्णवोज्योतीरथःपवतेरायऽओक्यः*
॥ २० ॥ असर्जिस्कंभोदिवऽउद्यतोमदःपरित्रिधातुर्भुवनान्यर्षति । अंशुंरिहंतिमतयःपनिप्नतंगिरायदिनिर्णिजमृ
ग्मिणोययुः+ ॥ प्रतेधाराऽअत्यण्वानिमेष्यःपुनानस्यसंयतोयंतिरंहयः । यद्गोभिरिंदोचम्वोःसमज्यसऽआसुवानः
सोमकलशेषुसीदसि ॥ पवस्वसोमक्रतुविन्नऽउक्थ्योव्योवारेपरिधावमधुप्रियं । जहिविश्वान्रक्षसऽइंदोऽअत्रिणोबृ ॥१९॥
हद्वदेमविदथेसुवीराः ॥ २१ ॥ (९।५।२) प्रतुद्रवपरिकोशन्निषीदनृभिःपुनानोऽअभिवाजमर्ष । अश्वंनत्वावा

(९।५।२) प्रतुद्रवेतिनवर्चस्यसूक्तस्यकाव्यउशनापवमानःसोमस्त्रिष्टुप् ।

जिनँम॒र्जयं॒तोच्छां॑ब॒र्हीँर॑श॒नाभि॒र्नयं॑ति ॥ स्वा॒यु॒धःपं॑वतेदे॒वऽइंदुं॑रशस्ति॒हावृ॒जनं॒रक्षं॑माणः । पि॒तादे॒वानां॑जनि॒तासु॒दक्षो॑विष्टं॒भोदि॒वोध॒रुणः॑पृथि॒व्याः ॥ ऋषि॒र्विप्रः॑पुरऽए॒ताजना॑नामृ॒भुर्धीर॑ऽउ॒शना॒काव्ये॑न । सचि॑द्विवेद॒निहि॑तं॒यदा॑सामपी॒च्यं॑१॒गुह्यं॒नाम॒गोनाँ॑ ॥ एष॒स्यते॒मधुं॑माँऽइंद्र॒सोमो॒वृषा॒वृष्णे॒परि॑प॒वित्रे॑ऽअक्षाः । स॒ह॒स्र॒साःशं॑त॒साभू॑रि॒दावा॑श्वत्त॒मंब॒र्हिरावा॒ज्य॑स्थात् ॥ ए॒तेसोमा॑ऽअ॒भिग॒व्यास॒हस्रा॑म॒हेवाजा॑या॒मृता॑य॒श्रवां॑सि । प॒वित्रे॑भि॒ःपवं॑मानाऽअसृग्रन्छ्र॒वस्यवो॒नपृत॒नाजो॒ऽअत्याः॑ ॥ २२ ॥ परि॒हिष्मा॑पुरुहू॒तोजना॑नां॒विश्वास॑र॒द्भोज॑नापू॒यमा॑नः । अथा॒भ॑रश्येनभृत॒प्रयां॑सिर॒यिंतुंजा॑नो॒ऽअ॒भिवाज॑मर्ष ॥ ए॒षसु॑वा॒नःपरि॒सोमः॑प॒वित्रे॒सर्गो॒नसृ॒ष्टोऽअं॑दधाव॒दर्वा॑ । ति॒ग्मेशिशा॑नोमहि॒षोनशृं॒गे॒गाग॒व्य॒न्नभिशूरो॒नसत्वा॑ ॥ ए॒षायं॑यौपर॒मादं॒तरद्रे॒ःकूचिं॑त्स॒तीरू॒र्वेगाविं॑वेद । दि॒वोनवि॒द्युत्स्त॒नयं॑त्य॒भ्रैःसोमं॑स्यतेपवतऽइंद्र॒धारा॑ ॥ उ॒तस्मं॑रा॒शिंपरिं॑यासि॒गोना॒मिंद्रे॑णसोमस॒रथं॑पुना॒नः । पू॒र्वीरिषो॑बृह॒तीर्जी॑रदानो॒शिक्षा॑शचीव॒स्तव॒ताऽउं॑प॒ष्टुत्+ ॥ २३ ॥ (९।५।३) अ॒यंसोमं॑ऽइंद्र॒तुभ्यं॑सुन्वे॒तुभ्यं॑पवते॒त्वमं॑स्यपाहि । त्वंह॒यंचं॑कृ॒षेत्वंवं॑वृ॒षऽइंदुं॑मदा॑य॒युज्या॑य॒सोमं॑ ॥ सऽई॒रथो॒नभुं॑रि॒षाळ्यो॑जि॒महः॑पु॒रूणि॑सा॒तये॒वसूं॑नि । आदीं॒विश्वा॑नहु॒ष्या॑णिजा॒तास्वं॑र्षाता॒वनेऽऊ॒र्ध्वानं॑वंत ॥ वा॒युर्नयो॒नि॒युत्वाँ॑ऽइ॒ष्टया॑मा॒नासं॑त्येव॒हव॒ऽआशंभं॑विष्ठः । वि॒श्ववा॑रोद्रवि॒णोदाऽइ॒व॒त्मन्पूषे॑व॒धीज

(९।५।३) अयंसोमइत्यष्टर्चस्यसूक्तस्योशनापवमानसोमस्त्रिष्टुप् ।

Digitization by eGangotri. Funding MDF-Delhi

ऋक्सं. वंनोसिसोम ॥ इंद्रोनयोमहाकर्माणिचक्रिर्हंतावृत्राणामसिसोमपूर्भित् । पैद्रोनहित्वमहिनाम्नांहंताविश्वस्यासिसोम मंडलं ९
अ.७अ.३ दस्योः ॥ अग्निर्नयोवनऽआसृज्यमानोवृथापाजांसिकृणुतेनदीषु । जनोनयुध्वामहतऽउपब्दिरियर्तिसोमःपवमानऽ अनु. ५
ऊर्मिं+ ॥ एतेसोमाऽअतिवाराण्यव्यादिव्यानकोशासोऽअभ्रवर्षाः । वृथासमुद्रंसिंधवोननीचीःसुतासोऽअभिकल
॥२०॥ शाँऽअसृग्रन् ॥ शुष्मीशर्धोनमारुतंपवस्वानभिशस्तादिव्यायथाविट् । आपोनमक्षूसुमतिर्भवानःसहस्राप्साःपृतना
षाण्नयज्ञः+ ॥ राज्ञोनुतेवरुणस्यव्रतानिबृहद्गभीरंतवसोमधाम । शुचिष्ट्वमसिप्रियोनमित्रोदक्षाय्योऽअर्यमेवासिसो
म ॥ २४ ॥ (९।५।४) प्रोस्यवह्निःपथ्याभिरस्यान्दिवोनवृष्टिःपवमानोऽअक्षाः । सहस्रधारोऽअसदन्न्य१स्मेमा
तुरुपस्थेवनऽआचसोमः ॥ राजासिंधूनामवसिष्टवासऽऋतस्यनावमारुहद्रजिष्ठां । अप्सुद्रप्सोवावृधेश्येनजूतोदुहऽ
ईंपितादुहऽईंऽपितुर्जां+ ॥ सिंहंनसंतमध्वोऽअयासंहरिमरुषंदिवोऽअस्यपातिं । शूरोयुत्सुप्रथमःपृच्छतेगाऽअस्यच
क्षंसापरिपात्युक्षा+ ॥ मधुपृष्ठंघोरमयासमश्वंरथेयुंजंत्युरुचक्रऽऋष्वं । स्वसारऽईंजामयोमर्जयंतिसनाभयोवाजिन
मूर्जयंति ॥ चतस्रऽईंघृतदुहःसचंतेसमानेऽअंतर्धरुणेनिषत्ताः । ताऽईमर्षंतिनमसापुनानास्ताऽईंविश्वतःपरिषंति ॥२०॥
पूर्वीः+ ॥ विष्टंभोदिवोधरुणःपृथिव्याविश्वाऽउतक्षितयोहस्तेऽअस्य । असत्तऽउत्सोगृणतेनियुत्वान्मध्वोऽअंशुःप

(९।५।४) प्रोस्यवह्निरितिसप्तर्चस्यसूक्तस्योश[illegible]त्रिष्टुप् ।

वतऽइंद्रियाय ॥ वन्वन्नवातोऽअभिदेववीतिमिंद्रायसोमवृत्रहापवस्व । शग्धिमहःपुरुश्चंद्रस्यरायःसुवीर्यस्यपतयः
स्याम ॥ २५ ॥ (९।५।५) प्रहिन्वानोजनितारोदस्योरथोनवाजंसनिष्यन्नयासीत् । इंद्रंगच्छन्नायुधासंशिशानो
विश्वावसुहस्तयोरादधानः ॥ अभित्रिपृष्ठंवृषणंवयोधामांगूषाणामवावशंतवाणीः । वनावसानोवरुणोनसिंधून्विर
त्नधादयतेवार्याणि ॥ शूरग्रामःसर्ववीरःसहावान्जेतापवस्वसनिताधनानि । तिग्मायुधःक्षिप्रधन्वासमत्स्वषाह्ळःसा
ह्वान्पृतनासुशत्रून् ॥ उरुगव्यूतिरभयानिकृण्वन्त्समीचीनेऽआपवस्वापुरंधी । अपःसिषासन्नुषसःस्व१र्गाःसंचिक्र
दोमहोऽअस्मभ्यंवाजान् ॥ मत्सिसोमवरुणंमत्सिमित्रंमत्सींद्रमिंदोपवमानविष्णुं । मत्सिशर्धोमारुतंमत्सिदेवान्म
त्सिमहामिंद्रमिंदोमदाय ॥ एवाराजेवक्रतुमाँऽअमेनविश्वाघनिघ्नद्दुरितापवस्व । इंदोसूक्तायवचसेवयोधायूयंपा
तस्वस्तिभिःसदानः ॥ २६ ॥ इतिसप्तमाष्टकेतृतीयोध्यायः ॥ ३ ॥ ॥ ॥

एकपंचाशाध्यायेवर्गाः २६ सूक्तानि १५ ऋचः १३५ ॥ त्यागः ॥ पवमानायसोमायेदं १३५ ॥ इतिसप्तमेतृतीयः ॥

असर्जिकश्यपःपरिस्रुवानःसाकमुक्षःपंचनोधाअधियत्कण्वःकनिक्रंतिप्रस्कण्वःप्रसेनानीश्चतुर्विंशतिर्दैवोदासिः
प्रतर्दनोस्यप्रेषाष्टापंचाशदाद्यंतृचंवसिष्ठोपश्यदुत्तरांनवपृथग्वासिष्ठाइंद्रप्रमतिर्वृषगणोमन्युरुपमन्युर्व्याघ्रपा

(९।५।५) प्रहिन्वानइतिषळर्चस्यसूक्तस्यमैत्रावरुणिर्वसिष्ठःपवमानसोमस्त्रिष्टुप् ।

ऋक्सं.
अ.७अ.४
॥२१॥

मंडलं ९
अनु. ५

च्छक्तिःकर्णश्रुन्मृळीकोवसुक्रइतिचतु[illegible]अंबरीषऋजिश्वाचानुष्टुभंहबृहत्युपां
त्याहर्यतायाष्टौरेभसूनूकाश्यपौबृहत्याद्याभीनवंतेनव ॥ ४ ॥ ॥ ॥ ॥

Digitization by eGangotri. Funding MoE-IKS-Delhi

॥ हरिःओम् ॥ (९।५।६) असर्जिवक्वारथ्येयथाजौधियामनोताप्रथमोमनीषी । दशस्वसारोऽअधिसानोऽ
अव्येजंतिवह्निंसदनान्यच्छ ॥ वीतीजनस्यदिव्यस्यकव्यैरधिसुवानोनहुष्येभिरिंदुः । प्रयोनृभिरमृतोमर्त्यैभिर्मर्मृ
जानोविभिर्गोभिरद्भिः+ ॥ वृषावृष्णेरोरुवदंशुरस्मैपवमानोरुशदीर्तेपयोगोः । सहस्रमृक्वापथिभिर्वचोविदध्वस्म
भिःसूरोऽअण्वंवियाति ॥ रुजादृह्ळाचिद्रक्षसःसदांसिपुनानऽइंदऽऊर्णुहिविवाजान् । वृश्चोपरिष्टात्तुजतावधेनयेऽ
अंतिदूरादुपनायमेषां ॥ सप्रत्नवन्नव्यसेविश्ववारसूक्तायपथःकृणुहिप्राचः । येदुःषहासोवनुषाबृहंतस्ताँस्तेऽअश्याम
पुरुकृत्पुरुक्षो ॥ एवापुनानोऽअपःस्व१र्गाऽअस्मभ्यंतोकातनयानिभूरि । शंनःक्षेत्रमुरुज्योतींषिसोमज्योङ्नःसूर्यंदृश
येरिरीहि ॥ १ ॥ (९।५।७) परिसुवानोहरिरंशुःपवित्रेरथोनसर्जिसनयेहियानः । आपच्छ्लोकमिंद्रियंपूयमानःप्र
तिदेवाँऽअजुषतप्रयोभिः ॥ अच्छानृचक्षाऽअसरत्पवित्रेनामदधानःकविरस्ययोनौ । सीदन्होतेवसदनेचमूषूपेमग्म
न्नृषयःसप्तविप्राः ॥ प्रसुमेधागातुविद्विश्वदेवःसोमःपुनानःसदऽएतिनित्यं । भुवद्विश्वेषुकाव्येषुरंतानुजनान्यततेपं

॥२१॥

(९।५।६)असर्जीतिषळर्चस्यसूक्तस्यकश्यपःपवमानसोमस्त्रिष्टुप् । (९।५।७) परिसुवानइतिषळर्चस्यसूक्तस्यकश्यपःपवमानसोमस्त्रिष्टुप् ।

च॒धीर॑ः ॥ तव॒त्येसो॑मपवमानन्नि॒ण्येविश्वे॑दे॒वास्त्रय॑ऽएकाद॒शास॑ः । दश॑स्व॒धाभि॒रधि॒सानो॒ऽअव्ये॑मृ॒जंति॑त्वान॒द्य॑ःस॒प्तय॒ह्वीः+ ॥ तन्नु॒सत्यंपव॑मानस्यास्तु॒यत्र॒विश्वे॑का॒रव॑ःसं॒नसं॑त । ज्योति॒र्यदह्ने॒ऽअकृ॑णोदु॒लोकंप्राव॒न्मनुं॒दस्य॑वेकर॒भीकं॑ ॥ परि॒सद्मे॑वपशु॒मांति॒होता॒राजा॒नस॒त्यःसमि॑तीरिया॒नः । सोम॑ःपुना॒नःक॒लशाँ॑ऽअयासी॒त्सीद॑न्मृ॒गोनम॑हि॒षोवने॑षु ॥ २ ॥ (९।५।८) सा॒क॒मुक्षो॑मर्जयंत॒स्वसा॑रो॒दश॒धीर॑स्य॒धीत॒यो॒धनु॑त्रीः । हरि॒ःपर्य॑द्रव॒ज्जाःसूर्य॑स्य॒द्रोणं॑ननक्षे॒ऽअत्यो॒नवा॒जी+ ॥ संमा॒तृभि॒र्नशिशु॑र्वाव॑शा॒नोवृषा॑दधन्वेपुरु॒वारो॑ऽअ॒द्भिः । मर्यो॒नयोषा॑म॒भिनिष्कृ॒तंयन्त्संग॑च्छतेक॒लश॑ऽउ॒स्रिया॑भिः ॥ उ॒तप्रपि॑प्य॒ऽऊध॒रघ्न्या॑या॒ऽइंदु॒र्धारा॑भिःसचतेसुमे॒धाः । मू॒र्धानं॒गाव॒ःपय॑सा॒चमू॒ष्व॒भिश्री॑णंति॒वसु॑भि॒र्ननि॒क्तैः+ ॥ सनो॑दे॒वेभि॑ःपवमानर॒देंदो॑र॒यिम॒श्विनं॑वावशा॒नः । र॒थि॒रा॒यता॑मुश॒तीपुरं॑धिरस्म॒द्र्य॑१॒गादा॒वने॒वसू॑नां ॥ नूनो॑र॒यिमुप॑मास्वनृ॒वंतं॑पुना॒नोवा॒ताप्यं॑वि॒श्वश्चं॑द्रं । प्रवं॑दि॒तुरिं॑दोता॒र्यायु॑ःप्रा॒तर्म॒क्षूधि॒याव॑सु॒र्जगम्यात् ॥ ३ ॥ (९।५।९) अधि॒यद॑स्मिन्वा॒जिनी॑व॒शुभ॒ःस्पर्धं॑ते॒धिय॒ःसूर्ये॒नविशः॑ । अ॒पोवृ॑णा॒नःप॑वतेकवी॒यन्व्र॒जंनप॑शु॒वर्धं॑नाय॒मन्म॑ ॥ द्वि॒ताव्यू॒र्ण्वन्न॒मृतं॑स्य॒धामं॑स्व॒र्वि॑दे॒भुवं॑नानिप्रथंत । धियं॑ःपिन्वा॒नाःस्वसं॑रे॒नगावं॑ऽऋता॒यंती॑र॒भिवा॑वश्र॒ऽइंदुं॑ ॥ परि॒यत्क॒विः

(९।५।८) साकमुक्षइतिपंचर्चस्यसूक्तस्यगौतमोनोधाःपवमानसोमस्त्रिष्टुप् । (९।५।९) अधियदितिपंचर्चस्यसूक्तस्यकण्वःपवमानसोमस्त्रिष्टुप् ।

काव्याभरंतेशूरोनरथोभुवनानिविश्वा । देवेषुयशोमर्तायभूषन्दक्षायरायःपुरुभूषुनव्यः ॥ श्रियेजातःश्रियआनिरिया
यश्रियंवयोजरितृभ्योदधाति । श्रियंवसानाऽअमृतत्वमायन्भवंतिसत्यासमिथामितद्रौ ॥ इषमूर्जमभ्य१र्षाश्वंगामुरु
ज्योतिःकृणुहिमत्सिदेवान् । विश्वानिहिसुषहातानितुभ्यंपवमानबाधसेसोमशत्रून् ॥४॥ (९।५।१०) कनिक्रंतिहरि
॥२२॥ रासृज्यमानःसीदन्वनस्यजठरेपुनानः । नृभिर्यतःकृणुतेनिर्णिजंगाऽअतोमतीर्जनयतस्वधाभिः ॥ हरिःसृजानःपथ्या
मृतस्येयर्तिवाचमरितेवनावं । देवोदेवानांगुह्यानिनामाविष्कृणोतिबर्हिषिप्रवाचे ॥ अपामिवेदूर्मयस्तर्तुराणाःप्रमनी
षाऽईरतेसोमम्अच्छ । नमस्यंतीरुपचयंतिसंचाचविशंत्युशतीरुशंतं ॥ तंमर्मृजानंमहिषंनसानावंशुंदुहंत्युक्षणंगिरिष्ठां ।
तंवावशानंमतयःसचंतेत्रितोबिभर्तिवरुणंसमुद्रे$^{+}$ ॥ इष्यन्वाचमुपवक्तेवहोतुःपुनानऽइंदोविष्यामनीषां । इंद्रश्चयत्क्ष
यथःसौभगायसुवीर्यस्यपतयःस्याम ॥ ५ ॥ (९।५।११) प्रसेनानीःशूरोऽअग्रेरथानांगव्यन्नेतिहर्षतेऽअस्यसेना ।
भद्रान्कृण्वन्निंद्रहवान्त्सखिभ्यऽआसोमोवस्त्रारभसानिदत्ते ॥ समस्यहरिंहरयोमृजंत्यश्वहयैरनिशितंनमोभिः ।
आतिष्ठतिरथमिंद्रस्यसखाविद्वाँऽएनासुमतिंयात्यच्छ ॥ सनोदेवदेवतातेपवस्वमहेसोमप्सरसऽइंद्रपानः । कृण्वन्न ॥२२॥

(९।५।१०) कनिक्रंतीतिपंचर्चस्यसूक्तस्यप्रस्कण्वःपवमानसोमस्त्रिष्टुप् । (९।५।११) प्रसेनानीरितिचतुर्विंशत्यृचस्यसूक्तस्यदैवोदासिः प्रतर्दनःपवमानसोमस्त्रिष्टुप् ।

पोव॒र्षय॒न्द्यामुतेमामु॒रोरानो॑वरिवस्यापुना॒नः+ ॥ अजी॑त॒येहं॑तयेपवस्वस्व॒स्तये॑स॒र्वता॑तयेबृह॒ते । तदुं॑शंति॒विश्वं॑ऽइ॒मेस
खा॑य॒स्तद॒हं॑वं॑श्मिपवमानसोम ॥ सोम॑ःपवतेजनि॒ताम॑ती॒नांज॑नि॒तादि॒वोज॑नि॒तापृ॑थि॒व्याः । ज॒नि॒ताग्नेर्ज॑नि॒तासूर्य॑स्य
जनि॒तेंद्र॑स्यजनि॒तोतविष्णो॑ः ॥ ६ ॥ ब्र॒ह्मादे॒वानां॑पद॒वीःकं॑वी॒नामृषि॒र्विंप्रा॑णांमहि॒षोमृ॒गाणां॑ । श्ये॒नोगृध्रा॑णां॒स्वधि॑ति॒र्व
ना॑नां॒सोम॑ःप॒वित्र॒मत्यें॑ति॒रेभ॑न् ॥ प्रावीं॑विपद्वा॒चऽऊ॒र्मिंनसिंधु॒र्गिर॒ःसोम॒ःपव॑मानोमनी॒षाः । अं॒तःपश्य॑न्वृ॒जने॒माव॑रा॒
ण्याति॑ष्ठतिवृष॒भोगोषुं॑जा॒नन्+ ॥ सम॑त्स॒रःपृ॒त्सुव॒न्वन्नवा॑तःस॒हस्र॑रेताऽअ॒भिवाजं॑मर्ष । इंद्रा॑येंदो॒पव॑मानोमनी॒ष्यं॑१॒
शोरू॒र्मिमी॑रय॒गाऽइ॑ष॒ण्यन्+ ॥ परिं॑प्रि॒यःक॒लशें॑दे॒ववा॑त॒ऽइंद्रा॑य॒सोमो॒रण्यो॒मदा॑य । स॒हस्रं॑धारःश॒तवा॑ज॒ऽइंदु॑र्वा॒जीन
सप्ति॒ःसमं॑नाजिगाति ॥ सपू॒र्व्यो॑वसुवि॒ज्जाय॑मानोमृजा॒नोऽअ॒प्सुदुं॑दुहा॒नोऽअद्रौ॑ । अ॒भि॒श॒स्ति॒पाभुव॑नस्य॒राजा॑वि॒द
द्गा॒तुंब्रह्मं॑णेपू॒यमा॑नः ॥ ७ ॥ त्वया॒हिनं॑ःपि॒तरं॑ःसोम॒पूर्वे॒कर्मा॑णिच॒क्रुःप॑वमान॒धीरा॑ः । व॒न्वन्नवा॑तःपरि॒धीँ॑ऽरपो॑र्णुवी॒रे
भि॒रश्वै॑र्म॒घवा॑भवानः ॥ यथा॑पवथा॒मनं॑वेवयो॒धाऽअं॑मित्र॒हाव॑रि॒वोविद्ध॒विष्मा॑न् । ए॒वाप॑वस्व॒द्रविं॑ण॒ंदधा॑न॒ऽइंद्रे॒संतिं॑
ष्ठज॒नयायुं॑धानि ॥ पवं॑स्वसोम॒मधुं॑माँऽऋ॒तावा॒पोवसा॑नो॒ऽअधि॒सानो॒ऽअव्ये॑ । अव॒द्रोणा॑निघृ॒तवाँ॑तिसीद॒मदि॑न्तमो
मत्स॒रऽइंद्र॒पानं॑ः ॥ वृ॒ष्टिंदि॒वःश॒तधा॑रःपवस्वसहस्र॒सावा॑ज॒युर्दे॒ववीं॑तौ । संसिंधुं॑भिःक॒लशें॑वावशा॒नःसमु॒स्रिया॑भिः
प्रति॒रन्न॒ऽआयुं॑ः ॥ ए॒षस्यसोमो॑म॒तिभिं॑ःपु॒नानोत्यो॒नवा॒जीत॒रतीद॒रातीं॑ः । प॒योनदु॒ग्धमदिं॑तेरिषि॒रमु॒र्विं॑वगा॒तुःसु॒यमो

ऋक्सं. अ.७अ.४ ॥२३॥

मंडलं ९ अनु. ६

नवोह्वा ॥ ८॥ स्वायुधःसोतृभिःपूयमानोऽभ्यर्षगुह्यंचारुनाम । अभिवाजंसप्तिरिवश्रवस्याभिवायुमभिगादेवसोम ॥ शिशुंजज्ञानंहर्यतंमृजंतिशुंभंतिवह्निंमरुतोगणेन । कविर्गीर्भिःकाव्येनाकविःसन्त्सोमःपवित्रमत्येतिरेभन् ॥ ऋषिमनायऽऋषिकृत्स्वर्षाःसहस्रणीथःपदवीःकवीनां । तृतीयंधाममहिषःसिषासन्त्सोमोविराजमनुराजतिष्टुप्+ ॥ चमूषच्छ्येनःशकुनोविभृत्वागोविंदुर्द्रप्सऽआयुधानिबिभ्रत् । अपामूर्मिंसचमानःसमुद्रंतुरीयंधाममहिषोविवक्ति ॥ मर्योनशुभ्रस्तन्वंमृजानोत्योनसृत्वासनयेधनानां । वृषेवयूथापरिकोशमर्षन्कनिक्रदच्चम्वो३राविवेश ॥ ९ ॥ पवस्वेंदोपवमानोमहोभिःकनिक्रदत्परिवाराण्यर्ष। क्रीळन्चम्वो३राविशपूयमानऽइंद्रंतेरसोमदिरोममत्तु ॥ प्रास्यधाराबृहतीरसृग्रन्नक्तोगोभिःकलशाँऽआविवेश । सामकृण्वन्त्सामन्योविपश्चित्क्रंदन्नेत्यभिसख्युर्नजामिं+ ॥ अपघ्नन्नेषिपवमानशत्रून्प्रियंनजारोऽअभिगीतऽइंदुः । सीदन्वनेषुशकुनोनपत्वासोमःपुनानःकलशेषुसत्ता ॥ आतेरुचःपवमानस्यसोमयोषेवयंतिसुदुघाःसुधाराः । हरिरानीतःपुरुवारोऽअप्स्वचिक्रदत्कलशेदेवयूनां+ ॥ १० ॥ (९।६।१) अस्य

षष्ठेनुवाकेसप्तसूक्तानि (९।६।१) अस्यप्रेषेत्यष्टपंचाशदृचेसूक्तेआद्यानांतिसृणांमैत्रावरुणिर्वसिष्ठश्चतुर्थ्यादितिसृणांवासिष्ठइंद्रप्रमतिःततः द्वितीयादिनवतृचानांपवमानसोमस्त्रिष्टुप्सप्तम्यादितिसृणांवासिष्ठोवृषगणोदशम्यादितिसृणांवासिष्ठोमन्युस्त्रयोदश्यादितिसृणांवासिष्ठ उपमन्युःषोडश्यादितिसृणांवासिष्ठोव्याघ्रपादेकोनविंश्यादितिसृणांवासिष्ठःशक्तिर्द्वाविंश्यादितिसृणांवासिष्ठःकर्णश्रुत्पंचविंश्यादितिसृ

॥२३॥

प्रेषाहेमनापूयमानोदेवोदेवेभिःसमपृक्तरसं । सुतःपवित्रंपर्येतिरेभन्मितेवसद्मपशुमांतिहोता ॥ भद्रावस्त्रासमन्या३वसानोमहान्कविर्निवचनानिशंसन् । आवच्यस्वचम्वोःपूयमानोविचक्षणोजागृविर्देववीतौ ॥ समुप्रियोमृज्यतेसानोऽअव्येयशस्तरोयशसांक्षैतोऽअस्मे । अभिस्वरधन्वापूयमानोयूयंपातस्वस्तिभिःसदानः ॥ प्रगायताभ्यर्चामदेवान्त्सोमंहिनोतमहतेधनाय । स्वादुःपवातेऽअतिवारमव्यमासीदातिकलशंदेवयुर्नः ॥ इंदुर्देवानामुपसख्यमायन्त्सहस्रधारःपवतेमदाय । नृभिःस्तवानोऽअनुधामपूर्वमगन्निंद्रंमहतेसौभगाय ॥११॥ स्तोत्रेरायेहरिरर्षापुनानऽइंद्रंमदोगच्छतुतेभराय । देवैर्याहिसरथंराधोऽअच्छायूयंपातस्वस्तिभिःसदानः ॥ प्रकाव्यमुशनेवब्रुवाणोदेवोदेवानांजनिमाविवक्ति । महिव्रतःशुचिबंधुःपावकःपदावराहोऽअभ्येतिरेभन् ॥ प्रहंसासस्तृपलंमन्युमच्छामादस्तंवृषगणाऽअयासुः । आंगूष्यं१पवमानंसखायोदुर्मर्षंसाकंप्रवदंतिवाणं+ ॥ सरंहतऽउरुगायस्यजूतिंवृथाक्रीळंतंमिमतेनगावः । परीणसंकृणुतेतिग्मशृंगोदिवाहरिर्ददृशेनक्तमृज्रः+ ॥ इंदुर्वाजीपवतेगोन्योघाऽइंद्रेसोमःसहऽइन्वन्मदाय । हंतिरक्षोबाधतेपर्यरातीर्वरिवःकृण्वन्वृजनस्यराजा ॥ १२ ॥ अधधारयामध्वापृचानस्तिरोरोमपवतेऽअद्रिदुग्धः । इंदु

णांवासिष्ठोमृळीकोष्टविंश्यादितिसृणांवासिष्ठोवसुक्रएकत्रिंश्यादिचतुर्दशानांशाक्त्यःपराशरःपंचचत्वारिंश्यादिचतुर्दशानामांगिरसःकुत्सऋषयःपवमानसोमस्त्रिष्टुप् ।

रिंद्रस्यसख्यंजुषाणोदेवोदेवस्यमत्सरोमदाय ॥ अभिप्रियाणिपवतेपुनानोदेवोदेवान्त्स्वेनरसेनपृंचन् । इंदुर्धर्माण्यृ
तुथावसानोदशक्षिपोऽअव्यतसानोऽअव्ये ॥ वृषाशोणोऽअभिकनिक्रदद्गानदयन्नेतिपृथिवीमुतद्यां । इंद्रस्येववग्नु
राशृण्वऽआजौप्रचेतयन्नर्षतिवाचमेमां+ ॥ रसाय्यःपयसापिन्वमानऽईरयन्नेषिमधुमंतमंशुं । पवमानःसंतनिमेषि
कृण्वन्निंद्रायसोमपरिषिच्यमानः ॥ एवापवस्वमदिरोमदायोदग्राभस्यनमयन्वधस्नैः । परिवर्णंभरमाणोरुशंतंगव्यु
र्नोऽअर्षपरिसोमसिक्तः+ ॥ १३ ॥ जुष्ट्वीनऽइंदोसुपथासुगान्युरौपवस्ववरिवांसिकृण्वन् । घनेवविष्वग्दुरितानिवि
घ्नन्नधिष्णुनाधन्वसानोऽअव्ये ॥ वृष्टिंनोऽअर्षदिव्यांजिगत्नुमिळावतींशंगयींजीरदानुं । स्तुकेववीताधन्वाविचिन्व
न्बंधूँऽरिमाँऽअवराँऽइंदोवायून्+ ॥ ग्रंथिंनविष्यंग्रथितंपुनानऽऋजुंचगातुंवृजिनंचसोम । अत्योनक्रंदोहरिरासृजा
नोमर्योदेवधन्वपस्त्यावान् ॥ जुष्टोमदायदेवतातऽइंदोपरिष्णुनाधन्वसानोऽअव्ये । सहस्रधारःसुरभिरदब्धःपरिस्र
ववाजसातौनृषह्ये ॥ अरश्मानोयेरथाऽअयुक्ताऽअत्यासोनसंसृजानासऽआजौ । एतेशुक्रासोधन्वंतिसोमादेवासस्ताँ
ऽउपयातापिबध्यै ॥१४॥ एवानऽइंदोऽअभिदेववीतिंपरिस्रवनभोऽअर्णश्चमूषु । सोमोऽअस्मभ्यंकाम्यंबृहंतंरयिंददा
तुवीरवंतमुग्रं+ ॥ तक्षद्यदीमनसोवेनतोवाग्ज्येष्ठस्यवाधर्मणिक्षोरनीके । आदीमायन्वरमावावशानाजुष्टंपतिंकलशे
गावऽइंदुं ॥ प्रदानुदोदिव्योदानुपिन्वऽऋतमृतायपवतेसुमेधाः । धर्माभुवद्वृजन्यस्यराजाप्ररश्मिभिर्दशभिर्भारिभूम ॥

प॒वित्रे॑भिः॒पव॑मानोनृ॒चक्षा॒राजा॑दे॒वाना॑मु॒तमर्त्या॑नां । द्वि॒ताभु॑वद्रयि॒पती॑रयी॒णामृ॒तंभ॑र॒त्सुभृ॑त॒ंचार्वि॑ंदुः ॥ अर्वाँ॑ऽइव॒श्र
व॑सेसा॒तिमच्छेंद्र॑स्यवा॒योर॒भिवी॒तिम॑र्ष । सनः॑स॒हस्रा॑बृह॒तीरिषो॑दा॒भवा॑सोमद्रविणो॒वित्पु॑ना॒नः+ ॥ १५ ॥ दे॒वा॒व्यो॑
नःपरि॑षि॒च्यमा॑ना॒ःक्षयं॑सु॒वीरं॑धन्व॑न्तु॒सोमाः॑ । आ॒य॒ज्यवः॑सुम॒तिंवि॒श्ववा॑रा॒होता॑रो॒नादि॑वि॒यजो॑म॒न्द्रत॑माः ॥ ए॒वादे॑वदे॒
वता॑तेपवस्वम॒हेसो॑म॒प्सर॑सेदेव॒पान॑ः । म॒हश्चि॒द्धिष्मसि॑हि॒ताःस॑म॒र्येकृ॒धिसु॑ष्ठा॒नेरोद॑सीपुना॒नः+ ॥ अश्वो॒नक्र॑दो॒वृष॑
भिर्युजा॒नःसिं॒होनभी॒मोमन॑सो॒जवी॑यान् । अ॒र्वा॒चीनैः॑प॒थिभि॒र्ये॑रजि॑ष्ठा॒ऽआप॑वस्वसौ॑मन॒संन॑ऽइंदो ॥ श॒तंधारा॑दे॒वजा॑
ताऽअसृ॒ग्रन्त्स॒हस्र॑मेनाःक॒वयो॑मृजंति । इंदो॑स॒नित्रं॑दि॒वऽआप॑वस्वपुरऽए॒तासि॑मह॒तोधन॑स्य ॥ दि॒वोनसर्गा॑ऽअसस्र
ग्रमह्ना॑राजा॒नमि॒त्रंप्रमि॑नाति॒धीरः॑ । पि॒तुर्नपु॒त्रःक्रतु॑भिर्यता॒नऽआप॑वस्ववि॒शेऽअ॒स्याऽअजी॑तिं ॥ १६ ॥ प्रते॒धारा॒म
धु॑मतीरसृ॒ग्रन्वारा॒न्यत्पू॒तोऽअ॒त्येष्यव्या॑न् । पव॑मान॒पव॑से॒धाम॒गोनां॑जज्ञा॒नःसूर्य॑मपिन्वोऽअ॒र्कैः+ ॥ कनि॑क्रद॒दनु॒पंथा॑
मृ॒तस्य॑शु॒क्रोविभा॑स्य॒मृत॑स्य॒धाम॑ । सऽइंद्रा॑यपवसेमत्स॒रवा॑न्हिन्वा॒नोवाचं॑म॒तिभिः॑कवी॒नां+ ॥ दि॒व्यःसु॑प॒र्णो॑व॑चक्षि
सोम॒पिन्व॒न्धारा॒ःकर्म॑णादे॒ववी॑तौ । एंदो॑विशक॒लशं॑सोम॒धानं॒क्रंद॑न्निहि॒सूर्य॒स्योप॑र॒श्मिं+ ॥ ति॒स्रोवाच॑ऽईरयति॒प्रवह्नि॑
र्ऋ॒तस्य॑धी॒तिंब्रह्म॑णोमनी॒षां । गावो॑यंति॒गोप॑तिंपृ॒च्छमा॑ना॒ःसोमं॑यंतिम॒तयो॑वावशा॒नाः+ ॥ सोमं॒गावो॑धे॒नवो॑वावशा॒
नाःसोमं॒विप्रा॑म॒तिभिः॑पृ॒च्छमा॑नाः । सोमः॑सु॒तःपू॑यतेऽअ॒ज्यमा॑ना॒ःसोमे॑ऽअ॒र्कास्त्रि॒ष्टुभ॒ःसंन॑वंते ॥ १७ ॥ ए॒वानः॑सोम

परिषि॒च्यमा॑न॒ऽआप॑वस्वपू॒यमा॑नःस्व॒स्ति । इंद्र॒माविं॑शबृह॒तारवे॑णव॒र्धया॒वाचं॑ज॒नया॒पुरं॑धिं ॥ आजागृ॑वि॒र्विप्र॑ऽऋ॒ता
म॑ती॒नांसोमः॑पुना॒नोऽअ॑सदच्च॒मूषु॑ । सपं॑ति॒यं॑मिथु॒नासो॒निका॑माऽअध्व॒र्यवो॑रथि॒रासः॑सु॒हस्ताः॑ ॥ सपु॑ना॒नऽउप॒सूरे॒न
धातो॒भेऽअ॑प्रा॒रोद॑सी॒विषऽआ॑वः । प्रि॒याचि॒द्यस्य॑प्रि॒यसास॑ऽऊ॒तीसतू॒धनं॑का॒रिणे॒नप्रयं॑सत् ॥ सव॑र्धि॒ताव॒र्धनः॑पू॒यमा॑
न॒ःसोमो॑मी॒ढ्वाँऽअ॒भिनो॒ज्योति॑षावीत् । येना॑न॒ःपूर्वे॑पि॒तरः॑पद॒ज्ञाःस्व॒र्विदो॑ऽअ॒भिगाऽअद्रि॑मु॒ष्णन्+ ॥ अक्रा॑न्त्समु॒द्रः
प्र॑थ॒मेविध॑र्मन्ज॒नय॑न्प्र॒जाभुव॑नस्य॒राजा॑ । वृषा॑प॒वित्रे॒ऽअधि॒सानो॒ऽअव्ये॑बृ॒हत्सोमो॑वावृधेसुवा॒नऽइंदुः॑ ॥ १८ ॥ म॒ह
त्तत्सोमो॑महि॒षश्च॑कारा॒पांयद्गर्भो॑वृणीतदे॒वान् । अद॑धा॒दिंद्रे॒पव॑मान॒ऽओजोज॑नय॒त्सूर्ये॒ज्योति॒रिंदुः॑ ॥ मत्सि॑वा॒युमि॒ष्ट
ये॒राध॑सेच॒मत्सि॑मि॒त्रावरु॑णापू॒यमा॑नः । मत्सि॒शर्धो॒मारु॑तं॒मत्सि॑दे॒वान्मत्सि॒द्यावा॑पृथि॒वीदे॑वसोम ॥ ऋ॒जुःप॑वस्ववृ॒जि
नस्य॑हं॒तापामी॑वां॒बाध॑मानो॒मृध॑श्च । अ॒भि॒श्री॒णन्पय॒ःपय॑सा॒भिगोना॒मिंद्र॑स्य॒त्वंतव॑व॒यंसखा॑यः ॥ मध्व॒ःसूदं॑पवस्व॒व
स्व॒ऽउत्सं॑वी॒रंच॑न॒ऽआप॑वस्वा॒भगं॑च । स्वद॒स्वेंद्रा॑य॒पव॑मानऽइंदोर॒यिंच॑न॒ऽआप॑वस्वासमु॒द्रात्+ ॥ सोमः॑सु॒तोधार॒या
त्यो॒नहित्वा॒सिंधु॒र्ननि॒म्नम॒भिवा॒ज्य॑क्षाः । आयोनिं॒वन्य॑मसदत्पुना॒नःसमिंदु॒र्गोभि॑रसर॒त्सम॒द्भिः+ ॥ १९ ॥ ए॒षस्यते॑
पवतऽइंद्र॒सोम॑श्च॒मूषु॒धीर॑ऽउश॒तेतव॑स्वान् । स्व॑र्चक्षारथि॒रःस॒त्यशु॑ष्म॒ःकामो॒नयोदे॑वय॒तामस॑र्जि ॥ ए॒षप्र॒त्नेन॒वय॑सापु
ना॒नस्ति॒रोवपीं॑सिदुहि॒तुर्दधा॑नः । वसा॑न॒ःशर्म॑त्रि॒वरू॑थम॒प्सुहोते॑वयातिसम॑नेषु॒रेभ॑न् ॥ नून॒स्त्वं॑रथि॒रोदे॑वसोम॒परि॑स्र

वचम्वौःपूयमानः । अप्सुस्वादिष्ठोमधुमाँऽऋतावादेवोनयःसवितासत्यमन्मा ॥ अभिवायुंवीत्यर्षागृणानो३भिमि
त्रावरुणापूयमानः । अभीनरंधीजवनंरथेष्ठामभींद्रंवृषणंवज्रबाहुं ॥ अभिवस्त्रासुवसनान्यर्षाभिधेनूःसुदुघाःपूयमा
नः । अभिचंद्राभर्तवेनोहिरण्याभ्यश्वान्रथिनोदेवसोम ॥ २० ॥ अभीनोऽअर्षदिव्यावसून्यभिविश्वापार्थिवापूय
मानः । अभियेनद्रविणमश्नवामाभ्यार्षेयंजमदग्निवन्नः ॥ अयापवापवस्वैनावसूनिमाँश्चत्वऽइंदोसरसिप्रधन्व । ब्र
ध्नश्चिदत्रवातोनजूतःपुरुमेधश्चित्तकवेनरंदात् ॥ उतनऽएनापवयापवस्वाधिश्रुतेश्रवाय्यस्यतीर्थे । षष्टिंसहस्रानैगुतो
वसूनिवृक्षंनपक्वंधूनवद्रणाय ॥ महीमेऽअस्यवृषनामशूषेमाँश्चत्वेवापृशनेवावधत्रे । अस्वापयन्निगुतंस्नेहयच्चापामि
त्राँऽअपाचितोऽअचेतः+ ॥ संत्रीपवित्राविततान्येष्यन्वेकंधावसिपूयमानः । असिभगोऽअसिदात्रस्यदातासिमघ
वामघवद्भ्यऽइंदो ॥ २१ ॥ एषविश्ववित्पवतेमनीषीसोमोविश्वस्यभुवनस्यराजा । द्रप्साँऽईरयन्विदथेष्विंदुर्विवार
मव्यंसमयातियाति ॥ इंदुंरिहंतिमहिषाऽअदब्धाःपदेरेभंतिकवयोनगृध्राः । हिन्वंतिधीरादशभिःक्षिपाभिःसमंज
तेरूपमपांरसेन ॥ त्वयावयंपवमानेनसोमभरेकृतंविचिनुयामशश्वत् । तन्नोमित्रो० ॥ २२ ॥ (९।६।२) अभि
नोवाजसातमंरयिमर्षपुरुस्पृहं । इंदोसहस्रभर्णसंतुविद्युम्नंविभ्वासहं ॥ परिष्यसुवानोऽअव्ययंरथेनवर्माव्यत ।

(९।६।२) अभिनइतिद्वादशर्चस्यसूक्तस्यांबरीषऋजिश्वानौपवमानसोमोनुष्टुबेकादशीबृहती ।

इंदुरभिद्रुणाहितोहियानोधाराभिरक्षाः ॥ परिष्यसुवानोऽअक्षाऽइंदुरव्येमदच्युतः । धारायऽऊर्ध्वोऽअध्वरेभ्राजा
नैतिगव्ययुः+ ॥ सहित्वंदेवशश्वंतेवसुमर्तायदाशुषे । इंदोसहस्रिणंरयिंशतात्मानंविवाससि ॥ वयंतेऽअस्यवृत्रह
न्वसोवस्वःपुरुस्पृहः । निनेदिष्ठतमाऽइषःस्यामसुम्नस्याध्रिगो ॥ द्विर्यंपंचस्वयशसंस्वसारोऽअद्रिसंहतं । प्रियमिंद्र
स्यकाम्यंप्रस्नापयंत्यूर्मिणं ॥ २३ ॥ परित्यंहर्यतंहरिंबभ्रुंपुनंतिवारेण । योदेवान्विश्वाँऽइत्परिमदेनसहगच्छति ॥
अस्यवोह्यवसापांतोदक्षसाधनं । यःसूरिषुश्रवोबृहद्दधेस्व१र्णहर्यतः+ ॥ सवायज्ञेषुमानवीऽइंदुर्जनिष्टरोदसी । देवो
देवीगिरिष्ठाऽअस्रेधंतंतुविष्वणि ॥ इंद्रायसोमपातवेवृत्रघ्नेपरिषिच्यसे । नरेचदक्षिणावतेदेवायसदनासदे ॥ तेप्र
त्नासोव्युष्टिषुसोमाःपवित्रेऽअक्षरन् । अपप्रोथंतःसनुतर्हुरश्चितःप्रातस्ताँऽअप्रचेतसः ॥ तंसखायःपुरोरुचंयूयंवयंच
सूरयः । अश्यामवाजगंध्यंसनेमवाजपस्त्यं ॥ २४ ॥ (९।६।३) आहर्यतायधृष्णवेधनुस्तन्वंतिपौंस्यं । शुक्रांव
यंत्यसुरायनिर्णिजंविपामग्रेमहीयुवः ॥ अधक्षपापरिष्कृतोवाजाँऽअभिप्रगाहते । यदीविवस्वतोधियोहरिंहिन्वंति
यातवे ॥ तमस्यमर्जयामसिमदोयऽइंद्रपातमः । यंगावऽआसभिर्दधुःपुरानूनंचसूरयः ॥ तंगाथयापुराण्यापुनान ॥२६॥
मभ्यनूषत । उतोकृपंतधीतयोदेवानांनामबिभ्रतीः ॥ तमुक्षमाणमव्ययेवारेपुनंतिधर्णसिं । दूतंनपूर्वचित्तयऽआ

(९।६।३) आहर्यतायेत्यष्टर्चस्यसूक्तस्यकाश्यपौरेभसूनूपवमानसोमोनुष्टुबाद्याबृहती।

CC-0. Raja Acharya Kashmir Collection

शा॑सतेमं॑नी॒षिणः॑ ॥ २५ ॥ सपुं॑ना॒नोम॒दिन्तं॑मः॒सोमं॑श्च॒मूषुं॑सीदति । प॒शौनरे॑तंऽआ॒दध॒त्पतिं॑र्वचस्यतेधि॒यः+ ॥ सम्मृं॑ज्यतेसु॒कर्मं॑भिर्दे॒वोदे॒वेभ्यं॑ःसु॒तः । वि॒देयदां॑सुसंद॒दिर्म॒हीर॒पोविगां॑हते ॥ सु॒तऽइं॑दोप॒वित्र॒ऽआनृ॑भिर्य॒तोविनीं॑यसे । इंद्रां॑यमत्स॒रिन्तं॑मश्च॒मूष्वानिषीं॑दसि ॥ २६ ॥ (९।६।४) अ॒भीनं॑वंतेऽअ॒द्रुहः॑प्रि॒यमिंद्रं॑स्य॒काम्यं॑ । व॒त्संनपूर्व॒ऽआयुं॑निजा॒तंरिं॑हंतिमा॒तरः॑ ॥ पु॒नानऽइंद॒वाभं॑र॒सोमं॑द्वि॒बर्हसंरा॒यिं । त्वंवसूं॑निपुष्यसि॒विश्वा॑निदा॒शुषों॑गृ॒हे+ ॥ त्वंधियं॑मनो॒युजं॑सृ॒जावृ॒ष्टिंनतं॑न्य॒तुः । त्वंवसूं॑नि॒पार्थिं॑वादि॒व्याचं॑सोमपुष्यसि ॥ परिं॑तेजि॒ग्युषों॑यथा॒धारां॑सु॒तस्यं॑धावति । रंहं॑मा॒णाव्यं॑१॒व्ययं॒वारं॑वा॒जीवं॑सान॒सिः+ ॥ क्रत्वे॒दक्षां॑यनःकवे॒पवं॑स्वसोम॒धारं॑या । इंद्रां॑य॒पातं॑वेसु॒तोमि॒त्राय॒वरुं॑णायच ॥ २७ ॥ पवं॑स्ववाज॒सातं॑मःप॒वित्रे॒धारं॑यासु॒तः । इंद्रां॑यसोम॒विष्णं॑वेदे॒वेभ्यो॒मधुं॑मत्तमः ॥ त्वांरिं॑हंतिमा॒तरो॒हरिं॑प॒वित्रेऽअ॒द्रुहः॑ । व॒त्संजा॒तंनधे॒नवः॒पवं॑मान॒विधर्मं॑णि ॥ पवं॑मान॒महि॒श्रवं॑श्चि॒त्रेभिं॑र्यासिर॒श्मिभिः॑ । शर्ध॒न्तमां॑सिजिघ्नसे॒विश्वां॑निदा॒शुषों॑गृ॒हे ॥ त्वंद्यांचं॑महिव्रतपृथि॒वींचातिं॑जभ्रिषे । प्रतिं॑द्रा॒पिमं॑मुंचथाः॒पवं॑मानमहि॒त्वना+ ॥ २८ ॥ इति सप्तमाष्टकेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ॥ ॥ ॥ ॥

द्विपंचाशाध्यायेवर्गाः २८ सूक्तानि १० ऋचः १३८ ॥ त्यागः ॥ पवमानायसोमायेदं. १३८ ॥ इतिसप्तमेचतुर्थः ॥

(९।६।४) अभीनवंतइतिनवर्चस्यसूक्तस्यकाश्यपौरेभसूनूपवमानसोमोनुष्टुप् ।

CC-0 Ravi Acharya Kathmandu Collection

Digitization by eGangotri Funding MoE-Delhi

पुरोजितीषोळशांधीगुःश्यावाश्विर्ययातिर्नाहुषोनहुषोमानवोमनुःसांवरणइतितृचाःशेषेप्रजापतिरुपाद्येगाय
त्र्यौक्राणाष्टौत्रितऔष्णिहंवैप्रपुनानायषड्द्वितआष्ट्यःसखायःपर्वतनारदौकाश्यपौद्वेशिखंडिन्यौवाप्सरसौ
तंवइंद्रमच्छषळूनांग्निश्चाक्षुषश्चक्षुर्मानवोमनुराप्सवइतितृचाःपंचाग्निःपरीतःषड्विंशतिःसप्तऋषयःप्रागाथंतृ
तीयाषोळश्यौद्विपदेअष्टम्याद्येचबृहत्यौपवस्वषोळशगौरिवीतिर्द्वृचंशक्तिरेकामूरुर्ऋजिश्वोर्ध्वसद्माकृतयशाऋ
णंचयइत्यृषयोद्वृचास्तिस्रःशक्तिःकाकुभाःप्रागाथाःससुन्वेगायत्रीयवमध्यापरासतोबृहतीपरिप्रद्व्यधिकाग्न
योधिष्ण्याऐश्वरयोद्वैपदंपर्यूषुद्वादशत्र्यरुणत्रसदस्यूराजानौतिस्रोनुष्टुभःपिपीलिकमध्याषळूर्ध्वबृहत्यस्तिस्र
श्चविराजोयारुचातृचमनानतःपारुच्छेपिरात्यष्टिनानानंचतुष्कंशिशुःपाङ्क्तंहिंशर्यणावत्येकादशकश्यपोयइंदो
श्चतुष्कंदशमंमंडलमग्नेसप्तत्रितःपिप्रीहीनःप्रतएकः ॥ ५ ॥ ॥ ॥ ॥

॥ हरिः ओम् ॥(९।६।५) पुरोजितीवोऽअंधसः सुतायमादयित्नवे। अपश्वानंश्नथिष्टनसखायोदीर्घजिह्व्यं* ॥ योधा
रयापावकयापरिप्रस्यंदतेसुतः । इंदुरश्वोनकृत्व्यः ॥ तंदुरोषमभीनरःसोमंविश्वाच्याधिया । यज्ञंहिन्वंत्यद्रिभिः ॥ ॥२७॥

(९।६।५) पुरोजितीतिषोळशर्चस्यसूक्तस्याद्यानांतिसृणांश्यावाश्विरंधीगुश्चतुर्थ्यादितिसृणांनाहुषोययातिःसप्तम्यादितिसृणांमान
वोनहुषोदशम्यादितिसृणांसांवरणोमनुस्त्रयोदश्यादिचतसृणांवैश्वामित्रःप्रजापतिःपवमानसोमोनुष्टुप्द्वितीयातृतीयेगायत्र्यौ ।

सुतासो॒मधु॑मत्तमा॒ःसोमा॒ऽइंद्रा॑यमं॒दिनः॑ । प॒वित्र॑वंतो॒ऽअक्षरन्दे॒वान्गं॑च्छंतुवो॒मदाः॑ ॥ इंदु॒रिंद्रा॑यपवत॒ऽइतिदे॒वासो॑ऽअब्रुवन् । वा॒चस्पति॑मखस्यते॒विश्व॒स्येशा॑न॒ऽओजं॑सा ॥ १ ॥ स॒हस्र॑धारःपवतेसमु॒द्रोवा॑चमींख॒यः । सोम॒ःपतीरयी॒णांसखेंद्र॑स्यदि॒वेदि॑वे ॥ अ॒यंपूषार॒यिर्भ॑ग॒ःसोम॑ःपुना॒नोऽअ॑र्षति । पति॒र्विश्व॑स्य॒भूम॑नो॒व्य॑ख्य॒द्रोद॑सीऽउ॒भे+ ॥ समु॑प्रि॒याऽअ॑नूषत॒गावो॒मदा॑य॒घृष्व॑यः । सोमा॑सःकृण्वतेप॒थःपव॑मानास॒ऽइंद॑वः ॥ यऽओ॑जिष्ठ॒स्तमाभ॑र॒पव॑मानश्र॒वाय्यं॑ । यःपंच॑चर्ष॒णीर॒भिर॒यिंयेन॒वना॑महै ॥ सोमा॑ःपवं॑त॒ऽइंद॑वो॒स्मभ्यं॑गातु॒वित्त॑माः । मि॒त्राःसुं॑वा॒नाऽअ॑रे॒पस॑ःस्वा॒ध्यः॑ स्व॒र्वि॑दः ॥ २ ॥ सु॒ष्वा॒णासो॒व्य॑द्रिभि॒श्चिता॑ना॒गोर॑धित्व॒चि । इष॑म॒स्मभ्य॑म॒भित॒ःसम॑स्वरन्वसु॒विदः॑ ॥ ए॒तेपू॒ताविप॒श्चित॒ःसोमा॑सो॒दध्या॑शिरः । सूर्या॑सो॒नद॑र्श॒तासो॑जिग॒त्नवो॑ध्रु॒वाघृ॒ते+ ॥ प्रसु॑न्वा॒नस्यांध॑सो॒मर्तो॒नवृ॑त॒तद्व॑चः । अप॒श्वानं॑मरा॒धसं॑हु॒ताम॒खंनभृग॑वः ॥ आजा॒मिरत्कें॑ऽअव्यतभु॒जेनपु॒त्रऽओ॒ण्योः॑ । सर॑ज्जा॒रोनयोष॑णांव॒रोनयोनि॑मा॒सदं॑ ॥ सवी॒रोद॑क्ष॒साध॑नो॒वियस्त॒स्तंभ॒रोद॑सी । हरिः॑प॒वित्रें॑ऽअव्यतवे॒धानयोनिं॑मा॒सदं॑ ॥ अव्यो॒वारें॑भिःपवते॒सोमो॒गव्ये॒ऽअधि॑त्व॒चि । कनि॑क्रद॒द्वृषा॒हरि॒रिंद्र॑स्या॒भ्येतिनिष्कृ॒तं+ ॥ ३ ॥ (९।६।६) क्रा॒णाशिशु॑र्म॒हीनां॑हि॒न्वन्नृ॒तस्य॒दीधिति॑ं । विश्वा॒परि॑प्रि॒याभुं॑व॒दध॑द्वि॒ता+ ॥ उप॑त्रि॒तस्यं॑पा॒ष्यो॒३रभ॑क्त॒यद्गुहा॑प॒दं । य॒ज्ञस्य॑स॒प्तधाम॑भि॒रध॑प्रि॒यं+ ॥ त्री

(९।६।६) क्राणाशिशुरित्यष्टर्चस्यसूक्तस्याप्त्यस्त्रितःपवमानसोमउष्णिक् ।

॥२८॥

णित्रितस्यधारयापृष्ठेष्वेरयारयिं । मिमीतेऽअस्ययोजनाविसुक्रतुः ॥ जज्ञानंसप्तमातरोवेधामशासतश्रिये । अयंध्रु

वोरयीणांचिकेतयत्+ ॥ अस्यव्रतेसजोषसोविश्वेदेवासोऽअद्रुहः । स्पार्हाभवंतिरंतयोजुषंतयत्+ ॥४॥ यमीगर्भमृतावृ
धोदृशेचारुमजीजनन् । कविंमंहिष्ठमध्वरेपुरुस्पृहं ॥ समीचीनेऽअभितमनायह्वीऽऋतस्यमातरा । तन्वानायज्ञमानु
षग्यदंजते+ ॥ क्रत्वाशुक्रेभिरक्षभिर्ऋणोरपव्रजंदिवः । हिन्वन्नृतस्यदीधितिंप्राध्वरे ॥ ५ ॥ (९।६।७) प्रपुनाना
यवेधसेसोमायवचऽउद्यतं । भृतिंनभरामतिभिर्जुजोषते ॥ परिवाराण्यव्ययागोभिरंजानोऽअर्षति । त्रीषधस्था
पुनानःकृणुतेहरिः ॥ परिकोशंमधुश्चुतमव्ययेवारेऽअर्षति । अभिवाणीर्ऋषीणांसप्तनूषत ॥ परिणेतामतीनांविश्वदे
वोऽअदाभ्यः । सोमःपुनानश्चम्वोर्विशद्धरिः ॥ परिदैवीरनुस्वधाऽइंद्रेणयाहिसरथं । पुनानोवाघद्वाघद्भिरमर्त्यः ॥
परिसप्तिर्नवाजयुर्देवोदेवेभ्यःसुतः । व्यानशिःपवमानोविधावति ॥ ६ ॥ (९।७।१) सखायऽआनिषीदतपुना
नायप्रगायत । शिशुंनयज्ञैःपरिभूषतश्रिये+ ॥ समीवत्संनमातृभिःसृजतागयसाधनं । देवाव्यं१मदमभिद्विशवसं ॥
पुनातादक्षसाधनंयथाशर्धायवीतये । यथामित्रायवरुणायशंतमः ॥ अस्मभ्यंत्वावसुविदमभिवाणीरनूषत । गोभि

॥२८॥

(९।६।७) प्रपुनानायेतिषळर्चस्यसूक्तस्याप्त्योद्वितःपवमानसोमउष्णिक् ॥ सप्तमेनुवाकेएकादशसूक्तानि (९।७।१) सखायइतिषळर्चस्यसूक्तस्यकाश्यपौपर्वतनारदौपवमानसोमउष्णिक् (शिखंडिन्यावप्सरसौऋषिकेत्रपक्षिके किंचपर्वतनारदयोःकाण्वत्वंशौनकोमेने) ।

ष्टे॒वर्ण॑म॒भिवा॑सयामसि ॥ सनो॑मदा॑नांपत॒ऽइंदो॑दे॒वप्स॑राऽअसि । सखे॑व॒सख्ये॑गातु॒वित्त॑मोभव ॥ सने॑मिकृ॒ध्यं॑१॒स्म दार॒क्षसं॒कंचि॑द॒त्रिणं॑ । अपादे॑वंद्व॒युमंहो॑युयोधिनः ॥ ७ ॥ (९१७२) तंव॑ःसखायो॒मदा॑यपुना॒नम॒भिगा॑यत । शि शुं॑नय॒ज्ञैः॑स्व॑दयंतगू॒र्ति॑भि॑ः ॥ संव॒त्सऽइ॑वमा॒तृभि॒रिंदु॑र्हिन्वा॒नोऽअ॑ज्यते । दे॒वा॒वीर्म॑दो॑म॒तिभि॒ःपरि॑ष्कृतः ॥ अ॒यंदक्षा॑ य॒साध॑नो॒यंशर्धा॑यवी॒तये॑ । अ॒यंदे॒वेभ्यो॒मधु॑मत्तमःसु॒तः+ ॥ गोम॑न्नऽइंदो॒ऽअश्व॑वत्सु॒तःसु॑दक्षधन्व । शुचिं॑ते॒वर्ण॒मधि॒ गोषु॑दीधरं ॥ सनो॑हरीणांपत॒ऽइंदो॑दे॒वप्स॑रस्तमः । सखे॑व॒सख्ये॒नयो॑रु॒चेभ॑व ॥ सने॑मि॒त्वम॒स्मदाँ॑ऽअदे॑वं॒कंचि॑द॒त्रिणं॑ । सा॒ह्वाँऽइँ॑दो॒परि॒बाधो॒ऽअप॑द्व॒युं+ ॥ ८ ॥ (९१७३) इंद्र॒मच्छ॑सु॒ताऽइ॒मेवृष॑णंयंतु॒हर॑यः । श्रु॒ष्टीजा॒तास॒ऽइंद॑वःस्व॒ र्विद॑ः ॥ अ॒यंभरा॑यसान॒सिरिंद्रा॑यपवतेसु॒तः । सोमो॒जैत्र॑स्यचेतति॒यथा॑वि॒दे+ ॥ अ॒स्येदिंद्रो॒मदे॒ष्वाग्रा॒भंगृ॑भ्णीतसा न॒सिं । वज्रं॑च॒वृष॑णंभर॒त्सम॑प्सु॒जित्+ ॥ प्रध॑न्वासोम॒जागृ॑वि॒रिंद्रा॑येंदो॒परि॑स्रव । द्यु॒मंतं॒शुष्म॒माभ॑रास्व॒र्विदं॑ ॥ इंद्रा॑ य॒वृष॑णं॒मदं॒पव॑स्ववि॒श्वद॑र्शतः । स॒हस्र॑यामापथि॒कृद्वि॑चक्ष॒णः+ ॥ ९ ॥ अ॒स्मभ्यं॑गातु॒वित्त॑मोदे॒वेभ्यो॒मधु॑मत्तमः । स॒हस्र॑याहिप॒थिभि॒ःकनि॑क्रदत् ॥ पव॑स्वदे॒ववी॑तय॒ऽइंदो॒धारा॑भि॒रोज॑सा । आक॒लशं॒मधु॑मान्त्सोमनःसदः ॥ तवं॑द्र॒

(९१७२) तंवइतिषळर्चस्यसूक्तस्यपर्वतनारदौपवमानसोमउष्णिक् । (९१७३) इंद्रमच्छेतिचतुर्दशर्चस्यसूक्तस्याद्यानांतिसृणां चाक्षुषोग्निश्चतुर्थ्यादितिसृणांमानवश्चक्षुःसप्तम्यादितिसृणामाप्सवोमनुर्दशम्यादिपंचानांचाक्षुषोग्निःपवमानसोमउष्णिक् ।

प्साऽउंदप्रुतऽइंद्रंमदायवावृधुः । त्वांदेवासोऽअमृतायकंपपुः ॥ आनःसुतासऽइंदवःपुनानाधावतारयिं । वृष्टिद्यां
वोरीत्यापःस्वर्विदः ॥ सोमःपुनानऽऊर्मिणाव्योवारंविधावति । अग्रेवाचःपवमानःकनिक्रदत् ॥ १० ॥ धीभिर्हि
न्वंतिवाजिनंवनेक्रीळंतमत्यविं । अभित्रिपृष्ठंमतयःसमस्वरन् ॥ असर्जिकलशाँऽअभिमीळ्हेसप्तिर्नवाजयुः । पुनानो
वाचंजनयन्नसिष्यदत् ॥ पवतेहर्यतोहरिरतिह्वरांसिरंह्यां । अभ्यर्षन्स्तोतृभ्योवीरवद्यशः ॥ अयापवस्वदेवयुर्मधो
र्धाराऽअसृक्षत । रेभन्पवित्रंपर्येषिविश्वतः ॥ ११ ॥ (९।७४) परीतोषिंचतासुतंसोमोयऽउत्तमंहविः । दधन्वाँ
योनर्योऽअप्स्वं१तरासुषावसोममद्रिभिः ॥ नूनंपुनानोविभिःपरिस्रवादब्धःसुरभिंतरः । सुतेचित्त्वाप्सुमदामोऽअंध
साश्रीणंतोगोभिरुत्तरं ॥ परिसुवानश्चक्षसेदेवमादनःक्रतुरिंदुर्विचक्षणः+ ॥ पुनानःसोमधारयापोवसानोऽअर्षसि ।
आरत्नधायोनिमृतस्यसीदस्युत्सोदेवहिरण्ययः ॥ दुहानऽऊधर्दिव्यंमधुप्रियंप्रत्नंसधस्थमासदत् । आपृच्छ्यंधरुणं
वाज्यर्षतिनृभिर्धूतोविचक्षणः+ ॥ १२ ॥ पुनानःसोमजागृविरव्योवारेपरिप्रियः । त्वंविप्रोऽअभवोंगिरस्तमोमध्वा

(९।७४) परीतइतिषड्विंशत्यृचस्यसूक्तस्यबार्हस्पत्योभरद्वाजोमारीचःकश्यपोराहूगणोगोतमोभौमोत्रिर्गाथिनोविश्वामित्रोभार्गवोजमदग्निर्मैत्रावरुणिर्वसिष्ठऋषयःपवमानसोमोदेवता आद्याचतुर्थीषष्ठ्यष्टमीनवमीदशमीद्वादशीचतुर्दश्यःसप्तदश्याद्ययुजश्चबृहत्यःद्वितीयापंचमीसप्तम्येकादशीत्रयोदशीपंचदश्योष्टादश्य [illegible] द्विपदाविराट् ।

य॒ज्ञं॑मिं॑मिक्षनः ॥ सोमो॑मी॒ढ्वान्प॑वतेगा॒तुवि॑त्त॒मऽऋषि॒र्वि॑प्रो॑विचक्ष॒णः । त्वंक॒विर॑भवो॑देव॒वीत॑म॒ऽआसूर्यं॑रोहयोदि॒वि+॥ सोम॑ऽउषुवा॒णःसो॒तृभि॒रधि॒ष्णुभि॒रवी॑नां । अश्वं॑येवह॒रिता॑याति॒धार॑याम॒ंद्रया॑याति॒धार॑या ॥ अ॒नूपे॑गोमा॒न्गोभि॑रक्षा॒ःसोमो॑दु॒ग्धाभि॑रक्षाः । स॒मु॒द्रंनसं॒वर॑णान्यग्मन्म॒ंदीमदा॑यतोशते ॥ आसो॑मसुवा॒नोऽअद्रि॑भिस्ति॒रोवारा॑ण्य॒व्यया॑ । जनो॒नपुरि॒चम्वो॑र्विं॑श॒द्धरि॒ःसदो॒॑वने॑षुदधिषे ॥ १३ ॥ समा॑मृजेति॒रोऽअण्वा॑निमे॒ष्यो॑मी॒ह्ळेसप्ति॒र्नवा॑ज॒युः । अ॒नुमा॒द्यःपव॑मानोमनी॒षिभि॒ःसोमो॒विप्रे॑भि॒र्ऋक्व॑भिः ॥ प्रसो॑मदे॒ववी॑तये॒सिं॑धुर्नपि॑प्ये॒ऽअर्ण॑सा । अ॒ंशोःपय॑सामदि॒रोनजागृ॑वि॒रच्छा॒कोशं॑मधुश्चुतं॑ ॥ आहर्य॒तोऽअर्जु॑ने॒ऽअत्के॑ऽअव्यतप्रि॒यःसूनु॒र्नमर्ज्य॑ः । तमी॑हिन्वंत्य॒पसो॒यथा॒रथं॑न॒दीष्वागभ॑स्त्योः ॥ अ॒भिसोमा॑सऽआ॒यव॒ःपव॑ंते॒मद्य॒ंमदं॑ । स॒मु॒द्रस्याधि॑वि॒ष्टपि॑मनी॒षिणो॑मत्स॒रास॑ःस्वा॒र्वि॑दः ॥ तर॑त्समु॒द्रंपव॑मानऽऊ॒र्मि॑णा॒राजा॑दे॒वऽऋ॒तं॑बृहत् । अर्षं॑न्मि॒त्रस्य॒वरु॑णस्य॒धर्म॑णा॒प्रहि॑न्वा॒नऽऋ॒तं॑बृहत्+ ॥ १४ ॥ नृभि॑र्येमा॒नोह॑र्य॒तोवि॑चक्ष॒णोराजा॑दे॒वःस॑मु॒द्रिय॑ः ॥ इंद्रा॑यपवते॒मद॒ःसोमो॑म॒रुत्व॑तेसु॒तः । स॒हस्र॑धारो॒ऽअत्यव्य॑मर्षति॒तमी॑मृजंत्या॒यव॑ः ॥ पु॒ना॒नश्च॒मूज॒नय॑न्म॒तिंक॒विःसोमो॑दे॒वेषु॑रण्यति । अ॒पोवसा॑न॒ःपरि॒गोभि॒रुत्त॑र॒ःसीद॒न्वने॑ष्वव्यत ॥ तवा॒हंसो॑मरारणस॒ख्यऽइंदोदि॒वेदि॑वे । पु॒रूणि॑बभ्रो॒निच॑रंति॒मामव॑परि॒धीँऽरति॒ताँऽइ॑हि ॥ उ॒ताहंनक्तं॑मु॒तसो॑मते॒दिवा॑स॒ख्याय॑बभ्र॒ऽऊध॑नि । घृणा॒तपं॑त॒मति॒सूर्यं॑प॒रःशं॑कु॒नाऽइवपप्तिम ॥ १५ ॥ मृ॒ज्यमा॑नःसुहस्त्यसमु॒द्रेवाचं॑मिन्वसि । र॒यिंपि॒

शंगैंबहुलंपुरुस्पृहंपवमानाभ्यर्षसि ॥ मृजानोवारेपवमानोऽअव्ययेवृषावचक्रदोवने । देवानांसोमपवमाननिष्कृतं
गोभिरंजानोऽअर्षसि ॥ पवस्ववाजसातयेभिविश्वानिकाव्या । त्वंसमुद्रंप्रथमोविधारयोदेवेभ्यःसोममत्सरः+ ॥
सतूपवस्वपरिपार्थिवंरजोदिव्याचसोमधर्मभिः । त्वांविप्रासोमतिभिर्विचक्षणशुभ्रंहिन्वंतिधीतिभिः ॥ पवमाना
ऽअसृक्षतपवित्रमतिधारया । मरुत्वंतोमत्सराऽइंद्रियाहयामेधामभिप्रयांसिच ॥ अपोवसानःपरिकोशमर्षतीं
दुर्हियानःसोतृभिः । जनयन्ज्योतिर्मंदनाऽअवीवशद्गाःकृण्वानोननिर्णिजं ॥ १६ ॥ (९।७५) पवस्वमधु
मत्तमऽइंद्रायसोमक्रतुवित्तमोमदः । महिद्युक्षतमोमदः ॥ यस्यतेपीत्वावृषभोवृषायतेस्यपीतास्वर्विदः । ससु
प्रकेतोऽअभ्यक्रमीदिषोच्छावाजंनैतशः ॥ त्वंह्यं१गदैव्यापवमानजनिमानिद्युमत्तमः । अमृतत्वायघोषयः ॥ ये
नानवग्वोदध्यङ्ङपोर्णुतेयेनविप्रासऽआपिरे । देवानांसुम्नेऽअमृतस्यचारुणोयेनश्रवांस्यानशुः+ ॥ एषस्यधारयासुतो
व्योवारेभिःपवतेमदिन्तमः । क्रीळन्नूर्मिरपामिव ॥ १७ ॥ यऽउस्रियाऽअप्याऽअंतरश्मनोनिर्गाऽअकृंतदोजसा ।

(९।७५) पवस्वेतिषोळशर्चेसूक्तआद्ययोर्द्वयोःशाक्त्योगौरिवीतिस्तृतीयायावसिष्ठःशक्तिश्चतुर्थ्यादिद्वयोरांगिरसऊरुःषष्ठ्यादिद्वयोर्भारद्वाजऋजिश्वाष्टम्यादिद्वयोरांगिरसऊर्ध्वसद्मादशम्यादिद्वयोरांगिरसःकृतयशाद्वादश्यादिद्वयोर्ऋणंचयश्चतुर्दश्यादितिसृणांवासिष्ठः शक्तिरित्यृषयःपवमानसोमोदेवता विषमःककुभ [illegible] गायत्री । ॥३०॥

CC-0. Rani Acharya Kathmandu Collection

अभिव्रजंतत्निषेगव्यमश्व्यंवर्मीवधृष्णवारुज ॥ आसौतापरिषिंचताश्वंनस्तोमंमप्तुरंरजस्तुरं । वनक्रक्षमुदप्रुतं ॥
सहस्रधारंवृषभंपयोवृधंप्रियंदेवायजन्मने । ऋतेनयऽऋतजातोविवावृधेराजादेवऽऋतंबृहत्+ ॥ अभिद्युम्नंबृहद्य
शऽइषस्पतेदिदीहिदेवदेवयुः । विकोशंमध्यमंयुव ॥ आवच्यस्वसुदक्षचम्वोःसुतोविशांवह्निर्नविश्पतिः । वृष्टिंदिवः
पवस्वरीतिमपांजिन्वागविष्टयेधियः ॥ १८ ॥ एतमुत्यंमदच्युतंसहस्रधारंवृषभंदिवोदुहुः । विश्वावसूनिबिभ्रतं ॥
वृषाविजज्ञेजनयन्नमर्त्यःप्रतपञ्ज्योतिषातमः । ससुष्टुतःकविभिर्निर्णिजंदधेत्रिधात्वस्यदंससा ॥ ससुन्वेयोवसूनांयो
रायामानेतायऽइळानां । सोमोयःसुक्षितीनां+ ॥ यस्यनऽइंद्रःपिबाद्यस्यमरुतोयस्यवार्यमणाभगः । आयेनमित्रावरु
णाकरामहऽएंद्रमवसेमहे+ ॥ इंद्रायसोमपातवेनृभिर्यतःस्वायुधोमदिन्तमः । पवस्वमधुमत्तमः ॥ इंद्रस्यहार्दि
सोमधानमाविशसमुद्रमिवसिंधवः । जुष्टोमित्रायवरुणायवायवेदिवोविष्टंभऽउत्तमः+ ॥ १९ ॥ (९।७।६)
परिप्रधन्वेंद्रायसोमस्वादुर्मित्रायपूष्णेभगाय ॥ इंद्रस्तेसोमसुतस्यपेयाःक्रत्वेदक्षायविश्वेचदेवाः+ ॥ एवामृतायम
हेक्षयायसशुक्रोऽअर्षदिव्यःपीयूषः ॥ पवस्वसोममहान्त्समुद्रःपितादेवानांविश्वाभिधाम ॥ शुक्रःपवस्वदेवेभ्यःसोम
दिवेपृथिव्यैशंचप्रजायै ॥ दिवोधर्तासिशुक्रःपीयूषःसत्येविधर्मन्वाजीपवस्व ॥ पवस्वसोमद्युम्नीसुधारोमहामवीनाम

(९।७।६) परिप्रेतिद्वाविंशत्यृचस्यसूक्तस्यैश्वरयोधिष्ण्याग्नयःपवमानसोमोद्विपदाविराट् ।

ऋक्सं.
अ.७अ.५
॥२१॥

नुपूर्व्यः+ ॥ नृभिर्येमानोजज्ञानःपूतःक्षरद्विश्वानिमंद्रःस्वर्वित्+ ॥ इंदुःपुनानःप्रजामुराणःकरद्विश्वानिद्रविणानिनः ॥ पवस्वसोमक्रत्वेदक्षायाश्वोननिक्तोवाजीधनाय ॥ २० ॥ तंतेसोतारोरसंमदायपुनंतिसोमंमहेद्युम्नाय ॥ शिशुंजज्ञानंहरिंमृजंतिपवित्रेसोमंदेवेभ्यऽइंदुं ॥ इंदुःपविष्टचारुर्मदायापामुपस्थेकविर्भगाय ॥ बिभर्तिचार्विंद्रस्यनामयेनविश्वानिवृत्राजघान ॥ पिबंत्यस्यविश्वेदेवासोगोभिःश्रीतस्यनृभिःसुतस्य ॥ प्रसुवानोऽअक्षाःसहस्रधारस्तिरःपवित्रंविवारमव्यम् ॥ सवाज्यक्षाःसहस्ररेताऽअद्भिर्मृजानोगोभिःश्रीणानः+ ॥ प्रसोमयाहींद्रस्यकुक्षानृभिर्येमानोऽआद्रिभिःसुतः+ ॥ असर्जिवाजीतिरःपवित्रमिंद्रायसोमःसहस्रधारः ॥ अंजंत्येनंमध्वोरसेनेंद्रायवृष्णऽइंदुंमदाय ॥ देवेभ्यस्त्वावृथापाजसेपोवसानंहरिंमृजंति ॥ इंदुरिंद्रायतोशतेनितोशतेश्रीणन्नुग्रोरिणन्नपः+ ॥ २१ ॥ (९।७।७)
पर्यूषुप्रधन्ववाजसातयेपरिवृत्राणिसक्षणिः । द्विषस्तरध्याऽऋणयानऽईयसे ॥ अनुहित्वासुतंसोममदामसिमहेसमर्यराज्ये । वाजाँऽअभिपवमानप्रगाहसे ॥ अजीजनोहिपवमानसूर्यंविधारेशक्मनापयः । गोजीरयारंहमाणःपुरंध्या ॥ अजीजनोऽअमृतमर्त्येष्वाँऽऋतस्यधर्मन्नमृतस्यचारुणः । सदासरोवाजमच्छासनिष्यदत् ॥ अभ्यभिहिश्रवसातत

(९।७।७) पर्यूष्वितिद्वादशर्चस्यसूक्तस्यत्र्यरुणत्रसदस्यूराजानौपवमानसोमःआद्यास्तिस्रोनुष्टुभःपिपीलिकमध्याःचतुर्थ्यादिषळूर्ध्वबृहत्योऽत्यास्तिस्रोविराजः ।

मंडलं ९
अनु. ७
॥२१॥

दिंथोत्संनकंचिज्जनपानमक्षितं । शर्याभिर्नभरमाणोगभस्त्योः ॥ आदींकेचित्पश्यमानासऽआप्यंवसुरुचोदिव्याऽ अभ्यनूषत । वारंनदेवःसविताव्यूर्णुते ॥ २२ ॥ त्वेसोमप्रथमावृक्तबर्हिषोमहेवाजायश्रवसेधियंदधुः । सत्वंनोवीरवीर्यायचोदय ॥ दिवःपीयूषंपूर्व्यंयदुक्थ्यंमहोगाहाद्दिवऽआनिरधुक्षत । इंद्रमभिजायमानंसमस्वरन् ॥ अधयदिमेपवमानरोदसीऽइमाचविश्वाभुवनाभिमज्मना । यूथेननिःष्ठावृषभोवितिष्ठसे ॥ सोमःपुनानोऽअव्ययेवारेशिशुर्नक्रीळन्पवमानोऽअक्षाः । सहस्रधारःशतवाजऽइंदुः ॥ एषपुनानोमधुमाँऽऋतावेंद्रायेंदुःपवतेस्वादुरूर्मिः । वाजसनिर्वरिवोविद्वयोधाः+ ॥ सपवस्वसहमानःपृतन्यून्त्सेधन्रक्षांस्यपदुर्गहाणि । स्वायुधःसासह्वान्त्सोमशत्रून् ॥२३॥

(९।७।८) अयारुचाहरिण्यापुनानोविश्वाद्वेषांसितरतिस्वयुग्वभिःसूरोनस्वयुग्वभिः । धारासुतस्यरोचतेपुनानोअरुषोहरिः । विश्वायद्रूपापरियात्यृक्वभिःसप्तास्येभिर्ऋक्वभिः ॥ त्वंत्यत्पणीनांविदोवसुसंमातृभिर्मर्जयसिस्वऽआदमऽऋतस्यधीतिभिर्दमे । परावतोनसामतद्यत्रारणंतिधीतयः । त्रिधातुभिररुषीभिर्वयोदधेरोचमानोवयोदधे ॥ पूर्वामनुप्रदिशंयातिचेकितत्संरश्मिभिर्यततेदर्शतोरथोदैव्योदर्शतोरथः । अग्मन्नुक्थानिपौंस्येंद्रंजैत्रायहर्षयन् ।

(९।७।८।) अयारुचेतितृचस्यसूक्तस्यपारुच्छेपिरननतःपवमानसोमोऋषिः ।

॥३२॥
वज्रश्चयज्ञवंथोऽअनपच्युतासमत्स्वनपच्युता ॥ २४ ॥ (९।७।९) नानानंवाऽउनोधियोविव्रतानिजनानां ।
तक्षारिष्टंरुतंभिषग्ब्रह्मासुन्वंतमिच्छतींद्रायेंदोपरिस्रव ॥ जरंतीभिरोषधीभिःपर्णेभिःशकुनानां । कार्मारोऽअश्मभि
र्द्युभिर्हिरण्यवंतमिच्छतीं० ॥ कारुरहंततोभिषगुपलप्रक्षिणीनना । नानाधियोवसूयवोनुगाऽइवतस्थिमेंद्रा० ॥ अ
श्वोवोह्लासुखंरथंहसनामुपमंत्रिणः । शेपोरोमण्वंतौभेदौवारिन्मंडूकंऽइच्छतीं० ॥ २५ ॥ (९।७।१०) शर्यणाव
तिसोममिंद्रःपिबतुवृत्रहा । बलंदधानऽआत्मनिकरिष्यन्वीर्यंमहदिंद्रा० ॥ आपवस्वदिशांपतऽआर्जीकात्सोममी
ढ्वः । ऋतवाकेनसत्येनश्रद्धयातपसासुतऽइंद्रा० ॥ पर्जन्यवृद्धंमहिषंतंसूर्यस्यदुहिताभरत् । तंगंधर्वाःप्रत्यगृभ्णन्तं
सोमेरसमादधुरिंद्रा० ॥ ऋतंवदन्नृतद्युम्नसत्यंवदन्त्सत्यकर्मन् । श्रद्धांवदन्त्सोमराजन्धात्रासोमपरिष्कृतऽइंद्रा० ॥
सत्यमुग्रस्यबृहतःसंस्रवंतिसंस्रवाः । संयंतिरसिनोरसाःपुनानोब्रह्मणाहरऽइंद्रा० ॥ २६ ॥ यत्रब्रह्मापवमानछंदस्यां
३वाचंवदन् । ग्राव्णासोमेमहीयतेसोमेनानंदंजनयन्निंद्रा० ॥ यत्रज्योतिरजस्रंयस्मिन्ल्लोकेस्वर्हितं । तस्मिन्मांधेहिप
वमानामृतेलोकेऽअक्षितऽइंद्रा० ॥ यत्रराजावैवस्वतोयत्रावरोधनंदिवः । यत्रामूर्यह्वतीरापस्तत्रमाममृतंकृधींद्रा० ॥ ॥३२॥

(९।७।९) नानानमितिचतुर्ऋचस्यसूक्तस्यांगिरसःशिशुःपवमानसोमःपंक्तिः । (९।७।१०) शर्यणावतीत्येकादशर्चस्यसूक्तस्य मारीचःकश्यपःपवमानसोमःपंक्तिः ।

यत्रा॑नुका॒मंचर॑णंत्रिना॒केत्रि॑दि॒वेदि॒वः । लो॒कायत्र॒ज्योति॑ष्मंत॒स्तत्र॒माम॒मृतं॑कृ॒धींद्रा॑० ॥ यत्र॒कामा॑निका॒माश्च॒यत्र॑ब्र॒ध्नस्य॑वि॒ष्टपं॑ । स्व॒धाच॒यत्र॒तृप्ति॑श्च॒तत्र॒माम॒मृतं॑कृ॒धींद्रा॑० ॥ यत्रा॑नं॒दाश्च॒मोदा॑श्च॒मुदः॑प्र॒मुद॒ऽआस॑ते । काम॑स्य॒यत्रा॒प्ताःकामा॒स्तत्र॒माम॒मृतं॑कृ॒धींद्रा॑० ॥ २७ ॥ (९।७।११) यऽइंदो॒ःपव॑मान॒स्यानु॒धामा॒न्यक्र॑मीत् । तमा॑हुःसुप्र॒जाऽइति॒यस्ते॑सो॒मावि॑ध॒न्मन॒ऽइंद्रा॑० ॥ ऋषे॑मंत्र॒कृतां॒स्तोमै॒ःकश्य॑पोद्व॒र्धय॒न्गिरः॑ । सोमं॑नमस्य॒राजा॑नं॒योज॒ज्ञेवी॒रुधां॒पति॒रिंद्रा॑० ॥ स॒प्तदिशो॒नाना॑सूर्याः॒स॒प्तहोता॑रऋ॒त्विजः॑ । दे॒वाऽआ॑दि॒त्यायेस॒प्ततेभिः॑सोमा॒भिर॑क्षन॒ऽइंद्रा॑० ॥ यत्ते॑राजन्छृ॒तंह॒विस्तेनं॑सोमा॒भिर॑क्षनः । अ॒रा॒ती॒वामान॑स्तारी॒न्मोच॑न॒ःकिंच॒नाम॑म॒दिंद्रा॑० ॥ २८ ॥ (इतिपावमानंनवमंमंडलंसमाप्तं सूक्तानि ११४ ॥) (॥ परिशिष्टं ॥ यत्र॒तत्प॑र॒मंप॒दंविष्णो॑र्लो॒केम॑ही॒यते॑ । दे॒वैःसुकृतंकर्म॑भि॒स्तत्र॒माम॒मृतं॑कृ॒धींद्रा॑० ॥ यत्र॒तत्प॑र॒माय्यं॑भू॒ताना॑मधि॒पतिं॑ । भा॒व॒भा॒वीच॒योगीं॑श्च॒तत्र॒माम॒मृतं॑कृ॒धींद्रा॑० ॥ यत्र॑लो॒कास्त॑नू॒त्यजः॑ श्र॒द्धया॒तप॑सा॒जिताः॑ । तेज॑श्च॒यत्र॒ब्रह्मं॑च॒तत्र॒माम॒मृतं॑कृ॒धींद्रा॑० ॥ यत्र॑दे॒वाम॑हात्मा॒नःसेंद्रा॑श्च॒म॒रुद्ग॑णाः । ब्रह्मा॑च॒यत्र॒विष्णुं॑श्च॒तत्र॒माम॒मृतं॑कृ॒धींद्रा॑० ॥ यत्र॒गंगा॑चय॒मुना॑चय॒त्रप्रा॑चीस॒रस्व॑ती । यत्र॑सो॒मेश्व॑रोदे॒वस्तत्र॒माम॒मृतं॑

(९।७।११) यइंदोरितिचतुर्ऋचस्यसूक्तस्यकश्यपःपवमानसोमःपंक्तिः ।

ऋक्सं. कृधींद्रा० ॥ १ ॥) (१०।१।१) अग्रेबृहन्नुषसामूर्ध्वोंऽअस्थान्निर्जगन्वान्तमसोज्योतिषागात् । अग्निर्भानुनारु मंडलं१०
अ.७अ.५ शंतास्वंगऽआजातोविश्वासद्मान्यप्राः ॥ सजातोगर्भोंऽअसिरोदस्योरग्नेचारुर्विंभृंतऽओषंधीषु । चित्रःशिशुःपरित अनु. १
॥२३॥ मांस्यक्तून्प्रमातृभ्योऽअधिकनिंक्रदद्गाः ॥ विष्णुरित्थापरमंमस्यविद्वान्जातोबृहन्नभिपातितृतीयं । आसायदंस्यपयो
ऽअक्रंतस्वंसचैंतसोऽअभ्यर्चंत्यत्र ॥ अतंऽउत्वापितुभृतोजनिंत्रीरन्नावृधंप्रतिंचरंत्यन्नैः । ताऽईंप्रत्येषिपुनरन्यरूपाऽ
असित्वंविक्षुमानुंषीषुहोता ॥ होतांरंचित्ररंथमध्वरस्यंयज्ञस्यंयज्ञस्यकेतुंरुशंतं । प्रत्यर्धिदेवस्यंदेवस्यमह्नाश्रियात्वं१ग्नि
मतिंथिंजनानां ॥ सतुवस्त्राण्यधपेशंनानिवसानोऽअग्निर्नाभापृथिव्याः । अरुषोजातःपदऽइळांयाःपुरोहिंतोराज
न्यक्षीहदेवान्+ ॥ आहिद्यावापृथिवीऽअंग्नऽउभेसदापुत्रोनमातरांततंथं । प्रयाह्यच्छोशतोयंविष्ठाथावंहसहस्येहदे
वान्+ ॥ २९ ॥ (१०।१।२) पिप्रीहिदेवाँऽउशतोयंविष्ठविद्वाँऽऋतूँऽऋँतुपतेयजेह । येदैव्याऽऋत्विजस्तेभिरग्ने
त्वंहोतृणामस्यायंजिष्ठः ॥ वेषिंहोत्रमुतपोत्रंजनानांमंधातासिंद्रविणोदाऽऋतावा । स्वाहावयंकृणवामाहवींषिंदेवोदे ॥२३॥

दशमेमंडलेदशानुवाकाःतत्रप्रथमेनुवाकेषोडशसूक्तानि (१०।१।१) अग्रेबृहन्नितिसप्तर्चस्यसूक्तस्याप्त्यस्त्रितोग्निस्त्रिष्टुप् ।
(१०।१।२) पिप्रीहीतिसप्तर्चस्यसूक्तस्यत्रितोग्निस्त्रिष्टुप् ।

Digitization by eGangotri Funding MoE-Delhi

वान्यंजत्वग्निरर्हन्[1] ॥ आदेवानामपिपंथामगन्मयच्छक्नवामतदनुप्रवोढुं । अग्निर्विद्वान्त्सयजात्सेदुहोतासोऽध्वरान्त्सऽऋतून्कल्पयाति ॥ यद्वोवयंप्रमिनामव्रतानिविदुषांदेवाऽअविदुष्टरासः । अग्निष्टद्विश्वमापृणातिविद्वान्येभिर्देवाँऽऋतुभिःकल्पयाति ॥ यत्पाकत्रामनसादीनदक्षानयज्ञस्यमन्वतेमर्त्यासः । अग्निष्टद्धोताक्रतुविद्विजानन्यजिष्ठोदेवाँऽऋतुशोयजाति ॥ विश्वेषांह्यध्वराणामनीकंचित्रंकेतुंजनितात्वाजजान । सऽआयजस्वनृवतीरनुक्षाःस्पार्हाऽइषःक्षुमतीर्विश्वजन्याः ॥ यंत्वाद्यावापृथिवीयंत्वापस्त्वष्टायंत्वासुजनिमाजजान । पंथामनुप्रविद्वान्पितृयाणंद्युमदग्नेसमिधानोविभाहि ॥ ३० ॥ (१०।१।३) इनोराजन्नरतिःसमिद्धोरौद्रोदक्षायसुषुमाँऽअदर्शि । चिकिद्विभातिभासाबृहतासिक्नीमेतिरुशतीमपाजन् ॥ कृष्णांयदेनीमभिवर्पसाभूज्जनयन्योषांबृहतःपितुर्जां । ऊर्ध्वंभानुंसूर्यस्यस्तभायन्दिवोवसुभिररतिर्विभाति ॥ भद्रोभद्रयासचमानऽआगात्स्वसारंजारोऽअभ्येतिपश्चात् । सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्रुशद्भिर्वर्णैरभिराममस्थात् ॥ अस्ययामासोबृहतोनवग्नूनिंधानाऽअग्नेःसख्युःशिवस्य । ईड्यस्यवृष्णोबृहतःस्वासोभामासोयामन्नक्तवश्चिकित्रे ॥ स्वनानयस्यभामासःपवंतेरोचमानस्यबृहतःसुदिवः । ज्येष्ठेभिर्यस्तेजिष्ठैःक्रीळुमद्भिर्वर्षिष्ठेभिर्भानुभिर्नक्षतिद्यां+ ॥ अस्यशुष्मासोददृशानपवेर्जेहमानस्यस्वनयन्नियुद्भिः । प्रत्नेभिर्योरुशद्भिर्देव

(१०।१।३) इनोराजन्नितिसप्तर्चस्यसूक्तस्यत्रितोऽग्निस्त्रिष्टुप् ।

[1] (१ नात्रस्वाहाकारःकिंतुमंत्रांतएवहविःप्रक्षेपः ।)

तमोविरेभद्भिररतिर्भातिविभ्वा ॥ सऽआवक्षिमहिनऽआचसत्सिदिवस्पृथिव्योररतिर्युवत्योः । अग्निःसुतुकःसुतुके
भिरश्वैरभस्वद्भीरभस्वाँऽएहगम्याः ॥ ३१ ॥ (१०।११४) प्रतेयक्षिप्रतऽइयर्मिमन्मभुवोयथावंद्योनोहवेषु । धन्व
न्निवप्रपाऽअसित्वमग्नऽइयक्षवेपूरवेप्रत्नराजन् ॥ यंत्वाजनासोऽअभिसंचरंतिगावऽउष्णमिवव्रजंयविष्ठ । दूतोदेवा
नामसिमर्त्यानामंतर्महाँऽश्चरसिरोचनेन ॥ शिशुंनत्वाजेन्यंवर्धयंतीमाताबिभर्तिसचनस्यमाना । धनोरधिप्रवताया
सिहर्यन्जिगीषसेपशुरिवावसृष्टः ॥ मूराऽअमूरनवयंचिकित्वोमहित्वमग्नेत्वमंगवित्से । शयेवव्रिश्चरतिजिह्वयादन्रेरि
ह्यतेयुवतिंविश्पतिःसन्+ ॥ कूचिज्जायतेसनयासुनव्योवनेतस्थौपलितोधूमकेतुः । अस्नातापोवृषभोनप्रवेतिसचेत
सोयंप्रणयंतमर्ताः ॥ तनूत्यजेवतस्करावनर्गूरशनाभिर्दशभिरभ्यधीतां । इयंतेऽअग्नेनव्यसीमनीषायुक्ष्वारथंनशुच
यद्भिरंगैः ॥ ब्रह्मचतेजातवेदोनमश्चेयंचगीःसदमिद्वर्धनीभूत् । रक्षाणोऽअग्नेतनयानितोकारक्षोतनस्तन्वो३अप्रयु
च्छन् ॥ ३२ ॥ (१०।११५) एकःसमुद्रोधरुणोरयीणामस्मद्धृदोभूरिजन्माविचष्टे । सिषक्त्यूधर्निण्योरुपस्थऽउ
त्सस्यमध्येनिहितंपदंवेः+ ॥ समानंनीळंवृषणोवसानाःसंजग्मिरेमहिषाऽअर्वतीभिः । ऋतस्यपदंकवयोनिपांतिगुहा ॥३४॥
नामानिदधिरेपराणि ॥ ऋतायिनीमायिनीसंदधातेमित्वाशिशुंजज्ञतुर्वर्धयंती । विश्वस्यनाभिंचरतोध्रुवस्यकवेश्चित्तं

(१०।११४) प्रतइतिसप्तर्चस्यसूक्तस्यत्रितोग्निस्त्रिष्टुप् । (१०।११५) एकःसमुद्रइतिसप्तर्चस्यसूक्तस्यत्रितोग्निस्त्रिष्टुप् ।

तुंमनंसावियंतः ॥ ऋतस्यहिवर्तनयःसुजातमिषोवाजायप्रदिवःसचंते । अधीवासंरोदसीवावसानेघृतैरन्नैर्वावृधाते
मधूनां ॥ सप्तस्वसॄररुषीर्वावशानोविद्वान्मध्वऽउज्जभारादृशेकं । अंतर्येमेऽअंतरिक्षेपुराजाऽइच्छन्वव्रिमविदत्पूषण
स्यं ॥ सप्तमर्यादाःकवयस्ततक्षुस्तासामेकामिदभ्यंहुरोगात् । आयोर्हस्कंभऽउपमस्यनीळेपथांविसर्गेधरुणेषुतस्थौ ॥
असच्चसच्चपरमेव्योमन्दक्षस्यजन्मन्नदितेरुपस्थे । अग्निर्हनःप्रथमजाऽऋतस्यपूर्वऽआयुनिवृषभश्चधेनुः+ ॥ ३२ ॥
इतिसप्तमाष्टकेपंचमोऽध्यायः ॥ ५ ॥ ॥ ॥ ॥ ॥ ॥

त्रिपंचाशाध्यायेवर्गाः ३३ सूक्तानि १९ ऋचः १८९ ॥ त्यागः ॥ पवमानायसोमाये. १५४ अग्नयइदं. ३५ ॥ इतिसप्तमेपंचमः ॥

अयंस्वस्तिप्रकेतुनानवंत्रिशिरास्त्वाष्ट्रस्तृचोंत्यऐंद्रंआपोहिसिंधुद्वीपोवांबरीषआपंगायत्रंत्र्यनुष्टुबंतंपंचमीवर्धमानासप्तमीप्रतिष्ठौचित्षळूनावैवस्वतयोर्यमयम्योःसंवादःषष्ठ्ययुग्भिर्यमीमिथुनार्थंयमंप्रोवाचसतांनवमीयुग्भिरनिच्छन्प्रत्याचष्टेवृषानवांगिर्हविर्धानंआग्नेयंतुत्रित्रिष्टुबंतंद्यावायुजेपंचंविवस्वान्वादित्योहाविर्धानंजगत्यंतंपरेयिवांसंषोळशयमोयामंषष्ठीलिंगोक्तदेवतापराश्चतिस्रःपित्र्यावातृचःश्वभ्यांपराऽअनुष्टुभौबृहत्युपांत्यायामायनाःपरेपंचौदीरतांषळूनाशंखःपित्र्यंजगत्येकादशींमैनंदमनऽआग्नेयंचतुरनुष्टुबंतंत्वष्टादेवश्रवाद्वेसरण्यूदेवतेपौष्णयश्चतस्रःसारस्वत्यस्तिस्रःपंचाप्योंद्रप्सस्तिस्रःसौम्योवांत्येअनुष्टुभांउपांत्यापुरस्ताद्बृहतीवापरं

मृत्योःसंकुसुकश्चतस्रोमृत्युदेवताःपराधात्रीपरात्वाष्ट्रींपराःपितृमेधाएकादशीप्रस्तारपङ्क्तिर्जगत्युपांत्यांत्यानुष्टुप् प्राजापत्यावासानिरुक्ता ॥ ६ ॥

॥ हरिःॐम् ॥ (१०।१।६) अयंसयस्यशर्मन्नवोभिरग्नेरेधतेजरिताभिष्टौ । ज्येष्ठेभिर्योभानुभिरृषूणांपर्येतिपरिवीतोविभावा ॥ योभानुभिर्विभावाविभात्यग्निर्देवेभिरृतावाजस्रः । आयोविवायसख्यासखिभ्योपरिह्वृतोऽअत्योनसप्तिः ॥ ईशेयोविश्वस्यादेववीतेरीशेविश्वायुरुषसोव्युष्टौ । आयस्मिन्मनाहवींष्यग्नावरिष्टरथःस्कभ्नातिशूषैः+ ॥ शूषेभिर्वृधोजुषाणोऽअर्कैर्देवाँऽअच्छारघुपत्वाजिगाति । मंद्रोहोतासजुह्वा३ यजिष्ठःसंमिश्लोऽअग्निराजिघर्तिदेवान्+ ॥ तमुस्रामिंद्रंनरेजमानमग्निंगीर्भिर्नमोभिराकृणुध्वं । आयंविप्रासोमतिभिर्गृणंतिजातवेदसंजुह्वंसहानां ॥ संयस्मिन्विश्वावसूनिजग्मुर्वाजेनाश्वाःसप्तीवंतऽएवैः । अस्मेऽऊतीरिंद्रवाततमाऽअर्वाचीनाऽअग्नऽआकृणुष्व ॥ अधाह्यग्नेमह्नानिषद्यासद्योजज्ञानोहव्योबभूथ । तंतेदेवासोऽअनुकेतमायन्नधावर्धतप्रथमासऽऊमाः ॥ १ ॥ (१०।१।७) स्वस्तिनोदिवोऽअग्नेपृथिव्याविश्वायुर्धेहियजथायदेव । सचेमहितवदस्मप्रकेतैरुरुष्याणऽउरुभिर्देवशंसैः ॥ इमाऽअग्नेमतयस्तुभ्यंजातागोभिरश्वैरभिगृणंतिराधः । यदातेमर्तोऽअनुभोगमानड्वसोदधानोमतिभिःसुजात ॥ अग्निं

(१०।१।६) अयंसइतिसप्तर्चस्यसूक्तस्याद्यस्त्रितोग्निस्त्रिष्टुप् । (१०।१।७) स्वस्तिनइतिसप्तर्चस्यसूक्तस्यत्रितोग्निस्त्रिष्टुप् ।

मं॑न्येपि॒तर॑म॒ग्निमा॒पिम॒ग्निं॑भ्रात॑रं॒सद॒मित्सखा॑यं । अ॒ग्नेरनी॑कंबृह॒तःसं॑पर्यं॑दि॒विशु॒क्रंय॑ज॒तंसूर्यं॑स्य ॥ सि॒ध्राऽअ॑ग्ने॒धियो॑ऽअ॒स्मेस॑नु॒त्रीर्यं॑त्राय॑से॒दम॒ऽआनित्य॑होता । ऋ॒तावा॒सरो॒हिद॑श्वःपुरु॒क्षुर्द्यु॒भिर॑स्मा॒ऽअह॑भिर्वा॒मम॑स्तु ॥ द्यु॒भिर्हि॒तंमि॒त्रमि॑वप्र॒योगं॑प्र॒त्नमृ॒त्विज॑मध्व॒रस्य॑जा॒रं । बा॒हुभ्या॑म॒ग्निमा॒यवो॑जनंतवि॒क्षुहोता॑रं॒न्य॑सादयंत ॥ स्व॒यंय॑जस्वदि॒विदे॑वदे॒वान्किं॑ते॒पाकः॑कृणव॒दप्र॑चेताः । यथाय॑जऽऋ॒तुभि॑र्देवदे॒वाने॒वाय॑जस्वत॒न्वं॑सुजात ॥ भवा॑नोअग्नेवि॒तोत॒गोपाभवा॑वय॒स्कृदु॒तनो॑वयो॒धाः । रास्वा॑चनःसुमहोह॒व्यदा॑ति॒त्रास्वो॒तन॑स्त॒न्वो॒३अप्र॑युच्छन् ॥ २ ॥ (१०।१।८) प्रके॒तुना॑बृह॒ताया॑त्य॒ग्निरारोद॑सीवृष॒भोरो॑रवीति । दि॒वश्चि॒दंताँ॑ऽउप॒माँऽउदा॑नळ॒पामु॒पस्थे॑महि॒षोव॑वर्ध ॥ मु॒मोद॒गर्भो॑वृष॒भःक॒कुद्मा॑नस्रे॒माव॒त्सःशिमी॑वाँऽअरावीत् । सदे॒वता॒त्युद्य॑तानिकृ॒ण्वन्त्स्वे॒षुक्षये॑षुप्रथ॒मोजि॑गाति ॥ आयोमू॒र्धानं॑पि॒त्रोरर॑ब्ध॒न्य॑ध्व॒रेद॑धिरे॒सूरो॒ऽअर्णः॑ । अस्य॒पत्म॒न्नरु॑षी॒रश्व॑बुध्नाऽऋ॒तस्य॒योनौ॑त॒न्वो॑जुषंत ॥ उ॒षऽउ॑षो॒हिव॑सो॒ऽअग्र॒मेषि॒त्वंय॒मयो॑रभवोवि॒भावा॑ । ऋ॒ताय॑स॒प्तद॑धिषेप॒दानि॑ज॒नय॑न्मि॒त्रंत॒न्वे॒३स्वायै॑ ॥ भुव॒श्चक्षु॑र्म॒हऽऋ॒तस्य॒गोपा॒भुवो॒वरु॑णो॒यदृ॒ताय॒वेषि॑ । भुवो॑ऽअ॒पांनपा॑ज्जातवेदो॒भुवो॑दू॒तोयस्य॑ह॒व्यंजुजो॑षः ॥ ३ ॥ भुवो॑य॒ज्ञस्य॒रज॑सश्चने॒तायत्रा॑नि॒युद्भिः॒सच॑सेशि॒वाभिः॑ । दि॒विमू॒र्धानं॑दधिषेस्व॒र्षांजि॒ह्वाम॑ग्नेचकृषेहव्य॒वाहं॑ ॥ अ॒स्यत्रि॒तःक्रतु॑नाव॒व्रेऽअं॒तरि॒च्छन्धी॒तिंपि॒तुरेवैः॒पर॑

(१०।१।८) प्रकेतुनेतिनवर्चस्यसूक्तस्यत्वाष्ट्र[illegible]त्रिष्टुप् ।

CC-0. Ravi Acharya Kathmandu Collection

स्य । सचस्यमानःपित्रोरुपस्थेजामिब्रुवाणऽआयुधानिवेति ॥ सपित्र्याण्यायुधानिविद्वानिंद्रेषितऽआप्त्योऽअभ्ययुध्यत् । त्रिशीर्षाणंसप्तरश्मिंजघन्वान्त्वाष्ट्रस्यचिन्निःससृजेत्रितोगाः+ ॥ भूरीदिंद्रऽउदिनक्षंतमोजोवाभिनत्सत्पतिर्मन्यमानं । त्वाष्ट्रस्यचिद्विश्वरूपस्यगोनामाचक्राणस्त्रीणिशीर्षापरावर्क् ॥ ४ ॥ (१०।१।९) आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन । महेरणायचक्षसे ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः । उशतीरिवमातरः ॥ तस्माऽअरंगमामवोयस्यक्षयायजिन्वथ । आपोजनयथाचनः ॥ शंनोदेवीरभिष्टयऽआपोभवंतुपीतये । शंयोरभिस्रवंतुनः ॥ ईशानावार्याणांक्षयंतीश्चर्षणीनां । अपोयाचामिभेषजं+ ॥ अप्सुमेसोमोऽअब्रवीदंतर्विश्वानिभेषजा । अग्निंचविश्वशंभुवं ॥ आपःपृणीतभेषजंवरूथंतन्वे३मम । ज्योक्चसूर्यंदृशे+ ॥ इदमापःप्रवहतयत्किंचदुरितंमयि । यद्वाहमभिदुद्रोहयद्वाशेपऽउतानृतं ॥ आपोऽअद्यान्वचारिषंरसेनसमगस्महि । पयस्वानग्नऽआगहितंमासंसृजवर्चसा ॥ (परिशिष्टं ॥ सस्रुषीस्तदपसोदिवानक्तंचसस्रुषीः । वरेण्यक्रतूरहमादेवीरवसेहुवे ॥) ॥ ५ ॥ (१०।१।१०) ओचि

(१०।१।९) आपोहिष्ठेतिनवर्चस्यसूक्तस्यांबरीषःसिंधुद्वीपआपोगायत्रीपंचमीवर्धमानासप्तमीप्रतिष्ठांत्येद्वेअनुष्टुभौ (आपोहिसिंधुद्वीपोवांबरीषइत्येवमनुक्रमण्यासिंधुद्वीपस्यपाक्षिकत्वस्वीकारेपूर्वोक्तस्त्रिशिराःप्राप्नोतितथापिप्रयोक्तृभिःसिंधुद्वीपएवाद्रियते) । (१०।१।१०) ओचिदितिचतुर्दशर्चस्यसूक्तस्यनवमीवर्ज्यानामयुजांषष्ठ्याश्चवैवस्वतीयमीऋषिकायमोदेवताषष्ठीवर्ज्यानांयुजांनवम्याश्चवैवस्वतोयमीत्रिष्टुप्

त्सखा॑यंस॒ख्याव॑वृत्यां॑ति॒रःपु॒रूचिं॑द॒र्ण॑वंज॑ग॒न्वान् । पि॒तुर्नपा॑त॒मादं॑धीतवे॒धाऽअधि॒क्षमिं॑प्रत॒रंदीध्या॑नः ॥ नते॒सखा॑स॒
ख्यंवं॑ष्ट्ये॒तत्सलं॑क्ष्म॒ायद्विषुं॑रूप॒ाभवा॑ति । म॒हस्पु॒त्रासो॒ऽअसुं॑रस्यवी॒रादि॒वोधु॒र्तारं॑ऽउर्वि॒यापरिं॑ख्यन् ॥ उ॒शंतिं॑घा॒तेऽ
अ॒मृता॑सऽए॒तदेकं॑स्यचित्त्य॒जसं॒मर्त्यं॑स्य । निते॒मनो॒मनं॑सिधाय्य॒स्मेजन्यु॒ःपतिं॑स्त॒न्व१॒मावि॑विश्याः ॥ नयत्पु॒राचं॑कृ॒मा
कद्धं॑नू॒नमृ॒तावदं॑तो॒ऽअनृं॑तंरपेम । गं॒ध॒र्वोऽअ॒प्स्वप्या॑च॒योषा॒सानो॒नाभिं॑ःप॒रमं॑जा॒मितन्नौ॑ ॥ गर्भे॒नुनौ॑जनि॒तादं॑प
तीकर्दे॒वस्त्वष्टा॑सवि॒तावि॒श्वरू॑पः । नकिं॑रस्य॒प्रमिं॑नं॑तिव्र॒तानि॒वेदं॑नाव॒स्यपृं॑थि॒वीऽउ॒तद्यौः+ ॥ ६ ॥ कोऽअ॒स्यवे॑दप्र
थ॒मस्याह्न॒ःकऽईंददर्श॒कऽइ॒हप्रवों॑चत् । बृ॒हन्मि॒त्रस्य॒वरुं॑णस्य॒धाम॒कदुं॑ब्रवऽआहनो॒वीच्या॒नॄन्+ ॥ य॒मस्यं॑माय॒म्यं॑
१॒काम॒ऽआगं॑न्त्सम॒ानेयोनौं॑सह॒शेय्या॑य । जा॒येव॒पत्यैं॑त॒न्वंरिरिच्या॒विचिंद्वृहे॒वरथ्यें॑वच॒क्रा+ ॥ नतिं॑ष्ठंति॒ननिमिं॑षं
त्ये॒तेदे॒वानां॒स्पशं॑ऽइ॒हयेचरं॑ति । अ॒न्येन॒मदा॑हनोयाहि॒तूयं॒तेन॒विवृं॑ह॒रथ्ये॑वच॒क्रा+ ॥ रात्रीं॑भिरस्मा॒ऽअहं॑भिर्दशस्ये॒त्सू
र्यं॑स्य॒चक्षु॒र्मुहु॒रुन्मि॑मीयात् । दि॒वापृं॑थि॒व्यामिं॑थुनासबंधूय॒मीर्य॒मस्यं॑बिभृया॒दजा॑मि ॥ आघा॒तागं॑च्छा॒नुत्तं॑रायु॒गानि॒
यत्रं॑जा॒मयं॑ःकृ॒णव॒न्नजा॑मि । उपं॑बर्बृहिवृष॒भाय॑बा॒हुम॒न्यमिं॑च्छस्वसुभगे॒पतिं॑मत्+ ॥ ७ ॥ किंभ्राता॑स॒द्यद॒नाथंभवा॑
ति॒किमु॒स्वसा॒यन्निर्ऋं॑ति॒र्निग॒च्छा॑त् । कामं॑मूता॒ब॒ह्वे३॒तद्रं॑पामित॒न्वा॑मेत॒न्वं१॒संपिं॑पृग्धि ॥ नवाऽउं॑तेत॒न्वा॑त॒न्वं१॒संपं॑पृ
च्यां॑पा॒पमा॑हु॒र्यःस्वसा॑रंनि॒गच्छा॑त् । अ॒न्येन॒मत्प्र॒मुदं॑ःकल्पयस्वनतेभ्राता॑सुभगेवष्ट्ये॒तत्+ ॥ ब॒तोबं॑तासियम॒नैवते॒म

नोहृदयंचाविदाम । अन्याकिलत्वांकक्ष्येवयुक्तंपरिष्वजातेलिबुंजेववृक्षं+ ॥ अन्यमूषुत्वंयम्यन्यऽउत्वांपरिष्वजाते
लिबुंजेववृक्षं । तस्यवात्वंमनऽइच्छासवातवाधाकृणुष्वसंविदंसुभद्रां ॥ ८ ॥ (१०।१।११) वृषावृष्णेदुदुहेदोह
सादिवःपयांसियह्वोऽअदितेरदाभ्यः । विश्वंसवेदवरुणोयथाधियासयज्ञियोयजतुयज्ञियाँऽऋतून्+ ॥ रपद्गंधर्वीर
प्याचयोषणानदस्यनादेपरिपातुमेमनः । इष्टस्यमध्येऽअदितिर्निधातुनोभ्रातानोज्येष्ठःप्रथमोविवोचति ॥ सोचि
न्नुभद्राक्षुमतीयशस्वत्युषाऽउवासमनवेस्वर्वती । यदीमुशंतमुशतामनुक्रतुमग्निंहोतारंविदथायजीजनन् ॥ अधत्यंद्र
प्संविभ्वंविचक्षणंविराभरदिषितःश्येनोऽअध्वरे । यदीविशोवृणतेदस्ममार्याऽअग्निंहोतारमधधीरजायत ॥ सदा
सिरण्वोयवसेवपुष्यतेहोत्राभिरग्नेमनुषःस्वध्वरः । विप्रस्यवायच्छशमानऽउक्थ्यं१वाजंससवाँऽउपयासिभूरिभिः
॥ ९ ॥ उदीरयपितराजारऽआभगमियक्षतिहर्यतोहृत्तऽइष्यति । विवक्तिवह्निःस्वपस्यतेमखस्तविष्यतेऽअसुरोवेप
तेमती+ ॥ यस्तेऽअग्नेसुमतिंमर्तोऽअक्षत्सहसःसूनोऽअतिसप्रशृण्वे । इषंदधानोवहमानोऽअश्वैरासद्युमाँऽअमवान्भू
षतिद्यून्+ ॥ यदग्नऽएषासमितिर्भवातिदेवीदेवेषुयजतायजत्र । रत्नाचयद्विभजासिस्वधावोभागंनोऽअत्रवसुमंतं
वीतात् ॥ श्रुधीनोऽअग्नेसदनेसधस्थेयुक्ष्वारथममृतस्यद्रवित्नुं । आनोवहरोदसीदेवपुत्रेमाकिर्देवानामपभूरिहस्याः

(१०।१।११) वृषावृष्णइतिनवर्चस्यसूक्तस्याग्निर्हविर्धानोऽग्निर्जगतीअंत्यास्तिस्रस्त्रिष्टुभः ।

॥ १० ॥ (१०।१।१२) द्यावा॑ह॒क्षामा॑प्रथ॒मेऽऋ॒तेना॑भिश्रा॒वेभ॑वतःसत्य॒वाचा॑ । दे॒वोयन्मर्ता॑न्य॒जथा॑यकृ॒ण्वन्त्सी
द॒द्धोता॑प्र॒त्यङ्स्वमसु॒ंयन्+ ॥ दे॒वोदे॒वान्प॑रि॒भूर्ऋ॒तेन॒वहा॑नोह॒व्यंप्र॑थ॒मश्चि॑कि॒त्वान् । धू॒मके॑तुःस॒मिधा॒भाऽऋ॑जीकोमं॒
द्रोहोता॒नित्यो॑वा॒चायजी॑यान् ॥ स्वावृ॑ग्दे॒वस्या॒मृतं॒यदी॒गोरतो॑जा॒तासो॑धारयंतऽउ॒र्वी॑ । विश्वे॑दे॒वाऽअनु॒तत्ते॒यजु॑र्गु॒र्दु॒
हेयदेनी॑दि॒व्यंघृ॒तंवाः+ ॥ अर्ची॑मि॒वां॑वर्धा॒यापो॑घृतस्नू॒द्यावा॑भूमीशृणु॒तंरो॑दसीमे । अहा॒यद्द्यावोसु॑नीति॒मय॒न्मध्वा॑नो॒
ऽअत्र॑पि॒तरा॑शिशीतां ॥ किंस्वि॑न्नो॒राजा॑जगृहे॒कद॒स्याति॑व्र॒तंच॑कृमा॒कोविवे॑द । मि॒त्रश्चि॒द्धिष्मा॑जुहुरा॒णोदे॒वान्छ्लोको॒
नया॒तामपि॒वाजो॒ऽअस्ति॑ ॥ ११ ॥ दु॒र्मं॑त्व॒त्रामृतं॑स्य॒नाम॒सलं॑क्ष्मा॒यद्विषु॑रूपा॒भवा॑ति । य॒मस्य॒योम॒नवं॑तेसु॒मंत्व॒ग्ने॒तमृं
ष्वपा॒ह्यप्र॑युच्छन् ॥ यस्मि॑न्दे॒वावि॒दथे॑मा॒दयं॑तेवि॒वस्वं॑त॒ःसदं॑नेधा॒रयं॑ते । सूर्ये॒ज्योति॒रदं॑धुर्मा॒स्य॑१॒क्तून्परि॑द्योता॒निं॑चर
तो॒ऽअजं॑स्रा ॥ यस्मि॑न्दे॒वामन्मं॑निसं॒चरं॑त्यपी॒च्ये॒३॒नव॒यमं॑स्यविद्म । मि॒त्रोनो॒ऽअत्रादि॑ति॒रना॑गान्त्सवि॒तादे॒वोवरु॑णा
यवो॑चत् ॥ श्रु॒धीनो॑ऽअग्ने॒सदं॑नेस॒धस्थे॑यु॒क्ष्वारथं॑म॒मृतं॑स्यद्रवि॒त्नुं । आनो॑वह॒रोदं॑सीदे॒वपुं॑त्रे॒माकि॑र्दे॒वाना॒मपं॑भूरि॒हस्याः॑
॥ १२ ॥ (१०।१।१३) यु॒जेवां॒ब्रह्मं॑पू॒र्व्यंनमो॑भि॒र्विश्लोकं॑ऽएतुप॒थ्ये॑वसू॒रेः । शृ॒ण्वंतु॒विश्वे॑ऽअ॒मृतं॑स्यपु॒त्राऽआयेधा

(१०।१।१२) द्यावाहेतिनवर्चस्यसूक्तस्यहविर्धानोग्निस्त्रिष्टुप् । (१०।१।१३) युजेवामितिपंचर्चस्यसूक्तस्यादित्योविवस्वान्हविर्धान त्रिष्टुवत्याजगती ।

मानिदिव्यानितस्थुः ॥ यमेऽइंवयतंमानेयदैतंप्रवांभरन्मानुषादेवयंतः । आसीदतंस्वमुलोकंविदानेस्वासस्थेभंवतमिंदवेनः ॥ पंचपदानिरुपोऽअन्वंरोहंचतुष्पदीमन्वेमिव्रतेनं । अक्षरेणप्रतिमिमऽएतामृतस्यनाभावधिसंपुनामि ॥ देवेभ्यःकमंवृणीतमृत्युंप्रजायैकममृतंनावृणीत । बृहस्पतिंयज्ञमकृण्वतऽऋषिंप्रियांयमस्तन्वं१प्रारिरेचीत् ॥ सप्तक्षरंतिशिशंवेमरुत्वंतेपित्रेपुत्रासोऽअप्यंवीवतन्नृतं । उभेऽइदंस्योभयंस्यराजतऽउभेयंतेतेऽउभयंस्यपुष्यतः ॥ १३ ॥
(१०।१।१४) परेयिवांसंप्रवतोमहीरनुंबहुभ्यःपंथामनुपस्पशानं । वैवस्वतंसंगमनंजनानांयमंराजानंहविषादुवस्य ॥ यमोनोगातुंप्रथमोविवेदनैषागव्यूतिरपंभर्तवाऽउं । यत्रानःपूर्वेपितरःपरेयुरेनाजंज्ञानाःपथ्या३ अनुस्वाः+ ॥ मातलीकव्यैर्यमोऽअंगिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः । यांश्चदेवावावृधुर्येचदेवान्त्स्वाहान्येस्वधयान्येमंदंति ॥ इमंयंमप्रस्तरमाहिसीदांगिरोभिःपितृभिःसंविदानः । आत्वामंत्राःकविशस्तावंहंत्वेनाराजन्हविषामादयस्व ॥ अंगिरोभिरागंहियज्ञियेभिर्यमंवैरूपैरिहमादयस्व । विवंस्वंतंहुवेयःपितातेस्मिन्यज्ञेबर्हिष्यानिषद्य ॥ १४ ॥ अंगिरसोनःपितरोनवंग्वाऽअथर्वाणोभृगंवःसोम्यासः । तेषांवयंसुमतौयज्ञियानामपिभद्रेसौमनसेस्याम ॥ प्रेहिप्रेहिपथिभिः

(१०।१।१४) परेयिवांसमितिषोळशर्चस्यसूक्तस्यवैवस्वतोयमऋषिःयमोदेवताषष्ठ्याअंगिरःपित्रथर्वभृगुसोमाःदशम्यादितिसृणांश्वानौत्रिष्टुप्त्रयोदशीचतुर्दशीषोडश्योनुष्टुभःपंचदशीबृहती (प्रेहिप्रेहीत्यादितिसृणांपितृदेवतावैकल्पिकी)।

पूर्व्येभिर्यत्रानःपूर्वेपितरःपरेयुः । उभाराजानास्वधयामदंतायमंपश्यासिवरुणंचदेवं+ ॥ संगच्छस्वपितृभिःसंयमेने
ष्टापूर्तेनपरमेव्योमन् । हित्वायावद्यंपुनरस्तमेहिसंगच्छस्वतन्वासुवर्चाः ॥ अपेतवीतविचसर्पतातोस्माऽएतंपितरो
लोकमक्रन् । अहोभिरद्भिरक्तुभिर्व्यक्तंयमोददात्यवसानमस्मै ॥ अतिद्रवसारमेयौश्वानौचतुरक्षौशबलौसाधुनाप
था । अथापितृन्त्सुविदत्राँऽउपेहियमेनयेसधमादंमदंति ॥ १५ ॥ यौतेश्वानौयमरक्षितारौचतुरक्षौपथिरक्षीनृचक्ष
सौ । ताभ्यामेनंपरिदेहिराजन्त्स्वस्तिचास्माऽअनमीवंचधेहि ॥ उरूणसावसुतृपाऽउदुंबलौयमस्यदूतौचरतोजनाँऽ
अनु । तावस्मभ्यंदृशयेसूर्यायपुनर्दातामसुमद्येहभद्रं+ ॥ यमायसोमंसुनुतयमायजुहुताहविः । यमंहयज्ञोगच्छत्य
ग्निदूतोऽअरंकृतः ॥ यमायघृतवद्धविर्जुहोतप्रचतिष्ठत । सनोदेवेष्वायमद्दीर्घमायुःप्रजीवसे ॥ यमायमधुमत्तमंरा
ज्ञेहव्यंजुहोतन । इदंनमऽऋषिभ्यःपूर्वजेभ्यःपूर्वेभ्यःपथिकृद्भ्यः ॥ त्रिकद्रुकेभिःपततिषळुर्वीरेकमिद्बृहत् । त्रिष्टुब्गा
यत्रीछंदाँसिसर्वातायमऽआहिता ॥ १६ ॥ (१०।१।१५) उदीरतामवरऽउत्परासऽउन्मध्यमाःपितरःसोम्यासः ।
असुंयऽईयुरवृकाऽऋतज्ञास्तेनोवंतुपितरोहवेषु ॥ इदंपितृभ्योनमोऽअस्त्वद्ययेपूर्वासोयऽउपरासऽईयुः । येपार्थिवे
रजस्यानिषत्तायेवानूनंसुवृजनासुविक्षु ॥ आहंपितृन्त्सुविदत्राँऽअवित्सिनपातंचविक्रमणंचविष्णोः । बर्हिषदोयेस्व

(१०।१।१५) उदीरतामितिचतुर्दशर्चस्यसूक्तस्ययमायनःशंखःपितरस्त्रिष्टुप्एकादशीजगती ।

ध॒या॑सु॒तस्य॒भजं॑तपि॒त्वस्त॑ऽइ॒हाग॑मिष्ठाः ॥ ब॒र्हि॑षदःपितरऽउ॒त्य१॒॑र्वागि॒मावो॑ह॒व्याचं॑कृमाजु॒षध्वं॑ । तऽआग॒ताव॑सा॒शं
तं॑मे॒नाथा॑नः॒शंयोर॑र॒पोदं॑धात ॥ उप॑हूताःपि॒तरः॑सो॒म्यासो॑ब॒र्हि॒ष्ये॑षुनि॒धिषु॑प्रि॒येषु॑ । तऽआग॑मंतु॒तऽइ॒हश्रु॑वं॒त्वधि॑ब्रुवं
तु॒तेवं॑त्व॒स्मान्+ ॥ १७ ॥ आच्या॒जानु॑दक्षिण॒तोनि॒षद्ये॒मंय॒ज्ञम॒भिगृ॑णीत॒विश्वे॑ । माहिं॑सिष्टपितरः॒केन॑चिन्नो॒यद्व॒ऽआ
गः॑पुरु॒षता॒करा॑म ॥ आसी॑नासोऽअरु॒णीना॑मु॒पस्थे॑र॒यिंध॑त्तदा॒शुषे॒मर्त्या॑य । पु॒त्रेभ्यः॑पितर॒स्तस्य॒वस्वः॒प्रय॑च्छत॒तऽइ॒होर्जं॑द
धात ॥ येनः॒पूर्वे॑पि॒तरः॑सो॒म्यासो॑नूहि॒रेसो॑मपी॒थंव॑सिष्ठाः । तेभि॑र्य॒मःसं॑ररा॒णोह॒वींष्यु॒शन्नु॒शद्भिः॑प्रतिका॒मम॑त्तु ॥ ये
ता॑तृ॒षुर्दे॑व॒त्राजेह॑मानाहोत्रा॒विदः॒स्तोम॑तष्टासोऽअ॒र्कैः । आग्ने॑याहिसुवि॒दत्रे॑भिर॒र्वाङ्स॒त्यैः॑क॒व्यैःपि॒तृभि॑र्घर्म॒सद्भिः॑ ॥
येस॒त्यासो॑हवि॒रदो॑हवि॒ष्पाऽइंद्रे॑णदे॒वैःस॒रथं॒दधा॑नाः । आग्ने॑याहिस॒हस्रं॑देववं॒दैःपरैः॒पूर्वैः॑पि॒तृभि॑र्घर्म॒सद्भिः॑ ॥ १८ ॥
अग्नि॑ष्वात्ताःपितर॒ऽएहग॑च्छत॒सदः॑सदःसदतसुप्रणीतयः । अ॒त्ताह॒वींषि॒प्रय॑तानिब॒र्हिष्यथा॑र॒यिंसर्व॑वीरंदधातन ॥
त्वम॑ग्नऽईळि॒तोजा॑तवे॒दोवा॑ड्ढ॒व्यानि॑सुर॒भीणि॑कृ॒त्वी । प्रादाः॑पि॒तृभ्यः॑स्व॒धया॒तेऽअ॑क्षन्न॒द्धित्वंदे॑व॒प्रय॑ताह॒वींषि॑ ॥ येचे॒ह
पि॒तरो॒येच॒नेहयाँश्च॑वि॒द्मयाँऽउ॑च॒नप्र॑वि॒द्म । त्वंवे॑त्थ॒यति॒तेजा॑तवेदःस्व॒धाभि॑र्य॒ज्ञंसुकृ॑तंजुषस्व ॥ येऽअ॑ग्निद॒ग्धायेऽअ
न॑ग्निदग्धा॒मध्ये॑दि॒वःस्व॒धया॑मा॒दयं॑ते । तेभिः॑स्व॒राळसु॑नीतिमे॒तांय॑थाव॒शंत॒न्वं॑कल्पयस्व ॥१९॥ (१०।१।१६) मैनं ॥३९॥

(१०।१।१६) मैनमितिचतुर्दशर्चस्यसूक्तस्ययामायनोदमनोग्निस्त्रिष्टुबंत्याश्चतस्रोनुष्टुभः ।

मग्नेविदहोमाभिशोचोमास्यत्वचंचिक्षिपोमाशरीरं । यदाशृतंकृणवोजातवेदोथेमेनंप्रहिणुतात्पितृभ्यः ॥ शृतंयदाकरसिजातवेदोथेमेनंपरिदत्तात्पितृभ्यः । यदागच्छात्यसुनीतिमेतामथादेवानांवशनीर्भवाति ॥ सूर्यंचक्षुर्गच्छतुवातमात्माद्यांचगच्छपृथिवींचधर्मणा । अपोवागच्छयदितत्रतेहितमोषधीषुप्रतितिष्ठाशरीरैः ॥ अजोभागस्तपसातंतपस्वतंतेशोचिस्तपतुतंतेऽअर्चिः । यास्तेशिवास्तन्वोजातवेदस्ताभिर्वहैनंसुकृतामुलोकं+ ॥ अवसृजपुनरग्नेपितृभ्योयस्तऽआहुतश्चरतिस्वधाभिः । आयुर्वसानऽउपवेतुशेषःसंगच्छतांतन्वाजातवेदः ॥ २० ॥ यत्तेकृष्णःशकुनऽआतुतोदपिपीलःसर्पऽउतवाश्वापदः । अग्निष्टद्विश्वादगदंकृणोतुसोमश्चयोब्राह्मणाँऽआविवेश ॥ अग्नेर्वर्मपरिगोभिर्व्ययस्वसंप्रोर्णुष्वपीवसामेदसाच । नेत्त्वाधृष्णुर्हरसाजर्हृषाणोदधृग्विधक्ष्यन्पर्यंखयाते ॥ इममग्नेचमसंमाविजिह्वरःप्रियोदेवानामुतसोम्यानां । एषयश्चमसोदेवपानस्तस्मिन्देवाऽअमृतामादयंते ॥ क्रव्यादमग्निंप्रहिणोमिदूरंयमराज्ञोगच्छतुरिप्रवाहः । इहैवायमितरोजातवेदादेवेभ्योहव्यंवहतुऽप्रजानन्+ ॥ योऽअग्निःक्रव्यात्प्रविवेशवोगृहमिमंपश्यन्नितरंजातवेदसं । तंहरामिपितृयज्ञायदेवंसघर्मंमिन्वात्परमेसधस्थे ॥ २१ ॥ योऽअग्निःकव्यवाहनःपितॄन्यक्षदृतावृधः । प्रेदुहव्यानिवोचतिदेवेभ्यश्चपितृभ्यऽआ ॥ उशंतस्त्वानिधीमह्युशंतःसमिधीमहि । उशन्नुशतऽआवहपितॄन्हविषेऽअत्तवे ॥ यंत्वमग्नेसमदहस्तमुनिर्वापयापुनः । कियाम्ब्वत्ररोहतुपाकदूर्वाव्यल्कशा ॥ शीतिकेशीतिकावतिह्ला

दिकेह्लादिकावति । मंडूक्या३सुसंगमऽइमंस्व१ग्निंहर्षय ॥ २२ ॥ (१०।२।१) त्वष्टादुहित्रेवहतुंकृणोतीतीदं
विश्वंभुवनंसमेति । यमस्यमातापर्युह्यमानामहोजायाविवस्वतोननाश ॥ अपागूहन्नमृतांमर्त्येभ्यःकृत्वीसवर्णामददु
र्विवस्वते । उताश्विनावभरद्यत्तदासीदजहादुद्वामिथुनासरण्यूः+ ॥ पूषात्वेतश्च्यावयतुप्रविद्वाननष्टपशुर्भुवनस्यगो
पाः । सत्वैतेभ्यःपरिददत्पितृभ्योग्निर्देवेभ्यःसुविदत्रियेभ्यः ॥ आयुर्विश्वायुःपरिपासतित्वापूषात्वापातुप्रपथेपुर
स्तात् । यत्रासतेसुकृतोयत्रतेययुस्तत्रत्वादेवःसवितादधातु ॥ पूषेमाऽआशाऽअनुवेदसर्वाःसोऽअस्माँऽअभयतमेन
नेषत् । स्वस्तिदाऽआघृणिःसर्ववीरोप्रयुच्छन्पुरऽएतुप्रजानन्+ ॥ २३ ॥ प्रपथेपथामजनिष्टपूषाप्रपथेदिवःप्रपथेपृथि
व्याः । उभेऽअभिप्रियतमेसधस्थेऽआचपराचचरतिप्रजानन्+ ॥ सरस्वतींदेवयंतोहवंतेसरस्वतीमध्वरेतायमाने ।
सरस्वतींसुकृतोऽअह्वयंतसरस्वतीदाशुषेवार्यंदात् ॥ सरस्वतियासरथंययाथस्वधाभिर्देविपितृभिर्मदंती । आसद्या
स्मिन्बर्हिषिमादयस्वानमीवाऽइषऽआधेह्यस्मे+ ॥ सरस्वतींयांपितरोहवंतेदक्षिणायज्ञमभिनक्षमाणाः । सहस्रार्घमि
ळोऽअत्रभागंरायस्पोषंयजमानेषुधेहि ॥ आपोऽअस्मान्मातरःशुंधयंतुघृतेननोघृतप्वःपुनंतु । विश्वंहिरिप्रंप्रवहंतिदे

द्वितीयेनुवाकेत्रयोदशसूक्तानि(१०।२।१) त्वष्टादुहित्रइतिचतुर्दशर्चस्यसूक्तस्ययामायनोवेदश्रवाऋषिःआद्ययोर्द्वयोःसरण्यूदेवताततश्चत
सृणांपूषाततस्तिसृणांसरस्वतीततःपंचानामापःत्रिष्टुप्अंत्येद्वेअनुष्टुभौ(द्रप्सश्चस्कन्देतितिसृणांसोमोदेवतावाउपांत्यापुरस्ताद्बृहतीवेतिच)।

वीरुदिदा॑भ्य॒ःशुचि॒रापू॒तऽए॑मि ॥ २४ ॥ द्र॒प्सश्च॑स्कंद॒प्रथ॒मा॑ऽअनु॒द्यूनि॒मं॑च॒योनि॒मनु॒यश्च॒पूर्वः॑ । स॒मा॒नंयोनि॒मनु॒संचरं॑तंद्र॒प्संजु॑हो॒म्यनु॑स॒प्तहोत्राः॑ ॥ यस्ते॑द्र॒प्सःस्कंद॑ति॒यस्ते॑ऽअं॒शुर्बा॒हुच्यु॑तोधि॒षणा॑याऽउ॒पस्था॑त् । अ॒ध्व॒र्योर्वा॒परि॑वा॒यःप॒वित्रा॒त्तंते॑जुहोमि॒मन॑सा॒वष॑ट्कृतं ॥ यस्ते॑द्र॒प्सःस्क॒न्नोयस्ते॑ऽअं॒शुर॒वश्च॒यःप॒रःस्रु॒चा । अ॒यंदे॒वोबृह॒स्पति॒ःसंतंसि॑ंचतु॒राध॑से ॥ पय॑स्वती॒रोष॑धय॒ःपय॑स्वन्मामु॒कंवच॑ः । अ॒पांपय॑स्व॒दित्पय॒स्तेन॑मास॒हशुं॑धत ॥ २५ ॥ (१०।२।२) परं॑मृत्यो॒ऽअनु॒परे॑हि॒पंथा॒ंयस्ते॒स्वऽइत॑रोदेव॒याना॑त् । चक्षु॑ष्मतेशृण्व॒तेते॑ब्रवीमि॒मान॑ःप्र॒जांरी॑रिषो॒मोतवी॒रान्+ ॥ मृ॒त्योःप॒दंयो॒पय॑ंतो॒यदै॑त॒द्राघी॑य॒ऽआयुः॑प्रत॒रंदधा॑नाः । आ॒प्याय॑मानाःप्र॒जया॒धने॑नशु॒द्धाःपू॒ताभ॑वतयज्ञियासः ॥ इ॒मेजी॒वाविमृ॒तैराव॑वृ॒त्रन्नभू॑द्भ॒द्रादे॒वहू॑तिर्नो॑ऽअ॒द्य । प्रांचो॑ऽअगाम॒नृत॑ये॒हसा॑य॒द्राघी॑य॒ऽआयुः॑प्रत॒रंदधा॑नाः ॥ इ॒मंजी॒वेभ्य॑ःपरि॒धिंद॑धामि॒मैषा॒ंनुगा॒दप॑रो॒ऽअर्थ॑मे॒तं । श॒तंजीवं॑तुश॒रद॑ःपुरू॒चीर॒ंतर्मृ॒त्युंद॑धतां॒पर्व॑तेन ॥ यथाहा॑न्यनुपू॒र्वंभवं॑ति॒यथ॑ऽऋ॒तव॑ऽऋ॒तुभि॒र्यंति॑सा॒धु । यथा॒नपूर्व॒मप॑रो॒जहा॑त्ये॒वाधा॑त॒रायूं॑षिकल्पयै॒षां+ ॥ २६ ॥ आरो॑ह॒तायु॑र्ज॒रसं॑वृणा॒नाऽअ॑नुपू॒र्वंयत॑मानायति॒ष्ठ । इ॒हत्वष्टा॑सु॒जनि॑मासजो॒षा॑दी॒र्घमायु॑ःकरतिजी॒वसे॑वः ॥ इ॒मानारी॑रविध॒वाःसु॒पत्नी॒रांज॑नेनस॒

(१०।२।२) परंमृत्योइतिचतुर्दशर्चस्यसूक्तस्ययामायनःसंकुसुकःआद्यानांचतसृणांमृत्युःपंचम्याधाताषष्ठ्यास्त्वष्टाशिष्टानांपितृमेधात्रिष्टुप्एकादशीप्रस्तारपंक्तिःत्रयोदशीजगत्यंत्येद्वेअनुष्टुभौ (अंत्यायाःप्रजापतिर्वादेवता) ।

र्पिषासंविशंतु । अनश्रवोनमीवाःसुरत्नाऽआरोहंतुजनयोयोनिमग्रे ॥ उदीर्ष्वनार्यभिजीवलोकंगतासुमेतमुपशेषऽएहि । हस्तग्राभस्यदिधिषोस्तवेदंपत्युर्जनित्वमभिसंबभूथ ॥ धनुर्हस्तादाददानोमृतस्यास्मेक्षत्रायवर्चसेबलाय । अत्रैव त्वमिहवयंसुवीराविश्वाःस्पृधोऽअभिमातीर्जयेम ॥ उपसर्पमातरंभूमिमेतामुरुव्यचसंपृथिवींसुशेवां । ऊर्णम्रदायुवतिर्दक्षिणावतऽएषात्वापातुनिर्ऋतेरुपस्थात् ॥ २७ ॥ उच्छ्वंचस्वपृथिविमानिबाधथाःसूपायनास्मैभवसूपवंचना । मातापुत्रंयथासिचाभ्येनंभूमऽऊर्णुहि ॥ उच्छ्वंचमानापृथिवीसुतिष्ठतुसहस्रंमितऽउपहिश्रयंतां । तेगृहासोघृतश्चुतो भवंतुविश्वाहास्मैशरणाःसंत्वत्र ॥ उत्तेस्तभ्नामिपृथिवींत्वत्परीमंलोगंनिदधन्मोऽअहंरिषं । एतांस्थूणांपितरोधारयंतुतेत्रायमःसादनातेमिनोतु ॥ प्रतीचीनेमामहनीष्वाःपर्णमिवादधुः । प्रतीचींजग्रभावाचमश्वंरशनयायथा ॥२८॥

इतिसप्तमाष्टकेषष्ठोऽध्यायः ॥ ६ ॥ ॥ ॥ ॥ ॥ ॥

चतुःपंचाशाध्यायेवर्गाः २८ सूक्तानि १३ ऋचः १४१ त्यागः ॥ अग्नय. २० इंद्रायै. ३ अश्व्यइ. ९ यमायै. यम्याइ. यमायै. यम्याइ. यमायै. ३ यम्या. ३ यमायै. यम्या. यमायै. यम्या. अग्नय. १८ हविर्धानाभ्या. ५ यमायै. ५ अंगिरोथर्वभृगुनामकेभ्य. पितृभ्य. यमायै. ३ श्वानाभ्या. ३ यमायै. ४ पितृभ्य. १४ अग्नय. १४ सख्या. २ पूष्ण. ४ सरस्वत्या. ३ अब्भ्य. सोमाय. ३ अब्भ्य. मृत्यव. ४ धात्रइ. त्वष्ट्रइ. पितृयज्ञायै. ७ प्रजापतय. ॥ इतिसप्तमेषष्ठः ॥

निवर्तध्वमष्टौमथितोभृगुर्वा॑(वा)रुणिर्भा॑र्गवश्च्यवनोवा॑पंगव्यंवानुष्टु॑भमग्नीषोमीयोद्वितीयोर्धर्चैःषष्ठीगायत्रीस
प्तोत्तराण्यैंद्रोविमदःप्राजापत्योवा॑वासुक्रोवसुकृद्वा॑भद्रंदशाग्नेयंतुगायत्रमा॑द्यैकपदापादएववाशांत्यर्धैःपरानुष्टु
बंत्येविराट्त्रिष्टुभा॑वाग्निनाष्टावास्तारपांक्तौकुहपंचोना॑पुरस्ताद्बा॑र्हतंत्रिष्टुबंतौत्वंत्याचिदानस्त्वंनोनुष्टुभौयजाम
हेसप्ताद्यांत्येत्रिष्टुभौपंचम्यभिसारिणींद्रसोमंषळास्तारपांक्तंत्वाश्विन्यौंत्यास्तिस्रोनुष्टुभौभद्रमेकादशसौम्यंप्रहि
नवपौष्णमानुष्टुभ॑माद्याचतुर्थ्याऽउष्णिहा॑वसत्सुचतुर्विंशतिरैंद्रोवसुक्रौ॑विश्वोहिद्वादशैंद्रवसुक्रयोःसंवादऐंद्रः
सूंक्तस्यप्रथमयेंद्रस्यस्नुषा॑परोक्षवदिंद्रमाहैंद्रस्ययुजःशेषाऋषेश्चतुर्थीचं॑वनेनाष्टौप्रदेवत्रापंचोना॑कवषऽऐलूषआ
पमपोनप्त्रीयंवा॑नएकादशवैश्वदेवंप्रसुग्मंतानवपंचाद्याजगत्यः ॥ ७ ॥ ॥ ॥

॥ हरिः ओम् (१०।२।३) निव॑र्तध्व॒ंमानु॑गाता॒स्मान्त्सि॑षक्तरेवतीः । अग्नीषो॑मापुनर्वसूऽअ॒स्मेधा॑रयतंर॒यिं+ ॥
पुन॑रेना॒निव॑र्तय॒पुन॑रेना॒न्याकु॑रु । इंद्र॑ऽएणा॒निय॑च्छत्व॒ग्निरे॑नाऽउ॒पाज॑तु ॥ पुन॑रे॒तानिव॑र्तताम॒स्मिन्पु॑ष्यंतु॒गोप॑तौ ।
इ॒हैवा॑ग्ने॒निधा॑रये॒हति॑ष्ठतु॒यार॒यिः+ ॥ यन्नि॒याने॒न्यय॑नंसं॒ज्ञाने॒यत्प॒राय॑णं । आ॒वर्त॑नंनि॒वर्त॑ने॒योगो॒पाऽअपि॒तंहु॑वे ॥

(१०।२।३) निवर्तध्वमित्यष्टर्चस्यसूक्तस्ययामायनोमथितऋषिःआपोदेवताःआद्यायाअवग्नीषोमाःअंत्यायाइंद्रोनुष्टुप्षष्ठीगायत्री
(अत्रसूक्तेवारुणिर्भृगुर्भार्गवश्च्यवनश्चेमौपाक्षिका[illegible]देवता)।

यऽउदानड्व्ययनंयऽउदानट्परायणं । आवर्तनंनिवर्तनमपिगोपानिवर्तता ॥ आनिवर्तनिवर्तयपुनर्नऽइंद्रगादेहि ।
जीवाभिर्भुनजामहै ॥ परिवोविश्वतोदधऽऊर्जाघृतेनपयसा । येदेवाःकेचयज्ञियास्तेरय्यासंसृजंतुनः ॥ आनिवर्तनवर्तयनिनिवर्तनवर्तय । भूम्याश्चतस्रःप्रदिशस्ताभ्यऽएनानिवर्तय ॥ १ ॥ (१०।२४) भद्रंनोऽअपिवातयमनः ॥
अग्निमीळेभुजांयविष्ठंशासामित्रंदुर्धरीतुं । यस्यधर्मन्त्स्व१रेनीःसपर्यंतिमातुरूधः ॥ यमासाकृपनीळंभासाकेतुंवर्धयंति । भ्राजतेश्रेणिदन् ॥ अर्योविशांगातुरेतिप्रयदानड्दिवोऽअंतान् । कविरभ्रंदीद्यानः ॥ जुषद्धव्यामानुषस्योर्ध्वस्तस्थावृभ्वायज्ञे । मिन्वन्त्सद्मपुरऽएति ॥ सहिक्षेमोहविर्यज्ञःश्रुष्टीदस्यगातुरेति । अग्निंदेवावाशीमंतं ॥ २ ॥
यज्ञासाहंदुवऽइषेग्निंपूर्वस्यशेवस्य । अद्रेःसूनुमायुमाहुः ॥ नरोयेकेचास्मदाविश्वेत्तेवामऽआस्युः । अग्निंहविषावर्धंतः ॥ कृष्णःश्वेतोरुषोयामोऽअस्यब्रध्नऽऋज्रऽउतशोणोयशस्वान् । हिरण्यरूपंजनिताजजान ॥ एवातेऽअग्नेविमदोमनीषामूर्जोनपादमृतेभिःसजोषाः । गिरऽआवक्षत्सुमतीरियानऽइषमूर्जंसुक्षितिंविश्वमाभाः ॥ ३ ॥ (१०।२५)
आग्निंनस्ववृक्तिभिर्होतारंत्वावृणीमहे । यज्ञायस्तीर्णबर्हिषेविवोमदेशीरंपावकशोचिषंविवक्षसे ॥ त्वामुतेस्वाभुवः

(१०।२४) भद्रमितिदशर्चस्यसूक्तस्यैंद्रोविमदोग्निर्गायत्रीआद्यैकपदाविराट्द्वितीयानुष्टुबंत्येविराट्त्रिष्टुभौ (भद्रंनःप्रभृतिसप्तसूक्तेपुय ऐंद्रोविमदःसप्राजापत्योवैकल्पिकःकिंचवासुक्रोवसुकृद्वा)। (१०।२५) आग्निंनेत्यष्टर्चस्यसूक्तस्यैंद्रोविमदोग्निरास्तारपंक्तिः ।

शुंभंत्यश्वंराधसः । वेतित्वामुपसेचंनीविवोमदऽऋजीतिरग्नऽआहुतिर्विं० ॥ त्वेधर्माणंऽआसतेजुहूभिंःसिंचतीरिंव ।
कृष्णारूपाण्यर्जुनाविवोमदेविश्वाऽअधिश्रियोंधिषेवि० ॥ यमंग्नेमन्यंसेरयिंसहंसावन्नमर्त्य । तमानोवाजंसातयेवि
वोमदेंयज्ञेषुचित्रमाभंरावि० ॥ अग्निर्जातोऽअथर्वणाविदद्विश्वानिकाव्या । भुवद्दूतोविवस्वंतोविवोमदेंप्रियोयमस्यका
म्योवि०॥४॥ त्वांयज्ञेष्वीळतेग्नेप्रयत्यंध्वरे । त्वंवसूनिकाम्याविवोमदेविश्वादधासिदाशुषेवि०॥ त्वांयज्ञेष्वृत्विजंचारु
मग्नेनिषेंदिरे । घृतप्रंतीकंमनुषोविवोमदेंशुक्रंचेतिंष्ठमक्षभिर्विं० ॥ अग्नेशुक्रेणंशोचिषोरुप्रंथयसेबृहत् । अभिक्रंदन्वृषा
यसेविवोमदेगर्भंदधासिजामिषुवि० ॥ ५ ॥ (१०।२।६) कुहंश्रुतऽइंद्रःकस्मिन्नद्यजनेंमित्रोनश्रूयते । ऋषीणां
वायःक्षयेगुहांवाचकृंषेगिरा+ ॥ इहश्रुतऽइंद्रोंऽअस्मेऽअद्यस्तवेंवज्यृचीषमः । मित्रोनयोजनेष्वायशंश्चक्रेऽअसा
म्या+ ॥ महोयस्पतिःशवंसोऽअसाम्यामहोनृम्णस्यंतूतुजिः । भर्तावज्रस्यधृष्णोःपितापुत्रमिंवप्रियं+ ॥ युजानोऽअ
श्वावातस्यधुनीदेवोदेवस्यंवज्रिवः । स्यंतापथाविरुक्मंतासृजानःस्तोष्यध्वंनः ॥ त्वंत्याचिद्वातस्याश्वागाऽऋज्रात्म
नावहंध्यै । ययोर्देवोनमर्त्योयंतानकिर्विदाय्यंः ॥ ६ ॥ अधग्मंतोशनापृच्छतेवांकदर्थानऽआगृहं । आजंग्मथुःपरा
काद्दिवश्चग्मश्चमर्त्यं ॥ आनंऽइंद्रपृक्षसेस्माकंब्रह्मोद्यंतं । तत्त्वांयाचामहेवःशुष्णंयद्धन्नमानुषं ॥ अकर्मादस्युरभि

(१०।२।६) कुहश्रुतइतिपंचदशर्चस्यसूक्तस्यैंद्रोविमदइंद्रः पुरस्ताद्बृहतीपंचमीसप्तमीनवम्योनुष्टुभोंत्यात्रिष्टुप्।

नोऽअमंतुरन्यव्रंतोऽअमांनुषः । त्वंतस्यांमित्रहन्वधर्दासस्यदंभय ॥ त्वंनऽइंद्रशूरशूरैरुतत्वोतांसोबर्हणां । पुरुत्रा
तेविपूर्तयोनवंतक्षोणयोयथा ॥ त्वंतान्वृत्रहत्यैचोदयोनॄन्कार्पाणेशूरवज्रिवः । गुहायदींकवीनांविशांनक्षत्रशवसां
॥ ७ ॥ मक्षूतातंऽइंद्रदानाप्नसऽआक्षाणेशूरवज्रिवः । यद्धशुष्णस्यदंभयोजातंविश्वंसयावभिः ॥ माकुध्र्यगिंद्रशू
रवस्वीरस्मेभूवन्नभिष्टयः । वयंवयंतऽआसांसुम्नेस्यामवज्रिवः ॥ अस्मेतातंऽइंद्रसंतुसत्याहिंसंतीरुपस्पृशः । विद्या
मयासांभुजोधेनूनांनवज्रिवः ॥ अहस्तायदपदीवर्धतक्षाःशचीभिर्वेद्यानां । शुष्णंपरिप्रदक्षिणिद्विश्वायवेनिशिश्नथः ॥
पिबापिबेदिंद्रशूरसोमंमारिषण्योवसवानवसुःसन् । उतत्रायस्वगृणतोमघोनोमहश्चरायोरेवतस्कृधीनः ॥ ८ ॥
(१०।२।७) यजामहऽइंद्रंवज्रंदक्षिणंहरीणांरथ्यं१विव्रतानां । प्रश्मश्रुदोधुवदूर्ध्वथाभूद्विसेनाभिर्दयमानोविरा
धसा ॥ हरीन्वस्ययावनेविदेवस्विंद्रोमघैर्मघवावृत्रहाभुवत् । ऋभुर्वाजऽऋभुक्षाःपत्यतेशवोवक्ष्णामिदासस्यनामचि
त् ॥ यदावज्रंहिरण्यमिदथारथंहरीयमस्यवहतोविसूरिभिः । आतिष्ठतिमघवासनश्रुतऽइंद्रोवाजस्यदीर्घश्रवसस्प
तिः ॥ सोचिन्नुवृष्टिर्यूथ्या३स्वासचाँऽइंद्रःश्मश्रूणिहरिताभिप्रुष्णुते । अववेतिसुक्षयंसुतेमधूदिद्धूनोतिवातोयथाव
नं ॥ योवाचाविवाचोमृध्रवाचःपुरूसहस्राशिवाजघान । तत्तदिदस्यपौंस्यंगृणीमसिपितेवयस्तविषींवावृधेशवः ॥

(१०।२।७) यजामहइतिसप्तर्चस्यसूक्तस्यैंद्रोविमदइंद्रोजगत्याद्यांत्येत्रिष्टुभौपंचम्यभिसारिणी ।

स्तोमंतऽइंद्रविमदाऽअजीजनन्नपूर्व्यंपुरुतमंसुदानवे । विद्माह्यस्यभोजनमिनस्ययदापशुंनगोपाःकरामहे ॥ माकिर्नऽएनासख्यावियौषुस्तवचेंद्रविमदस्यचऽऋषेः । विद्माहितेप्रमतिंदेवजामिवदस्मेतेसंतुसख्याशिवानि ॥ ९ ॥ (१०।२।८) इंद्रसोममिमंपिबमधुमंतंचमूसुतं । अस्मेरयिंनिधारयविवोमदेसहस्रिणंपुरूवसोविवक्षसे ॥ त्वांयज्ञेभिरुक्थैरुपहव्येभिरीमहे । शचीपतेशचीनांविवोमदेश्रेष्ठंनोधेहिवार्यंवि० ॥ यस्पतिर्वार्याणामसिरध्रस्यचोदिता । इंद्रस्तोतॄणामविताविवोमदेद्विषोनःपाह्यंहसोवि० ॥ युवंशक्रामायाविनासमीचीनिरमंथतं । विमदेनयदीळितानासत्यानिरमंथतं ॥ विश्वेदेवाऽअकृपंतसमीच्योर्निष्पतंत्योः । नासत्यावब्रुवन्देवाःपुनरावहतादिति ॥ मधुमन्मेपरायणंमधुमत्पुनरायनं । तानोदेवादेवतयायुवंमधुमतस्कृतं ॥ १० ॥ (१०।२।९) भद्रंनोऽअपिवातयमनोदक्षमुतक्रतुं । अधातेसख्येऽअंधसोविवोमदेरणन्गावोनयवसेविवक्षसे ॥ हृदिस्पृशस्तऽआसतेविश्वेषुसोमधामसु । अधाकामाऽइमेममविवोमदेवितिष्ठंतेवसूयवोवि० ॥ उतव्रतानिसोमतेप्राहंमिनामिपाक्या । अधापितेवसूनवेविवोमदेमृळानोऽअभिचिद्वधाद्वि० ॥ समुप्रयंतिधीतयःसर्गासोवताँऽइव । क्रतुंनःसोमजीवसेविवोमदेधारयाचमसाँऽइव

(१०।२।८) इंद्रसोममितिषळर्चस्यसूक्तस्यैंद्रोविमदइंद्रोंत्यतिसृणामश्विनावास्तारपंक्तिरंत्यास्तिस्रोनुष्टुभः । (१०।२।९) भद्रमित्येकादशर्चस्यसूक्तस्यैंद्रोविमदःसोमआस्तारपंक्तिः ।

वि० ॥ तवत्येसोमशक्तिभिर्निकामासोव्यृण्विरे । गृत्सस्यधीरास्तवसोविवोमदेव्रजंगोमंतमश्विनंविवक्षसे ॥ ११ ॥
पशुंनःसोमरक्षसिपुरुत्राविष्ठितंजगत् । समाकृणोषिजीवसेविवोमदेविश्वासंपश्यन्भुवनावि० ॥ त्वंनःसोमविश्वतो
गोपाऽअदाभ्योभव । सेधराजन्नपस्रिधोविवोमदेमानोदुःशंसऽईशतावि० ॥ त्वंनःसोमसुक्रतुर्वयोधेयायजागृहि ।
क्षेत्रवित्तरोमनुषोविवोमदेद्रुहोनःपाह्यंहसोवि० ॥ त्वंनोवृत्रहंतमेंद्रस्येंदोशिवःसखा । यत्सींहवंतेसमिथेविवोमदेयु
ध्यमानास्तोकसातौ० ॥ अयंघसतुरोमदऽइंद्रस्यवर्धतप्रियः । अयंकक्षीवतोमहोविवोमदेमतिंविप्रस्यवर्धयद्वि० ॥
अयंविप्रायदाशुषेवाजाँऽइयर्तिगोमतः । अयंसप्तभ्यऽआवरंविवोमदेप्रांधंश्रोणंचतारिषद्वि० ॥१२॥ (१०।२।१०)
प्रह्यच्छामनीषाःस्पार्हायंतिनियुतः । प्रदस्रानियुद्रथःपूषाऽअविष्टुमाहिनः ॥ यस्यत्यन्महित्वंवाताप्यमयंजनः ।
विप्रऽआवंसद्धीतिभिश्चिकेतसुष्टुतीनां ॥ सवेदसुष्टुतीनामिंदुर्नपूषावृषा । अभिप्सुरःप्रुषायतिव्रजंनऽआप्रुषायति ॥
मंसीमहित्वावयमस्माकंदेवपूषन् । मतीनांचसाधनंविप्राणांचाधवं+ ॥ प्रत्यर्धिर्यज्ञानामश्वहयोरथानां । ऋषिःस
योमनुर्हितोविप्रस्ययावयत्सखः+ ॥ १३ ॥ आधीषमाणायाःपतिःशुचायाश्चशुचस्यच । वासोवायोवीनामावासां
सिमर्मृजत् ॥ इनोवाजानांपतिरिनःपुष्टीनांसखा । प्रश्मश्रुंहर्यतोदूधोद्विवृथायोऽअदाभ्यः ॥ आतेरथस्यपूषन्नजा

(१०।२।१०) प्रह्यच्छेतिनवर्चस्यसूक्तस्यैंद्रोविमदःपूषानुष्टुप्आद्याचतुर्थ्यावुष्णिहौ ।

धुरं॑ववृत्युः । विश्वं॑स्या॒र्थिन॒ःसखा॑सनो॒जाऽअन॑पच्युतः ॥ अ॒स्माकं॑मू॒र्जा॑रथं॑पू॒षाऽअं॑विष्टु॒माहिं॑नः । भुव॒द्वाजा॑नांवृ॒ध
ऽइ॒मंनं॑ःशृणव॒द्धवं॑ ॥ १४ ॥ (१०।२।११) अस॒त्सुमें॑जरित॒ःसाभि॑वे॒गोयत्सुं॑न्व॒तेयजं॑माना॒यशिक्षं॑ । अना॑शीर्दा॒म्
हमं॑स्मिप्रहं॒तासत्य॒ध्वृतं॑वृजिना॒यंतंमा॒भुं+ ॥ यदीद॒हंयु॒धये॑सं॒नया॒न्यदे॑वयून्त॒न्वा॒३शूशुं॑जानान् । अ॒मा॒ते॒तुम्रं॑वृष॒भंपं
चानितीव्रंसु॒तंपं॑चद॒शंनिषिं॑चं ॥ नाहंतंवे॑द॒यऽइति॒ब्रवी॒त्यदे॑वयून्त्स॒मरं॑णेजघ॒न्वान् । य॒दावाख्यं॑त्स॒मरं॑ण॒मृघा॑व॒दादि
द्धमे॑वृष॒भाप्रब्रुवंति ॥ यदज्ञा॑तेषुवृ॒जने॒ष्वासं॒विश्वे॑स॒तोम॒घवा॑नोमऽआसन् । जि॒नामि॒वेत्क्षेम॒ऽआसंतंमा॒भुंप्रतं॑क्षिणा॒ं
पर्वं॑तेपाद॒गृह्यं ॥ नवाऽउ॒मांवृजने॑वारयंते॒नपर्व॑तासो॒यद॒हंम॑न॒स्ये । मम॑स्व॒नात्कृंधु॒कर्णो॑भयातऽए॒वेदनु॒द्यून्कि॒रण॒ःस
मे॑जात् ॥ १५ ॥ दर्श॒न्न्वत्र॑शृत॒पाँऽअनि॒न्द्रान्बा॑हुक्षद॒ःशर॑वे॒पत्यं॑मानान् । घृषुं॑वा॒योनिं॑नि॒दुःसखा॑यु॒मध्यू॒न्वैषुप॒वयो॑व
वृत्युः ॥ अभूर्वौ॑क्षी॒र्व्युं॒१आयुं॑रान॒ड्दर्ष॒न्नुपूर्वो॒ऽअप॑रो॒नुदर्षत् । द्वे॒प॒वस्ते॒परि॒तंनभूत॒योयोऽअ॒स्यपा॒रेरजं॑सोवि॒वेषं ॥ गा
वो॒यव॒ंप्रयु॑ताऽअ॒र्योऽअक्ष॒न्ताऽअ॑पश्यंस॒हगो॑पा॒श्चरं॑तीः । हवा॒ऽइद॒र्योऽअ॒भित॒ःसमा॑यु॒न्कियं॑दासु॒स्वप॑तिश्छंदयाते ॥
संयद्व॑यं॑यव॒सादो॒जना॑नाम॒हंय॒वाद॑ऽउ॒र्वज्रे॑ऽअ॒न्तः । अत्रा॑यु॒क्तो॑व॒सातार॑मिच्छादथो॒ऽअयु॑क्तंयुनजद्व॒वन्वान्+ ॥ अत्रे
दु॑मे॒मंससे॒सत्यमु॒क्तंद्वि॒पाच्च॒यच्चतु॑ष्पात्संसृ॒जानि॑ । स्त्रीभि॒र्यो॑ऽअत्र॒वृष॑णंपृत॒न्यादयु॑द्धोऽअस्य॒विभ॑जानि॒वेदः॑ ॥ १६ ॥

(१०।२।११) असत्स्वितिचतुर्विंशत्यृचस्यसूक्तस्यैन्द्रोबसुक्रइन्द्रस्त्रिष्टुप् ।

यस्यां॑न॒क्षादु॑हि॒ताजात्वास॒कस्तां॑वि॒द्वाँऽअ॒भिम॑न्यातेऽअ॒धां । क॒त॒रोमे॒निंप्रति॒तंमु॑चाते॒यऽईं॒वहा॑ते॒यऽईं॑वावरे॒यात्॑ ॥
कियं॑ती॒योषा॑मर्य॒तोवं॑धूयोः॒परिं॑प्रीता॒पन्यं॑सा॒वार्यें॑ण । भ॒द्राव॒धूर्भ॑वति॒यत्सु॒पेशाः॑स्व॒यंसामि॒त्रंव॑नुते॒जने॑चित् ॥ प॒त्तोजं॑
गारप्र॒त्यंचं॑मत्तिशी॒र्ष्णा॑शिर॒ःप्रति॑दधौ॒वरू॑थं । आसी॑नऽऊ॒र्ध्वामु॒पसि॑क्षिणाति॒न्यं॑ङ्ङुत्ता॒नामन्वे॑ति॒भूमिं॑ ॥ बृ॒हन्नं॑च्छा॒
योऽअ॑पला॒शोऽअर्वा॑त॒स्थौ॑मा॒ताविषि॑तोऽअत्ति॒गर्भः॑ । अ॒न्यस्या॑व॒त्संरि॑ह॒तीमि॑माय॒कया॑भु॒वानिद॑धे॒धे॒नुरूधः॑ ॥ स॒प्त
वी॒रासो॑ऽअध॒रादुदा॑यन्न॒ष्टोत्त॒रात्ता॒त्सम॑जग्मिर॒न्ते । नव॑प॒श्चाता॑त्स्थिवि॒मंत॑ऽआय॒न्दश॒प्राक्सानु॒विति॑र॒न्त्यश्नः॑ ॥१७॥
द॒शा॒नामेकं॑कपि॒लंस॑मा॒नंतंहि॑न्वंति॒क्रत॑वे॒पार्या॑य । गर्भं॑मा॒तासुधि॑तंव॒क्षणा॒स्ववे॑नंतं॒तु॒षयं॑तीबिभर्ति ॥ पीवा॑नंमे॒षम॑प
चंत॒वी॒रान्यु॑प्ताऽअ॒क्षाऽअनु॑दी॒वऽआ॑सन् । द्वाधनुं॑बृह॒तीम॒प्स्वं॑१॒तःप॒वित्र॑वंताचरतःपु॒नंता॑ ॥ विक्रो॑श॒ना॒सो॒विष्वं॑च
ऽआय॒न्पचा॑ति॒नेमो॒नहिप॒क्षद॒र्धः । अ॒यंमे॑दे॒वःस॑वि॒तातदा॑ह॒द्र्व॑न्न॒ऽइद्व॑नवत्स॒र्पिर॑न्नः ॥ अप॑श्यंग्राम॒ंवह॑मानमा॒राद॑च॒
क्रया॑स्व॒धया॑वर्त॑मानं । सिष॑क्त्य॒र्यःप्रयु॒गाजना॑नांस॒द्यःशि॒श्नाप्र॑मिना॒नोनवी॑यान् ॥ ए॒तौमे॒गावौ॑प्रम॒रस्य॑यु॒क्तौमोषुप्र
सेधी॒र्मुहु॒रिन्म॑मंधि । आप॑श्चिदस्य॒विन॑शं॒त्यर्थं॒सूर॑श्चम॒र्कऽउप॑रोबभू॒वान्॑ ॥ १८ ॥ अ॒यंयोवज्रः॑पुरु॒धाविवृ॑त्तो॒वःसूर्य॑
स्यबृह॒तःपुरी॑षात् । श्रव॒ऽइदे॒नापरो॒ऽअ॒न्यद॑स्ति॒तद॑व्य॒थीज॑रि॒माण॑स्तरंति ॥ वृ॒क्षेवृ॑क्षे॒नियं॑तामीमय॒द्गौस्तत॒ोवयः॒प्रप॑
तान्पू॑रु॒षादः॑ । अथे॒दंविश्वं॒भुव॑नंभयात॒ऽइंद्रा॑यसु॒न्वदृष॑ये॒चशिक्ष॑त् ॥ दे॒वाना॒म्माने॑प्रथ॒माऽअ॑तिष्ठन्कृं॒तत्रा॑दे॒षामुप॑रा॒

ऽउदा॑यन् । त्रयं॑स्तपं॑तिपृथि॒वीमं॑नू॒पाद्वाबृबू॑कंवह॒तःपुरी॑षं ॥ सातें॑जी॒वातु॑रु॒ततस्यं॑वि॒द्धिमा॑स्मैता॒दृगप॑गूहःसम॒र्यें । आ॒विःस्वं॑ःकृणु॒तेगूहं॑तेबु॒संसपा॒दुरं॑स्यनि॒र्णिजो॒नमुं॑च्यते ॥ १९ ॥ (१०।२।१२) विश्वो॒ह्य॑१॒न्योऽअ॒रिरा॑ज॒गाम॒ममे दह॒श्वशु॑रो॒नाजं॑गाम । ज॒क्षी॒याद्धाना॑ऽउ॒तसोमं॑पपी॒यात्स्वा॑शित॒ःपुन॒रस्तं॑जगायात् ॥ सरो॑रुवद्वृष॒भस्ति॒ग्मशृं॑गो॒वर्ष्मं॑न्तस्थौ॒वरिं॑म॒न्नापृ॑थि॒व्याः । विश्वें॑ष्वेनंवृ॒जनें॑षुपामि॒योमें॑कु॒क्षीसु॒तसोमं॑ःपृणाति ॥ अद्रिं॑णातेम॒न्दिनं॑ऽइंद्र॒तूयान्त्सु॒न्वंति॒सोमा॒न्पिबं॑सि॒त्वमें॑षां । पचं॑तितेवृष॒भाँऽअत्सि॒तेषां॑पृ॒क्षेण॒यन्मं॑घवन्हू॒यमा॑नः ॥ इ॒दंसुमें॑जरित॒राचिं॑किद्धिप्रती॒पंशापं॑न॒द्यौवहं॑ति । लो॒पा॒शःसिं॒हंप्र॒त्यंचं॑मत्साःक्रो॒ष्टावं॑रा॒हंनिरं॑तक्त॒कक्षां॑त् ॥ कु॒थातं॑ऽए॒तद॒हमाचिं॑के॒तंगृत्सं॑स्य॒पाकं॑स्त॒वसोमनी॒षां । त्वंनो॑वि॒द्वाँऽऋ॑तु॒थाविवो॑चो॒यमर्धं॑तेमघवन्क्षे॒म्याधूः+ ॥ ए॒वाहिमां॑त॒वसं॑व॒र्धयं॑तिदि॒वश्चिं॑न्मेबृह॒तऽउत्तं॑रा॒धूः । पु॒रू॒स॒ह॒स्रानिशिं॑शामि॒साकं॑म॒शत्रुं॒हिमा॒जनिं॑ताज॒जानं॑ ॥२०॥ ए॒वाहिमां॑त॒वसं॑ज॒ज्ञुरु॒ग्रंकमं॑न्कर्म॒न्वृष॑णामिंद्रदे॒वाः । वधीं॑वृत्रंवज्रे॑णमंदसा॒नोप॑व्र॒जंमं॑हि॒नादा॒शुषे॑वं ॥ दे॒वासं॑ऽआयन्पर॒शूँर॑बिभ्र॒न्वना॑वृ॒श्चंतो॑ऽअ॒भिवि॒ड्भिरा॑यन् । निसु॒द्र्वं१॒

(१०।२।१२) विश्वोहीतिद्वादशर्चस्यसूक्तस्यआद्यायाइंद्रस्नुषाऋषिकाद्वितीयादिचतुर्थीवर्जानांयुजामिंद्रऋषिःचतुर्थीसहितानामयुजां वसुक्रऋषिःचतुर्थीवर्ज्यानांयुजांवसुक्रोदेवताशिष्टानामिंद्रस्त्रिष्टुप् (अत्रसूक्तेप्रथमार्चिइंद्रस्नुषार्षत्वेविकल्पंशौनकोमन्यतेतत्पक्षेतत्रवसुक्रोविज्ञेयः) ।

दधतोवक्षणासुयत्राकृपीटमनुतद्दहंति ॥ शशःक्षुरंप्रत्यंचंजगाराद्रिंलोगेनव्यभेदमारात् । बृहंतंचिदृहतेरंधयानिव
यद्वत्सोवृषभंशूशुवानः ॥ सुपर्णऽइत्थानखमासिषायावरुद्धःपरिपदंनसिंहः । निरुद्धश्चिन्महिषस्तर्ष्यावान्गोधात
स्माऽअयथंकर्षदेतत्+ ॥ तेभ्योगोधाऽअयथंकर्षदेतद्येब्रह्मणःप्रतिपीयंत्यन्नैः । सिमऽउक्ष्णोवसृष्टाँऽअदंतिस्वयंबला
नितन्वःशृणानाः+ ॥ एतेशमीभिःसुशमीऽअभूवन्येहिन्विरेतन्व१ःसोमऽउक्थैः । नृवद्वदन्नुपनोमाहिवाजान्दि
विश्रवोदधिषेनामवीरः+ ॥ २१ ॥ (१०।२।१३) वनेनवायोन्यधायिचाकन्छुचिर्वांस्तोमोभुरणावजीगः । यस्ये
दिंद्रःपुरुदिनेषुहोतानृणांनर्योनृतमःक्षपावान् ॥ प्रतेऽअस्याऽउषसःप्रापरस्यानृतौस्यामनृतमस्यनृणां । अनुत्रिशो
कःशतमावहन्नॄन्कुत्सेनरथोयोऽअसत्ससवान्+ ॥ कस्तेमदऽइंद्ररंत्योभूद्दुरोगिरोऽअभ्यु१ग्रोविधाव । कद्वाहोऽअ
र्वागुपमामनीषाऽआत्वांशक्यामुपमंराधोऽअन्नैः ॥ कदुद्युम्नमिंद्रत्वावतोनॄन्कयाधियाकरसेकन्नऽआगन् । मित्रोन
सत्यऽउरुगायभृत्याऽअन्नैसमस्ययदसन्मनीषाः+ ॥ प्रेरयसूरोऽअर्थंनपारंयेऽअस्यकामंजनिधाऽइवग्मन् । गिरश्चये
तेतुविजातपूर्वीर्नरऽइंद्रंप्रतिशिक्षंत्यन्नैः ॥ २२ ॥ मात्रेनुतेसुमितेऽइंद्रपूर्वीद्यौर्मज्मनापृथिवीकाव्येन । वरायतेघृ
तवंतःसुतासःस्वाद्मन्भवंतुपीतयेमधूनि ॥ आमध्वोऽअस्माऽअसिचन्नमत्रमिंद्रायपूर्णंसहिसत्यराधाः । सवावृधेव

(१०।२।१३) वनेनेत्यष्टर्चस्यसूक्तस्यैंद्रोवसुक्रइंद्रस्त्रिष्टुप् ।

रिंम॒न्नापृ॑थि॒व्याऽअ॒भिक्रत्वा॒नर्यः॒पौंस्यै॑श्च ॥ व्यां॑ना॒ळिंद्रः॒पृत॑नाः॒स्वोजा॒ऽआस्मै॑यतंते॑स॒ख्याय॑पू॒र्वीः । आस्मा॒रथं॒नपृत॑
नासुति॑ष्ठ॒यंभ॒द्रया॑सुम॒त्याचो॒दया॑से ॥ २३ ॥ (१०।३।१) प्रदे॑व॒त्राब्रह्म॑णेगा॒तुरे॑त्व॒पोऽअच्छा॒मन॑सो॒नप्रयु॑क्ति ।
म॒हीमि॒त्रस्य॒वरु॑णस्य॒धासिं॑पृथु॒ज्रयं॑सेरीरधासुवृ॒क्तिं+ ॥ अध्व॑र्यवोह॒विष्मं॑तो॒हिभू॒ताच्छा॒पऽइ॑तोश॒तीरु॑शंतः । अव॒या
श्चष्टे॑ऽअरु॒णःसु॑प॒र्णस्तमास्यं॑ध्वमू॒र्मिम॒द्यासु॑हस्ताः ॥ अध्व॑र्यवो॒पऽइ॑तासमु॒द्रम॒पांनपा॑तंह॒विषा॑यजध्वं । सवो॑ददू॒र्मिम॒
द्यासु॑पू॒तंत॒स्मैसोम॒ंमधु॑मंतंसुनोत ॥ योऽअ॑नि॒ध्मोदीद॑यद॒प्स्वं१॒तर्यंविप्रा॑स॒ऽईळ॑तेऽअध्व॒रेषु॑ । अपां॑नपा॒न्मधु॑मतीर॒पो
दा॒याभि॒रिंद्रो॑वावृ॒धेवी॒र्या॑य ॥ याभि॒ःसोमो॒मोद॑ते॒हर्ष॑तेचकल्या॒णीभि॑र्युव॒तिभि॒र्नमर्यः॑ । ताऽअ॑ध्वर्योऽअ॒पोऽअच्छा॒
परे॑हि॒यदा॑सि॒ंचाऽओष॑धीभिःपुनीतात् ॥ २४ ॥ ए॒वेद्यूने॑युव॒तयो॑नमंत॒यदी॑मु॒शन्नु॑श॒तीरेत्यच्छ॑ । संजा॑नते॒मन॑सा॒सं
चि॑कित्रेध्व॒र्यवो॑धि॒षणाप॑श्चदे॒वीः+ ॥ योवो॑वृ॒ताभ्यो॒ऽअकृ॑णोदु॒लोकंयोवो॑म॒ह्याऽअ॒भिश॑स्ते॒रमुं॑चत् । तस्मा॒ऽइंद्रा॑य॒म
धु॑मंतमू॒र्मिंदे॑व॒माद॑नं॒प्रहिं॑णोतनापः ॥ प्रास्मै॑हिनोत॒मधु॑मंतमू॒र्मिंगर्भो॒योवः॑सिंधवो॒मध्व॒ऽउत्सः॑ । घृ॒तपृ॑ष्ठ॒मीड्य॑मध्व॒रे
ष्वापो॑रेवतीःशृणु॒ताहवं॑मे ॥ तंसिं॑धवोमत्स॒रमिं॑द्र॒पान॑मू॒र्मिंप्रहे॑त॒यऽउ॒भेऽइय॑र्ति । म॒द॒च्युत॑मौ॒शानं॑नभो॒जांपरि॑त्रि॒तंतुं॑
वि॒चरं॑त॒मुत्सं॑ ॥ आ॒वर्वृ॑तती॒रध॒नुद्वि॒धारा॒गोषु॒युधो॒ननि॒यवं॒चरं॑तीः । ऋषे॒जनि॒त्री॒र्भुव॑नस्य॒पत्नी॑र॒पोवं॑दस्वस॒वृध॒ःसयो॑

तृतीयेनुवाकेत्रयोदशसूक्तानि (१०।३।१) प्रदेवत्रेतिपंचदशर्चस्यसूक्तस्यैलूषःकवषआपस्त्रिष्टुप् ।

नीः ॥ २५ ॥ हि॒नोता॑नोऽअध्व॒रंदे॑वय॒ज्या॑हि॒नोत॒ब्रह्म॑स॒नये॒धना॑नां । ऋ॒तस्य॒योगे॒विष्य॑ध्व॒मूधः॑श्रु॒ष्टीवरी॑र्भूतना॒स्म
भ्यं॑मापः ॥ आपो॑रेवतीः॒क्षय॑था॒हिवस्वः॒क्रतुं॑चभ॒द्रंबि॑भृ॒थामृतं॑च । रा॒यश्च॒स्थःस्व॑प॒त्यस्य॒पत्नीः॒सर॑स्वती॒तद्गृ॑ण॒तेवयो॑धा
त् ॥ प्रति॒यदापो॒ऽअदृ॑श्रमाय॒तीर्घृ॒तंपयां॑सि॒बिभ्र॑ती॒र्मधू॑नि । अ॒ध्व॒र्युभि॒र्मन॑सासंवि॒दानाऽइंद्रा॑य॒सोमं॒सुषु॑तं॒भरं॑तीः ॥
एमाऽअ॑ग्मन्रे॒वती॑र्जी॒वध॑न्या॒ऽअध्व॑र्यवः॒सादय॑तासखायः । निब॒र्हिषि॑धत्तनसोम्या॒सोपांन॑प्त्रासंवि॒दानास॑ऽएनाः ॥
आग्म॒न्नाप॑ऽउश॒तीर्ब॒र्हिरेदं॒न्य॑ध्व॒रेऽअ॑सदन्दे॒वयं॑तीः । अध्व॑र्यवःसुनु॒तेंद्रा॑य॒सोम॒मभू॑दुवः॒सुश॑का॑देवय॒ज्या॑ ॥ २६ ॥
(१०।३।२) आनो॑दे॒वाना॒मुप॑वेतु॒शंसो॒विश्वे॑भिस्तु॒रैरव॑से॒यज॑त्रः । तेभि॑र्व॒यंसु॑ष॒खायो॑भवेम॒तरं॑तो॒विश्वा॑दुरि॒तास्या॑
म ॥ परिं॑चि॒न्मर्तो॒द्रवि॑णंममन्याद्ऋ॒तस्य॑प॒थानम॒सावि॑वासेत् । उ॒तस्वेन॒क्रतु॑ना॒संव॑देत॒श्रेयां॑सं॒दक्षं॒मन॑साजगृभ्यात् ॥
अधा॑यिधी॒तिरस॑सृग्र॒मंशा॑स्ती॒र्थेनद॒स्ममुप॑य॒न्त्यूमाः॑ । अ॒भ्यान॑श्मसुवि॒तस्य॑शूषंनवे॑दसोऽअ॒मृता॑नामभूम ॥ नित्य॑श्चा
कन्या॒त्स्वप॑ति॒र्दमू॑ना॒यस्मा॑ऽउदे॒वःस॑वि॒ताज॒जान॑ । भगो॑वा॒गोभि॑रर्य॒मेम॑नज्या॒त्सोऽअ॑स्मै॒चारु॑श्छदयदु॒तस्या॑त् ॥ इ॒यं
साभू॑याऽउ॒षसा॑मिव॒क्षायद्ध॑क्षु॒मन्त॒ःशव॑सास॒माय॑न् । अ॒स्यस्तु॒तिंज॑रि॒तुर्भिक्ष॑माणा॒ऽआनः॑श॒ग्मास॒ऽउप॑यंतु॒वाजाः॑
॥ २७ ॥ अ॒स्येदे॒षासु॑म॒तिःप॑प्रथा॒नाभ॑वत्पू॒र्व्याभूम॑ना॒गौः । अ॒स्यसनी॑ळा॒ऽअसु॑रस्य॒योनौ॑समा॒नऽआभर॑णे॒बिभ्र॑मा

(१०।३।२)आनोदेवानामित्येकादशर्चस्यसूक्तस्यैलूषःकवषोविश्वेदेवास्त्रिष्टुप्(भेदपक्षे–विश्वेदेवाः९अश्वत्थगर्भाशमी१उषोग्नी१एवं११)।

णाः ॥ किंस्विद्वनंकऽउसवृक्षऽआसयतोद्यावापृथिवीनिंष्टतक्षुः । संतस्थानेऽअजरेंऽइतऽऊतीऽअहानिपूर्वीरुषसोंज
रंत ॥ नैतावदेनापरोऽअन्यदंस्त्युक्षासद्यावापृथिवीबिंभर्ति । त्वचंपवित्रंकृणुतस्वधावान्यदींसूर्यंनहरितोवहंति ॥
स्तेगोनक्षामत्यैतिपृथ्वींमिहंनवातोविहंवातिभूमं । मित्रोयत्रवरुणोऽअज्यमानोग्निर्वनेनव्यसृंष्टशोकं ॥ स्तरीर्यत्सूतं
सद्योऽअज्यमानाव्यथिरव्यथीःकृणुतस्वगोपा । पुत्रोयत्पूर्वःपित्रोर्जनिंष्टशम्यांगौर्जगारयद्धंपृच्छान्[+] ॥ उतकण्वंनृ
षदंःपुत्रमाहुरुतश्यावोधनमादंत्तवाजी । प्रकृष्णायरुशंदपिन्वतोधंर्ऋतमत्रनकिरस्माऽअपीपेत् ॥२८॥ (१०।३।२)
प्रसुग्मंताधियसानस्यंसक्षणिंवरेभिर्वराँऽअभिषुप्रसीदंतः । अस्माकमिंद्रंऽउभयंजुजोषतियत्सोम्यस्यांधसोबुबोंधति ॥
वींद्रयासिदिव्यानिंरोचनाविपार्थिंवानिरजंसापुरुष्टुत । येत्वावहंतिमुहुरध्वराँऽउपतेसुवंन्वंतुवग्वनाँऽअराधसंः ॥
तदिन्मेंच्छन्त्सद्वपुंषोवपुंष्टरंपुत्रोयज्जानंपित्रोरधीयंति । जायापतिंवहतिवग्नुनासुमत्पुंसऽइद्भद्रोवंहतुःपरिंष्कृतः ॥
तदित्सधस्थंमभिचारुंदीधययगावोयच्छासंन्वहतुंनधेनवंः । मातायन्मंतुर्यूथस्यंपूर्व्याभिवाणस्यंसप्तधांतुरिज्जनंः ॥
प्रवोच्छारिरिचेदेवयुष्पदमेकोरुद्रेभिर्यातितुर्वणिंः । जरावायेष्वमृतेंषुदावनेपरिंवऽऊमैभ्यःसिंचतामधुं ॥ २९ ॥
निधीयमानमपंगूह्ळमप्सुप्रमेंदेवानांव्रतपाऽउवाच । इंद्रोविद्वाँऽअनुहित्वाचचक्षतेनाहमंग्नेऽअनुंशिष्टऽआगां ॥ अ

(१०।३।२) प्रसुग्मंतेतिनवर्चस्यसूक्तस्यैलूषःकवषइंद्रोजगतीअंत्याश्चतस्रस्त्रिष्टुभः ।

क्षेत्रवित्क्षेत्रविदंह्यप्राट्सप्रैतिंक्षेत्रविदानुशिष्टः। एतद्वैभद्रमनुशासनस्योतस्तुतिंविंदत्यंजसीनां॥ अद्येदुप्राणीदमंमन्निमाहापींवृतोऽअधयन्मातुरूधंः। एमैंनमापजरिमायुवांनमहेंळन्वसुंःसुमनांबभूव ॥ एतानिंभद्राकंलशक्रियामकुरुंश्रवणददंतोमघानिं। दानऽइद्वोंमघवानःसोऽअंस्त्वयंचसोमोंहृदियंबिभर्मि॥३०॥इतिसप्तमाष्टकेसप्तमोध्यायः ॥७॥

पंचपंचाशाध्यायेवर्गाः ३० सूक्तानि १४ ऋचः १५३॥ त्यागः॥ अग्न्योग्नीषोमाभ्या. अग्न्य. ७ अग्नय. १८ इंद्राये. २५ अश्विभ्या. ३ सोमाये. ११ पूष्ण. ९ इंद्राये. २५ वसुक्राये. इंद्राये. ३ वसुक्राये. इंद्राये. वसुक्राये. इंद्राये. वसुक्राये. इंद्राये. वसुक्राये. इंद्राये. ८ अपांनप्त्र. १५ विश्वेभ्योदेवेभ्य. ९ अश्वत्थगर्भायैशम्याइ. उषसेग्नय. इंद्राये. ९ ॥ इतिसप्तमेसप्तमः ॥

प्रमाद्यावैश्वदेव्यैंद्रःप्रगार्थःपरागायत्र्योंद्वेकुरुश्रवणस्यत्रासदस्यवस्यदानस्तुतिंःपराभिर्मृतेमित्रातिथौराज्ञितत्स्नेहाद्दषिरुपमश्रवसंपुत्रमस्यव्यशोकयंत्प्रावेपाःषळूनांमौजवान्वाक्षौक्षकृषिप्रशंसाचांक्षकितवनिंदाचंसप्तमीजगत्यंबुध्रंलुशोधानाकोवैश्वदेवंतुंद्विंत्रिष्टुबंतंतूषासानक्तांनमोद्वादशसौर्योंभितपाःसौर्यंजागतंवैत्रिष्टुब्दशम्यस्मिन्नःपंचमुष्कवानिंद्रौंयोवांषळूनाकाक्षीवतींघोषाश्विनंहित्रिष्टुबंतंरथंयांतंसमानंतृचंसुहस्त्योघौषेयोंस्तेवैकादशकृष्णोंच्छामेद्विंत्रिष्टुबंतंत्वायातुत्रित्रिष्टुबादिंदिवस्परिद्वादशंवत्सप्रिराग्नेयंतु ॥ ८ ॥

॥ हरिःओम् ॥ (१०।३४) प्रमायुयुज्रेप्रयुजोजनानांवहामिस्मपूषणमंतरेण । विश्वेदेवासोऽअधमामरक्षन्दुःशासुरागादितिघोषऽआसीत् ॥ संमातपंत्यभितःसपत्नीरिवपर्शवः । निबाधतेऽअमतिर्नग्नताजसुर्वेर्नवेवीयतेमतिः+ ॥ मूषोनशिश्नाव्यदंतिमाध्यःस्तोतारंतेशतक्रतो । सकृत्सुनोमघवन्निंद्रमृळयाधापितेवनोभव ॥ कुरुश्रवणमावृणिराजानंत्रासदस्यवं । मंहिष्ठंवाघतामृषिः ॥ यस्यमाहरितोरथेतिस्रोवहंतिसाधुया । स्तवैसहस्रदक्षिणे ॥ १ ॥ यस्यप्रस्वादसोगिरऽउपमश्रवसःपितुः । क्षेत्रंनरण्वमूचुषे ॥ अधिपुत्रोपमश्रवोनपान्मित्रातिथेरिहि । पितुष्टेऽअस्मिवंदिता+ ॥ यदीशीयामृतानामुतवामर्त्यानां । जीवेदिन्मघवाममं ॥ नदेवानामतिव्रतंशतात्माचनजीवति । तथायुजाविवावृते ॥ २ ॥ (१०।३५) प्रावेपामाबृहतोमादयंतिप्रवातेजाऽइरिणेवर्वृतानाः । सोमस्येवमौजवतस्यभक्षोविभीदकोजागृविर्मह्यमच्छान् ॥ नमामिमेथनजिहीळऽएषाशिवासखिभ्यऽउतमह्यमासीत् । अक्षस्याहमेकपरस्यहेतोरनुव्रतामपजायामरोधं ॥ द्वेष्टिश्वश्रूरपजायारुणद्धिननाथितोविंदतेमर्डितारं । अश्वस्येवजरतोवस्न्यस्यनाहं

(१०।३४) प्रमायुयुज्रइतिनवर्चस्यसूक्तस्यैलूषःकवषऋषिःआद्यायाविश्वेदेवाःततोद्वयोरिंद्रःचतुर्थीपंचम्योःकुरुश्रवणःषष्ठ्यादिचतसृणामुपश्रवा आद्यात्रिष्टुप्द्वितीयाबृहतीतृतीयासतोबृहतीशेषाःषड्गायत्र्यः । (१०।३५) प्रावेपाइतिचतुर्दशर्चस्यसूक्तस्यमौजवानक्षऋषिःआद्यासप्तमीनवमीद्वादशीनामक्षादेवताःत्रयोदश्याःकृषिःशिष्टानामक्षनिंदादेवतात्रिष्टुप्सप्तमीजगती ।

विंदामिकितवस्यभोगं ॥ अन्येजायांपरिमृशंत्यस्ययस्यागृधद्वेदनेवाज्य१क्षः । पितामाताभ्रातरऽएनमाहुर्नजानी
मोनयताबद्धमेतं+ ॥ यदादीध्येनदविषाण्येभिःपरायद्भ्योवहीयेसखिभ्यः । न्युप्ताश्चबभ्रवोवाचमक्रतँऽएमीदेषांनि
ष्कृतंजारिणीव ॥ ३ ॥ सभामेतिकितवःपृच्छमानोजेष्यामीतितन्वा३शूशुजानः । अक्षासोऽअस्यवितिरंतिकामंप्र
तिदीन्नेदधतऽआकृतानि ॥ अक्षासऽइदंकुशिनोनितोदिनोनिकृत्वानस्तपनास्तापयिष्णवः । कुमारदेष्णाजयतःपुन
र्हणोमध्वासंपृक्ताःकितवस्यबर्हणा ॥ त्रिपंचाशःक्रीळतिव्रातऽएषांदेवऽइवसवितासत्यधर्मा । उग्रस्यचिन्मन्यवेनान
मंतेराजाचिदेभ्योनमऽइत्कृणोति ॥ नीचावर्ततऽउपरिस्फुरंत्यहस्तासोहस्तवंतंसहंते । दिव्याऽअंगाराऽइरिणेन्यु
प्ताःशीताःसंतोहृदयंनिर्दहंति ॥ जायातप्यतेकितवस्यहीनामातापुत्रस्यचरतःक्वस्वित् । ऋणावाबिभ्यद्धनमिच्छमा
नोन्येषामस्तमुपनक्तमेति ॥ ४ ॥ स्त्रियंदृष्ट्वायकितवंततापान्येषांजायांसुकृतंचयोनिं । पूर्वाह्णेऽअश्वान्युयुजेहिबभ्रू
न्त्सोऽअग्नेरंतेवृषलःपपाद ॥ योवःसेनानीर्महतोगणस्यराजाव्रातस्यप्रथमोबभूव । तस्मैकृणोमिनधनारुणध्मिदशा
हंप्राचीस्तदृतंवदामि ॥ अक्षैर्मादीव्यःकृषिमित्कृषस्ववित्तेरमस्वबहुमन्यमानः । तत्रगावःकितवतत्रजायातन्मेविच
ष्टेसवितायमर्यः+ ॥ मित्रंकृणुध्वंखलुमृळतानोमानोघोरेणचरताभिधृष्णु । निवोनुमन्युर्विशतामरातिरन्योबभ्रू ॥४९॥

णांप्रसितौन्वंस्तु ॥ ५ ॥ (१०।३।६) अबुध्रमुत्यऽइंद्रवंतोऽअग्नयोज्योतिर्भरंतऽउषसोव्युष्टिषु । महीद्यावापृथिवीचेततामपोद्यादेवानामवऽआवृणीमहे ॥ दिवस्पृथिव्योरवऽआवृणीमहेमातृन्त्सिधून्पर्वतान्छर्यणावतः । अनागास्त्वंसूर्यमुषासमीमहेभद्रंसोमःसुवानोऽअद्याकृणोतुनः ॥ द्यावानोऽअद्यपृथिवीऽअनागसोमहीत्रायेतांसुवितायमातरा । उषाऽउच्छंत्यपबाधतामघंस्वस्त्य१ग्निंसमिधानमीमहे ॥ इयंनऽउस्राप्रथमासुदेव्यंरेवत्सनिभ्योरेवतीव्युच्छतु ॥ आरेमन्युंदुर्विदत्रस्यधीमहिस्वस्त्य१ग्निं० ॥ प्रयाःसिस्रतेसूर्यस्यरश्मिभिर्ज्योतिर्भरंतीरुषसोव्युष्टिषु । भद्रानोऽअद्यश्रवसेव्युच्छतस्वस्त्य१ग्निं० ॥ ६ ॥ अनमीवाऽउषसऽआचरंतुनऽउदग्नयोजिहतांज्योतिषाबृहत् । आयुक्षातामश्विनातूतुजिरथंस्वस्त्य१ग्निं० ॥ श्रेष्ठंनोऽअद्यसवितर्वरेण्यंभागमासुवसहिरत्नधाऽअसि । रायोजनित्रींधिषणामुपब्रुवेस्वस्त्य१ग्निं० ॥ पिपर्तुमातदृतस्यप्रवाचनंदेवानांयन्मनुष्या३ अमन्महि । विश्वाऽइदुस्राःस्पळुदेतिसूर्यःस्वस्त्य१ग्निं० ॥ अद्वेषोऽअद्यबर्हिषःस्तरीमणिग्राव्णांयोगेमन्मनःसाधऽईमहे । आदित्यानांशर्मणिस्थाभुरण्यसिस्वस्त्य१ग्निं०॥ आनोबर्हिःसधमादेबृहद्दिविदेवाँऽईळेसादयासप्तहोतॄन् । इंद्रंमित्रंवरुणंसातयेभगंस्वस्त्य१ग्निं०॥७॥ तऽआदित्याऽआगंतासर्वतातयेवृधेनोयज्ञमवतासजोषसः । बृहस्पतिंपूषणमश्विनाभगंस्वस्त्य१ग्निं० ॥ तन्नोदेवायच्छत

(१०।३।६)अबुध्रमितिचतुर्दशर्चस्यसूक्तस्यधानाकोलुशोविश्वेदेवाजगत्यंत्येद्वेत्रिष्टुभौ(भेदपक्षे-विश्वेदेवाः३उषसोग्निः२विश्वेदेवाः९एवं१४)

सुप्रवाच॒नंछ॒र्दि॑रा॑दित्याःसु॒भरं॑नृ॒पाय्यं॑ । प॒श्वेतो॒काय॒तन॑यायजी॒वसे॑स्व॒स्त्य१॒ग्निं० ॥ विश्वे॑ऽअ॒द्यम॒रुतो॒विश्व॑ऽऊ॒ती
विश्वे॑भवंत्व॒ग्नय॒ःसमि॑द्धाः । विश्वे॑नोदे॒वाऽअव॒साग॑मंतु॒विश्व॑मस्तु॒द्रवि॑णं॒वाजो॑ऽअ॒स्मे ॥ यंदे॑वा॒सोव॑थ॒वाज॑सातौ॒यं
त्राय॑ध्वे॒यंपि॑पृ॒थात्यंहः॑ । योवो॑गोपी॒थेनभ॒यस्य॒वेद॒तेस्या॑मदे॒ववी॑तयेतुरासः ॥ ८ ॥ (१०।३।७) उ॒षासा॒नक्ता॑बृह॒
तीसु॒पेश॑सा॒द्यावा॒क्षामा॒वरु॑णोमि॒त्रोऽअ॑र्य॒मा । इंद्रं॑हुवेम॒रुतः॒पर्व॑ताँऽअ॒पऽआ॑दि॒त्यान्द्यावा॑पृथि॒वीऽअ॒पःस्वः॑* ॥ द्यौ
श्च॑नःपृथि॒वीच॒प्रचे॑तसऽऋ॒ताव॑रीरक्षता॒मंह॑सोरि॒षः । मादु॑र्वि॒दत्रा॒निर्ऋ॑तिर्नऽईशत॒तद्दे॒वाना॒मवो॑ऽअ॒द्यावृ॑णीमहे ॥
विश्व॑स्मान्नो॒ऽअदि॑तिःपा॒त्वंह॑सोमा॒तामि॒त्रस्य॒वरु॑णस्यरे॒वतः॑ । स्व॑र्व॒ज्ज्योति॑रवृ॒कंन॑शीमहि॒तद्दे॒० ॥ ग्रावा॒वद॒न्नप॒रक्षां॑
सिसेधतुदु॒ष्वप्न्यं॒निर्ऋ॑तिं॒विश्व॑म॒त्रिणं॑ । आ॒दि॒त्यंशर्म॑म॒रुता॑मशीमहि॒तद्दे॒० ॥ एंद्रो॑ब॒र्हिःसीद॑तु॒पिन्व॑ता॒मिळा॒बृह॒स्पति॒ः
साम॑भिर्ऋ॒क्वोऽअ॑र्चतु । सु॒प्र॒के॒तंजी॒वसे॒मन्म॑धीमहि॒तद्दे॒० ॥९॥ दि॒वि॒स्पृशं॑य॒ज्ञम॒स्माक॑मश्विनाजी॒राध्व॑रंकृणुतंसु॒म्नमि॒ष्ट
ये॑ । प्रा॒चीन॑रश्मि॒माहु॑तंघृ॒तेन॒तद्दे॒० ॥ उप॑ह्वयेसु॒हवं॒मारु॑तंग॒णंपा॑व॒कमृ॒ष्वंस॒ख्याय॑शं॒भुवं॑ । रा॒यस्पोषं॑सौश्रव॒साय॑धीम
हि॒तद्दे॒० ॥ अ॒पांपेरुं॑जी॒वध॑न्यंभरामहेदेवा॒व्यं॑सु॒हवं॑मध्वर॒श्रियं॑ । सु॒र॒श्मिंसोम॑मिंद्रि॒यंयं॑मीमहि॒तद्दे॒० ॥ स॒नेम॒तत्सु॑स॒
नितां॑स॒नित्व॑भिर्व॒यंजी॒वाजी॒वपु॑त्रा॒ऽअना॑गसः । ब्र॒ह्म॒द्विषो॒विष्व॒गेनो॑भरेरत॒तद्दे॒० ॥ येस्थाम॑नो॑र्य॒ज्ञिया॒स्तेशृ॑णोतन॒यद्वो॑

(१०।३।७) उषासानक्तेतिचतुर्दशर्चस्यसूक्तस्यधानाकोलुशोविश्वेदेवाजगत्यंत्येद्वेत्रिष्टुभौ (भेदपक्षे–विश्वेदेवाः१३सविता१एवं१४)।

देवाऽईमहेतद्देदातन । जैत्रंक्रतुंरयिमद्वीरवद्यशस्तद्दे० ॥ १० ॥ महदद्यमहतामावृणीमहेवोदेवानांबृहतामनर्वणां । यथावसुवीरजातंनशामहैतद्दे० ॥ महोऽअग्नेःसमिधानस्यशर्मण्यनागामित्रेवरुणेस्वस्तये । श्रेष्ठेस्यामसवितुःसवीमनितद्दे० ॥ येसवितुःसत्यसवस्यविश्वेमित्रस्यव्रतेवरुणस्यदेवाः । तेसौभगंवीरवद्गोमदप्नोदधातनद्रविणंचित्रमस्मे ॥ सवितापश्चातात्सवितापुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् । सवितानःसुवतुसर्वतातिंसवितानोरासतांदीर्घमायुः ॥ ११ ॥ (१०।३।८) नमोमित्रस्यवरुणस्यचक्षसेमहोदेवायतदृतंसपर्यत । दूरेदृशेदेवजातायकेतवेदिवस्पुत्रायसूर्यायशंसत ॥ सामासत्योक्तिःपरिपातुविश्वतोद्यावाचयत्रततनन्नहानिच । विश्वमन्यन्निविशतेयदेजतिविश्वाहापोविश्वाहोदेतिसूर्यः ॥ नतेऽअदेवःप्रदिवोनिवासतेयदेतशेभिःपतरैरथर्यसि । प्राचीनमन्यदनुवर्ततेरजऽउदन्येनज्योतिषायासिसूर्य ॥ येनसूर्यज्योतिषाबाधसेतमोजगच्चविश्वमुदियर्षिभानुना । तेनास्मद्विश्वामनिरामनाहुतिमपामीवामपदुःष्वप्न्यंसुव ॥ विश्वस्यहिप्रेषितोरक्षसिव्रतमहेळयन्नुच्चरसिस्वधाऽअनु । यदद्यत्वासूर्योपब्रवामहैतंनोदेवाऽअनुमंसीरतक्रतुं ॥ तंनोद्यावापृथिवीतन्नऽआपऽइंद्रःशृण्वंतुमरुतोहवंवचः । माशूनेभूमसूर्यस्यसंदृशिभद्रंजीवंतोजरणामशीमहि ॥ १२ ॥ विश्वाहात्वासुमनसःसुचक्षसःप्रजावंतोऽअनमीवाऽअनागसः । उद्यंतंत्वामित्रमहोदिवे

(१०।३।८) नमोमित्रस्येतिद्वादशर्चस्यसूक्तस्यसौर्योभितपाःसूर्योजगतीदशमीत्रिष्टुप् ।

दिवेज्योग्जीवाःप्रतिपश्येमसूर्य ॥ महिज्योतिर्बिभ्रतंत्वाविचक्षणभास्वंतंचक्षुषेचक्षुषेमयः । आरोहंतंबृहतःपाजस
स्परिवयंजीवाःप्रतिपश्येमसूर्य ॥ यस्यतेविश्वाभुवनानिकेतुनाप्रचेरतेनिचविशंतेऽअक्तुभिः । अनागास्त्वेनहरिके
शसूर्याह्नाह्नानोवस्यसावस्यसोदिहि ॥ शंनोभवचक्षसाशंनोऽअह्नाशंभानुनाशंहिमाशंघृणेन । यथाशमध्वन्छमसद्दु
रोणेतत्सूर्यद्रविणंधेहिचित्रं+ ॥ अस्माकंदेवाऽउभयायजन्मनेशर्मयच्छतद्विपदेचतुष्पदे । अदत्पिबदूर्जयमानमाशि
तंतदस्मेशंयोररपोदधातन ॥ यद्वोदेवाश्चकृमजिह्वयागुरुम्मनसोवाप्रयुतीदेवहेळनं । अरावायोनोऽअभिदुच्छुनायते
तस्मिन्तदेनोवसवोनिधेतन ॥ १३ ॥ (१०।३।९) अस्मिन्नऽइंद्रपृत्सुतौयशस्वतिशिमीवतिक्रंदसिप्रावसातये ।
यत्रगोषाताधृषितेषुखादिषुविष्वक्पतंतिदिद्यवोनृषाह्ये ॥ सनःक्षुमंतंसदनेव्यूर्णुहिगोऽअर्णसंरयिमिंद्रश्रवाय्यं । स्या
मंतेजयतःशक्रमेदिनोयथावयमुश्मसितद्वसोकृधि ॥ योनोदासऽआर्योवापुरुष्टुतादेवऽइंद्रयुधयेचिकेतति । अस्मा
भिष्टेसुषहाःसंतुशत्रवस्त्वयावयंतान्वनुयामसंगमे+ ॥ योदभ्रेभिर्हव्योयश्चभूरिभिर्योऽअभीकेवरिवोविन्नृषाह्ये । तं
विखादेसस्निमद्यश्रुतंनरमर्वाचमिंद्रमवसेकरामहे ॥ स्ववृजंहित्वामहमिंद्रशुश्रवानानुदंवृषभरध्रचोदनं । प्रमुंचस्व

(१०।३।९) अस्मिन्नइतिपंचर्चस्यसूक्तस्यमुष्कवानिंद्रइंद्रोजगती ।

परिकुत्सादिहागहिकिमुत्वावान्मुष्कयोर्बद्धऽआसते ॥ १४ ॥ (१०।३।१०) योवांपरिज्मासुवृदश्विनारथोदोषा
मुषासोहव्योहविष्मता । शश्वत्तमासस्तमुवामिदंवयंपितुर्ननामसुहवंहवामहे ॥ चोदयतंसूनृताःपिन्वतंधियऽउत्पुरं
धीरीरयतंतदुश्मसि । यशसंभागंकृणुतंनोऽअश्विनासोमंनचारुंमघवत्सुनस्कृतं ॥ अमाजुरश्चिद्भवथोयुवंभगोनाशो
श्चिदवितारापमस्यचित् । अंधस्यचिन्नासत्याकृशस्यचिद्युवामिदाहुर्भिषजारुतस्यचित् ॥ युवंच्यवानंसनयंयथारथं
पुनर्युवानंचरथायतक्षथुः । निष्टौग्र्यमूहथुरद्भ्यस्परिविश्वेत्तावांसवनेषुप्रवाच्या ॥ पुराणावांवीर्या३प्रब्रवाजनेथोहा
सथुर्भिषजामयोभुवा । तावांनुनव्याववसेकरामहेयंनासत्याश्रदरिर्यथादधत् ॥ १५ ॥ इयंवामह्वेशृणुतंमेऽअश्वि
नापुत्रायेवपितरामह्यंशिक्षतं । अनापिरज्ञाऽअसजात्यामतिःपुरातस्याऽअभिशस्तेरवस्पृतं ॥ युवंरथेनविमदायशुं
ध्युवंन्यूहथुःपुरुमित्रस्ययोषणां । युवंहवंवध्रिमत्याऽअगच्छतंयुवंसुषुतिंचक्रथुःपुरंधये ॥ युवंविप्रस्यजरणामुपेयुषःपु
नःकलेरकृणुतंयुववद्वयः । युवंवंदनमृश्यदादुदूपथुर्युवंसद्योविश्पलामेतवेकृथः ॥ युवंहरेभंवृषणागुहाहितमुदैरयतंम
मृवांसमश्विना । युवमृबीसमुततप्तमत्रयऽओमन्वंतंचक्रथुःसप्तवध्रये ॥ युवंश्वेतंपेदवेश्विनाश्वंनवभिर्वाजैर्नवतीचं
वाजिनं । चर्कृत्यंददथुर्द्रावयत्सखंभगंनन्नृभ्योहव्यंमयोभुवं ॥ १६ ॥ नतंराजानावदितेकुतश्चननांहोऽअश्नोति

(१०।३।१०) योवामितिचतुर्दशर्चस्यसूक्तस्यकाक्षीवतीघोषाश्विनौजगत्यंत्यात्रिष्टुप् ।

दुरितंनकिर्भयं । यमश्विनासुहवारुद्रवर्तनीपुरोरथंकृणुथःपत्न्यासह ॥ आतेनयातंमनसोजवीयसारथंयंवामृभवश्च
क्रुरश्विना । यस्ययोगेदुहिताजायतेदिवऽउभेऽअहनीसुदिनेविवस्वतः ॥ तावर्तिर्यातंजयुषाविपर्वतमपिन्वतंशयवे
धेनुमश्विना । वृकस्यचिद्वर्तिकामंतरास्याद्युवंशचीभिर्ग्रसिताममुंचतं ॥ एतंवांस्तोममश्विनावकर्मातक्षामभृगवोन
रथं । न्यमृक्षामयोषणांनमर्येनित्यंनसूनुंतनयंदधानाः ॥ १७ ॥ (१०।३।११) रथंयांतंकुहकोहवांनराप्रतिद्युमंतं
सुवितायभूषति । प्रातर्यावाणंविभ्वंविशेविशेवस्तोर्वस्तोर्वहमानंधियाशमि ॥ कुहस्विद्दोषाकुहवस्तोरश्विनाकुहाभि
पित्वंकरतःकुहोषतुः । कोवांशयुत्राविधवेवदेवरंमर्यंनयोषाकृणुतेसधस्थऽआ+ ॥ प्रातर्जरेथेजरणेवकापयावस्तोर्व
स्तोर्यजतागच्छथोगृहं । कस्यध्वस्राभवथःकस्यवानराराजपुत्रेवसवनावगच्छथः ॥ युवांमृगेववारणामृगण्यवोदोषा
वस्तोर्हविषानिह्वयामहे । युवंहोत्रामृतुथाजुह्वतेनरेषंजनायवहथःशुभस्पती ॥ युवांहघोषापर्यश्विनायतीराज्ञऽऊचे
दुहितापृच्छेवांनरा । भूतंमेऽअह्नऽउतभूतमक्तवेश्वावतेरथिनेशक्तमर्वते ॥ १८ ॥ युवंकवीष्ठःपर्यश्विनारथंविशोन
कुत्सोजरितुर्नशायथः । युवोर्हमक्षापर्यश्विनामध्वासाभरतनिष्कृतंनयोषणा ॥ युवंहभुज्युंयुवमश्विनावशंयुवंशिंजा
रमुशनामुपारथुः । युवोररावापरिसख्यमासतेयुवोरहमवसासुम्नमाचके ॥ युवंहकृशंयुवमश्विनाशयुंयुवंविधंतंविध

(१०।३।११) रथंयांतमितिचतुर्दशर्चस्यसूक्तस्यकाक्षीवतीघोषाश्विनौजगती ।

वामुरुष्यथः । युवंसनिभ्यःस्तनयंतमश्विनापव्रजमूर्णुथःसप्तास्यं ॥ जनिष्टयोषापतयत्कनीनकोविचारुहन्वीरुधोदं
सनाऽअनु । आस्मैरीयंतेनिवनेवसिंधवोस्माऽअह्नेभवतितत्पतित्वनं+ ॥ जीवंरुदंतिविमयंतेऽअध्वरेदीर्घामनुप्रसि
तिंदीधियुर्नरः । वामंपितृभ्योयऽइदंसमेरिरेमयःपतिभ्योजनयःपरिष्वजे ॥ १९ ॥ नतस्यविद्मतदुषुप्रवोचतयुवाह
यद्युवत्याःक्षेतियोनिषु । प्रियोस्रियस्यवृषभस्यरेतिनोगृहंगमेमाश्विनातदुश्मसि ॥ आवामगन्त्सुमतिर्वाजिनीवसून्य
श्विनाहृत्सुकामाऽअयंसत । अभूतंगोपामिथुनाशुभस्पतीप्रियाऽअर्यम्णोदुर्याँऽअशीमहि ॥ तामंदसानामनुषोदुरो
णऽआधत्तंरयिंसहवीरंवचस्यवे । कृतंतीर्थंसुप्रपाणंशुभस्पतीस्थाणुंपथेष्ठामपदुर्मतिंहतं ॥ क्वस्विदद्यकतमास्वश्विना
विक्षुदस्रामादयेतेशुभस्पती । कऽईंनियेमेकतमस्यजग्मतुर्विप्रस्यवायजमानस्यवागृहं+ ॥ २० ॥ (१०।३।१२)
समानमुत्यंपुरुहूतमुक्थ्यं१रथंत्रिचक्रंसवनागनिग्मतं । परिज्मानंविदथ्यंसुवृक्तिभिर्वयंव्युष्टाऽउषसोहवामहे ॥ प्रा
तर्युजंनासत्याधितिष्ठथःप्रातर्यावाणंमधुवाहनंरथं । विशोयेनगच्छथोयज्वरीर्नराकीरेश्चिद्यज्ञंहोतृमंतमश्विना ॥ अ
ध्वर्युंवामधुपाणिंसुहस्त्यमग्निधंवाधृतदक्षंदमूनसं । विप्रस्यवायत्सवनानिगच्छथोतऽआयातंमधुपेयमश्विना ॥२१॥
(१०।३।१३) अस्तैवसुप्रतरंलायमस्यन्भूषन्निवप्रभरास्तोमंमस्मै । वाचाविप्रास्तरतवाचमर्योनिरामयजरितःसोम

(१०।३।१२) समानमितितृचस्यसूक्तस्यघौषेयःसुहस्त्योश्विनौजगती । (१०।३।१३)अस्तेवेत्येकादशर्चस्यसूक्तस्यांगिरसःकृष्णइंद्रस्त्रिष्टुप् ।

ऽइंद्रं ॥ दोहेनगामुपशिक्षासखायंप्रबोधयजरितर्जारमिंद्रं । कोशंनपूर्णंवसुनान्यृष्टमाच्यावयमघदेयायशूरं ॥ कि
मंगत्वांमघवन्भोजमाहुःशिशीहिमाशिशयंत्वाशृणोमि । अप्नस्वतीममधीरस्तुशक्रवसुविदंभगमिंद्राभरानः ॥ त्वांज
नामसत्येष्विंद्रसंतस्थानाविह्वयंतेसमीके । अत्रायुजंकृणुतेयोहविष्मान्नासुन्वतासख्यंवष्टिशूरः ॥ धनंनस्पंद्रंबहुलं
योऽअस्मैतीव्रान्त्सोमाँऽआसुनोतिप्रयस्वान् । तस्मैशत्रून्त्सुतुकान्प्रातरह्नोनिस्वष्ट्रान्युवतिहंतिवृत्रं ॥ २२ ॥ यस्मि
न्वयंदधिमाशंसमिंद्रेयःशिश्रायमघवाकाममस्मे । आराच्चित्सन्भयतामस्यशत्रुर्न्यस्मैद्युम्नाजन्यानमंतां ॥ आराच्छ
त्रुमपबाधस्वदूरमुग्रोयःशंबःपुरुहूततेन । अस्मेधेहियवमद्गोमदिंद्रकृधीधियंजरित्रेवाजरत्नां ॥ प्रयमंतर्वृषसवासोऽ
अग्मन्तीव्राःसोमाबहुलांतासऽइंद्रं । नाहंदामानंमघवानियंसन्निसुन्वतेवहतिभूरिवामं ॥ उतप्रहामतिदीव्याजया
तिकृतंयच्छ्वघ्नीविचिनोतिकाले । योदेवकामोनधनारुणद्धिसमित्तंरायासृजतिस्वधावान् ॥ गोभिष्टरेमामतिंदुरेवांय
वेनक्षुधंपुरुहूतविश्वां । वयंराजभिःप्रथमाधनान्यस्माकेनवृजनेनाजयेम ॥ बृहस्पतिर्नःपरिपातुपश्चादुतोत्तरस्मादध
रादघायोः । इंद्रःपुरस्तादुतमध्यतोनःसखासखिभ्योवरिवःकृणोतु ॥ २३ ॥ (१०।४।१) अच्छामऽइंद्रंमतयःस्व
र्विदःसध्रीचीर्विश्वाऽउशतीरनूषत । परिष्वजंतेजनयोयथापतिंमर्यंनशुंध्युंमघवानमूतये ॥ नघात्वद्रिगपवेतिमेमन

चतुर्थेनुवाकेष्टादशसूक्तानि (१०।४।१) अच्छामइत्येकादशर्चस्यसूक्तस्यांगिरसःकृष्णइंद्रोजगत्यंत्येद्वेत्रिष्टुभौ ।

स्त्वेऽइत्कामंपुरुहूतशिश्रय । राजेवदस्मनिषदोधिबर्हिष्यस्मिन्त्सुसोमेवपानंमस्तुते ॥ विषूवृदिंद्रोऽअमतेरुतक्षुधःस
ऽइद्रायोमघवावस्वऽईशते । तस्येदिमेप्रवणेसप्तसिंधवोवयोवर्धंतिवृषभस्यशुष्मिणः ॥ वयोनवृक्षंसुपलाशमासद
न्त्सोमासऽइंद्रंमंदिनश्चमूषदः । प्रैषामनीकंशवसादविद्युतद्विदत्स्व१र्मनवेज्योतिरार्यं ॥ कृतंनश्वघ्नीविचिनोतिदेव
नेसंवर्गंयन्मघवासूर्यंजयत् । नतत्तेऽअन्योऽअनुवीर्यंशकन्नपुराणोमघवन्नोतनूतनः ॥ २४ ॥ विशंविशंमघवापर्य
शायतजनानांधेनाऽअवचाकशद्वृषा । यस्याहशक्रःसवनेषुरण्यतिसतीव्रैःसोमैःसहतेपृतन्यतः+ ॥ आपोनसिंधुम
भियत्समक्षरन्त्सोमासऽइंद्रंकुल्याऽइवह्रदं । वर्धंतिविप्रामहोऽअस्यसादनेयवंनवृष्टिर्दिव्येनदानुना ॥ वृषानक्रु
द्धःपतयद्रजःस्वायोऽअर्यपत्नीरकृणोदिमाऽअपः । ससुन्वतेमघवाजीरदानवेविंदज्ज्योतिर्मनवेहविष्मते ॥ उज्जा
यतांपरशुर्ज्योतिषासहभूयाऽऋतस्यसुदुघापुराणवत् । विरोचतामरुषोभानुनाशुचिःस्व१र्णशुक्रंशुशुचीतसत्पतिः ॥
गोभिष्टरेमामतिंदुरेवांयवेनक्षुधंपुरुहूतविश्वां । वयंराजभिःप्रथमाधनान्यस्माकेनवृजनेनाजयेम ॥ बृहस्पतिर्नःप
रिपातुपश्चादुतोत्तरस्मादधरादघायोः । इंद्रःपुरस्तादुतमध्यतोनःसखासखिभ्योवरिवःकृणोतु ॥ २५ ॥ (१०।४।२)
आयात्विंद्रःस्वपतिर्मदाययोधर्मणातूतुजानस्तुविष्मान् । प्रत्वक्षाणोऽअतिविश्वासहांस्यपारेणमहतावृष्ण्येन ॥

(१०।४।२) आयात्वित्येकादशर्चस्यसूक्तस्यकृष्णइंद्रोजगतीआद्यास्तिस्रोंत्येद्वेचत्रिष्टुभः ।

Digitization by eGangotri Funding MDF Delhi

सुष्ठामारथःसुयमाहरीतेमिम्यक्षवज्रोनृपतेगभस्तौ । शीभंराजन्त्सुपथायाह्यर्वाङ्वर्धामतेपपुषोवृष्ण्यानि ॥ एंद्रवाहोनृपतिंवज्रंबाहुमुग्रमुग्रासस्तविषासऽएनं । प्रत्वक्षसंवृषभंसत्यशुष्ममेमस्मत्रासधमादोवहंतु ॥ एवापतिंद्रोणसाचंसचेतसमूर्जःस्कंभंधरुणऽआवृषायसे । ओजःकृष्वसंगृभायत्वेऽअप्यसोयथाकेनिपानामिनोवृधे+ ॥ गमन्नस्मेवसून्याहिशंसिषंस्वाशिषंभरमायाहिसोमिनः । त्वमीशिषेसास्मिन्नासत्सिबर्हिष्यनाधृष्यातवपात्राणिधर्मणा ॥ २६ ॥ पृथक्प्रायन्प्रथमादेवहूतयोकृण्वतश्रवस्यानिदुष्टरा । नयेशेकुर्यज्ञियांनावमारुहमीर्मैवतेन्यविशंतकेपयः ॥ एवैवापागपरेसंतुदूढ्योश्वायेषांदुर्युजऽआयुयुज्रे । इत्थायेप्रागुपरेसंतिदावनेपुरूणियत्रवयुनानिभोजना ॥ गिरीँऽरज्रान्रेजमानाँऽअधारयद्द्यौःक्रँददंतरिक्षाणिकोपयत् । समीचीनेधिषणेविष्कंभायतिवृष्णःपीत्वामदऽउक्थानिशंसति ॥ इमंबिभर्मिसुकृतंतेऽअंकुशंयेनारुजासिमघवञ्छफारुजः । अस्मिन्त्सुतेसवनेऽअस्त्वोक्यंसुतऽइष्टौमघवन्बोध्याभगः ॥ गोभिष्टरेमामतिंदुरेवांयवेनक्षुधंपुरुहूतविश्वां । वयंराजभिःप्रथमाधनान्यस्माकेनवृजनेनाजयेम ॥ बृहस्पतिर्नःपरिपातुपश्चादुतोत्तरस्मादधरादघायोः । इंद्रःपुरस्तादुतमध्यतोनःसखासखिभ्योवरिवःकृणोतु ॥ २७ ॥ (१०।४।३) दिवस्परिप्रथमंजज्ञेऽअग्निरस्मद्द्वितीयंपरिजातवेदाः । तृतीयमप्सुनृमणाऽअजस्रमिंधान

(-१०।४।३) दिवस्परीतिद्वादशर्चस्यसूक्तस्यभालंदनोवत्सप्रिरग्निस्त्रिष्टुप् ।

ऽएनंजरतेस्वाधीः+ ॥ विद्मातेऽअग्नेत्रेधात्रयाणिविद्मातेधामविभृतापुरुत्रा । विद्मातेनामपरमंगुहायद्विद्मातमु
त्संयतऽआजगंथ ॥ समुद्रेत्वानृमणाऽअप्स्वं१तर्नृचक्षाऽईधेदिवोऽअग्नऽऊधन् । तृतीयेत्वारजसितस्थिवांसमपामु
पस्थेमहिषाऽअवर्धन् ॥ अक्रंददग्निःस्तनयन्निवद्यौःक्षामारेरिहद्वीरुधःसमंजन् । सद्योजज्ञानोविहीमिद्धोऽअख्यदा
रोदसीभानुनाभात्यंतः+ ॥ श्रीणामुदारोधरुणोरयीणांमनीषाणांप्रार्पणःसोमगोपाः । वसुःसूनुःसहसोऽअप्सुराजा
विभात्यग्रऽउषसामिधानः+ ॥ विश्वस्यकेतुर्भुवनस्यगर्भऽआरोदसीऽअपृणाज्जायमानः । वीळुंचिदद्रिमभिनत्परा
यन्जनायदग्निमयजंतपंच ॥ २८ ॥ उशिक्पावकोऽअरतिःसुमेधामर्तेष्वग्निरमृतोनिधायि । इयर्तिधूममरुषंभरिभ्र
दुच्छुक्रेणशोचिषाद्यामिनक्षन् ॥ दृशानोरुक्मऽउर्वियाव्यद्यौद्दुर्मर्षमायुःश्रियेरुचानः । अग्निरमृतोऽअभवद्वयोभि
र्यदेनंद्यौर्जनयत्सुरेताः ॥ यस्तेऽअद्यकृणवद्भद्रशोचेपूपंदेवघृतवंतमग्ने । प्रतंनयप्रतरंवस्योऽअच्छाभिसुम्नंदेवभक्तंय
विष्ठ ॥ आतंभजसौश्रवसेष्वग्नऽउक्थऽउक्थऽआभजशस्यमाने । प्रियःसूर्येप्रियोऽअग्नाभवात्युज्जातेनभिनददुज्जनि
त्वैः ॥ त्वामग्नेयजमानाऽअनुद्यून्विश्वावसुदधिरेवार्याणि । त्वयासहद्रविणमिच्छमानाव्रजंगोमंतमुशिजोविवव्रुः ॥
अस्ताव्यग्निर्नरांसुशेवोवैश्वानरऽऋषिभिःसोमगोपाः । अद्वेषेद्यावापृथिवीहुवेमदेवाधत्तरयिमस्मेसुवीरं ॥२९॥ ॥
इतिसप्तमाष्टकेअष्टमोऽध्यायः ॥ ८ ॥ ॥ ॥ ॥ ॥ ॥

षट्पंचाशाध्यायेवर्गाः २९ सूक्तानि १३ ऋचाः १४४॥ स्वाम. ॥ विश्वेभ्योदेवेभ्य. इंद्राये. २ उपमश्रवसाये. २ उपमश्रवस. ४ अक्षेभ्य. अक्षनिंदाया. ५ अक्षेभ्य. अक्षनिंदाया. अक्षेभ्य. अक्षनिंदाया. २ अक्षेभ्य. कृष्याइ. अक्षनिंदाया. विश्वेभ्योदेवेभ्य. ३ उषसेग्नय. २ विश्वेभ्योदेवेभ्य. २२ सवित्र. सूर्याये. १२ इंद्राये. ५ अश्विभ्या. ३१ इंद्राये. ३३ अग्नय. १२ ॥ इतिसप्तमेष्टमः ॥

॥ इतिसप्तमाष्टकःसमाप्तः ॥

॥ इतिसप्तमाष्टकःसमाप्तः ॥

॥ अथाष्टमाष्टकप्रारंभः ॥

ॐ प्रहोतादशजगृभ्माष्टौसप्तगुर्वैकुंठमिंद्रंतुष्टावविकुंठानामासुरींद्रतुल्यंपुत्रमिच्छंतीमहत्तपस्तेपेतस्याःस्वयमेवेंद्रःपुत्रोजज्ञेससप्तगुस्तुतिसंहृष्टआत्मानमुत्तरैस्त्रिभिस्तुष्टावाहंभुवमेकादशांत्येत्रिष्टुभौसप्तमीचाहंदामंत्योपाद्येचत्रिष्टुभौप्रवोमहेसप्तद्विजगत्यौद्यंतकेतेभिसारिण्यौवषट्कारेणवृक्णेषुभ्रातृषुसौचीकोग्निरपःप्रविश्यदेवैःसमवददुत्तरैस्त्रिभिर्महत्तन्नवात्रयुजोग्निवाक्यंविश्वइत्युत्तरंचषट्कंमयुजोदेवानांयमैच्छामेत्युत्तरंचैकादशकंतदद्येतितुद्वृचोग्नेस्तंतुमाद्याजगत्योष्टमीवर्जंतांसुषट्बृहदुक्थोवामदेव्योवांदूरेष्टाविदंतेसप्तवैश्वदेवंतुचतुर्थ्याद्यास्तिस्रोजगत्यःपराणिचत्वारिसूक्तान्युक्ताऋषयोद्विपदेत्वत्रिमंडलेथहैक्ष्वाकोराजासमातिंगौपायानान्बंध्वादीन्पुरोहितांस्त्यक्त्वान्यौमायाविनौश्रेष्ठतमौमत्वापुरोदधेतमितरेक्रुद्धाअभिचेरुरथतौमायाविनौसुबंधोःप्राणानाचिक्षिपतुरथास्यभ्रातरस्त्रयोमाप्रगामेतिषट्कंगायत्रंस्वस्त्ययनंजप्त्वायत्तइतिद्वादशर्चमानुष्टुभंमनआवर्तनंजेपुःप्रतारीतिदशर्चेचतस्रोनिर्ऋत्यपनोदार्थंजेपुश्चतुर्थ्यांसोमंचास्तुवन्मृत्योरपगमायोत्तराभ्यांदेवीमसुनीतिंसप्तम्यांलिंगोक्तदेवताःशिष्टाभिःपङ्क्तिमहापाङ्क्तिपङ्क्त्युत्तराभिर्द्यावापृथिव्यौसमिंद्रेतींद्रंचार्धर्चेनाजनमितिद्वादशर्चंआनुष्टुभंचतसृभिरसमातिमस्तुवन्पंचम्येंद्रंषष्ठ्यागस्त्यस्यस्वसामातैषांराजानमस्तौत्पराभिःसुबं

धोर्जीवमाह्वयंस्तमंत्ययालब्धसंज्ञमस्पृशन्पंचाद्यागायत्र्योष्टम्याद्यंपङ्क्तीइदमित्थासप्ताधिकांनाभानेदिष्ठोमानवोवैश्वदेवंतत् ॥ १ ॥ ॥ ॥ ॥ ॥ ॥

हरिःओम् ॥ (१०।४।४) प्रहोताजातोमहान्नभोविन्नृषद्वासीददपामुपस्थे । दधिर्योधायिसतेवयांसियंतावसूनिविधतेतनूपाः+ ॥ इमंविधंतोऽअपांसधस्थेपशुंननष्टंपदैरनुग्मन् । गुहाचतंतमुशिजोनमोभिरिच्छंतोधीराभृगवोविंदन् ॥ इमंत्रितोभूर्यविंददिच्छन्वैभूवसोमूर्धन्यघ्न्यायाः । सशेवृधोजातऽआहर्म्येषुनाभिर्युवाभवतिरोचनस्य ॥ मंद्रंहोतारमुशिजोनमोभिःप्रांचंयज्ञंनेतारमध्वराणां । विशामकृण्वन्नरतिंपावकंहव्यवाहंदधतोमानुषेषु ॥ प्रभूर्जयंतंमहांविपोधांमूराऽअमूरंपुरांदर्माणं । नयंतोगर्भंवनांधियंधुर्हिरिश्मश्रुंनार्वाणंधनर्चं ॥ १ ॥ निपस्त्यासुत्रितःस्तभूयन्परिवीतोयोनौसीददंतः । अतःसंगृभ्याविशांदमूनाविधर्मणायंत्रैरीयतेनॄन्+ ॥ अस्याजरासोदमामरित्राऽअर्चद्धूमासोऽअग्नयःपावकाः । श्वितीचयःश्वात्रासोभुरण्यवोवनर्षदोवायवोनसोमाः ॥ प्रजिह्वयाभरतेवेपोऽअग्निःप्रवयुनानिचेतसापृथिव्याः । तमायवःशुचयंतंपावकंमंद्रंहोतारंदधिरेयजिष्ठं ॥ द्यावायमग्निंपृथिवीजनिष्टामापस्त्वष्टाभृगवोयंसहोभिः । ईळेन्यंप्रथमंमातरिश्वादेवास्ततक्षुर्मनवेयजत्रं ॥ यंत्वादेवादधिरेहव्यवाहंपुरुस्पृहोमानुषासोय

(१०।४।४) प्रहोतेतिदशर्चस्यसूक्तस्यभालंदनोवत्सप्रिरग्निस्त्रिष्टुप् ।

जंत्रं । सयामन्नग्नेस्तुवतेवयोधाःप्रदेवयन्यशसःसंहिपूर्वीः+ ॥ २ ॥ (१०।४।५) जगृभ्मातेदक्षिणमिंद्रहस्तंवसूयवोवसुपतेवसूनां । विद्माहित्वागोपतिंशूरगोनामस्मभ्यंचित्रंवृषणंरयिंदाः ॥ स्वायुधंस्ववसंसुनीथंचतुःसमुद्रंधरुणँरयीणां । चर्कृत्यंशंस्यंभूरिवारमस्मभ्यँ० ॥ सुब्रह्माणंदेववंतंबृहंतमुरुंगभीरंपृथुबुध्नमिंद्र । श्रुतऽर्षिमुग्रमभिमातिषाहमस्मभ्यँ० ॥ सनद्वाजंविप्रवीरंतरुत्रंधनस्पृतंशूशुवांसंसुदक्षं । दस्युहनंपूर्भिदमिंद्रसत्यमस्मभ्यँ० ॥ अश्वावंतंरथिनंवीरवंतंसहस्रिणंशतिनंवाजमिंद्र । भद्रव्रातंविप्रवीरंस्वर्षामस्मभ्यँ० ॥ ३ ॥ प्रसप्तगुमृतधीतिंसुमेधांबृहस्पतिंमतिरच्छाजिगाति । यऽआंगिरसोनमसोपसद्योस्मभ्यँ० ॥ वनीवानोममदूतासऽइंद्रंस्तोमाश्चरंतिसुमतीरियानाः । हृदिस्पृशोमनसावच्यमानाऽअस्मभ्यँ० ॥ यत्त्वायामिदद्धितन्नऽइंद्रबृहंतंक्षयमसमंजनानां । अभितद्द्यावापृथिवीगृणीतामस्मभ्यँ० ॥ ४ ॥ (१०।४।६) अहंभुवंवसुनःपूर्व्यस्पतिरहंधनानिसंजयामिशश्वतः । मांहवंतेपितरंनजंतवोहंदाशुषेविभजामिभोजनं ॥ अहमिंद्रोरोधोवक्षोऽअथर्वणस्त्रितायगाऽअजनयमहेरधि । अहंदस्युभ्यःपरिनृम्णमाददेगोत्राशिक्षंदधीचेमातरिश्वने ॥ मह्यंत्वष्टावज्रमतक्षदायसंमयिदेवासोवृजन्नपिक्रतुं । ममानीकंसूर्यस्येवदुष्टरं

(१०।४।५) जगृभ्मेत्यष्टर्चस्यसूक्तस्यसप्तगुर्वैकुंठइंद्रस्त्रिष्टुप् । (१०।४।६) अहंभुवमित्येकादशर्चस्यसूक्तस्यवैकुंठइंद्रोवैकुंठइंद्रोजगती सप्तमीदशम्येकादश्यस्त्रिष्टुभः ।

मामायैंतिकृतेनकत्वैंनच ॥ अहमेतंगव्ययमश्व्यंपशुंपुरीषिणंसायकेनाहिरण्ययं । पुरूसहस्रानिशिशामिदाशुषेयन्मा
सोमासऽउक्थिनोऽअमंदिषुः ॥ अहमिंद्रोनपराजिग्यऽइद्धनंनमृत्यवेवतस्थेकदाचन । सोममिन्मासुन्वंतोयाचताव
सुनमैंपूरवःसख्येरिषाथन ॥ ५ ॥ अहमेतान्छाश्वसतोद्वाद्वेंद्रंयेवज्रंयुधयेकृण्वत । आह्वयमानाँऽअवहन्मनाहनंदृ
॥ ३ ॥ ह्ळावदन्ननमस्युर्नमस्विनः ॥ अभी३दमेकमेकोऽअस्मिनिष्षाळभीद्वाकिमुत्रयःकरंति । खलेनपर्षान्प्रतिहन्मिभूरिकिं
मानिंदंतिशत्रवोनिंद्राः+ ॥ अहंगुंगुभ्योऽअतिथिग्वमिष्करमिषंनवृत्रतुरंविक्षुधारयं । यत्पर्णयघ्नऽउतवाकरंजहेप्रा
हंमहेवृत्रहत्येऽअशुश्रवि ॥ प्रमेनमीसाप्यऽइषेभुजेभूद्गवामेषेसख्याकृणुतद्विता । दिद्युंयदस्यसमिथेषुमंहयमादिदें
नंशंस्यमुक्थ्यंकरं ॥ प्रनेमस्मिन्ददृशेसोमोऽअंतर्गोपानेमंमाविरस्थाकृणोति । सतिग्मशृंगंवृषभंयुयुत्सन्द्रुहस्तस्थौ
बहुलेबद्धोऽअंतः+ ॥ आदित्यानांवसूनांरुद्रियाणांदेवोदेवानांनमिनामिधाम । तेमाभद्रायशवसेततक्षुरपराजितम
स्तृतमषाह्ळं ॥ ६ ॥ (१०।४।७) अहंदांगृणतेपूर्व्यंवस्वहंब्रह्मकृणवंमह्यंवर्धनं । अहंभुवंयजमानस्यचोदितायज्व
नःसाक्षिविश्वस्मिन्भरे ॥ मांधुरिंद्रंनामदेवतादिवश्चग्मश्चापांचजंतवः । अहंहरीवृषणाविव्रतारघूऽअहंवज्रंशवसेधृ
ष्णवाददे ॥ अहमत्कंकवयेशिश्नथंहथैरहंकुत्समावमाभिरूतिभिः । अहंशुष्णस्यश्नथितावधर्यमंनयोररऽआर्यनामद ॥ ३ ॥

(१०।४।७) अहंदामित्येकादशर्चस्यसूक्तस्यवैकुंठइंद्रोवैकुंठइंद्रोजगतीद्वितीयांत्येत्रिष्टुभौ ।

स्यंवे ॥ अहंपितेवंवेतसूँरभिष्टयेतुग्रंकुत्सायस्मादिंभंचरंधयं । अहंभुवंयजमानस्यराजनिप्रयद्भरेतुजयेनप्रियाधृषे ॥ अहंरंधयंमृगयंश्रुतर्वणेयन्माजिहीतवयुनाचनानुषक् । अहंवेशंनम्रमायवेकरमहंसव्यायपड्गृभिमरंधयं ॥ ७ ॥ अहंसयोनववास्त्वंबृहद्रथंसंवृत्रेवदासंवृत्रहारुजं । यद्वर्धयंतंप्रथयंतमानुषग्दूरेपारेरजसोरोचनाकरं ॥ अहंसूर्यस्यपरियाम्याशुभिःप्रैतशेभिर्वहमानऽओजसा । यन्मासावोमनुषऽआहनिर्णिजऽऋधक्कृषेदासंकृत्व्यंहथैः ॥ अहंसप्तहानहुषोनहुष्टरःप्राश्रावयंशवसातुर्वशंयदुं । अहंन्यं१न्यंसहसासहस्करंनवव्राधतोनवतिंचवक्षयं ॥ अहंसप्तस्रवतोधारयंवृषाद्रवित्वःपृथिव्यांसीराऽअधि । अहमर्णांसिवितिरामिसुक्रतुर्युधाविदंमनवेगातुमिष्टये ॥ अहंतदासुधारयंयदासुनदेवश्चनत्वष्टाधारयद्रुशत् । स्पार्हंगवामूधःसुवक्षणास्वामधोर्मधुश्वात्र्यंसोममाशिरं ॥ एवादेवाँऽइंद्रोविव्येनॄन्प्रच्यौत्नेनमघवासत्यराधाः । विश्वेत्तातेहरिवःशचीवोभितुरासःस्वयशोगृणंति ॥ ८ ॥ (१०।४।८) प्रवोमहेमंदमानायांधसोर्चाविश्वानरायविश्वाभुवे । इंद्रस्ययस्यसुमखंसहोमहिश्रवोनृम्णंचरोदसीसपर्यतः ॥ सोचिन्नुसख्यानर्यऽइनस्तुतश्चर्कृत्यऽइंद्रोमावतेनरे । विश्वासुधूर्षुवाजकृत्येषुसत्पतेवृत्रेवाप्स्व१भिशूरमंदसे ॥ केतेनरऽइंद्रयेतऽइषेयेतेसुम्नंसधन्य१मियक्षान् । केतेवाजायासुर्यायहिन्विरेकेऽअप्सुस्वासूर्वरासुपौंस्ये ॥ भुवस्त्वमिंद्रब्रह्मणामहान्भुवोविश्वे

(१०।४।८) प्रवोमहइतिसप्तर्चस्यसूक्तस्यवैकुंठइंद्रो[illegible]भिसारिण्यौपंचमीत्रिष्टुप् ।

षु॒सव॑नेषुय॒ज्ञिय॑ः । भुवो॒नॄँश्च्यौ॒त्नोविश्व॑स्मि॒न्भरे॒ज्येष्ठ॑श्च॒मंत्रो॑विश्वचर्षणे ॥ अवा॒नुकं॒ज्याया॑न्य॒ज्ञव॑नसोम॒हींत॒ऽओमा॑
त्रांकृ॒ष्टयो॑विदुः । असो॒नुकं॑म॒जरो॒वर्धा॑श्च॒विश्वे॑दे॒तासव॑नातूतु॒माकृ॑षे ॥ ए॒ताविश्वा॒सव॑नातूतु॒माकृ॑षेस्व॒यंसू॑नोसहसो॒या
नि॑दधि॒षे । वरा॑यते॒पात्रं॒धर्म॑णे॒तना॑य॒ज्ञोमंत्रो॒ब्रह्मोद्य॑तं॒वच॑ः ॥ येते॑विप्रब्रह्म॒कृत॑ःसु॒तेसचा॒वसू॑नांच॒वसु॑नश्चदा॒वने॑ ।
॥ ४ ॥ प्रतेसु॒म्नस्य॒मन॑साप॒थाभु॑व॒न्मदे॑सु॒तस्य॑सो॒म्यस्यांध॑सः ॥ ९ ॥ (१०।४।९) म॒हत्तदुल्बं॒स्थवि॑रं॒तदा॑सी॒द्येनावि॑ष्टितःप्र
वि॒वेशि॑था॒पः । विश्वा॑ऽअपश्यद्बहु॒धाते॑ऽअग्ने॒जात॑वेदस्त॒न्वो॑दे॒वऽएक॑ः ॥ कोमा॑ददर्शकत॒मःसदे॒वोयोमे॑त॒न्वो॑बहु॒धाप॒
र्यप॑श्यत् । क्वाह॑मित्रावरुणाक्षियंत्य॒ग्नेर्विश्वा॑ःस॒मिधो॑देव॒यानी॑ः ॥ ऐच्छा॑मत्वाबहु॒धाजा॑तवेद॒ःप्रवि॑ष्टमग्नेऽअ॒प्स्वोष॑
धीषु । तंत्वा॑य॒मोऽअ॑चिकेच्चित्रभानोदशां॑तरु॒ष्याद॑ति॒रोच॑मानं ॥ हो॒त्राद॒हंव॑रुण॒बिभ्य॑दाय॒न्नेदे॒वमा॑युनज॒न्नत्र॑दे॒वाः ।
तस्य॑मेत॒न्वो॑बहु॒धानिवि॑ष्टाऽए॒तमर्थं॒नचि॑केता॒हम॒ग्निः+ ॥ एहि॒मनु॑र्देव॒युर्य॒ज्ञका॑मोरं॒कृत्या॒तम॑सिक्षेष्यग्ने । सु॒गान्प॒थः
कृ॑णुहिदेव॒याना॒न्वह॑ह॒व्यानि॑सुमन॒स्यमा॑नः ॥ १० ॥ अ॒ग्नेःपूर्वे॒भ्रात॑रो॒ऽअर्थ॑मे॒तंर॒थीवाध्वा॑न॒मन्वाव॑रीवुः । तस्मा॑
द्भि॒याव॑रुणदू॒रमा॑यंगौ॒रोनक्षे॒प्नोर॑विजे॒ज्याया॑ः ॥ कु॒र्मस्त॒ऽआयु॑र॒जरं॑यद॑ग्ने॒यथा॑यु॒क्तोजा॑तवेदो॒नरिष्या॑ः । अथा॑वहासि
सुमन॒स्यमा॑नोभा॒गंदे॒वेभ्यो॑ह॒विष॑ःसुजात ॥ प्र॒या॒जान्मे॑ऽअनुया॒जांश्च॒केव॑ला॒नूर्जस्वं॑तंह॒विषो॑दत्तभा॒गं । घृ॒तंचा॒पांपुरु॑ ॥ ४ ॥

(१०।४।९)महत्तदितिनवर्चस्यसूक्तस्यद्वितीयादियुगृचांसौचीकोग्निऋषिःअयुजांदेवाऋषयःयुजांदेवादेवताःअयुजामग्निर्देवतात्रिष्टुप् ।

ष॒ंचौष॑धीनाम॒ग्नेश्च॑दी॒र्घमायु॑रस्तुदेवाः ॥ तव॑प्रया॒जाऽअ॑नुया॒जाश्च॒केव॑ल॒ऽऊर्ज॑स्वंतोह॒विषः॑संतुभा॒गाः । तवा॑ग्नेय॒ज्ञो३॒यम॑स्तुसर्व॒स्तुभ्यं॑नमंतांप्र॒दिश॒श्चत॑स्रः ॥ ११ ॥ (१०।४।१०) विश्वे॑देवाःशा॒स्तन॑मा॒यथे॒हहोता॑वृ॒तोम॒नवै॒यन्नि॒षद्य॑ । प्रमे॑ब्रूतभाग॒धेयं॒यथा॑वो॒येन॑प॒थाह॒व्यमावो॒वहा॑नि ॥ अ॒हंहोता॒न्य॑सीदं॒यजी॑या॒न्विश्वे॑दे॒वाम॒रुतो॑माजुनंति । अह॑रहरश्वि॒नाध्व॑र्यवंवां॑ब्र॒ह्मास॒मिद्भ॑वति॒साहु॑तिर्वाः॑ ॥ अ॒यंयोहोता॒किरु॒सय॒मस्य॒कमप्यू॑हे॒यत्स॑म॒ञ्जंति॑दे॒वाः । अह॑रहर्जा॑यतेमा॒सिमा॒स्यथा॑दे॒वाद॑धिरेहव्य॒वाहं॑ ॥ मांदे॒वाद॑धिरेहव्य॒वाह॒मप॑म्लुक्तंब॒हुकृ॒च्छ्राचरं॑तं । अ॒ग्निर्वि॒द्वान्य॒ज्ञंनः॑कल्पयाति॒पंच॑यामंत्रि॒वृतं॑स॒प्ततं॑तुं ॥ आवो॑यक्ष्यमृत॒त्वंसु॒वीरं॒यथा॑वोदे॒वावरि॑वः॒करा॑णि । आवा॒ह्वोर्वज्र॒मिंद्र॑स्यधेया॒मथे॒माविश्वाः॒पृत॑नाजयाति ॥ त्रीणि॑श॒तात्रीस॒हस्रा॑ण्य॒ग्निंत्रिं॒शच्च॑दे॒वानव॑चासपर्यन् । औक्ष॑न्घृ॒तैरस्तृ॑णन्ब॒र्हिर॑स्मा॒ऽआदिद्धोतारं॒न्य॑सादयंत ॥ १२ ॥ (१०।४।११) यमैच्छा॑म॒मन॑सा॒सो॒३यमागा॑द्य॒ज्ञस्य॑वि॒द्वान्परु॑षश्चिकि॒त्वान् । सनो॑यक्षद्दे॒वता॑ता॒यजी॑या॒न्निहिषत्स॒दंत॑रः॒पूर्वो॑ऽअ॒स्मत् ॥ अरा॑धि॒होता॑नि॒षदा॒यजी॑यान॒भिप्रया॑सि॒सुधि॑तानि॒हिख्यत् । यजा॑महैय॒ज्ञिया॒न्हंत॑दे॒वाँऽईळा॑महा॒ऽईड्यां॒ऽआज्ये॑न ॥ सा॒ध्वीम॑कर्दे॒ववी॑तिंनोऽअ॒द्यय॒ज्ञस्य॑जि॒ह्वाम॑विदाम॒गुह्या॑म् । सऽआयु॒रागा॑

(१०।४।१०) विश्वेदेवाइतिषळर्चस्यसूक्तस्यसौचीकोग्निर्देवास्त्रिष्टुप् । (१०।४।११) यमैच्छामेत्येकादशर्चस्यसूक्तस्यदेवाऋषयःचतुर्थीपंचम्योःसौचीकोग्निरृषिःअग्निर्देवताचतुर्थीपंचम्योर्देवादेवताजगतीअश्मन्वतीरितित्रिष्टुप् ।

त्सुरभिर्वसानोभद्रामंकर्देवहूतिंनोऽअद्य+ ॥ तदद्यवाचःप्रथमंमसीययेनासुराँऽअभिदेवाऽअसाम । ऊर्जादऽउतयज्ञि
यासःपंचजनाममहोत्रंजुषध्वं॥पंचजनाममहोत्रंजुषंतांगोजाताऽउतयेयज्ञियासः । पृथिवीनःपार्थिवात्पात्वंहसोंतरिक्षं
दिव्यात्पात्वस्मान्+॥१३॥तंतुंतन्वन्रजसोभानुमन्विहिज्योतिष्मतःपथोरक्षधियाकृतान् । अनुल्बणंवयतजोगुवामपो
मनुर्भवजनयादैव्यंजनं ॥ अक्षानहोनह्यतनोतसोम्याऽइष्कृणुध्वंरशनाऽओतपिंशत । अष्टावंधुरंवहताभितोरथंयेन
देवासोऽअनयन्नभिप्रियं+ ॥ अश्मन्वतीरीयतेसंरभध्वमुत्तिष्ठतप्रतरतासखायः । अत्राजहामयेऽअसन्नशेवाःशिवा
न्वयमुत्तरेमाभिवाजान् ॥ त्वष्टामायावेदपसामपस्तमोबिभ्रत्पात्रादेवपानानिशंतमा । शिशीतेनूनंपरशुंस्वायसंयेनवृ
श्चादेतशोब्रह्मणस्पतिः ॥ सतोनूनंकवयःसंशिशीतवाशीभिर्याभिरमृतायतक्षथ । विद्वांसःपदागुह्यानिकर्तनयेनदे
वासोऽअमृतत्वमानशुः+ ॥ गर्भेयोषामदधुर्वत्समासन्यपीच्येनमनसोतजिह्वया । सविश्वाहासुमनायोग्याऽअभिसि
षासनिर्वनतेकारऽइज्जितिं ॥ १४ ॥ (१०।४।१२) तांसुतेकीर्तिंमघवन्महित्वायत्त्वाभीतेरोदसीऽअह्वयेतां । प्रा
वोदेवाँऽआतिरोदासमोजःप्रजायैत्वस्यैयदशिक्षऽइंद्र ॥ यदचरस्तन्वावावृधानोबलानींद्रप्रब्रुवाणोजनेषु । माये ॥ ५ ॥
त्सातेयानियुद्धान्याहुर्नाद्यशत्रुंननुपुराविवित्से ॥ कऽउनुतेमहिमनःसमस्यास्मत्पूर्वऽऋषयोंतमापुः । यन्मातरंचपितरं

(१०।४।१२) तांसुतइतिषळर्चस्यसूक्तस्यवामदेव्योबृहदुक्थइंद्रस्त्रिष्टुप् ।

चसाकमजनयथास्तन्व१ःस्वायाः ॥ चत्वारिते ऽअसुर्याणिनामादाभ्यानिमहिषस्यसंति । त्वमंगतानिविश्वानिवित्सेयेभिःकर्माणिमघवन्चकर्थ ॥ त्वंविश्वादधिषेकेवलानियान्याविर्याचगुहावसूनि । काममिन्मेमघवन्मावितारीस्त्वमाज्ञातात्वमिंद्रासिदाता+॥ योऽअदधाज्ज्योतिषिज्योतिरंतर्योऽअसृजन्मधुनासंमधूनि। अधप्रियंशूषमिंद्रायमन्मब्रह्मकृतोबृहदुक्थादवाचि ॥ १५॥ (१०।४।१३) दूरेतन्नामगुह्यंपराचैर्यत्त्वाभीतेऽअह्वयेतांवयोधै । उदस्तभ्नाःपृथिवींद्यामभीकेभ्रातुःपुत्रान्मघवन्तित्विषाणः+ ॥ महत्तन्नामगुह्यंपुरुस्पृग्येनभूतंजनयोयेनभव्यं । प्रत्नंजातंज्योतिर्यदस्यप्रियंप्रियाःसमविशंतपंच ॥ आरोदसीऽअपृणादोतमध्यंपंचदेवाँऽऋतुशःसप्तसप्त । चतुस्त्रिंशतापुरुधाविचष्टेसरूपेणज्योतिषाविव्रतेन ॥ यदुषऽऔच्छःप्रथमाविभानामजनयोयेनपुष्टस्यपुष्टं । यत्तेजामित्वमवरंपरस्यामहन्महत्याऽअसुरत्वमेकं ॥ विधुंदद्राणंसमनेबहूनांयुवानंसंतंपलितोजगार । देवस्यपश्यकाव्यंमहित्वाद्याममारसह्यःसमान ॥ १६ ॥ शाक्मनाशाकोऽअरुणःसुपर्णऽआयोमहःशूरःसनादनीळः । यच्चिकेतसत्यमित्तन्नमोघंवसुस्पार्हमुतजेतोतदाता ॥ ऐभिर्ददेवृष्ण्यापौंस्यानियेभिरौक्षद्वृत्रहत्यायवज्री । येकर्मणःक्रियमाणस्यमह्नऽऋतेकर्ममुदजायंतदेवाः+ ॥ युजाकर्माणिजनयन्विश्वौजाऽअशस्तिहाविश्वमनास्तुराषाट्। पीत्वीसोमस्यदिवऽआवृधानःशूरोनिर्युधाधम

(१०।४।१३) दूरेतदित्यष्टर्चस्यसूक्तस्यबृहदुक्थइंद्रस्त्रिष्टुप् ।

द॒स्यू॑न् ॥ १७ ॥ (१०।४।१४) इ॒दंत॒ऽएकं॑प॒रऽऊं॑त॒ऽएकं॑तृ॒तीये॑न॒ज्योति॑षा॒संवि॑शस्व । सं॒वेश॑नेत॒न्वं॑१॒श्चारु॑रेधिप्रि॒
योदे॒वानां॑पर॒मेज॒नित्रे॑ ॥ त॒नूष्टे॑वाजिन्त॒न्वं॑१॒नयं॑तीवा॒मम॒स्मभ्यं॒धातु॒शर्म॒तुभ्यं॑ । अह्रु॑तोम॒होध॒रुणा॑यदे॒वान्दि॒वीव॒
ज्योति॒ःस्वमामि॑मीयाः ॥ वा॒ज्य॑सि॒वाजि॑नेनासु॒वेनी॑ःसु॒वि॒तःस्तोमं॑सुवि॒तोदिवं॑गाः । सु॒वि॒तोधर्मं॑प्रथ॒मानु॑स॒त्यासु॑वि॒तोदे॒
वान्सु॑वि॒तोनु॒पत्म॑ ॥ म॒हि॒म्नऽए॑षांपि॒तर॑श्च॒नेशि॑रेदे॒वादे॒वेष्वं॑दधु॒रपि॒क्रतुं॑ । सम॑विव्यचुरु॒तयान्यत्वि॑षु॒रैषां॑त॒नूषु॒निवि॑
वि॒शुःपुन॑ः ॥ सहो॑भि॒र्विश्वं॒परि॑चक्रमू॒रज॒ःपूर्वा॒धामा॒न्यमि॑ता॒मिमा॑नाः । त॒नूषु॒विश्वा॒भुव॑ना॒नियेमि॑रे॒प्रासा॑रयंतपुरु॒ध
प्र॒जाऽअनु॑ ॥ द्विधा॑सू॒नवोसु॑रंस्व॒र्विदु॒मास्था॑पयंततृ॒तीये॑न॒कर्म॑णा । स्वांप्र॒जांपि॒तर॒ःपित्र्यं॒सह॒ऽआव॑रेष्वदधु॒स्तंतु॒मात॑
तं ॥ ना॒वानक्षोद॑ःप्र॒दिश॑ःपृथि॒व्याःस्व॒स्तिभि॒राति॑दु॒र्गाणि॒विश्वा॑ । स्वांप्र॒जांबृ॒हदु॑क्थोमहि॒त्वाव॑रेष्वद॒धा॒दापरे॑षु ॥१८॥
(१०।४।१५) माप्रगा॑मप॒थोव॒यंमाय॒ज्ञादिं॑द्रसो॒मिन॑ः । मांत॑स्थु॒र्नोऽअरा॑तयः ॥ योय॒ज्ञस्य॑प्र॒साध॑न॒स्तंतु॑र्दे॒वेष्वात॑
तः । तमाहु॑तंनशीमहि ॥ मनो॒न्वाहु॑वामहेनाराशं॒सेन॒सोमे॑न । पि॒तॄणां॑च॒मन्म॑भिः ॥ आत॑ऽएतु॒मन॒ःपुन॒ःक्रत्वे॒दक्षा॑य

(१०।४।१४) इदंतइतिसप्तर्चस्यसूक्तस्यबृहदुक्थोविश्वेदेवास्त्रिष्टुप्चतुर्थ्यादितिस्रोजगत्यः (अत्राखिलाविश्वेदेवाएव)। (१०।४।१५) माप्रगामेतिषळर्चस्यसूक्तस्यगौपायनाबंधुःश्रुतबंधुर्विप्रबंधुर्विश्वेदेवागायत्री । (भेदपक्षे–इंद्रः १ अग्निस्तंतुः१विश्वेदेवाः३सोमः १ एवं ६ । माप्रगामेतिसूक्तानांबंध्वाद्याऋषयइत्यार्षानुक्रमण्यांशौनकः) ।

जीवसे । ज्योक्चसूर्यंदृशे ॥ पुनर्नःपितरोमनोददातुदैव्योजनः । जीवंव्रातंसचेमहि ॥ वयंसोमव्रतेतवमनस्तनूषुबिभ्रतः । प्रजावंतःसचेमहि ॥ १९ ॥ (१०।४।१६) यत्तेयमंवैवस्वतंमनोजगामदूरकं । तत्तऽआवर्तयामसीहक्षयायजीवसे ॥ यत्तेदिवंयत्पृथिवींमनोजगामदूरकं । तत्त० ॥ यत्तेभूमिंचतुर्भृष्टिंमनोजगामदूरकं । तत्त० ॥ यत्तेचतस्रःप्रदिशोमनोजगामदूरकं । तत्त० ॥ यत्तेसमुद्रमर्णवंमनोजगामदूरकं । तत्त० ॥ यत्तेमरीचीःप्रवतोमनोजगामदूरकं । तत्त० ॥ २० ॥ यत्तेऽअपोयदोषधीर्मनोजगामदूरकं । तत्त० ॥ यत्तेसूर्यंयदुषसंमनोजगामदूरकं । तत्त० ॥ यत्तेपर्वतान्बृहतोमनोजगामदूरकं । तत्त० ॥ यत्तेविश्वमिदंजगन्मनोजगामदूरकं । तत्त० ॥ यत्तेऽपराःपरावतोमनोजगामदूरकं । तत्त० ॥ यत्तेभूतंचभव्यंचमनोजगामदूरकं ॥ तत्त० ॥ २१ ॥ (१०।४।१७) प्रतार्यायुःप्रतरंनवीयःस्थातारेवक्रतुमतारथस्य । अधुच्यवान्ऽउत्तंवीत्यर्थंपरातरंसुनिर्ऋतिर्जिहीतां ॥ सामन्नुरायेनिधिमन्वन्नंकरामहेसुपुरुधश्रवांसि । तानोविश्वानिजरिताममत्तुपरा० ॥ अभीष्व१र्यःपौंस्यैर्भवेमद्यौर्नभूमिंगिरयोना

(१०।४।१६) यत्तेयममितिद्वादशर्चस्यसूक्तस्यबंधुःश्रुतबंधुर्विप्रबंधुर्मनआवर्तनमनुष्टुप् । (१०।४।१७) प्रतार्यायुरितिदशर्चस्यसूक्तस्यबंध्वादयऋषयःआद्यानांचतसृणांनिर्ऋतिर्देवताचतुर्थ्यानिर्ऋतिसोमौपंचमीषष्ठ्योरसुनीतिर्देवीसप्तम्याद्यावापृथिवीद्यावंतरिक्षसोमपूषपथ्यास्वस्तयोदेवताःअंत्यानांतिसृणांद्यावापृथिव्यौत्रिष्टुप् अंत्यास्तिस्रःक्रमेणपंक्तिमहापंक्तिपंक्त्युत्तराः ।

ज्रा॑न् । ता॒नो॑विश्वा॑निजरि॒ता॑चि॑केतपरा॰ ॥ मो॑षुणः॑सोम॑मृ॒त्यवे॒परा॑दा॒ःपश्ये॑म॒नुसूर्य॑मु॒च्चरं॑तं । द्यु॒भि॑र्हि॒तो॑जरि॒मासू
नो॑ऽअस्तुपरा॰ ॥ असु॑नीते॒मनो॑ऽअ॒स्मासु॑धारयजी॒वात॑वे॒सुप्रति॑रान॒ऽआयुः॑ । रा॒रं॑धिन॒ःसूर्य॑स्यसं॒दृशि॑घृ॒तेन॒त्वंत॒न्वं॑वर्धयस्व
॥ २२ ॥ असु॑नीते॒पुन॑र॒स्मासु॒चक्षुः॒पुनः॑प्रा॒णमि॒हनो॑धेहि॒भोगं॑ । ज्योक्प॑श्येम॒सूर्य॑मु॒च्चरं॑त॒मनु॑मते॒मृ॒ळया॑नःस्व॒स्ति+
॥ पुन॑र्नो॒ऽअसुं॑पृथि॒वीद॑दातु॒पुन॒र्द्यौर्दे॒वीपुन॑र॒न्तरि॑क्षं । पुन॑र्न॒ःसोम॑स्त॒न्वं॑ददातु॒पुनः॑पू॒षाप॒थ्यां॒३यास्व॒स्तिः+ ॥
शंरोद॑सीसु॒बंध॑वेय॒ह्वीऽऋ॒तस्य॑मा॒तरा॑ । भर॑ता॒मप॒यद्र॒पो॒द्यौःपृ॑थिवि॒क्ष॒मार॒पो॒मोषु॒ते॒किं॑च॒नाम॑मत् ॥ अव॑द्व॒केऽअव॑
त्रि॒कादि॒वश्च॑रंतिभेष॒जा । क्ष॒माच॑रि॒ष्ण्वे॑क॒कंभर॑ता॒मप॒यद्र॒पो॒द्यौःपृ॑थिवि॒क्ष॒मार॒पो॒मोषु॒ते॒किं॑च॒नाम॑मत् ॥ समिं॑द्रेरय॒
गाम॑न॒ड्वाहं॒यऽआव॑हदु॒शीन॑रा॒ण्या॒ऽअनः॑ । भर॑ता॒मप॒यद्र॒पो॒द्यौःपृ॑थिवि॒क्ष॒मार॒पो॒मोषु॒ते॒किं॑च॒नाम॑मत् ॥ २३ ॥
(१०।४।१८) आज॑नंत्वे॒षसं॒दृशं॒माहीं॑ना॒नामु॑पस्तुतं । अग॑न्म॒बिभ्र॑तो॒नमः॑ ॥ अस॑मातिं॑नि॒तोश॑नंत्वे॒षंनि॑य॒यिन॒ं
रथं॑ । भ॒जेर॑थस्य॒सत्प॑तिं ॥ योज॑नान्महि॒षाँऽइ॑वातित॒स्थौप॒वीर॑वान् । उ॒ताप॑वीरवान्यु॒धा+ ॥ यस्ये॑क्ष्वा॒कुरुप॑व्र॒तेरे॒वान्
मं॑रा॒य्ये॑धते । दि॒वीव॒पंच॑कृ॒ष्टयः॑ ॥ इंद्र॑क्ष॒त्राऽस॑मातिषु॒रथ॑प्रोष्ठेषुधारय । दि॒वीव॒सूर्यं॑दृ॒शे+ ॥ अ॒गस्त्य॑स्य॒नद्भ्य॒ःस ॥ ७ ॥

(१०।४।१८) आजनमितिद्वादशर्चस्यसूक्तस्यबंध्वादयऋषयःषष्ठ्याअगस्त्यस्वसाऋषिकाआद्यानांचतसृणांषष्ठ्याश्चासमातिर्देवता पंचम्याइंद्रःसप्तम्यादिपंचानांजीवःद्वादश्याहस्तोऽनुष्टुप् आद्याःपंचगायत्र्यःअष्टमीनवम्यौपंक्ती ।

प्ती॑युन॒क्षि॒रो॑हि॑ता । प॒णीन्न्य॑क्रमीर॒भिविश्वा॑न्राजन्नरा॒धसः॑ ॥ २४ ॥ अ॒यंमा॒तायंपि॒तायंजी॒वा॒तुरा॒ग॑मत् । इ॒दंतव॑प्र॒सर्प॑णंसु॒बं॑ध॒वे॒हि॒निरि॑हि ॥ यथा॑यु॒गंव॑र॒त्रया॒नह्य॑न्तिध॒रुणा॑य॒कं । ए॒वादा॑धार॒तेमनो॑जी॒वात॑वे॒नमृ॒त्यवेऽथो॑ऽअरि॒ष्टता॑तये ॥ यथे॒यंपृ॑थि॒वीम॒हीदा॒धारे॒मान्वन॒स्पतीन् । ए॒वादा॑धार० ॥ य॒माद॒हंवै॑वस्व॒तात्सु॒बंधो॒र्मन॒ऽआभ॑रं । जी॒वात॑वे॒नमृ॒त्यवेऽथो॑० ॥ न्य॑१॒ग्वातोवं॑वाति॒न्य॑क्तपति॒सूर्यः॑ । नी॒चीन॑म॒घ्न्यादु॑हे॒न्य॑ग्भवतु॒तेरपः॑ ॥ अ॒यंमे॒हस्तो॒भग॑वान॒यंमे॒भग॑वत्तरः । अ॒यंमे॑वि॒श्वभे॑षजो॒ऽयंशि॒वाभि॑मर्शनः ॥ २५ ॥ (१०।५।१) इ॒दमि॒त्थारौद्रं॑गू॒र्तव॑चा॒ब्रह्म॒क्रत्वा॒शच्या॑मं॒तरा॒जौ । क्रा॒णायद॑स्यपि॒तरा॑मंहने॒ष्ठाःपर्ष॑त्प॒क्थेऽअह॒न्नास॒प्तहोतॄ॑न् ॥ सऽइद्दा॒नाय॒दभ्या॑यव॒न्वन्च्यवा॑न॒ःसूदै॑रमिमीत॒वेदिं । तूर्व॑याणोगू॒र्तव॑चस्तम॒ःक्षोदो॒नरेत॑ऽइ॒तऽऊ॑तिसिं॑चत् ॥ म॒नो॒नयेषु॒हव॑नेषुति॒ग्मंवि॒पःशच्या॑वनु॒थोद्र॑वंता । आयःशर्या॑भिस्तुवि॒नृम्णो॒ऽअ॒स्याश्री॑णीता॒दिशं॒गभ॑स्तौ ॥ कृ॒ष्णाय॒द्गोष्व॑रु॒णीषु॒सीद॑द्दि॒वोनपा॑ताश्विनाहुवेवां । वी॒तंमे॑य॒ज्ञमागं॑तंमे॒ऽअन्नं॑वव॒न्वांसा॒नेष॒मस्मृ॑तध्रू ॥ प्रथि॑ष्ट॒यस्य॑वी॒रक॑र्ममि॒ष्णद॒नुष्ठि॑तं॒नुनर्यो॒ऽअपौ॑हत् । पुन॒स्तदावृ॑हति॒यत्क॒ना

पंचमेनुवाकेष्टसूक्तानि (१०।५।१) इदमित्थेतिसप्तविंशत्यृचस्यसूक्तस्यमानवोनाभानेदिष्ठोविश्वेदेवास्त्रिष्टुप् (भेदपक्षे–रुद्रः२अश्विनौ२रुद्रः२विश्वेदेवाः१वास्तोष्पतिरुद्रौ१वास्तोष्पत्यग्नी१अंगिरसः१इंद्रः३अग्निः१नासत्येंद्राः१सोमः१अग्निः१आदित्यनाभानेदिष्ठौ१नाभानेदिष्ठधेनू१अग्निः१इंद्राग्नी१इंद्रः१मित्रावरुणनाभानेदिष्ठाः१वरुणः१मित्रावरुणौ१वरुणं १ देवाः१एवं२७)।

यांदुहितुराऽअनुभृतमनर्वा+ ॥ २६ ॥ मध्यायत्कर्त्वमभवदभीकेकामंकृण्वानेपितरियुवत्यां । मनानग्रेतोजहतुर्वि
यंतासानौनिषिक्तंसुकृतस्ययोनौ ॥ पितायत्स्वांदुहितरमधिष्कन्क्ष्मयारेतःसंजग्मानोनिषिंचत् । स्वाध्योजनयन्ब्रह्म
देवावास्तोष्पतिंव्रतपांनिरतक्षन् ॥ सऽईंवृषानफेनमस्यदाजौस्मदापरैदपदभ्रचेताः । सरत्पदानदक्षिणापरावृङ्न
तानुमेपृशन्योजगृभ्रे ॥ मक्षूनवह्निःप्रजायाऽउपब्दिरग्निंननग्नऽउपसीददूधः । सनितेध्मंसनितोतवाजंसधर्ताजज्ञे
सहसायवीयुत्+ ॥ मक्षूकनायाःसख्यंनवग्वाऽऋतंवदंतऽऋतयुक्तिमग्मन् । द्विबर्हसोयऽउपगोपमागुरदक्षिणासोऽ
अच्युतादुदुक्षन् ॥ २७ ॥ मक्षूकनायाःसख्यंनवीयोराधोनरेतऽऋतमित्तुरण्यन् । शुचियत्तेरेक्णऽआयजंतसबर्दु
घायाःपयऽउस्रियायाः ॥ पश्वायत्पश्चावियुताबुधंतेतिब्रवीतिवक्तरीररणः । वसोर्वसुत्वाकारवोनेहाविश्वंविवेष्टिद्र
विणमुपक्षु+ ॥ तदिन्वस्यपरिषद्वानोऽअग्मन्पुरूसदंतोनार्षदंबिभित्सन् । विशुष्णस्यसंग्रथितमनर्वाविदत्पुरुप्रजा
तस्यगुहायत्+ ॥ भर्गोहनामोतयस्यदेवाःस्व१र्णयेत्रिषधस्थेनिषेदुः । अग्निर्हनामोतजातवेदाःश्रुधीनोहोतर्ऋतस्य
होताध्रुक्+ ॥ उतत्यामेरौद्रावर्चिमंतानासत्याविंद्रगूर्तयेयजध्यै । मनुष्वद्वृक्तबर्हिषेरराणामंदूहितप्रयसाविक्षुयज्यू
॥ २८ ॥ अयंस्तुतोराजावंदिवेधाऽअपश्चविप्रस्तरतिःस्वसेतुः । सकक्षीवंतंरेजयत्सोऽअग्निंनेमिंनचक्रमर्वतोरघुद्रु+॥
सद्विबंधुर्वैतरणोयष्टासबर्धुंधेनुमस्वंदुहध्यै । संयन्मित्रावरुणावृंजऽउक्थैर्ज्येष्ठेभिरर्यमणंवरूथैः ॥ तद्बंधुःसूरिर्दिवि

तें॑धिय॒ंधानाभा॒नेदिं॑ष्ठोरपति॒प्रवेनंन् । सानो॒ना॑भिः॑पर॒मास्यवा॑घा॒हतत्प॒श्चाकं॑ति॒थश्चिं॑दास ॥ इ॒यंमे॒नाभिं॑रि॒हमैं॑स॒धस्थं
मि॒मेमैं॑दे॒वाऽअ॒यमं॑स्मि॒सर्वैः । द्वि॒जाऽअहं॑प्रथम॒जाऽऋ॒तस्ये॒दंधे॒नुरं॑दुह॒ज्जायं॑माना ॥ अधा॑सुम॒ंद्रोऽअं॑र॒तिर्विं॒भावावं॑स्य
तिद्विवर्त॒निर्वं॑ने॒षाट् । ऊ॒र्ध्वायच्छ्रे॑णि॒र्नशिशुर्दन्म॒क्षूस्थिर॒ंशें॑वृ॒धंसूंतमा॒ता+ ॥ २९ ॥ अधा॒गाव॒ऽउपं॑मातिंक॒नाया॒ऽअ
नुंश्वा॒ंतस्य॒कस्यं॑चि॒त्परैंयुः । श्रुधित्वंसुद्रविणोन॒स्त्वंया॑ळाश्व॒घ्नस्यं॑वावृधेसू॒नृता॑भिः ॥ अध॒त्वामिंद्रवि॒द्ध्य1स्मान्म॒होरा॒
येनृं॑पते॒वज्रं॑बाहुः । रक्षां॑चनोम॒घोनंःपा॒हिसू॒रीनंने॒हसंस्तेहरिवोऽअ॒भिष्टौ ॥ अध॒यद्रांजाना॒गविं॑ष्टौ॒सरंत्सर॒ण्युःका॒रवें
जर॒ण्युः । विप्र॒ःप्रेष्ठ॒ःसह्यैषांब॒भूव॒परांच॒वक्षंदु॒तपर्षंदेनान् ॥ अध॒ान्वंस्य॒जेन्यंस्यपु॒ष्टौवृथा॒रेभंतऽईमहे॒तदू॒नु । स॒र॒ण्युरं
स्यसू॒नुरश्वो॒विप्रंश्चासि॒श्रवंसश्चसा॒तौ+ ॥ यु॒वोर्यदिंस॒ख्याया॒स्मेशर्धा॑य॒स्तोमंजुजु॒षेनमं॑स्वान् । वि॒श्वत्र॒यस्मि॒न्नागिरंःस
मी॒चीःपू॒र्वीवं॑गा॒तुर्दाशंत्सू॒नृतां॑यै ॥ सगृं॑णा॒नोऽअ॒द्भिर्दे॒ववा॒नितिंसु॒बंधु॒र्नमं॑सासू॒क्तैः । वर्धंदू॒क्थैर्वचों॑भि॒राहिनू॒नंव्यध्वैं
ति॒पर्यंसऽउ॒स्रियांयाः ॥ तऽऊ॒षुणोम॒होयंजत्राभू॒तदेंवासऽऊ॒तयेंस॒जोषांः । येवाजाँ॒ऽअनंयताविय॒ंतो॒येस्थानिंचे॒ता
रो॒ऽअमूंराः ॥ ३० ॥ इत्यष्टमाष्टकेप्रथमोध्यायः ॥ ॥ ॥ ॥ ॥

अष्टमाष्टकेसूक्तानि १४५ ऋचः १२९३

सप्तपंचाशाध्यायेवर्गाः ३० सूक्तानि १६ ऋचः १६१ ॥ त्यागः ॥ अग्नय १० वैकुंठायेंद्राये. ३७ अग्नय. देवेभ्य॒. अग्नय.

देवेभ्य. अग्नय. देवेभ्य. अग्नय. देवेभ्य. अग्नय. देवेभ्य. ६ अग्नय. ३ देवेभ्य. २ अग्नय. ६ इंद्राये. १४ विश्वेभ्योदेवेभ्य. ७ इंद्राये. अग्न्याखतंतव. विश्वेभ्योदेवेभ्य. ३ सोमाये. मनसआवर्तनाये. १२ निर्ऋतय. ३ निर्ऋतिसोमाभ्या. असुनीत्या. २ द्यावापृथिवीद्द्वंतरिक्षसोमपूषपथ्यास्वस्तिभ्य. द्यावापृथिवीभ्या. २ इंद्रद्यावापृथिवीभ्य. असमातय. ४ इंद्राये. असमातय. सुबंधोर्जीविताह्वानसूपार्थायैदेवताया. ५ सुबंधोःस्पर्शनहेतुभूताभ्योदेवताभ्य. रुद्राये. २ अश्विभ्या. २ रुद्राये. २ विश्वेभ्योदेवेभ्य. वास्तोष्पतयेरुद्राये. वास्तोष्पत्यग्निभ्या. अंगिरोभ्य. इंद्राये.३ अग्नय. नासत्येंद्रेभ्य. सोमाये. अग्नय. आदित्यानाभानेदिष्ठेभ्य. नाभानेदिष्ठधेनुभ्या. अग्नय. इंद्राग्निभ्या. इंद्राये. मित्रावरुणनाभानेदिष्ठेभ्य. वरुणाये. मित्रावरुणाभ्या. २ देवेभ्य. ॥ इत्यष्टमेप्रथमः ॥

येयज्ञेनैकादशाद्या॑ःषळंगिरसांस्तुतिर्वींत्यात्रिष्टुप्पंचम्यनुष्टुप्प्रगाथोनुष्टुभौगायत्रींचतस्रोंत्याःसावर्णेर्दानस्तुतिःपरावतख्यूना॑गयःप्लातोद्विःत्रिष्टुबंतंतु॑स्वस्तिनस्त्रिष्टुब्वा॑सासहोत्तरया॑पथ्यास्वस्तिदेवत्या॑कथायांमेत्रिष्टुबग्निरिंद्रःपंचोना॑वसुकर्णोवासुक्रस्त्रिष्टुबंतंतु॑देवान्हुवइमां॑धियंद्वादशा॑यास्योबार्हस्पत्यंतू॑दप्लुतोभद्रा॑ःसुमित्रोवाध्र्य्श्वऽआग्नेयंद्विजगत्यादींमांमएकादशाप्रैबृहस्पतेबृहस्पतिर्ज्ञा॑नंतुष्टावंनवमीजगतीं ॥ ३ ॥ ॥ ॥

॥ हरिःओम् ॥ (१०।५।२) येय॒ज्ञेन॒दक्षि॑णया॒सम॑क्ता॒ऽइंद्र॑स्यस॒ख्यम॑मृ॒तत्व॑मा॑न॒श । तेभ्यो॑भ॒द्रम॑ंगिरसोवोऽ

(१०।५।२) येयज्ञेनेत्येकादशर्चस्यसूक्तस्यनाभानेदिष्ठोविश्वेदेवाःप्रनूनमित्यादिचतसृणांसावर्णिर्जगतीपंचम्यष्टमीनवम्योऽनुष्टुभःषष्ठी

अस्तुप्रातिंगृभ्णीतमानवंसुमेधसः ॥ यऽउदाजन्पितरोगोमयंवस्वृतेनाभिंदन्परिवत्सरेवलं । दीर्घायुत्वमंगिरसोवोऽअस्तुप्रातिं० ॥ यऽऋतेनसूर्यमारोहयन्दिव्यप्रथयन्पृथिवींमातरंवि । सुप्रजास्त्वमंगिरसोवोऽअस्तुप्रातिं० ॥ अयंनाभावदतिवल्गुवोगृहेदेवपुत्राऽऋषयस्तच्छृणोतन । सुब्रह्मण्यमंगिरसोवोऽअस्तुप्रातिं० ॥ विरूपासऽइदृषयस्तऽइद्गंभीरवेपसः । तेऽअंगिरसःसूनवस्तेऽअग्नेःपरिंजज्ञिरे ॥ १ ॥ येऽअग्नेःपरिंजज्ञिरेविरूपासोदिवस्परि । नवग्वोनुदशग्वोऽअंगिरस्तमःसचादेवेषुमंहते ॥ इंद्रेणयुजानिःसृजंतवाघतोव्रजंगोमंतमश्विनं । सहस्रंमेददतोऽअष्टकर्ण्यः श्रवोदेवेष्वक्रत ॥ प्रनूनंजायतामयंमनुस्तोकमेवरोहतु । यःसहस्रंशताश्वंसद्योदानायमंहते ॥ नतमश्नोतिकश्चनदिवऽइवसान्वारभं । सावर्ण्यस्यदक्षिणाविसिंधुरिवपप्रथे ॥ उतदासापरिविषेस्मद्दिष्टीगोपरीणसा । यदुस्तुर्वश्चमामहे ॥ सहस्रदाग्रामणीर्मारिषन्मनुःसूर्येणास्ययतमानैतुदक्षिणा । सावर्णेर्देवाःप्रतिरंत्वायुर्यस्मिन्नश्रांताऽअसनामवा

बृहतीसप्तमीसतोबृहतीदशमीगायत्रीअंत्यात्रिष्टुप्(भेदपक्षे–अंगिरसः६विश्वेदेवाः१सावर्णिः४एवं११।अंगिरसोनुक्रमण्यांपाक्षिकाउक्ताः)। (येयज्ञेनेतिचतसृणांत्रिष्टुप्छंदस्त्वंकश्चिद्ब्रूतेतद्बहुविरुद्धं । विरोधास्तु–षळंगिरसांस्तुतिर्वांत्यात्रिष्टुबित्यनुक्रमाच्छेषाजगत्यइतिपरिभाषाव्याघातएकः । तासांत्रिष्टुप्छंदस्त्वेनादेशपरिभाषयातासामंत्यायाश्चत्रिष्टुप्त्वेसिद्धेंत्यात्रिष्टुबितिसिद्धानुवादलक्षणदोषाविष्करणंद्वितीयः। दशमीत्वस्यगायत्रीजगत्यन्याविनोत्तमामितिशौनकवचनाज्ञानेनस्वेच्छयाव्याख्यानमितितृतीयश्चेति ।)

जं ॥ २ ॥ (१०।५।३) परावतोयेदिधिषंतऽआप्यंमनुप्रीतासोजनिमाविवस्वतः । ययातेर्येनहुष्यस्यबर्हिषिदेवा
ऽआसंतेतेऽअधिब्रुवंतुनः ॥ विश्वाहिवोनमस्यानिवंद्यानामानिदेवाऽउतयज्ञियानिवः । येस्थजाताऽअदितेरद्भ्यस्प
रियेपृथिव्यास्तेमऽइहश्रुताहवं ॥ येभ्योमातामधुमत्पिन्वतेपयःपीयूषंद्यौरदितिरद्रिबर्हाः । उक्थशुष्मान्वृषभरा
न्त्स्वप्नसस्ताँऽआदित्याँऽअनुमदास्वस्तये ॥ नृचक्षसोऽअनिमिषंतोऽअर्हणाबृहद्देवासोऽअमृतत्वमानशुः । ज्योतीरं ॥६०॥
थाऽअहिमायाऽअनागसोदिवोवर्ष्माणंवसतेस्वस्तये ॥ सम्राजोयेसुवृधोयज्ञमाययुरपरिह्वृतादधिरेदिविक्षयं । ताँऽ
आविवासनमसासुवृक्तिभिर्महोऽआदित्याँऽअदितिंस्वस्तये ॥ ३ ॥ कोवस्तोमंराधतियंजुजोषथविश्वेदेवासोमनुषो
यतिष्ठन । कोवोध्वरंतुविजाताऽअरंकरद्योनःपर्षदत्यंहःस्वस्तये ॥ येभ्योहोत्रांप्रथमामायेजेमनुःसमिद्धाग्निर्मनसास
प्तहोतृभिः । तऽआदित्याऽअभयंशर्मयच्छतसुगानःकर्तसुपथास्वस्तये ॥ यऽईशिरेभुवनस्यप्रचेतसोविश्वस्यस्थातुर्ज
गतश्चमंतवः । तेनःकृतादकृतादेनसस्पर्यद्यादेवासःपिपृतास्वस्तये ॥ भरेष्विंद्रंसुहवंहवामहेंहोमुचंसुकृतंदैव्यंजनं ।
अग्निंमित्रंवरुणंसातयेभगंद्यावापृथिवीमरुतःस्वस्तये ॥ सुत्रामाणंपृथिवींद्यामनेहसंसुशर्माणमदितिंसुप्रणीतिं । दैवीं ॥१०॥

(१०।५।३) परावतइतिसप्तदशर्चस्यसूक्तस्यगयःप्लातोविश्वेदेवाःपंचदशीषोडश्योःपथ्यास्वस्तिर्जगत्यंत्येद्वेत्रिष्टुभौस्वस्तिस्त्रिष्टुब्वा ।
(भेदपक्षे–विश्वेदेवाः९दिवः१विश्वेदेवाः४पथ्यास्वस्ति२विश्वेदेवाः१एवं१७) । (गयःप्लातइत्यत्रप्लातोगयोविश्वेदेवाइत्यपिक्कचित्प्रयुंजते)

नावंस्वरित्रामनागसमस्रवंतीमारुहेमास्वस्तये ॥ ४ ॥ विश्वेयजत्राऽअधिवोचतोतयेत्रायध्वंनोदुरेवायाऽअभिहुतः ।
सत्ययावोदेवहूत्याहुवेमशृण्वतोदेवाऽअवसेस्वस्तये ॥ अपामीवामपविश्वामनाहुतिमपारातिंदुर्विदत्रामघायतः ।
आरेदेवाद्वेषोऽअस्मद्युयोतनोरुणःशर्मयच्छतास्वस्तये ॥ अरिष्टःसमर्तोविश्वऽएधतेप्रप्रजाभिर्जायतेधर्मणस्परि ।
यमादित्यासोनयथासुनीतिभिरतिविश्वानिदुरितास्वस्तये ॥ यंदेवासोवथवाजसातौयंशूरसातामरुतोहितेधने । प्रा
तर्यावाणंरथमिंद्रसानसिमरिष्यंतमारुहेमास्वस्तये ॥ स्वस्तिनःपथ्यासुधन्वसुस्वस्त्य१प्सुवृजनेस्वर्वति । स्वस्तिनःपु
त्रकृथेषुयोनिषुस्वस्तिरायेमरुतोदधातन ॥ स्वस्तिरिद्धिप्रपथेश्रेष्ठारेक्णस्वत्यभियावाममेति । सानोऽअमासोऽअर
णेनिपातुस्वावेशाभवतुदेवगोपा ॥ एवाप्लुतेःसूनुरवीवृधद्वोविश्वऽआदित्याऽअदितेमनीषी । ईशानासोनरोऽअम
र्त्येनास्तावि जनोदिव्योगयेन ॥ ५ ॥ (१०।५।४) कथादेवानांकतमस्ययामनिसुमंतुनामशृण्वतांमनामहे । को
मृळातिकतमोनोमयस्करत्कतमऽऊतीऽअभ्याववर्तति ॥ क्रतूयंतिक्रतवोहृत्सुधीतयोवेनंतिवेनाःपतयंत्यादिशः ।
नमार्डितावि द्यतेऽअन्यऽएभ्योदेवेषुमेऽअधिकामाऽअयंसत ॥ नराशंसंपूषणमगोह्यमग्निंदेवेद्धमभ्यर्चसेगिरा ।

(१०।५।४) कथादेवानामितिसप्तदशर्चस्यसूक्तस्यगयःप्लातोविश्वेदेवाजगतीद्वादशीषोडशीसप्तदश्यस्त्रिष्टुभः (भेदपक्षे–विश्वेदेवाः४आदित्यार्यमणः१विश्वेदेवाः३नद्यः१विश्वेदेवाः४द्यावापृथिव्यौ१विश्वेदेवाः३एवं१७) ।

ऋक्सं. सूर्यामासाचंद्रमसायमंदिवित्रितंवातमुषसमक्तुमश्विना ॥ कथाकविस्तुवीरवान्कयागिराबृहस्पतिर्वावृधतेसुवृक्ति मंडलं १०
अ.८अ.२ भिः । अजऽएकपात्सुहवेभिर्ऋक्वभिरहिःशृणोतुबुध्न्यो३हवीमनि ॥ दक्षस्यवादितेजन्मनिव्रतेराजानामित्रावरुणावि अनु. ५
॥११॥ वाससि । अतूर्तपंथाःपुरुरथोऽअर्यमासप्तहोताविषुरूपेषुजन्मसु ॥ ६ ॥ तेनोऽअर्वंतोहवनश्रुतोहवंविश्वेशृण्वंतुवा
जिनोमितद्रवः । सहस्रसामेधसाताविवत्मनामहोयेधनंसमिथेषुजभ्रिरे+ ॥ प्रवोवायुंरथयुजंपुरंधिंस्तोमैःकृणुध्वंस
ख्यायपूषणं । तेहिदेवस्यसवितुःसवीमनिक्रतुंसचंतेसचितःसचेतसः ॥ त्रिःसप्तसस्रानद्योमहीरपोवनस्पतीन्पर्वताँऽ
अग्निमूतये । कृशानुमस्तॄन्तिष्यंसधस्थऽआरुद्रंरुद्रेषुरुद्रियंहवामहे ॥ सरस्वतीसरयुःसिंधुरूर्मिभिर्महोमहीरवसायंतु
वक्षणीः । देवीरापोमातरःसूदयित्वोघृतवत्पयोमधुमन्नोऽअर्चत ॥ उतमाताबृहद्दिवाशृणोतुनस्त्वष्टादेवेभिर्जनि
भिःपितावचः । ऋभुक्षावाजोरथस्पतिर्भगोरण्वःशंसःशशमानस्यपातुनः ॥ ७ ॥ रण्वःसंदृष्टौपितुमाँऽइववक्षयोभद्रा
रुद्राणामरुतामुपस्तुतिः । गोभिःष्यामयशसोजनेष्वासदादेवासऽइळयासचेमहि ॥ यांमेधियंमरुतऽइंद्रदेवाऽअद
दातवरुणमित्रयूयं । तांपीपयतपयसेवधेनुंकुविद्गिरोऽअधिरथेवहाथ ॥ कुविदंगप्रतियथाचिदस्यनःसजात्यस्यमरु ॥११॥
तोबुबोधथ । नाभायत्रप्रथमंसंनसामहेतत्रजामित्वमदितिर्दधातुनः ॥ तेहिद्यावापृथिवीमातरामहीदेवीदेवान्जन्म
नायज्ञियेऽइतः । उभेबिभृतऽउभयंभरीमभिःपुरूरेतांसिपितृभिश्चसिंचतः ॥ विषाहोत्राविश्वमश्नोतिवार्यंबृहस्पति

ररमतिःपनीयसी । ग्रावायत्रमधुषुदुच्यतेबृहदवीवशंतमतिभिर्मनीषिणः ॥ एवाकविस्तुवीरवाँऽऋतज्ञाद्रविणस्युर्द्रविणसश्चकानः । उक्थेभिरत्रमतिभिश्चविप्रोपीपयद्गयोदिव्यानिजन्म ॥ एवाप्लतेःसूनुरवीवृधद्वोविश्वऽआदित्याऽअदितेमनीषी । ईशानासोनरोऽअमर्त्येनास्ताविजनोदिव्योगयेन ॥८॥ (१०।५।५) अग्निरिंद्रोवरुणोमित्रोऽअर्यमावायुःपूषासरस्वतीसजोषसः । आदित्याविष्णुर्मरुतःस्वर्बृहत्सोमोरुद्रोऽअदितिर्ब्रह्मणस्पतिः ॥ इंद्राग्नीवृत्रहत्येषुसत्पतीमिथोहिन्वानातन्वा३समोकसा । अंतरिक्षंमह्यापप्रुरोजसासोमोघृतश्रीमहिमानमीरयन् ॥ तेषांहिमह्नामहतामनर्वणांस्तोमाँऽइयर्म्यृतज्ञाऽऋतावृधां । येऽअप्सवमर्णवंचित्रराधसस्तेनोरासंतांमहयेसुमित्र्याः+ ॥ स्वर्णरमंतरिक्षाणिरोचनाद्यावाभूमीपृथिवींस्कंभुरोजसा । पृक्षाऽइवमहयंतःसुरातयोदेवाःस्तवंतेमनुषायसूरयः ॥ मित्रायशिक्षवरुणायदाशुषेयासम्राजामनसानप्रयुच्छतः । ययोर्धामधर्मणारोचतेबृहद्ययोरुभेरोदसीनाधसीवृतौ ॥ ९ ॥ यागौर्वर्तनिंपर्येतिनिष्कृतंपयोदुहानाव्रतनीरवारतः । साप्रब्रुवाणावरुणायदाशुषेदेवेभ्योदाशद्धविषाविवस्वते ॥ दिवक्षसोऽअग्निजिह्वाऽऋतावृधऽऋतस्ययोनिंविमृशंतऽआसते । द्यांस्कभित्व्य१पऽआचक्रुरोजसायज्ञंजनित्वीतन्वी३नि

(१०।५।५) अग्निरिंद्रइतिपंचदशर्चस्यसूक्तस्यवासुक्रोवसुकर्णोविश्वेदेवाजगत्यंत्यात्रिष्टुप् (भेदपक्षे–विश्वेदेवाः४मित्रावरुणौ १ गौः १ विश्वेदेवाः१द्यावापृथिव्यौ१विश्वेदेवाः३अश्विनौ१विश्वेदेवाः३एवं१५) ।

मामृजुः ॥ परिक्षितापितरापूर्वजावरीऽऋतस्ययोनाक्षयतःसमोकसा । द्यावापृथिवीवरुणायसव्रतेघृतवत्पयोमहि
षायपिन्वतः ॥ पर्जन्यावातावृषभापुरीषिणेंद्रवायूवरुणोमित्रोऽअर्यमा । देवाँऽऽआदित्याँऽअदितिंहवामहेयेपार्थि
वासोदिव्यासोऽअप्सुये+ ॥ त्वष्टारंवायुमृभवोयऽओहतेदैव्याहोताराऽउषसंस्वस्तये । बृहस्पतिंवृत्रखादंसुमेधस
मिंद्रियंसोमंधनसाऽउऽईमहे ॥ १० ॥ ब्रह्मगामश्वंजनयंतऽओषधीर्वनस्पतीन्पृथिवींपर्वताँऽअपः । सूर्यंदिविरोह
यंतःसुदानवऽआर्याव्रताविसृजंतोऽअधिक्षमि ॥ भुज्युमंहसःपिपृथोनिरश्विनाश्यावंपुत्रंवध्रिमत्याऽअजिन्वतं । क
मद्युवंविमदायोहथुर्युवंविष्णाप्वं१विश्वकायावसृजथः ॥ पावीरवीतन्यतुरेकपादजोदिवोधर्तासिंधुरापःसमुद्रियः ।
विश्वेदेवासःशृणवन्वचांसिमेसरस्वतीसहधीभिःपुरंध्या ॥ विश्वेदेवाःसहधीभिःपुरंध्यामनोर्यजत्राऽअमृताऽऋत
ज्ञाः । रातिषाचोऽअभिषाचःस्वर्विदःस्व१र्गिरोब्रह्मसूक्तंजुषेरत ॥ देवान्वसिष्ठोऽअमृतान्ववंदेयेविश्वाभुवनाभिप्र
तस्थुः । तेनोरासंतामुरुगायमद्ययूयंपातस्वस्तिभिःसदानः ॥ ११ ॥ (१०।५।६) देवान्हुवेबृहच्छ्रवसःस्वस्तयेज्योति
ष्कृतोऽअध्वरस्यप्रचेतसः । येवावृधुःप्रतरंविश्ववेदसऽइंद्रज्येष्ठासोऽअमृताऽऋतावृधः ॥ इंद्रप्रसूतावरुणप्रशिष्टा
येसूर्यस्यज्योतिषोभागमानशुः । मरुद्गणेवृजनेमन्मधीमहिमाघोनेयज्ञंजनयंतसूरयः ॥ इंद्रोवसुभिःपरिपातुनोगयं

(१०।५।६)देवान्हुवइतिपंचदशर्चस्यसूक्तस्यवसुकर्णोविश्वेदेवाजगत्यंत्यात्रिष्टुप्(भेदपक्षे–विश्वेदेवाः६अग्नीषोमौ१विश्वेदेवाः८एवं१५)।

मादि॒त्यैर्नो॒॑ऽअदि॑ति॒ःशर्म॑यच्छतु । रु॒द्रोरु॒द्रेभि॑र्दे॒वोमृ॑ळयातिन॒स्त्वष्टा॑नो॒ग्नाभि॑ःसुवि॒ता॑यजिन्वतु ॥ अदि॑ति॒र्द्यावा॑पृथि॒वीऽऋ॒तंम॒हदिंद्रा॒विष्णू॑म॒रुत॒ःस्व॑र्बृ॒हत् । दे॒वाँऽआ॑दि॒त्याँऽअव॑सेहवामहे॒वसू॑न्रु॒द्रान्त्स॑वि॒ता॑रँसु॒दंस॑सं ॥ सर॑स्वान्धी॒भिर्व॑रुणोधृ॒तव्र॑तःपू॒षाविष्णु॑र्महि॒मावा॒युर॒श्विना॑ । ब्र॒ह्म॒कृतो॑ऽअ॒मृता॑वि॒श्ववे॑दस॒ःशर्म॑नोयंसन्त्रि॒वरू॑थ॒मंह॑सः ॥१२॥ वृषा॑य॒ज्ञोवृष॑णःसंतुय॒ज्ञिया॒वृष॑णोदे॒वावृष॑णोहवि॒ष्कृत॑ः । वृष॑णा॒द्यावा॑पृथि॒वीऽऋ॒ताव॑री॒वृषा॑प॒र्ज॑न्यो॒वृष॑णोवृष॒स्तुभ॑ः॥ अ॒ग्नीषोमा॒वृष॑णा॒वाज॑सातयेपुरु॑प्रश॒स्तावृष॑णा॒ऽउप॑ब्रुवे । यावी॑जि॒रेवृष॑णोदेवय॒ज्यया॒तान॒ःशर्म॑त्रि॒वरू॑थं॒विय॑ꣳसतः ॥ धृ॒तव्र॑ताःक्ष॒त्रिया॑यज्ञनि॒ष्कृतौ॑बृहद्दि॒वाऽअ॑ध्व॒राणा॑मभि॒श्रिय॑ः । अ॒ग्निहो॑तारऽऋत॒सापो॑ऽअ॒द्रुहो॒पोऽअ॑सृज॒न्ननु॑वृत्र॒तूर्ये॑ ॥ द्यावा॑पृथि॒वीज॑नयन्न॒भिव्र॒ताप॒ऽओष॑धीर्व॒निना॑निय॒ज्ञिया॑ । अं॒तरि॑क्ष॒ंस्व॑१॒राप॑प्रु॒रू॒तये॒वशं॑दे॒वास॑स्त॒न्वी॒३ निमा॑मृजुः ॥ ध॒र्तारो॑दि॒वऽऋ॒भव॑ःसु॒हस्ता॑वातापर्ज॒न्याम॑हि॒षस्य॑तन्य॒तोः । आप॒ऽओष॑धी॒ःप्रति॑रंतुनो॒गिरो॒भगो॑रा॒तिर्वा॒जिनो॑यंतुमे॒हव॑ं ॥ १३ ॥ स॒मु॒द्रःसिंधू॒रजो॑ऽअ॒ंतरि॑क्षम॒जऽएक॑पात्तनयि॒त्नुरर्ण॒वः । अहि॑र्बु॒ध्न्य॑ःशृ॒णव॒द्वचाँ॑सिमे॒विश्वे॑दे॒वास॑ऽउ॒तसू॒रयो॒मम॑ ॥ स्याम॑वो॒मन॑वोदे॒ववी॑तये॒प्रांच॑ंनोय॒ज्ञंप्रण॑यतसा॒धुया॑ । आदि॑त्या॒रुद्रा॒वस॑व॒ःसुदा॑नवऽइ॒माब्रह्म॑श॒स्यमा॑नानिजिन्वत॥ दैव्या॒होता॑राप्रथ॒मापु॒रोहि॑तऽऋ॒तस्य॒पंथा॒मन्वे॑मिसा॒धुया॑।क्षेत्र॑स्य॒पति॒ंप्राति॑वेशमीमहे॒विश्वा॑न्दे॒वाँऽअ॒मृता॒ँऽअप्र॑युच्छतः ॥ वसि॑ष्ठासःपितृ॒वद्वाच॑मक्रतदे॒वाँऽईळा॑नाऽऋषि॒वत्स्व॒स्तये॑ । प्री॒ताऽइ॑वज्ञा॒तय॒ःकाम॒मेत्या॒

स्मेदेवासोवंधूनुतावसु ॥ देवान्वसिष्ठोऽअमृतान्ववंदेयेविश्वाभुवनाभिप्रतस्थुः । तेनोरासंतामुरुगायमद्ययूयंपात
स्वस्तिभिःसदानः ॥ १४ ॥ (१०।५।७) इमांधियंसप्तशीर्ष्णींपितानऽऋतप्रजातांबृहतीमविंदत् । तुरीयंस्विज्ज
नयद्विश्वजन्योयास्यऽउक्थमिंद्रायशंसन् ॥ ऋतंशंसंतऽऋजुदीध्यानादिवस्पुत्रासोऽअसुरस्यवीराः । विप्रंपदमंगि
रसोदधानायज्ञस्यधामप्रथमंमनंत ॥ हंसैरिवसखिभिर्वावदद्भिरश्मन्मयानिनहनाव्यस्यन् । बृहस्पतिरभिकनिक्र
दद्गाऽउतप्रास्तौदुच्चविद्वाँऽअगायत् ॥ अवोद्वाभ्यांपरऽएकयागागुहातिष्ठंतीरनृतस्यसेतौ । बृहस्पतिस्तमसिज्यो
तिरिच्छन्नुदुस्राऽआकर्विहितिस्रऽआवः ॥ विभिद्यापुरंशयथेमपाचींनिस्त्रीणिसाकमुदधेरकृंतत् । बृहस्पतिरुषसंसू
र्यंगामर्कंविवेदस्तनयन्निवद्यौः+ ॥ इंद्रोवलंरक्षितारंदुघानांकरेणेवविचकर्तारवेण । स्वेदांजिभिराशिरमिच्छमानो
रोदयत्पणिमागाऽअमुष्णात् ॥ १५ ॥ सऽईंसत्येभिःसखिभिःशुचद्भिर्गोधायसंविधनसैरदर्दः । ब्रह्मणस्पतिर्वृषभि
र्वराहैर्घर्मस्वेदेभिर्द्रविणंव्यानट् ॥ तेसत्येनमनसागोपतिंगाऽइयानासऽइषणयंतधीभिः । बृहस्पतिर्मिथोऽअवद्यपे
भिरुदुस्रियाऽअसृजतस्वयुग्भिः ॥ तंवर्धयंतोमतिभिःशिवाभिःसिंहमिवनानदतंसधस्थे । बृहस्पतिंवृषणंशूरसातौ ॥१३॥
भरेभरेऽअनुमदेमजिष्णुं+ ॥ यदावाजमसनद्विश्वरूपमाद्यामरुक्षदुत्तराणिसद्म । बृहस्पतिंवृषणंवर्धयंतोनानासंतो

(१०।५।७) इमांधियमितिद्वादशर्चस्यसूक्तस्यांगिरसोऽयास्योबृहस्पतिस्त्रिष्टुप् ।

विभ्रतोज्योतिरासा+ ॥ सत्यामाशिषंकृणुतावयोधैकीरिंचिद्ध्यवथःस्वेभिरेवैः । पश्चामृधोऽअपभवंतुविश्वास्तद्रोद
सीशृणुतंविश्वमिन्वे+ ॥ इंद्रोमह्नामहतोऽअर्णवस्यविमूर्धानमभिनदर्बुदस्य । अहन्नहिमरिणात्सप्तसिंधूंदेवैर्द्यावा
पृथिवीप्रावतंनः ॥ १६ ॥ (१०।५।८) उदप्रुतोनवयोरक्षमाणावावदतोऽअभ्रियस्येवघोषाः । गिरिभ्रजोनोर्म
योमदंतोबृहस्पतिमभ्य१र्काऽअनावन् ॥ संगोभिरांगिरसोनक्षमाणोभगऽइवेदर्यमणंनिनाय । जनेमित्रोनदंपतीऽ
अनक्तिबृहस्पतेवाजयाशूँरिवाजौ+ ॥ साध्वर्याऽअतिथिनीरिषिराःस्पार्हाःसुवर्णाऽअनवद्यरूपाः । बृहस्पतिःपर्वते
भ्योवितूर्यानिर्गाऽऊपेयवमिवस्थिविभ्यः ॥ आप्रुषायन्मधुनऽऋतस्ययोनिमवक्षिपन्नर्कऽउल्कामिवद्योः । बृहस्प
तिरुद्धरन्नश्मनोगाभूम्याऽउद्नेववित्वचंबिभेद ॥ अपज्योतिषातमोऽअंतरिक्षादुद्नःशीपालमिववातऽआजत् । बृह
स्पतिरनुमृश्यावलस्याभ्रमिववातऽआचक्रऽआगाः+ ॥ यदावलस्यपीयतोजसुंभेद्बृहस्पतिरग्नितपोभिरर्कैः । दद्भि
र्नजिह्वापरिविष्टमाददाविर्निधीँरकृणोदुस्रियाणां ॥ १७ ॥ बृहस्पतिरमतहित्यदासांनामस्वरीणांसदनेगुहायत् ।
आंडेवभित्त्वाशकुनस्यगर्भमुदुस्रियाःपर्वतस्यत्मनाजत् ॥ अश्नापिनद्धंमधुपर्यपश्यन्मत्स्यंनदीनऽउदनिक्षियंतं । नि
ष्टज्जभारचमसंनवृक्षाद्बृहस्पतिर्विरवेणाविकृत्य ॥ सोषामविंदत्सःस्व१ःसोऽअग्निंसोऽअर्केणविबबाधेतमांसि । बृह

(१०।५।८) उदप्रुतइतिद्वादशर्चस्यसूक्तस्यायास्योबृहस्पतिस्त्रिष्टुप् ।

स्पतिर्गोवपुषोवलस्यनिर्मज्जानंनपर्वणोजभार ॥ हिमेवपर्णामुषितावनानिबृहस्पतिनाकृपयद्वलोगाः । अनानुकृत्य
मपुनश्चकारयात्सूर्यामासामिथऽउच्चरातः ॥ अभिश्यावंनकृशनेभिरश्वंनक्षत्रेभिःपितरोद्यामपिंशन् । रात्र्यांतमोऽ
अदधुर्ज्योतिरहन्बृहस्पतिर्भिनदद्रिंविदद्गाः+ ॥ इदमकर्मनमोऽअभ्रियाययःपूर्वीरन्वानोनवीति । बृहस्पतिःसहि
॥१४॥ गोभिःसोऽअश्वैःसवीरेभिःसनृभिर्नोवयोधात् ॥ १८ ॥ (१०।६।१) भद्राऽअग्नेर्वध्र्यश्वस्यसंदृशोवामीप्रणीतिः
सुरणाऽउपेतयः । यदींसुमित्राविशोऽअग्रऽइंधतेघृतेनाहुतोजरतेदविद्युतत् ॥ घृतमग्नेर्वध्र्यश्वस्यवर्धनंघृतमन्नंघृत
म्वस्यमेदनं । घृतेनाहुतऽउर्वियाविप्रथेसूर्यऽइवरोचतेसर्पिरासुतिः ॥ यत्तेमनुर्यदनीकंसुमित्रःसमीधेऽअग्नेतदिदं
नवीयः । सरेवच्छोचसगिरोजुषस्वसवाजंदर्षिसऽइहश्रवोधाः ॥ यंत्वापूर्वमीळितोवध्र्यश्वःसमीधेऽअग्नेसऽइदंजुष
स्व । सनःस्तिपाऽउतभवातनूपादात्रंरक्षस्वयदिदंतेऽअस्मे+ ॥ भवाद्युम्नीवाध्र्यश्वोतगोपामात्वातारीदभिमातिर्जना
नां । शूरऽइवधृष्णुश्च्यवनःसुमित्रःप्रनुवोचंवाध्र्यश्वस्यनाम ॥ समज्र्यापर्वत्या३वसूनिदासावृत्राण्यार्याजिगेथ ।
शूरऽइवधृष्णुश्च्यवनोजनानांत्वमग्नेपृतनायूँरभिष्याः ॥ १९ ॥ दीर्घतंतुर्बृहदुक्षायमग्निःसहस्रस्तरीःशतनीथऽऋ ॥१४॥
भ्वा । द्युमान्द्युमत्सुनृभिर्मृज्यमानःसुमित्रेषुदीदयोदेवयत्सु ॥ त्वेधेनुःसुदुघाजातवेदोसश्चतेवसमनासबर्धुक् । त्वं

षष्ठेनुवाकेषोळशसूक्तानि (१०।६।१) भद्राअग्नेरितिद्वादशर्चस्यसूक्तस्यवाध्र्यश्वःसुमित्रोग्निस्त्रिष्टुबाद्येद्वेजगत्यौ ।

नृभिर्दक्षिणावद्भिरग्नेसुमित्रोभिरिध्यसेदेवयद्भिः ॥ देवाश्चित्तेऽअमृताजातवेदोमहिमानंवाध्र्यश्वप्रवोचन् । यत्संपृच्छंमानुषीर्विशऽआयन्त्वंनृभिरजयस्त्वावृधेभिः ॥ पितेवपुत्रमबिभरुपस्थेत्वामग्नेवध्र्यश्वःसपर्यन् । जुषाणोऽअस्यसमिधंयविष्ठोतपूर्वाँऽअवनोर्व्राधतश्चित् ॥ शश्वदग्निर्वध्र्यश्वस्यशत्रून्नृभिर्जिगायसुतसोमवद्भिः । समनंचिददहश्चित्रभानोवव्राधंतमभिनद्वृधश्चित् ॥ अयमग्निर्वध्र्यश्वस्यवृत्रहासनकात्प्रेद्धोनमसोपवाक्यः । सनोऽअजामीँरुतवाविजामीनभितिष्ठशर्धतोवाध्र्यश्व ॥ २० ॥ (१०।६।२) इमांमेऽअग्नेसमिधंजुषस्वेळस्पदेप्रतिहर्याघृताचीं । वर्ष्मन्पृथिव्याःसुदिनत्वेऽअह्नामूर्ध्वोभवसुक्रतोदेवयज्या+ ॥ आदेवानामग्रयावेहयातुनराशंसोविश्वरूपेभिरश्वैः । ऋतस्यपथानमसामियेधोदेवेभ्योदेवतमःसुषूदत् ॥ शश्वत्तममीळतेदूत्यायहविष्मंतोमनुष्यासोऽअग्निं । वर्हिष्ठैरश्वैःसुवृतारथेनादेवान्वक्षिनिषदेहहोता ॥ विप्रथतांदेवजुष्टंतिरश्चादीर्घंद्राघ्मासुरभिभूत्वस्मे । अहेळतामनसादेवबर्हिरिन्द्रज्येष्ठाँऽउशतोयक्षिदेवान्+ ॥ दिवोवासानुस्पृशतावरीयःपृथिव्यावामात्रयाविश्रयध्वं । उशतीर्द्वारोमहिनामहद्भिर्देवंरथंरथयुर्धारयध्वं ॥ २१ ॥ देवीदिवोदुहितरासुशिल्पेऽउषासानक्तासदतांनियोनौ । आवांदेवासऽउशती

(१०।६।२) इमांमइत्येकादशर्चस्यसूक्तस्यवाध्र्यश्वःसुमित्रइध्मोनराशंसइळोबर्हिर्देवीर्द्वारउषासानक्तादैव्यौहोतारौप्रचेतसौसरस्वतीळाभारत्यस्त्वष्टावनस्पतिःस्वाहाकृतयस्त्रिष्टुप् ।

ऋक्सं. उशंतऽउशंतऽउरौसीदंतुसुभगेऽउपस्थे॥ ऊर्ध्वोग्रावाबृहदग्निःसमिद्धःप्रियाधामान्यदितेरुपस्थे । पुरोहितावृत्विजायज्ञेऽ मंडलं १०
अ.८अ.२ अस्मिन्विदुष्टराद्रविणमायजेथां ॥ तिस्रोदेवीर्बर्हिरिदंवरीयऽआसीदतचकृमावःस्योनं । मनुष्वद्यज्ञंसुधिताहवींषी अनु. ६
॥१५॥ ळांदेवीघृतपदीजुषंत ॥ देवत्वष्टर्यद्धचारुत्वमानड्यदंगिरसामभवःसचाभूः । सदेवानांपाथऽउपप्रविद्वानुशन्यक्षि
द्रविणोदःसुरत्नः ॥ वनस्पतेरशनयानियूयादेवानांपाथऽउपवक्षिविद्वान् । स्वदातिदेवःकृणवद्धवींष्यवतांद्यावापृ
थिवीहवंमे ॥ आग्नेवहवरुणमिष्टयेनऽइंद्रंदिवोमरुतोऽअंतरिक्षात् । सीदंतुबर्हिर्विश्वऽआयजत्राःस्वाहादेवाऽअमृ
तामादयंतां ॥ २२ ॥ (१०।६।३) बृहस्पतेप्रथमंवाचोऽअग्रंयत्प्रैरतनामधेयंदधानाः । यदेषांश्रेष्ठंयदरिप्रमासी
त्प्रेणातदेषांनिहितंगुहाविः+ ॥ सक्तुमिवतितउनापुनंतोयत्रधीरामनसावाचमक्रत । अत्रासखायःसख्यानिजान
तेभद्रैषांलक्ष्मीर्निहिताधिवाचि+ ॥ यज्ञेनवाचःपदवीयमायन्तामन्वविंदन्नृषिषुप्रविष्टां । तामाभृत्याव्यदधुःपुरुत्रा
तांसप्तरेभाऽअभिसंनवंते ॥ उतत्वःपश्यन्नददर्शवाचमुतत्वःशृण्वन्नशृणोत्येनां । उतोत्वस्मैतन्वं१विसस्रेजायेवपत्य
ऽउशतीसुवासाः ॥ उतत्वंसख्येस्थिरपीतमाहुर्नैनंहिन्वंत्यपिवाजिनेषु । अधेन्वाचरतिमाययैषवाचंशुश्रुवाँऽअफ ॥१५॥
लामपुष्पां+ ॥ २३ ॥ यस्तित्याजसचिविदंसखायंनतस्यवाच्यपिभागोऽअस्ति । यदींशृणोत्यलकंशृणोतिनहिप्रवेद

(१०।६।३) बृहस्पतइत्येकादशर्चस्यसूक्तस्यांगिरसोबृहस्पतिर्ज्ञानंत्रिष्टुपनवमीजगती ।

सुकृ॒तस्य॒पंथां॑ ॥ अ॒क्ष॒ण्वंत॒ःकर्ण॑वंत॒ःसखा॑योमनोज॒वेष्वस॑माबभूवुः । आ॒द॒घ्नास॑ऽउपक॒क्षास॑ऽउत्वेह्र॒दाऽइ॑व॒स्नात्वा॑ऽउत्वेददृश्रे ॥ ह्र॒दात॒ष्टेषु॒मन॑सोज॒वेषु॒यद्ब्रा॑ह्म॒णाःसं॒यजं॑ते॒सखा॑यः । अत्राह॑त्वं॒विज॑हुर्वे॒द्याभि॒रोह॑ब्रह्मा॒णो॒विच॑रंत्युत्वे ॥ इ॒मेयेनार्वाङ्न॒प॒रश्चरं॑ति॒नब्रा॑ह्म॒णास॒ोनसु॒तेक॑रासः । तऽए॒तेवाचं॑मभि॒पद्य॑पा॒पया॑सि॒रीस्तंत्रं॑तन्वते॒ऽअप्र॑जज्ञयः ॥ सर्वे॑नंदंतिय॒शसा॒गते॑नसभासा॒हेन॒सख्या॒सखा॑यः । कि॒ल्बि॒ष॒स्पृत्पि॑तु॒षणि॒र्ह्ये॑षा॒मरं॑हि॒तोभव॑ति॒वाजि॑नाय ॥ ऋ॒चांत्व॒ःपोष॑मास्तेपुपु॒ष्वान्गा॑य॒त्रंत्वो॑गायति॒शक्व॑रीषु । ब्र॒ह्मात्वो॒वद॑तिजातवि॒द्यांय॒ज्ञस्य॒मात्रां॒विमि॑मीतऽउत्वः ॥ २४ ॥ ॥ इत्यष्टमाष्टकेद्वितीयोध्यायः ॥ २ ॥ ॥ ॥ ॥ ॥ ॥

अष्टपंचाशाध्यायेवर्गाः २४ सूक्तानि १० ऋचः १३३ ॥ त्यागः ॥ अंगिरोभ्य. ६ विश्वेभ्योदेवेभ्य. सावर्णय. ४ विश्वेभ्योदेवेभ्य. ९ नौरूपायैदिव. विश्वेभ्योदेवेभ्य. ४ पथ्यायैस्वस्तय. २ विश्वेभ्योदेवेभ्य. ५ अदित्यर्यमभ्या. विश्वेभ्योदेवेभ्य. ८ द्यावापृथिवीभ्या. विश्वेभ्योदेवेभ्य. ७ मित्रावरुणाभ्या. गवइ. विश्वेभ्योदेवेभ्य. द्यावापृथिवीभ्या. विश्वेभ्योदेवेभ्य. ३ अश्विभ्या. विश्वेभ्योदेवेभ्य. ९ अग्नीषोमाभ्या. विश्वेभ्योदेवेभ्य. ८ बृहस्पतय. २४ अग्नय. १२ समिद्धायाग्नय. नराशंसाये. इळाये. बर्हिषइ. देवीभ्योद्वार्भ्यइ. उषासानक्ताभ्या. देवीभ्यांहोतृभ्यांप्रचेतोभ्या. सरस्वतीळाभारतीभ्य. त्वष्ट्रे. वनस्पतय. स्वाहाकृतीभ्य. ज्ञानाये. ११ इत्यष्टमेद्वितीयः ॥

देवानांनवलौक्योवाबृहतिर्दाक्षायण्यादितिर्वादेवमानुष्टुभंजानिष्ठाएकादशगौरिवीतिर्वसूनांषट्प्रसुनवासिंधुक्षि
त्प्रैयमेधौंनदीस्तुतिर्जागतंत्वावोष्टौसर्पऐरावतौजरत्कर्णौग्राव्णोस्तौदभ्रप्रुषःस्यूमरश्मिर्भार्गवौमारुतंतुपंचमी
जगतींविप्रासोद्वितीयापंचम्याद्याश्चतिस्रोजगत्यौपश्यंसप्तसौचीकोग्निर्वैश्वानरोवासप्तिर्वावाजंभरऽआग्नेयंत्वं
ग्निःसाक्षिंयऽइमाविश्वाविश्वकर्माभौवनौवैश्वकर्माणंतुद्वितीयाविराड्रूपाचक्षुषौयस्तेमन्योमन्युस्तापसौमान्यवं
त्वाद्याजगतींत्वयामन्योचतुर्जगत्यंतंसत्येनसप्तचत्वारिंशत्सावित्रींसूर्यात्मदैवतमानुष्टुभंपंचभिःसोममस्तौत्प
राभिःस्वविवाहंसप्तदश्यादेवान्परयासोमाकौंपरयाचंद्रमसंपरानृणांविवाहमंत्राआशीःप्रायाःपरादेहीतिद्वेव
धूवासःसंस्पर्शनिंदार्थंपरायक्ष्मनाशिनींदंपत्योर्नवोनवस्तिस्रोनृक्षरागृभ्णामीतिद्वेद्वेयदश्विनापूषाघोरचक्षुरि
तित्रिष्टुभस्तृष्टमुरोबृहतीपूर्वापरंमिहप्रियमानःप्रजांजगत्यः ॥ ३ ॥ ॥ ॥ ॥

॥ हरिःओम् ॥ (१०।६।४) दे॒वानां॒नुव॒यंजाना॒प्रवो॑चामविप॒न्यया॑ । उ॒क्थेषु॑श॒स्यमा॑नेषु॒यःपश्या॒दुत्त॑रेयु॒
गे+ ॥ ब्रह्म॑ण॒स्पति॑रे॒तासंक॒र्मार॑ऽइवाधमत् । दे॒वानां॑पू॒र्व्येयु॒गेस॑त॒ःसद॑जायत ॥ दे॒वानां॑यु॒गेप्र॑थ॒मेस॑त॒ःसद॑जायत ।
तदाशा॒ऽअन्व॑जायंत॒तदु॑त्ता॒नप॑द॒स्परि॑ ॥ भूर्ज॑ज्ञऽउत्ता॒नप॑दोभु॒वऽआशा॑ऽअजायंत । अदि॑ते॒र्दक्षो॑ऽअजायत॒दक्षा॒द्व

(१०।६।४) देवानामितिनवर्चस्यसूक्तस्यलौक्योबृहस्पतिर्देवाअनुष्टुप् (आंगिरसोवाबृहस्पतिऋषिर्दाक्षायण्यदितिर्वाऋषिका)।

दितिःपरि ॥ अदितिर्ह्यजनिष्टदक्षयादुहितातव । तांदेवाऽअन्वजायंतभद्राऽअमृतबंधवः ॥ १ ॥ यद्देवाऽअदः सलिलेसुसंरब्धाऽअतिष्ठत । अत्रावोनृत्यतामिवतीव्रोरेणुरपायत ॥ यद्देवायतयोयथाभुवनान्यपिन्वत । अत्रासमुद्रऽआगूह्ळमासूर्यमजभर्तन ॥ अष्टौपुत्रासोऽअदितेर्येजातास्तन्व१स्परि । देवाँऽउपप्रैत्सप्तभिःपरामार्तांडमास्यत् ॥ सप्तभिःपुत्रैरदितिरुपप्रैत्पूर्व्ययुगं । प्रजायैमृत्यवेत्वत्पुनर्मार्तांडमाभरत् ॥ २ ॥ (१०।६।५) जनिष्ठाऽउग्रः सहसेतुरायमंद्रऽओजिष्ठोबहुलाभिमानः । अवर्धन्निंद्रंमरुतश्चिदत्रमातायद्वीरंदधनद्धनिष्ठा ॥ द्रुहोनिषत्तापृशनीचिदेवैःपुरूशंसेनवावृधुष्टऽइंद्रं । अभीवृतेवतामहापदेनध्वांतात्प्रपित्वादुदरंतगर्भाः ॥ ऋष्वातेपादाप्रयज्जिगास्यवर्धन्वाजाऽउतयेचिदत्र । त्वामिंद्रसालावृकान्सहस्रमासन्दधिषेऽअश्विनाववृत्याः ॥ समनातूर्णिरुपयासियज्ञमानासत्यासख्यायवक्षि । वसाव्यामिंद्रधारयःसहस्राश्विनाशूरददतुर्मघानि ॥ मंदमानऽऋतादधिप्रजायैसखिभिरिंद्रऽइषिरेभिरर्थं । आभिर्हिमायाऽउपदस्युमागान्मिहःप्रतम्राऽअवपत्तमांसि ॥ ३ ॥ सनामानाचिद्ध्वसयोन्यस्माऽअवाहन्निंद्रऽउषसोयथानः । ऋष्वैरगच्छःसखिभिर्निकामैःसाकंप्रतिष्ठाहृद्याजघंथ ॥ त्वंजघंथनमुचिंमखस्युंदासंकृण्वानऽऋषयेविमायं । त्वंचकर्थमनवेस्योनान्पथोदेवत्रांजसेवयानान् ॥ त्वमेतानिपप्रिषेविनामेशानऽइंद्रदधिषे

(१०।६।५) जनिष्ठाइत्येकादशर्चस्यसूक्तस्यशाक्त्योगौरिवीतिरिंद्रस्त्रिष्टुप् ।

गभस्तौ । अनुत्वादेवाःशवसामदंत्युपरिबुध्नान्वनिनश्चकर्थ ॥ चक्रंयदस्याप्स्वानिषत्तमुतोतदस्मैमध्विच्चच्छद्यात् । पृ
थिव्यामतिषितंयदूधःपयोगोष्वदधाऽओषधीषु ॥ अश्वादियायेतियद्वदंत्योजसोजातमुतमन्यऽएनं । मन्योरियाय
हर्म्येषुतस्थौयतःप्रजज्ञऽइंद्रोऽअस्यवेद ॥ वयःसुपर्णाऽउपसेदुरिंद्रंप्रियमेधाऽऋषयोनाधमानाः । अपध्वांतमूर्णु
हिपूर्धिचक्षुर्मुमुग्ध्य१स्मान्निधयेवबद्धान्+ ॥ ४ ॥ (१०।६।६) वसूनांवाचर्कृषऽइयक्षन्धियावायज्ञैर्वारोदस्योः ।
अर्वंतोवायेरयिमंतःसातौवनुंवायेसुश्रुणंसुश्रुतोधुः+ ॥ हवऽएषामसुरोनक्षतद्यांश्रवस्यतामनसानिंसतक्षां । चक्षाणा
यत्रसुवितायदेवाद्यौर्नवारेभिःकृणवंतस्वैः+ ॥ इयमेषाममृतानांगीःसर्वतातायेकृपणंतरत्नं । धियंचयज्ञंचसाधंतस्ते
नोधांतुवसव्य१मसामि ॥ आतत्तऽइंद्रायवःपनंताभियऽऊर्वंगोमंतंतितृत्सान् । सकृत्स्व१येपुरुपुत्रांमहींसहस्रधा
रांबृहतींदुदुक्षन् ॥ शचीवऽइंद्रमवसेकृणुध्वमनानतंदमयंतंपृतन्यून् । ऋभुक्षणंमघवानंसुवृक्तिंभर्तायोवज्रंनर्यंपुरु
क्षुः+॥यद्वावानपुरुतमंपुराषाळावृत्रहेंद्रोनामान्यप्राः। अचेतिप्रासहस्पतिस्तुविष्मान्यदीमुश्मसिकर्तवेकरत्तत्+॥५॥
(१०।६।७) प्रसुवऽआपोमहिमानमुत्तमंकारुर्वोचातिसदनेविवस्वतः । प्रसप्तसप्तत्रेधाहिचक्रमुःप्रसृत्वरीणामतिसिं ॥१७॥
धुरोजसा॥प्रतेरदद्वरुणोयातवेपथःसिंधोयद्वाजाँऽअभ्यद्रवस्त्वं।भूम्याऽअधिप्रवतायासिसानुनायदेषामग्रंजगतामिर

(१०।६।६) वसूनामितिषळर्चस्यसूक्तस्यगौरिवीतिरिंद्रस्त्रिष्टुप् । (१०।६।७) प्रसुवइतिनवर्चस्यसूक्तस्यप्रैयमेधःसिंधुक्षिन्नद्योजगती ।

ज्यसि ॥ दिविस्वनोयततेभूम्योपर्यनंतंशुष्ममुदियर्तिभानुना । अभ्रादिवप्रस्तनयंतिवृष्टयःसिंधुर्यदेतिवृषभोनरोरुवत् ॥ अभित्वासिंधोशिशुमिन्नमातरोवाश्राऽअर्षतिपयसेवधेनवः । राजेवयुध्वानयसित्वमित्सिचौयदासामग्रंप्रवतामिनक्षसि ॥ इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या । असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया ॥ ६ ॥ (परिशिष्टं ॥ सितासितेसरितेयत्रसंगथेतत्राप्लुतासोदिवमुत्पतंति । येवैतन्वं१विसृजंतिधीरास्तेजनासोऽअमृतत्वंभजंते ॥१॥) तृष्टामयाप्रथमंयातवेसजूःसुसर्त्वारसयाश्वेत्यात्या । त्वंसिंधोकुभयागोमतींक्रुमुंमेहत्न्वासरथंयाभिरीयसे ॥ ऋजीत्येनीरुशतीमहित्वापरिज्रयांसिभरतेरजांसि । अदब्धासिंधुरपसामपस्तमाश्वानचित्रावपुषीवदर्शता+ ॥ स्वश्वासिंधुःसुरथासुवासाहिरण्ययीसुकृतावाजिनीवती । ऊर्णावतीयुवतिःसीलमावत्युताधिवस्तेसुभगामधुवृधं ॥ सुखंरथंयुयुजेसिंधुरश्विनंतेनवाजंसनिषदस्मिन्नाजौ । महान्ह्यस्यमहिमापनस्यतेदब्धस्यस्वयशसोविरप्शिनः ॥ ७ ॥ (१०।६।८) आवऽऋंजसऽऊर्जांव्युष्टिष्विंद्रंमरुतोरोदसीऽअनक्तन । उभेयथानोऽअहनीसचाभुवासदःसदोवरिवस्यातऽउद्भिदा ॥ तदुश्रेष्ठंसवनंसुनोतनात्योनहस्तयतोऽअद्रिःसोतरि । विदद्ध्य१र्योऽअभिभूतिपौंस्यंमहोरायेचित्तरुतेयदर्वतः ॥ तदिद्ध्यस्यसवनंविवेरपोयथापुरामनवेगातुमश्रेत् । गोऽअर्णसित्वाष्ट्रेऽअ

(१०।६।८) आवऋंजसइत्यष्टर्चस्यसूक्तस्यैरावतोजरत्कर्णःसर्पोग्रावाणोजगती ।

श्वंनिर्णिजिप्रेमंध्वरेष्वंध्वराँऽअशिश्रयुः ॥ अपहतरक्षसोभंगुरावतःस्कभायतनिर्ऋतिंसेधतामतिं । आनोरयिंसर्ववी
रंसुनोतनदेवाव्यंभरतश्लोकमद्रयः ॥ दिवश्चिदावोमवत्तरेभ्योविभ्वनाचिदाश्वपस्तरेभ्यः । वायोश्चिदासोमरभस्त
रेभ्योग्नेश्चिदर्चपितुकृत्तरेभ्यः ॥ ८ ॥ भुरंतुनोयशसःसोत्वंधसोग्रावाणोवाचादिवितादिवित्मता । नरोयत्रदुहतेका
म्यंमध्वाघोषयंतोऽअभितोमिथस्तुरः ॥ सुन्वंतिसोमंरथिरासोऽअद्रयोनिरस्यरसंगविषोदुहंतिते । दुहंत्यूधरुपसेचं
नायकंनरोहव्यानमर्जयंतऽआसभिः ॥ एतेनरःस्वपसोऽअभूतनयऽइंद्रायसुनुथसोममद्रयः । वामंवामंवोदिव्या
यधाम्नेवसुवसुवःपार्थिवायसुन्वते+॥ ९ ॥ (१०।६।९) अभ्रप्रुषोनवाचाप्रुषावसुहविष्मंतोनयज्ञाविजानुषः। सुमारुं
तंनब्रह्माणमर्हसेगणमस्तोष्येषांनशोभसे ॥ श्रियेमर्यासोऽअंजीँऽरकृण्वतसुमारुतंनपूर्वीरतिक्षपः । दिवस्पुत्रासऽ
एतानयेंतिरऽआदित्यासस्तेऽअक्रानवावृधुः ॥ प्रयेदिवःपृथिव्यानबर्हणात्मनारिरिच्रेऽअभ्रान्नसूर्यः । पाजस्वंतो
नवीराःपनस्यवोरिशादसोनमर्याऽअभिद्यवः ॥ युष्माकंबुध्नेऽअपांनयामनिविथुर्यतिनमहीश्रथर्यति । विश्वप्सुर्यज्ञो
ऽअर्वागयंसुवःप्रयस्वंतोनसत्राचऽआगंत ॥ यूयंधूर्षुप्रयुजोनरश्मिभिर्ज्योतिष्मंतोनभासाव्युष्टिषु । श्येनासोनस्वयं
शसोरिशादसःप्रवासोनप्रसितासःपरिप्रुषः ॥ १० ॥ प्रयद्वहध्वेमरुतःपराकाद्यूयंमहःसंवरणस्यवस्वः । विदानासो

(१०।६।९) अभ्रप्रुषइत्यष्टर्चस्यसूक्तस्यभार्गवःस्यूमरश्मिर्मरुतस्त्रिष्टुप्पंचमीजगती ।

वसवोराध्यंस्याराच्चिद्द्वेषःसनुतर्युयोत ॥यऽउद्दाचियज्ञेऽअध्वरेष्ठामरुद्भ्योनमानुषोददाशत् । रेवत्सवयोदधतेसुवीरंस
देवानामपिगोपीथेऽअस्तु ॥ तेहियज्ञेषुयज्ञियासऽऊमाऽआदित्येननाम्नाशंभविष्ठाः। तेनोवंतुरथतूर्मनीषांमहश्चयाम
न्नध्वरेचकानाः+ ॥ ११ ॥ (१०।६।१०) विप्रासोनमन्मभिःस्वाध्योदेवाव्यो३ नयज्ञैःस्वप्नसः । राजानोनचित्राः
सुसंदृशःक्षितीनांनमर्याऽअरेपसः ॥ अग्निर्नयेभ्राजसारुक्मवक्षसोवातासोनस्वयुजःसद्यऽऊतयः । प्रज्ञातारोनज्ये
ष्ठाःसुनीतयःसुशर्माणोनसोमाऽऋतंयते+ ॥ वातासोनयेधुनयोजिगत्नवोग्नीनांनजिह्वाविरोकिणः । वर्मण्वंतोनयो
धाःशिमीवंतःपितॄणांनशंसाःसुरातयः ॥ रथानांनये१राःसनाभयोजिगीवांसोनशूराऽअभिद्यवः । वरेयवोनमर्याघृ
तप्रुषोभिस्वर्तारोऽअर्कंनसुष्टुभः ॥ अश्वासोनयेज्येष्ठासऽआशवोदिधिषवोनरथ्यःसुदानवः । आपोननिम्नैरुदभिर्जि
गत्नवोविश्वरूपाऽअंगिरसोऽनसामभिः ॥ १२ ॥ ग्रावाणोनसूरयःसिंधुमातरऽआदर्दिरासोऽअद्रयोनविश्वहा ।
शिशूलानक्रीळयःसुमातरोमहाग्रामोनयामन्नुतत्विषा+ ॥ उषसांनकेतवोध्वरश्रियःशुभंयवोनांजिभिर्व्यश्वितन् ।
सिंधवोनययियोभ्राजदृष्टयःपरावतोनयोजनानिममिरे ॥ सुभागान्नोदेवाःकृणुतासुरत्नानस्मान्स्तोतॄन्मरुतोवावृधा

(१०।६।१०) विप्रासइत्यष्टर्चस्यसूक्तस्यस्यूमरश्मिर्मरुतस्त्रिष्टुप्द्वितीयापंचम्याद्याश्चतस्रश्चजगत्यः।

नाः । अधिंस्तोत्रस्यंसख्यस्यंगातसनाद्धिवारेत्वधयानिसाति ॥ १३ ॥ (१०।६।११) अपंश्यमस्यमहतोमंहित्वम
मंर्त्यस्यमर्त्यांसुविक्षु । नानाहनूविभृंतेसंभंरेतेऽअसिंन्वतीबप्संतीभूयंत्तः ॥ गुहाशिरोनिहिंतमृधंगक्षीऽअसिंन्वन्न
त्तिजिह्वयावनांनि । अत्रांण्यस्मैपड्भिःसंभंरंत्युत्तानहंस्तानमसाधिंविक्षु+ ॥ प्रमातुःप्रंतरंगुह्यंमिच्छन्कुंमारोनवीरुधंः
सर्पदुर्वीः । ससंनपक्कमंविदच्छुचंतंरिरिह्वांसंरिपऽउपस्थेंऽअंतः+ ॥ तद्वांमृतंरोदसीप्रब्रंवीमिजायंमानोमातरागर्भो
ऽअत्ति । नाहंदेवस्यमर्त्यश्चिकेताग्निरंगविचेताःसप्रचेताः ॥ योऽअंस्माऽअन्नंतृष्वा३दधात्याज्यैर्घृतैर्जुहोतिपुष्यंति ।
तस्मैसहस्रमक्षभिर्विचक्षेग्नेविश्वतंःप्रत्यङ्ङ्सित्वं+ ॥ किंदेवेषुत्यजऽएनंश्चकर्थाग्नेपृच्छामिनुत्वामविंद्वान् । अक्रीळन्क्री
ळन्हरिरत्तंवेदन्विपर्वशश्चंकर्तगामिंवासिः+ ॥ विषूंचोऽअश्वांन्युयुजेवनेजाऽऋजींतिभीरशनाभिर्गृभीतान् । चक्ष
देमित्रोवसुंभिःसुजातःसमांनृधेपर्वभिर्वावृधानः+ ॥ १४ ॥ (१०।६।१२) अग्निःसप्तिंवाजंभरंदंदात्यग्निर्वीरंश्रु
त्यंकर्मनिःष्ठां । अग्नीरोदंसीविचंरत्समंजन्नग्निर्नारींवीरकुंक्षिंपुरंधिं ॥ अग्नेरप्नंसःसमिदंस्तुभद्राग्निर्महीरोदंसीऽआविं
वेश । अग्निरेकंचोदयत्समत्स्वग्निर्वृत्राणिंदयतेपुरूणिं ॥ अग्निर्हत्यंजरंतःकर्णमावाग्निरद्भ्योनिरंदहज्जरूथं । अग्निरत्रिं

(१०।६।११) अपश्यमितिसप्तर्चस्यसूक्तस्यसौचीकोग्निरग्निस्त्रिष्टुप् (वैश्वानरोग्निर्वाजंभरःसप्तिरितीमावृषीपाक्षिकौ)। (१०।६।१२) अग्निःसप्तिमितिसप्तर्चस्यसूक्तस्यसौचीकोग्निरग्निस्त्रिष्टुप् (वैश्वानरोग्निर्वाजंभरःसप्तिरितीमावृषीपाक्षिकौ)।

घर्मऽउरुष्यदंतरग्निर्नृमेधंप्रजयासृजत्सं+ ॥ अग्निर्दाद्रविणंवीरपेशाऽअग्निर्ऋषिंयःसहस्रासनोति । अग्निर्दिविहव्यमाततानाग्नेर्धामानिविभृतापुरुत्रा+ ॥ अग्निमुक्थैर्ऋषयोविह्वयंतेग्निंनरोयामनिबाधितासः । अग्निंवयोऽअंतरिक्षेपतंतोग्निःसहस्रापरियातिगोनाँ ॥ अग्निंविशऽईळतेमानुषीर्याऽअग्निंमनुषोनहुषोविजाताः । अग्निर्गांधर्वींपथ्यामृतस्याग्नेर्गव्यूतिर्घृतऽआनिषत्ता ॥ अग्नयेब्रह्मऽऋभवस्ततक्षुरग्निंमहामवोचामासुवृक्तिं । अग्नेप्रावजरितारँयविष्ठाग्नेमहिद्रविणमायजस्व ॥ १५ ॥ (१०।६।१३) ॥ यऽइमाविश्वाभुवनानिजुह्वदृषिर्होतान्यसीदत्पितानः । सऽआशिषाद्रविणमिच्छमानःप्रथमच्छदवराँऽआविवेश ॥ किंस्विदासीदधिष्ठानमारंभणंकतमत्स्वित्कथासीत् । यतोभूमिंजनयन्विश्वकर्माविद्यामौर्णोन्महिनाविश्वचक्षाः ॥ विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् । संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकः ॥ किंस्विद्वनंकऽउसवृक्षऽआसयतोद्यावापृथिवीनिष्टतक्षुः । मनीषिणोमनसापृच्छतेदुतद्यदध्यतिष्ठद्भुवनानिधारयन् ॥ यातेधामानिपरमाणियावमायामध्यमाविश्वकर्मन्नुतेमा । शिक्षासखिभ्योहविषिस्वधावःस्वयंयजस्वतन्वंवृधानः+ ॥ विश्वकर्मन्हविषावावृधानःस्वयंयजस्वपृथिवीमुतद्यां । मुह्यँत्वन्येऽअभितोजनासऽइहास्माकँमघवासूरिरस्तु ॥ वाचस्पतिंविश्वकर्माणमूतयेमनोजुवंवाजेऽअद्याहुवेम । सनोविश्वानि

(१०।६।१३) यइमाविश्वेतिसप्तर्चस्यसूक्तस्यभौवनोविश्वकर्माविश्वकर्मात्रिष्टुप्द्वितीयाविराड्रूपा ।

हवंनानिजोषद्विश्वशंभूरवंसेसाधुकर्मा ॥ १६ ॥ (१०।६।१४) चक्षुषःपितामनंसाहिधीरोघृतमेनेऽअजनन्नन्नमा
ने । यदेदंताऽअदंदृहंतपूर्वऽआदिद्द्यावापृथिवीऽअंप्रथेतां ॥ विश्वकर्माविमनाऽआद्विहायाधाताविधातापरमोतसं
दृक् । तेषामिष्टानिसमिषामदंतियत्रासप्तऽऋषीन्परऽएकमाहुः+ ॥ योनःपिताजनितायोविधाताधामानिवेदभुवना
॥२०॥ निविश्वा । योदेवानांनामधाऽएकंएवतंसंप्रश्नंभुवनायंत्यन्या+ ॥ तऽआयजंतद्रविणंसमस्माऽऋषयःपूर्वेजरितारोन
भूना । असूर्तेसूर्तेरजसिनिषत्तेयेभूतानिसमकृण्वन्निमानि ॥ परोदिवापरऽएनापृथिव्यापरोदेवेभिरसुरैर्यदस्ति । कंस्वि
द्गर्भंप्रथमंदध्रऽआपोयत्रदेवाःसमपश्यंतविश्वे ॥ तमिद्गर्भंप्रथमंदध्रऽआपोयत्रदेवाःसमगच्छंतविश्वे । अजस्यनाभा
वध्येकमर्पितंयस्मिन्विश्वानिभुवनानितस्थुः+ ॥ नतंविदाथयऽइमाजनानान्यद्युष्माकमंतरंबभूव । नीहारेणप्रावृता
जल्प्याचासुतृपऽउक्थशासश्चरंति ॥ १७ ॥ (१०।६।१५) यस्तेमन्योविधद्वज्रसायकसहऽओजःपुष्यतिविश्वमा
नुषक् । साह्यामदासमार्यंत्वयायुजासहस्कृतेनसहसासहस्वता ॥ मन्युरिंद्रोमन्युरेवासदेवोमन्युर्होतावरुणोजातवे
दाः । मन्युंविशऽईळतेमानुषीर्याःपाहिनोमन्योतपसासजोषाः ॥ अभीहिमन्योतवसस्तवीयान्तपसायुजाविजहिश ॥२०॥

(१०।६।१४) चक्षुषइतिसप्तर्चस्यसूक्तस्यविश्वकर्माविश्वकर्मात्रिष्टुप् । (१०।६।१५) यस्तेमन्योइतिसप्तर्चस्यसूक्तस्यतापसोमन्युर्मन्युस्त्रिष्टुबाद्याजगती ।

त्रून् । अमित्रहावृत्रहादस्युहाचविश्वावसून्याभरात्वंनः ॥ त्वंहिमन्योऽअभिभूत्योजाःस्वयंभूर्भामोऽअभिमातिषाहः । विश्वचर्षणिःसहुरिःसहावानस्मास्वोजःपृतनासुधेहि ॥ अभागःसन्नपपरेतोऽअस्मितवक्रत्वातविषस्यप्रचेतः । तंत्वामन्योऽअक्रतुर्जिहीळाहंस्वातनूर्बलदेयायमेहि ॥ अयंतेऽअस्म्युपमेह्यर्वाङ्प्रतीचीनःसहुरेविश्वधायः । मन्योवज्रिन्नभिमामाववृत्स्वहनावदस्यूँरुतबोध्यापेः+ ॥ अभिप्रेहिदक्षिणतोभवामेधावृत्राणिजंघनावभूरि । जुहोमितेधरुणंमध्वोऽअग्रमुभाऽउपांशुप्रथमापिबाव ॥ १८ ॥ (१०।६।१६) त्वयामन्योसरथमारुजंतोहर्षमाणासोधृषितामरुत्वः । तिग्मेषवऽआयुधासंशिशानाऽअभिप्रयंतुनरोऽअग्निरूपाः ॥ अग्निरिवमन्योत्विषितःसहस्वसेनानीर्नःसहुरेहूतऽएधि । हत्वायशत्रून्विभजस्ववेदऽओजोमिमानोविमृधोनुदस्व ॥ सहस्वमन्योऽअभिमातिमस्मेरुजन्मृणन्प्रमृणन्प्रेहिशत्रून् । उग्रंतेपाजोनन्वारुरुध्रेवशीवशंनयसऽएकजत्वं+ ॥ एकोबहूनामसिमन्यवीळितोविशंविशंयुधयेसंशिशाधि । अकृत्तरुक्त्वयायुजावयंद्युमंतंघोषंविजयायकृण्महे ॥ विजेषकृदिंद्रऽइवानवब्रवो३स्माकंमन्योऽअधिपाभवेह । प्रियंतेनामसहुरेगृणीमसिविद्मातमुत्संयतऽआबभूथ ॥ आभूत्यासहजावज्रसायकसहोबिभर्ष्यभिभूतऽउत्तरं । क्रत्वानोमन्योसहमेद्येधिमहाधनस्यपुरुहूतसंसृजि ॥ संसृष्टंधनमुभयंसमाकृतमस्मभ्यंदत्तांवरुणश्चमन्युः । भि

(१०।६।१६) त्वयामन्यविंतिसप्तर्चस्यसूक्तस्यतापसोमन्युर्मन्युर्जगतीआद्यास्तिस्रस्त्रिष्टुभः ।

यंदधानाहृदयेषुशत्रवःपराजितासोऽअपनिलयंता ॥ १९ ॥ (१०।७।१) सत्येनोत्तभिताभूमिःसूर्येणोत्तभिताद्यौः।
ऋतेनादित्यास्तिष्ठंतिदिविसोमोऽअधिश्रितः ॥ सोमेनादित्याबलिनःसोमेनपृथिवीमही । अथोनक्षत्राणामेषामुपस्थे
सोमऽआहितः ॥ सोमंमन्यतेपपिवान्यत्संपिंषंत्योषधिं । सोमंयंब्रह्माणोविदुर्नतस्याश्नातिकश्चन+ ॥ आच्छद्विधा
नैर्गुपितोबार्हतैःसोमरक्षितः । ग्राव्णामिच्छृण्वन्तिष्ठसिनतेऽअश्नातिपार्थिवः ॥ यत्त्वादेवप्रपिबंतिततऽआप्यायसे
पुनः । वायुःसोमस्यरक्षितासमानांमासऽआकृतिः ॥ २० ॥ रैभ्यासीदनुदेयीनाराशंसीन्योचनी । सूर्यायाभद्रमि
द्वासोगाथयैतिपरिष्कृतं ॥ चित्तिराऽउपबर्हणंचक्षुराऽअभ्यंजनं । द्यौर्भूमिःकोशऽआसीद्यदयात्सूर्यापतिं ॥ स्तोमा
ऽआसन्प्रतिधयःकुरीरंछंदऽओपशः । सूर्यायाऽअश्विनावराग्निरासीत्पुरोगवः+ ॥ सोमोवधूयुरभवदश्विनास्तामुभा
वरा । सूर्यांयत्पत्येशंसंतींमनसासविताददात् ॥ मनोऽअस्याऽअनऽआसीद्द्यौरासीदुतच्छदिः । शुक्रावनड्वाहावास्तां

सप्तमेनुवाकेषट्सूक्तानि। (१०।७।१) सत्येनेतिसप्तचत्वारिंशदृचस्यसूक्तस्यसूर्यासावित्रीऋषिकापंचानांसोमोदेवतातत एकादशानांसूर्या
विवाहःसप्तदश्यादेवाःअष्टादश्याःसोमार्कौएकोनविंश्याश्चंद्रमाःततोनवानांनृणांविवाहमंत्राआशीःप्रायाःततोद्वयोर्वासोदेवताएकत्रिंश्या
यक्ष्महाशिष्टानामृचांसूर्यासावित्रीअनुष्टुप्चतुर्दशीएकोनविंश्यादितिस्रस्त्रयोविंशीचतुर्विंशीषड्विंशीषट्त्रिंशीसप्तत्रिंशीचतुश्चत्वारिंश्यश्च
त्रिष्टुभःअष्टादशीसप्तविंशीत्रिचत्वारिंश्यश्चजगत्यःचतुस्त्रिंश्युरोबृहती ।

यदयात्सूर्यागृहं+ ॥२१॥ ऋक्सामाभ्यामभिहितौगावौतेसामनावितः । श्रोत्रंतेचक्रेऽआस्तांदिविपंथाश्चराचरः+॥ शुचीतेचक्रेयात्याव्यानोऽअक्षऽआहतः । अनोमनस्मयंसूर्यारोहत्प्रयतीपतिं ॥ सूर्यायावहतुःप्रागात्सवितायमवासृजत् । अघासुहन्यंतेगावोर्जुन्योःपर्युह्यते ॥ यदश्विनापृच्छमानावयातंत्रिचक्रेणवहतुंसूर्यायाः । विश्वेदेवाऽअनुतद्वामजानन्पुत्रःपितरावृणीतपूषा+ ॥ यदयातंशुभस्पतीवरेयंसूर्यामुप । क्वैकंचक्रंवामासीत्क्वदेष्ट्रायतस्थथुः॥२२॥ द्वेतेचक्रेसूर्येब्रह्माणऽऋतुथाविदुः । अथैकंचक्रंयद्गुहातदद्धातयऽइद्विदुः ॥ सूर्यायैदेवेभ्योमित्रायवरुणायच । येभूतस्यप्रचेतसऽइदंतेभ्योकरंनमः ॥ पूर्वापरंचरतोमाययैतौशिशूक्रीळंतौपरियातोऽअध्वरं । विश्वान्यन्योभुवनाभिचष्टऽऋतूरन्योविदधज्जायतेपुनः ॥ नवोनवोभवतिजायमानोह्नांकेतुरुषसामेत्यग्रं । भागंदेवेभ्योविदधात्यायन्प्रचंद्रमास्तिरतेदीर्घमायुः ॥ सुकिंशुकंशल्मलिंविश्वरूपंहिरण्यवर्णंसुवृतंसुचक्रं । आरोहसूर्येऽअमृतस्यलोकंस्योनंपत्येवहतुंकृणुष्व ॥ २३ ॥ उदीर्ष्वातःपतिवतीह्ये३षाविश्वावसुंनमसागीर्भिरीळे । अन्यामिच्छपितृषदंव्यक्तांसतेभागोजनुषातस्यविद्धि ॥ उदीर्ष्वातोविश्वावसोनमसेळामहेत्वा । अन्यामिच्छप्रफर्व्यं१संजायांपत्यासृज ॥ अनृक्षराऽऋजवःसंतुपंथायेभिःसखायोयंतिनोवरेयं । समर्यमासंभगोनोनिनीयात्संजास्पत्यंसुयममस्तुदेवाः ॥ प्रत्वामुंचामिवरुणस्यपाशाद्येनत्वाबध्नात्सवितासुशेवः । ऋतस्ययोनौसुकृतस्यलोकेरिष्टांत्वासहपत्यादधामि ॥ प्रेतोमुंचामिनामुतःसुब

द्धाम॒मुत॑स्करं । य॒थेयमिँ॑द्रमीढ्वःसु॒पु॒त्रासु॒भगास॑ति ॥ २४ ॥ पू॒षात्वे॒तोन॑यतुहस्त॒गृह्या॒श्विना॑त्वा॒प्रव॑हतां॒रथे॑न । गृ॒हा
न्गच्छगृ॒हप॑त्नी॒यथासो॑व॒शिनी॒त्वंवि॒दथ॒माव॑दासि ॥ इ॒हप्रि॒यंप्र॒जया॑ते॒समृ॑ध्यताम॒स्मिन्गृ॒हेगार्ह॑पत्यायजागृहि । ए॒ना
पत्या॑त॒न्वं॑१॒संसृ॑ज॒स्वाधा॒जिव्रीँ॑वि॒दथ॒माव॑दाथः ॥ नी॒ल॒लो॒हि॒तंभ॑वतिकृ॒त्यास॒क्तिर्व्यँ॑ज्यते । एधँ॑तेऽअस्याज्ञा॒तय॒ःपति॑
र्बं॒धेषु॑बध्यते ॥ परा॑देहिशामु॒ल्यँ॑ब्र॒ह्मभ्यो॒विभं॑जा॒वसु॑ । कृ॒त्यैषाप॒द्वतीँ॑भूत्व्याजा॒याविँ॑शते॒पतिँ॑ ॥ अ॒श्री॒रात॒नूर्भँ॑वति॒रु
शं॑तीपा॒पया॑मु॒या । पति॒र्यद्व॒ध्वो॒३॒वास॑सा॒स्वमंग॑मभि॒धित्सं॑ते ॥ २५ ॥ येव॒ध्व॑श्चं॒द्रंव॑ह॒तुंयक्ष्मा॒यंति॒जना॒दनुं॑ । पुन॒स्ता
न्य॒ज्ञिया॑दे॒वानयँ॑तु॒यत॒ऽआगं॑ताः ॥ माविँ॑दन्परिपं॒थिनो॒यऽआ॒सीदँ॑ति॒दंप॑ती । सु॒गेभि॑र्दु॒र्गमती॑ता॒मप॑द्रा॒त्वरा॑तयः ॥
सु॒मं॒ग॒लीरि॒यंव॒धूरि॒मांस॒मेत॒पश्यं॑त । सौभां॑ग्यमस्यैद॒त्वायाथास्तं॒विप॑रेतन ॥ तृ॒ष्टमे॒तत्कटु॑कमे॒तद॑पा॒ष्ठव॑द्वि॒षव॒न्नैतद
त्तवे॑ । सू॒र्यांयोब्र॒ह्मावि॒द्यात्सऽइद्वाधूँ॑यमर्ह॑ति ॥ आ॒शसं॑नंवि॒शसं॑न॒मथोँ॑ऽअधिवि॒कर्तँ॑नं । सू॒र्यायाः॑पश्यरू॒पाणि॒तानिँ॑
ब्र॒ह्मातुशुँ॑धति ॥ २६ ॥ गृ॒भ्णामि॑तेसौभ॑ग॒त्वाय॒हस्तं॒मया॒पत्यां॑ज॒रदं॑ष्टि॒र्यथासः॑ । भगोँ॑ऽअर्य॒मासं॑वि॒तापुरँ॑धि॒र्मह्यँ॑त्वा
दु॒र्गार्ह॑पत्यायदे॒वाः+ ॥ तांपूँ॑षन्छि॒वत॑मा॒मेरँ॑यस्व॒यस्यां॒बीजं॑मनु॒ष्या॒३॒वपँ॑ति । यान॑ऽऊ॒रूऽउ॑श॒तीवि॒श्रया॑ते॒यस्यां॑मु॒शंतः॑ ॥२२॥
प्र॒हरा॑म॒शेपँ॑ ॥ तुभ्य॒मग्रे॒पर्यँ॑वहन्सू॒र्यां॑वह॒तुना॑स॒ह । पुन॒ःपति॑भ्योजा॒यांदाऽअ॑ग्नेप्र॒जया॑स॒ह+ ॥ पुन॒ःपत्नी॑म॒ग्निर॑दा॒दा
यु॑षास॒हवर्चँ॑सा । दी॒र्घायुँ॑रस्या॒यःपति॒र्जीवाँ॑तिश॒रदँ॑ःश॒तं+ ॥ सोमँ॑ःप्रथमो॒विँ॑विदेगंध॒र्वोविँ॑विद॒ऽउत्तँ॑रः । तृ॒तीयोँ॑ऽ

अग्निष्टेपतिस्तुरीयस्तेमनुष्यजाः+ ॥ २७ ॥ सोमोददद्गंधर्वायगंधर्वोददद्ग्नये । रयिंचपुत्रांश्चादादग्निर्मह्यमथोऽइमां+ ॥ इहैवस्तंमावियौष्टंविश्वमायुर्व्यश्नुतं । क्रीळंतौपुत्रैर्नप्तृभिर्मोदमानौस्वेगृहे+ ॥ आनःप्रजांजनयतुप्रजापतिराजरसायसमनक्त्वर्यमा । अदुर्मंगलीःपतिलोकमाविशशंनोभवद्विपदेशंचतुष्पदे ॥ अघोरचक्षुरपतिघ्न्येधिशिवापशुभ्यःसुमनाःसुवर्चाः । वीरसूर्देवकामास्योनाशंनोभवद्विपदेशंचतुष्पदे ॥ इमांत्वमिंद्रमीढ्वःसुपुत्रांसुभगांकृणु । दशास्यांपुत्रानाधेहिपतिमेकादशंकृधि ॥ सम्राज्ञीश्वशुरेभवसम्राज्ञीश्वश्र्वांभव । ननांदरिसम्राज्ञीभवसम्राज्ञीऽअधिदेवृषु ॥ समंजंतुविश्वेदेवाःसमापोहृदयानिनौ । संमातरिश्वासंधातासमुदेष्ट्रीदधातुनौ ॥ २८ ॥ (॥ परिशिष्टं ॥ ॥ अविधवाभववर्षाणिशतंसाग्रंतुसुव्रता । तेजस्वीचयशस्वीचधर्मपत्नीपतिव्रता ॥ जनयद्बहुपुत्राणिमाचदुःखंलभेत्क्वचित् । भर्तातेसोमपानित्यंभवेद्धर्मपरायणः ॥ अष्टपुत्राभवत्वंचसुभगाचपतिव्रता । भर्तुश्चैवपितुर्भ्रातुहृदयानंदिनीसदा ॥ इंद्रस्यतुयथेंद्राणीश्रीधरस्ययथाश्रिया । शंकरस्ययथागौरीतद्भर्तुरपिभर्तरि ॥ अत्रेर्यथानुसूयास्याद्वसिष्ठस्याप्यरुंधती । कौशिकस्ययथासतीतथात्वमपिभर्तरि ॥ ध्रुवैधिपोष्यामयिमह्यंत्वादाद्बृहस्पतिः । मयापत्याप्रजावतीसंजीवशरदःशतं ॥) इत्यष्टमाष्टकेतृतीयोऽध्यायः ॥ ३ ॥ ॥ ॥

एकोनषष्ठ्यध्यायेवर्गाः २८ सूक्तानि १४ ऋचः १४८ ॥ त्यागः ॥ देवेभ्य. ९. इंद्राये. १७ नदीभ्य. ९ ग्राव्णइ. ८ मरुद्भ्य. १६ अग्नय. १४ विश्वकर्मण. १४ मन्यव. १४ सोमाये. ५ सूर्याविवाहाये. ११ देवेभ्य. सोमार्काभ्या. चंद्रमस. सूर्यासावित्र्या. ९ वधूवाससइ. २ राजयक्ष्मघ्नइ. सूर्यासावित्र्या. १६ ॥ इत्यष्टमेतृतीयः ॥

विहित्र्यधिकैंद्रोवृषाकपिरिंद्राणींद्रश्चसमूदिरेपाङ्क्तंरक्षोहणंपंचाधिकापायुराग्नेयंराक्षोघ्नंचतुरनुष्टुबंतंहविरेको नांगिरसोमूर्धन्वान्वामदेव्योवासौर्यवैश्वानरीयमिंद्रंस्तवद्भूनारेणुःपंचम्यैंद्रासोमीसहस्रशीर्षाषोडशनारायणः पौरुषमानुष्टुभंत्रिष्टुबंतंतुसंजागृवद्भिःपंचोनारुणोवैतहव्यआग्नेयंयज्ञस्यशार्यातोमानवोवैश्वदेवंतुजागतंमहि तान्वःपार्थ्यःप्रस्तारपाङ्क्तंपुरस्ताद्बृहत्यंतंत्रयोदश्युपाद्येचानुष्टुभौनवम्यक्षरैःपङ्क्तिरेकादशीन्यंकुसारिणीप्रैतेष ळूनासर्पोर्बुदःकाद्रवेयोग्राव्णोस्तौत्सप्तम्यंत्येत्रिष्टुभौपंचमीच ॥ ४ ॥ ॥ ॥

॥ हरिःओम् ॥ (१०।७।२) विहिसोतोरसृक्षतनेंद्रंदेवममंसत । यत्रामदद्वृषाकपिरर्यःपुष्टेषुमत्सखाविश्वस्मा

(१०।७।२) विहिसोतोरितित्रयोविंशत्यृचेसूक्तेआद्याष्टम्येकादशीद्वादशीचतुर्दशीनामेकोनविंश्यादिचतसृणांचेंद्रऋषिःसप्तमीत्रयोदशीत्रयोविंशीनामैंद्रोवृषाकपिऋषिः शिष्टानामेकादशर्चांपौलोमींद्राणीऋषिकाइंद्रःपंक्तिः।(अत्रयस्यवाक्यमितिपरिभाषांस्वीकृत्यइंद्रेंद्राणिवृषाकपीनांविभागशोदेवतात्वंकेचिन्मन्यंतेतद्भाष्यकारादिविरुद्धं)।

दिंद्रऽउत्तरः ॥ पराहींद्रधावसिवृषाकपेरतिव्यथिः । नोऽअहप्रविंदस्यन्यत्रसोमंपीतयेविश्वं० ॥ किमयंत्वांवृषाकपिश्च
कारहरितोमृगः । यस्माऽइरस्यसीदुन्व१र्योवापुष्टिमद्वसुविश्वं० ॥ यमिमंत्वंवृषाकपिंप्रियमिंद्राभिरक्षसि । श्वान्वस्यजं
भिषदपिकर्णेवराहयुर्विश्वं० ॥ प्रियातष्टानिमेकपिर्व्यक्ताव्यदूदुषत् । शिरोन्वस्यराविषंनसुगंदुष्कृतेभुवंविश्वं० ॥१॥
नमत्स्त्रीसुभसत्तरानसुयाशुतराभुवत् । नमत्प्रतिच्यवीयसीनसक्थ्युद्यमीयसीविश्वं०॥ उवेऽअंबसुलाभिकेयथेवांगभं
विष्यति । भसन्मेऽअंबसक्थिमेशिरोमेवीवहृष्यतिविश्वं० ॥ किंसुबाहोस्वंगुरेपृथुष्टोपृथुजाघने । किंशूरपत्नि
नस्त्वमभ्यमीषिवृषाकपिंविश्वं० ॥ अवीरामिवमामयंशरारुरभिमन्यते । उताहमस्मिवीरिणींद्रपत्नीमरुत्सखावि
श्वं० ॥ संहोत्रंस्मपुरानारीसमनंवावगच्छति । वेधाऽऋतस्यवीरिणींद्रपत्नीमहीयतेविश्वं० ॥ २ ॥ इंद्राणीमासु
नारिषुसुभगामहमश्रवं । नह्यस्याऽअपरंचनजरसामरतेपतिर्विश्वं० ॥ नाहमिंद्राणिराणसख्युर्वृषाकपेर्ऋते । यस्ये
दमप्यंहविःप्रियंदेवेषुगच्छतिविश्वं० ॥ वृषाकपायिरेवतिसुपुत्रऽआदुसुस्नुषे । घसत्तऽइंद्रऽउक्षणःप्रियंकाचित्करंह
विर्विश्वं० ॥ उक्ष्णोहिमेपंचदशसाकंपचंतिविंशतिं । उताहमद्मिपीवऽइदुभाकुक्षीपृणंतिमेविश्वं० ॥ वृषभोनतिग्मशृं
गोंतर्यूथेषुरोरुवत् । मंथस्तऽइंद्रशंहृदेयंतेसुनोतिभावयुर्विश्वं० ॥ ३ ॥ नसेशेयस्यरंबतेंतरासक्थ्या३कपृत् । सेदीशे
यस्यरोमशंनिषेदुषोविजृंभतेविश्वं०॥ नसेशेयस्यरोमशंनिषेदुषोविजृंभते । सेदीशेयस्यरंबतेंतरासक्थ्या३कपृद्विश्वं० ॥

अयमिंद्रवृषाकपिःपरस्वंतंहतंविदत् । असिसूनानवंचरुमादेधस्यानऽआचितंविश्वं० ॥ अयमेमिविचाकशद्विचिन्वन्दा
समार्यं । पिबामिपाकसुत्वनोभिधीरमचाकशंविश्वं० ॥ धन्वचयत्कृंतत्रंचकातिंस्वित्तावियोजना । नेदीयसोवृषाकपे
स्तमेहिंगृहाँऽउपविश्वं०॥ पुनरेहिवृषाकपेसुवितांकल्पयावहै । यऽएषःस्वप्ननंशनोस्तमेषिपथापुनर्विश्वं० ॥ यदुदंचोवृ
षाकपेगृहमिंद्राजगंतन । क्व१स्यपुल्वघोमृगःकमंगन्जनयोपनोविश्वं० ॥ पर्शुर्हनाममानवीसाकंससूवविंशतिं । भद्रंभ
लत्यस्याऽअभूद्यस्याऽउदरमामयद्विश्वं० ॥४॥ (१०।७।३) रक्षोहणंवाजिनमाजिघर्मिमित्रंप्रथिष्ठमुपयामिशर्म । शिशा
नोऽअग्निःक्रतुभिःसमिद्धःसनोदिवासरिषःपातुनक्तं॥ अयोदंष्ट्रोऽअर्चिषायातुधानानुपस्पृशजातवेदःसमिद्धः । आजि
ह्वयामूरंदेवान्रभस्वक्रव्यादोवृक्त्व्यपिधत्स्वासन्+॥ उभोभयाविन्नुपधेहिदंष्ट्राहिंस्रःशिशानोवरंपरंच । उतांतरिक्षेपरि
याहिराजन्जंभैःसंधेह्यभियातुधानान् ॥ यज्ञैरिषूःसन्नममानोऽअग्नेवाचाशल्याँऽअशनिभिर्दिहानः । ताभिर्विध्यहृद
येयातुधानान्प्रतीचोबाहून्प्रतिभङ्ध्येषां ॥ अग्नेत्वचंयातुधानस्यभिंधिहिंस्राशनिर्हरसाहंत्वेनं । प्रपर्वाणिजातवेदःशृ
णीहिक्रव्यात्क्रविष्णुर्विचिनोतुवृक्णं+॥५॥ यत्रेदानींपश्यसिजातवेदस्तिष्ठंतमग्नऽउतवाचरंतं । यद्वांतरिक्षेपथिभिःपतं
तंतमस्ताविध्यशर्वाशिशानः॥ उतालब्धंस्पृणुहिजातवेदऽआलेभानादृष्टिभिर्यातुधानात् । अग्नेपूर्वोनिजहिशोशुचानऽ

(१०।७।३) रक्षोहणमितिपंचविंशत्यृचस्यसूक्तस्यभारद्वाजःपायूरक्षोहाग्निस्त्रिष्टुप् अंत्याश्चतस्रोनुष्टुभः ।

आमादःक्ष्विंकास्तमदंत्वेनीः ॥ इहप्रब्रूहियतमःसोऽअग्नेयोयातुधानोयऽइदंकृणोति । तमारंभस्वसमिधायविष्ठनृचक्षसश्चक्षुषेरंधयैनं ॥ तक्ष्णेनाग्नेचक्षुषारक्षयज्ञंप्रांचंवसुभ्यःप्रणयप्रचेतः । हिंस्रंरक्षांस्यभिशोशुचानंमात्वादभन्यातुधानांनृचक्षः ॥ नृचक्षारक्षःपरिपश्यविक्षुतस्यत्रीणिप्रतिशृणीह्यग्रा । तस्याग्नेपृष्टीर्हरसाशृणीहित्रेधामूलंयातुधानस्यवृश्च ॥ ६ ॥ त्रिर्यातुधानःप्रसितिंतऽएत्वृतंयोऽअग्नेऽअनृतेनहंति । तमर्चिषास्फूर्जयन्जातवेदःसमक्षमेनंगृणतेनिवृङ्धि ॥ तदग्नेचक्षुःप्रतिधेहिरेभेशफारुजंयेनपश्यसियातुधानं । अथर्ववज्ज्योतिषादैव्येनसत्यंधूर्वंतमचितंन्योष ॥ यदग्नेऽअद्यमिथुनाशपातोयद्वाचस्तृष्टंजनयंतरेभाः । मन्योर्मनसःशरव्या१जायतेयातयाविध्यहृदयेयातुधानान् ॥ पराशृणीहितपसायातुधानान्पराग्नेरक्षोहरसाशृणीहि । परार्चिषामूरदेवाञ्छृणीहिपरासुतृपोऽअभिशोशुचानः ॥ पराद्यदेवावृजिनंशृणंतुप्रत्यगेनंशपथायंतुतृष्टाः । वाचास्तेनंशरवऽऋच्छंतुमर्मन्विश्वस्यैतुप्रसितिंयातुधानः ॥ ७ ॥ यःपौरुषेयेणक्रविषासमङ्क्तेयोऽअश्व्येनपशुनायातुधानः । योऽअघ्न्यायाभरतिक्षीरमग्नेतेषांशीर्षाणिहरसापिवृश्च ॥ संवत्सरीणंपयऽउस्रियायास्तस्यमाशीद्यातुधानोनृचक्षः । पीयूषमग्नेयतमस्तितृप्सात्तंप्रत्यंचमर्चिषाविध्यमर्मन् ॥ विषंगवांयातुधानाःपिबंत्वावृश्च्यंतामदितयेदुरेवाः । परैनान्देवःसवितादंदातुपराभागमोषधीनांजयंतां ॥ सनादग्नेमृणसियातुधानान्नत्वारक्षांसिपृतनासुजिग्युः । अनुदहसहमूरान्क्रव्यादोमातेहेत्यामुक्षतदैव्यायाः ॥ त्वंनोऽअग्नेऽअध

रादुदक्तात्त्वंपश्चादुतरक्षापुरस्तात् । प्रतितेतेऽअजरासस्तपिष्ठाऽअघशंसंशोशुचतोदहंतु ॥ ८ ॥ पश्चात्पुरस्तादधरा
दुदक्तात्कविःकाव्येनपरिपाहिराजन् । सखेसखायमजरोजरिम्णेग्नेमर्ताँऽअमर्त्यस्त्वंनः ॥ परित्वाग्नेपुरंवयंविप्रंसह
स्यधीमहि । धृषद्वर्णंदिवेदिवेहंतारंभंगुरावतां ॥ विषेणभंगुरावतःप्रतिष्मरक्षसोदह । अग्नेतिग्मेनशोचिषातपुरग्रा
भिर्ऋष्टिभिः ॥ प्रत्यग्नेमिथुनादहयातुधानांकिमीदिनां । संत्वाशिशामिजागृह्यदब्धंविप्रमन्मभिः ॥ प्रत्यग्नेहरसाह
रःशृणीहिविश्वतःप्रति । यातुधानस्यरक्षसोबलंविरुजवीर्यं ॥ ९ ॥ (१०।७४) हविष्पांतमजरंस्वर्विदिदिविस्पृ
श्याहुतंजुष्टमग्नौ । तस्यभर्मणेभुवनायदेवाधर्मणेकंस्वधयापप्रथंत ॥ गीर्णंभुवनंतमसापगूह्ळमाविःस्वरभवज्जातेऽअ
ग्नौ । तस्यदेवाःपृथिवीद्यौरुतापोरणयन्नोषधीःसख्येऽअस्य ॥ देवेभिर्न्विषितोयज्ञियेभिरग्निंस्तोषाण्यजरंवृहंतं । यो
भानुनापृथिवींद्यामुतेमामाततानरोदसीऽअंतरिक्षं ॥ योहोतासीत्प्रथमोदेवजुष्टोयंसमांजन्नाज्येनावृणानाः । सपत
त्रीत्वरंस्थाजगद्यच्छ्वात्रमग्निरकृणोज्जातवेदाः ॥ यज्जातवेदोभुवनस्यमूर्धन्नतिष्ठोऽअग्नेसहरोचनेन । तंत्वाहेममति
भिर्गीर्भिरुक्थैःसयज्ञियोऽअभवोरोदसिप्राः+ ॥ १० ॥ मूर्धाभुवोभवतिनक्तमग्निस्ततःसूर्योजायतेप्रातरुद्यन् । मा

(१०।७४) हरिष्पांतमित्येकोनविंशत्यृचस्यसूक्तस्यांगिरसोमूर्धन्वान्सूर्यवैश्वानरौत्रिष्टुप् । (मरीचिः–हविष्पांतंद्विदैवत्यंसौर्यवैश्वानरीयकमितिद्वेदेवतेअत्र । तेनसूर्यवैश्वानरइत्यग्नेर्गुणइतिवदंतःपरास्ताः) ।

यामृतुय॒ज्ञियां॑नामे॒ताम॒पोयत्तू॒र्णिं॒श्चरं॑तिप्र॒जानन्+ ॥ दृ॒शेन्यो॒योमं॑हि॒नासमि॒द्धोरों॑चतदि॒वियों॑निर्वि॒भावा॑ । तस्मिन्न॒
ग्नौसूं॑क्तवा॒केनं॑दे॒वाह॒विर्विं॑श्व॒ऽआजुं॑हवुस्तनू॒पाः+ ॥ सू॒क्त॒वा॒कंप्रं॑थ॒ममादिद॒ग्निमादिद्ध॒विरं॑जनयंतदे॒वाः । सऽएं॑षांय॒
ज्ञोऽअं॑भवत्तनू॒पास्तंद्यौर्वें॑द॒तंपृं॑थि॒वीतमापः॑ ॥ यंदे॒वासोजं॑नयंता॒ग्निंयस्मि॒न्नाजुं॑हवु॒र्भुवं॑नानि॒विश्वा॑ । सोऽअ॒र्चिषां॑पृथि॒वीं
द्यामु॒तेमामृं॑जू॒यमां॑नोऽअतपन्महि॒त्वा+ ॥ स्तोमें॑न॒हिदि॒विदे॒वासों॑ऽअ॒ग्निमजीं॑जन॒न्छक्तिं॑भीरोदसि॒प्रां । तमूं॑ऽअकृ
ण्वन्त्रे॒धाभु॒वेकंं॑सऽओषं॑धीःपचतिवि॒श्वरूं॑पाः ॥ ११ ॥ य॒देदें॑न॒मदं॑धुर्य॒ज्ञियां॑सोदि॒विदे॒वाःसूर्यं॑मादिते॒यं । य॒दाचं॑
रि॒ष्णूमिं॑थुनावभूं॑ता॒मादित्प्रापं॑श्यन्भुवं॑नानि॒विश्वा॑ ॥ विश्वं॑स्माऽअ॒ग्निंभुवं॑नायदे॒वावैश्वान॒रंके॒तुमह्नां॑मकृण्वन् ।
आयस्त॒ता॒नोषसों॑विभा॒तीरपों॑ऽऊर्णों॑ति॒तमों॑ऽअ॒र्चिषा॒यन्+ ॥ वै॒श्वा॒न॒रंक॒वयों॑य॒ज्ञियां॑सो॒ग्निंदे॒वाऽअं॑जनयन्नजु॒र्यं ।
नक्षं॑त्रंप्र॒त्नममिं॑नच्चरि॒ष्णुय॒क्षस्याध्यं॑क्षंतवि॒षंबृ॒हंतं॑ ॥ वै॒श्वा॒न॒रंवि॒श्वहां॑दीदि॒वांसं॒मंत्रै॑र॒ग्निंक॒विमच्छां॑वदामः । योमं॑हि॒
म्नापरिं॑ब॒भूवो॒र्वीऽउ॒तावस्तां॑दु॒तदे॒वःप॒रस्तां॑त् ॥ द्वे॒स्रु॒तीऽअं॑शृणवंपितॄ॒णाम॒हंदे॒वानां॑मु॒तमर्त्यां॑नां । ताभ्यां॑मि॒दंविश्व॒
मेज॒त्समें॑ति॒यदं॑न्त॒रापि॒तरं॑मा॒तरं॑च ॥ १२ ॥ द्वेसं॑मी॒चीबिं॑भृत॒श्चरं॑तंशी॒र्ष॒तोजा॒तंमनं॑सा॒विमृं॑ष्टं । सप्र॒त्यङ्विश्वा॒भुवं॑
नानितस्था॒वप्रं॑युच्छन्त॒रणि॒र्भ्राजं॑मानः ॥ यत्रा॒वदें॑ते॒ऽअवं॑रः॒परं॑श्चयज्ञ॒न्योःक॒तरो॑नौ॒विवें॑द । आशें॑कु॒रित्सं॑ध॒मादं॒स
खायो॒नक्षं॑तय॒ज्ञंकऽइ॒दंविवों॑चत् ॥ कत्य॒ग्नयः॒कतिसूर्यां॑सः॒कत्यु॒षासः॒कत्युं॑स्वि॒दापः॑ । नोप॒स्पिजं॑वःपितरोवदामिपृ॒

Digitization by eGangotri. Funding MHDE-Delhi

च्छामिवःकवयोविद्मनेकं+ ॥ यावन्मात्रमुषसोनप्रतीकंसुपर्ण्यो३वसतेमातरिश्वः । तावद्दधात्युपयज्ञमायन्ब्राह्मणोहोतुरवरोनिषीदन् ॥ १३ ॥ (१०।७।५) इंद्रंस्तवानृतमंयस्यमह्नाविबबाधेरोचनाविज्मोऽअंतान् । आयःपप्रौचर्षणीधृद्वरोभिःप्रसिंधुभ्योरिरिचानोमहित्वा+ ॥ ससूर्यःपर्युरूवरांस्येंद्रोववृत्याद्रथ्येवचक्रा । अतिष्ठंतमपस्यं१नसर्गंकृष्णातमांसित्विष्याजघान ॥ समानमस्माऽअनपावृदर्चक्ष्मयादिवोऽअसमंब्रह्मनव्यं । वियःपृष्ठेवजनिमान्यर्यऽइंद्रश्चिकायनसखायमीषे+ ॥ इंद्रायगिरोऽअनिशितसर्गाऽअपःप्रेरयंसगरस्यबुध्नात् । योऽअक्षेणेवचक्रियाशचीभिर्विष्वक्तस्तंभपृथिवीमुतद्यां+ ॥ आपांतमन्युस्तृपलप्रभर्माधुनिःशिमीवान्छरुमाँऽऋजीषी । सोमोविश्वान्यतसावनानिनार्वागिंद्रंप्रतिमानानिदेभुः ॥ १४ ॥ नयस्यद्यावापृथिवीनधन्वनांतरिक्षंनाद्रयःसोमोऽअक्षाः । यदस्यमन्युरधिनीयमानःशृणातिवीळुरुजातिस्थिराणि ॥ जघानवृत्रंस्वधितिर्वनेवरुरोजपुरोऽअरदन्नसिंधून् । बिभेदगिरिंनवमिन्नकुंभमागाऽइंद्रोऽअकृणुतस्वयुग्भिः ॥ त्वंहत्यदृणयाऽइंद्रधीरोसिर्नपर्ववृजिनाशृणासि । प्रयेमित्रस्यवरुणस्यधामयुजंनजनामिनंतिमित्रं+ ॥ प्रयेमित्रंप्रार्यमणंदुरेवाःप्रसंगिरःप्रवरुणंमिनंति । न्यं१मित्रेषुवधमिंद्रतुम्रंवृषन्वृषाणमरुषंशिशीहि ॥ इंद्रोदिवऽइंद्रऽईशेपृथिव्याऽइंद्रोऽअपामिंद्रऽइत्पर्वतानां । इंद्रोवृधामिंद्रऽइन्मेधिरा

(१०।७।५) इंद्रंस्तवेत्यष्टादशर्चस्यसूक्तस्यवैश्वामित्रोरेणुरिंद्रःपंचम्याइंद्रासोमौत्रिष्टुप् ।

णामिंद्र:क्षेमेयोगेहव्यऽइंद्र: ॥ १५ ॥ प्राक्तुभ्यऽइंद्र:प्रवृधोऽअहभ्य:प्रातारक्षात्प्रसमुद्रस्यधासे: । प्रवातस्यप्रथस: प्रज्मोऽअंतात्प्रसिंधुभ्योरिरिचेप्रक्षितिभ्य: ॥ प्रशोशुचत्याऽउषसोनकेतुरसिन्वातेवर्ततामिंद्रहेति: । अश्मेवविध्य दिवऽआसृजानस्तपिष्ठेनहेषसाद्रोघमित्रान् ॥ अन्वहमासाऽअन्विद्वनान्यन्वोषधीरनुपर्वतास: । अन्विंद्ररोदसी वावशानेऽअन्वापोऽअजिहतजायमानं ॥ कर्हिस्वित्सातऽइंद्रचेत्यासदघस्ययद्भिनदोरक्षऽएषत् । मित्रक्रुवोयच्छसनेनगाव:पृथिव्याऽआपृगमुयाशयंते ॥ शत्रूयंतोऽअभियेनस्ततस्नेमहिव्राधंतऽओगणासऽइंद्र । अंधेनामित्रास्तमसासचंतांसुज्योतिषोऽअक्तवस्ताऽअभिष्युः ॥ पुरूणिहित्वासवनाजनानांब्रह्माणिमंदन्गृणतामृषीणां । इमामाघोषन्नवसासहूतिंतिरोविश्वाँऽअर्चतोयाह्यर्वाङ्+ ॥ एवातेवयमिंद्रभुंजतीनांविद्यामसुमतीनांनवानां । विद्यामवस्तोरवसागृणंतोविश्वामित्राऽउततऽइंद्रनूनं ॥ शुनंहुवेममघवानमिंद्रमस्मिन्भरेनृतमंवाजसातौ । शृण्वंतमुग्रमूतयेसमत्सुघ्नंतंवृत्राणिसंजितंधनानां ॥ १६ ॥ (१०।७।६) सहस्रशीर्षापुरुष:सहस्राक्ष:सहस्रपात् । सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलं+ ॥ पुरुषऽएवेदंसर्वंयद्भूतंयच्चभव्यं । उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ एतावानस्यमहिमातोज्यायांश्चपूरुष: । पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि+ ॥ त्रिपादूर्ध्वऽउदैत्पुरुष:पादोस्येहा

(१०।७।६) सहस्रशीर्षेतिषोळशर्चस्यसूक्तस्यनारायण:पुरुषोनुष्टुबंत्यात्रिष्टुप् ।

भवत्पुनः । ततोविष्वङ्व्यक्रामत्साशनानशनेऽअभि+ ॥ तस्माद्विराळजायतविराजोऽअधिपूरुषः । सजातोऽअ
त्यरिच्यतपश्चाद्भूमिमथोपुरः+ ॥ १७ ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत । वसंतोऽअस्यासीदाज्यंग्रीष्मऽइध्मः
शरद्धविः+ ॥ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः । तेनदेवाऽअयजंतसाध्याऽऋषयश्चये+ ॥ तस्माद्यज्ञात्सर्वहुतःसं
भृतंपृषदाज्यं । पशून्तांश्चक्रेवायव्यानारण्यान्ग्राम्याश्चये+ ॥ तस्माद्यज्ञात्सर्वहुतऽऋचःसामानिजज्ञिरे । छंदांसिज
ज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ तस्मादश्वाऽअजायंतयेकेचोभयादतः । गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः
॥ १८ ॥ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् । मुखंकिमस्यकौबाहूकाऽऊरूपादाऽउच्येते ॥ ब्राह्मणोस्यमुखमासी
द्बाहूराजन्यःकृतः । ऊरूतदस्ययद्वैश्यःपद्भ्यांशूद्रोऽअजायत ॥ चंद्रमामनसोजातश्चक्षोःसूर्योऽअजायत । मुखादिं
द्रश्चाग्निश्चप्राणाद्वायुरजायत ॥ नाभ्याऽआसीदंतरिक्षंशीर्ष्णोद्यौःसमवर्तत । पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकाँऽ
अकल्पयन् ॥ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताः । देवायद्यज्ञंतन्वानाऽअबध्नन्पुरुषंपशुं+ ॥ यज्ञेनयज्ञमय
जंतदेवास्तानिधर्माणिप्रथमान्यासन् । तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः+ ॥ १९ ॥ (१०।८।१) ॥२७॥
संजागृवद्भिर्जरमाणऽइध्यतेदमेदमूनाऽइषयन्निळस्पदे । विश्वस्यहोताहविषोवरेण्योविभुर्विभावासुषखासखीयते+॥

अष्टमेनुवाकेनवसूक्तानि (१०।८।१) संजागृवद्भिरितिपंचदशर्चस्यसूक्तस्यवैतहव्योरुणोजगत्यंत्यात्रिष्टुप् ।

स॒द॑र्श॑त॒श्रीरति॑थिर्गृ॒हेगृ॑हे॒वनें॑वनेशिश्रियेतक्व॒वीरि॑व । जनँ॑जन॒ंजन्यो॒नाति॑मन्यते॒विश॒ऽआक्षे॑तिवि॒श्यो॒३ विशं॑विशं ॥
सु॒द॒क्षो॒द॒क्षैःक्रतु॑नासिसु॒क्रतु॒रग्ने॑क॒विःकाव्ये॑नासिविश्व॒वित् । वसु॒र्वसू॑नांक्षयसि॒त्वमेक॒ऽइद्द्यावा॑च॒यानि॑पृथि॒वीच॒पुष्य॑
तः ॥ प्र॒जा॒नन्न॑ग्ने॒तव॒योनि॑मृ॒त्विय॒मिळा॑यास्प॒देघृ॒तवं॑त॒मास॑दः । आते॑चिकित्र॒ऽउ॒षसा॑मि॒वेत॑योरे॒पसः॒सूर्य॑स्येवर॒श्मयः॑ ॥
तव॒श्रियो॑व॒र्ष्य॑स्येववि॒द्युत॑श्चि॒त्राश्चि॑कित्र॒ऽउ॒षसां॒नके॒तवः॑ । यदोष॑धीर॒भिसृ॑ष्टो॒वना॑निच॒परि॑स्व॒यंचि॑नु॒षेऽअन्न॑मा॒स्ये॑*
॥ २० ॥ तमोष॑धीर्दधिरे॒गर्भ॑मृ॒त्विय॒ंतमापो॑ऽअ॒ग्निंज॑नयंत॒मा॒तरः॑ । तमित्स॑मा॒नंव॒निन॑श्चवी॒रुधो॒ंतर्व॑तीश्च॒सुव॑तेचवि॒
श्वहा॑ ॥ वातो॑पधूत॒ऽइषि॒तोवशाँ॒ऽअनु॑तृ॒षुयदन्ना॒वेवि॑षद्वि॒तिष्ठ॑से । आते॑यतंतेर॒थ्यो॒३ यथा॒पृथ॒क्शर्धा॑स्यग्ने॒ऽअजरा॑
णि॒धक्ष॑तः ॥ मे॒धा॒का॒रंवि॒दथ॑स्यप्र॒साध॑नम॒ग्निंहोता॑रंपरि॒भूत॑मम॒तिं । तमिद्भे॑हु॒विष्या॒स॑मा॒नमित्तमिन्म॒हेवृ॑णते॒ना
न्यंत्वत्† ॥ त्वामिदत्र॑वृणतेत्वा॒यवो॒होता॑रमग्नेवि॒दथे॑षुवे॒धसः॑ । यद्दे॑व॒यंतो॒दध॑ति॒प्रया॑सितेहु॒विष्म॑ंतो॒मन॑वोवृ॒क्तब॑र्हिं
षः ॥ तवा॑ग्नेहो॒त्रंतव॑पो॒त्रमृ॒त्विय॒ंतव॑ने॒ष्ट्रंत्वम॒ग्निदृ॑ताय॒तः । तव॑प्रशा॒स्त्रंत्वम॑ध्वरीयसिब्र॒ह्माचा॑सिगृ॒हप॑तिश्चनो॒दमे॑
॥ २१ ॥ यस्तुभ्य॑मग्ने॒ऽअ॒मृता॑यमर्त्यः॑स॒मिधा॒दाश॑दु॒तवा॑हु॒विष्कृ॑ति । तस्य॒होता॑भवसि॒यासि॑दू॒त्य॑१मुप॑ब्रूषे॒यज॑स्यध्व
री॒यसि॑ ॥ इ॒माऽअ॑स्मैम॒तयो॒वाचो॑ऽअ॒स्मदाँ॑ऽऋ॒चोगिरः॑सुष्टु॒तयः॑सम॑ग्मत । व॒सू॒यवो॒वस॑वेजा॒तवे॑दसेवृ॒द्धासु॑चि॒द्वर्ध॑नो॒
यासु॑चा॒कनत् ॥ इ॒मांप्र॒त्नाय॑सुष्टु॒तिंनवी॑यसींवोचेय॑मस्माऽउश॒तेशृ॒णोतु॑नः । भू॒याऽअंत॑राहृ॒द्य॑स्यनि॒स्पृशे॑जा॒येव॒पत्य॑ऽ

उशतीसुवासाः ॥ यस्मिन्नश्वासऽऋषभासऽउक्षणोवशामेषाऽअवसृष्टासऽआहुताः । कीलालपेसोमपृष्ठायवेधसेहृदा
मतिंजनयेचारुमग्नये ॥ अहाव्यग्नेहविरास्येतेस्रुचीवघृतंचम्वीवसोमः । वाजसनिंरयिमस्मेसुवीरंप्रशस्तंधेहियशसंबृ
हंतं ॥ २२ ॥ (१०।८।२) यज्ञस्यवोरथ्यंविश्पतिंविशांहोतारमक्तोरतिथिंविभावसुं । शोचन्छुष्कासुहरिणीषुजर्भुरद्वृ
षाकेतुर्यजतोद्यामशायत ॥ इममंजस्पामुभयेऽअकृण्वतधर्माणमग्निंविदथस्यसाधनं । अक्तुंनयह्वमुषसःपुरोहितंतनू
नपातमरुषस्यनिंसते ॥ बळस्यनीथाविपणेश्चमन्महेवयाऽअस्यप्रहुताऽआसुरत्तवे । यदाघोरासोऽअमृतत्वमाशता
दिज्जनस्यदैव्यस्यचर्किरन् ॥ ऋतस्यहिप्रसितिर्द्यौरुरुव्यचोनमोमह्य१रमतिःपनीयसी । इंद्रोमित्रोवरुणःसंचिकित्रि
रेथोभगःसवितापूतदक्षसः ॥ प्ररुद्रेणययिनायंतिसिंधवस्तिरोमहीमरमतिंदधन्विरे । येभिःपरिज्मापरियन्नुरुज्रयो
विरोरुवज्जठरेविश्वमुक्षते ॥ २३ ॥ क्राणारुद्रामरुतोविश्वकृष्टयोदिवःश्येनासोऽअसुरस्यनीळयः । तेभिश्चष्टेवरुणो
मित्रोऽअर्यमेंद्रोदेवेभिरर्वशेभिरर्वशः ॥ इंद्रेभुजंशशमानासऽआशतसूरोदृशीकेवृषणश्चपौंस्ये । प्रयेन्वस्यार्हणाततक्षि
रेयुजंवज्रंनृषदनेषुकारवः ॥ सूरश्चिदाहरितोऽअस्यरीरमदिंद्रादाकश्चिद्भयतेतवीयसः । भीमस्यवृष्णोजठरादभिश्व
सोदिवेदिवेसहुरिस्तन्नबाधितः ॥ स्तोमंवोऽअद्यरुद्रायशिक्वसेक्षयद्वीरायनमसादिदिष्टन । येभिःशिवःस्ववाँऽएव

(१०।८।२) यज्ञस्येतिपंचदशर्चस्यसूक्तस्यमानवःशार्यातोविश्वेदेवाजगती ।

यावभिर्दिवःसिषक्तिस्वयशानिकामभिः ॥ तेहिप्रजायाऽअभरंतविश्रवोबृहस्पतिर्वृषभःसोमजामयः । यज्ञैरथर्वाप्रथमोविधारयद्देवादक्षैर्भृगवःसंचिकित्रिरे ॥ २४ ॥ तेहिद्यावापृथिवीभूरिरेतसानराशंसश्चतुरंगोयमोदितिः । देवस्त्वष्टाद्रविणोदाऽऋभुक्षणःप्ररोदसीमरुतोविष्णुरर्हिरे ॥ उतस्यनऽउशिजामुर्वियाकविरहिःशृणोतुबुध्न्यो३ हवीमनि । सूर्यामासाविचरंतादिविक्षिताधियाशमीनहुषीऽअस्यवोधतं ॥ प्रनःपूषाचरथंविश्वदेव्योपांनपादवतुवायुरिष्टये । आत्मानंवस्योऽअभिवातमर्चततदश्विनासुहवायामनिश्रुतं ॥ विशामासामभयानामधिक्षितंगीर्भिरुस्वयशसंगृणीमसि । ग्नाभिर्विश्वाभिरदितिमनर्वणमक्तोर्युवानंनृमणाऽअधापतिं ॥ रेभदत्रजनुषापूर्वोऽअंगिराग्रावाणऽऊर्ध्वाऽअभिचक्षुरध्वरं । येभिर्विहायाऽअभवद्विचक्षणःपाथःसुमेकंस्वधितिर्वनन्वति ॥ २५ ॥ (१०।८।३) महिद्यावापृथिवीभूतमुर्वीनारीयह्वीनरोदसीसदंनः । तेभिर्नःपातंसह्यसऽएभिर्नःपातंशूषणि ॥ यज्ञेयज्ञेसमर्त्योदेवान्त्सपर्यति । यःसुम्नैर्दीर्घश्रुत्तमऽआविवासात्येनान् ॥ विश्वेषामिरज्यवोदेवानांवार्महः । विश्वेहिविश्वमहसोविश्वेयज्ञेषुयज्ञियाः ॥ तेघाराजानोऽअमृतस्यमंद्राऽअर्यमामित्रोवरुणःपरिज्मा । कद्रुद्रोनृणांस्तुतोमरुतःपूषणोभगः ॥ उत

(१०।८।३) महीतिपंचदशर्चस्यसूक्तस्यपार्थ्यस्तान्वोविश्वेदेवाःप्रस्तारपंक्तिःद्वितीयात्रयोदश्यनुष्टुभौनवम्यक्षरैःपंक्तिरेकादशीन्यंकुसारिण्यंत्यापुरस्ताद्बृहती ।

नोनक्तमपांवृषण्वसूसूर्यामासासदनायसधन्या । सचायत्साद्येषामहिर्बुध्नेषुबुध्न्यः* ॥ २६ ॥ उतनोदेवावश्विनाशु
भस्पतीधामभिर्मित्रावरुणाऽउरुष्यतां । महःसरायएषतेतिधन्वेवदुरिता+ ॥ उतनोरुद्राचिन्मृळतामश्विनाविश्वेदे
वासोरथस्पतिर्भगः । ऋभुर्वाजऽऋभुक्षणःपरिज्माविश्ववेदसः ॥ ऋभुरृभुक्षाऽऋभुर्विधतोमदऽआतेहरीजूजुवान
स्यवाजिना । दुष्टरंयस्यसामचिदृधग्यज्ञोनमानुषः ॥ कृधीनोऽअह्रयोदेवसवितःसचस्तुषेमघोनां । सहोनऽइंद्रोव
ह्निभिर्न्येषांचर्षणीनांचक्रंरश्मिनयोयुवे ॥ ऐषुद्यावापृथिवीधातंमहदस्मेवीरेषुविश्वचर्षणिश्रवः । पृक्षंवाजस्यसातये
पृक्षंरायोततुर्वणे ॥ २७ ॥ एतंशंसमिंद्रास्मयुष्ट्वंकूचित्संतंसहसावन्नभिष्टयेसदापाह्यभिष्टये । मेदतांवेदतावसो ॥
एतंमेस्तोमंतनानसूर्येद्युतद्यामानंवावृधंतनृणां । संवननंनाश्व्यंतष्टेवानपच्युतं ॥ वावर्तयेषांरायायुक्तैषांहिरण्ययी ।
नेमधितानपौंस्यावृथेवविष्टांता ॥ प्रतद्दुःशीमेपृथवानेवेनेप्ररामेवोचमसुरेमघवत्सु । येयुक्त्वायपंचशतास्मयुपथावि
श्राव्येषां ॥ अधीन्वत्रसप्ततिंचसप्तच । सद्योदिदिष्टतान्वःसद्योदिदिष्टपार्थ्यःसद्योदिदिष्टमायवः+॥२८॥(१०।८।४)
प्रैतेवदंतुप्रवयंवदामग्रावभ्योवाचंवदतावदद्भ्यः । यदद्रयःपर्वताःसाकमाशवःश्लोकंघोषंभरथेंद्रायसोमिनः ॥ एतेव ॥२९॥
दंतिशतवत्सहस्रवदभिक्रंदंतिहरितेभिरासभिः । विष्ट्वीग्रावाणःसुकृतःसुकृत्ययाहोतुश्चित्पूर्वेहविरद्यमाशत ॥ एतेव

(१०।८।४) प्रैतइतिचतुर्दशर्चस्यसूक्तस्यकाद्रवेयोर्बुदःसर्पोग्रावाणोजगतीपंचमीसप्तमीचतुर्दश्यस्त्रिष्टुभः ।

Digitization by eGangotri. Funding by MoE-IKS/IDF Delhi

दं॒त्यवि॑दन्न॒नामधु॒न्यूँखयंते॒ऽअधि॑प॒क्कऽआमि॑षि । वृ॒क्षस्य॒शाखा॑मरु॒णस्य॒बप्सं॑त॒स्तेसूभं॑र्वा॑वृष॒भाःप्रेमं॑राविषुः ॥ बृ॒हद्वं॑
दंतिमदि॒रेणं॑म॒ंदिनेंद्र॒ंक्रोशँ॑तोविदन्न॒नामधुं॑ । सं॒रभ्या॒धीरा॒ःस्वसृं॑भिरनर्तिं॑षुराघो॒षयँ॑तःपृथि॒वीमुं॑प॒ब्दिभिं॑ः ॥ सु॒पर्णा॑
वाचं॑मक्र॒तोप॒द्यव्यां॑ख॒रेकृष्णा॑ऽइषि॒राऽअं॑नर्तिषुः । न्यं॑१॒ङ्नि॒यं॑त्युपं॑रस्यनिष्कृ॒तंपु॒रूरेतौं॑दधिरेसूर्य॒श्वितं॑ः ॥ २९ ॥ उ॒
ग्राऽइं॑वप्र॒वहँ॑तःस॒मायं॑मुःसा॒कंयु॒क्तावृषं॑णो॒बिभ्रं॑तो॒धुरं॑ः । यच्छ्व॒संतौं॑जग्रसा॒नाऽअरा॑विषुःशृ॒ण्वऽएषां॑प्रो॒थथो॒ऽअर्वं॑ता
मिव ॥ दशा॑वनिभ्यो॒दशं॑कक्ष्ये॒भ्यो॒दशं॑योक्रे॒भ्यो॒दशं॑योजनेभ्यः । दशा॑भीशुभ्यो॒ऽअर्चँ॑ता॒जरें॑भ्यो॒दश॒धुरो॒दशं॑यु॒क्ताव
हं॑द्भ्यः ॥ तेऽअद्रं॑यो॒दशं॑यंत्रास॒ऽआश॒वस्तेषां॑मा॒धा॒नंपर्यैं॑तिहर्य॒तं । तऽऊं॑सु॒तस्यं॑सो॒म्यस्यांध॑सो॒ंशोःपी॒यूषँ॑प्रथ॒मस्यं॑भेजिरे ॥
तेसो॒मादो॒हरी॒ऽइंद्रं॑स्यनिंसते॒ंशुंदु॒हंतो॒ऽअध्यां॑सते॒गविं॑ । तेभिं॑र्दुग्धंपं॑पि॒वान्त्सो॒म्यंमध्विंद्रौं॑वर्धते॒प्रथं॑तेवृषा॒यतें॑ ॥ वृषां॑
वोऽअं॒शुर्नकिं॑लारिषाथ॒नेळां॑वं॒तःसद॒मित्स्थ॒नाशिं॑ताः । रै॒व॒त्येव॒महं॑सा॒चारं॑वःस्थन॒यस्यं॑ग्रावाणो॒ऽअजुं॑षध्वमध्व॒रं+
॥ ३० ॥ तृ॒दि॒लाऽअतृं॑दिलासो॒ऽअद्रं॑योश्रम॒णाऽअशृं॑थिता॒ऽअमृं॑त्यवः । अ॒ना॒तु॒राऽअ॒जरा॒ःस्थामं॑विष्णवःसुपी॒वसो॒
ऽअतृं॑षिता॒ऽअतृं॑ष्णजः ॥ ध्रु॒वाऽए॒ववं॑ःपि॒तरौं॑यु॒गेयुं॑गे॒क्षेमं॑कामास॒ःसदं॑सो॒नयुँ॑जते । अ॒जु॒र्यासौं॑हरि॒षाचौं॑ह॒रिद्रं॑व॒ऽआ
द्यांर॑वेणपृथि॒वीमं॑शुश्रवुः ॥ तदिद्वं॑दं॒त्यद्रं॑योवि॒मोचं॑ने॒यामं॑न्नंज॒स्पाऽइं॑व॒घेदुं॑प॒ब्दिभिं॑ः । वपँ॑तो॒बीजं॑मिवधान्या॒कृतं॑ःपृं॒

चं॑ति॒सोमं॒नमि॑नंति॒बप्स॑तः ॥ सुतेऽअ॑ध्व॒रेऽअधि॒वाच॑मक्र॒ताक्री॒ळयो॒नमा॒तरं॑तु॒दंतः । विषूमुं॑चासुषु॒वुषो॑मनी॒षांविव॑र्तं॒ता॒मद्र॑यु॒श्चाय॑मानाः ॥ ३१ ॥ इत्यष्टमाष्टकेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ॥ ॥

षष्टचध्यायेवर्गाः ३१ सूक्तानि ९ ऋचः १६० ॥ त्यागः ॥ इंद्राण्याइ. इंद्राये. ५ इंद्राण्या. २ इंद्राये २ इंद्राण्या. २ इंद्राये. वृषाकपय. इंद्राण्या. ४ वृषाकपय. ४ इंद्राये. रक्षोघ्नेग्नय. २५ सूर्यवैश्वानराये. १९ इंद्राये. ४ इंद्रासोमाभ्या. इंद्राये. १३ पुरुषाये. १६ अग्नय. १९ विश्वेभ्योदेवेभ्य. अग्नय. ३ विश्वेभ्योदेवेभ्य. ३ इंद्राये. विश्वेभ्योदेवेभ्य. ७ द्यावापृथिवीभ्या. विश्वेभ्योदेवेभ्य. ६ इंद्राये. विश्वेभ्योदेवेभ्य. द्यावापृथिवीभ्या. इंद्राये. विश्वेभ्योदेवेभ्य. ४ ग्राव्णइदं. १४ ॥ इत्यष्टमेचतुर्थः ॥

हयेव्यूनोर्वशीमैळःपुरूरवाःपूर्वोषितान्कामान्पुनरासाद्यावरोद्धुमैच्छंत्सातमनिच्छंतीप्रत्याचष्टेंहयऽइषुर्याकदा सुदेवोंतरिक्षप्रांसचेतितिस्रश्चैलवाक्यंशिष्टाऽउर्वश्याःप्रतेसप्तोनावरुःसर्वहरिवैंद्रोहरिस्तुतिर्द्वित्रिष्टुबंतंयाऽओषधीस्त्र्यधिकाथर्वणोभिषगोषधिस्तुतिरानुष्टुभंबृहस्पतेद्वादशार्ष्टिषेणोदेवापिर्वृष्टिकामोदेवांस्तुष्टावकंनोवम्रो वैखानसइंद्रदुवस्युर्वांदनोवैश्वदेवंतुत्रिष्टुबंतमुद्बुध्यध्वंबुधःसौम्यंऋत्विक्स्तुतिर्वानवम्यंत्येजगत्यौपंचमीबृहती गायत्र्योर्मध्येप्रतेमुद्गलोभार्म्यश्वोद्रुघणेनऋषभेणचाजिंजिगायेतिद्रौघणंवाद्यातृतीयांत्याबृहत्यऽआशुःसप्तोनैंद्रोप्रतिरथश्चतुर्थीवार्हस्पत्योपांत्याप्वादैव्यंत्यानुष्टुम्मारुतीवासाव्येकादशाष्टकौवैश्वामित्रःकदाकौत्सोदुर्मित्रो नाम्नासुमित्रोगुणतःसुमित्रोवानाम्नादुर्मित्रोगुणतऽऔष्णिहंहरीवज्रंपिपीलिकमध्येत्रिष्टुबंत्याद्यागायत्रीवा॥५॥

हरिःओम् ॥ (१०।८।५) हयेजायेमनसातिष्ठघोरेवचांसिमिश्राकृणवावहैनु । ननौमंत्राऽअनुदितासऽएतेमयस्करन्परतरेचनाहन् ॥ किमेतावाचाकृणवातवाहंप्राक्रमिषमुषसामग्रियेव । पुरूरवःपुनरस्तंपरेहिदुरापनावातऽइवाहमस्मि ॥ इषुर्नश्रियऽइषुधेरसनागोषाःशतसानरंहिः । अवीरेक्रतौविदविद्युतन्नोरानमायुंचितयंतधुनयः ॥ सावसुदधतीश्वशुरायवयऽउषोयदिवष्ट्यंतिगृहात् । अस्तंननक्षेयस्मिन्चाकन्दिवानक्तंश्नथितावैतसेन ॥ त्रिःस्ममाह्नःश्नथयोवैतसेनोतस्ममेऽव्यत्यैपृणासि । पुरूरवोनुतेकेतमायंराजामेवीरतन्व१स्तदासीः ॥ १ ॥ यासुजूर्णिःश्रेणिःसुम्नऽआपिर्ह्रदेचक्षुर्नग्रंथिनीचरण्युः । ताऽअंजयोरुणयोनसस्रुःश्रियेगावोनधेनवोनवंत ॥ समस्मिन्जायमानऽआसतग्नाऽउतेमवर्धन्नद्य१ःस्वगूर्ताः । महेयत्त्वापुरूरवोरणायावर्धयन्दस्युहत्यायदेवाः+ ॥ सचायदासुजहतीष्वत्कममानुषीषुमानुषोनिषेवे । अपस्ममत्तरसंतीनभुज्युस्ताऽअत्रसन्रथस्पृशोनाश्वाः ॥ यदासुमर्तोऽअमृतासुनिस्पृक्संक्षोणीभिःक्रतुभिर्नपृंक्ते । ताऽआतयोनतन्वःशुंभतस्वाऽअश्वासोनक्रीळयोदंदशानाः ॥ विद्युंनयापतंतीदविद्योद्भरंतीमेऽअप्याकाम्यानि । जनिष्टोऽअपोनर्यःसुजातःप्रोर्वशीतिरतदीर्घमायुः ॥ २ ॥ जज्ञिषऽइत्थागोपीथ्यायहिदधाथत

(१०।८।५) हयेजायइत्यष्टादशर्चस्यसूक्तस्यआद्यातृतीयाषष्ठीनवम्यादिचतसृणांचतुर्दशीसप्तदशीत्येवंनवानामैलःपुरूरवाऋषिरुर्वशी देवता शिष्टानामुर्वशीऋषिकापुरूरवादेवतात्रिष्टुप् ।

त्पु॑रूरवो॒म॒ऽओज॑ः । अशा॑संत्वावि॒दुषी॒सस्मि॒न्नह॒न्नम॒ऽआशृ॒णोःकिम॒भुग्व॑दासि ॥ कु॒दासू॒नुःपि॒तर᳚ंजा॒तऽइ॑च्छाच्च॒क्रं
ना॑श्रुवर्तयद्वि॒जानन् । कोदंप॑ती॒सम॑नसा॒वियू॑यो॒दध॒यद॒ग्निःश्व॒शु॑रेषु॒दीद॑यत् ॥ प्रति॑ब्रवाणिव॒र्तय॑ते॒ऽअश्रु॑च॒क्रंनक्रं॑द
दा॒ध्ये॑शि॒वायै॑ । प्रतत्ते॑हिनवा॒यत्ते॑ऽअ॒स्मेपरे॒ह्यस्तं॒नहि॑मूर॒माप॑ः ॥ सु॒दे॒वोऽअ॒द्यप्र॒पते॒दना॑वृत्परा॒वतं॑पर॒मांगंत॒वाऽउ॑ ।
अधा॒शयी॑त॒निर्ऋ॑ते॒रु॒पस्थे॑धैनं॒वृका॑रभ॒सासो॑ऽअ॒द्युः+ ॥ पुरू॑रवो॒मामृ॑था॒माप्रप॑प्तो॒मात्वा॒वृका॑सो॒ऽअशि॑वासऽउक्षन् ।
नवैस्त्रैणा॑निस॒ख्यानि॑संतिसालावृ॒काणां॒हृद॑यान्ये॒ता+ ॥ ३ ॥ यद्वि॒रूपाच॑रं॒मर्त्ये॒ष्ववसं॒रात्री॑ःश॒रद॒श्चत॑स्रः । घृ॒तस्य॑
स्तो॒कंस॒कृदह्न॑ऽआश्नां॒ता॒दे॒वेदं॑ता॑तृपा॒णाच॑रामि ॥ अं॒त॒रि॒क्ष॒प्रांरज॑सोवि॒मानी॒मुप॑शिक्षाम्यु॒र्वशीं॒वसि॑ष्ठः । उप॑त्वारा॒
तिःसु॑कृ॒तस्य॒तिष्ठा॒न्निव॑र्तस्व॒हृद॑यंतप्यतेमे ॥ इति॑त्वादे॒वाऽइ॒मऽआ॑हुरैळ॒यथे॑मे॒तद्भव॑सिमृत्युबं॑धुः । प्र॒जाते॑दे॒वान्ह॒वि
षा॑यजातिस्व॒र्गऽउ॒त्वमपि॑मादयासे ॥ ४ ॥ (१०।८।६) प्रते॑म॒हेवि॒दथे॑शंसिषं॒हरी॒प्रते॑वन्वेव॒नुषो॒हर्य॒तंमद॑ं । घृ॒तंन
योहरि॑भि॒श्चारु॒सेच॑त॒ऽआत्वा॑विशंतु॒हरि॑वर्पसं॒गिर॑ः ॥ हरि॒ंहियोनि॑म॒भियेस॒मस्व॑रन्हि॒न्वंतो॒हरी॑दि॒व्यंयथा॒सद॑ः । आ
यंपृ॒णंति॒हरि॑भि॒र्नधे॒नव॒ऽइंद्रा॑यशू॒षंहरि॑वंतमर्चत ॥ सोऽअ॑स्य॒वज्रो॒हरि॑तो॒यऽआ॑य॒सोहरि॒र्निका॑मो॒हरि॒रागभ॑स्त्योः । ॥२१॥

(१०।८।६) प्रतइतित्रयोदशर्चस्यसूक्तस्यांगिरसोवरुर्हरिर्जगत्यंत्येद्वेत्रिष्टुभौ (ऐंद्रःसर्वहरिर्वाषिरत्र हरिरितींद्रनाम। शौनकस्तु सुखतएवैतत्सूक्तमैंद्रमित्याह।हरिरितींद्राश्वनामेतिचकश्चित्। एवंहरिशब्दार्थेविप्रतिपत्तावप्याकरोदितहरिशब्दोच्चारणंयुक्तमुत्पश्यामः)।

द्युम्नीसुशिप्रोहरिमन्युसायकइंद्रेनिरूपाहरितामिमिक्षिरे ॥ दिविनकेतुरधिधायिहर्यतोविव्यचद्वज्रोहरितोनरंह्या ।
तुददहिंहरिशिप्रोयऽआयसःसहस्रशोकाऽअभवद्धरिंभरः+ ॥ त्वंत्वमहर्यथाऽउपस्तुतःपूर्वेभिरिंद्रहरिकेशयज्वभिः ।
त्वंहर्यसितवविश्वमुक्थ्यं१मसामिराधोहरिजातहर्यतं+ ॥ ५ ॥ तावज्रिणंमंदिनंस्तोम्यंमदऽइंद्रंरथेवहतोहर्यताहरी ।
पुरूण्यस्मैसवनानिहर्यतऽइंद्रायसोमाहरयोदधन्विरे ॥ अरंकामायहरयोदधन्विरेस्थिरायहिन्वन्हरयोहरीतुरा ।
अर्वद्भिर्योहरिभिर्जोषमीयतेसोऽअस्यकामंहरिवंतमानशे ॥ हरिश्मशारुर्हरिकेशऽआयसस्तुरस्पेयेयोहरिपाऽअवर्धत ।
अर्वद्भिर्योहरिभिर्वाजिनीवसुरतिविश्वादुरितापारिषद्धरी ॥ स्रुवेवयस्यहरिणीविपेततुःशिप्रेवाजायहरिणीदविध्वतः ।
प्रयत्कृतेचमसेमर्मृजद्धरीपीत्वामदस्यहर्यतस्यांधसः ॥ उतस्मसद्महर्यतस्यपस्त्यो३रथ्योनवाजंहरिवाँऽअचिक्रदत् ।
महीचिद्धिधिषणाहर्यदोजसाबृहद्वयोदधिषेहर्यतश्चिदा+ ॥६॥ आरोदसीहर्यमाणोमहित्वानव्यंनव्यंहर्यसिमन्मनुप्रियं ।
प्रपस्त्यमसुरहर्यतंगोराविष्कृधिहरयेसूर्याय ॥ आत्वाहर्यतंप्रयुजोजनानांरथेवहंतुहरिशिप्रमिंद्र । पिबायथाप्रतिभृत
स्यमध्वोहर्यन्यज्ञंसधमादेदशोणिं ॥ अपाःपूर्वेषांहरिवःसुतानामथोऽइदंसवनंकेवलंते । ममद्धिसोमंमधुमंतमिंद्रसत्रावृ
षन्जठरऽआवृषस्व ॥७॥(१०।८।७) याऽओषधीःपूर्वाजातादेवेभ्यस्त्रियुगंपुरा । मनैनुबभ्रूणामहंशतंधामानिसप्तच ॥

(१०।८।७) याओषधीरितित्रयोविंशत्यृचस्यसूक्तस्याथर्वणोभिषगोषधयोनुष्टुप् ।

शतंवोऽअंबधामानिसहस्रमुतवोरुहः । अधाशतक्रत्वोयूयमिमंमेऽअगदंकृत ॥ ओषधीःप्रतिमोदध्वंपुष्पवतीःप्रसूवरीः । अश्वाऽइवसजित्वरीर्वीरुधःपारयिष्णवः* ॥ ओषधीरितिमातरस्तद्वोदेवीरुपब्रुवे । सनेयमश्वंगांवासऽआत्मानंतवपूरुष ॥ अश्वत्थेवोनिषदनंपर्णेवोवसतिष्कृता । गोभाजइत्किलासथयत्सनवथपूरुषं ॥ ८ ॥ यत्रौषधीःसमग्मतराजानःसमिताविव । विप्रःसऽउच्यतेभिषग्रक्षोहामीवचातनः ॥ अश्वावतींसोमावतीमूर्जयंतीमुदोजसं । आविंत्सिसर्वाऽओषधीरस्माऽअरिष्टतातये ॥ उच्छुष्माऽओषधीनांगावोगोष्ठादिवेरते । धनंसनिष्यंतीनामात्मानंतवपूरुष ॥ इष्कृतिर्नामवोमाताथोयूयंस्थनिष्कृतीः । सीराःपतत्रिणीस्थनयदामयतिनिष्कृथ ॥ अतिविश्वाःपरिष्ठाःस्तेनऽइवव्रजमक्रमुः । ओषधीःप्राचुच्यवुर्यत्किंचतन्वो३ रपः ॥ ९ ॥ यदिमावाजयन्नहमोषधीर्हस्तऽआदधे । आत्मायक्ष्मस्यनश्यतिपुराजीवगृभोयथा ॥ यस्यौषधीःप्रसर्पथांगमंगंपरुष्परुः । ततोयक्ष्मंविबाधध्वऽउग्रोमध्यमशीरिव ॥ साकंयक्ष्मप्रपतचाषेणकिकिदीविना । साकंवातस्यध्राज्यासाकंनश्यनिहाकया ॥ अन्यावोऽअन्यामवत्वन्यान्यस्याऽउपावत । ताःसर्वाःसंविदानाऽइदंमेप्रावताचवः ॥ याःफलिनीर्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः । बृहस्पतिप्रसूतास्तानोमुंचंत्वंहसः ॥ १० ॥ मुंचंतुमाशपथ्या३दथोवरुण्यादुत । अथोयमस्यपड्बीशात्सर्वस्मादेवकिल्बिषात्+ ॥ अवपतंतीरवदन्दिवऽओषधयस्परि । यंजीवमश्नवामहैनसरिष्यातिपूरुषः ॥ याऽओषधीःसोमराज्ञीर्बह्वीःशतविच

क्षणाः । तासां॒त्वम॑स्युत्त॒मारं॒कामा॑य॒शंहृ॒दे+ ॥ याऽओष॑धी॒ःसोम॑राज्ञी॒र्विष्ठि॑ताःपृथि॒वीमनु॑ । बृह॒स्पति॑प्रसूताऽअ॒स्यै संद॑त्तवी॒र्यं॑* ॥ मावो॑रिषत्खनि॒तायस्मै॑चा॒हंखना॑मिवः । द्वि॒पच्चतु॑ष्पद॒स्माकं॒सर्व॑मस्त्वनातु॒रं+ ॥ याश्चे॒दमु॑पशृ॒ण्वंति॒ याश्च॑दू॒रंपरा॑गताः । सर्वाः॑सं॒गत्य॑वीरुधो॒स्यैसंद॑त्तवी॒र्यं॑ ॥ ओष॑धयः॒संव॑दंते॒सोमे॑नस॒हराज्ञा॑ । यस्मै॑कृ॒णोति॑ब्राह्म॒णस्तं॑रा जन्पारयामसि ॥ त्वमु॑त्त॒मास्यो॑षधे॒तव॑वृ॒क्षाऽउप॑स्तयः । उप॑स्तिरस्तु॒सो॒३स्माकं॒योऽअ॒स्माँऽअ॑भि॒दास॑ति ॥ ११ ॥

(१०।८।८) बृह॑स्पते॒प्रति॑मेदे॒वता॑मिहिमि॒त्रोवा॒यद्वरु॑णो॒वासि॑पू॒षा । आ॒दि॒त्यैर्वा॒यद्वसु॑भिर्म॒रुत्वा॒न्त्सप॒र्जन्यं॒शंत॑नवे वृषाय ॥ आदे॒वोदू॒तोऽअ॑जि॒रश्चि॑कि॒त्वान्त्वद्दे॑वापेऽअ॒भिमाम॑गच्छत् । प्र॒ती॒ची॒नःप्र॒ति॒मामाव॑वृत्स्व॒दधा॑मितेद्यु॒मती॒ं वाचं॑मा॒सन्+ ॥ अ॒स्मेधे॑हिद्यु॒मती॒ंवाचं॑मा॒सन्बृह॑स्पतेऽअनमी॒वामि॑षि॒रां । यया॑वृ॒ष्टिंशंत॑नवे॒वना॑वदि॒वोद्र॒प्सोमधु॑माँ॒ऽ आवि॑वेश ॥ आनो॑द्र॒प्सामधु॑मंतोविशं॒त्विंद्र॑दे॒ह्यधि॑रथंस॒हस्रं॑ । निषी॑दहो॒त्रमृ॑तु॒थाय॑जस्वदे॒वान्दे॑वापेह॒विषा॑सपर्य ॥ आ॒र्ष्टि॒षे॒णोहो॒त्रमृषि॑र्नि॒षीद॑न्दे॒वापि॑र्देवसुम॒तिंचि॑कि॒त्वान् । सऽउत्त॑रस्मा॒दध॑रंसमु॒द्रम॒पोदि॒व्याऽअ॑सृजद्व॒र्ष्याऽअ॒ भि+ ॥ अ॒स्मिन्सं॑मु॒द्रेऽअध्युत्त॑रस्मि॒न्नापो॑दे॒वेभि॒र्निवृ॑ताऽअतिष्ठन् । ताऽअ॑द्रवन्नार्ष्टिषे॒णेन॑सृ॒ष्टादे॒वापि॑ना॒प्रेषि॑तामृ॒क्षि

(१०।८।८) बृहस्पतइतिद्वादशर्चस्यसूक्तस्यार्ष्टिषेणोदेवापिर्देवास्त्रिष्टुप् । (शौनकस्त्वस्मिन्सूक्तेआद्यानांतिसृणांबृहस्पतिस्ततश्चतसृणां देवास्ततःपंचानामग्निरित्येवंदेवताव्यवस्थामाह) ।

णीषु ॥ १२ ॥ यद्देवापिःशंतनवेपुरोहितोहोत्रायवृतःकृपयन्नदीधेत् । देवश्रुतंवृष्टिवनिंरराणोबृहस्पतिर्वाचमस्माऽ
अयच्छत् ॥ यंत्वादेवापिःशुशुचानोऽअग्नऽआर्ष्टिषेणोमनुष्यःसमीधे । विश्वेभिर्देवैरनुमद्यमानःप्रपर्जन्यमीरयावृ
ष्टिमंतँ ॥ त्वांपूर्वऽऋषयोगीर्भिरायन्त्वामध्वरेषुपुरुहूतविश्वे । सहस्राण्यधिरथान्यस्मेऽआनोयज्ञंरोहिदश्वोपयाहि ॥
एतान्यग्नेनवतिर्नवत्वेऽआहुतान्यधिरथासहस्रा । तेभिर्वर्धस्वतन्वःशूरपूर्वीर्दिवोनोवृष्टिमिषितोरिरीहि ॥ एतान्य
ग्नेनवतिंसहस्रासंप्रयच्छवृष्णऽइंद्रायभागं । विद्वान्पथऽऋतुशोदेवयानानप्यौलानंदिविदेवेषुधेहि ॥ अग्नेबाधस्ववि
मृधोविदुर्गहापामीवामपरक्षांसिसेध । अस्मात्समुद्राद्बृहतोदिवोनोपांभूमानमुपनःसृजेह+ ॥ १३ ॥ (१०।८।९)
कन्नश्चित्रमिषण्यसिचिकित्वान्पृथुग्मानंवाश्रंवावृधध्यै । कत्तस्यदातुशवसोव्युष्टौतक्षद्वज्रंवृत्रतुरमपिन्वत् ॥ सहिद्यु
ताविद्युतावेतिसामपृथुंयोनिमसुरत्वाससाद । ससनीळेभिःप्रसहानोऽअस्यभ्रातुर्नऽऋतेसप्तथस्यमायाः+ ॥ सवाजं
यातापदुष्पदायन्त्स्वर्षातापरिषदत्सनिष्यन् । अनर्वायच्छतदुरस्यवेदोघ्नन्छिश्नदेवाँऽअभिवर्पसाभूत्+ ॥ सयह्व्योऽ
वनीर्गोष्वर्वाजुहोतिप्रधन्यासुसस्रिः । अपादोयत्रयुज्यासोरथाद्रोण्यश्वासऽईरतेघृतंवाः+ ॥ सरुद्रेभिरशस्तवारऽ ॥३३॥
ऋभ्वाहित्वीगयमारेऽअवद्यऽआगात् । वम्रस्यमन्येमिथुनाविवव्रीऽअन्नमभीत्यारोदयन्मुषायन्+ ॥ सऽइदासंतुवी

(१०।८।९) कन्नइतिद्वादशर्चस्यसूक्तस्यवैखानसोवम्रइंद्रस्त्रिष्टुप् ।

रवंपतिर्दन्षळक्षंत्रिशीर्षाणंदमन्यत् । अस्यत्रितोन्वोजंसावृधानोविपावंराहमयोंऽअग्रयाहन् ॥ १४ ॥ सद्रुह्वंणेमनुं
षऽऊर्ध्वसानऽआसांविषदर्शसानायशरुं । सनृतंमोनहुंषोस्मत्सुजांतःपुरोंभिनदर्हन्दस्युहत्यें ॥ सोऽअभ्रियोनयवंस
ऽउदन्यन्क्षयांयगातुंविदन्नोंऽअस्मे । उपयत्सीदर्दिंदुंशरींरैःश्येनोयोंपाष्टिर्हंतिदस्यून् ॥ सव्राधंतःशवसानेभिरस्यकु
त्सांयशुष्णंकृपणेपरांदात् । अयंकविमंनयच्छस्यमांनमत्कंयोऽअंस्यसनिंतोतनृणां+ ॥ अयंदंशस्यन्नर्येंभिरस्यदस्मो
देवेभिर्वरुंणोनमायी । अयंकनीनंऽऋतुपाऽअंवेद्यमिंमीतारुंयश्चतुंष्पात् ॥ अस्यस्तोमेंभिरौंशिजऽऋजिश्वांव्रजंदर
यद्वृषभेणपिप्रोंः । सुत्वायद्यंजतोदीदयद्गीःपुरंऽइयानोऽअभिवपंसाभूत्+ ॥ एवामहोऽअंसुरवक्षथांयवम्रकःपड्भि
रुपंसर्पदिंद्रं । सऽइंयानःकंरतिस्वस्तिमंस्माऽइषमूर्जंसुक्षितिंविश्वमाभांः ॥ १५ ॥ (१०।९।१) इंद्रदृह्यंमघवन्त्वा
वदिद्भुजऽइहस्तुतःसुंतपाबोंधिनोवृधे । देवेभिर्नःसविताप्रावंतुश्रुतमासर्वतांतिमर्दितिंवृणीमहे ॥ भरांयसुभंरतभा
गमृत्वियंप्रवायवेंशुचिपेक्रंदर्दिंष्टये । गौरस्ययःपयंसःपीतिमांनशऽआसर्व० ॥ आनोंदेवःसंवितासांविषद्वयंऽऋजूय
तेयजंमानायसुन्वते । यथांदेवान्प्रंतिभूषेंमपाकवदासर्व० ॥ इंद्रोंऽअस्मेसुमनांऽअस्तुविश्वहाराजासोमंःसुवितस्या

नवमेनुवाकेत्रयोदशसूक्तानि (१०।९।१) इंद्रदृह्येतिद्वादशर्चस्यसूक्तस्यवांदनो दुवस्युर्विश्वेदेवाजगत्यंत्यात्रिष्टुप् (भेदपक्षे–विश्वे. १० इंद्रादिती१ इंद्रः१ एवं१२)।

ध्यैतुनः । यथायथामित्रधितानिसंदधुरासर्व० ॥ इंद्रऽउक्थेनशवसापरुर्दधेबृहस्पतेप्रतरीतास्यायुषः । यज्ञोमनुः
प्रमतिर्नःपिताहिकमासर्व० ॥ इंद्रस्यनुसुकृतंदैव्यंसहोग्निर्गृहेजरितामेधिरःकविः । यज्ञश्चभूद्विदथेचारुरंतमऽआस
र्व० ॥ १६ ॥ नवोगुहाचकृमभूरिदुष्कृतंनाविष्ट्यंवसवोदेवहेळनं । माकिर्नोदेवाऽअनृतस्यवर्पसऽआसर्व० ॥ अपा
मीवांसवितासाविषन्न्यं१ग्वरीयऽइदपसेधंत्वद्रयः । ग्रावायत्रमधुषुदुच्यतेबृहदासर्व० ॥ ऊर्ध्वोग्रावावसवोस्तुसोत
रिविश्वाद्वेषांसिसनुतर्युयोत । सनोदेवःसवितापायुरीड्यऽआसर्व० ॥ ऊर्जंगावोयवसेपीवोऽअत्तनऽऋतस्ययाःसद
नेकोशेऽअङ्ध्वे । तनूरेवतन्वोऽअस्तुभेषजमासर्व० ॥ क्रतुप्रावाजरिताशश्वतामवऽइंद्रऽइद्भद्राप्रमतिःसुतावतां ।
पूर्णमूधर्दिव्यंयस्यसिक्तयऽआसर्व० ॥ चित्रस्तेभानुःक्रतुप्राऽअभिष्टिःसंतिस्पृधोजरणिप्राऽअधृष्टाः । रजिष्ठयार
ज्यापश्वऽआगोस्तूतूर्षतिपर्यग्रंदुवस्युः+ ॥ १७ ॥ (१०।९।२) उद्बुध्यध्वंसमनसःसखायःसमग्निमिंध्वंबहवःसनी
ळाः । दधिक्रामग्निमुषसंचदेवीमिंद्रावतोवसेनिह्वयेवः ॥ मंद्राकृणुध्वंधियऽआतनुध्वंनावमरित्रपरणींकृणुध्वं । इ
ष्कृणुध्वमायुधारंकृणुध्वंप्रांचंयज्ञंप्रणयतासखायः ॥ युनक्तसीरावियुगातनुध्वंकृतेयोनौवपतेहबीजं । गिराचश्रुष्टिः

(१०।९।२) उद्बुध्यध्वमितिद्वादशर्चस्यसूक्तस्यसौम्योबुधोविश्वेदेवास्त्रिष्टुप्चतुर्थीषष्ठ्यौगायत्र्यौपंचमीबृहतीनवमीद्वादश्यौजगत्यौ (ऋत्विजोदेवतावा) ।

सभ॑रा॒ऽअस॑न्नो॒नेदी॑य॒ऽइत्सृ॒ण्यं॑ःप॒क्कमेया॑त् ॥ सीरा॑युंजं॑तिक॒वयो॑यु॒गावित॑न्वते॒पृथ॑क् । धीरा॑दे॒वेषु॑सुम्न॒या+ ॥ निरा॑
हा॒वान्कृ॑णोतन॒संव॑र॒त्रादं॑धातन । सिं॒चाम॑हाऽअव॒तमु॒द्रिणं॑व॒यंसु॒षेक॒मनु॑पक्षितं ॥ इष्कृ॑ताहावमव॒तंसु॑वर॒त्रंसु॑षेच॒नं ।
उ॒द्रिणं॑सिंचे॒ऽअक्षि॑तं ॥ १८ ॥ प्री॒णी॒ताश्वा॑न्हि॒तंज॑याथस्वस्ति॒वाहं॒रथ॒मित्कृ॑णुध्वं । द्रोणा॑हावमव॒तमश्म॑चक्र॒मंस॑त्र
कोशं॑सिंचतानृ॒पाणं॑ ॥ व्र॒जंकृ॑णुध्व॒ंसहि॒वो॑नृ॒पाणो॒वर्मं॑सीव्यध्वंबहु॒लापृ॒थूनि॑ । पुरः॑कृणुध्व॒माय॑सी॒रधृ॑ष्टा॒मावः॑सुस्रो॒च्च
म॒सोदृं॑हंता॒तं+ ॥ आ॒वो॒धियं॑य॒ज्ञियां॑वर्त॒ऽऊ॒तये॒देवा॑दे॒वीं॑यज॒तां॑य॒ज्ञिया॑मि॒ह । सानो॑दुहीय॒द्यव॑सेवग॒त्वीस॒हस्र॑धारा॒प
य॑सा॒महीगौः+ ॥ आतू॑षिंच॒हरि॑मींद्रो॒रु॒पस्थे॒वाशी॑भिस्तक्षताश्म॒न्मयी॑भिः । परि॑ष्वजध्व॒ंदश॑क॒क्ष्या॑भिरु॒भेधु॒रौप्रति॒व
ह्निं॑युनक्त ॥ उ॒भेधु॒रौवह्नि॒रा॒पिब्द॑माना॒ोंतर्योनै॑वचरतिद्वि॒जानि॑ः । वन॒स्पति॒वन॒ऽआस्था॑पयध्व॒ंनिषू॑दधिध्व॒मख॑नंत॒ऽ
उत्सं॑ ॥ कपृ॑न्नरःकपृ॒थमुद्द॑धातनचो॒दय॑तखु॒दत॒वाज॑सातये । नि॒ष्टि॒ग्र्य॑ःपु॒त्रमाच्या॑वय॒ोतय॒ऽइंद्रं॑स॒बाध॑ऽइ॒हसोम॑पीत
ये ॥ १९ ॥ (१०।९।३) प्रते॒रथं॑मिथू॒कृत॒मिंद्रो॑वतुधृष्णु॒या । अ॒स्मिन्ना॒जौपु॑रुहूतश्र॒वाय्यै॑धनभ॒क्षेषु॑नोव ॥ उत्स॒

(१०।९।३) प्रतेरथमितिद्वादशर्चस्यसूक्तस्यभार्म्यश्वोमुद्गलोद्रुघणस्त्रिष्टुप्आद्यातृतीयांत्याबृहत्यः । (प्रतेरथमितिसूक्तदेवतात्वेवि
प्रतिपत्तिःपरस्परमाचार्याणां। उक्तंचशौनकेन–प्रेतीतिहाससूक्तंतुमन्यतेशाकटायनः।यास्कोद्रौघणमैंद्रंवावैश्वदेवंतुशौनकः। आजानवेनं
भार्म्यश्वइंद्रासोमौतुमुद्गलइति ।)

वातोवहतिवासोऽअस्याऽअधिरथंयदजयत्सहस्रं । रथीरभून्मुद्गलानीगविष्टौभरेकृतंव्यचेदिंद्रसेना+ ॥ अंतर्यच्छजिघांसतोवज्रमिंद्राभिदासतः । दासस्यवामघवन्नार्यस्यवासनुतर्यवयावधं+ ॥ उद्नोह्रदमपिबज्जर्हृषाणःकूटंस्मतृंहदभिमातिमेति । प्रमुष्कभारःश्रवऽइच्छमानोजिरंबाहूऽअभरत्सिषासन् ॥ न्यक्रंदयन्नुपयंतऽएनममेहयन्वृषभंमध्यऽआजेः । तेनसूभर्वंशतवत्सहस्रंगवांमुद्गलःप्रधनेजिगाय ॥ ककर्दवेवृषभोयुक्तऽआसीदवावचीत्सारथिरस्यकेशी । दुधेर्युक्तस्यद्रवतःसहानसऽऋच्छंतिष्मानिष्पदोमुद्गलानीं ॥ २० ॥ उतप्रधिमुदहन्नस्यविद्वानुपायुनग्वंसगमत्रशिक्षन् । इंद्रऽउदावत्पतिमघ्न्यानामरंहतपद्याभिःककुद्मान् ॥ शुनमष्ट्राव्यचरत्कपर्दीवरत्रायांदार्वानह्यमानः । नृम्णानिकृण्वन्बहवेजनायगाःपस्पशानस्ताविषीरधत्त ॥ इमंतंपश्यवृषभस्ययुंजंकाष्ठायामध्येद्रुघणंशयानं । येनजिगायशतवत्सहस्रंगवांमुद्गलःपृतनाज्येषु ॥ आरेऽअघाकोन्वी१त्थाददर्शयंयुंजंतितम्वास्थापयंति । नास्मैतृणंनोदकमाभरन्त्युत्तरोधुरोवहतिप्रदेदिशत् ॥ परिवृक्तेवपतिविद्यमानट्पीप्यानाकूचक्रेणेवसिंचन् । एषैष्याचिद्रथ्याजयेमसुमंगलंसिनवदस्तुसातं+ ॥ त्वंविश्वस्यजगतश्चक्षुरिंद्रासिचक्षुषः । वृषायदाजिंवृषणासिषाससिचोदयन्वध्रिणायुजा+ ॥२१॥

(१०।९।४) आशुःशिशानोवृषभोनभीमोघनाघनःक्षोभणश्चर्षणीनां । संक्रंदनोनिमिषऽएकवीरःशतंसेनाऽअज

(१०।९।४)आशुःशिशानइतित्रयोदशर्चस्यसूक्तस्यैंद्रोप्रतिरथऋषिःइंद्रआद्यःसर्वाबृहस्पतिर्द्वादश्याआद्यायादेव्यंत्यायामरुतस्त्रिष्टुबंत्यानुष्टुप्।(आशुः

यत्साकमिंद्रः ॥ संक्रंदनेनानिमिषेणंजिष्णुनांयुत्कारेणंदुश्च्यवनेनंधृष्णुनां । तदिंद्रेणजयततत्सहध्वंयुधोनरऽइषुहस्तेनवृष्णां ॥ सऽइषुहस्तैःसनिषंगिभिर्वशीसंस्रष्टासयुधऽइंद्रोगणेन । संसृष्टजित्सोमपाबाहुशर्ध्यू१ग्रधन्वाप्रतिहिताभिरस्तां ॥ बृहस्पतेपरिदीयारथेनरक्षोहामित्राँऽअपबाधमानः । प्रभंजन्त्सेनाःप्रमृणोयुधाजयन्नस्माकमेध्यवितारथानां॥बलविज्ञायःस्थविरःप्रवीरःसहस्वान्वाजीसहमानऽउग्रः। अभिवीरोऽअभिसत्वासहोजाजैत्रमिंद्ररथमातिष्ठगोवित्+ ॥ गोत्रभिदंगोविदंवज्रबाहुंजयंतमज्मप्रमृणंतमोजसा । इमंसजाताऽअनुवीरयध्वमिंद्रंसखायोऽअनुसंरभध्वं ॥ २२ ॥ अभिगोत्राणिसहसागाहमानोदयोवीरःशतमन्युरिंद्रः । दुश्च्यवनःपृतनाषाळयुध्यो३स्माकंसेनाऽअवतुप्रयुत्सु+ ॥ इंद्रऽआसांनेताबृहस्पतिर्दक्षिणायज्ञःपुरऽएतुसोमः । देवसेनानामभिभंजतीनांजयंतीनांमरुतोयंत्वग्रं ॥ इंद्रस्यवृष्णोवरुणस्यराज्ञऽआदित्यानांमरुतांशर्धऽउग्रं । महामनसांभुवनच्यवानांघोषोदेवानांजयतामुदस्थात् ॥ उद्धर्षयमघवन्नायुधान्युत्सत्वनांमामकानांमनांसि । उद्वृत्रहन्वाजिनांवाजिनान्युद्रथानांजयतांयंतुघोषाः ॥ अस्माकमिंद्रःसमृतेषुध्वजेष्वस्माकंयाऽइषवस्ताजयंतु । अस्माकंवीराऽउत्तरेभवंत्वस्माँऽउदेवाऽअवताहवेषु ॥ अमीषांचित्तंप्रतिलोभयंतीगृहाणांगान्यप्वेपरेहि । अभिप्रेहिनिर्दहहृत्सुशोकैरंधेनामित्रास्तमसासचंतां ॥ प्रेताजयतानर

शिशानःसूक्तोपांत्यायाआद्यादेवीत्यनुक्रमण्यांअप्वादेवीतिशोनकीये)

Digitization by eGangotri Funding MoE-Delhi

ऽइंद्रोवःशर्मयच्छतु। उग्रावःसंतुबाहवोनाधृष्यायथासथ॥ ॥(परिशिष्टं॥असौयासेनामरुतःपरेषामभ्यैतिनऽओज
सास्पर्धमाना। तांगूहततमसापव्रतेनयथामीषाऽअन्योऽअन्यंनजानात्॥ अंधाऽअमित्राभवताशीर्षाणाऽअहयऽइव।
तेषांवोऽअग्निदग्धानामग्निमूढानामिंद्रोहंतुवरंवरं) ॥ २३ ॥ (१०।९।५) असाविसोमःपुरुहूततुभ्यंहरिभ्यांयज्ञ
मुपयाहितूयँ। तुभ्यंगिरोविप्रवीराऽइयानादधन्विरऽइंद्रपिबासुतस्य ॥ अप्सुधूतस्यहरिवःपिबेहनृभिःसुतस्यजठरं
पृणस्व। मिमिक्षुर्यमद्रयऽइंद्रतुभ्यंतेभिर्वर्धस्वमदमुक्थवाहः॥ प्रोग्रांपीतिंवृष्णऽइयर्मिसत्यांप्रयैसुतस्यहर्यश्वतुभ्यं।
इंद्रधेनाभिरिहमादयस्वधीभिर्विश्वाभिःशच्यागृणानः+ ॥ ऊतीशचीवस्तववीर्येणवयोदधानाऽउशिजऽऋतज्ञाः।
प्रजावदिंद्रमनुषोदुरोणेतस्थुर्गृणंतःसधमाद्यासः॥ प्रणीतिभिष्टेहर्यश्वसुष्टोःसुषुम्नस्यपुरुरुचोजनासः। मंहिष्ठामूतिं
वितिरेदधानाःस्तोतारऽइंद्रतवसूनृताभिः॥ २४ ॥ उपब्रह्माणिहरिवोहरिभ्यांसोमस्ययाहिपीतयेसुतस्य । इंद्रत्वा
यज्ञःक्षममाणमानट्दाश्वाँऽअस्यध्वरस्यप्रकेतः+ ॥ सहस्रवाजमभिमातिषाहंसुतेरणंमघवानंसुवृक्तिं। उपभूषंतिगि
रोऽअप्रतीतमिंद्रंनमस्याजरितुःपनंत॥ सप्तापोदेवीःसुरणाऽअमृक्तायाभिःसिंधुमतरऽइंद्रपूर्भित्। नवतिंस्रोत्यान
वचस्रवंतीर्देवेभ्योगातुंमनुषेचविंदः॥ अपोमहीरभिशस्तेरमुंचोजागरास्वधिदेवऽएकः। इंद्रयास्त्वंवृत्रतूर्येचकर्थ

(१०।९।५) असावीत्येकादशर्चस्यसूक्तस्यवैश्वामित्रोष्टकइंद्रस्त्रिष्टुप्।

ताभिर्विश्वायुस्तन्वंपुपुष्याः ॥ वीरेण्यःक्रतुरिंद्रःसुशस्तिरुतापिधनापुरुहूतमीट्टे । आदंयद्वृत्रमकृणोदुलोकंससाहेशक्रःपृतनाऽअभिष्टिः+ ॥ शुनंहुवेममघवानमिंद्रमस्मिन्भरेनृतमंवाजसातौ । शृण्वंतमुग्रमूतयेसमत्सुघ्नंतंवृत्राणिसंजितंधनानां ॥ २५ ॥ (१०।९।१६) कदावसोस्तोत्रंहर्यतऽआवश्मशारुधद्वाः । दीर्घंसुतंवाताप्याय ॥ हरीयस्यसुयुजाविव्रताविरवंतानुशेपा । उभारजीनकेशिनापतिर्दन्+ ॥ अपयोरिंद्रःपापजऽआमर्तोनशश्रमाणोबिभीवान् । शुभेयद्युयुजेतविषीवान् ॥ सचायोरिंद्रश्चकृषऽआँऽउपानसःसपर्यन् । नदयोर्विव्रतयोःशूरऽइंद्रः ॥ अधियस्तस्थौकेशवंताव्यचस्वंतानपुष्टै । वनोतिशिप्राभ्यांशिप्रिणीवान् ॥ २६ ॥ प्रास्तौदृष्वौजाऽऋष्वेभिस्ततक्षशूरःशवसा । ऋभुर्नक्रतुभिर्मातरिश्वा ॥ वज्रंयश्चक्रेसुहनायदस्यवेहिरीमशोहिरीमान् । अरुतहनुरद्भुतंनरजः ॥ अवनोवृजिनाशिशीहृचावनेमानृचः । नाब्रह्मायज्ञऽऋधग्जोषतित्वे+ ॥ ऊर्ध्वायत्तेत्रेतिनीभूद्यज्ञस्यधूर्षुसद्मन् । सजूर्नावंस्वयशसंसचायोः+ ॥ श्रियेतेपृश्निरुपसेचनीभूच्छ्रियेदर्विररेपाः । ययास्वेपात्रेसिंचसऽउत्+ ॥ शतंवायदसुर्यप्रतित्वासुमित्रऽइत्थास्तौद्दुर्मित्रऽइत्थास्तौत् । आवोयद्दस्युहत्येकुत्सपुत्रंप्रावोयद्दस्युहत्येकुत्सवत्सं+ ॥ २७ ॥ इत्यष्टमाष्टकेपंचमोध्यायः ॥ ५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

(१०।९।१६) कदेत्येकादशर्चस्यसूक्तस्यकौत्सोदुर्मित्रइंद्रउष्णिकआद्यागायत्रीवाद्वितीयासप्तम्यौपिपीलिकमध्येअंत्यात्रिष्टुप् ।

एकषष्टच्यध्यायेवर्गाः २७ सूक्तानि ११ ऋच. १४९ ॥ [illegible] ॥ उर्वश्या. पुरूरवस. उर्वश्या. पुरूरवस. २ उर्वश्या. पुरूरवस. उर्वश्या. ३ पुरूरवस. उर्वश्या. पुरूरवस. उर्वश्या. पुरूरवस. २ उर्वश्या. पुरूरवस. इंद्राये. १३ ओषधीभ्य. २३ बृहस्पतय. ३ देवेभ्य. ४ अग्नय. ५ इंद्राये. १२ विश्वेभ्योदेवेभ्य. १० इंद्रादितिभ्या. इंद्राये. ऋत्विज. १२ द्रुघणाये. १२ इंद्राये. ३ बृहस्पतय. इंद्राये. ७ अप्वायैदेव्या. मरुद्भ्य. इंद्राये. २२ ॥ इत्यष्टमेपंचमः ॥

उभौभूतांशःकाश्यपंआश्विनमाविर्दिव्यौदक्षिणावाप्राजापत्यांदक्षिणांतद्दातृन्वास्तौच्चंतुर्थीजगतींकिमिच्छंती पणिभिरसुरैर्निगूह्ळागाअन्वेष्टुंसरमांदेवशुनींमिंद्रेणप्रहितांमयुग्भिःपणयोंमित्रीयंतःप्रोचुंःसातान्युग्मांत्याभि र्रनिच्छंतीप्रत्याचष्टेंतेवदन्तसप्तजुहूर्ब्रह्मजायांब्राह्मोवोर्ध्वनाभांवैश्वदेवंह्यनुष्टुबंतंसमिद्धऽएकादशंजमदग्निस्त त्सुतोवारामआप्रियःपरेचत्वारोवैरूपांमनीषिणोदशाष्टादंष्ट्रंइंद्रपिबनभःप्रभेदनस्तमस्यंशतप्रभेदनोंत्यात्रिष्टुप्र् घर्मासघ्रिस्तापसोवाघर्मौवैश्वदेवंचतुर्थीजगतींचित्रऽइन्नववार्ष्टिहव्यउपस्तुतंआग्नेयंजागतंत्रिष्टुप्शक्कर्यंतंपिब स्थौरोग्नियुतोग्नियूपोवांनवाऽभिक्षुर्धनान्नदानप्रशंसाचांद्येजगत्यांवग्नेहंस्युरुक्षयऽआमहीयवंऽआग्नेयंराक्षोघ्नं गायत्रंत्वितिवैसप्तोनैंद्रोलबऽआत्मानंतुष्टाव ॥ ६ ॥ ॥ ॥ ॥

Digitization by eGangotri. Funding MoE-Delhi

हरिःओम् ॥ (१०।९।७) उभाउंनूनंतदिदर्थयेथेवितन्वाथेधियोवस्त्रापसैव । सध्रीचीनायातंवेप्रेमजीगःसुदिनैंवपृक्षऽआतंसयेथे ॥ उष्टारैंवफर्वरेषुश्रयेथेप्रायोगेवश्वात्र्याशासुरेथः । दूतेवहिष्ठोयशसाजनेषुमापस्थातंमहिषेवावपानात् ॥ साकंयुजाशकुनस्यैवपक्षापश्वेवचित्रायजुरागमिष्टं । अग्निरिवदेवयोर्दीदिवांसापरिज्मानेवयजथःपुरुत्रा+ ॥ आपीवोऽअस्मेपितरैंवपुत्रोग्रेवरुचानृपतीवतुर्यैं । इर्यैंवपुष्ट्यैकिरणैंवभुज्यैश्रुष्टीवानैंवहवमागमिष्टं ॥ वंसगेवपूषर्यींशिंबातामित्रेवऽऋताशतराशातपंता । वाजेवोच्चावयसाघर्म्येष्ठामेषैंवेषासपर्या३पुरीषा ॥ १ ॥ सृण्यैंवजर्भरींतुर्फरींतूनैंतोशेवंतुर्फरीपर्फरीका । उदन्यजेवजेमनामदेरूतामैंजराय्वजरंमरायु ॥ पज्रेवचचैंरंजारैंमरायुक्षद्मेवाथैंषुतर्तरीथऽउग्रा । ऋभूनापत्खरमज्ज्राखरज्ज्रुर्वायुर्नपर्फरत्क्षयद्रयीणां+ ॥ घर्मैंवमधुंजठरैंसनेरूभगैंवितातुर्फरीफारिवारैं । पतरैंवचचराचंद्रनिर्णिङ्मनऽऋंगामनन्या३नजग्मीं ॥ बृहंतैंवगंभरैंषुप्रतिष्ठांपादैंवगाधंतरतेविदाथः । कर्णैंवशासुरनुहिस्मराथोंशैंवनोभजतंचित्रमप्नः ॥ आरंगरेवमध्वेरयेथेसारघेवगविनीचीनबारे । कीनारैंवस्वेदमासिष्विदानाक्षामैंवोर्जासूयवसात्संचेथे ॥ ऋध्यामस्तोमंसनुयामवाजमानोमंत्रंसरथेहोपयातं । यशोनपक्वंमधुगोष्वंतराभूतांशोऽअश्विनोःकाममप्राः ॥ (परिशिष्टं ॥ हविर्भिरेकेस्वरितःसचंतेसुन्वंतऽएकेसवनेषुसोमान् । शचीर्मदंतऽउत

(१०।९।७) उभावित्येकादशर्चस्यसूक्तस्यकाश्यपोभूतांशोश्विनौत्रिष्टुप् ।

दक्षिणाभिर्नैज्जिह्मायंत्योनरकेपताम) ॥ २ ॥ ॥ (१०।९।८) आविरभून्महिमाघोनमेषांविश्वंजीवंतमसोनिरमोचि । महिज्योतिःपितृभिर्दत्तमागादुरुःपंथादक्षिणायाऽअदर्शि ॥ उच्चादिविदक्षिणावंतोऽअस्थुर्येऽअश्वदाःसहतेसूर्यैण । हिरण्यदाऽअमृतत्वंभजंतेवासोदाःसोमप्रतिरंतऽआयुः ॥ दैवीपूर्तिर्दक्षिणादेवयज्यानकवारिभ्योनहितेपृणंति । अथानरःप्रयतदक्षिणासोवद्यभियाबहवःपृणंति ॥ शतधारंवायुमर्कंस्वर्विदंनृचक्षसस्तेऽअभिचक्षतेहविः । येपृणंतिप्रचयच्छंतिसंगमेतेदक्षिणांदुहतेसप्तमातरं ॥ दक्षिणावान्प्रथमोहूतऽएतिदक्षिणावान्ग्रामणीरग्रमेति । तमेवमन्येनृपतिंजनानांयःप्रथमोदक्षिणामाविवाय ॥ ३ ॥ तमेवऽऋषिंतमुब्रह्माणमाहुर्यज्ञन्यंसामगामुक्थशासं । सशुक्रस्यतन्वोवेदतिस्रोयःप्रथमोदक्षिणयारराध ॥ दक्षिणाश्वंदक्षिणागांददातिदक्षिणाचंद्रमुतयद्धिरण्यं । दक्षिणान्नंवनुतेयोनऽआत्मादक्षिणांवर्मकृणुतेविजानन्+ ॥ नभोजामम्रुर्नन्यर्थमीयुर्नरिष्यंतिनव्यथंतेहभोजाः । इदंयद्विश्वंभुवनंस्वश्चैतत्सर्वंदक्षिणैभ्योददाति ॥ भोजाजिग्युःसुरभिंयोनिमग्रेभोजाजिग्युर्वध्वं१यासुवासाः । भोजाजिग्युरंतःपेयंसुरायाभोजाजिग्युर्येऽअहूताःप्रयंति ॥ भोजायाश्वंसंमृजंत्याशुंभोजायास्तेकन्या३शुंभमाना । भोजस्येदंपुष्करि

(१०।९।८) आविरित्येकादशर्चस्यसूक्तस्यांगिरसोदिव्योदक्षिणात्रिष्टुप्चतुर्थीजगती । (प्राजापत्यादक्षिणानाम्नीऋषिकावादक्षिणादातारोवादेवता)।

णीववेश्मपरिष्कृतंदेवमानेवंचित्रं ॥ भोजमश्वाः सुष्ठुवाहोवहंतिसुवृद्रथोवर्ततेदक्षिणायाः । भोजंदेवासोवताभरेषु
भोजःशत्रून्समनीकेषुजेता ॥ ४ ॥ (१०।९।९) किमिच्छंतीसरमाप्रेदमानड्दूरेह्यध्वाजगुरिःपराचैः । कास्मेहि
तिःकापरितक्म्यासीत्कथंरसायाऽअतरःपयांसि ॥ इंद्रस्यदूतीरिषिताचरामिमहऽइच्छंतीपणयोनिधीन्वः । अति
ष्कदोभियसातन्नऽआवत्तथारसायाऽअतरंपयांसि ॥ कीदृङ्ङिंद्रःसरमेकादृशीकायस्येदंदूतीरसरःपराकात् । आच
गच्छान्मित्रमेनादधामाथागवांगोपतिर्नोभवाति ॥ नाहंतंवेदद्भ्यंदभत्सयस्येदंदूतीरसरंपराकात् । नतंगूहंतिस्रव
तोगभीराहताऽइंद्रेणपणयःशयध्वे ॥ इमागावःसरमेयाऽऐच्छःपरिदिवोऽअंतान्त्सुभगेपतंती । कस्तऽएनाऽअव
सृजादयुध्व्युतास्माकमायुधासंतितिग्मा ॥ ५ ॥ असेन्यावःपणयोवचांस्यनिषव्यास्तन्वःसंतुपापीः । अधृष्टोवऽ
एतवाऽअस्तुपंथाबृहस्पतिर्वऽउभयानमृळात् ॥ अयंनिधिःसरमेऽअद्रिबुध्नोगोभिरश्वेभिर्वसुभिन्यृष्टः । रक्षंतितंप
णयोयेसुगोपारेकुपदमलकमाजगंथ ॥ एहगमन्नृषयःसोमशिताऽअयास्योऽअंगिरसोनवग्वाः । तऽएतमूर्वंविभजंत
गोनामथैतद्वचःपणयोवमन्नित् ॥ एवाचत्वंसरमऽआजगंथप्रबाधितासहसादैव्येन । स्वसारंत्वाकृणवैमापुनर्गाऽ

(१०।९।९) किमिच्छंतीत्येकादशर्चस्यसूक्तस्यायुजांपणिनामासुराऋषयःयुजामेकादश्याश्चसरमानाम्नीदेवशुनीऋषिकाअयुजांसरमा
देवतायुजामेकादश्याश्चपणयस्त्रिष्टुप् ।

अप॑ते॒गवां॑सुभगेभजाम ॥ नाहंवे॑दभ्रातृ॒त्वंनोस्वं॑सृ॒त्वमिंद्रो॑विदुरंगिं॑रसश्चघो॒राः । गोका॑मामे॑ऽअच्छदय॒न्यदाय॒मपा तं॑ऽइतपणयो॒वरी॑यः ॥ दू॒रमि॑तपणयो॒वरी॑य॒ऽउद्गावो॑यं॑तुमिन॒तीर्ऋ॒तेन॑ । बृह॒स्पति॒र्या॑ऽअविं॑द॒न्निगू॑ळ्हाः सोमो॒ग्रावा॑ण॒ ऽऋष॑यश्च॒विप्राः॑ ॥ ६ ॥ (१०।९।१०) ते॑वदन्प्रथ॒माब्रं॑ह्मकिल्बि॒षेकू॑पारःसलि॒लोमा॑त॒रिश्वा॑ । वी॒ळुह॑रा॒स्तप॑ऽउ॒ग्रो मं॑यो॒भूरापो॑दे॒वीःप्रं॑थम॒जाऽऋ॒तेन॑ ॥ सोमो॒राजा॑प्रथ॒मोब्रं॑ह्मजा॒यांपुन॒ःप्राय॑च्छ॒दहृ॑णीयमानः । अ॒न्व॒र्ति॒तावरु॑णोमि॒त्र ऽआ॑सीद॒ग्निर्होता॑हस्त॒गृह्यानि॑नाय ॥ हस्ते॑नै॒वग्रा॒ह्यं॑ऽआ॒धिरं॑स्याब्रह्मजा॒येय॒मिति॒चेदवो॑चन् । नदू॒ताय॑प्र॒ह्ये॑तस्थऽए॒ षातथा॑रा॒ष्ट्रंगु॑पि॒तंक्ष॒त्रियं॑स्य ॥ दे॒वाऽए॒तस्या॑मवदंत॒पूर्वे॑सप्तऽऋ॒षय॒स्तप॑से॒येनि॑षे॒दुः । भी॒माजा॒याब्रा॑ह्म॒णस्योप॑नीतादु र्धां॑दधातिपर॒मेव्यो॑मन् ॥ ब्र॒ह्म॒चा॒रीचं॑रति॒वेवि॑ष॒द्विषः॒सदे॒वानां॑भवत्येक॒मंगं॑ । तेनं॑जा॒यामन्व॑विंद॒द्बृह॒स्पतिः॒सोमे॑न नी॒तांजु॒ह्वं॑१नदे॑वाः ॥ पुन॒र्वैदे॒वाऽअ॑ददुःपुन॑र्मनु॒ष्या॑ऽउ॒त । राजा॑नःस॒त्यंकृ॑ण्वा॒नाब्रं॑ह्मजा॒यांपुन॑र्ददुः ॥ पुन॒र्दाय॑ब्रह्म जा॒यांकृ॒त्वीदे॒वैर्निं॑किल्बि॒षं । ऊर्जं॑पृथि॒व्याभ॒क्त्वायो॑रुगा॒यमुपा॑सते ॥ ७ ॥ (१०।९।११) समि॑द्धोऽअ॒द्यमनु॑षो

(१०।९।१०) तेवदन्नितिसप्तर्चस्यसूक्तस्यब्रह्मजायाजुहूर्विश्वेदेवास्त्रिष्टुबंत्येद्वेअनुष्टुभौ । (ब्राह्मोवोर्ध्वनाभऋषिः) (१०।९।११) समिद्ध इत्येकादशर्चस्यसूक्तस्यभार्गवोजमदग्निरिध्मस्तनूनपादिळोबर्हिर्देवीर्द्वारउषासानक्तादैव्यौहोतारौसरस्वतीळाभारत्यस्त्वष्टावनस्पतिस्वाहाकृतयस्त्रिष्टुप् । (जामदग्निःपरशुरामोवा)

दुरोणेदेवोदेवान्यजसिजातवेदः । आचवहमित्रमहश्चिकित्वान्त्वंदूतःकविरसिप्रचेताः ॥ तनूनपात्पथऽऋतस्ययानान्मध्वासमंजन्त्स्वदयासुजिह्व । मन्मानिधीभिरुतयज्ञमृन्धन्देवत्राचकृणुह्यध्वरंनः ॥ आजुह्वानऽईड्योवंद्यश्चायाह्यग्नेवसुभिःसजोषाः । त्वंदेवानामसियह्वहोतासऽएनान्यक्षीषितोयजीयान् ॥ प्राचीनंबर्हिःप्रदिशापृथिव्यावस्तोरस्यावृज्यतेऽअग्रेऽअह्नां । व्युप्रथतेवितरंवरीयोदेवेभ्योऽअदितयेस्योनं+॥ व्यचस्वतीरुर्वियाविश्रयंतांपतिभ्योनजनयःशुंभमानाः । देवीर्द्वारोबृहतीर्विश्वमिन्वादेवेभ्योभवतसुप्रायणाः+ ॥ ८ ॥ आसुष्वयंतीयजतेऽउपाकेऽउषासानक्तासदतांनियोनौ । दिव्येयोषणेबृहतीसुरुक्मेऽअधिश्रियंशुक्रपिशंदधाने ॥ दैव्याहोताराप्रथमासुवाचामिमानायज्ञंमनुषोयजध्यै । प्रचोदयंताविदथेषुकारूप्राचीनंज्योतिःप्रदिशादिशंता ॥ आनोयज्ञंभारतीतूयमेत्विळामनुष्वदिहचेतयंती । तिस्रोदेवीर्बर्हिरेदंस्योनंसरस्वतीस्वपसःसदंतु ॥ यऽइमेद्यावापृथिवीजनित्रीरूपैरपिंशद्भुवनानिविश्वा । तमद्यहोतरिषितोयजीयान्देवंत्वष्टारमिहयक्षिविद्वान्+ ॥ उपावसृजत्मन्यासमंजन्देवानांपाथऽऋतुथाहवींषि । वनस्पतिःशमितादेवोऽअग्निःस्वदंतुहव्यंमधुनाघृतेन ॥ सद्योजातोव्यमिमीतयज्ञमग्निर्देवानामभवत्पुरोगाः । अस्यहोतुःप्रदिश्यृतस्यवाचिस्वाहाकृतंहविरदंतुदेवाः+ ॥ ९ ॥ (१०।९।१२) मनीषिणःप्रभरध्वंमनीषां

(१०।९।१२) मनीषिणइतिदशर्चस्यसूक्तस्यवैरूपोष्टादंष्ट्रइंद्रस्त्रिष्टुप् ।

यथायथामतयःसंतिनृणां । इंद्रंसत्यैरेरयामाकृतेभिःसहिवीरोगिर्वणस्युर्विदानः ॥ ऋतस्यहिसदसोधीतिरद्यौत्संगा
र्ष्टेयोवृषभोगोभिरानट् । उदतिष्ठत्तविषेणारवेणमहांतिचित्संविव्याचारजांसि ॥ इंद्रःकिलश्रुत्याऽअस्यवेदसहिजि
ष्णुःपथिकृत्सूर्याय । आन्मेनांकृण्वन्नच्युतोभुवद्गोःपतिर्दिवःसनजाऽअप्रतीतः ॥ इंद्रोमह्नामहतोऽअर्णवस्यव्रतामि
नादंगिरोभिर्गृणानः । पुरूणिचिन्नितताना रजांसिदाधारयोधरुणंसत्यताता ॥ इंद्रोदिवःप्रतिमानंपृथिव्याविश्वावे
दसवनाहंतिशुष्णं । महींचिद्द्यामातनोत्सूर्येणचास्कंभचित्कंभनेनस्कभीयान् ॥१०॥ वज्रेणहिवृत्रहावृत्रमस्तरदेवस्यशू
शुवानस्यमायाः । विधृष्णोऽअत्रधृषताजघंथाथाभवोमघवन्बाह्वोजाः ॥ सचैतयदुषसःसूर्येणचित्रामस्यकेतवोरामविं
दन् । आयन्नक्षत्रंददृशेदिवोनपुनर्यतोनकिरद्धानुवेद ॥ दूरंकिलप्रथमाजग्मुरासामिंद्रस्ययाःप्रसवेसस्रुरापः । क्व
स्विदग्रंक्वबुध्नऽआसामापोमध्यंक्ववोनूनमंतः ॥ सृजःसिंधूँरहिनाजग्रसानाँऽआदिदेताःप्रविविज्रेजवेन । मुमुक्षमा
णाऽउतयामुमुच्रेधेदेतानरमंतेनितिक्ताः ॥ सध्रीचीःसिंधुमुशतीरिवायन्त्सनाज्जारऽआरितःपूर्भिदासां । अस्तमा
तेपार्थिवावसून्यस्मेजग्मुःसूनृताऽइंद्रपूर्वीः+ ॥ ११ ॥ (१०।९।१३) इंद्रपिबप्रतिकामंसुतस्यप्रातःसावस्तवहिप
र्वपीतिः । हर्षस्वहंतवेशूरशत्रूनुक्थेभिष्टेवीर्या३प्रब्रवाम ॥ यस्तेरथोमनसोजवीयानेंद्रतेनसोमपेयाययाहि । तूयमाते

(१०।९।१३) इंद्रपिबेतिदशर्चस्यसूक्तस्यवैरूपोनभःप्रभेदनइंद्रस्त्रिष्टुप् ।

हरयःप्रद्रवंतुयेभिर्यासिवृषभिर्मंदमानः ॥ हरिंत्वतावचसासूर्यस्यश्रेष्ठैरूपैस्तन्वंस्पर्शयस्व । अस्माभिरिंद्रसखिभि
र्हुवानःसध्रीचीनोमादयस्वानिषद्य ॥ यस्यत्यत्तेमहिमानंमदेष्विमेमहीरोदसीनाविविक्तां । तदोकऽआहरिभिरिंद्रयु
क्तैःप्रियेभिर्याहिप्रियमन्नमच्छ ॥ यस्यशश्वत्पपिवाँऽइंद्रशत्रूननानुकृत्यारण्याचकर्थ । सतेपुरंधिंतविषीमियर्तिसते
मदायसुतऽइंद्रसोमः ॥ १२ ॥ इदंतेपात्रंसनवित्तमिंद्रपिबासोममेनाशतक्रतो । पूर्णऽआहावोमदिरस्यमध्वोयंवि
श्वऽइदभिहर्यंतिदेवाः+ ॥ विहित्वामिंद्रपुरुधाजनासोहितप्रयसोवृषभह्वयंते । अस्माकंतेमधुमत्तमानीमाभुवन्त्सवं
नातेषुहर्य ॥ प्रतऽइंद्रपूर्व्याणिप्रनूनंवीर्यावोचंप्रथमाकृतानि । सतीनमन्युरश्रथायोऽअद्रिंसुवेदनामकृणोर्ब्रह्मणे
गां+ ॥ निषुसीदगणपतेगणेषुत्वामाहुर्विप्रतमंकवीनां । नऽऋतेत्वत्क्रियतेकिंचनारेमहामर्कंमघवन्चित्रमर्च ॥ अभि
ख्यानोमघवन्नाधमानान्त्सखेबोधिवसुपतेसखीनां । रणंकृधिरणकृत्सत्यशुष्माभक्तेचिदाभजारायेऽअस्मान्+
॥ १३ ॥ (१०।१०।१) तमस्यद्यावापृथिवीसचेतसाविश्वेभिर्देवैरनुशुष्ममावतां । यदैत्कृण्वानोमहिमानमिंद्रियं
पीत्वीसोमस्यक्रतुमाँऽअवर्धत ॥ तमस्यविष्णुर्महिमानमोजसांशुंदधन्वान्मधुनोविरप्शते । देवेभिरिंद्रोमघवासया
वभिर्वृत्रंजघन्वाँऽअभवद्वरेण्यः ॥ वृत्रेणयदहिनाबिभ्रदायुधासमस्थिथायुधयेशंसमाविदे । विश्वेतेऽअत्रमरुतःस

दशमेनुवाकेषोडशसूक्तानि (१०।१०।१) तमस्येतिदशर्चस्यसूक्तस्यवैरूपःशतप्रभेदनोजगत्यंत्यात्रिष्टुप् ।

हत्मनावर्धन्नुग्रमहिमानमिंद्रियं+ ॥ जज्ञानऽएवव्यबाधतस्पृधःप्रापश्यद्वीरोऽअभिपौंस्यंरणं । अवृश्चदद्रिमवसस्य
दःसृजदस्तभ्नान्नाकंस्वपस्ययापृथुं+ ॥ आदिंद्रःसत्रातविषीरपत्यतवरीयोद्यावापृथिवीऽअबाधत । अवाभरद्धृषितो
वज्रमायसंशेवंमित्रायवरुणायदाशुषे ॥ १४ ॥ इंद्रस्यात्रतविषीभ्योविरप्शिनऽऋघायतोऽअरंहयंतमन्यवे । वृत्रंय
दुग्रोव्यवृश्चदोजसापोबिभ्रंतंतमसापरीवृतं ॥ यावीर्याणिप्रथमानिकर्त्वामहित्वेभिर्यतमानौसमीयतुः । ध्वांतंतमो
वदध्वसेहतऽइंद्रोमह्नापूर्वहूतावपत्यत ॥ विश्वेदेवासोऽअधवृष्ण्यानितेवर्धयन्त्सोमवत्यावचस्यया । रद्धंवृत्रमहि
मिंद्रस्यहन्मनाग्निर्नजंभैस्तृष्वन्नमावयत् ॥ भूरिदक्षेभिर्वचनेभिर्ऋक्वभिःसख्येभिःसख्यानिप्रवोचत । इंद्रोधुनिंचचु
मुरिंचदंभयन्छ्रद्धामनस्याशृणुतेदभीतये ॥ त्वंपुरूण्याभरास्वश्व्यायेभिर्मंसैनिवचनानिशंसन् । सुगेभिर्विश्वादुरि
तातरेमविदोषुणऽउर्वियागाधमद्य+ ॥ १५ ॥ (१०।१०।२) घर्मासमंतात्रिवृतंव्यापतुस्तयोर्जुष्टिंमातरिश्वाजगा
म । दिवस्पयोदिधिषाणाऽअवेषन्विदुर्देवाःसहसामानमर्कं+ ॥ तिस्रोदेष्ट्रायनिर्ऋतीरुपासतेदीर्घश्रुतोविहिजानंति
वह्नयः । तासांनिचिक्युःकवयोनिदानंपरेषुयागुह्येषुव्रतेषु ॥ चतुष्कपर्दायुवतिःसुपेशाघृतप्रतीकावयुनानिवस्ते ।
तस्यांसुपर्णावृषणानिषेदतुर्यत्रदेवादधिरेभागधेयं ॥ एकःसुपर्णःससमुद्रमाविवेशसऽइदंविश्वंभुवनंविचष्टे । तंपाकें

(१०।१०।२) घर्मेतिदशर्चस्यसूक्तस्यवैरूपःसध्रिर्विश्वेदेवास्त्रिष्टुप्चतुर्थीजगती । (तापसोघर्मोवाऋषिः)

नमनसापश्यमंतितस्तंमातारेह्ळिसऽउरेह्ळिमातरं ॥ सुपर्णंविप्राःकवयोवचोभिरेकंसंतंबहुधाकल्पयंति । छंदांसिचदधतोऽअध्वरेषुग्रहान्त्सोमस्यमिमतेद्वादश ॥ १६ ॥ षट्त्रिंशांश्चचतुरःकल्पयंतश्छंदांसिचदधतऽआद्वादशं । यज्ञंविमायकवयोमनीषऽऋक्सामाभ्यांप्ररथंवर्तयंति ॥ चतुर्दशान्येमहिमानोऽअस्यतंधीरावाचाप्रणयंतिसप्त । आप्नानंतीर्थंकऽइहप्रवोचद्येनपथाप्रपिबंतेसुतस्य ॥ सहस्रधापंचदशान्युक्थायावद्द्यावापृथिवीतावदित्तत् । सहस्रधामहिमानःसहस्रंयावद्ब्रह्मविष्ठितंतावतीवाक्+ ॥ कश्छंदसांयोगमावेदधीरःकोधिष्ण्यांप्रतिवाचंपपाद । कमृत्विजामष्टमंशूरमाहुर्हरीऽइंद्रस्यनिचिकायकःस्वित् ॥ भूम्याऽअंतंपर्येकेचरंतिरथस्यधूर्षुयुक्तासोऽअस्थुः । श्रमस्यदायंविभजंत्येभ्योयदायमोभवतिहर्म्येहितः+ ॥ १७ ॥ (१०।१०।३) चित्रऽइच्छिशोस्तरुणस्यवक्षथोनयोमातरावप्येतिधातवे । अनूधायदिजीजनदधाचनुववक्षसद्योमहिदूत्यं१चरन् ॥ अग्निर्हनामधायिदन्नपस्तमःसंयोवनायुवतेभस्मनादता । अभिप्रमुराजुह्वास्वध्वरऽइनोनप्रोथमानोयवसेवृषा ॥ तंवोविंनद्रुषदंदेवमंधसऽइंदुंप्रोथंतंप्रवपंतमर्णवं । आसावह्निंनशोचिषाविरप्शिनंमहिव्रतंनसरजंतमध्वनः ॥ वियस्यतेज्रयसानस्याजरधक्षोर्नवाताःपरिसंत्यच्युताः । आरण्वासोयुयुधयोनसत्वनंत्रितंनशंतप्रशिषंतऽइष्टये ॥ सऽइदग्निःकण्वतमःकण्वसखार्यःपरस्यांतरस्यतरुषः । अ

(१०।१०।३) चित्रइतिनवर्चस्यसूक्तस्यवार्ष्टिहव्यउपस्तुतोग्निर्जगतीअष्टमीनवम्यौत्रिष्टुप्शक्वर्यौ ।

ऋक्सं. ग्निःपातुगृणतोऽअग्निःसूरीनग्निर्ददातुतेषामवोनः ॥ १८ ॥ वाजिन्तमायसह्यसेसुपित्र्यतृषुच्यवानोऽअनुजातवेदसे । मंडलं १०
अनुद्रेचिद्योधृषतावरंसतेमहिन्तमायधन्वनेदविष्यते+ ॥ एवाग्निर्मर्तैःसहसूरिभिर्वसुःष्टवेसहसःसूनरोनृभिः । मित्रा
अ.८अ.६ सोनयेसुधिताऽऋतायवोद्यावोनद्युम्नैरभिसंतिमानुषान् ॥ ऊर्जोनपात्सहसावन्नितित्वोपस्तुतस्यवन्दतेवृषावाक् । अनु. १०
॥४२॥ त्वांस्तोषामत्वयासुवीराद्राघीयऽआयुःप्रतरंदधानाः ॥ इतित्वाग्नेवृष्टिहव्यस्यपुत्राऽउपस्तुतासऽऋषयोवोचन् । तां
श्चपाहिगृणतश्चसूरीन्वषड्वषळित्यूर्ध्वासोऽअनक्षन्नमोनमऽइत्यूर्ध्वासोऽअनक्षन् ॥ १९ ॥ (१०।१०।४) पिबासो
मंमहतऽइंद्रियायपिबावृत्रायहंतवेशविष्ठ । पिबरायेशवसेहूयमानःपिबमध्वस्तृपदिंद्रावृषस्व ॥ अस्यपिबक्षुमतःप्र
स्थितस्येंद्रसोमस्यवरमासुतस्य । स्वस्तिदामनसामादयस्वार्वाचीनोरेवतेसौभगाय ॥ ममत्तुत्वादिव्यःसोमऽइंद्रमम
त्तुयःसूयतेपार्थिवेषु । ममत्तुयेनवरिवश्चकर्थममत्तुयेननिरिणासिशत्रून् ॥ आद्विबर्हाऽअमिनोयात्विंद्रोवृषाहरिभ्यां
परिषिक्तमंधः । गव्यासुतस्यप्रभृतस्यमध्वःसत्राखेदामरुशहावृषस्व ॥ नितिग्मानिभ्राशयन्भ्राश्यान्यवस्थिरातनु
हियातुजूनां । उग्रायतेसहोबलंददामिप्रतीत्याशत्रून्विगदेषुवृश्च ॥ २० ॥ व्यं१र्यऽइंद्रतनुहिश्रवांस्योजःस्थिरेवध ॥४२॥
न्वनोभिमातीः । अस्मद्र्यग्वावृधानःसहोभिरनिभृष्टस्तन्वंवावृधस्व ॥ इदंहविर्मघवन्तुभ्यंरातंप्रतिसम्राळहृणानोगृ

(१०।१०।४) पिबेतिनवर्चस्यसूक्तस्यस्थौरोग्नियुतइंद्रस्त्रिष्टुप् । (अग्नियूपोवाऋषिः)

भाय । तुभ्यँसुतोम॑घव॒न्तुभ्यँप॒क्वो३॒द्धीँद्र॒पिब॑च॒प्रस्थि॑तस्य ॥ अ॒द्धीदि॑ँद्र॒प्रस्थि॑ते॒माह॒वीँषि॒चनो॑दधिष्वपच॒तोतसोम॑ँ । प्रय॑स्वंत॒ःप्रति॑हर्या॑मसि॒त्वास॒त्याःसँतु॒यज॑मानस्य॒कामा॑ः ॥ प्रेंद्रा॒ग्निभ्यां॑सुवच॒स्यामि॑यर्मि॒सिंधा॑विव॒प्रेर॑यं॒नाव॑म॒र्कैः । अ या॑ऽइव॒परि॑चरंति दे॒वाये॑ऽअ॒स्मभ्यँधन॒दाऽउ॒द्भिद॑श्च ॥ २१ ॥ (१०।१०।५) नवाऽउ॑ंदे॒वाःक्षुध॒मिद्व॒धंद॑दुरु॒ताशि त॒मुप॑गच्छंतिमृ॒त्यव॑ः । उ॒तोर॒यिःपृ॒ण॒तोनोप॑दस्यत्यु॒तापृ॑ण॒न्मर्डि॒तारं॒नवि॑ंदते ॥ यऽआ॒ध्राय॑चक॒मानाय॑पि॒त्वोन्न॑वा॒न्त्सन्र॑ंफि॒तायो॑पज॒ग्मुषे॑ । स्थि॒रंमन॑ःकृणु॒तेसेव॑ते॒पुरोतो॒चि॒त्सम॑र्डि॒तारं॒नवि॑ंदते ॥ सऽइद्भो॒जोयोगृ॒हवे॒दद॒ात्यन्न॑कामा य॒चर॑तेकृ॒शाय॑ । अर॑मस्मै भवति॒याम॑हूताऽउ॒तापरी॒षुकृ॑णु॒तेसखा॑यं ॥ नससखा॒योनददा॑ति॒सख्ये॑सचा॒भुवे॒सच॑माना यपि॒त्वः । अपा॑स्मा॒त्प्रेया॒न्नतदोको॑ऽअस्तिपृ॒णंत॑म॒न्यमर॑णंचिदि॒च्छेत् ॥ पृ॒णीयादिन्नाध॑मानाय॒तव्या॒न्द्राघी॑यांस॒मनु॑ पश्येत॒पंथा॑ँ । ओहिवर्त॑ंते॒रथ्ये॑वच॒क्रान्यम॑न्य॒मुप॑तिष्ठंत॒राय॑ः ॥ २२ ॥ मोघ॒मन्नं॑विंदते॒ऽअप्र॑चेताःस॒त्यंब्र॑वीमिव॒धऽ इत्सतस्य॑ । नार्य॒मणं॒पुष्य॑ति॒नोसखा॑यं॒केव॑लाघोभवतिकेवला॒दी+ ॥ कृ॒षन्नित्फाल॒ऽआशि॑तंकृ॒णोति॒यन्नध्वा॑न॒मप॑वृ ङ्क्ते॒चरित्रैः॑ । वद॑न्ब्र॒ह्मावद॑त॒ोवनी॑यान्पृ॒णन्ना॒पिरपृ॑णंतम॒भिष्या॑त् ॥ एक॑पा॒द्भूयो॑द्वि॒पदो॒विच॑क्रमेद्वि॒पात्रि॒पाद॑म॒भ्येति प॒श्चात् । चतु॑ष्पादेतिद्वि॒पदा॑मभिस्व॒रेस॒ंपश्य॑न्प॒ंक्तीरु॑प॒तिष्ठ॑मानः ॥ स॒मौचि॒द्धस्तौ॒नस॒मंवि॑विष्टःसंमा॒तरा॑चि॒न्नस॒मंदु

(१०।१०।५) नवाइतिनवर्चस्यसूक्तस्यांगिरसोभिक्षुर्धनान्नदानंत्रिष्टुबाद्येजगत्यौ ।

हाते । यमयोश्छिन्नसमावीर्याणिज्ञातीचित्संतौनसमंपृणीतः ॥ २३ ॥ (१०।१०६) अग्नेहंसिन्य१त्रिणंदीद्यन्मर्त्येष्वा । स्वेक्षयेशुचिव्रत ॥ उतिष्ठसिस्वाहुतोघृतानिप्रतिमोदसे । यत्त्वास्रुचःसमस्थिरन् ॥ सऽआहुतोविरोचतेग्निरीळेन्योगिरा । स्रुचाप्रतीकमज्यते ॥ घृतेनाग्निःसमज्यतेमधुप्रतीकऽआहुतः । रोचमानोविभावसुः ॥ जरमाणःसमिध्यसेदेवेभ्योहव्यवाहन । तंत्वाहवंतमर्त्याः ॥ २४ ॥ तंमर्ताऽअमर्त्यघृतेनाग्निंसपर्यत । अदाभ्यंगृहपतिं ॥ अदाभ्येनशोचिषाग्नेरक्षस्त्वंदह । गोपाऽऋतस्यदीदिहि ॥ सत्वमग्नेप्रतीकेनप्रत्योषयातुधान्यः । उरुक्षयेषुदीद्यत् ॥ तंत्वागीर्भिरुरुक्षयाहव्यवाहंसमीधिरे । यजिष्ठंमानुषेजने ॥ २५ ॥ (१०।१०७) इतिवाऽइतिमेमनोगामश्वंसनुयामिति । कुवित्सोमस्यापामिति ॥ प्रवाताऽइवदोधतऽउन्मापीताऽअयंसत । कुवि० ॥ उन्मापीताऽअयंसतरथमश्वाऽइवाशवः । कुवि० ॥ उपमामतिरस्थितवाश्रापुत्रमिवप्रियं । कुवि० ॥ अहंतष्टेववंधुरंपर्यचामिहृदामतिं । कुवि० ॥ नहिमेऽअक्षिपच्चनाच्छान्त्सुःपंचकृष्टयः । कुवि० ॥ २६ ॥ नहिमेरोदसीऽउभेऽअन्यंपक्षंचनप्रति । कुवि० ॥ अभिद्यांमहिनाभुवमभी३मांपृथिवींमहीं । कुवि० ॥ हंताहंपृथिवीमिमांनिदधानीहवेहवा । कुवि० ॥ ॥४३॥

(१०।१०६) अग्नेहंसीतिनवर्चस्यसूक्तस्यामहीयवउरुक्षयोरक्षोहाग्निर्गायत्री । (१०।१०७) इतिवाइतित्रयोदशर्चस्यसूक्तस्यैंद्रो लबोगायत्री ।

ओ॒षमित्पृ॑थि॒वीम॒हंजं॒घना॑नी॒हवे॒हवा॑ । कु॒वि० ॥ दि॒विमे॑ऽअ॒न्यःप॒क्षो॒३॒धोऽअ॒न्यम॑चीकृषं । कु॒वि० ॥ अ॒हम॑स्मि महाम॒हो॑भिन॒भ्यमुदी॑षितः । कु॒वि० ॥ गृ॒होया॒म्यरं॑कृतोदे॒वेभ्यो॑हव्य॒वाह॑नः । कु॒वि० ॥ २७ ॥ इत्यष्टमाष्टके षष्ठोध्यायः ॥ ६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

द्विषष्टचध्यायेवर्गाः २७ सूक्तानि १४ ऋचः १४० ॥ त्यागः ॥ अश्विभ्या. ११ दक्षिणाया. ११ सरमाया. पणिभ्य. सरमाया. पणिभ्य. सरमाया. पणिभ्य. सरमाया. पणिभ्य. सरमाया. पणिभ्य. २ विश्वेभ्योदेवेभ्य. ७ समिद्धायाग्नय. तनूनपात. इळाये. बर्हिष. देवीभ्योद्वार्भ्य. उषासानक्ताभ्या. देवीभ्यांहोतृभ्यांप्रचेतोभ्या. सरस्वतीळाभारतीभ्य. त्वष्ट्र. वनस्पतय. स्वाहाकृतीभ्य. इंद्राये. ३० विश्वेभ्योदेवेभ्य. ३ परमात्मनइंद्राये. २ यज्ञायपरमात्मन. २ मध्यमायैवाच. गायत्र्यादिछंदोभ्य. विश्वेभ्योदेवेभ्य. अग्नय. ९ इंद्राये. ९ धनान्नाय. ९ रक्षोघ्नेग्नय. ९ इंद्रायलबाये. १३ ॥ इत्यष्टमेषष्ठः ॥

तदिन्नवाथर्वणोबृहद्दिवौं॑हिरण्यगर्भौं॑दशहिरण्यगर्भः॑प्राजापत्यःकार्यं॑वसुंनाष्टौचित्रमहावासिष्ठं॑आग्नेयंजागतं॑ माद्यांपंचमींचतैंयंवेनोवैन्यं॑मिमंनोनवैंद्युत्तमानिहवौं॑ग्निवरुणसोमानामाद्याग्नेयीं॑तिस्रश्चाग्नेरात्मस्तवः॑शिष्टाय थानिपातं॑सप्तमीजगत्यं॑हमष्टौवागांभृण्यात्मानंतुष्टाव॑द्वितीयाजगतीं॑नतंशैलूषिःकुल्मलबर्हिषौं॑वामदेव्योवां॑हो मुग्वैश्वदेवं॑मुपरिष्टाद्बार्हतं॑मंत्यात्रिष्टुप्॑रात्रीकुशिकःसौभरौं॑रात्रिर्वा॑भारद्वाजीं॑रात्रिस्तवंगायत्रं॑ममाग्नेनवविह

Digitization by eGangotri. Funding IKS-MoE-Delhi

व्यौवैश्वदेवंजगत्यंतँनासत्सप्तप्रजापतिःपरमेष्ठीभाववृत्तंतुयोयज्ञोयज्ञःप्राजापत्यौजगत्याद्यापप्राचःसुकीर्तिः
काक्षीवतोमध्येनुष्टुप्सोत्तराचाश्विन्यांवीजानंशकपूतोनार्मेधोमैत्रावरुणंन्यंकुसारिण्यांद्यालिंगोक्तदेवतांत्या
महासतोबृहंत्युपाद्योपांत्येप्रस्तारपंक्तींशेषाविराड्रूपाःप्रोषुसुदाःपैजवनंःशाक्करमहापांक्तावाद्यौतृचौत्रिष्टुबंतंमु
भेयन्मांधातायौवनाश्वौमहापांक्तंपंक्तिरंत्यांतामध्यर्धांगोधापश्यद्यंस्मिन्कुमारोयामायनौयाममानुष्टुभंहिंके
शीमुनयोवातरशनांजूतिर्वातजूतिर्विप्रजूतिर्वृषाणकःकरिक्रतंएतशऋश्यश्रृंगंश्चैकर्चाःकैशिनंमुतदेवाःसप्तऋ
षयंएकर्चांवैश्वदेवंतवत्येषळंगऽऔरवोजागतंसूर्यरश्मिर्देवगंधर्वौविश्वावसुरात्मानमस्तौत्पूर्वार्धंसवितारंमग्ने
तवाग्निःपावकंआग्नेयंविष्टारपंक्तीतिस्रःसतोबृहत्यंउपरिष्टाज्ज्योतिरग्नेअच्छाग्निस्तापसोंवैश्वदेवमानुष्टुभंह्ययम
ष्टौद्वृचांःशार्ङ्गाजरिताद्रोणंःसारिसृक्कःस्तंवमित्रश्चांग्नेयमाद्येजगत्यौचतस्रस्त्रिष्टुभः ॥ ७ ॥ ॥ ॥

हरिःओम् (१०।१०।८) तदिदांसभुवंनेषुज्येष्ठंयतोंजज्ञऽउग्रस्त्वेषनृंम्णः । सद्योजंज्ञानोनिरिंणातिशत्रूननुयं
विश्वेमदंत्यूमाः ॥ वावृधानःशवंसाभूयोंजाःशत्रुर्दासायंभियसंदधाति । अव्यंनच्चव्यनच्चसस्निसंतैनवंतप्रभृंतामदें ॥४४॥
षु ॥ त्वेक्रतुमपिंवृंजंतिविश्वेद्विर्यदेतेत्रिर्भवंत्यूमाः । स्वादोःस्वादीयःस्वादुनांसृजासमदःसुमधुमधुंनाभियोंधीः ॥

(१०।१०।८) तदिदितिनवर्चस्यसूक्तस्याथर्वणोबृहद्दिवइंद्रस्त्रिष्टुप ।

इति॑चि॒द्धित्वा॒धना॒जयं॑तं॒मदे॑मदेऽअनु॒मदं॑ति॒विप्राः॑ । ओजी॑योधृष्णोस्थि॒रमात॑नुष्व॒मात्वा॑दभन्यातु॒धाना॑दु॒रेवाः॑ ॥
त्वया॑व॒यंशा॑शद्महे॒रणे॑षुप्र॒पश्यं॑तोयु॒धेन्या॑नि॒भूरि॑ । चो॒दया॑मित॒ऽआयु॑धा॒वचो॑भिः॒संते॑शिशामि॒ब्रह्म॑णा॒वयां॑सि ॥ १ ॥
स्तु॒षेय्यं॑पुरु॒वर्प॑स॒मृभ्वं॑मि॒नत॑ममा॒प्त्यमा॒प्त्याना॑म् । आद॑र्षते॒शव॑सास॒प्तदानू॒न्प्रसा॑क्षतेप्रति॒माना॑नि॒भूरि॑ ॥ नितद्द॑धि॒षेव॑रं॒परं॑
च॒यस्मि॒न्नावि॒थाव॑सादुरो॒णे । आमा॒तरा॑स्थापयसेजिग॒त्नूऽअत॑ऽइनोषि॒कर्व॑रापु॒रूणि॑ ॥ इ॒माब्रह्म॑बृ॒हद्दि॑वोविव॒क्तींद्रा॑य
शू॒षम॑ग्रि॒यःस्व॒र्षाः । म॒होगो॒त्रस्य॑क्षयतिस्व॒राजो॒दुर॑श्च॒विश्वा॑ऽअवृ॒णोद॒पस्वाः+ ॥ ए॒वाम॒हान्बृ॒हद्दि॑वो॒ऽअथ॒र्वावो॑च॒
त्स्वां॑त॒न्वं॑१॒मिंद्र॑मे॒व । स्वसा॑रोमात॒रिभ्व॑रीररि॒प्राहि॒न्वंति॑च॒शव॑साव॒र्धयं॑तिच ॥ २ ॥ (१०।१०।९) हि॒र॒ण्य॒ग॒र्भः
सम॑वर्त॒ताग्रे॑भू॒तस्य॑जा॒तःपति॒रेक॑ऽआसीत् । सदा॑धारपृथि॒वींद्यामु॒तेमांकस्मै॑दे॒वाय॑ह॒विषा॑विधेम ॥ यऽआ॑त्म॒दाब॑ल॒
दायस्य॒विश्व॑ऽउ॒पास॑तेप्र॒शिषं॒यस्य॑दे॒वाः । यस्य॑छा॒यामृतं॒यस्य॑मृ॒त्युःकस्मै॑० ॥ यःप्रा॑ण॒तोनि॑मिष॒तोम॑हि॒त्वैक॒ऽइद्राजा॒
जग॑तोब॒भूव॑ । यऽईशे॑ऽअ॒स्यद्वि॒पद॒श्चतु॑ष्पदः॒कस्मै॑० ॥ यस्ये॒मेहि॒मव॑न्तोमहि॒त्वायस्य॑समु॒द्रंर॒सया॑स॒हाहुः । यस्ये॒माः
प्र॒दिशो॒यस्य॑बा॒हूकस्मै॑० ॥ येन॒द्यौरु॒ग्रापृ॑थि॒वीचं॑दृ॒ळ्हायेन॒स्वः॑स्तभि॒तंयेन॒नाकः॑ । योऽअं॒तरि॑क्षे॒रज॑सोवि॒मान॒ःकस्मै॑०
॥ ३ ॥ यंक्रंद॑सी॒ऽअव॑सातस्तभा॒नेऽअ॒भ्यैक्षे॑तां॒मन॑सा॒रेज॑माने । यत्राधि॒सूर॒ऽउदि॑तोवि॒भाति॒कस्मै॑० ॥ आपो॑ह॒यद्बृ॑

(१०।१०।९) हिरण्यगर्भइतिदशर्चस्यसूक्तस्यप्राजापत्योहिरण्यगर्भःप्रजापतिस्त्रिष्टुप् ।

ऋक्सं. हतीर्विश्वमायन्गर्भंदधानाजनयंतीरग्निं । ततोदेवानांसमवर्ततासुरेकःकस्मै० ॥ यश्चिदापोमहिनापर्यपश्यद्दक्षंदधा मंडलं १०
नाजनयंतीर्यज्ञं । योदेवेष्वधिदेवऽएकऽआसीत्कस्मै० ॥ मानोहिंसीज्जनितायःपृथिव्यायोवादिवंसत्यधर्माजजान ।
अ.८अ.७ यश्चापश्चंद्राबृहतीर्जजानकस्मै० ॥ प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरितावभूव । यत्कामास्तेजुहुमस्तन्नोऽअ अनु. १०
॥४५॥ स्तुवयंस्यामपतयोरयीणां+ ॥ ४ ॥ (१०।१०।१०) वसुंनचित्रमहसंगृणीषेवामंशेवमतिथिमद्विषेण्यं । सरासते
शुरुधोविश्वधायसोग्निर्होतागृहपतिःसुवीर्यं ॥ जुषाणोऽअग्नेप्रतिहर्यमेवचोविश्वानिविद्वान्वयुनानिसुक्रतो । घृतनि
र्णिग्ब्रह्मणेगातुमेरयतवदेवाऽअजनयन्ननुव्रतम्+ ॥ सप्तधामानिपरियन्नमर्त्योदाशद्दाशुषेसुकृतेमामहस्व । सुवीरेण
रयिणाग्नेस्वाभुवायस्तऽआनट्समिधातंजुषस्व ॥ यज्ञस्यकेतुंप्रथमंपुरोहितंहविष्मंतऽईळतेसप्तवाजिनं । शृण्वंतमग्निं
घृतपृष्ठमुक्षणंपृणंतंदेवंपृणतेसुवीर्यं ॥ त्वंदूतःप्रथमोवरेण्यःसहूयमानोऽअमृतायमत्स्व । त्वांमर्जयन्मरुतोदाशुषोगृ
हेत्वांस्तोमेभिर्भृगवोविरुरुचुः ॥ ५ ॥ इषंदुहन्सुदुघांविश्वधायसंयज्ञप्रियेयजमानायसुक्रतो । अग्नेघृतस्नुस्त्रिर्ऋता
निदीद्यद्वर्तिर्यज्ञंपरियन्त्सुक्रतूयसे ॥ त्वामिदस्याऽउषसोव्युष्टिषुदूतंकृण्वानाऽअयजंतमानुषाः । त्वांदेवामहया ॥४५॥
य्यायवावृधुराज्यमग्नेनिमृजंतोऽअध्वरे+ ॥ नित्वावसिष्ठाऽअह्वंतवाजिनंगृणंतोऽअग्नेविदथेषुवेधसः । रायस्पोषंय

(१०।१०।१०) वसुमित्यष्टर्चस्यसूक्तस्यवासिष्ठश्चित्रमहाअग्निर्जगतीआद्यापंचम्यौत्रिष्टुभौ ।

जंमानेषुधारययूयं० ॥ ६ ॥ (१०।१०।११) अयंवेनश्चोदयत्पृश्निगर्भाज्योतिर्जरायूरजसोविमाने । इममपांसंग
मेसूर्यस्यशिशुन्नविप्रामतिभीरिहंति ॥ समुद्रादूर्मिमुदियर्तिवेनोनभोजाःपृष्ठंहर्यतस्यदर्शि । ऋतस्यसानावधिविष्टपि
भ्राट्समानंयोनिमभ्यनूषतव्राः+ ॥ समानंपूर्वीरभिवावशानास्तिष्ठन्वत्सस्यमातरःसनीळाः । ऋतस्यसानावधिचक्र
माणारिहंतिमध्वोऽअमृतस्यवाणीः ॥ जानंतोरूपमकृपंतविप्रामृगस्यघोषंमहिषस्यहिग्मन् । ऋतेनयंतोऽअधिसिंधुम
स्थुर्विदद्गंधर्वोऽअमृतानिनाम ॥ अप्सराजारमुपसिष्मियाणायोषाबिभर्तिपरमेव्योमन् । चरत्प्रियस्ययोनिषुप्रियः
सन्सीदत्पक्षेहिरण्ययेसवेनः+ ॥ ७ ॥ नाकेसुपर्णमुपयत्पतंतंहृदावेनंतोऽअभ्यचक्षतत्वा । हिरण्यपक्षंवरुणस्यदूतंय
मस्ययोनौशकुनंभुरण्युं+ ॥ ऊर्ध्वोगंधर्वोऽअधिनाकेऽअस्थात्प्रत्यङ्चित्राबिभ्रदस्यायुधानि । वसानोऽअत्कंसुरभिं
दृशेकंस्व१र्णनामजनतप्रियाणि ॥ द्रप्सःसमुद्रमभियज्जिगातिपश्यन्गृध्रस्यचक्षसाविधर्मन् । भानुःशुक्रेणशोचिषा
चकानस्तृतीयेचक्रेरजसिप्रियाणि ॥ ८ ॥ (१०।१०।१२) इमंनोऽअग्नऽउपयज्ञमेहिपंचयामंत्रिवृतंसप्ततंतुं । अ
सोहव्यवाळुतनःपुरोगाज्योगेवदीर्घंतमऽआशयिष्ठाः ॥ अदेवाद्देवःप्रचतागुहायन्प्रपश्यमानोऽअमृतत्वमेमि । शि

(१०।१०।११)अयमित्यष्टर्चस्यसूक्तस्यभार्गवोवेनोवेनस्त्रिष्टुप्।(१०।१०।१२)इमंनइतिनवर्चस्यसूक्तस्याद्यायाःपंचम्यादिचतसृणांचाग्निवरुणसोमाऋषयःद्वितीयादितिसृणामग्निर्ऋषिःआद्यानांचतसृणामग्निःपंचमीसप्तम्योर्वरुणःषष्ठ्याःसोमोनवम्याःसोमेंद्रौत्रिष्टुप्सप्तमीजगती।

वंयत्संतमशिवोजहामिस्वात्सख्यादरणींनाभिंमेमि ॥ पश्यन्नन्यस्याऽअतिथिंवयायाऽऋतस्यधामविमिमेपुरूणि ।
शंसामिपित्रेऽअसुरायशेवमयज्ञियाद्यज्ञियंभागमेमि ॥ बह्वीःसमाऽअकरमंतरस्मिन्निंद्रंवृणानःपितरंजहामि । अग्निः
सोमोवरुणस्तेच्यवंतेपर्यावर्द्राष्ट्रंतदवाम्यायन्+ ॥ निर्मायाऽउत्येऽअसुराऽअभूवन्त्वंचमावरुणकामयासे । ऋतेनरा
जन्ननृतंविविंचन्ममराष्ट्रस्याधिपत्यमेहि ॥ ९ ॥ इदंस्वरिदमिदासवाममयंप्रकाशऽउर्वी१तरिक्षं । हनाववृत्रंनिरेहि
सोमहविष्ट्वासंतंहविषायजाम ॥ कविःकवित्वादिविरूपमासजदप्रभूतीवरुणोनिरपःसृजत् । क्षेमंकृण्वानाजनयोन
सिंधवस्ताऽअस्यवर्णंशुचयोभरिभ्रति ॥ ताऽअस्यज्येष्ठमिंद्रियंसचंतेताऽईमाक्षेतिस्वधयामदंतीः । ताऽईंविशोनरा
जानंवृणानाबीभत्सुवोऽअपवृत्रादतिष्ठन् ॥ वीभत्सूनांसयुजंहंसमाहुरपांदिव्यानांसख्येचरंतं । अनुष्टुभमनुचर्चूर्य
माणमिंद्रंनिचिक्युःकवयोमनीषा+ ॥ १० ॥ (१०।१०।१३) अहंरुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुतविश्वदेवैः ।
अहंमित्रावरुणोभाबिभर्म्यहमिंद्राग्नीऽअहमश्विनोभा+ ॥ अहंसोममाहनसँबिभर्म्यहंत्वष्टारमुतपूषणंभगँ । अहंदधा
मिद्रविणंहविष्मतेसुप्राव्ये३यजमानायसुन्वते+ ॥ अहंराष्ट्रीसंगमनीवसूनांचिकितुषीप्रथमायज्ञियानां । तांमादेवा
व्यदधुःपुरुत्राभूरिस्थात्रांभूर्यावेशयंतीं ॥ मयासोऽअन्नंऽमत्तियोविपश्यतियःप्राणितियऽईंशृणोत्युक्तं । अमंतवोमां

(१०।१०।१३) अहंरुद्रेभिरित्यष्टर्चस्यसूक्तस्यांभृणिर्वागांभृणिर्वाक्त्रिष्टुप्द्वितीयाजगती ।

तऽउप॑क्षियंतिश्रु॒धिश्रु॑तश्र॒द्धि॒वं॑ते॑वदामि ॥ अ॒हमे॒वस्व॒यमि॒दंव॑दामि॒जुष्टं॑दे॒वेभि॑रु॒तमानु॑षेभिः । यंका॒मये॒तंत॑मु॒ग्रंकृ॑णोमि॒तंब्र॒ह्माणं॒तमृषिं॒तंसु॑मे॒धां+ ॥ ११ ॥ अ॒हंरु॒द्राय॒धनु॒रात॑नोमिब्र॒ह्मद्विषे॒शर॑वे॒हंत॒वाऽउ॑ । अ॒हंजना॑य॒स॒मदं॑कृणोम्य॒हंद्यावा॑पृथि॒वीऽआवि॑वेश ॥ अ॒हंसु॑वेपि॒तर॑मस्यमू॒र्धन्मम॒योनि॑र॒प्स्वं॑१॒तःस॑मु॒द्रे । ततो॒विति॑ष्ठे॒भुव॒नानु॒विश्वो॒तामूंद्यांव॒र्ष्म॑णोप॑स्पृशामि ॥ अ॒हमे॒ववात॑ऽइव॒प्रवा॑म्या॒रभ॑माणा॒भुव॑नानि॒विश्वा॑ । प॒रोदि॒वाप॒रऽए॒नापृ॑थि॒व्यैताव॑तीमहि॒नासंब॑भूव ॥ १२ ॥ (१०।१०।१४) नतमंहो॒नदु॒रि॒तंदे॑वा॑सोऽअष्ट॒मर्त्यं॑ । स॒जोष॑सो॒यम॑र्य॒मामि॒त्रोनयं॑ति॒वरु॑णो॒ऽअति॒द्विषः॑ ॥ तद्धि॒व॒यंवृ॑णी॒महे॒वरु॑ण॒मित्रार्य॑मन् । येना॒निरंह॑सोयू॒यंपा॒थने॒था॒च॒मर्त्य॑मति॒द्विषः॑ ॥ तेनू॒नंनो॒यमू॒तये॒वरु॑णोमि॒त्रोऽअ॒र्य॒मा । नयिं॑ष्ठाऽउनो॒ने॒षणि॒पर्षि॑ष्ठाऽउनः॒प॒र्षण्यति॒द्विषः॑ ॥ यू॒यंविश्वं॒परि॑पाथ॒वरु॑णोमि॒त्रोऽअ॒र्य॒मा । यु॒ष्माकं॒शर्म॑णिप्रि॒येस्या॑मसुप्रणीत॒योति॒द्विषः॑ ॥ आ॒दि॒त्यासो॒ऽअति॒स्रिधो॒वरु॑णोमि॒त्रोऽअ॒र्य॒मा । उ॒ग्रंम॒रुद्भीं॑रु॒द्रंहुं॑वे॒मेंद्र॑म॒ग्निंस्व॒स्तये॑ति॒द्विषः॑॥ नेता॑रऽऊ॒षुण॑स्ति॒रोवरु॑णोमि॒त्रोऽअ॒र्य॒मा । अति॒विश्वा॑निदु॒रि॒ताराजा॑नश्चर्षणी॒नामति॒द्विषः॑॥ शु॒नम॒स्मभ्य॑मू॒तये॒वरु॑णोमि॒त्रोऽअ॒र्य॒मा । शर्म॑यच्छंतुस॒प्रथ॑ऽआदि॒त्यासो॒यदीम॑हे॒ऽअति॒द्विषः॑ ॥ यथा॑ह॒त्यद्व॑सवोगौ॒र्यं॑चित्प॒

(१०।१०।१४) नतमित्यष्टर्चस्यसूक्तस्यशैलूषिःकुल्मलबर्हिषोविश्वेदेवाउपरिष्टाद्बृहत्यंत्यात्रिष्टुप्। (अत्रवामदेव्योंहोमुक्पाक्षिकऋषिः । कुल्मलबर्हिषेत्यदंतप्रातिपदिकं) ।

Digitization by eGangotri Funding: MoE-IKS-Delhi

दिषिताममुँचतायजत्राः । एवोष्वं१स्मन्मुंचताव्यंहःप्रतार्यंग्नेप्रतरंनऽआयुः ॥ १२ ॥ (१०।१०।१५) रात्रीव्यंख्यदायतीपुरुत्रादेव्यं१क्षभिः । विश्वाऽअधिश्रियोधित ॥ ओर्वंप्राऽअमंर्त्यानिवतोदेव्यु१द्वतः । ज्योतिषाबाधते तमः ॥ निरुस्वसारमस्कृतोषसंदेव्यायती । अपेदुहासतेतमः ॥ सानोऽअद्ययस्यावयंनितेयामन्नाविंक्ष्महि । वृक्षेनवसतिंवयः ॥ निग्रामासोऽअविक्षतनिपद्वंतोनिपक्षिणः । निश्येनासंश्चिदर्थिनः ॥ यावयावृक्यं१वृकंयवयस्तेनमूर्म्ये । अथानःसुतरांभव ॥ उपमापेपिशत्तमःकृष्णंव्यक्तमस्थित । उषऽऋणेवयातय ॥ उपतेगाऽइवाकरंवृणीष्वदुहितर्दिवः । रात्रिस्तोमंनजिग्युषे ॥१४॥ (परिशिष्टं ॥ आरात्रिपार्थिवंरजःपितरःप्रायुधामभिः । दिवःसदांसिबृहतीवितिष्ठसऽआत्वेषंवर्ततेतमः ॥ येतेरात्रीनृचक्षसोयुक्तासोनवतिर्नव । अशीतिःसंत्वष्टाऽउतोतेसप्तसप्ततीः ॥ रात्रींप्रपद्येजननींसर्वभूतनिवेशनीं । भद्रांभगवतींकृष्णांविश्वस्यजगतोनिशां ॥ संवेशिनींसंयमिनींग्रहनक्षत्रमालिनीं । प्रपन्नोहंशिवांरात्रींभद्रेपारमशीमहिभद्रेपारमशीमह्योंनमः ॥१॥ स्तोष्यामिप्रयतोदेवींशरण्यांबह्वृचप्रियां । सहस्रसंमितांदुर्गांजातवेदसेसुनवामसोमं ॥ शांत्यर्थंतद्विजातीनामृषिभिःसोमपाश्रिताः । ऋग्वेदेत्वंसमुत्पन्नारातीयतोनिदहातिवेदः ॥ येत्वांदेविप्रपद्यंतिब्राह्मणाहव्यवाहनीं । अविद्याबहुविद्यावासनःपर्षदातिदुर्गाणिविश्वा ॥ येऽअग्निवर्णांशुभांसौम्यांकीर्त

(१०।१०।१५) रात्रीत्यष्टर्चस्यसूक्तस्यसौभरःकुशिकोरात्रिर्गायत्री । (अत्रभारद्वाजीरात्रिऋषिकापाक्षिकी) ।

यिष्यंतियेद्विजाः । तांतारयतिदुर्गाणिनावेवसिंधुंदुरितात्यग्निः ॥ २ ॥ दुर्गेषुविषमेघोरेसंग्रामेरिपुसंकटे । अग्निचोरनिपातेषुदुष्टग्रहनिवारणे ॥ दुर्गेषुविषमेषुत्वंसंग्रामेषुवनेषुच । मोहयित्वाप्रपद्यंतेतेषांमेऽअभयंकुरुतेषांमेऽअभयंकुरु ॥ केशिनींसर्वभूतानांपंचमीतिचनामच । सामांसमानिशादेवीसर्वतःपरिरक्षतुसर्वतःपरिरक्षत्वोन्नमः ॥ ३ ॥ तामग्निवर्णांतपसाज्वलंतींवैरोचनींकर्मफलेषुजुष्टां । दुर्गांदेवींशरणमहंप्रपद्येसुतरसितरसेनमःसुतरसितरसेनमः ॥ दुर्गादुर्गेषुस्थानेषुशंनोदेवीरभिष्टये । यऽइमंदुर्गास्तवंपुण्यंरात्रौरात्रौसदापठेत् ॥ रात्रिःकुशिकसोभरोरात्रिस्तवोगायत्री । रात्रीसूक्तंजपेन्नित्यंतत्कालमुपपद्यते ॥ उलूकयातुंशुशुलूकयातुंजहिश्वयातुमुतकोकयातुं । सुपर्णयातुमुतगृध्रयातुंदृषदेवप्रमृणरक्षऽइंद्र ॥ पिशंगभृष्टिमंभृणंपिशाचिमिंद्रसंमृण । सर्वरक्षोनिबर्हय ॥ ४ ॥ हिमस्यत्वाजरायुणाशालेपरिव्ययामसि । उतह्रदोहिनोधियोग्निर्ददातुभेषजं ॥ शिशीतह्रदोहिनोधियोग्निर्ददातुभेषजं । अंतिकामग्निमजनयदूर्वीतःशिशुलागमत् ॥ अजातपुत्रपक्षायांह्रदयंममदूयते । विपुलंवनंबह्वाकाशंचरंजातवेदःकामाय ॥ मांचरक्षपुत्रांश्चशरणमभूत्तवं । पिंगाक्षलोहितग्रीवकृष्णवर्णनमोस्तुते ॥ अस्मान्निवर्हरस्येनांसागरस्योर्मयोयथा । इंद्रःक्षत्रंददातुवरुणमभिषिंचतु ॥ शत्रवोनिधनंयांतुजयस्त्वंब्रह्मतेजसा ॥ ५ ॥ कपिलजटींसर्वभक्षंचाग्निंप्रत्यक्षदैवतं । वरुणंचवशाम्यग्नेममपुत्रांश्चरक्षतुममपुत्रांश्चरक्षत्वोन्नमः ॥ साग्रंवर्षशतंजीवपिबखादचमोदच । दुःखितांश्चद्वि

जांश्चैवप्रजांचपशुपालय ॥ यावदादित्यस्तपतियावद्ब्रह्मज्वलतिचंद्रमाः । तावद्ब्रह्मायुःपूर्वायुतितावज्जीवजयाजय ॥ येन
केनप्रकारेणकोहिनामनजीवति । परेषामुपकारार्थंयज्जीवतिसजीवति । एतांवैश्वानरींसर्वदेवान्नमोस्तुते ॥ नचोर
भयंनचसर्पभयंनचव्याघ्रभयंनचमृत्युभयं । यस्यापमृत्युर्नचमृत्युःसर्वंलभतेसर्वंजयते ॥ ६ ॥ इतिपरिशिष्टं ॥)
(१०।१०।१६) ममाग्नेवर्चोविहवेष्वस्तुवयंत्वेंधानास्तन्वंपुषेम । मह्यंनमंतांप्रदिशश्चतस्रस्त्वयाध्यक्षेणपृतनाजये
म ॥ ममदेवाविहवेसंतुसर्वऽइंद्रवंतोमरुतोविष्णुरग्निः । ममांतरिक्षमुरुलोकमस्तुमह्यंवातःपवतांकामेऽअस्मिन्+ ॥
मयिदेवाद्रविणमायजंतांमय्याशीरस्तुमयिदेवहूतिः । दैव्याहोतारोवनुषंतपूर्वेरिष्टाःस्यामतन्वासुवीराः ॥ मह्यंयजं
तुममयानिहव्याकूतिःसत्यामनसोमेऽअस्तु । एनोमानिगांकतमच्चनाहंविश्वेदेवासोऽअधिवोचतानः ॥ देवीःषळु
र्वीरुरुनःकृणोतविश्वेदेवासऽइहवीरयध्वं । माहास्महिप्रजयामातनूभिर्मारधामद्विषतेसोमराजन् ॥ १५ ॥ अग्नेम
न्युंप्रतिनुदन्परेषामदब्धोगोपाःपरिपाहिनस्त्वं । प्रत्यंचोयंतुनिगुतःपुनस्तेऽमैषांचित्तंप्रबुधांविनेशत् ॥ धाताधातॄ
णांभुवनस्ययस्पतिर्देवंत्रातारमभिमातिषाहं । इमंयज्ञमश्विनोभाबृहस्पतिर्देवाःपांतुयजमानंन्यर्थात्+ ॥ उरुव्यचा
नोमहिषःशर्मयंसदस्मिन्हवेपुरुहूतःपुरुक्षुः । सनःप्रजायैहर्यश्वमृळयेंद्रमानोरीरिषोमापरादाः ॥ येनःसपत्नाऽअपते

(१०।१०।१६) ममाग्नइतिनवर्चस्यसूक्तस्यांगिरसोविहव्योविश्वेदेवास्त्रिष्टबंत्याजगती ।

भवंत्विंद्राग्निभ्यामवंबाधामहेतान् । वसवोरुद्राऽआदित्याऽउपरिस्पृशंमोग्रंचेत्तारमधिराजमक्रन् ॥ (परिशिष्टं ॥
अर्वांचमिंद्रममुतोहवामहेयोगोजिद्धनजिदश्वजिद्यः । इमंनोयज्ञंविहवेजुषस्वास्यकुल्मोहरिवोमेदिनंत्वा) ॥ १६ ॥
(परिशिष्टं ॥ आयुष्यंवर्चस्यंरायस्पोषमौद्भिदं । इदंहिरण्यंवर्चस्वजैत्रायाविशतादिमाम् ॥ उच्चैर्वाजीपृतनाषाट्सं
भासाहंधनंजयं । सर्वाःसमग्राऽऋद्धयोहिरण्येस्मिन्समाहिताः ॥ शुनमहंहिरण्यस्वपितुर्नामेवजग्रभ । तेनमांसूर्य
त्वचमकरंपूरुषुप्रियं ॥ सम्राजंचविराजंचाभिष्टिर्याचमेध्रुवा । लक्ष्मीराष्ट्रस्ययामुखेतयामामिंद्रसंसृज ॥ अग्नेःप्रजा
तंपरियद्धिरण्यममृतंयज्ञेऽअधिमर्त्येषु । यऽएनद्वेदसइदेनमर्हतिजरामृत्युर्भवतियोबिभर्ति ॥ १ ॥ यद्वेदराजावरु
णोयद्वुदेवीसरस्वती । इंद्रोयद्वृत्रहावेदतन्मेवर्चसऽआयुषे ॥ नतद्रक्षांसिनपिशाचास्तरंतिदेवानामोजःप्रथमजंह्येत
तत् । योबिभर्तिदाक्षायणाहिरण्यंसदेवेषुकृणुतेदीर्घमायुःसमनुष्येषुकृणुतेदीर्घमायुः ॥ यदाबध्नंदाक्षायणाहिरण्यंश
तानीकायसुमनस्यमाना । तन्नऽआबध्नामिशतशारदायायुष्माञ्जरदष्टिर्यथासत् ॥ घृतादुल्लुप्तंमधुमत्सुवर्णंधनंजयंध
रुणंधारयिष्णु ॥ ऋणक्सपत्नादधरांश्चकृण्वदारोहमांमहतेसौभगाय ॥ प्रियंमांकुरुदेवेषुप्रियंराजसुमाकुरु । प्रियं
विश्वेषुगोत्प्रेषुमयिधेहिरुचारुचं ॥ अग्निर्येनविराजतिसूर्योयेनविराजति ॥ विराज्यैनविराजतितेनास्मान्ब्रह्मणस्पते

विराजसमिधंकुरु ॥ २ ॥ इतिपरिशिष्टं ॥) (१०।११।१) नासदासीन्नोसदासीत्तदानींनासीद्रजोनोव्योमापरोयत् । किमावरीवःकुहकस्यशर्मन्नंभःकिमासीद्गहनंगभीरं+ ॥ नमृत्युरासीदमृतंनतर्हिनरात्र्याऽअह्नऽआसीत्प्रकेतः । आनीदवातंस्वधयातदेकंतस्माद्धान्यन्नपरःकिंचनास ॥ तमऽआसीत्तमसागूह्ळमग्रेप्रकेतंसलिलंसर्वमाऽइदं । तुच्छ्येनाभ्वपिहितंयदासीत्तपसस्तन्महिनाजायतैकं ॥ कामस्तदग्रेसमवर्तताधिमनसोरेतःप्रथमंयदासीत् । सतोबंधुमसतिनिरविंदन्हृदिप्रतीष्याकवयोमनीषा+ ॥ तिरश्चीनोविततोरश्मिरेषामधःस्विदासी३दुपरिस्विदासी३त् । रेतोधाऽआसन्महिमानऽआसन्स्वधाऽअवस्तात्प्रयतिःपरस्तात् ॥ कोऽअद्धावेदकऽइहप्रवोचत्कुतऽआजाताकुतऽइयंविसृष्टिः । अर्वाग्देवाऽअस्यविसर्जनेनाथाकोवेदयतऽआबभूव ॥ इयंविसृष्टिर्यतऽआबभूवयदिवादधेयदिवान । योऽअस्याध्यक्षःपरमेव्योमन्त्सोऽअंगवेदयदिवानवेद ॥ १७ ॥ (१०।११।२) योयज्ञोविश्वतस्तंतुभिस्ततऽएकंशतंदेवकर्मेभिरायतः । इमेवयंतिपितरोयऽआययुःप्रवयापवयेत्यासतेतते+ ॥ पुमाँऽएनंतनुतऽउत्कृणत्तिपुमान्विततन्नेऽअधिनाकेअस्मिन् । इमेमयूखाऽउपसेदुरूसदःसामानिचक्रुस्तसराण्योतवे ॥ कासीत्प्रमाप्रतिमाकिंनिदानमाज्यंकिमासी

एकादशेनुवाकेत्रयोविंशतिसूक्तानि (१०।११।१) नासदितिसप्तर्चस्यसूक्तस्यपरमेष्ठीप्रजापतिर्भाववृत्तिस्त्रिष्टुप्। (१०।११।२) योयज्ञइतिसप्तर्चस्यसूक्तस्यप्राजापत्योयज्ञोभाववृत्तिस्त्रिष्टुबाद्याजगती ।

त्परिधिःकऽआसीत् । छंदःकिमासीत्प्रऽउगंकिमुक्थंयद्देवादेवमयंजंतविश्वे ॥ अग्नेर्गायत्र्यभवत्सयुग्वोष्णिहयासविता संबभूव । अनुष्टुभासोमऽउक्थैर्महस्वान्बृहस्पतेर्बृहतीवाचमावत् ॥ विराण्मित्रावरुणयोरभिश्रीरिंद्रस्यत्रिष्टुबिह भागोऽअह्नः । विश्वान्देवान्जगत्याविवेशतेनचाक्लृप्रऽऋषयोमनुष्याः ॥ चाक्लृप्रेतेनऽऋषयोमनुष्यायज्ञेजातेपितरो नःपुराणे । पश्यन्मन्येमनसाचक्षसातान्यऽइमंयज्ञमयजंतपूर्वे ॥ सहस्तोमाःसहछंदसऽआवृतःसहप्रमाऽऋषयःसप्त दैव्याः । पूर्वेषांपंथामनुदृश्यधीराऽअन्वालेभिरेरथ्यो३नरश्मीन्+ ॥ १८ ॥ (१०।११।३) अपप्राचऽइंद्रविश्वाँ ऽअमित्रानपापाचोऽअभिभूतेनुदस्व । अपोदीचोऽअपशूराधराचऽउरौयथातवशर्मन्मदेम ॥ कुविदंगयवमंतोयवंचिद्यथादांत्यनुपूर्वंवियूय । इहेहैषांकृणुहिभोजनानियेबर्हिषोनमोवृक्तिंनजग्मुः+ ॥ नहिस्थूर्यृतुथायातमस्तिनोतश्रवो विविदेसंगमेषु । गव्यंतऽइंद्रंसख्यायविप्राऽअश्वायंतोवृषणंवाजयंतः ॥ युवंसुराममश्विनानमुचावासुरेसचा । विपिपानाशुभस्पतीऽइंद्रंकर्मस्वावतं ॥ पुत्रमिवपितरावश्विनोभेंद्रावथुःकाव्यैर्दंसनाभिः । यत्सुरामंव्यपिबःशचीभिः सरस्वतीत्वामघवन्नभिष्णक् ॥ इंद्रःसुत्रामास्ववाँऽअवोभिःसुमृळीकोभवतुविश्ववेदाः । बाधतांद्वेषोऽअभयंकृणोतुसुवीर्यस्यपतयःस्याम ॥ तस्यवयंसुमतौयज्ञियस्यापिभद्रेसौमनसेस्याम । ससुत्रामास्ववाँऽइन्द्रोऽअस्मेऽआराच्चिद्द्वे

(१०।११।३) अपप्राचइतिसप्तर्चस्यसूक्तस्यकाक्षीवतःसुकीर्तिरिंद्रश्चतुर्थीपंचम्योरश्विनौत्रिष्टुप्चतुर्थ्यनुष्टुप् ।

Digitization by eGangotri. Funding MDF-Delhi

षःसनुतर्युयोतु ॥ १९ ॥ (१०।११।४) ईजानमिद्यौर्गूर्तावसुरीजानंभूमिरभिप्रभूषणि । ईजानंदेवावश्वि
नावभिसुम्नैरवर्धतां ॥ तावांमित्रावरुणाधारयत्क्षितीसुषुम्नेषितत्वतायजामसि । युवोःक्राणायसख्यैरभिष्यामरक्ष
सः ॥ अधाचिन्नुयद्दिधिषामहेवामभिप्रियंरेक्णःपत्यमानाः । दद्वाँवायत्पुष्यतिरेक्णःसम्वारन्नकिरस्यमघानि ॥
असावन्योऽअसुरसूयतद्यौस्त्वंविश्वेषांवरुणासिराजा । मूर्धारथस्यचाकन्नैतावतैनसांतकध्रुक्+ ॥ अस्मिन्त्स्वे३तच्छ
कपूतऽएनोहितेमित्रेनिगतान्हंतिवीरान् । अवोर्वायद्धात्तनूष्ववःप्रियासुयज्ञियास्वर्वा ॥ युवोर्हिमातादितिर्विचेत
साद्यौर्नभूमिःपयसापुपूतनि । अवप्रियादिदिष्टनसूरोनिनिक्तरश्मिभिः ॥ युवंह्यप्नराजावसीदतंतिष्ठद्रथंनधूर्षदंवन
र्षदं । तानःकणूकयंतीर्नृमेधस्तत्रेऽअंहसःसुमेधस्तत्रेऽअंहसः ॥ २० ॥ (१०।११।५) प्रोष्वस्मैपुरोरथमिंद्रायशूष
मर्चत । अभीकेचिदुलोककृत्संगेसमत्सुवृत्रहास्माकंबोधिचोदितानभंतामन्यकेषांज्याकाऽअधिधन्वसु ॥ त्वंसिंधूँर
वासृजोधराचोऽअहन्नहिं । अशत्रुरिंद्रजज्ञिषेविश्वंपुष्यसिवार्यंतंत्वापरिष्वजामहेनभंता० ॥ विषुविश्वाऽअरातयो
र्योनशंतनोधियः । अस्तासिशत्रवेवधंयोनऽइंद्रजिघांसतियातेरातिर्ददिर्वसुनभंता० ॥ योनऽइंद्राभितोजनोवृका

(१०।११।४) ईजानमितिसप्तर्चस्यसूक्तस्यनार्मेधःशकपूतोमित्रावरुणावाद्यायाद्युभूम्यश्विनोविराड्रूपा आद्यान्यंकुसारिणीद्वितीया षष्ठ्यौप्रस्तारपंक्तीअंत्यामहासतोबृहती । (१०।११।५) प्रोष्वितिसप्तर्चस्यसूक्तस्यपैजवनइंद्रःशक्करीचतुर्थ्यादितिस्रोमहापंक्तयोंत्यात्रिष्टुप् ।

युरादिदेशति । अधस्पदंतमींकृधिविबाधोऽअसिसासाहिनभंता० ॥ यानिऽइंद्राभिदासतिसनाभिर्यश्चनिष्ट्यः । अव
तस्यबलंतिरमहीवद्यौरधत्मनानभंता० ॥ वयमिंद्रत्वायवःसखित्वमारभामहे । ऋतस्यनःपथानयातिविश्वानिदुरि
तानभंता० ॥ अस्मभ्यंसुत्वमिंद्रतांशिक्षयादोहतेप्रतिवरंजरित्रे । अच्छिद्रोध्नीपीपयद्यथानःसहस्रधारापयसामहीगौः+
॥ २१ ॥ (१०।११।६) उभेयदिंद्ररोदसीऽआपप्राथोषाऽइव । महांतंत्वामहीनांसम्राजंचर्षणीनांदेवीजनित्र्यजी
जनद्भद्राजनित्र्यजीजनत् ॥ अवस्मदुर्हणायतोमर्तस्यतनुहिस्थिरं । अधस्पदंतमींकृधियोऽअस्माँऽआदिदेशतिदेवी० ॥
अवत्याबृहतीरिषोविश्वश्चंद्राऽअमित्रहन् । शचीभिःशक्रधूनुहींद्रविश्वाभिरूतिभिर्देवी० ॥ अवयत्त्वंशतक्रताविंद्रवि
श्वानिधूनुषे । रयिंनसुन्वतेसचासहस्रिणीभिरूतिभिर्देवी० ॥ अवस्वेदाऽइवाभितोविष्वक्पतंतुदिद्यवः । दूर्वाया
ऽइवतंतवोव्यं१स्मदेतुदुर्मतिर्देवी० ॥ दीर्घंह्यंकुशंयथाशक्तिंबिभर्षिमंतुमः । पूर्वेणमघवन्पदाजोवयांयथायमोदेवी० ॥
नकिर्देवामिनीमसिनकिरायोपयामसिमंत्रश्रुत्यंचरामसि । पक्षेभिरपिकक्षेभिरत्राभिसंरभामहे ॥२२॥ (१०।११।७)
यस्मिन्वृक्षेसुपलाशेदेवैःसंपिबतेयमः । अत्रानोविश्पतिःपितापुराणाँऽअनुवेनति ॥ पुराणाँऽअनुवेनंतंचरंतंपापया

(१०।११।६) उभेयदितिसप्तर्चस्यसूक्तस्ययौवनाश्वोमांधातांत्यानांतिसृणामर्धर्चांगोधेंद्रोमहापंक्तिरंत्यापंक्तिः । (१०।११।७) यस्मिन्निति सप्तर्चस्यसूक्तस्ययामायनःकुमारोयमोनुष्टुप् ।

मुया । असूयन्नभ्यचाकशंतस्मोऽअस्पृहयपुनः ॥ यंकुमारनवंरथमचक्रमनसाकृणोः । एकेषंविश्वतःप्रांचमपश्यन्नधितिष्ठसि ॥ यंकुमारप्रावर्तयोरथंविप्रेभ्यस्परि । तंसामानुप्रावर्ततसमितोनाव्याहितं ॥ कःकुमारमजनयद्रथंकोनिरवर्तयत् । कःस्वित्तदद्यनोब्रूयादनुदेयीयथाभवत् ॥ यथाभवदनुदेयीततोऽअग्रमजायत । पुरस्ताद्बुध्नऽआततःपश्चान्निरयणंकृतं+ ॥ इदंयमस्यसादनंदेवमानंयदुच्यते । इयमस्यधम्यतेनाळीरयंगीर्भिःपरिष्कृतः ॥ २३ ॥

(१०।११।८) केश्यं१ग्निंकेशीविषंकेशीबिभर्तिरोदसी । केशीविश्वंस्वर्दृशेकेशीदंज्योतिरुच्यते ॥ मुनयोवातरशनाःपिशंगावसतेमला । वातस्यानुध्राजिंयंतियद्देवासोऽअविक्षत ॥ उन्मदितामौनेयेनवाताँऽआतस्थिमावयं । शरीरेदस्माकंयूयंमर्तासोऽअभिपश्यथ ॥ अंतरिक्षेणपततिविश्वारूपावचाकशत् । मुनिर्देवस्यदेवस्यसौकृत्यायसखाहितः+ ॥ वातस्याश्वोवायोःसखाथोदेवेषितोमुनिः । उभौसमुद्रावाक्षेतियश्चपूर्वऽउतापरः ॥ अप्सरसांगंधर्वाणांमृगाणांचरणेचरन् । केशीकेतस्यविद्वान्सखास्वादुर्मदिन्तमः ॥ वायुरस्माऽउपामंथत्पिनष्टिस्माकुनन्नमा । केशीविषस्य

(१०।११।८) केशीतिसप्तर्चस्यसूक्तस्यवातरशनाजूतिर्वातजूतिर्विप्रजूतिर्वृषाणकःकरिक्रतएतशऋष्यशृंगइतिक्रमेणैकर्चाऋषयःअग्निवायुसूर्यादेवताअनुष्टुप् ।

पात्रैणयद्रुद्रेणापिबत्सह+ ॥ २४ ॥ (१०।११।९) उतदैवाऽअवहितंदेवाऽउन्नंयथापुनः । उतागश्चक्रुषंदेवादेवा
जीवयथापुनः ॥ द्वाविमौवातौवातऽआसिंधोरापरावतः । दक्षँतेऽअन्यऽआवातुपरान्योवातुयद्रपः ॥ आवातवा
हिभेषजंविवातवाहियद्रपः । त्वंहिविश्वभैषजोदेवानांदूतऽईयसे ॥ आत्वागमंशंतातिभिरथोऽअरिष्टतातिभिः ।
दक्षँतेभद्रमाभार्षँपरायक्ष्मँसुवामिते ॥ त्रायँतामिहदेवास्त्रायंतांमरुतांगणः । त्रायँतांविश्वाभूतानियथायमरपाऽअ
संत् ॥ आपऽइद्वाऽउभेषजीरापोऽअमीवचातनीः । आपःसवँस्यभेषजीस्तास्तैकृण्वंतुभेषजं+ ॥ हस्ताभ्यादशशाखा
भ्यांजिह्वावाचःपुरोगवी । अनामयित्नुभ्यांत्वाताभ्यांत्वोपस्पृशामसि ॥ २५ ॥ (१०।११।१०) तवत्यऽइँद्रसख्ये
षुवह्नयऽऋतंमन्वानाऽव्यदर्दिरुर्वलं । यत्रादशस्यन्नुषसोरिणन्नपःकुत्सायमन्मन्नह्यश्चदंसयः ॥ अवासृजःप्रस्वःश्वंच
योगिरीनुदाजऽउस्राऽअपिबोमधुप्रियं । अवर्धयोवनिनोऽअस्यदंससाशुशोचसूयँऽऋतजातयागिरा+ ॥ विसूर्योम
ध्येऽअमुचद्रथंदिवोविदद्दासायप्रतिमानमार्यः । दृळ्हानिपिप्रोरसुरस्यमायिनऽइंद्रोऽव्यास्यच्चकृवाँऽऋजिश्वना ॥ अ
नाधृष्टानिधृषितोऽव्यास्यन्निधीँऽरदेवाँऽअमृणदयास्यः । मासेवसूर्योवसुपुर्यमाददेगृणानःशत्रूँऽरशृणाद्विरुक्मता ॥

(१०।११।९) उतेतिसप्तर्चस्यसूक्तस्यभरद्वाजःकश्यपोगोतमोत्रिर्विश्वामित्रोजमदग्निर्वसिष्ठइतिक्रमेणैकर्चाऋषयोविश्वेदेवाअनुष्टुप् । (भेदपक्षे–देवाः १ वातः ३ विश्वेदेवाः १ आपः २ एवं ७) (१०।११।१०) तवत्यइतिषळर्चस्यसूक्तस्यौरवोंगइंद्रोजगती ।

अयुद्धसेनोविभ्वाविभिंदतादाशद्वृत्रहातुज्यानितेजते । इंद्रस्यवज्रादबिभेदभिश्नथःप्राक्रामच्छुंध्यूरजहादुषाऽअनः ॥
एतात्यातेश्रुत्यानिकेवलायदेकऽएकमकृणोरयज्ञं । मासांविधानमदधाऽअधिद्यवित्वयाविभिन्नंभरतिप्रधिंपिता+ ॥
॥ २६ ॥ (१०।११।११) सूर्यरश्मिर्हरिकेशःपुरस्तात्सविताज्योतिरुदयाँऽअजस्रं । तस्यपूषाप्रसवेयातिविद्वान्सं
पश्यन्विश्वाभुवनानिगोपाः+ ॥ नृचक्षाऽएषदिवोमध्यआस्तऽआपप्रिवान्रोदसीऽअंतरिक्षं । सविश्वाचीरभिचष्टेघृ
ताचीरंतरापूर्वमपरंचकेतुं+ ॥ रायोबुध्नःसंगमनोवसूनांविश्वारूपाभिचष्टेशचीभिः । देवऽइवसवितासत्यधर्मेंद्रोन
तस्थौसमरेधनानां ॥ विश्वावसुंसोमगंधर्वमापोददृशुषीस्तदृतेनाव्यायन् । तदन्ववैदिंद्रोरारहाणऽआसांपरिसूर्यस्य
परिधीँऽरपश्यत् ॥ विश्वावसुरभितन्नोऽगृणातुदिव्योगंधर्वोरजसोविमानः । यद्वाघासत्यमुतयन्नविद्मधियोहिन्वा
नोधियऽइन्नोऽअव्याः ॥ सस्निमविंदच्चरणेनदीनामपावृणोदुरोऽअश्मव्रजानां । प्रासांगंधर्वोऽअमृतानिवोचदिंद्रो
दक्षंपरिजानादहीनां ॥ २७ ॥ (१०।११।१२) अग्नेतवश्रवोवयोमहिभ्राजंतेऽअर्चयोविभावसो । बृहद्भानोशवसा
वाजमुक्थ्यं१दधासिदाशुषेकवे ॥ पावकवर्चाःशुक्रवर्चाऽअनूनवर्चाऽउदियर्षिभानुना । पुत्रोमातराविचरन्नुपावसि ॥५२॥

(१०।११।११) सूर्यरश्मिरितिषळर्चस्यसूक्तस्यदेवगंधर्वोविश्वावसुःसवितांत्यतिसृणांविश्वावसुस्त्रिष्टुप् । (१०।११।१२) अग्नेतवेति षळर्चस्यसूक्तस्यपावकोग्निरग्निःसतोबृहतीआद्याविष्टारपंक्तिःपंचम्युपरिष्टाज्ज्योतिरंत्यात्रिष्टुप् ।

पृ॒णक्षि॒रोद॑सी॒ऽउ॒भे+ ॥ ऊर्जो॑नपाज्जातवेदःसु॒श॒स्तिभि॒र्मंद॑स्व॒धीति॑भिर्हि॒तः । त्वेऽइष॒ःसंद॑धु॒र्भूरि॑वर्पसश्चि॒त्रोत॑योवा॒मजा॑ताः ॥ इ॒र॒ज्यन्न॑ग्नेप्रथयस्वज॒ंतुभि॑र॒स्मेरायो॑ऽअमर्त्य । सद॑र्श॒तस्य॒वपु॑षो॒विरा॑जसिपृ॒णक्षि॑सान॒सिंक्रतु॑ं ॥ इ॒ष्क॒र्तार॑मध्व॒रस्य॒प्रचे॑तसं॒क्षयं॑तं॒राध॑सोम॒हः । रा॒तिंवा॒मस्य॑सु॒भगां॑म॒हीमिषं॒दधा॑सिसान॒सिंर॒यिं+ ॥ ऋ॒तावा॑नंमहि॒षंवि॒श्वद॑र्शतम॒ग्निंसु॒म्नाय॑दधिरेपु॒रोजना॑ः । श्रुत्क॑र्णंस॒प्रथ॑स्तमंत्वागि॒रादैव्यं॒मानु॑षायु॒गा+ ॥ २८ ॥ (१०।११।१३) अग्ने॒ऽअच्छा॑वदे॒हनः॑प्र॒त्यङ्नः॑सु॒मना॑भव । प्रनो॑यच्छविशस्पतेधन॒दाऽअ॑सिन॒स्त्वं+ ॥ प्रनो॑यच्छत्वर्य॒माप्रभग॒ःप्रबृह॒स्पति॑ः । प्रदे॒वाःप्रोतसू॒नृता॑रा॒योदे॒वीद॑दातुनः ॥ सोमं॒राजा॑न॒मव॑से॒ग्निंगी॒र्भिर्ह॑वामहे । आ॒दि॒त्यान्विष्णुं॒सूर्यं॑ब्र॒ह्माणं॑च॒बृह॒स्पतिं॑ ॥ इं॒द्र॒वा॒यूबृह॒स्पतिं॑सु॒हवे॒हह॑वामहे । यथा॑न॒ःसर्व॒ऽइज्जन॒ःसंग॑त्यांसु॒मना॒ऽअस॑त् ॥ अ॒र्य॒मणं॒बृह॒स्पति॒मिंद्रं॒दाना॑यचोदय । वात॒ंविष्णुं॒सर॑स्वतींसवि॒तारं॑च॒वाजिनं॑ ॥ त्वंनो॑ऽअग्नेऽअ॒ग्निभि॒र्ब्रह्म॑य॒ज्ञंच॑वर्धय । त्वंनो॑दे॒वता॑तयेरा॒योदाना॑यचोदय ॥ २९ ॥ (१०।११।१४) अ॒यम॑ग्नेजरि॒तात्वेऽअ॑भूदपि॒सह॑सःसूनोन॒ह्यं॑१॒न्यदस्त्याप्यं॑ । भ॒द्रंहिश॑र्मंत्रि॒वरू॑थ॒मस्ति॑तऽआ॒रेहिंसा॑ना॒मप॑दि॒द्युमा॑कृधि ॥ प्र॒वत्तें॑ऽअग्ने॒जनि॑मापितूय॒तःसा॒चीव॒विश्वा॒भुव॑ना॒न्यृं॑जसे । प्रस

(१०।११।१३) अग्नेअच्छेतिषळर्चस्यसूक्तस्यतापसोग्निर्विश्वेदेवाअनुष्टुप् । (१०।११।१४) अयमग्नेइत्यष्टर्चस्यसूक्तस्यप्रथमयोःशार्ङ्गो जरितातृतीयचतुर्थ्योःशार्ङ्गोद्रोणःपंचमीषष्ठयोःशार्ङ्गःसारिसृक्कःसप्तम्यष्टम्योःशार्ङ्गःस्तम्बमित्रोग्निस्त्रिष्टुप्आद्येजगत्यावंत्येनुष्टुभौ ।

Digitization by eGangotri Funding MoE-Delhi

सय॒ःप्रसं॑निषंतनो॒धियं॑ःपु॒रश्चरं॑तिपशु॒पाऽई॒वत्मनां॑ ॥ उ॒तवाउ॒परि॑वृणक्षि॒बप्सं॑द्ब॒होरग्न॒ऽउलं॑पस्यस्वधावः । उ॒तखि॒ल्याऽउ॒र्वरा॑णांभवंति॒मातेहे॒तिंतवि॑षींचुक्रुधाम ॥ यदु॒द्वतो॑नि॒वतो॒यासि॒बप्स॒त्पृथ॑गेषिप्रग॒र्धिनी॑वसेनां । य॒दाते॒वातो॑ऽअनु॒वाति॑शो॒चिर्वप्ते॑व॒श्मश्रु॑वपसि॒प्रभूमं॑ ॥ प्रत्यं॑स्य॒श्रेणं॑योददृश्र॒ऽएकं॑नि॒यानं॑ब॒हवो॒रथा॑सः । बा॒हूयदं॑ग्नेऽअनु॒मर्मृ॑जानो॒न्यं॑ङ्ङुत्ता॒नाम॒न्वेषि॒भूमिं॑ ॥ उत्ते॒शुष्मा॑जिहता॒मुत्तेऽअ॒र्चिरुत्तेऽअग्नेशशमा॒नस्य॒वाजाः॑ । उच्छ्वं॑चस्व॒निनं॑म॒वर्धं॑मान॒ऽआत्वा॒द्यविश्वे॒वसं॑वःसदंतु ॥ अ॒पामि॒दंन्ययं॑नंसमुद्रस्यं॑नि॒वेशं॑नं । अ॒न्यंकृं॑णुष्वे॒तःपंथा॑ंतेनं॑याहि॒वशाँ॒ऽअनु॑ ॥ आयं॑नेतेप॒रायं॑णे॒दूर्वा॑रोहंतुपु॒ष्पिणीः॑ । ह्र॒दाश्च॑पुंडरीं॑काणिसमु॒द्रस्यं॑गृ॒हाऽइ॒मे+ ॥३०॥ ॥ इत्यष्टमाष्टकेसप्तमोध्यायः॥७॥

त्रिषष्ट्यध्यायेवर्गाः ३० सूक्तानि २३ ऋचः १७२ ॥ त्यागः ॥ इंद्राये. ९ प्रजापतय. १० अग्नय. ८ वेनाये. ८ अग्नय. अग्न्यात्मन. ३ वरुणाये. सोमाये. वरुणाये. २ सोमेंद्राभ्या. आंभृण्यैवाच. ८ विश्वेभ्योदेवेभ्य. ८ रात्र्या. ८ अग्नय. विश्वेभ्योदेवेभ्य. ४ अग्नय. विश्वेभ्योदेवेभ्य. इंद्राये. विश्वेभ्योदेवेभ्य. भाववृत्तय. १४ इंद्राये. ३ अश्विभ्यामि. २ इंद्राये. २ द्युभूम्यश्विभ्य. मित्रावरुणाभ्या. ६ इंद्राये. १३ विश्वेभ्योदेवेभ्य. यमाये. ७ केश्यग्निसूर्यवातेभ्य. ७ देवेभ्य. वाताये. ३ विश्वेभ्योदेवेभ्य. २ अग्न्य. इंद्राये. ६ सवित्रइ. ३ विश्वावसव. ३ अग्नय. ७ विश्वेभ्योदेवेभ्य. ५ अग्नय. ८॥ इत्यष्टमेसप्तमः॥

त्यंषट्सांख्योत्रिराश्विनंमयंहितार्क्ष्यपुत्रःसुपर्णौंयामायनोवोर्ध्वकृशनौंगायत्रीबृहतीगायत्र्यौंसतोबृहतीविष्टारपङ्क्तिरिमामिंद्राण्युपनिषत्संपत्नीबाधनंमानुष्टुभंतुपङ्क्त्यंतमरण्यान्यैरंमदौंदेवमुनिररण्यानींतुष्टावंश्रत्तेपंचसुवेदाःशैरीषिस्त्रिष्टुबंतंसुष्वाणासःपृथुर्वैन्यःसवितार्चंतोहैरण्यस्तूपःसावित्रंसमिद्धोमृळीकोवासिष्ठंऽआग्नेयंबार्हतंमंत्येऽउपरिष्टाज्ज्योतिषींजगत्युपांत्यावांश्रद्धयाश्रद्धाकामायिनींश्राद्धमानुष्टुभंतुंशासःशासोभारद्वाजंईखयंतीर्देवजामयंइंद्रमातरोगायत्रंसोमोयमीभाववृत्तमानुष्टुभंत्वंरायिशिरिंबिठौंभारद्वाजोऽलक्ष्मीघ्नंद्वितीयातृतीयाब्राह्मणस्पत्यौंअंत्यावैश्वदैंव्यग्निंकेतुराग्नेयआग्नेयंगायत्रंमिमानुकंभुवनऽआप्त्यंःसाधनोवाभौवनौंवैश्वदेवंद्वैपदंत्रैष्टुभंसूर्योनश्चक्षुःसौर्यःसौर्यंगायत्रंमुदसौषट्पौलोमींशच्यात्मानंतुष्टावानुष्टुभंतीव्रस्यपंचपूरणोवैश्वामित्रौंमुंचामित्वाप्राजापत्यौंयक्ष्मनाशनोराजयक्ष्मघ्नंमंत्यानुष्टुब्ब्रह्मणाषट्ब्राह्मोरक्षोहांगर्भसंस्रावेप्रायश्चित्तमानुष्टुभंह्यक्षीभ्यांविवृहाकाश्यपोयक्ष्मघ्नंमपेहिपंचप्रचेतादुःस्वप्नघ्नंपंक्त्यंतंत्रिष्टुम्मध्यंदेवानैर्ऋतःकपोतंःकपोतोपहतौप्रायश्चित्तंवैश्वदेवमृषभमृषभोवैराजंःशाक्वरोवासपत्नघ्नंमानुष्टुभंमहापंक्त्यंतंतुभ्येदंचतुष्कंविश्वामित्रजमदग्नीजागतंतृतीयालिंगोक्तदेवतांवातस्यानिलोवातायनौंवायव्यंमयोभूःशंवरःकाक्षीवतोगव्यंविभ्राट्विभ्राट्सौर्यःसौर्यंजागतंमास्तारपंक्त्यंतंत्वंत्यमिटोभार्गवोगायत्रंमायाहिसंवर्तंउषस्यंद्वैपदंमात्वाषट्ध्रुवोराज्ञःस्तुतिंस्त्वा

नुष्टुभंत्वभीवर्तेनपंचाभीवर्तःप्रवश्चतुष्कंमूर्ध्वग्रावासार्पोर्बुदिर्ग्राव्णोस्तुतिर्गायत्रंप्रसूनवःसूनुरार्भवंआग्नेयमानुष्टुभंद्वितीयागायत्र्याद्यार्भवीपतंगंतृचंपतंगःप्राजापत्योमायाभेदंजगत्यादित्यमूष्वरिष्टनेमिस्ताक्ष्यंमुत्तिष्ठतैकर्चाःशिविरौशीनरःकाशिराजःप्रतर्दनोरोहिदश्वोवसुमनाआद्यानुष्टुप्प्रससाहिषेजयेंद्रःप्रथश्चैकर्चाःप्रथोवासिष्ठःसप्रथोभारद्वाजोघर्मःसौर्योवैश्वदेवंबृहस्पतिस्तपुर्मूर्धावार्हस्पत्योबार्हस्पत्यमपश्यंप्रजावान्प्राजापत्योन्वृचंयजमानपत्नीहोत्राशिषोविष्णुस्त्वष्टागर्भकर्ताविष्णुर्वाप्राजापत्योगर्भार्थाशीर्लिंगोक्तदैवतमानुष्टुभंमहिसत्यधृतिर्वारुणिरादित्यंस्वस्त्ययनंगायत्रंवैवातोवातायनउलोवायव्यंप्राग्नयेपंचाग्नेयोवत्सआग्नेयंतुप्रनूनंतृचमाग्नेयःश्येनोजातवेदस्यंमायंगौःसार्पराज्ञ्यात्मदैवतंसौर्यंवंऽऋतंचमाधुच्छंदसोऽघमर्षणोभाववृत्तमानुष्टुभंतुसंसंचतुष्कंसंवननंःसंज्ञानमाद्याग्नेयीतृतीयात्रिष्टुप्तृतीयात्रिष्टुप् ॥ ८ ॥ तदेतत्सूक्तसहस्रंससप्तदशकंसपादाधिकमृग्वेदेपारायणपाठेशाकल्येशैशिरीयकेनमःशौनकायनमःशौनकाय ॥ १ ॥ ॥ ॥

हरिः ओम् ॥ (१०।११।१५) त्यंचि॒दत्रि॑मृ॒त॒जुर॒मर्थ॒मश्वं॒नयात॑वे । क॒क्षीवँ॑तं॒यदी॒पुना॒रथं॒नकृ॑णु॒थोनवँ॑ ॥ त्यं ॥५४॥
चि॒दश्वं॒नवा॒जिनं॑मरे॒णवो॒यमत्न॑त । दृ॒ह्ळंग्रं॒थिंनविष्यं॑त॒मत्रिं॒यविं॑ष्ठ॒मारजः॑ ॥ नरा॒दं॑सिष्ठा॒वत्र॑ये॒शुभ्रा॒सिषा॑सतं॒धियः॑ ।

(१०।११।१५) त्यंचिदितिषळर्चस्यसूक्तस्यसांख्योत्रिरश्विनावनुष्टुप् ।

अथाहिवांदिवोनरापुनस्तोमोनविशसे ॥ चितेतद्वांसुराधसारातिःसुमतिरश्विना । आयन्नःसदनेपृथौसमनेपर्षथोनरा ॥ युवंभुज्युंसमुद्रऽआरजसःपारऽईंखितं । यातमच्छापतत्रिभिर्नासत्यासातयेकृतं ॥ आवांसुम्नैःशंयूऽइवमंहिष्ठाविश्ववेदसा । समस्मेभूषतंनरोत्संनपिप्युषीरिषः ॥ १ ॥ (१०।११।१६) अयंहितेऽअमर्त्यऽइंदुरत्योनपत्यते । दक्षोविश्वायुर्वेधसे ॥ अयमस्मासुकाव्यऽऋभुर्वज्रोदास्वते । अयंबिभर्त्यूर्ध्वकृशनंमदमृभुर्नकृत्व्यंमदं ॥ घृषुःश्येनायकृत्वनऽआसुस्वासुवंसगः । अवदीधेदहीशुवः ॥ यंसुपर्णःपरावतःश्येनस्यपुत्रऽआभरत् । शतचक्रंयोऽह्योवर्तनिः+ ॥ यंतेश्येनश्चारुमवृकंपदाभरदरुणंमानमंधसः । एनावयोवितार्यायुर्जीवसऽएनाजागारबंधुता ॥ एवातादिंद्रऽइंदुनादेवेषुचिद्धारयातेमहित्यजः । क्रत्वावयोवितार्यायुःसुक्रतोक्रत्वायमस्मदासुतः+ ॥ २ ॥ (१०।११।१७) इमांखनाम्योषधिंवीरुधंबलवत्तमां । ययासपत्नींबाधतेययासंविंदतेपतिं ॥ उत्तानपर्णेसुभगेदेवजूतेसहस्वति ॥ सपत्नींमेपराधमपतिंमेकेवलंकुरु ॥ उत्तराहमुत्तरऽउत्तरेदुत्तराभ्यः । अथासपत्नीयाममाधरासाधराभ्यः ॥ नह्यस्यानामगृभ्णामिनोऽअस्मिन्रमतेजने । परामेवपरावतंसपत्नींगमयामसि ॥ अहमस्मिसहमानाथत्वमसिसासहिः । उभेस

(१०।११।१६) अयंहीतिषळर्चस्यसूक्तस्यताक्ष्यपुत्रःसुपर्णइंद्रोगायत्रीद्वितीयाबृहतीपंचमीसतोबृहतीषष्ठीविष्टारपंक्तिः (यामायन ऊर्ध्वकृशनोवात्रऋषिः) । (१०।११।१७) इमामितिषळर्चस्यसूक्तस्येंद्राणीसपत्नीनाशनमनुष्टुबंत्यापंक्तिः ।

हस्वतीभूत्वीसपत्नीमेसहावहै ॥ उपतेधांसहमानामभित्वाधांमहीयसा । मामनुप्रतेमनोवत्संगौरिवधावतुपथावारिवधावतु ॥ ३ ॥ (१०।११।१८) अरण्यान्यरण्यान्यसौयाप्रेवनश्यसि । कथाग्रामंनपृच्छसिनत्वाभीरिवविंदती ३ँ ॥ वृषारवायवदतेयदुपावतिचिच्चिकः । आघाटिभिरिवधावयन्नरण्यानिर्महीयते ॥ उतगावऽइवादंत्युतवेश्मेवदृश्यते । उतोऽअरण्यानिःसायंशकटीरिवसर्जति ॥ गामंगैषऽआह्वयतिदार्वंगैषोऽअपावधीत् । वसन्नरण्यान्यांसायमक्रुक्षदितिमन्यते ॥ नवाऽअरण्यानिर्हंत्यन्यश्चेन्नाभिगच्छति । स्वादोःफलस्यजग्ध्वायथाकामंनिपद्यते ॥ आंजनगंधिंसुरभिंबह्वन्नामकृषीवलां । प्राहंमृगाणांमातरमरण्यानिमशंसिषं ॥ ४ ॥ (१०।११।१९) श्रत्तेदधामिप्रथमायमन्यवेहन्यद्वृत्रंनर्यंविवेरपः । उभेयत्त्वाभवतोरोदसीऽअनुरेजतेशुष्मात्पृथिवीचिदद्रिवः ॥ त्वंमायाभिरनवद्यमायिनंश्रवस्यतामनसावृत्रमर्दयः । त्वामिन्नरोवृणतेगविष्टिषुत्वांविश्वासुहव्यास्विष्टिषु ॥ ऐषुचाकंधिपुरुहूतसूरिषुवृधासोयेमघवन्नानशुर्मघं । अर्चंतितोकेतनयेपरिष्टिषुमेधसातावाजिनमह्रयेधने ॥ सऽइन्नुरायःसुभृतस्यचाकनन्मदंयोऽअस्यरंह्यंचिकेतति । त्वावृधोमघवन्दाश्वध्वरोमक्षूसवाजंभरतेधनानृभिः ॥ त्वंशर्धायमहिनागृणानऽउरु ॥५५॥

(१०।११।१८) अरण्यानीतिषळर्चस्यसूक्तस्यैरंमदोदेवमुनिररण्यान्यनुष्टुप् । (१०।११।१९) श्रत्तइतिपंचर्चस्यसूक्तस्यशैरीषिः सुवेदाइंद्रोजगत्यंत्यात्रिष्टुप् ।

कृधिमघवन्छग्धिरायः । त्वंनोमित्रोवरुणोनमायीपित्वोनदस्मदयसेविभक्ता+ ॥ ५ ॥ (१०।११।२०) सुष्वाणा
सऽइंद्रस्तुमसित्वासससवांसंश्वतुविनृम्णवाजं । आनोभरसुवितंयस्यचाकन्त्मनातनासनुयामत्वोताः ॥ ऋष्वस्त्व
मिंद्रशूरजातोदासीर्विशःसूर्येणसह्याः । गुहाहितंगुह्यंगूळ्हमप्सुबिभृमसिप्रस्रवणेनसोमं ॥ अर्योवागिरोऽअभ्यर्चवि
द्वानृषीणांविप्रःसुमतिंचकानः । तेस्यामयेरणयंतसोमैरेनोततुभ्यंरथोळ्हभक्षैः+ ॥ इमाब्रह्मेंद्रतुभ्यंशंसिदानृभ्योनृणां
शूरशर्वः । तेभिर्भवसक्रतुर्येषुचाकन्नुतत्रायस्वगृणतऽउतस्तीन्+ ॥ श्रुधीहवमिंद्रशूरपृथ्याऽउतस्तवसेवेन्यस्यार्कैः ।
आयस्तेयोनिंघृतवंतमस्वारूर्मिर्ननिम्नैर्द्रवयंतवक्वाः ॥ ६ ॥ (१०।११।२१) सवितायंत्रैःपृथिवीमरम्णादस्कंभने
संविताद्यामदृंहत् । अश्वमिवाधुक्षद्धुनिमंतरिक्षमतूर्तेबद्धंसवितासमुद्रं+ ॥ यत्रासमुद्रःस्कभितोव्यौनदपांनपात्स
वितातस्यवेद । अतोभूरतऽआऽउत्थितंरजोतोद्यावापृथिवीऽअप्रथेतां ॥ पश्चेदमन्यदभवद्यजत्रममर्त्यस्यभुवनस्य
भूना । सुपर्णोऽअंगसवितुर्गरुत्मान्पूर्वोजातःसऽउऽअस्यानुधर्म ॥ गावऽइवग्रामंयूयुधिरिवाश्वान्वाश्रेववत्संसुमना
दुहाना । पतिरिवजायामभिनोन्येतुधर्तादिवःसविताविश्ववारः ॥ हिरण्यस्तूपःसवितर्यथात्वांगिरसोजुह्वेवाजेऽ

(१०।११।२०) सुष्वाणासइतिपंचर्चस्यसूक्तस्यवैन्यःपृथुरिंद्रस्त्रिष्टुप् । (१०।११।२१) सवितेतिपंचर्चस्यसूक्तस्यहैरण्यस्तूपोर्चन्
सवितात्रिष्टुप् ।

अ॒स्मिन् । ए॒वात्वा॒र्च॑न्नव॒से॒वंद॑मान॒ःसोम॑स्येवा॒ंशुंप्रति॑जागरा॒हं ॥ ७ ॥ (१०।११।२२) समि॑द्धश्चि॒त्समि॑ध्यसेदे॒
वेभ्यो॑हव्यवाहन । आ॒दि॒त्यैरु॒द्रैर्व॒सुभि॑र्न॒ऽआग॑हिमृ॒ळीकाय॑न॒ऽआग॑हि ॥ इ॒मंय॒ज्ञमि॒दंवचो॑जुजुषा॒णऽउ॒पाग॑हि । म
र्ता॑सस्त्वासमिधानहवामहेमृ॒ळीकाय॑हवामहे ॥ त्वामु॑जा॒तवे॑दसंवि॒श्ववा॑रंगृणेधि॒या । अग्ने॑दे॒वाँऽआव॑हनःप्रि॒यव्र॑ता
न्मृ॒ळीकाय॑प्रि॒यव्र॑तान् ॥ अ॒ग्निर्दे॒वोदे॒वाना॑मभवत्पु॒रोहि॑तो॒ग्निंम॑नु॒ष्या॒३ऋष॑य॒ःसमी॑धिरे । अ॒ग्निंम॒होधन॑साताव॒हंहु॑वे
मृ॒ळीकंधन॑सातये ॥ अ॒ग्निरत्रिं॑भ॒रद्वा॑जं॒गवि॑ष्ठिरं॒प्राव॑न्नः॒कण्वं॑त्र॒सद॑स्युमाह॒वे । अ॒ग्निंवसि॑ष्ठोहवतेपु॒रोहि॑तोमृ॒ळीकाय॑
पु॒रोहि॑तः ॥ ८ ॥ (१०।११।२३) श्र॒द्धया॒ग्निःसमि॑ध्यतेश्र॒द्धया॑हूयतेह॒विः । श्र॒द्धांभग॑स्यमू॒र्धनि॒वच॒सावे॑दयामसि ॥
प्रि॒यंश्र॑द्धे॒दद॑तःप्रि॒यंश्र॑द्धे॒दिदा॑सतः । प्रि॒यंभो॒जेषु॒यज्व॑स्वि॒दंम॑ऽउदि॒तंकृ॑धि ॥ यथा॑दे॒वाऽअसु॑रेषुश्र॒द्धामु॒ग्रेषु॑चक्रि॒रे ।
ए॒वंभो॒जेषु॒यज्व॑स्व॒स्माक॑मुदि॒तंकृ॑धि ॥ श्र॒द्धांदे॒वायज॑माना॒वा॒युगो॑पा॒ऽउपा॑सते । श्र॒द्धांहृ॒द॒य्य॑१याकू॑त्याश्र॒द्धया॑विंद
ते॒वसु॑ ॥ श्र॒द्धांप्रा॒तर्ह॑वामहेश्र॒द्धांम॒ध्यंदि॑नं॒परि॑ । श्र॒द्धांसूर्य॑स्यनि॒म्रुचि॒श्रद्धे॒श्रद्धा॑पये॒हनः॑ ॥ ९ ॥ (परिशिष्टं ॥ मे॒
धामह्यमंगि॑रसोमे॒धांस॒प्तऽऋष॑योददुः । मे॒धामिंद्र॑श्चा॒ग्निश्च॑मे॒धांधा॒ताद॑दातुते ॥ मे॒धांते॒वरु॑णो॒राजामे॒धांदे॒वीसर॑स्व

(१०।११।२२) समिद्धइतिपंचर्चस्यसूक्तस्यवासिष्ठोमृळीकोग्निर्बृहतीअंत्येद्वेउपरिष्टाज्ज्योतिषी(उपांत्याजगतीवा)(१०।११।२३)श्रद्धयेतिपंचर्चस्यसूक्तस्यकामायनीश्रद्धानुष्टुप् ।

ती । मेधांतेऽअश्विनौदेवावाधत्तांपुष्करस्रजा ॥ यामेधाऽअप्सरस्सुगंधर्वेषुचयन्मनः । दैवीयामानुषीमेधासामामाविशतादिमां ॥ यन्मेनोक्तंतद्रवतांशकेयंयदनुब्रुवे । निशामतंनिशामहैमयिव्रतंसहव्रतेषुभूयासंब्रह्मणासंगमेमहि ॥ शरीरंमेविचक्षणंवाङ्मेमधुमद्दुहां । अवृद्धमहमसौसूर्योब्रह्मणानीस्थःश्रुतंमेमाप्रहासीः ॥ मेधांदेवींमनसारेजमानांगंधर्वजुष्टांप्रतिनोजुषस्व । मह्यंमेधांवदमह्यंश्रियंवदमेधावीभूयासमजराजरिष्णु+ ॥ सदसस्पतिमद्भुतंप्रियमिंद्रस्यकाम्यं । सनिंमेधामयासिषं ॥ यांमेधांदेवगणाःपितरश्चोपासते । तयामामेधयामेमेधाविनंकुरु ॥ मेधाव्यँ१सगणः सुप्रतीकःश्रद्धामनाःसत्यमुवःसुशेवः । महायशाधारयिष्णुःप्रवक्ताभूयासमस्मैशरयाप्रयोगे ॥ १ ॥ इतिपरिशिष्टं ॥)

(१०।१२।१) शासऽइत्थामहांऽअस्यमित्रखादोऽअद्भुतः । नयस्यहन्यतेसखानजीयतेकदाचन+ ॥ स्वस्तिदाविशस्पतिर्वृत्रहाविमृधोवशी । वृषेंद्रःपुरऽएतुनःसोमपाऽअभयंकरः+ ॥ विरक्षोविमृधोजहिविवृत्रस्यहनूरुज । विमन्युमिंद्रवृत्रहन्नमित्रस्याभिदासतः ॥ विनऽइंद्रमृधोजहिनीचायच्छपृतन्यतः । योऽअस्मांऽअभिदासत्यधरंगमयातमः ॥ अपेंद्रद्विषतोमनोपजिज्यासतोवधं । विमन्योःशर्मयच्छवरीयोयवयावधं+ ॥ १० ॥ (१०।१२।२) ईंखयँ

द्वादशेनुवाकेचत्वारिंशत्सूक्तानि (१०।१२।१) शासइतिपंचर्चस्यसूक्तस्यभारद्वाजःशासइंद्रोनुष्टुप् ।(१०।१२।२) ईंखयंतीतिपंचर्चस्यसूक्तस्यइंद्रमातरइंद्रोगायत्री ।

Digitized by eGangotri Funding MIDF, Delhi

तीरपस्युवऽइंद्रंजातमुपासते । भेजानासःसुवीर्यं ॥ त्वमिंद्रबलादधिसहसोजातऽओजसः । त्वंवृषन्वृषेदसि ॥ त्व
मिंद्रासिवृत्रहाव्यं१तरिक्षमतिरः । उद्द्यामस्तभ्नाऽओजसा ॥ त्वामिंद्रसजोषसमर्कंबिभर्षिबाह्वोः। वज्रंशिशानऽओज
सा ॥ त्वामिंद्राभिभूरसिविश्वाजातान्योजसा । सविश्वाभुवऽआभवः ॥ ११ ॥ (१०।१२।३) सोमऽएकेभ्यःप
वतेघृतमेकऽउपासते । येभ्योमधुप्रधावतिताश्चिदेवापिगच्छतात् ॥ तपसायेऽअनाधृष्यास्तपसायेस्वर्ययुः । तपोये
चक्रिरेमहस्तांश्चि० ॥ येयुध्यंतेप्रधनेषुशूरासोयेतनूत्यजः । येवासहस्रदक्षिणास्तांश्चि० ॥ येचित्पूर्वेऽऋतसापऽऋ
तावानऽऋतावृधः । पितृन्तपस्वतोयमतांश्चि० ॥ सहस्रणीथाःकवयोयेगोपायंतिसूर्यं । ऋषीन्तपस्वतोयमतपोजाँऽ
अपिगच्छतात् ॥ १२ ॥ (१०।१२।४) अरायिकाणेविकटेगिरिंगच्छसदान्वे । शिरिंबिठस्यसत्वभिस्तेभिष्ट्वाचा
तयामसि ॥ चत्तोऽइतश्चत्तामुतःसर्वाभ्रूणान्यारुषी । अराय्यंब्रह्मणस्पतेतीक्ष्णशृंगोदृषन्निहि ॥ अदोयद्दारुप्लवते
सिंधोःपारेऽअपूरुषं । तदारभस्वदुर्हणोतेनगच्छपरस्तरं+ ॥ यद्धप्राचीरजगंतोरोमंडूरधाणिकीः।हताऽइंद्रस्यशत्रवः
सर्वेबुद्बुदयाशवः ॥ परीमेगामनेषतपर्यग्निमहृषत । देवेष्वक्रतश्रवःकऽइमाँऽआदधर्षति॥१३॥(१०।१२।५)अग्निंहि

(१०।१२।३) सोमइतिपंचर्चस्यसूक्तस्यवैवस्वतीयमीभाववृत्तिरनुष्टुप् । (१०।१२।४) अरायीतिपंचर्चस्यसूक्तस्यभारद्वाजःशिरिंबिठो
ऽलक्ष्मीनाशनोद्वितीयातृतीययोर्ब्रह्मणस्पतिरंत्यायाविश्वेदेवाअनुष्टुप् । (१०।१२।५) अग्निमितिपंचर्चस्यसूक्तस्याग्नेयःकेतुरग्निर्गायत्री ।

न्वंतु॒नोधि॒यःस॑प्ति॒मा॒शुमि॑वा॒जिषु॑ । तेन॑जेष्म॒धनं॑धनं ॥ यया॒गाऽआ॒क॑रामहे॒सेन॑याग्ने॒तवो॒त्या । तांनो॑हिन्व
म॒घत्त॑ये ॥ आग्ने॑स्थू॒रंर॒यिंभ॑रपृ॒थुंगोम॑तम॒श्विनं॑ । अ॒ङ्धिखं॑व॒र्तया॑प॒णिं+ ॥ अग्ने॒नक्ष॑त्रम॒जर॒मासूर्यं॑रोहयोदि॒वि ।
द॒धज्ज्योति॒र्जने॑भ्यः ॥ अग्ने॑के॒तुर्वि॒शाम॑सि॒प्रेष्ठ॒ःश्रेष्ठ॑ऽउपस्थ॒सत् । बोधा॑स्तो॒त्रेवयो॒दध॑त् ॥ १४ ॥ (१०।१२।६)
इ॒मानु॑कं॒भुव॑नासीषधा॒मेंद्र॑श्च॒विश्वे॑चदे॒वाः+ ॥ य॒ज्ञंच॑नस्त॒न्वं॑च॒प्रजांचा॑दि॒त्यैरिंद्र॑ःस॒हची॑क्लृपाति ॥ आ॒दि॒त्यैरिंद्र॒ःसग॑
णोम॒रुद्भि॑र॒स्माकं॑भूत्ववि॒ता॒तनूनां॑ ॥ ह॒त्वाय॑दे॒वाऽअसु॑रा॒न्यदाय॑न्दे॒वादे॑व॒त्वम॑भि॒रक्ष॑माणाः ॥ प्र॒त्यंच॑म॒र्कम॑नय॒न्छ
ची॑भि॒रादित्स्व॒धामि॑षि॒रांपर्य॑पश्यन् ॥ १५ ॥ (१०।१२।७) सूर्यो॑नोदि॒वस्पा॑तु॒वातो॑ऽअ॒ंतरि॑क्षात् । अ॒ग्निर्न॒ःपार्थि॑
वेभ्यः ॥ जोषा॑सवित॒र्यस्य॑ते॒हर॑ःश॒तंस॒वाँऽअर्ह॑ति । पा॒हिनो॑दि॒द्युत॒ःपत॑ंत्याः ॥ चक्षु॑र्नोदे॒वःस॑वि॒ताचक्षु॑र्नऽउ॒तपर्व॑
तः । चक्षु॑र्धा॒तादधा॑तुनः ॥ चक्षु॑र्नोधेहि॒चक्षु॑षे॒चक्षु॑र्वि॒ख्यैत॒नूभ्य॑ः । संचे॒दंविच॑पश्येम ॥ सु॒सं॒दृशं॑त्वाव॒यंप्रति॑पश्येम
सूर्य॑ । विप॑श्येमनृ॒चक्ष॑सः ॥ १६ ॥ (१०।१२।८) उद॒सौसूर्यो॑ऽअगा॒दुद॒यंमाम॒कोभग॑ः । अ॒हंतद्वि॑द्व॒लाप॑तिम॒
भ्यसाक्षिविषास॒हिः+ ॥ अ॒हंके॒तुर॒हंमू॒र्धाहमु॒ग्राविवाच॑नी । ममेद॑नु॒क्रतुं॒पति॑ःसेहा॒नाया॑ऽउ॒पाच॑रेत् ॥ मम॑पु॒त्राःश॑त्रु॒

(१०।१२।६) इमान्वितिपंचर्चस्यसूक्तस्याप्त्योभुवनोविश्वेदेवाद्विपदात्रिष्टुप् । (अत्रभौवनःसाधनोवैकल्पिकः) (१०।१२।७) सूर्योन इतिपंचर्चस्यसूक्तस्यसौर्यश्चक्षुःसूर्योगायत्री । (१०।१२।८) उदसावितिषळर्चस्यसूक्तस्यपौलोमीशचीशच्यनुष्टुप् ।

हणोथौमेदुहिताविराट् । उताहमस्मिसंजयापत्यौमेश्लोकऽउत्तमः ॥ येनेंद्रोहविषाकृत्व्यभवद्द्युम्न्युत्तमः । इदंतदक्रिदेवाऽअसपत्नाकिलाभुवं ॥ असपत्नासंपत्नघ्नीजयंत्यभिभूवरी । आवृक्षमन्यासांवर्चोराधोऽअस्थेयसामिव ॥ समंजैषमिमाअहंसपत्नीरभिभूवरी । यथाहमस्यवीरस्यविराजानिजनस्यच ॥ १७ ॥ (१०।१२।९) तीव्रस्याभिवयसोऽअस्यपाहिसर्वरथाविहरीऽइहमुंच । इंद्रमात्वायजमानासोऽअन्येनिरीरमन्तुभ्यमिमेसुतासः ॥ तुभ्यंसुतास्तुभ्यमुसोत्वासस्त्वांगिरःश्वात्र्याऽआह्वयंति । इंद्रेदमद्यसवनंजुषाणोविश्वस्यविद्वाँऽइहपाहिसोमं ॥ यऽउंशतामनसासोममस्मैसर्वहृदादेवकामःसुनोति । नगाऽइंद्रस्तस्यपरादधातिप्रशस्तमिच्चारुमस्मैकृणोति ॥ अनुस्पष्टोभवत्येषोऽअस्ययोऽअस्मैरेवान्नसुनोतिसोमं । निररत्नौमघवातंदधातिब्रह्मद्विषोहंत्यनानुदिष्टः ॥ अश्वायंतोगव्यंतोवाजयंतोहवामहेत्वोपगंतवाऽउं । आभूषंतस्तेसुमतौनवायांवयमिंद्रत्वाशुनंहुवेम ॥ १८ ॥ (१०।१२।१०) मुंचामित्वाहविषा

(१०।१२।९) तीव्रस्येतिपंचर्चस्यसूक्तस्यवैश्वामित्रःपूरणइंद्रस्त्रिष्टुप्। (१०।१२।१०) मुंचामित्वेतिपंचर्चस्यसूक्तस्यप्राजापत्योयक्ष्मनाशनइंद्राग्नीत्रिष्टुबंत्यानुष्टुप्। (मुंचामीतिसूक्तेराजयक्ष्मघ्नमित्युक्तेराजयक्ष्मनाशनोदेवतेतिकेचित् अन्येप्रजापतिमाहुः इंद्राग्नीइतितुयास्कः इत्थंमतवैविध्येपि 'षळाहुतिश्चरुर्मुंचामित्वाहविषाजीवनायकमित्येतेनेति' गृह्यसूत्रानुसारिवृत्तिकृत्कारिकाकारादिभिरस्यसूक्तस्यैंद्राग्निदेवतात्वनिर्देशात्तेएवास्माभिरुक्ते)।

जीवंनायकमंज्ञातयक्ष्मादुतराजयक्ष्मात् । ग्राहिर्जग्राहयदिवैतदेनंतस्याऽइंद्राग्नीप्रमुमुक्तमेनं ॥ यदिक्षितायुर्यदिवापरेतोयदिमृत्योरंतिकंनीवऽएत । तमाहरामिनिर्ऋतेरुपस्थादस्पार्षमेनंशतशारदाय ॥ सहस्राक्षेणशतशारदेनशतायुषाहविषाहार्षमेनं । शतंयथेमंशरदोनयातींद्रोविश्वस्यदुरितस्यपारं ॥ शतंजीवशरदोवर्धमानःशतंहेमंतान्छतमुवसंतान् । शतमिंद्राग्नीसविताबृहस्पतिःशतायुषाहविषेमंपुनर्दुः ॥ आहार्षत्वाविंदंत्वापुनरागाःपुनर्नव । सर्वांगसर्वंतेचक्षुःसर्वमायुश्चतेविदं ॥ १९ ॥ (१०।१२।११) ब्रह्मणाग्निःसंविदानोरक्षोहाबाधतामितः । अमीवायस्तेगर्भंदुर्णामायोनिमाशये ॥ यस्तेगर्भममीवादुर्णामायोनिमाशये । अग्निष्टंब्रह्मणासहनिष्क्रव्यादमनीनशत् ॥ यस्तेहंतिपतयंतंनिषत्स्नुंयःसरीसृपं । जातंयस्तेजिघांसतितमितोनाशयामसि ॥ यस्तऽऊरूविहरत्यंतरादंपतीशये । योनिंयोऽअंतरारेह्ळितमितोनाशयामसि ॥ यस्त्वाभ्रातापतिर्भूत्वाजारोभूत्वानिपद्यते । प्रजांयस्तेजिघांसतितमितोनाश

(१०।१२।११) ब्रह्मणाग्निरितिषळर्चस्यसूक्तस्यब्राह्मोरक्षोहाप्रजापतिरनुष्टुप् । (अत्रसूक्तेऽनुक्रमण्यवष्टंभेनदेवतानिर्णयोनभवति । यतस्तत्रगर्भस्रावेप्रायश्चित्तिरित्युक्तं तेनसूक्तस्यप्रभावमात्रंद्योत्यतेनतुदेवता । अतोत्रप्रजापतिर्देवताग्राह्या । तथाचशौनकः 'मंत्रेषुह्यनिरुक्तेषुदेवतांकर्मतोवदेत् । मंत्रतःकर्मणाचैवप्रजापतिरसंभवे ' इति । भाष्यकारैरपिप्रजापतिरेवोक्तः । बृहद्देवतायांतुराक्षोघ्नाग्नेयमित्युक्तं तत्रयुक्तायुक्तंसद्भिर्विचारणीयम्) ।

यामसि ॥ यस्त्वास्वप्नेनतमसामोहयित्वानिपद्यते । प्रजांयस्तेजिघांसतितमितोनाशयामसि ॥ २० ॥ (१०।१२।१२) अक्षीभ्यांतेनासिकाभ्यांकर्णाभ्यांछुबुकादधि । यक्ष्मंशीर्षण्यंमस्तिष्काज्जिह्वायाविवृहामिते ॥ ग्रीवाभ्यस्तऽउष्णिहाभ्यःकीकसाभ्योऽअनूक्यात् । यक्ष्मंदोषण्य१मंसाभ्यांबाहुभ्यांवि० ॥ आंत्रेभ्यस्तेगुदाभ्योवनिष्ठोर्हृदयादधि । यक्ष्मंमतस्नाभ्यांयक्नःप्लाशिभ्योवि० ॥ ऊरुभ्यांतेऽअष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदाभ्यां । यक्ष्मंश्रोणिभ्यांभासदाद्भंससोवि० ॥ मेहनाद्वनंकरणाल्लोमभ्यस्तेनखेभ्यः । यक्ष्मंसर्वस्मादात्मनस्तमिदंवि० ॥ अंगादंगाल्लोम्नोलोम्नोजातंपर्वणिपर्वणि । यक्ष्मंसर्वस्मादात्मनस्तमिदंवि० ॥ २१ ॥ (१०।१२।१३) अपेहिमनसस्पतेपक्रामपरश्चर । परोनिर्ऋत्याऽआचक्ष्वबहुधाजीवतोमनः ॥ भद्रंवैवरंवृणतेभद्रंयुंजंतिदक्षिणं । भद्रंवैवस्वतेचक्षुर्बहुत्राजीवतोमनः ॥ यदाशसानिःशसाभिशसोपारिमजाग्रतोयत्स्वपंतः । अग्निर्विश्वान्यपदुष्कृतान्यजुष्टान्यारेऽअस्मद्दधातु ॥ यदिंद्रब्रह्मणस्पतेभिद्रोहंचरामसि । प्रचेतानऽआंगिरसोद्विषतांपात्वंहसः ॥ अजैष्माद्यासनामचाभूमानागसोवयं । जाग्रत्स्वप्नःसंकल्पःपापोयंद्विष्मस्तंसऽऋच्छतुयोनोद्वेष्टितमृच्छतु ॥ २२ ॥ (१०।१२।१४) देवाःकपोतऽइषितोयदिच्छन्दूतो

(१०।१२।१२) अक्षीभ्यामितिषळर्चस्यसूक्तस्यकाश्यपोविवृहायक्ष्महानुष्टुप् । (१०।१२।१३) अपेहीतिपंचर्चस्यसूक्तस्यांगिरसःप्रचेतादुःस्वप्ननाशनोनुष्टुप्तृतीयात्रिष्टुप्अंत्यापंक्तिः । (१०।१२।१४) देवाइतिपंचर्चस्यसूक्तस्यनैर्ऋतःकपोतःकपोतोविश्वेदेवास्त्रिष्टुप् ।

निर्ऋत्याऽइदमाजगाम । तस्माऽअर्चामकृणवामनिष्कृतिंशंनोऽअस्तुद्विपदेशंचतुष्पदे ॥ शिवःकपोतऽइषितोनोऽ
अस्त्वनागादेवाःशकुनोगृहेषु । अग्निर्हिविप्रोजुषतांहविर्नःपरिहेतिःपक्षिणीनोवृणक्तु ॥ हेतिःपक्षिणीनदभात्यस्मा
नाष्ट्र्यांपदंकृणुतेऽअग्निधाने । शंनोगोभ्यश्चपुरुषेभ्यश्चास्तुमानोहिंसीदिहदेवाःकपोतः ॥ यदुलूकोवदतिमोघमेत
द्यत्कपोतःपदमग्नौकृणोति । यस्यदूतःप्रहितऽएषऽएतत्तस्मैयमायनमोऽअस्तुमृत्यवे ॥ ऋचाकपोतंनुदतप्रणोदमिषं
मदंतःपरिगांनयध्वं । संयोपयंतोदुरितानिविश्वाहित्वानऽऊर्जंप्रपतात्पतिष्ठः ॥ २३ ॥ (१०।१२।१५) ऋषभंमा
समानानांसपत्नानांविषासहिं । हंतारंशत्रूणांकृधिविराजंगोपतिंगवां ॥ अहमस्मिसपत्नहेंद्रऽइवारिष्टोऽअक्षतः ।
अधःसपत्नामेपदोरिमेसर्वेऽअभिष्ठिताः ॥ अत्रैववोपिनह्याम्युभेऽआर्त्नीऽइवज्यया । वाचस्पतेनिषेधेमान्यथामदधं
रंवदान् ॥ अभिभूरहमागमंविश्वकर्मेणधाम्ना । आवश्चित्तमावोव्रतमावोहंसमितिंददे ॥ योगक्षेमंवऽआदायाहंभू
यासमुत्तमऽआवोमूर्धानमक्रमीं । अधस्पदान्मऽउद्वदतमंडूकाऽइवोदकान्मंडूकाऽउदकादिव ॥२४॥ (१०।१२।१६)
तुभ्येदमिंद्रपरिषिच्यतेमधुत्वंसुतस्यकलशस्यराजसि । त्वंरयिंपुरुवीरामुनस्कृधित्वंतपःपरितप्याजयःस्वः* ॥ स्व

(१०।१२।१५) ऋषभमितिपंचर्चस्यसूक्तस्यवैराजऋषभःसपत्ननाशनोनुष्टुबंत्यामहापंक्तिः । (शाक्करोवाऋषिः)। (१०।१२।१६)
तुभ्येदमितिचतुर्ऋचस्यसूक्तस्यगाथिभार्गवौविश्वामित्रजमदग्नीइंद्रस्तृतीयायाःसोमवरुणबृहस्पत्यनुमतिधातृविधातारोजगती ।

जिं॒तंमा॑हिं॑मं॒दा॒न॑मं॒धं॑सो॒हवा॑महे॒परिं॑श॒क्रं॑सु॒ताँऽउप॑ । इ॒मंनो॑य॒ज्ञमि॒हबो॒ध्याग॑हि॒स्पृधो॒जयं॑तंम॒घवा॑नमीमहे ॥ सोमं॑स्य॒
रा॒ज्ञोवरुं॑णस्य॒धर्मं॑णि॒बृह॒स्पते॒रनुं॑मत्याऽउ॒शर्मं॑णि । तवा॒हम॒द्यमं॑घव॒न्नुपं॑स्तुतौ॒धात॒र्विधा॑तःक॒लशाँ॑ऽअभक्षयं ॥ प्रसूं॑तो
भ॒क्षमं॑करं॑च॒रावपि॒स्तोमं॑चे॒मंप्रं॑थ॒मःसू॒रिरुन्मृं॑जे । सुतेसा॒तेन॒यद्याग॑मंवां॒प्रतिं॑विश्वामित्रजमदग्नी॒दमे॑ ॥ २५ ॥
(१०।१२।१७) वातं॑स्य॒नुमं॑हि॒मान॒रथं॑स्यरु॒जन्नें॑तिस्त॒नयं॑न्नस्य॒घोषं॑ः । दि॒वि॒स्पृग्या॑त्यरु॒णानिं॑कृ॒ण्वन्नु॒तोऽएं॑तिपृथि॒
व्यारे॒णुमस्यं॑न् ॥ संप्रेरं॑ते॒ऽअनु॒वातं॑स्यवि॒ष्ठाऽऐनं॑गच्छंति॒समं॑न॒नंनयोषा॑ः । ताभिं॑ःस॒युक्स॒रथं॑दे॒वऽईंयते॒स्यविश्वं॑स्य॒भुवं॑
नस्य॒राजा॑ ॥ अ॒न्तरिं॑क्षेप॒थिभि॒रीयं॑मानो॒ननिविं॑शतेकत॒मच्च॒नाहं॑ः । अ॒पांसखा॑प्रथ॒मजाऽऋ॒तावा॒क्वं॑स्विज्ज्ञा॒तःकुत॒ऽआ
बं॑भूव ॥ आ॒त्मादे॒वाना॒ंभुवं॑नस्य॒गर्भो॑यथाव॒शंचं॑रतिदे॒वऽए॒षः । घोषा॒ऽइदं॑स्यशृण्विरे॒नरू॒पंत॒स्मैवाता॑यह॒विषा॑विधेम
॥ २६ ॥ (१०।१२।१८) म॒यो॒भूर्वातो॑ऽअ॒भिवा॑तू॒स्राऽऊर्जं॑स्वती॒रोषं॑धी॒रारिं॑शंतां । पीवं॑स्वतीर्जी॒वधं॑न्याःपिबं॑त्वव॒
सायं॑प॒द्वतें॑रुद्रमृळ ॥ याःसरू॑पा॒विरू॑पा॒ऽएकं॑रू॒पायासा॑म॒ग्निरिष्ट्या॒नामा॑नि॒वेदं॑ । याऽअंगिं॑रस॒स्तपं॑से॒हच॒क्रुस्ताभ्यं॑ःप
र्जन्य॒महि॒शर्मं॑यच्छ ॥ यादे॒वेषु॑त॒न्व१॒मैरं॑यंत॒यासा॒ंसोमो॒विश्वा॑रू॒पाणि॒वेदं॑ । ताऽअ॒स्मभ्यं॒पयं॑सा॒पिन्वं॑मानाःप्र॒जावं॑ती

(१०।१२।१७) वातस्येतिचतुर्ऋचस्यसूक्तस्यवातायनोऽनिलोवायुस्त्रिष्टुप् । (१०।१२।१८) मयोभूरितिचतुर्ऋचस्यसूक्तस्यकाक्षीवतः
शंबरोगावस्त्रिष्टुप् ।

रिंद्रगो॒ष्ठेरि॑रीहि ॥ प्र॒जाप॑ति॒र्मह्य॑मे॒ताररा॑णो॒विश्वै॑र्दे॒वैःपि॒तृभि॑ःसंविदा॒नः । शि॒वाःस॒तीरुप॑नोगो॒ष्ठमाकु॒स्तासां॑व॒यंप्र॒जया॒संसं॑देम ॥ २७ ॥ (१०।१२।१९) वि॒भ्राट्बृ॒हत्पि॑बतुसो॒म्यंमध्वायु॒र्दध॑द्य॒ज्ञप॑ता॒वावि॑ह्रुतं । वात॑जूतो॒योऽअ॒भिरक्ष॑ति॒त्मना॑प्र॒जाःपु॑पोषपुरु॒धाविरा॑जति ॥ वि॒भ्राट्बृ॒हत्सुभृ॑तंवाज॒सात॑मं॒धर्म॑न्दि॒वोध॒रुणे॑स॒त्यमर्पि॑तं । अ॒मि॒त्र॒हावृ॒त्र॒हाद॑स्यु॒हंत॑मं॒ज्योति॑र्जज्ञेऽअसुर॒हासप॒त्नहा+ ॥ इ॒दंश्रेष्ठं॒ज्योति॑षां॒ज्योति॑रुत्त॒मंवि॑श्व॒जिद्ध॑न॒जिदु॑च्यतेबृ॒हत् । वि॒श्व॒भ्राड्भ्रा॒जोम॒हि॒सूर्यो॑दृ॒शऽउ॒रुप॑प्रथे॒सह॒ऽओजो॒ऽअच्यु॑तं ॥ वि॒भ्राजं॒ज्योति॑षा॒स्व१॒र्गच्छो॑रोच॒नंदि॒वः । येने॒माविश्वा॒भुव॑ना॒न्याभृ॑ता॒वि॒श्वक॑र्मणावि॒श्वदे॑व्यावता ॥ २८ ॥ (१०।१२।२०) त्वंत्यमि॒टतो॒रथ॒मिंद्र॒प्राव॑ःसु॒ताव॑तः । अशृ॑णोःसो॒मिनो॒हवं॑ ॥ त्वंम॒खस्य॒दोध॑त॒ःशिरोव॑त्व॒चोभ॑रः । अग॑च्छःसो॒मिनो॑गृ॒हं+ ॥ त्वंत्य॑मिंद्र॒मर्त्य॑मास्त्रबु॒ध्नाय॑वे॒न्यं । मुहु॑ःश्रथ्ना॒मन॒स्यवे॑ ॥ त्वंत्य॑मिंद्र॒सूर्यं॑प॒श्चासंतं॑पु॒रस्कृ॑धि । दे॒वानां॑चित्ति॒रोवशं॑ ॥ २९ ॥ (१०।१२।२१) आया॑हि॒वन॑सास॒हगाव॑ःसचंतवर्त॒निंयदूध॑भिः ॥ आया॑हि॒वस्व्या॑धि॒यामं॑हिष्ठोजार॒यन्म॑खःसु॒दानु॑भिः ॥ पि॒तु॒भृतो॒नतं

(१०।१२।१९) विभ्राडितिचतुर्ऋचस्यसूक्तस्यसौर्योविभ्राट्सूर्योजगत्यंत्यास्तारपंक्तिः । (१०।१२।२०) त्वंत्यमितिचतुर्ऋचस्यसूक्तस्य भार्गवइटइंद्रोगायत्री । (१०।१२।२१) आयाहीतिचतुर्ऋचस्यसूक्तस्यसंवर्तउषाद्विपदाविराट् ।

Digitization by eGangotri. Funding by MoE-IKS

तुमित्सुदानंवःप्रतिदध्मोयजामसि ॥ उषाऽअपस्वसुस्तमःसंवर्तयतिवर्तनिंसुजातता ॥३०॥ (१०।१२।२२) आत्वा
हार्षमंतरैधिध्रुवस्तिष्ठाविचाचलिः । विशस्त्वासर्वावांछंतुमात्वद्राष्ट्रमधिभ्रशत् ॥ इहैवैधिमापच्योष्ठाःपर्वतऽइवा
विचाचलिः । इंद्रऽइवेहध्रुवस्तिष्ठेहराष्ट्रमुधारय ॥ इममिंद्रोऽअदीधरद्ध्रुवंध्रुवेणहविषा । तस्मैसोमोऽअधिब्रवत्त
स्माऽउब्रह्मणस्पतिः ॥ ध्रुवाद्यौर्ध्रुवापृथिवीध्रुवासःपर्वताऽइमे । ध्रुवंविश्वमिदंजगद्ध्रुवोराजाविशामयं+ ॥ ध्रुवंतेरा
जावरुणोध्रुवंदेवोबृहस्पतिः । ध्रुवंतऽइंद्रश्चाग्निश्चराष्ट्रंधारयतांध्रुवं+ ॥ ध्रुवंध्रुवेणहविषाभिसोमंमृशामसि । अथोत
ऽइंद्रःकेवलीर्विशोबलिहृतस्करत् ॥ ३१ ॥ (१०।१२।२३) अभीवर्तेनहविषायेनेंद्रोऽअभिवावृते । तेनास्मान्ब्र
ह्मणस्पतेभिराष्ट्रायवर्तय ॥ अभिवृत्यसपत्नानभियानोऽअरातयः । अभिपृतन्यंतंतिष्ठाभियोनऽइरस्यति ॥ अभि
त्वादेवःसविताभिसोमोऽअवीवृतत् । अभित्वाविश्वाभूतान्यभीवर्तोयथाससि ॥ येनेंद्रोहविषाकृत्व्यभवद्द्युम्न्युत्त
मः । इदंतदक्रिदेवाऽअसपत्नःकिलाभुवं ॥ असपत्नःसपत्नहाभिराष्ट्रोविषासहिः । यथाहमेषांभूतानांविराजानिज
नस्यच ॥ ३२ ॥ (१०।१२।२४) प्रवोग्रावाणःसवितादेवःसुवतुधर्मणा । धूर्षुयुज्यध्वंसुनुत+ ॥ ग्रावाणोऽअप

(१०।१२।२२) आत्वेतिषळृर्चस्यसूक्तस्यध्रुवोराजानुष्टुप् । (१०।१२।२३) अभीवर्तेनेतिपंचर्चस्यसूक्तस्याभीवर्तोराजानुष्टुप् ।
(१०।१२।२४) प्रवइतिचतुर्ऋचस्यसूक्तस्यऊर्ध्वग्रावार्बुदःसर्पऋषिपुत्रोग्रावाणोगायत्री ।

दु॒च्छु॒नामप॑सेधतदु॒र्म॒तिं । उ॒स्राःक॑र्तनभेष॒जं+ ॥ ग्रावा॑ण॒ऽउप॑रे॒ष्वाम॑ही॒यंते॑स॒जोष॑सः । वृष्णे॒दध॑तो॒वृष्ण्यँ॑ ॥ ग्रावा॑णःसवि॒तानुवो॑दे॒वःसु॑वतु॒धर्म॑णा । यज॑मानायसुन्व॒ते+ ॥ ३३ ॥ (१०।१२।२५) प्रसू॒नव॑ऽऋभू॒णांबृ॒हन्न॑वंतवृ॒जनां॑ । क्षा॒मायेवि॒श्वधा॑य॒सोश्न॑न्धे॒नुंन॒मात॑रँ ॥ प्रदे॒वंदे॒व्याधि॒याभर॑ताजा॒तवे॑दसं । ह॒व्यानो॑वक्षदानु॒षक्+ ॥ अ॒यमु॒ष्यप्रदे॑व॒युर्होता॑य॒ज्ञाय॑नीयते । रथो॒नयो॑र॒भीवृ॑तो॒घृणी॑वान्चेतति॒त्मना॑ ॥ अ॒यम॒ग्निरु॑रुष्यत्य॒मृता॑दिव॒जन्म॑नः । सह॑सश्चि॒त्सही॑यान्दे॒वोजी॒वात॑वेकृ॒तः+ ॥ ३४ ॥ (१०।१२।२६) प॒तं॒गम॒क्तमसु॑रस्यमा॒यया॑हृ॒दाप॑श्यंति॒मन॑साविप॒श्चितः॑ । स॒मु॒द्रेऽअं॒तःक॒वयो॒विच॑क्षते॒मरी॑चीनांप॒दमि॑च्छंतिवे॒धसः॑ ॥ प॒तं॒गोवाचं॒मन॑साबिभर्ति॒तांगं॑ध॒र्वो॑वद॒द्गर्भे॑ऽअं॒तः । तांद्योत॑मानांस्व॒र्यं॑मनी॒षामृ॒तस्य॑प॒देक॒वयो॒निपां॑ति ॥ अप॑श्यंगो॒पामनि॑पद्यमान॒माच॒परा॑चप॒थिभि॒श्चरं॑तं । सस॒ध्रीची॒ःसविषू॑ची॒र्वसा॑न॒ऽआव॑रीवर्ति॒भुव॑नेष्वं॒तः+ ॥ ३५ ॥ (१०।१२।२७) त्यमू॒षुवा॒जिनं॑दे॒वजू॑तंस॒हावा॑नंतरु॒तारं॒रथा॑नां । अरि॑ष्टनेमिंपृत॒नाज॑मा॒शुंस्व॒स्तये॒ताक्ष्यँ॑मि॒हाहु॑वेम ॥ इंद्र॑स्येवरा॒तिमा॒जोहु॑वानाःस्व॒स्तये॒नाव॑मि॒वारु॑हेम । उ॒र्वीन॒पृथ्वी॒बहु॑ले॒गभी॑रे॒मावा॒मेतौ॒माप॒रेतौ॑रिषाम ॥ स॒द्यश्चि॒द्यःशव॑सा॒पंच॑कृ॒ष्टीःसूर्य॑ऽइव॒ज्योति॑षा॒पस्त॒तान॑ । स॒ह॒स्र॒साःश॑

(१०।१२।२५) प्रसूनवइतिचतुर्ऋचस्यसूक्तस्यार्भवःसूनुरग्निराद्यायाऋभवोनुष्टुप्द्वितीयागायत्री । (१०।१२।२६) पतंगमितितृचस्यसूक्तस्यप्राजापत्यःपतंगोमायाभेदस्त्रिष्टुप्आद्याजगती । (१०।१२।२७) त्यमूष्वितितृचस्यसूक्तस्यताक्ष्योरिष्टनेमिस्ताक्ष्यस्त्रिष्टुप् ।

तसाऽअस्यरंहिनस्मांवरंतेयुवतिंनशर्यां ॥ २६ ॥ (१०।१२।२८) उत्तिष्ठतावपश्यतेंद्रस्यभागमृत्वियं । यदिंश्रा
तोजुहोतनयद्यश्रांतोममत्तनं ॥ श्रातंहविरोष्विंद्रप्रयाहिजगामसूरोऽअध्वंनोविमध्यं । परित्वासतेनिधिभिःसखा
यःकुलपानव्राजपतिंचरंतं ॥ श्रातंमन्यऽऊधंनिश्रातमग्नौसुश्रांतंमन्येतदृतंनवीयः । माध्यंदिनस्यसवनस्यदध्नःपिबें
द्रवज्रिन्पुरुकृज्जुषाणः+ ॥ २७ ॥ (१०।१२।२९) प्रसंसाहिषेपुरुहूतशत्रून्ज्येष्ठस्तेशुष्मंऽइहरातिरस्तु । इंद्राभ
रदक्षिणेनावसूनिपतिःसिंधूनामसिरेवतीनां ॥ मृगोनभीमःकुचरोगिरिष्ठाःपरावतऽआजगंथापरस्याः । सृकंसंशा
यंपविमिंद्रतिग्मंविशत्रून्ताह्लिविमृधोनुदस्व ॥ इंद्रंक्षत्रमभिवाममोजोजायथावृषभचर्षणीनां । अपानुदोजनममि
त्रयंतमुरुंदेवेभ्योऽअकृणोरुलोकं+ ॥ २८ ॥ (१०।१२।३०) प्रथश्चयस्यंसप्रथश्चनामानुष्टुभस्यहविषोहविर्यत् ।
धातुर्द्युतानात्सवितुश्चविष्णोरथंतरमाजभारावसिष्ठः ॥ अविंदन्तेऽअतिहितंयदासीद्यज्ञस्यधामपरमंगुहायत् । धा
तुर्द्युतानात्सवितुश्चविष्णोर्भरद्वाजोबृहदाचक्रेऽअग्नेः+ ॥ तेविंदन्मनसादीध्यानायजुःष्कन्नंप्रथमंदेवयानं । धातुर्द्यु

(१०।१२।२८) उत्तिष्ठतेतितृचस्यसूक्तस्यौशीनरःशिबिःकाशिराजःप्रतर्दनोरोहिदश्वोवसुमनाइतिक्रमेणैकर्चाइंद्रस्त्रिष्टुप्आद्यानुष्टुप् । (१०।१२।२९) प्रससाहिषइतितृचस्यसूक्तस्यैंद्रिर्जयइंद्रस्त्रिष्टुप् । (१०।१२।३०) प्रथश्चेतितृचस्यसूक्तस्यवासिष्ठःप्रगाथाभारद्वाजःसप्रथःसौर्योघर्मश्चैकर्चाविश्वेदेवास्त्रिष्टुप् ।

तांनात्सवितुश्चविष्णोरासूर्यांदभरन्घर्ममेते+ ॥ ३९ ॥ (१०।१२।३१) बृहस्पतिर्नयतुदुर्गहातिरःपुनर्नेषदघशंसायमन्मं । क्षिपदशस्तिमपदुर्मतिंहन्नथाकरद्यजमानायशंयोः+ ॥ नराशंसोनोवतुप्रयाजेशंनोऽअस्त्वनुयाजोहवेषु । क्षिपद० ॥ तपुर्मूर्धातपतुरक्षसोयेब्रह्मद्विषःशरवेहंतवाऽउ । क्षिपद० ॥ ४० ॥ (१०।१२।३२) अपश्यंत्वामनसाचेकितानंतपसोजातंतपसोविभूतं । इहप्रजामिहरयिंरराणःप्रजायस्वप्रजयापुत्रकाम ॥ अपश्यंत्वामनसादीध्यानांस्वायांतनूऽऋत्व्येनाधमानां । उपमामुच्चायुवतिर्बभूयाःप्रजायस्वप्रजयापुत्रकामे ॥ अहंगर्भमदधामोषधीष्वहंविश्वेषुभुवनेष्वंतः । अहंप्रजाऽअजनयंपृथिव्यामहंजनिभ्योऽअपरीषुपुत्रान्+ ॥ ४१ ॥ (१०।१२।३३) विष्णुर्योनिंकल्पयतुत्वष्टारूपाणिपिंशतु । आसिंचतुप्रजापतिर्धातागर्भंदधातुते ॥ गर्भंधेहिसिनीवालिगर्भंधेहिसरस्वति । गर्भंतेऽअश्विनौदेवावाधत्तांपुष्करस्रजा ॥ हिरण्ययीऽअरणीयंनिर्मंथतोऽअश्विनां । तंतेगर्भंहवामहेदशमेमासिसूतवे ॥ ४२ ॥ (अथपरिशिष्टं ॥ नेजमेषपरापतसुपुत्रःपुनरापत । अस्यैमेपुत्रकामायैगर्भमाधेहियःपुमान् ॥ यथेयंपृ

(१०।१२।३१) बृहस्पतिरितितृचस्यसूक्तस्यबार्हस्पत्यस्तपुर्मूर्धाबृहस्पतिस्त्रिष्टुप् । (१०।१२।३२) अपश्यमितितृचस्यसूक्तस्यप्राजापत्यःप्रजावानृषिःयजमानोयजमानपत्नीहोताइतिक्रमेणदेवतास्त्रिष्टुप् । (१०।१२।३३) विष्णुरितितृचस्यसूक्तस्यगर्भकर्तात्वष्टाआद्यायाविष्णुत्वष्टृप्रजापतिधातारोद्वितीयायाःसिनीवालिसरस्वत्यश्विनस्तृतीयायाअश्विनावनुष्टुप् । (प्राजापत्योविष्णुर्वाऋषिः) ।

थिवीमह्युत्तानागर्भमादधे । एवंतंगर्भमाधेहिदशमेमासिसूतवे ॥ विष्णोःश्रेष्ठेनरूपेणास्यांनार्यांगवीन्यां । पुमांसं पुत्रानाधेहिदशमेमासिसूतवे ॥ १ ॥) (१०।१२।३४) महित्रीणामवोस्तुद्युक्षंमित्रस्यार्यम्णः । दुराधर्षंवरुणस्य ॥ नहितेषांममाचननाध्वंसुवारणेषु । ईशेरिपुरघशंसः ॥ यस्मैपुत्रासोऽअदितेःप्रजीवसेमर्त्याय । ज्योतिर्यच्छंत्यजस्रं ॥ ४३ ॥ (१०।१२।३५) वातऽआवातुभेषजंशंभुमयोभुनोहृदे । प्रणऽआयूँषितारिषत् ॥ उतवातपितासिनऽउतभ्रातोतनःसखा । सनोजीवातवेकृधि ॥ यददोवाततेगृहे३मृतस्यनिधिर्हितः । ततोनोदेहिजीवसे ॥ ४४ ॥ (१०।१२।३६) प्राग्नयेवाचमीरयवृषभायक्षितीनां । सनःपर्षदतिद्विषः ॥ यःपरस्याःपरावतस्तिरोधन्वातिरोचते । सनः० ॥ योरक्षाँसिनिजूर्वतिवृषाशुक्रेणशोचिषा । सनः० ॥ योविश्वाभिविपश्यतिभुवनासंचपश्यति । सनः० ॥ योऽअस्यपारेरजसःशुक्रोऽअग्निरजायत । सनः० ॥ ४५ ॥ (परिशिष्टं ॥ अनीकवंतमूतयेग्निंगीर्भिर्हवा

(१०।१२।३४) महीतितृचस्यसूक्तस्यवारुणिःसत्यधृतिरादित्यागायत्री । (महिसत्यधृतिर्वारुणिरादित्यंस्वस्त्ययनमित्यनुक्रमण्या अदितिर्देवतायस्येत्यादित्यंआदित्योदेवतायस्येत्यादित्यमितिद्वैविध्येनप्राप्तावप्यत्रादित्यानामेवदेवतात्वंनादितेः 'माहित्रंयन्महित्रीणामादित्यानांस्तुतिंविदुः ' इतिशौनकोक्तेः)। (१०।१२।३५) वातइतितृचस्यसूक्तस्यवातायनउलोवायुर्गायत्री । (१०।१२।३६) प्राग्नयइति पंचर्चस्यसूक्तस्याग्नेयोवत्सोग्निर्गायत्री ।

महे । सनः॑०)॥(१०।१२।३७) प्रनू॒नंजा॒तवे॑दस॒मश्वं॑हिनोतवा॒जिनं॑ । इ॒दंनो॑ब॒र्हिरा॒सदे॑ ॥ अ॒स्यप्र॑जा॒तवे॑दसो॒विप्रं॑वी
रस्यमी॒ह्लुषः॑ । म॒हीमि॑यर्मि॑सुष्टुतिं॑ ॥ यारुचो॑जा॒तवे॑दसोदे॑व॒त्राह॑व्य॒वाह॑नीः । ताभि॑र्नो॑य॒ज्ञमि॑न्वतु ॥४६॥ (१०।१२।३८)
आयंगौः॑पृश्नि॑रक्रमी॒दस॑दन्मा॒तरं॑पु॒रः । पि॒तरं॑चप्र॒यन्त्स्वः॑* ॥ अं॒तश्च॑रतिरोच॒नास्यप्रा॒णाद॑पान॒ती । व्य॑ख्यन्महि॒षो
दिवं॑ ॥ त्रिं॒शद्धाम॒विरा॑जति॒वाक्प॑तं॒गाय॑धीयते । प्रति॒वस्तो॒रह॒द्युभिः॑ ॥ ४७ ॥ (१०।१२।३९) ऋ॒तंच॑स॒त्यंचा॒
भी॑द्धा॒त्तप॒सोध्य॑जायत । त॒तोरात्र्य॑जायत॒ततः॑समु॒द्रोऽअ॑र्ण॒वः+ ॥ स॒मु॒द्राद॑र्ण॒वादधि॑संवत्स॒रोऽअ॑जायत । अ॒हो॒रा
त्राणि॑वि॒दध॒द्विश्व॑स्यमि॒षतो॑व॒शी+ ॥ सू॒र्या॒चं॒द्र॒मसौ॑धा॒ताय॑थापू॒र्वम॑कल्पयत् । दिवं॑चपृथि॒वींचा॒ंतरि॑क्ष॒मथो॒स्वः॑*
